Digitized by Sarayu Trust Foundation Delhi and eGangotri.



रत्नगढनिवासी पं० श्रीचतुर्थीलालजी।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भूमिका ।

अद्य खलु सकलभूतलनिवासिनामार्यजनानां पुरतः किंचिद्विज्ञापनं लिखितुमस्मदीयं मनोऽतितरामानन्दमाधत्ते प्रवर्तयति च सत्परिश्रमाभिनन्दनाय । तत्किमपि कथमपि वर्ण्यमानमप्रमुं प्रार्थनाञ्जलिं निजसपर्यायै समभिनन्दन्तु सभ्यजनाः । भोः विद्वांसो महाप्राज्ञाः भवतु मनितमेतद्यदस्मिन् भारतवर्षे स्वभावतो मनुष्यमात्रस्य चित्ते दुःखनिवृत्तिपूर्वकसुखोपलब्धिस्पृहातिष्ठत्येव परञ्च सा महर्षिप्रणीतपरमपुनीतसिद्धान्तग्रन्थावगतिगम्याऽऽस्ते । यतः—"पुण्यस्य फलमिच्छन्ति पुण्यं नेच्छन्ति मानवाः । न पापफलमिच्छन्ति पापं कुर्वन्ति यत्नतः॥" वयं सुखिनः स्यामेति सर्वेऽपि कामयन्तु किंतु तत्साधनभूतानि कर्माणि सर्वदैवोपेक्षन्ते । तत्सुकर्माविज्ञापयिषया भगवान् स्वयं वेदरूपेणाऽऽविर्भूय ब्राह्मणद्वारा प्रकाशितवान् । "एतं विदन्ति वेदेन तस्माद्वेदस्य वेदता" या०व० ॥ "वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश" इति । स च भगवान् वेदः कर्मकांडोपासनाकाण्डज्ञानकाण्डभेदात्त्रिविधः । तत्र पूर्वाचार्यैः प्रथमं कर्मकाण्डस्य गणना विहिता । दृष्टान्तोप्यत्र यथैकं शुष्ककाष्ठं कारुयन्त्रकर्मद्वारा संस्कृतं सत्कांचित्संज्ञां प्राप्य बहुमूल्यं जायते तथैव कर्मकाण्डद्वारासंस्कृतशरीरः पुमानुपासनाकांड ज्ञानकाण्डाधिकारी सम्पद्यते । यथा-"यः क्षत्रदेहं परितङ्क्य टङ्कैः स गाधिपुत्रो गृहमभ्युपैति" इत्यादि ब्र०सू० शास्त्रयोनित्वात् १।१।३॥ क्षत्रियत्वगतेश्चोत्तरत्र चैत्ररथेन लिङ्गात् १।३।३५॥ संस्कारपरामर्शात्तदभावाभिलापाच्च१।३।३६॥ या०व "मातुर्यदग्रे जायन्ते द्वितीयं मौंजिबन्धनात् ॥ ब्राह्मणक्षत्रियविशस्तस्मादेते द्विजाः स्मृताः ॥१॥ निषेकादिश्मशानान्तो मंत्रैर्यस्योदितो विधिः ॥ तस्य शास्त्रेऽधिकारोस्मिन् ज्ञेयो नान्यस्य कस्यचित् ॥ २ ॥" मानवे "राजा राजसूयेन स्वाराज्यकामो ज्योतिष्टोमेन यजेत" "कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः । एवं त्वयि नान्यथेतोस्ति न कर्म लिप्यते नरे" "यस्य पर्णमयी जुहूर्भवति न स पापं श्लोकं शृणोति इत्येव" यदेव विद्यया करोति श्रद्धोपनिषदा तदेव वीर्यवत्तरं भवति" छां०उ०॥ "जनको ह वै वैदेहो बहुदक्षिणेन यज्ञेनेजे" बृ०दा०॥ छां०उ० "यक्ष्यमाणो ह वै भगवन्तोहमस्मि" य०वे० ॥ "तमेव विदित्वाऽति मृत्युमेति नान्यः पन्था विद्यतेऽयनाय" उल्लिखितकर्मकाण्डकर्तव्यताकसप्रमाणश्रुतिस्मृतिनियमानुरेण कर्मकाण्डमावश्यकीयं बुद्धा मुद्रितमुद्यमाणशांतिप्रकाशसंस्कारप्रकाशश्राद्धप्रकाशादि

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कर्मकाण्डनिबन्धनिर्माणरूपमयासोमयाऽन्वकारि । तदनन्तरमिदानीमुपासनाकाण्डमावश्यकीयं बुद्ध्वाऽयमनुष्ठानप्रकाशनामोपासनानिबन्धनिर्माणरूपमयासोऽन्वकारि च । तत्र च 'इतिहासः पुरावृत्तम्' इत्याभिधानिकवचनात्तंत्राणां पुरावृत्तत्वेनेतिहासत्वं "इतिहासपुराणानि पंचमो वेद उच्यते" इत्यादिवचनकदम्बादितिहासत्वेन वेदत्वं च सिद्धमतः सर्वाण्यप्यनुष्ठानानि वैदिकानि विहितानि । यतः–" वेदप्रणिहितो धर्मो ह्यधर्मस्तद्विपर्ययः ॥ वेदो नारायणः साक्षात्स्वयंभूरिति शुश्रुम " इति वचनस्य जागरूकत्वाद्वैदिकानुष्ठानानामेवोपासनाकाण्डत्वात्त्रिविधवेदस्य सिद्धिरित्यलम् ॥

सोऽयमनुष्ठानप्रकाशनिबंधो विचारकाण्डपद्धतिकाण्डपुरश्चरणकाण्डैस्त्रिधा विभक्तस्तत्रापि तत्प्रकरणैर्बहुधा विभक्तः सन् तत्तद्देवताऽनुष्ठानानि साङ्गोपाङ्गानि द्रढयति । अयं ग्रंथः श्रीवेङ्कटेश्वर भक्तिपरायणश्रीवैष्णवधर्मनिष्ठ–श्रीकृष्णदासात्मज खेमराजश्रेष्ठिना मुद्रणाय प्रार्थितः सन् मयाऽपि सानन्देन सर्वाधिकारपुरस्सरं दत्तः । तेन च निजशास्त्रिगणद्वारा संशोध्य परिष्कृत्य च मुद्रयित्वा प्रकाशितः

अत्र अक्षरयोजकयोजिताक्षराणां विपर्यासादिजनितानामशुद्धानां मनुष्यनिष्ठनैसर्गिकभ्रमप्रमादयोर्दुष्परिहरत्वात्क्षन्तव्यः स्वल्पापराध इति प्रार्थयते रत्नगढनिवासिचतुर्थीलालशर्मा ।

विद्वत्कृपाभिलाषी–चतुर्थीलालशर्मा ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

श्रीः ।

अनुष्ठानप्रकाशस्यानुक्रमणिका ।

विषय.	पृष्ठ.	विषय.	पृष्ठ.	विषय.	पृष्ठ.	विषय.	पृष्ठ.
(अथ विचारकाण्डम्)	१	निषिद्धासनानि	३	आह्निककृत्यविचारः	७	पंचगव्यं	,,
मंगलाचरणम्	,,	मालाविचारः	,,	देवपूजाविचारः	८	उद्वर्तनद्रव्याणि	१०
अनुष्ठानकालनियमः	,,	मालामाणिसंख्या	४	कामनाभेदेनदेवार्चनम्	,,	सौभाग्यद्रव्याणि	,,
अनुष्ठानयोग्याचार्यः	,,	कामनाभेदेनांगुलीनियमः	,,	देवप्रतिमाविचारः...	९	कौतुकद्रव्याणि	,,
निंद्याचार्यः	२	मालासंस्कारविचारः	,,	पूजोपचाराः	,,	गंधविचारः	,,
जपयोग्याब्राह्मणाः	,,	करमालाविचारः	,,	षोडशोपचाराः	,,	देवभेदेनगंधाष्टकम्	,,
निंदिताजापकाः	,,	जपेकर्तव्यता	,,	राजोपचाराः	,,	गंधदानेअंगुलीविचारः	,,
अनुष्ठानयोग्यादेशाः	,,	जपप्रशंसा	५	पुरुषसूक्तेनपूजाविचारः	,,	गंधदानेमुद्रा	,,
निषिद्धदेशः	,,	जपकर्तृणांनियमाः	,,	पंचामृतविचारः	,,	गंधदानफलम्	,,
जपयोग्यासनानि	,,	जपदशांशहवनादिविचारः... ...	६	स्नानादिपात्रेषुप्रक्षेपणीयाःपदार्थाः	,,	ग्राह्यपुष्पाणि	,,

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

विषय.	पृष्ठ.
देवभेदेनवर्जाक्षतादीनि	११
धूपविचारः	,,
धूपद्रव्याणि	,,
षोडशांगधूपः	,,
दशांगधूपः	,,
धूपनिवेदने अंगुलीविचारः ...	,,
धूपादिस्थानम्	१२
दीपविचारः	,,
दीपपात्रम्	,,
दीपस्नेहविचारः	,,
दीपमहिमा	,,
नैवेद्यविचारः	,,
नैवेद्यपात्राणि	,,
नैवेद्यकालः	,,
नैवेद्यंस्थापनक्रमः	,,
नैवेद्यभक्षणविचारः	,,
शिवनैवेद्ये विशेषः	,,
नैवेद्यशेषभागिनः	,,
देवनिर्माल्यत्यागे दोषः	१३
तांबूलादिविचारः	,,
नीराजनप्रकारः	,,
साष्टांगनमस्कारप्रकारः	,,
नवधा भक्तिविचारः	,,
निर्माल्यग्रहणविचारः	,,
शिवलिंगनिर्माल्यविशेषः	,,
प्रदक्षिणाविचारः	,,
शिवस्य प्रदक्षिणात्रयं कार्यं	,,
चंडसोमसूत्रादिसहिताशिवे अर्द्धप्रदक्षिणा	,,
आसनाद्युपचारफलम्	,,
पंचामृतफलम्	१४
महास्नाने पंचामृतप्रमाणम्.... ..	,,
देवभेदेन वस्त्राणि...	,,
देवभेदेननिषिद्धवाद्यानि	,,
होमविचारप्रकरणम्	,,
मंडपनिर्माणप्रकारः	१५
कुंडनिर्माणप्रकारः...	,,
चतुरस्रादिकुंडफलम्	१६
वर्णभेदेन कुंडप्रकारः	,,
कुंडस्वरूपम्	,,
कुंडाभावे स्थंडिलप्रकारः	,,
कुंडाकारस्थंडिलप्रकारः	,,
कुंडखातेफलविचारः	,,
वेदिदिग्विचारः	,,
भद्रविचारः...	,,
मंडलकरणप्रकारः...	१७
भद्रार्थेवर्णनिश्चयः...	,,
सर्वतोभद्रमंडलप्रकारः	,,
अष्टदलमंडलम्	,,
एकलिंगतोभद्रं गौरीतिलकं... ...	,,
चतुर्लिंगतोभद्रप्रकारः	,,
अष्टलिंगतोभद्रप्रकारः	,,
हरिहरात्मकद्वादशलिंगतोभद्रप्रकारः	१८
रुद्रयामलोक्तद्वादशलिंगतोभद्रप्रकारः	,,
सूर्यमंडलप्रकारः	,,
गणपतिमंडलप्रकारः	,,
होमप्रयोगानुक्रमः...	१९
सर्वकर्मोपयोगिसाधारणकर्माणि ...	,,
धौतवस्त्रविचारः	,,
अहतवस्त्रलक्षणम्...	,,
निषिद्धवस्त्राणि	,,

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

विषय.	पृष्ठ.	विषय.	पृष्ठ.	विषय.	पृष्ठ.	विषय.	पृष्ठ.
त्रिकच्छलक्षणम्	२०	ग्रहमंत्राः	,,	अभ्युक्षणप्रकारः	,,	पवित्रलक्षणम्	,,
आसुरी कक्षा	,,	ग्रहदक्षिणाः	,,	अग्निस्थापनविचारः	,,	पवित्रप्रयोजनम्	,,
स्नानप्रशंसा	,,	ग्रहपूजावश्यकता	,,	उत्तमाद्यग्निविचारः	,,	प्रोक्षणीविचारः	,,
संध्यां विना निष्फलता	,,	अयुतहवनप्रकारः	२३	त्याज्याग्निविचारः	,,	आज्यस्थालीविचारः	,,
प्रौढपादलक्षणम्	,,	लक्षहवनप्रकारः	,,	कर्मविशेषे अग्निनामानि	,,	चरुस्थालीविचारः	,,
पवित्रधारणविचारः	,,	कोटिग्रहहवनप्रकारः	,,	अग्निजिह्वानामानि	२६	संमार्जनकुशविचारः	,,
वर्णभेदेनपवित्रेदर्भसंख्या	,,	कुंडसंस्कारे पारस्करसूत्राणि ...	२४	जिह्वास्थानानि	,,	समिल्लक्षणम्	,,
हेमात्मकपवित्रम्	,,	कुशकंडिकाव्याख्या	,,	ब्रह्मस्थापनादिविचारः	,,	ग्राह्याग्राह्यसमिधः	२८
त्रिपुंड्रतिलकप्रशंसा	,,	परिसमूहनविचारः...	,,	ब्रह्मलक्षणम्	,,	समिद्वृक्षाः	,,
ऋषिछंदाद्यावश्यकता	२१	समूहने दर्भसंख्या	,,	प्रणीतालक्षणम्	२७	स्रुवलक्षणम्	,,
आचमनविचारः	,,	उपलेपनप्रकारः	,,	पारिस्तरणप्रकारः	,,	स्रुवस्थितदेवताविचारः	,,
नवग्रहमखविचारः	,,	उपलेपनयोग्यगोमयम्	२५	पारिस्तरणप्रयोजनम्	,,	स्रुवधारणविचारस्तत्फलं च... ...	,,
नवग्रहमखभेदाः	,,	उल्लेखनप्रकारः	,,	परिस्तरणस्थानम्	,,	आज्यविचारः	,,
ग्रहमखप्रकारः	,,	रेखात्रयदेवताः	,,	बर्हिर्लक्षणम्	,,	चरुविचारः	,,
ग्रहसमिधः...	२२	पांसूद्धरणप्रकारः	,,	पदार्थासादनप्रकारः	,,	पूर्णपात्रविचारः	,,

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

विषय.	पृष्ठ.
पवित्रच्छेदनप्रकारः	२९
प्रोक्षणीसंस्कारः	,,
आज्यसंस्कारः	,,
अग्निमुखादिस्थानानि	,,
अग्नेर्मुखादिहोमे फलम्	३०
अन्वारंभविचारः	,,
अग्निपूजाविचारः	,,
व्याहृतिहोमविचारः	,,
अन्वाधानविचारः	,,
अग्निधमनेविचारः	,,
होममुद्राः	,,
कामनाभेदेन होममुद्राः	,,
शाकल्यप्रमाणम्	३१
द्रव्यभेदेन आहुतिप्रमाणम्	,,
काम्यहोमादौ वह्निवासस्तत्फलंच ...	,,
होमे खेटमुखे आहुतिविचारः ...	,,
दुर्गाहोमादौ ग्रहमुखाहुतिर्नदृष्टव्या ...	,,
पूर्णाहुतिविचारः	३२
ब्राह्मणभोजनसंख्या	,,
दक्षिणादानप्रकारः	,,
दक्षिणायां विलंबकरणे दोषः ...	,,
तंत्रोक्तपदार्थानां विचारः	,,
सर्वमंत्रारंभे गायत्रीजपः	३३
भूतशुद्ध्यादिविचारः	,,
कूर्मचक्रप्रकारः	३४
कूर्मचक्रयंत्रम्	,,
मंत्राणां दशसंस्काराः	३५
कलौ सिद्धिप्रदा मंत्राः	,,
आवाहनादिप्रकारः	३६
पद्मासनाद्यासनप्रकारः	,,
प्राणायामप्रकारः	३७
गायत्रीप्राणायामविचारः	,,
तांत्रिकाग्निस्थापनादिविचारः ...	,,
कुंडस्याष्टादशसंस्काराः	,,
कुंडस्य चतुष्टयसंस्काराः	,,
तंत्रोक्ताग्निस्थापनादिप्रकारः ...	,,
तंत्रोक्तकुशकंडिकाविचारः	३८
(अथ पद्धतिकाण्डम्)	
अनुष्ठानारंभदिनात्पूर्वदिनकृत्यम् ...	४१
भस्माद्यष्टविधस्नानानि	,,
नद्यादिस्नानप्रयोगः	,,
गृहस्नानप्रयोगः	४२
भस्मत्रिपुंड्रविधानम्	,,
ऊर्ध्वपुंड्रविधानम्	४४
कलशस्थापनप्रयोगः	,,
अग्न्युत्तारणसूक्तम्	४५
पुरुषसूक्तेन पूजाप्रयोगः	,,
महापुरुषविद्यास्तोत्रम्	४६
विष्णुश्राद्धम्	४७
गोदानप्रयोगः	,,
प्रायश्चित्तहोमप्रयोगः	४८
पंचगव्यविधानम्	,,
प्राजापत्यचांद्रायणादिव्रतानि ...	४९
प्राजापत्यादिप्रत्याम्नायाः	,,
गायत्रीजपविधानम्	,,
अनुष्ठानारंभादिनकर्म	,,
शांतिमंत्राः	५०
प्रधानसंकल्पः	५१
गणपतिपूजाप्रयोगः	५२

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

विषय.	पृष्ठ.
पुण्याहवाचनप्रयोगः	"
षड्विनायकपूजाप्रयोगः	५५
षोडशमातृकापूजाप्रयोगः	"
सांकल्पिकनांदीश्राद्धप्रयोगः ...	५६
आचार्यजापकवरणप्रयोगः	५७
द्वितीयं प्रकरणम् (२)	
सर्वमंत्रानुष्ठानोपयोगिन्यपक्रमः	५८
द्वारपूजाविधानम्	"
तत्तद्देवानां द्वारपालाः	"
आसनादिविधानम्	५९
कूर्मचक्रविधानम्	"
भूतशुद्धिप्रयोगः	६०
स्वप्राणप्रतिष्ठाविधानम्	६१
अंतर्मातृकान्यासः	६२
बहिर्मातृकान्यासः....	६३
पीठदेवतान्यासः	"
तंत्रोक्तार्घ्यपात्रादिस्थापनं तत्पूजनं च	६४
अग्न्युत्तारणसूक्तम्	६५
देवानां प्राणप्रतिष्ठाप्रयोगः	"
विस्तरतः सर्वदेवानां षोडशोपचारपूजा— पद्धतिः	६६
मालासंस्कारविधानं जपप्रकारश्च	७०
हवनप्रकरणम् (३)	
मंडपादिकरणविधानम्	७१
सामान्यतो गणेशादिपूजाविधानम्...	७३
आचार्यऋत्विग्वरणप्रयोगः... ...	"
रक्षोघ्नसूक्तं दिग्रक्षणं च	७४
कुंडपूजाप्रयोगः	७५
अग्न्यायतनप्रकारः	७६
अग्निस्थापनप्रकारः	७७
ग्रहाणामावाहनादिप्रयोगः.... ...	"
अधिदेवतावाहनप्रयोगः	७८
प्रत्यधिदेवतावाहनप्रयोगः	७९
पंचलोकपालावाहनप्रयोगः	"
दिग्पालावाहनप्रयोगः	"
ग्रहस्तुतिः....	८०
सर्वतोभद्रपूजापद्धतिः	८१
सर्वतोभद्रमंडलम्	८५
द्वादशलिंगतोभद्रमंडलम्	८६
द्वादशलिंगतोभद्रपूजापद्धतिः ...	"
सूर्यानुष्ठाने सूर्यमंडलम्	"
गणपतिमंडलम्	"
एकलिंगतोभद्रमंडलम्	"
चतुर्लिंगतोभद्रमंडलम्	"
अष्टलिंगतोभद्रमंडलम्	"
हरिहरात्मकद्वादशलिंगतोभद्रमंडलम्	८७
अग्न्युत्तारणमंत्राः	"
प्रतिमायाः प्राणप्रतिष्ठा	"
षोडशोपचारपूजामंत्राः	"
कुशकंडिका	८८
आघारावाज्यहोमः	"
ग्रहाणां होममंत्राः	८९
अधिदेवानां होममंत्राः	"
प्रत्यधिदेवानां होममन्त्राः... ...	९०
दिग्पालानां होममंत्राः	"
व्याहृतिवारुणहोमः	९२
बलिदानप्रकारः	"
पूर्णाहुतिहोममंत्राः	९४

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

विषय.	पृष्ठ.
अभिषेकमंत्राः	९५
आशीर्वादमंत्राः	९७
देवताविसर्जनादिविधानम्	,,
तंत्रोक्तहवनाविधिः...	९८
अग्नियंत्रम्	,,
तंत्रोक्तअग्निस्थापनादिविधानम्	,,
तंत्रोक्तकुशकंडिका	९९
अग्निपूजाविधानम्	,,
(पुरश्चरणकांडस्य सूची)	
(गणपतिमंत्रपुरश्चरणप्रकरणम्)	
गणेशादिकलामातृकान्यासः ...	,,
वक्रतुंडगणेशमंत्रपुरश्चरणप्रयोगः	१०३
गणपतियन्त्रम्	१०६
एकविंशद्वर्णात्मकगणेशमंत्रपुरश्चरणम्	,,
उच्छिष्टगणपतिमंत्रविधानम्	,,
उच्छिष्टगणपतेर्द्वितीयोमंत्रः	१०७
उच्छिष्टगणपतेस्तृतीयोमंत्रः	१०८
लक्ष्मीविनायकमंत्रः	,,
त्रैलोक्यमोहनगणपतिमंत्रः	१०९
हरिद्रागणपतिमंत्रः	११०
उच्छिष्टगणपतिकवचम्	,,
हरिद्रागणेशकवचम्	११२
पार्थिवगणेशपूजाविधानम्	,,
पार्थिवगणेशपूजापद्धतिः	११३
(शिवमंत्रानुष्ठानप्रकरणम्)	
श्रीकंठादिकलामातृकान्यासः	११५
शिवपंचाक्षरमंत्रपुरश्चरणम्	११७
अष्टाक्षरीशिवमंत्रः	११९
शिवयंत्रम्	१२०
अक्षरीमृत्युंजयपुरश्चरणम्	,,
त्र्यंबकमंत्रपुरश्चरणम्	१२१
त्र्यंबकयंत्रम्	१२२
महामृत्युंजयमंत्रपुरश्चरणम्	१२३
महामृत्युंजययंत्रम्	१२६
वसिष्ठकल्पोक्तमहामृत्युञ्जयमन्त्रः....	१२८
मृत्युंजयकवचम्	१३०
रुद्रविधानम्	,,
दशाक्षरीरुद्रमंत्रविधानम्	१३१
शिवसंकल्पसूक्तम्	१३४
पुरुषसूक्तम्	,,
अप्रतिरथसूक्तम्	१३५
विभ्राट्सूक्तम्	,,
शतरुद्रीविधानम्	१३६
रुद्रयन्त्रम्	१३८
रुद्रपीठपूजादिविधानम्	,,
रुद्रस्तोत्रम्	१४१
पंचरुद्रनिर्णयः	,,
रुद्रमाहात्म्यम्	१४२
पंचरुद्रविधानपद्धतिः	,,
रुद्राध्यायः (नमकाध्यायः)	१४६
चमकाध्यायः	१४९
शीर्षसंज्ञकानुवाकः	१५१
रुद्रहोमप्रयोगः	१५३
रुद्रहोमद्रव्याणि....	१५९
रुद्राभिषेकविधानम्	१६०
मुंडेश्वरमन्त्रविधानम्	१६२
त्वरितरुद्रमन्त्रपुरश्चरणम्	,,
पार्थिवलिंगपूजापद्धतिः	१६४

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

विषय.	पृष्ठ.
शिवनीराजनारतिः	१७०
शिवस्तुतिः	,,
पार्थिवलिंगमाहात्म्यम्	१७१
कामनाभेदनलिंगसंख्या	१७२
दक्षिणामूर्तिमन्त्रविधानम्	१७३
दक्षिणामूर्तिमन्त्रो द्वितीयः	१७४
दाक्षिणामूर्तियन्त्रम्	१७५
आपदुद्धारकबटुकभैरवमन्त्रानुष्ठानम्	,,
भैरवयन्त्रम्	१७७
बटुकभैरवयन्त्रंसदैवं सबीजम्	१७८
बटुकभैरवकवचम्	१८२
भैरवस्तवराजविधानम्	१८३
भैरवस्तवराजस्तोत्रम्	१८६
कुबेरमन्त्रद्वयपुरश्चरणम्	१८७
शिवाथर्वशीर्षम् (शिवोपनिषत्)	१८८

(देवीमंत्रानुष्ठानप्रकरणम् २)	
देवीकलामातृकान्यासः	१९०
नवार्णमन्त्रपुरश्चरणम्	१९१
देवीयन्त्रम्	१९५
अष्टाक्षरीदुर्गामन्त्रः	१९६
दुर्गाकवचम् (देवीरहस्योक्तम्)....	१९७
नवरात्रदुर्गापद्धतिः	१९८
कलशस्थापनमंत्राः	१९९
देवीपूजामंत्राः (लक्ष्मीसूक्तंच)....	२०१
दुर्गासप्तशतीपाठविधानम्....	२०४
कुमारीपुजाविधानम्	२०६
कामनापरत्वेन चंठीपाठसंख्या	२०७
आवृत्तिभेदविचारः	,,
मंत्रसंपुटीकरणप्रकारः	,,
संपुटितहोमे मंत्रसंख्या	,,

विषय.	पृष्ठ.
कवचाहुतिनिषेधः	२०८
कामनाभेदेन दुर्गापाठसंपुटितमंत्राः	,,
शतचंडीविधानम्	२०९
सहस्रचंडीविधानम्	२१०
शतचंडीविधानपद्धतिः	२११
चंडिकायंत्रम् (तत्पूजाविधानं च)	२१२
योगिनीपूजा	२१४
कुमारीपूजा	२१५
देवीबालिदानविधानम्	२१६
देव्यथर्वशीर्षम् (देव्युपनिषत्)	२१७
लक्ष्मीमंत्रानुष्ठानम्	२१८
महालक्ष्मीमंत्रानुष्ठानम्	२१९
महालक्ष्मीयंत्रम्	२२१
महालक्ष्मीमंत्रोद्वितीयः	२२३
लक्ष्मीस्तोत्रम्	२२४

विषय.	पृष्ठ.
लक्ष्मीकवचम्	२२६
लक्ष्मीसूक्तविधानम्	२२७
लक्ष्मीसूक्तम्	२२८
सरस्वतीमंत्रानुष्ठानम्	२२९
षोडशाक्षरीसरस्वतीमंत्र	२३०
एकादशाक्षरीसरस्वतीस्तोत्रम्	२३१
सरस्वतीयंत्रम्	,,
सरस्वतीस्तोत्रम्	२३२
अन्नपूर्णामंत्रानुष्ठानम्	२३३
अन्नपूर्णायंत्रम्	२३४
अन्नपूर्णाकवचम्....	,,
गंगामंत्रपुरश्चरणम्	२३५
गंगायंत्रम्	२३६
गंगास्तोत्रम्	,,
शीतलामंत्रानुष्ठानम्	२३७

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

विषय.	पृष्ठ.
शीतलास्तोत्रम्	२३८
पृथ्वीमंत्रपुरश्चरणम्	,,
गायत्रीपुरश्चरणपद्धतिः	२४०
गायत्रीयंत्रम्	२४३
गायत्रीकवचम्	२४६
(विष्णुमंत्रानुष्ठानप्रकरणम् ४)	
केशवादिकलामातृकान्यासः	२४७
नारायणमंत्रानुष्ठानविधानम्	२४९
नारायणयन्त्रम्	२५१
विष्णोर्द्वादशाक्षरमंत्रपुरश्चरणम्	२५२
लक्ष्मीनारायणमंत्रपुरश्चरणम्	२५३
दधिवामनमंत्राः....	२५४
राममंत्रविधानम्	२५५
श्रीरामयंत्रम्	,,

विषय.	पृष्ठ.
दशाक्षरीराममंत्रः	२५६
नृसिंहयंत्रम्	२५७
लक्ष्मीनृसिंहमंत्रः	,,
षडक्षरीनृसिंहमंत्रः	२५८
गोपालकृष्णमंत्रविधानम्....	२५९
गोपालकृष्णयंत्रम्	२६०
श्रीकृष्णमंत्रः	२६१
त्रैलोक्यमोहनविष्णुमंत्रः	२६२
संतानगोपालमंत्रविधानम्	२६३
संतानगोपालयन्त्रम्	,,
संतानगोपालमंत्रोद्वितीयः	२६४
संतानगोपालस्तोत्रम्	२६५
संतानोपायाः	२६७
हरिवंशश्रवणविधानम्	२६८
अभिलाषाष्टकं विश्वेश्वरस्तोत्रम्	२७०

विषय.	पृष्ठ.
विष्णुयागविधानं (प्रयोगश्च)	२७१
पुरुषसूक्तविधानम्	२७३
महापुरुषविद्यास्तोत्रम्	२७४
गर्भिण्या गर्भस्रावहरोपायाः	२७६
एकवस्त्रस्नानविधानम्	२७७
रुद्रस्नानप्रयोगः	२७९
गरुडमंत्रानुष्ठानम्	२८०
हनुमन्मन्त्रानुष्ठानम्	२८१
हनुमद्यंत्रम्	२८२
अष्टादशाक्षरीहनुमन्मंत्रविधानम्	२८३
द्वादशाक्षरीहनुमन्मंत्रः	२८४
हनुमद्वीरसाधनाविधानम् (चमत्कृतिकरणम्)	,,
एकमुखीहनुमत्कवचम्	२८५
हनुमत्स्तोत्रम्	२८७

विषय.	पृष्ठ.
वेदपारायणविधानम्	२८८
अष्टादशपुराणेतिहासानां पारायण विधानम्	२८९
श्रीमद्भागवतपारायणविधानम्	२९०
श्रीमद्भागवतसप्ताहविधानम्	,,
महाभारतश्रवणविधानम्.... ...	२९२
वाल्मीकीयरामायणविधानम्	२९३
अध्यात्मरामायणविधानम्	२९७
वेदव्यासमन्त्रानुष्ठानप्रयोगः	२९८
(सूर्यमंत्रानुष्ठानप्रकरणम् ५)	
तंत्रोक्ताष्टाक्षरीसूर्यमंत्रानुष्ठानम्	२९९
तंत्रोक्तसूर्ययंत्रम्	३०१
सूर्यार्घ्यविधानम्....	,,
तंत्रोक्तक्षरीसूर्यमंत्रः	,,

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

विषय.	पृष्ठ.
तंत्रोक्तचंद्रमंत्रानुष्ठानम्	३०२
तंत्रोक्तमंगलमंत्रः	३०३
तंत्रोक्तमंगलव्रताविधानम्....	३०४
मंगलपूजान्यासश्च	,,
मंगलयंत्रम्	३०५
मंगलस्तोत्रम्	,,
बृहस्पतिमंत्रः	३०६
शुक्रमंत्रः	३०७
वेदोक्तसूर्यमत्रानुष्ठानम्	,,
वेदोक्तचंद्रमंत्रः	३०८
वेदोक्तमंगलमन्त्रः	३०९
वेदोक्तबुधमंत्रः....	,,
वेदोक्तबृहस्पतिमन्त्रः	३१०
वेदोक्तशुक्रमन्त्रः	३११
वेदोक्तशनैश्चरमन्त्रः	,,
वेदोक्तराहुमन्त्रः	३१२
वेदोक्तकेतुमन्त्रः	,,
सूर्यस्तोत्रम्	३१३
आदित्यहृदयस्तोत्रम्(रामायणोक्तम्)	,,
सूर्याथर्वशीर्षम् (सूर्योपनिषत्)	३१४
(रोगशमनप्रकरणम् ६)	
सर्वरोगहराणि	३१५
ज्वरशमनविधानम्	३१६
ज्वरकर्मविपाकोपशमने	,,
जातवेदसमन्त्रानुष्ठानम्	,,
ज्वरमंत्रविधानम्	३१८
अपामार्जनविष्णुस्तोत्रम्	३१९
महेश्वरकवचम्	३२२
सद्यआरोग्यकरसूर्यार्घ्यविधानम्	३२३
ज्वरस्तोत्रम्	३२४
ज्वरतर्पणम्	,,
अच्युतानंतेतिमन्त्रविधानम्	,,
विष्णुसहस्रनामविधानम्	३२५
विष्णुसहस्रनामशापविमोचनम्	,,
सहस्रनामस्तोत्रस्य न्यासादि	,,
अतिसारकर्मविपाकोपशमनविधानम्	३२६
संग्रहणीकर्मविपाकोपशमनविधानम्	,,
अर्शः कर्मविपाकोपशमनविधानम्....	,,
अजीर्णमंदाग्निकर्मविपाकोपशमनेच	,,
विषूचिकोपशमनविधानम्	,,
पांडुरोगकर्मविपाकोपशमने	,,
रक्तपित्तकर्मविपाकोपशमने	,,
क्षयरोगकर्मविपाकोपशमने	३२७
श्वासकासादिकर्मविपाकोपशमने	,,
वातरोगकर्मविपाकोपशमने	,,
शूलरोगकर्मविपाकोपशमने	,,
गुल्मरोगकर्मविपाकोपशमने	,,
उदररोगकर्मविपाकोपशमने	,,
जलोदररोगकर्मविपाकोपशमने	३२७
प्लीहरोगहरहनुमन्मन्त्रः	३२८
मूत्रकृच्छ्रादिकर्मविपाकोपशमने	,,
प्रमेहरोगकर्मविपाकोपशमने	,,
वृषणरोगकर्मविपाकोपशमने	,,
गंडमालाकर्मविपाकोपशमने	,,
कुष्ठरोगकर्मविपाकोपशमनविधानम्	,,
शिरोरोगकर्मविपाकोपशमने	,,
नेत्ररोगकर्मविपाकोपशमने	३२९
नेत्रोपनिषत्	,,
नेत्ररोगहरतर्पणम्	३३०
कर्णरोगकर्मविपाकोपशमने ...	,,

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

विषय.	पृष्ठ.	विषय.	पृष्ठ.	विषय.	पृष्ठ.	विषय.	पृष्ठ.
मुखरोगकर्मविपाकोपशमने ...	,,	भगव्रकर्मविपाकोपशमने	,,	शीघ्रप्रसवोपायः	३३२	अनावृष्टिशमनविधानम्	३३४
अपस्मार (मृगी) रोगकर्मविपाको-		स्तनस्फोटकर्मविपाकोपशमने	,,	शीघ्रप्रसवयंत्रम्	३३३	वरुणमंत्रपुरश्चरणम्	,,
पशमने	३३१	वातरक्तकर्मविपाकोपशमने	,,	बालानांरोगशमनोपायः	,,	वृष्टिप्रदसूक्तविधानम्	३३६
भगंदरकर्मविपाकोपशमने	,,	स्त्रीणांप्रदरकर्मविपाकोपशमने	,,	बालरक्षा	,,	ग्रंथसमाप्तिः	,,
व्रणरोगकर्मविपाकोपशमने	,,	गर्भिण्याःप्रतिमासंगर्भरक्षोपायः	,,	महामारीशमनविधानम्	,,	ग्रंथकारवंशवर्णनम्	,,

॥ इत्यनुष्ठानप्रकाशस्यानुक्रमणिका समाप्ता ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

चित्र निरंकष १६



CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

चित्र-निरंक पृष्ठ १६



CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

चित्र- निरंक पृष्ठ १६





CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

॥ चतुर्विंशतिरेखात्मकमष्टलिंगतोभद्रमिदम् ॥२४॥



दोनों चित्र निरंक पृष्ठ १९

॥ अथ हरिहरात्मकं द्वादशलिंगतोभद्रं षट्त्रिंशद्रेखात्मकं ॥३६॥



CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(एकलिंगतोभद्रं देवीमंत्रानुष्ठानयोज्ञं गौरीतिलकमंडलमिदम्·)



दोनों चित्र निरंक पृष्ठ १९

॥अथाऽष्टादशरेखात्मकं चतुर्लिंगतोभद्रम्·॥



CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

॥ सर्वतोभद्रमण्डलमिदम् . ॥

॥ रुद्रयामलोक्तं चतुस्त्रिंशद्रेखात्मकं द्वादशलिंगतोभद्रमिदम् ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

॥ श्रीसूर्यमंत्रानुष्ठोपयोगि सूर्यभद्रमण्डलम् ॥



॥ गणपतिमंत्रानुष्ठानोपयोगि गणपतिभद्रमण्डलम् ॥



CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

॥गणपतियंत्रमिदम्॥

चित्रनिरंकपृष्ठ १०६



शिवयंत्रमिदम्.

चित्रनिरंकपृष्ठ १२०



त्र्यंबकयंत्रमिदम्.

चित्रसांकपृष्ठ १२२



CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

श्री महामृत्युंजययंत्रमिदम्.



निरंक पृष्ठ १२६

॥ श्री रुद्रयंत्रमिदम् ॥ स्कांदे ॥



पूज्यपूजकयोर्मध्ये प्राचीं प्रकल्प्य यंत्रपूजा कार्या ।

चित्र सांक पृष्ठ १३८ (बडायंत्र देखो)

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(पूर्व)

श्रीआपदुद्धारणबटुकभैरवयंत्रंसदेवतं सबीजं समंत्रमिदम्.

सांक पृष्ठ १७८



CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

॥ श्रीदक्षिणामूर्तिमंत्रयंत्रम्-॥



चित्रनिरंक पृष्ठ १७५

॥ श्रीबटुकभैरवयंत्रमिदम्॥



चित्र निरंक पृष्ठ १७७

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

॥ श्रीदेवीयंत्रम्॥



सांक पृष्ठ १९५

॥ चंडिकायंत्रमिदम्॥



सांक पृष्ठ २१६

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

श्रीमहालक्ष्मीयंत्रम्



सांकपृष्ठ २२१

॥ श्रीसरस्वतीयंत्रमिदम् ॥



सांकपृष्ठ २३१

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

॥ श्रीअन्नपूर्णापूजायंत्रमिदम् ॥



॥ श्रीगंगायंत्रमिदम् ॥



CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

॥ श्रीगायत्रीपूजायंत्रमिदम्॥



॥ श्रीनारायणमंत्रानुष्ठानपूजायंत्रम्॥



निरंक पृष्ठ २४३

निरंक पृष्ठ २५१

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

॥ श्रीरामयंत्रमिदम्॥

पू- सांक पृष्ठ २५५



॥ श्रीनृसिंहयंत्रमिदम्॥

पू- निरंक पृष्ठ २५७



॥ श्रीगोपालयंत्रमिदम्॥

पू- निरंक पृष्ठ २६०



CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

॥ मंगलयंत्रमिदम् ॥



CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सांक पृष्ठ १३९

श्रीरुद्रयंत्रमिदम्

ॐ शेषायनमः १ पू॰ ॐ इंद्रायनमः १

ॐ कर्कोटकायनमः ८
ॐ ऊर्ध्वलिंगायनमः ४
ॐ ईशायनमः ८
(ईशान)

ॐ तक्षकायनमः २
ॐ विरूपाक्षायनमः १
ॐ अग्नयेनमः २
(अग्नि)

ॐ कुबेरायनमः ७ ॐ कंबलायनमः ७

ॐ यमायनमः ३ ॐ अनंतायनमः ३



(पूज्यपूजकयोर्मध्ये-
प्राचीस्याद्यंत्रलेखने)

ॐ महापद्मायनमः ६
ॐ पशुपतयेनमः ३
ॐ वायवेनमः ६
(वायव्य)

ॐ वासुकयेनमः ४
ॐ विश्वरूपायनमः २
ॐ निर्ऋतयेनमः ४
(निर्ऋति)

(पश्चिम)
ॐ वरुणायनमः ५
ॐ शंखपालायनमः ५

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.



CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

श्रीगणेशाय नमः ॥ ॥ अथानुष्ठानप्रकाशनिबंधः प्रारभ्यते ॥ जगतः पितरं शंभुं जगतो मातरं शिवाम् ॥ जगतो विघ्नहर्तारं नमामि गणनायकम् ॥ १ ॥ जगतः पालकं विष्णुं जगतः सुखदां रमाम् ॥ जगदारोग्यदं सूर्यं नमामि पितरौ निजौ ॥ २ ॥ कातीयपारस्करगृह्यसूत्रान्नानापुराणान्स्मृतिषद्धतीश्च ॥ तंत्राण्यनेकानि विचार्य सम्यक् तनोम्यनुष्ठानविधिप्रकाशम् ॥ ३ ॥ शान्ति प्रतिष्ठाश्राद्धानां ज्योतिषोत्सर्गकर्मणाम् ॥ प्रोक्ताः पंच निबन्धाः प्राक् षष्ठोयमधुनोच्यते ॥ ४ ॥ ग्रंथास्तु बहवः सन्ति प्राचीना श्चैव नूतनाः ॥ तथापि भूमिदेवानां प्रीतिदोयं भविष्यति ॥ ५ ॥ तत्राऽनुष्ठानं नाम शास्त्रविहितकर्त्तव्यादिसंपादनम् । तथा चोक्तं भवति ॥ "शास्त्रस्य विहितं कर्म सम्यक्संपादनं तु यत् ॥ तद्धि ज्ञेयमनुष्ठानं नित्यनैमित्तकर्मसु ॥ १ ॥" अथ सामान्यतः सर्वमंत्रानुष्ठानकालनियमः (वैशंपायनसंहितायाम्) "मंत्रस्यारंभणं मेषे धनधान्यप्रदं भवेत् । वृषे मरणमाप्नोति मिथुनेऽपत्यनाश नम् ॥ कर्कटे सर्वसिद्धिः स्यात्सिंहे मेधाविनाशनम् । कन्या लक्ष्मीप्रदा नित्यं तुलायां सर्व्वसिद्धयः ॥ वृश्चिके स्वर्णलाभः स्याद्धनुर्मानविनाशनम् । मकरः पुण्यदः प्रोक्तः कुंभो धनसमृद्धिदः ॥ मीनो दुःखप्रदो नित्यमेवं मासविधिक्रमः ॥ (रुद्रयामले) "कार्त्तिकाश्विनवैशाखमाघेऽथ मार्गशीर्षके । फाल्गुने श्रावणे मंत्रपुरश्चर्य्या प्रशस्यते" ॥ (कालोत्तरे) "मुक्तिकामैः कृष्णपक्षे भूतिकामैः सिते सदा" ॥ (स्मृतितत्त्वे) "पूर्णिमा पञ्चमी चैव द्वितीया सप्तमी तथा । त्रयोदशी च दशमी प्रशस्ता सर्वकामदा ॥ या तिथिर्यस्य देवस्य तस्यां वा शुभदः स्मृतः" (पुरश्चरणदीपिकायाम्) "मंत्रारंभो रवौ शुक्रे बुधे जीवे विशेषतः । शनौ मृत्युः क्षयो भौमे सोमे मध्यफलं स्मृतम्" (ज्योतिर्निबंधे) "पुनर्वसुद्वये स्वातौ त्र्युत्तरे श्रवणत्रये । रेवतीद्वित[illegible] हस्तेऽनुराधा

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

रोहिणीद्वये ॥ शान्तिकं पौष्टिकं कर्म्म पुण्याहे कीर्त्तितं बुधैः " (पुरश्चरणदीपिकायाम्) " अश्विनीरोहिणीस्वाति विशाखाहस्त
भेषु च । ज्येष्ठोत्तरात्रयेष्वेव कुर्य्यान्मंत्राभिषेचनम् ॥" (तंत्रसारे) " आर्द्रायां कृत्तिकायां च मंत्रारंभः प्रशस्यते । यदीशस्य
कृशानोर्वा मंत्रारंभो यथाक्रमम् ॥ स्थिरलग्नं विष्णुमंत्रे शिवमंत्रे चरं ध्रुवम् । द्विस्वभावगतं लग्नं शक्तिमंत्रे प्रशस्यते " (दीक्षा
तत्त्वे) "पञ्चाङ्गशुद्धिदिवसे सोदये शशितारयोः । गुरुशुक्रोदये शुद्धलग्ने द्वादशशोधिते ॥ चंद्रतारानुकूले च शस्यते मंत्रकर्म्म
च" (अगस्त्यसंहितायाम्) "त्रिषष्ठायगताः पापाः शुभाः केन्द्रत्रिकोणगाः । मंत्रारंभे शुभाः सर्व्वे बन्धुस्थाः सर्व्वनाशकाः"
(पुरश्चरणदीपिकायाम्) "संध्यागर्जितनिर्घोषभूकंपोल्कानिपातने । एतानन्यांश्च दिवसान्स्मृत्युक्तांश्च परित्यजेत् " ॥ (तंत्रसारे)
"चंद्रतारानुकूले च शुक्लपक्षे शुभे दिने । आरंभे तु पुरश्चर्य्यां हरौ सुप्ते न चाचरेत् ॥" इति मंत्रानुष्ठानकालः । अथानुष्ठानयो
ग्याचार्यलक्षणम् (शारदातिलके) "मातृतः पितृतः शुद्धः शुद्धभावो जितेंद्रियः । सर्वागमानां सारज्ञः सर्वशास्त्रार्थतत्त्ववित् ॥
परोपकारनिरतो जपपूजादितत्परः । अमोघवचनः शान्तो वेदवेदार्थपारगः ॥ योगमार्गानुसंधायी देवताहृदयंगमः । इत्यादिगुणसं
पन्नो गुरुरागमसंमतः ॥ (पुरश्चरणदीपिकायाम्) " श्रीगुरुः परमेशानि शुद्धवेषो मनोहरः ॥ सर्व्वलक्षणसंपन्नः सर्व्वावयवशो
भितः ॥ अग्रगण्यो गभीरश्च पात्रापात्रविशेषवित् । शिवविष्णुसमः साधुर्न च दर्शनदूषकः । नित्ये नैमित्तिके काम्ये रतः
कर्म्मण्यनिंदिते । यदृच्छालाभसन्तुष्टो गुणदोषविभेदकः ॥ इत्यादिलक्षणोपेतः श्रीगुरुः कथितः प्रिये" (मत्स्यपुराणेपि) "सर्वा
वयवसंपूर्णो वेदमंत्रविशारदः । पुराणवेत्ता तत्त्वज्ञो दंभलोभविवर्जितः ॥ कृष्णसारमये देशे उत्पन्नश्च शुभाकृतिः । शौचाचाररतो

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नित्यं पाखण्डकुलानिःस्पृहः ॥ समः शत्रौ च मित्रे च ब्रह्मोपेंद्रहरप्रियः । ऊहापोहार्थतत्त्वज्ञो वास्तुशास्त्रविशारदः ॥ आचार्यश्च भवेन्नित्यं सर्व्वदोषविवर्जितः" ॥ इत्याचार्यलक्षणम् । (निंद्याचार्य्यमाह क्रियासारे) "श्वित्री चैव गलत्कुष्ठी नेत्ररोगी च वामनः । कुनखी श्यावदन्तश्च स्त्रीजितो ह्यधिकांगकः ॥ हीनांगः कपटी रोगी बह्वाशी बहुजल्पकः । एतैर्दोषैर्विहीनो यः स गुरुः शिष्यसंमतः" ॥ (जपयोग्या ब्राह्मणाः) "जापकाश्च द्विजाः शुद्धाः कुलीना ऋजवस्तथा । स्नानसंध्यारता नित्यं शौचाचारपरायणाः ॥ श्रोत्रियाः सत्यवाचश्च वेदशास्त्रार्थकोविदाः । अक्रोधनाः पुराणज्ञाः सततं ब्रह्मचारिणः ॥ देवध्यानरता तित्यं प्रसन्नमनसः सदा । इत्यादिगुणसंपन्ना जापका मंत्रसिद्धिदाः" ॥ (निंदिता जापकाः पुरश्चरणदीपिकायाम्) "नास्तिकान्भिन्नमर्यादान्कृतघ्नान्वेद निंदकान् । स्नानसंध्याविहीनांश्च दूरतः परिवर्जयेत्" ॥ (त्रिविक्रमपद्धतौ) "व्यसनी । वामनः । खल्वाटः । कुब्जकः । कुनखी । शठः । चपलः । अधिकाङ्गः । हीनाङ्गः । पापी । कुटिलः । व्याधितः । तार्किकः । वार्द्धिकः । काकस्वरः । बकवृत्तिकः । गुरुदेवद्विजातिनिंदकः । वृषलीपतिः । साहसिकः । अशुचिः । पण्यरंगोपजीवी । नास्तिकः । क्लीबः । धर्म्मवृत्तविवर्जितः । परदाररतः । निर्घृणी । दुर्हृदः । अतिकृष्णः । अतिगौरः । केकराक्षः । कातरः । जडः । पशुशास्त्ररतः । कुण्डः । गोलकः । स्वयंभूः । शवश्राद्धभुक् । लंबोष्ठकः । भग्नवक्रः । शिशुः । अतिवृद्धः । बधिरः । कपिलाङ्गः । व्यंगः । गर्वितः । स्तब्धः । कलिप्रियः । परापवादरतः । पिशुनः । असंस्कृतः । दीनः । दुश्चर्मा । सालस्यः । अतिस्थूलः । अतिकृशः । विषग्रंथोपजीवी । अभिशस्तः । निष्ठीवनशीलः । कुवृत्तिकः । कुष्ठी । काणः । गारुडी । म्लेच्छदेशवासी । मांसभक्षी । तंत्रशास्त्रविद्वेषकः । पुराणनिंदकः । प्रतिमानि

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

न्दकः । संध्योपासनरहितः । अनेककार्य्ययुक्तः । रोगी । इत्यादिदोषयुक्ता विशेषतो जपकर्म्मादिषु वर्ज्जनीयाः ॥ (अनुष्ठानयोग्या देशाः शारदातिलके पुरश्चरणचंद्रिकायां च) "पुण्यक्षेत्रं नदीतीरं गुहा पर्वतमस्तकम् । तीर्थप्रदेशाः सिंधूनां संगमः पावनं वनम् ॥ उद्यानानि विविक्तानि बिल्वमूलं तटं गिरेः । देवतायतनं कूलं समुद्रस्य निजं गृहम् ॥ साधनेषु प्रशस्यन्ते स्थानान्येतानि मन्त्रिणाम् । (तंत्रसारेपि) " तुलसीकाननं गोष्ठं वृषसद्म शिवालयः । अश्वत्थामलकीमूलं गोशालाजलमध्यतः ॥ गृहे शतगुणं विद्या द्गोष्ठे लक्षगुणं भवेत् । कोटिर्देवालये पुण्यमनंतं शिवसन्निधौ ॥ म्लेच्छदुष्टमृगव्यालशंकातंकादिवर्ज्जिते । एकान्ते पावने निन्दार हिते भक्तिसंयुते ॥ सुदेशे धार्म्मिके राष्ट्रे सुभिक्षे निरुपद्रवे । रम्ये भक्तिजनस्थाने निवसेत्तापसप्रिये ॥ गुरूणां सन्निधाने च चित्तै काग्रस्थले तथा । एषामन्यतमं स्थानमाश्रित्य जपमाचरेत् ॥ यत्र ग्रामे भवेन्मंत्री तत्र कूर्म्मं विचिन्तयेत्" । (गौतमीये) "पर्व्व ते सिन्धुतीरे वा पुण्यारण्ये नदीतटे । यदि कुर्य्यात्पुरश्चर्य्यां तत्र कूर्म्मं न चिंतयेत् ॥ ग्रामे वा यदि वास्तौ वा गृहे तं च विचिन्तये त् ॥" (पुरश्चरणदीपिकायां नारदीये च) " शिवस्य सन्निधाने च सूर्याग्न्योर्वा गुरोरपि । दीपस्य ज्वलितस्यापि जपकर्म्म प्र शस्यते ॥ गृहे जपं समं विद्याद्गोष्ठे शतगुणं भवेत् । नद्यां शतसहस्रं स्यादनंतं शिवसन्निधौ ॥ समुद्रतीरे च ह्रदे गिरौ देवालयेषु च । पुण्याश्रमेषु सर्वेषु जपं कोटिगुणं भवेत् ॥ तत्पूर्वाभिमुखो वश्यं दक्षिणे चाभिचारिकम् । पश्चिमे धनदं विद्यादुत्तरे शान्ति दं भवेत् ॥ अग्रे पृष्ठे तथा वामे समीपे गर्भमन्दिरे । जपं प्रदक्षिणं होमं न कुर्याद्धि शिवालये" ॥ ॥ अथासनानि--" आसनं त्रिविधं तत्र चाद्यमास्तरणं स्मृतम् ॥ देहसाध्यं स्वस्तिकादि देवार्थं च तृतीयकम्" ॥ तत्र योग्यासनान्याह (व्यासः) " कौशे

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यं कंवलं चैव ह्याजिनं पट्टमेव च । दारुजं तालपत्रं च आसनं परिकल्पयेत् " ॥ (पुरश्चरणदीपिकायाम्) " तूलकंबलवस्त्राणि प
ट्टव्याघ्रमृगाजिनम् । कल्पयेदासनं धीमान्सौभाग्यज्ञानसिद्धिदम् ॥ कृष्णाजिने ज्ञानसिद्धिर्मोक्षाप्तिर्व्याघ्रचर्मणि । बस्ताजिने व्या
धिनाशः कंबले दुःखमोचनम् ॥ अभिचारे नीलवर्णं रक्तं वश्यादिकर्मणि । शांतिके कंबलः प्रोक्तः सर्वस्मिन्नपि कंबलः ॥ स्या
त्पौष्टिके च कौशेयं शांतिके वेत्रविष्टरम् । धवले शांतिकं मोक्षः सर्वार्थश्चित्रकंवले ॥ सर्वाभावे त्वासनार्थं कुशविष्टरमिष्यते । "
अथ निषिद्धासनानि (पुरश्चरणदीपिकायाम्) " वंशासने तु दारिद्र्यं पाषाणे व्याधिसंभवः। धरण्यां दुःखसंभूतिर्दौर्भाग्यं छिद्रदा
रुजे ॥ तृणे धनयशोहानिः पल्लवे चित्तविभ्रमः " (पुरश्चरणचंद्रिकायां विशेषः) " सर्वसिद्धौ व्याघ्रचर्म ज्ञानसिद्धौ मृगासनम् ।
वस्त्रासनं रोगहरं वेत्रजं श्रीविवर्धनम् ॥ कौशेयं पौष्टिकं प्रोक्तं कंबलं दुःखमोचनम् । स्तंभने गजचर्म स्यान्मारणे माहिषं तथा ॥
मेषीचर्म तथोच्चाटे खाङ्गिनं वश्यकर्मणि । विद्वेषे जांबुकं प्रोक्तं भवेद्गोचर्म शांतिके ॥ नादीक्षितो विशेत्कृष्णसाराजिनासने गृही ।
विशेद्यतिर्वनस्थश्च ब्रह्मचारी च स्नातकः " ॥ ॥ अथ मालाविचारः (मन्त्रखंडे) " स्फाटिकी मौक्तिकी वापि प्रोत्तव्या
सितसूत्रकैः । सर्वकर्म्मसमृद्ध्यर्थं जपेद्रुद्राक्षमालया ॥ धर्म्मार्थकाममोक्षार्थं जपेत्पद्माक्षमालया । अरिष्टपुत्रजीवैश्च शंखपद्मौ माणि
स्तथा ॥ कुशग्रंथिश्च रुद्राक्ष उत्तमं चोत्तरोत्तरम् । शतं चन्दनशंखैश्च प्रवालैस्तु सहस्रकम् ॥ स्फाटिकैर्लक्षसाहस्रं मौक्तिकैर्लक्षमे
व च। दशलक्षं राजताक्षैः सौवर्णैः कोटिरुच्यते ॥ कुशग्रंथ्या च रुद्राक्षैरनन्तगुणितो भवेत् " ॥ (तंत्रसारेऽपि) " रुद्राक्षशंखप
द्माक्षपुत्रजीवकमौक्तिकैः । स्फाटिकैर्मणिरत्नैश्च सौवर्णैर्विद्रुमैस्तथा ॥ राजतैः कुशमूलैश्च गृहस्थस्याक्षमालिका । अंगुलीगणनादेकं पर्व

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ण्यष्टगुणं भवेत् ॥ पुत्रजीवैर्दशगुणं शतं शंखैः सहस्रकम् । प्रवालैर्मणिरत्नैश्च दशसाहस्रकं स्मृतम् ॥ तदेव स्फाटिकैः प्रोक्तं मौक्तिकैर्लक्षमुच्यते । पद्माक्षैर्दशलक्षं स्यात्सौवर्णैः कोटिरुच्यते ॥ कुशग्रंथ्या कोटिशतं रुद्राक्षैः स्यादनंतकम् । सर्वैर्विरचिता माला नृणां मुक्तिफलप्रदा " ॥ (कामनाभेदे तु कालिकापुराणे) रुद्राक्षमालिका सूते जपेन स्वमनोरथान् । पद्माक्षैर्विहिता माला शत्रूणां नाशिनी मता ॥ कुशग्रंथिमयी माला सर्वपापप्रणाशिनी । पुत्रजीवफलैः कृत्ता कुरुते पुत्रसंपदम् ॥ निर्म्मिता रूप्यमणिभिर्ज्जपमालेप्सितप्रदा । प्रवालैर्विहिता माला प्रयच्छेद्विपुलं धनम् ॥ हिरण्मयी विरचिता माला कामान्प्रयच्छति । सर्वैरेभिर्विरचिता माला स्यान्मुक्तये नृणाम् " ॥ (तंत्रराजे तु) " वैष्णवे तुलसीमाला गजदन्तैर्गणेश्वरे । त्रिपुराया जपे शस्ता रुद्राक्षै रक्तचन्दनैः " ॥ मालायां सूत्रविचारः सनत्कुमारीये " कार्प्पाससंभवं सूत्रं धर्म्मकामार्थमोक्षदम् । तच्च विप्रेंद्र कन्याभिर्नार्म्मितं च सुशोभनम् ॥ शुक्लं रक्तं तथा कृष्णं पट्टसूत्रमथापि वा । शान्तिवश्याभिचारेषु मोक्षैश्वर्य्यजपेषु च ॥ शुक्लं रक्तं तथा पीतं कृष्णं वर्णेषु च क्रमात् । सर्वेषामेव वर्णानां रक्तं सर्वेप्सितप्रदम् ॥ त्रिगुणं त्रिगुणीकृत्य ग्रथयेच्छिल्पशास्त्रतः । एकैकं मातृकावर्णं सतारं प्रजपन्सुधीः ॥ मणिमादाय सूत्रेण ग्रथयेन्मध्यमध्यतः । ब्रह्मग्रंथिं विधायेत्थं मेरुं च ग्रंथिसंयुतम् ॥ ग्रथयित्वा पुरो मालां ततः संस्कारमाचरेत् " ॥ (तंत्रसारे गौतमीये च) " मुखे मुखं तु संयोज्य पुच्छे पुच्छं नियोजयेत् । मेरुरूर्ध्वमुखः कार्यः प्रत्येकं नागपाशकम् । गोपुच्छसदृशी माला यद्वा सर्पाकृतिः शुभा " ॥ (मुखपुच्छनियमोपि तत्रैव)" रुद्राक्षस्योन्नतं प्रोक्तं मुखं पृष्ठं च निर्म्मलम् । कमलाक्षस्य सूक्ष्मांशं सबिंदुद्वितयं मुखम् ॥ सबिंदुकस्य स्थूलांशं पृष्ठं श्लक्ष्णमिति स्मृतम् । तत्सजातीयमेकाक्षं मे

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

रुत्वेनाग्रतो न्यसेत् ॥ " जपमालामणिसंख्या कामनाभेदेन (गौतमीये) " पंचविंशतिभिर्मोक्षं त्रिंशद्भिर्द्धनसिद्धये । सर्वार्थाः सप्तविंशत्या पंचदश्याभिचारिके ॥ पंचाशद्भिः काम्यसिद्धिः स्यात्तथा चतुरुत्तरैः । अष्टोत्तरशतैः सर्व्वा सिद्धिरुक्ता मनीषिभिः ॥ " कामनाभेदेनाङ्गुलिनियमः (पुरश्चरणदीपिकायाम्) " अङ्गुष्ठं मोक्षदं विद्यात्तर्ज्जनी शत्रुनाशिनी । मध्यमा धनदा शान्तिकरा ह्येषा ह्यनामिका ॥ कनिष्ठाऽऽकर्षणे शस्ता जपकर्म्मणि शोभने । अङ्गुष्ठेन जपं जप्यमन्यैरं गुलिभिः सह ॥ अङ्गुष्ठेन विना कर्म्म कृतं तदफलं यतः । जप्त्वाक्षमालां सकलां भ्रामयेदाशिखामणिम् ॥ प्रदक्षिणं पुनर्वक्रे प्रार भ्यैवं समाचरेत् ॥ स्वयं वामेन हस्तेन जपमालां न संस्पृशेत् ॥ अदीक्षितो द्विजो वापि स्पृष्टश्चेच्छुद्धिमाप्नुयात् । न धारयेत्करे मूर्ध्नि कंठे च जपमालिकाम् ॥ जपकाले जपं कृत्वा सदा शुद्धस्थले न्यसेत् । गुरुं प्रकाशयेद्धीमान्मंत्रं नैव प्रकाशयेत् ॥ अक्ष मालां च मुद्रां च गुरोरपि न दर्शयेत् । कंपनात्सिद्धिहानिः स्याद्भूननं बहुदुःखकृत् ॥ शब्दे जाते भवेद्रोगो करभ्रष्टा विनाशकृत् । छिन्ने सूत्रे भवेन्मृत्युस्तस्माद्यत्नपरो भवेत् ॥ जपान्ते कर्णदेशे वा उच्चस्थानेऽथवा न्यसेत् । जपमालां विधायेत्थं ततः संस्कार माचरेत् " ॥ (अथ मालासंस्काराः तंत्रसारे पुरश्चरणदीपिकायां च) "अश्वत्थपत्रनवकैः पद्माकारं तु कल्पयेत् । तन्मध्ये स्था पयेन्मालां मातृकामूलमुच्चरन् ॥ क्षालयेत्पंचगव्येन सद्योजातेन सज्जलैः । चंदनागुरुकर्पूरैर्वामदेवेन घर्षयेत् ॥ धूपयेत्तामघोरेण लेपयेत्तत्पुरुषेण तु । मंत्रयेत्पंचमेनैव प्रत्येकं तु सकृत् सकृत् ॥ मेरुं च पंचमेनैव ततो मंत्रेण मंत्रयेत् । तत्रावाह्य यजेद्देवं यथा विभवविस्तरैः ॥ संस्कृत्यैवं बुधो मालां तत्प्राणांस्तत्र स्थापयेत् । मूलमंत्रेण तां मालां पूजयेद्विजसत्तम ॥ एवं या संस्कृता माला

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

जपकर्म्मणि सर्व्वदा । अभीष्टफलदात्यर्थं सा सर्वाघविनाशिनी ॥ मध्यमानामिकाङ्गुष्ठैरक्षमालामणीशतैः । एवं जपस्य चैकस्य क्रमोयं चालयेज्जपेत् ॥ मालासंस्कारस्य नित्यतामाह (रुद्रयामले) "अप्रतिष्ठितमालाभिर्मंत्रं जपति यो नरः । सर्वं तद्विफलं विद्यात् क्रुद्धा भवति देवता ॥ " (वैशंपायनसंहितायाम्) "अङ्गुष्ठमध्यमाभ्यां च चालयेन्मध्यमध्यतः । तर्जन्या न स्पृशेदेनां मुक्तिदो गणनक्रमः ॥ जीर्णे सूत्रे पुनः सूत्रं ग्रथयित्वा शतं जपेत् । प्रमादात्पतिता हस्ताच्छतमष्टोत्तरं जपेत् ॥ जपेन्निषिद्धसंस्पर्शे क्षालयित्वा यथोदितम्" । मालास्थापनार्थं गोमुखीमाह आचाराकें वृद्धमनुः—"वस्त्रेणाच्छादितकरं दक्षिणं यः सदा जपेत् । तस्य स्यात्सफलं जाप्यं तद्धीनमफलं स्मृतम् ॥ भूतराक्षसवेतालाः सिद्धगंधर्वचारणाः । हरंति प्रकटं यस्मात्तस्माद्गुप्तं जपेत्सुधीः" ॥ अथाक्षमालाभावे करमालानिरूपणम् (पुरश्चरणदीपिकायाम्) " अलाभे जपमालायाः करशाखासु पर्वभिः । अनामिकाया यो मध्यस्तस्मादधः क्रमेण तु ॥ मध्यांगुल्यग्रपर्वादिप्रादक्षिण्यक्रमेण तु । तर्जन्यादौ जपांतश्च अक्षमाला करे स्थिता" (सनत्कुमारसंहितायामपि) "तर्जनी मध्यमाऽनामा कनिष्ठा चेति ताः क्रमात् । तिस्रोऽङ्गुल्यस्त्रिपर्वाणो मध्यमा चैकपर्व्विका ॥ पर्वद्वयं मध्यमाया मेरुत्वेनोपकल्पयेत् । अनामामध्यमारभ्य कनिष्ठादित एव च ॥ तर्जनीमूलपर्य्यन्तं दशपर्वसुसंजपेत् । अंगुलीर्न वियुंजीत किंचिदाकुंचिते तले ॥ अंगुलीनां वियोगाच्च च्छिद्रे च स्रवते जपः ॥ अंगुल्यग्रे च यज्जप्तं यज्जप्तं मेरुलंघने । पर्वसंधिषु यज्जप्तं तत्सर्व्वं निष्फलं भवेत् ॥ गणनाविधिमुल्लंघ्य यो जपेत्तज्जपं यतः । गृह्णन्ति राक्षसास्तेन गणयेत्सर्वथा बुधः ॥ हृदये हस्तमारोप्य तिर्य्यक्कृत्वा करांगुलीः । आच्छाद्य वाससा हस्तौ दक्षिणेन सदा जपेत् । अथ जपे कर्त्तव्यतामाह (योगियाज्ञवल्क्यः) जपस्याहं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

विधिं वक्ष्ये यथाकार्यं विधानतः । न चंक्रमन्न प्रहसन्न पार्श्वमवलोकयन् ॥ नापाश्रितो न जल्पंश्च न प्रावृतशिरास्तथा । न पदा पादमाक्रम्य न चैव हि तथा करौ ॥ नैवंविधं जपं कुर्य्यान्न च संश्रावयञ्जपेत् । तिष्ठंश्चेद्वीक्षमाणोर्कमासीनः प्राङ्मुखो जपेत् ॥ प्रागग्रेषु कुशेष्वेवमासीनश्चासने जपेत् । जपस्त्वेवं हि कर्त्तव्य एकाग्रमनसापि च ॥ धारयेन्मनसा मंत्रान्न जिह्वोष्ठौ विचालयेत् । न कंपयेच्छिरो ग्रीवां दंतान्नैव प्रकाशयेत् ॥ यक्षराक्षसभूतानि सिद्धविद्याधरास्तथा । हरन्ति प्रसभं यस्मात्तस्माद्गुह्यं समाचरेत्" ॥ (अग्निपुराणेपि) "नोच्चैर्जपं बुधः कुर्य्यान्नीचैः कुर्य्यादतंद्रितः । समाहितमनास्तूष्णीं मनसा वापि चिन्तयेत्" ॥ (अत्रिरपि) "ध्वनि र्घोषविकारेण निःश्वासोपांशुलक्षणः । निर्विकारेण वक्त्रेण मनसा मानसः स्मृतः" ॥ (जपप्रशंसायां योगियावल्क्यः) "विधियज्ञाज्ज पयज्ञो विशिष्टो दशभिर्गुणैः । उपांशुः स्याच्छतगुणः साहस्रो मानसः स्मृतः ॥ ये पाकयज्ञाश्चत्वारो विधियज्ञसमन्विताः । सर्व्वे ते जपयज्ञस्य कलां नार्हंति षोडशीम्" ॥ अथ पुरश्चरणादिषु जपकर्त्तॄणां भक्ष्यादिनियमाः (तंत्रसारे गौतमीये च) "पुरश्चरणकृ न्मंत्री भक्ष्याभक्ष्यं विचारयेत् । अन्यथा भोजनाद्दोषात्सिद्धिहानिः प्रजायते ॥ शतान्नं च समश्नीयान्मंत्रसिद्धिसमीहया ॥ तस्मा न्नित्यं प्रयत्नेन शतान्नाशी भवेन्नरः" ॥ (शारदातिलकेपि) "भैक्ष्यं हविष्यं शाकानि विहितानि फलं पयः । मूलं सक्तुर्यवोत्पन्नो भक्ष्याण्येतानि मंत्रिणाम्" ॥ (पुरश्चरणदीपिकायां गौतमीये च) "चरुर्मूलफलक्षीरदधिभिक्षान्नसक्तवः । शाकश्चाष्टविधं चान्नं साधकस्योच्यते बुधैः" ॥ (नारदीये) मृदुसोष्णं सुपक्वं च कुर्याद्वै लघुभोजनम् । नेन्द्रियाणां विकारः स्यात्तथा भुंजीत साधकः ॥ यद्वातद्वा परित्याज्यं दुष्टान्नं कुत्सितं फलम् । प्रशस्तान्नं समश्नीयान्मंत्रसिद्धिसमीहया ॥ पयोव्रतस्य सिद्धिः स्याल्लक्षेनैव न संशयः ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(ग्रंथान्तरेपि) " क्षीराहारः फलाशी वा शाकाशी वा हविष्यभुक् । भिक्षाशी वा जपेन्मंत्रं कृच्छ्रचांद्रायणादिकृत् ॥ श्रुतिस्मृतिविरोधं च जपं रात्रौ विवर्जयेत् । भूशय्या ब्रह्मचारित्वं मौनचर्यानसूयता ॥ लवणं क्षारमाम्लं च व्यंजनं कांस्यभोजनम् । तांबूलं च द्विभुक्तं च दुःसंवादं प्रमत्तताम् ॥ नित्यं त्रिषवणं स्नानं क्षुद्रकर्म्मविवर्जनम् । नित्यदानं नित्यपूजा देवतास्तुतिकीर्त्तनम् ॥ नैमित्तिकार्च्चनं चैव विश्वासो गुरुदेवयोः । जपनिष्ठा द्वादशैते धर्माः स्युर्मंत्रसिद्धिदाः ॥ नित्यं सूर्यमुपस्थाय तस्य चाभिमुखो यजेत् । देवतां प्रतिमादौ वा वह्नौ वाभ्यर्च्य तन्मनाः ॥ अनिर्वेदनयाव्यग्रः शास्त्रोक्ताचारपालकः ॥ स्नानपूजाजपध्यानहोमतर्पणतत्परः । निष्कामो देवतानां च सर्वकर्म्मनिवेदकः ॥ एवमादींश्च नियमान् पुरश्चरणके चरेत् " ॥ (पुरश्चरणदीपिकायाम्) क्षारं च लवणं मांसं गृंजनं कांस्यभोजनम् । माषाढकीमसूरांश्च कोद्रवांश्चणकानपि ॥ अन्नं पर्युषितं चैव निःस्नेहं कीटदूषितम् । असद्भाषणमन्यायं वर्जयेदन्यपूजनम् । विना श्रमोचितं किं चिन्नित्यनैमित्तिकं चरेत् ॥ स्त्रीशूद्रपतितव्रात्यनास्तिकोच्छिष्टभाषणम् । असत्यभाषणं चैव कौटिल्यं च परित्यजेत् ॥ सद्भिरपि न भाषेत जपहोमार्च्चनादिषु । वाग्यतः कर्म्म निर्वर्त्य निःस्पृहो वर्त्तितादिषु ॥ वर्जयेद्गीतकाव्यादिश्रवणं नृत्यदर्शनम् । परान्नं च परद्रव्यं तथैव तु प्रतिग्रहः ॥ परस्त्रीं परनिंदां च मनसापि विवर्जयेत् । जिह्वा दग्धा परान्नेन करौ दग्धौ प्रतिग्रहात् । परस्त्रीभिर्मनो दग्धं मंत्रसिद्धिः कथं भवेत्" ॥ (रामार्च्चनचन्द्रिकायाम्) "मैथुनं तत्कथालापं तद्गोष्ठीः परिवर्जयेत् । ऋतुकालं विना मंत्री स्वस्त्रियं नैव गच्छति" ॥ (तथा) स्मरणं कीर्त्तनं केलिः प्रेक्षणं गुह्यभाषणम् । संकल्पोध्यवसायश्च क्रियानिर्वृतिरेव च ॥ एतन्मैथुनमष्टांगं प्रवदन्ति मनीषिणः । कौटिल्यं क्षौरमभ्यंगमनिवेदितभोजनम् ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

असंकल्पितकृत्यं च वर्जयेन्मर्दनादिकम् । स्नायाच्च पंचगव्येन केवलामलकेन वा । श्रुतिस्मृतिपुराणोक्तैर्मंत्रैः स्नायान्निरंतरम् ॥ मंत्रजप्तान्नपानीयैः स्नानाचमनभोजनम् । स्नानं त्रिषवणं प्रोक्तमशक्तौ द्विः सकृत्तथा ॥ अस्नातस्य फलं नास्ति न चातर्पयतः पितॄन् । अपवित्रकरो नग्नः शिरसि प्रावृतोऽपि वा । प्रलपन्प्रजपेद्यावत्तावन्निष्फलमुच्यते" ॥ (तंत्रसारेपि) " सकृदुच्चरिते शब्दे प्रणवं समुदीरयेत् । प्रोक्ते पारशवे शब्दे प्राणायामं सकृच्चरेत् ॥ बहुप्रलापी आचम्य न्यस्यांगानि ततो जपेत् । क्षुतेऽप्येवं तथाऽऽस्पृश्य स्थानानां स्पर्शनेन च ॥ एवमादींश्च नियमान्पुरश्चरणकृच्चरेत् ॥ विण्मूत्रोत्सर्गशङ्कादियुक्तः कर्म्म करोति यत् । जपार्च्चनादिकं सर्वमपवित्रं भवेत्प्रिये ॥ मलिनाम्बरकेशादिमुखदौर्गंध्यसंयुतः । यो जपेत्तं दहत्याशु देवता गुप्तिसंस्थिता ॥ आलस्यं जृंभणं निद्रां क्षुतं निष्ठीवनं भयम् । नीचाङ्गस्पर्शनं कोपं जपकाले विवर्जयेत् ॥ एवमुक्तविधानेन विलंबं त्वरितं विना । उक्तसंख्यं जपं कुर्य्यात्पुरश्चरणसिद्धये ॥ देवतागुरुमंत्राणामैक्यं सम्भावयान्धिया । जपेदेकमनाः प्रातःकालं मध्यं दिनावधि ॥ यत्संख्यया समारब्धं तज्जप्तव्यं दिनेदिने । यदि न्यूनाधिकं कुर्य्याद्व्रतभ्रष्टो भवेन्नरः ॥ कृते जपस्तु कल्पोक्तस्त्रेतायां द्विगुणो मतः । द्वापरे त्रिगुणः प्रोक्तश्चतुर्गुणजपः कलौ" ॥ (वैशम्पायनसंहितायाम्) "पतितानामन्त्यजानां दर्शने भाषणे श्रुते । क्षुतेऽधोवायुगमने जृम्भणे जपमुत्सृजेत् ॥ तथा तस्य च तत्प्रातौ प्राणायामं षडङ्गकम् । कृत्वा सम्यग्जपेच्छेषं यद्वा सूर्यादिदर्शनम् ॥ उष्णीषी कंचुकी नग्नो मुक्तकेशो गणावृतः । अपवित्रकरोऽशुद्धः प्रलपन्न जपेत्क्वचित्" ॥ (तंत्रसारे) "अनासनः शयानो वा गच्छन्भुंजान एव वा । अप्रावृतौ करौ कृत्वा शिरसा प्रावृतोपि वा ॥ चिन्ताव्याकुलचित्तो वा क्षुब्धो भ्रान्तः क्षुधान्वितः ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

रथ्यायामशिवस्थाने न जपेत्तामिरालये ॥ उपानद्गूढपादो वा यानशय्यागतोऽपि वा । प्रसार्य्य न जपेत्पादावुत्कटासन एव च ॥ न यज्ञकाष्ठे पाषाणे न भूमौ नासने स्थितः ॥ " (तत्रैव) " मनः संहृत्य विषयान्मंत्रार्थगतमानसः । न द्रुतं न विलंबं च जपेन्मौक्तिकपङ्क्तिवत् ॥ उच्चरेदर्थमुद्दिश्य मानसः स जपः स्मृतः । जिह्वोष्ठौ चालयेत्किंचिद्देवतागतमानसः ॥ किंचिच्छ्रवणयोग्यः स्यादुपांशुः स जपः स्मृतः ॥ मंत्रमुच्चारयेद्वाचा वाचिकः स जपः स्मृतः । जिह्वाजपः शत गुणः साहस्रो मानसः स्मृतः । जिह्वाजपः स विज्ञेयः केवलं जिह्वया बुधैः " ॥ (मन्त्रमहोदधौ) " आमध्याह्नं जपं कुर्य्यादुपांशुं वाथ मानसम् । हविष्यं निशि भुंजीत त्रिः स्नाय्यभ्यंगवर्जितः ॥ व्यग्रताऽऽलस्यनिष्ठीवक्रोधपादप्रसारणम् । अन्यभाषांत्यजेक्षे च जपकाले त्यजेत्सुधीः ॥ स्त्रीशूद्रभाषणं निंदां तांबूलं शयनं दिवा । प्रतिग्रहं नृत्यगीते कौटिल्यं वर्जयेत्सदा ॥ भूशय्या ब्रह्मचर्य्यं च त्रिकालं देवतार्च्चनम् । नैमित्तिकार्च्चनं देवस्तुतिं विश्वासमाश्रयेत् ॥ प्रत्यहं प्रत्यहं तावन्नैव न्यूनाधिकं क्वचित् । एवं जपं समाप्यान्ते दशांशं होममाचरेत् " ॥ (पुरश्चरणचन्द्रिकायामपि) "ततो जपदशांशेन होमं कुर्य्यादिनेदिने । अथवा लक्षसंख्यायां पूर्णायां होममाचरेत्" ॥ (गौतमीये तंत्रसारे च) "जपान्ते प्रत्यहं मंत्री होमयेत्त दशांशतः । तर्पणं चाभिषेकं च तत्तद्दशांशतो मुने ॥ प्रत्यहं भोजयेद्विप्रान्यूनाधिकप्रशान्तये । अथवा सर्वपूर्त्तौ च होमादिकम थाचरेत् ॥ संपूर्णायां प्रतिज्ञायां तर्पणादिकमाचरेत् ॥ होमाद्यशक्तौ च (सनत्कुमारसंहितायाम्) "यद्यदङ्गं भवेद्धीनं तत्संख्या द्विगुणो जपः । होमाभावे जपः कार्य्यो होमसंख्याचतुर्गुणः ॥ विप्राणां क्षत्रियाणां च रससंख्यागुणः स्मृतः । वैश्यानां वसुसं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ख्याकमेषां स्त्रीणामयं विधिः" ॥ अत्राप्यशक्तश्चेत्तद्व्यवस्था (योगिनीहृदये) "होमकर्मण्यशक्तानां विप्राणां द्विगुणो जपः । इत
रेषां तु वर्णानां त्रिगुणादिः समीरितः" ॥ (वासिष्ठे तु) "यद्यदङ्गं विहीयेत तत्संख्याद्विगुणो जपः । कर्त्तव्यश्चाङ्गसिद्ध्यर्थं तद
शक्तेन भक्तितः ॥ विप्रभोजनमात्रेण व्यङ्गं साङ्गं भवेद्ध्रुवम् । यत्र भुंक्ते द्विजस्तस्मात्तत्र भुंक्ते हरिः स्वयम् ॥ इति जपकृत्यविचारः ॥
अथ स्मार्ताह्निककृत्यविचारः (दक्षस्मृतौ) "प्रातरुत्थाय कर्तव्यं यद्विजेन दिनेदिने । तत्सर्वं संप्रवक्ष्यामि द्विजानामुपकार
कम् ॥ (बृहन्नारदीये) ब्राह्मे मुहूर्ते चोत्थाय परं ब्रह्म विचिंतयेत् । ततो व्रजेन्नैर्ऋताशां बृहत्सोदकभाजनः ॥ ग्रामादूरतरं
गच्छेत्सदाचारस्य सेवकः ॥ दिवासंध्यासु कर्णस्थब्रह्मसूत्र उदङ्मुखः ॥ अंतर्धाय तृणं भूमिं शिरः प्रावृत्य वाससा । वक्त्रान्नियम्य
यत्नेन नोष्ठौवेन्नोच्छ्वसेदपि । कुर्यान्मूत्रं पुरीषं च रात्रौ चेद्दक्षिणामुखः । छायायामंधकारे वा रात्रावहनि वा द्विजः ॥ यथासुखं
प्रकुर्वीत प्राणबाधाभयेषु च ॥ गृहीताशिश्नश्चोत्थाय गृहीतशुचिमृत्तिकः । गंधलेपक्षयकरं शौचं कुर्यादतंद्रितः ॥ एका लिंगे
गुदे पंच त्रिवामे दश चोभयोः । द्विसप्त पादयोश्चैव गार्हस्थ्यं शौचमुच्यते ॥ ततः षोडश गंडूषान्प्रकुर्याद्द्वादशैव वा । मूत्रोत्स
र्गे तु गंडूषानष्टौ वा चतुरो गृही ॥ उत्थाय नेत्रे प्रक्षाल्य दंतकाष्ठं समाहरेत् । अपामार्गं बादरं वा द्वादशाङ्गुलमव्रणम् ॥ कनिष्ठां
गुलिवत्स्थूलं पूर्वार्द्धे कृतकूर्चकम् । शुचिर्द्वादशगंडूषैर्निषिद्धं भानुवासरे ॥ आचम्य प्रयतः सम्यक् प्रातःस्नानं समाचरेत् । स्नानाद
नंतरं तावत्तर्पयेत्तीर्थदेवताः ॥ समुद्रगानदीस्नानमुत्तमं परिकीर्तितम् । वापीकूपतडागेषु मध्यमं कथितं बुधैः ॥ गृहे स्नानं तु
सामान्यं गृहस्थस्य प्रकीर्तितम् ॥ ततश्च वाससी शुद्धे शुक्ले च परिधाय च । उत्तरीयं सदा धार्यं ब्राह्मणेन विजानता ॥ उप

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

रथ्यायामशिवस्थाने न जपेत्तामिरालये ॥ उपानद्गूढपादो वा यानशय्यागतोऽपि वा । प्रसार्य्य न जपेत्पादावुत्कटासन एव च ॥ न यज्ञकाष्ठे पाषाणे न भूमौ नासने स्थितः ॥ " (तत्रैव) " मनः संहृत्य विषयान्मंत्रार्थगतमानसः । न द्रुतं न विलंबं च जपेन्मौक्तिकपङ्क्तिवत् ॥ उच्चरेदर्थमुद्दिश्य मानसः स जपः स्मृतः । जिह्वोष्ठौ चालयेत्किंचिद्देवतागतमानसः ॥ किंचिच्छ्रवणयोग्यः स्यादुपांशुः स जपः स्मृतः ॥ मंत्रमुच्चारयेद्वाचा वाचिकः स जपः स्मृतः । जिह्वाजपः शत गुणः साहस्रो मानसः स्मृतः । जिह्वाजपः स विज्ञेयः केवलं जिह्वया बुधैः " ॥ (मन्त्रमहोदधौ) " आमध्याह्नं जपं कुर्य्यादुपांशुं वाथ मानसम् । हविष्यं निशि भुंजीत त्रिः स्नाय्यभ्यंगवर्जितः ॥ व्यग्रताऽऽलस्यनिष्ठीवक्रोधपादप्रसारणम् । अन्यभाषांत्यजेक्षे च जपकाले त्यजेत्सुधीः ॥ स्त्रीशूद्रभाषणं निंदां तांबूलं शयनं दिवा । प्रतिग्रहं नृत्यगीते कौटिल्यं वर्जयेत्सदा ॥ भूशय्या ब्रह्मचर्य्यं च त्रिकालं देवतार्च्चनम् । नैमित्तिकार्च्चनं देवस्तुतिं विश्वासमाश्रयेत् ॥ प्रत्यहं प्रत्यहं तावन्नैव न्यूनाधिकं क्वचित् । एवं जपं समाप्यान्ते दशांशं होममाचरेत् " ॥ (पुरश्चरणचन्द्रिकायामपि) "ततो जपदशांशेन होमं कुर्य्यादिनेदिने । अथवा लक्षसंख्यायां पूर्णायां होममाचरेत्" ॥ (गौतमीये तंत्रसारे च) "जपान्ते प्रत्यहं मंत्री होमयेत्त दशांशतः । तर्पणं चाभिषेकं च तत्तद्दशांशतो मुने ॥ प्रत्यहं भोजयेद्विप्रान्यूनाधिकप्रशान्तये । अथवा सर्वपूर्त्तौ च होमादिकम थाचरेत् ॥ संपूर्णायां प्रतिज्ञायां तर्पणादिकमाचरेत् ॥ होमाद्यशक्तौ च (सनत्कुमारसंहितायाम्) "यद्यदङ्गं भवेद्भग्नं तत्संख्या द्विगुणो जपः । होमाभावे जपः कार्य्यो होमसंख्याचतुर्गुणः ॥ विप्राणां क्षत्रियाणां च रससंख्यागुणः स्मृतः । वैश्यानां वसुसं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ख्याकमेषां स्त्रीणामयं विधिः" ॥ अत्राप्यशक्तश्चेत्तद्व्यवस्था (योगिनीहृदये) "होमकर्मण्यशक्तानां विप्राणां द्विगुणो जपः । इत
रेषां तु वर्णानां त्रिगुणादिः समीरितः" ॥ (वासिष्ठे तु) "यद्यदङ्गं विहीयेत तत्संख्याद्विगुणो जपः । कर्त्तव्यश्चाङ्गसिद्ध्यर्थं तद
शक्तेन भक्तितः ॥ विप्रभोजनमात्रेण व्यङ्गं साङ्गं भवेद्ध्रुवम् । यत्र भुंक्ते द्विजस्तस्मात्तत्र भुंक्ते हरिः स्वयम् ॥ इति जपकृत्यविचारः ॥
अथ स्मार्ताह्निककृत्यविचारः (दक्षस्मृतौ) "प्रातरुत्थाय कर्तव्यं यद्द्विजेन दिनेदिने । तत्सर्वं संप्रवक्ष्यामि द्विजानामुपकार
कम् ॥ (बृहन्नारदीये) ब्राह्मे मुहूर्ते चोत्थाय परं ब्रह्म विचिंतयेत् । ततो व्रजेन्नैर्ऋताशां बृहत्सोदकभाजनः ॥ ग्रामाद्दूरतरं
गच्छेत्सदाचारस्य सेवकः ॥ दिवासंध्यासु कर्णस्थब्रह्मसूत्र उदङ्मुखः ॥ अंतर्धाय तृणं भूमिं शिरः प्रावृत्य वाससा । वक्त्रान्नियम्य
यत्नेन नोष्ठीवेन्नोच्छ्वसेदपि । कुर्यान्मूत्रं पुरीषं च रात्रौ चेद्दक्षिणामुखः । छायायामंधकारे वा रात्रावहनि वा द्विजः ॥ यथासुखं
प्रकुर्वीत प्राणबाधाभयेषु च ॥ गृहीताशिश्नश्चोत्थाय गृहीतशुचिमृत्तिकः । गंधलेपक्षयकरं शौचं कुर्यादतंद्रितः ॥ एका लिंगे
गुदे पंच त्रिवामे दश चोभयोः । द्विसप्त पादयोश्चैव गार्हस्थ्यं शौचमुच्यते ॥ ततः षोडश गंडूषान्प्रकुर्याद्द्वादशैव वा । मूत्रोत्स
र्गे तु गंडूषानष्टौ वा चतुरो गृही ॥ उत्थाय नेत्रे प्रक्षाल्य दंतकाष्ठं समाहरेत् । अपामार्गं बादरं वा द्वादशाङ्गुलमव्रणम् ॥ कनिष्ठां
गुलिवत्स्थूलं पूर्वार्द्धे कृतकूर्चकम् । शुचिर्द्वादशगंडूषैर्निषिद्धं भानुवासरे ॥ आचम्य प्रयतः सम्यक् प्रातःस्नानं समाचरेत् । स्नानाद
नंतरं तावत्तर्पयेत्तीर्थदेवताः ॥ समुद्रगानदीस्नानमुत्तमं परिकीर्तितम् । वापीकूपतडागेषु मध्यमं कथितं बुधैः ॥ गृहे स्नानं तु
सामान्यं गृहस्थस्य प्रकीर्तितम् ॥ ततश्च वाससी शुद्धे शुक्ले च परिधाय च । उत्तरीयं सदा धार्यं ब्राह्मणेन विजानता ॥ उप

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

विश्य शुचौ देशे प्राङ्मुखो वा उदङ्मुखः । भूत्वा बद्धशिखः कुर्यादंतर्जानुभुजद्वयम् ॥ सपवित्रेण हस्तेन कुर्यादाचमनक्रियाम् । नोच्छिष्टं तत्पवित्रं तु भुक्तोच्छिष्टं तु वर्जयेत् ॥ आचम्य तिलकं कुर्याच्चंदनेनाथ भस्मना । ऊर्ध्वं पुंड्रं त्रिपुंड्रं वा मध्ये छिद्रं प्रकल्पयेत् ॥ निवसत्यूर्ध्वपुंड्रे तु श्रिया सह हरिः स्वयम् । त्रिपुंड्रे धूर्जटिः साक्षादुमया सह सर्वदा ॥ विना छिद्रं तु तत्पुंड्रं शुनः पादसमं विदुः ॥ श्वेतं ज्ञानकरं प्रोक्तं रक्तं वश्यकरं नृणाम् । पीतं सर्वर्द्धिदं प्रोक्तमन्यत्तु परिवर्जयेत् ॥ प्राणायामं ततः कृत्वा संध्यावंदनमाचरेत् । पूर्वसंध्यां सनक्षत्रामुपासीत यथाविधि ॥ गायत्रीमभ्यसेत्तावद्यावदादित्यदर्शनम् । सावित्रैरनघैर्मंत्रैरुपस्थाय कृतांजलिः ॥ यस्तु संध्यामुपासीत श्रद्धया विधिवद्विजः । न तस्य किंचिदुःप्राप्यं त्रिषु लोकेषु विद्यते ॥ दिवसस्यादिमे भागे कृत्यमेतदुदीरितम् । ततोधिकनिमित्तं वै विष्णुपूजनमाचरेत् ॥ ततो माध्याह्निकीं संध्यां तिलतर्पणमाचरेत् । ततः पंचमहायज्ञान्कुर्याद्भूतबलिं ततः ॥ द्वारावलोकनं कुर्यादतिथिग्रहणाय च । गोदोहकालमात्रं तु भाग्यात्प्राप्तेऽतिथौ यदि ॥ तोषयेत्परया भक्त्या यथाशक्त्यन्नपानतः ॥ ततश्च भोजनं कुर्यात्प्राङ्मुखो मौनमास्थितः । प्रशस्तशुद्धपात्रे च भुंजीतान्नमकुत्सयन् ॥ भोजनार्तिंकचिदन्नाग्र्यमादायैवं समुच्चरेत् । नमो भूपतये पूर्वं भुवनपतये नमः ॥ भूतानां पतये पश्चाद्धर्माय च ततो बलिम् । दत्वा च चित्रगुप्ताय भूतेभ्य इदमुच्चरन् ॥ प्राणायापानसंज्ञाय व्यानाय च ततः परम् ॥ उदानाय ततो ब्रूयात्समानाय ततः परम् ॥ प्रणवं पूर्वमुच्चार्य स्वाहा चांते घृतप्लुतम् । पंचकृत्वो ग्रसेदन्नं जिह्वया न तु दर्शयेत् ॥ ततश्च तन्मना भूत्वा भुंजीत मधुरं पुरः । लवणाम्लौ तथा मध्ये कटुतिक्तौ ततः परम् ॥ प्राग् द्रवं पुरुषोश्नीयान्मध्ये तु कठिनाशनम् । अंते पुनर्द्रवाशी तु बलारोग्ये न मुञ्चति ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नाद्याच्छास्त्रविरुद्धं तु भक्ष्यं भोज्यादिकं द्विजः । अभोज्यं प्रादुराहारं शुष्कं पर्युषितं तथा ॥ सर्वं सशेषमश्नीयाद्धृतपायसवर्जितम् । आचम्य पात्रमुत्सार्य किंचिद्भावेण पाणिना ॥ ततः परं समुत्थाय बहिः स्थित्वा समाहितः । शोधयन्मुखहस्तौ च मृदा शुद्धजलेन च ॥ कृत्वा षोडश गंडूषाः शुद्धो भूत्वा सुखासनः । इमौ मंत्रौ पठन्नेव पाणिनोदरमालभेत् ॥ अगस्त्यं कुंभकर्णं च शनिं च वडवानलम् । आहारपरिपाकार्थं स्मरेद्भीमं च पंचमम् ॥ आतापी मारितो येन वातापी च निपातितः । समुद्रः शोषितो येन स मेऽगस्त्यः प्रसीदतु ॥ भूयोप्याचम्य कर्तव्यं ततस्तांबूलभक्षणम् । भुक्तोपविष्टः श्रीकृष्णं परं ब्रह्म विचारयेत् ॥ सच्छास्त्रादिविनोदेन सन्मार्गाद्यविरोधिना । ततश्चाध्यात्मविद्यायाः कुर्वीत श्रवणं सुधीः ॥ सर्वथावृत्तिहीनोपि मुहूर्त्तं स्वस्थमानसः । श्रुत्वा धर्म्मं विजानाति श्रुत्वा पापं परित्यजेत् ॥ श्रुत्वा निवर्तते मोहः श्रुत्वा ज्ञानामृतं लभेत् । नीचोपि श्रवणेनाशु श्रेष्ठत्वं प्रतिपद्यते ॥ श्रेष्ठोपि नीचतां याति रहितः श्रवणेन च । व्यवहारं ततः कुर्याद्बहिर्गत्वा यथासुखम् ॥ सूर्यैस्तशिखरं प्राप्ते तीर्थं गत्वाथवा गृहम् ॥ सायंसध्यामुपासीत धौतांघ्रिः सपवित्रकः ॥ यस्त्रिसंध्यमुपासीत ब्राह्मणः श्रद्धयान्वितः ॥ तत्तेजो वर्धते नित्यं घृतेनेव हुताशनः ॥ सादित्यां पश्चिमां संध्यामर्द्धास्तमितभास्कराम् । प्रत्यङ्मुखोपविष्टस्तु वाग्यतः सुसमाहितः ॥ प्रणवव्याहृतियुतां गायत्रीं तु जपेत्ततः । अक्षसूत्रं समादाय सम्यगातारकोदयात् ॥ उपास्य पश्चिमां संध्यां हुत्वाग्निमश्नीयात्ततः । सायंप्रातर्वैश्वदेवः कर्तव्यो बलिकर्म्म च ॥ अनश्नतापि सततमन्यथा किल्बिषी भवेत् । कृतपादादिशौचस्तु भुक्त्वा सायं ततो गृही ॥ गच्छेच्छय्यां ततो मृद्धीमुपधानसमन्विताम् । स्वगृहे प्राक्शिराः शेते श्वाशुरे दक्षिणाशिराः ॥ प्रवासे पश्चिमशिरा न कदाचिदुदक्शिराः ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

रात्रिसूक्तं जपेत्स्मृत्वा देवाश्च सुखशायिनः । नमस्कृत्वाऽव्ययं विष्णुं समाधिस्थं स्वपेन्निशि ॥ अगस्त्यो माधवश्चैव मुचुकुंदो महाबलः । कपिलो मुनिरास्तीकः पंचैते सुखशायिनः ॥ मांगल्यं पूर्णकुंभं च शिरःस्थाने निधाय च ॥ वैदिकैर्गारुडै मैत्रै रक्षां कृत्वा स्वपेत्ततः ॥ ऋतुकालाभिगामी स्यात्स्वदारनिरतः सदा ॥ पर्ववर्ज्जं व्रजेदेनां तद्व्रती रतिकाम्यया ॥ प्रदोषप श्चिमौ यामौ वेदाभ्यासेन तौ नयेत् । यामद्वयं शयानस्तु ब्रह्मभूयाय कल्पयेत् ॥ अहिंसा सत्यवचनं सर्वभूतानुकंपनम् । शमो दानं यथाशक्ति गार्हस्थ्यो धर्म उच्यते ॥ परदारेष्वसंसर्गो धर्मस्त्रीपरिरक्षणम् । अदत्तादानविरमो मधुमांसविवर्जनम् ॥ एष पंचविधो धर्मो बहुशाखः सुखोदयः । देहिभिर्देहपरमैः कर्तव्यो देहसंभवः" ॥ (ब्रह्मपुराणे) "इत्येतदखिलं प्रोक्तमहो रात्राश्रितं मया । ब्राह्मणानां कृत्यमेतदपवर्गफलप्रदम् ॥ नास्तिक्यादथवालस्याद्ब्राह्मणो न करोति यः । स याति नरकं घोरं पशुयोनौ च जायते" ॥ इत्याह्निककृत्यविचारः ॥ ॥ अथ देवपूजायां विशेषः । (शारदातिलके) " विशेन्मुद्रा सने मंत्री प्राङ्मुखो वाप्युदङ्मुखः । बद्धपद्मासनो मौनी समाहितजितेंद्रियः ॥ स्थापयेद्दक्षिणे भागे पूजाद्रव्याणि देशिकः" ॥ (भविष्यदेवीपुराणयोः) "शुचिः सुवस्त्रधृक् प्राज्ञो मौनी ध्यानपरायणः । गतकामभयद्वन्द्वो रागमात्सर्य्यवर्जितः ॥ आत्मानं पूजयित्वा च सुगंधसितवाससा । सुमुहूर्ते यजेद्देवान्स्वकीयासनसंस्थितान्" ॥ इति । सुमुहूर्ते पूर्वाह्णादिकाले । 'पूर्वाह्ण एव कुर्वीत देवतानां च पूजनम्' इति मनुवाक्यात् ॥ (कामनाभेदेन देवार्चनं मत्स्यपुराणे) "आरोग्यं भास्करादिच्छेद्धनमिच्छेद्धुताशनात् । ज्ञानं च शंकरादिच्छेन्मुक्तिमिच्छेज्जनार्दनात्" ॥ कालविशेषे देवतापूजा (स्कांदे) " ब्रह्मा कृतयुगे देवस्त्रेतायां भगवान् रविः ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

द्वापरे भगवान्विष्णुः कलौ देवो महेश्वरः" देवार्चनकालः (मात्स्ये) "प्रातर्मध्यंदिने सायं देवपूजां समारभेत्। अशक्तौ विस्तरेणैव प्रातः संपूज्य केशवम् ॥ मध्याह्ने चैव सायं च पुष्पांजलिमपि क्षिपेत् ॥" देवताप्रतिमाविचारो (मात्स्ये) "सौवर्णी राजती वापि ताम्री रत्नमयी तथा। शैली दारुमयी वापि लोहसंघमयी तथा॥ लोहसंघमयी मिलितपंचधातुमयी। "अंगुष्ठपर्वादारभ्य वितस्तिं यावदेव तु। गृहेषु प्रतिमा कार्या नाधिका शस्यते बुधैः॥" पूजोपचाराः (प्रपंचसारे) "आसनं स्वागतं पाद्यमर्घ्यमाचमनीयकम्। मधुपर्काचमनस्नानवसनाभरणानि च ॥ सुगंधिसुमनोधूपदीपनैवेद्यवंदनम्। प्रयोजयेदर्चनायामुपचारांश्च षोडश ॥ अर्घ्यपाद्याचमनकमधुपर्काचमनान्यपि। गंधादयो निवेद्यांता उपचारा दश क्रमात् ॥ गंधादयो निवेद्यांताः पूजाः पंचोपचारिकाः। उपचारैर्यथाशक्ति देवतामन्वहं यजेत् ॥" (कर्मप्रदीपेऽपि) "आवाहनासनं पाद्यमर्घ्यमाचमनीयकम्। स्नानं वस्त्रोपवीतं च गंधमाल्यान्यनुक्रमात् ॥ धूपं दीपं च नैवेद्यं तांबूलं च प्रदक्षिणा। पुष्पांजलिरिति प्रोक्ता उपचारास्तु षोडश ॥ फलेन सुफलावाप्तिः सांगता दक्षिणार्पणात्। गंधपुष्पे धूपदीपौ नैवेद्य इति पंचकम् ॥ पंचोपचारमाख्यातं पूजने तत्त्वविद्बुधैः ॥ राजोपचाराः—ततः पंचामृताभ्यंगमंगस्योद्वर्त्तनं तथा। मधुपर्कं परिमलद्रव्याणि विविधानि च ॥ पादुकांदोलनादर्शौ व्यजनं छत्रचामरे। वाद्यार्तिक्यं नृत्यगीतशय्याराजोपचारकाः ॥" पुरुषसूक्तेन षोडशोपचारपूजामंत्राः (बृहत्पाराशरसंहितायाम्) "आद्ययाऽऽवाहयेद्देवमृचा तु पुरुषोत्तमम्। द्वितीययासनं दद्यात्पाद्यं चैव तृतीयया ॥ अर्घ्यश्चतुर्थ्या दातव्यः पंचम्याऽऽचमनं तथा। षष्ठ्या स्नानं प्रकुर्वीत सप्तम्या वस्त्रधौतकम् ॥ यज्ञोपवीतं चाष्टम्या नवम्या गंधमेव च। पुष्पं देयं दशम्या तु एकादश्या च धूपकम् ॥ द्वादश्या दीपकं दद्यात्रयोदश्या

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

निवेदनम् । चतुर्दश्या नमस्कारं पंचदश्या प्रदक्षिणा ॥ षोडश्योद्वासनं कुर्याच्छेषकर्मणि पूर्ववत् । तच्च सर्वं जपेद्भूयः पौरुषं सूक्तमेव च ॥ " (योगियाज्ञवल्क्यः) "दद्यात्पुरुषसूक्तेन यः पुष्पाण्यप एव वा । अर्चितं स्याज्जगदिदं तेन सर्वं चराचरम् ॥" पंचामृतपूजामंत्राः (शिवपुराणे) "पूजयेत्परया भक्त्या ह्युपचारैरनेकशः । प्रयोगादिविधायैव कामनां विनियुज्य च ॥ पंचद्रव्यैश्च प्रथमं पूजनीयो महेश्वरः । दुग्धं दधिमधुसर्पिःशर्कराणां क्रमेण च ॥ तस्य तस्य च मंत्रेण तत्तद्द्रव्यं समर्पयेत् ॥ " इति । तस्य तस्य मंत्रेण पयः पृथिव्याम् इत्यादिदुग्धादिमंत्रेण इत्यर्थः । स्नानादिपात्रेषु प्रक्षेपणीयाः पदार्थाः (मंत्रतंत्रप्रकाशे) " अक्षता गंधपुष्पाणि स्नानपात्रे तथा त्रयम् । द्रव्याभावे प्रदातव्याः क्षालितास्तंडुलाः शुभाः ॥" पाद्यपात्रम् (शारदातिलके) "दूर्वा च विष्णुक्रांतां च श्यामाकं पद्ममेव च । पाद्याङ्गानि च चत्वारि कथितानि समासतः ॥ अर्घ्यद्रव्याणि (तत्रैव) गंधपुष्पा क्षतयवकुशाग्रतिलसर्षपैः । सदूर्वैः सर्वदेवानामेतदर्घ्यमुदीरितम् ॥ " (भविष्येपि) " आपः क्षीरं कुशाग्राणि दध्यक्षतातिलास्तथा । यवाः सिद्धार्थकाश्चैव अर्घ्याऽष्टांगः प्रकीर्तितः ॥ आचमनीयद्रव्याणि—कर्पूरमगुरुं पुष्पं दद्याज्जातीफलं सुने । लवंगमपि कंकोलं शस्तमाचमनीयके ॥ मधुपर्कद्रव्याणि—सुधाणुना ततः कुर्यान्मधुपर्कं सुखांबुजे । आज्यं दधिमधून्मिश्रमेतदुक्तं मनीषिभिः ॥ तेनैव मनुना कुर्यादद्भिराचमनीयकम् ॥ पंचाऽमृतम्—गव्यमाज्यं दधि क्षीरं माक्षिकं शर्करान्वितम् । एकत्र मिलितं ज्ञेयं दिव्यं पंचामृतं परम् ॥ पंचगव्यम्—पंचगव्यं पवित्रं तु आहरेत्ताम्रभाजने । गायत्र्या चैव

१ सर्षपाः । २ अमृतबीजेन ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

गोमूत्रं गंधद्वारेण गोमयम् ॥ आप्यायस्वेति च क्षीरं दधिक्राव्णेति वै दधि । तेजोसिशुक्रमित्याज्यं देवस्यत्वा कुशोदकम् ॥ एभिश्च पंचद्रव्यैस्तु पंचगव्यं प्रचक्षते ॥" (विष्णुधर्मे) "गोमूत्रं भागतश्चार्द्धं शकृत्क्षीरस्य च त्रयम् । द्वयं दध्नो घृतस्यैकमेकश्च कुशवारिजः । स्नानम्—गंधाद्भिः कारयेत्स्नानं वाससी परिधापयेत् । दद्याद्दिव्योपवीतं च हाराद्याभरणैः सह ॥ उद्वर्तनद्रव्याणि—रजनी सहदेवी च शिरीषं लक्ष्मणापि च । सहभद्रा कुशाग्राणि उद्वर्तनमिहोच्यते ॥ सौभाग्यद्रव्याणि—हरिद्रा कुंकुमं चैव सिंदूरादिसमन्वितम् । कज्जलं कंठसूत्रादि सौभाग्यद्रव्यमुच्यते ॥" (कौतुकद्रव्याणि भविष्ये) "दूर्वा यवांकुरांश्चैव बालकं चूतपल्लवाः । हरिद्राद्वयसिद्धार्थं शिखिपत्रोरगत्वचः ॥ कंकणौषधयश्चैताः कौतुकाख्या दश स्मृताः ॥" गंधानुलेपनविचारः (कालिकापुराणे) "चूर्णीकृतो वा घृष्टो वा दाहकर्षित एव वा । रसः संमर्दजो वापि प्राण्यंङ्गोद्भव एव वा ॥ गंधः पंचविधः प्रोक्तो देवानां प्रीतिदायकः । (गंधलक्षणानि) गंधचूर्णं गंधपत्रचूर्णं सुमनसां तथा । प्रशस्तगंध उक्तानि पत्रचूर्णानि यानि च ॥ तानि गंधाह्वयानि स्युः स गंधः प्रथमः स्मृतः ॥ घृष्टो मलयजो गंधः सरलश्च न मेरुणा । अगुरुप्रभृतिश्चापि यस्य पंकः प्रदीयते ॥ घृष्ट्वा स घृष्टो गंधोऽयं द्वितीयः परिकीर्तितः ॥ देवदार्वगुरुब्रह्मसालसारान्तचंदनाः । प्रियादीनां च यो दग्ध्वा गृह्यते दाहजो रसः ॥ सदाहकर्षितो गंधस्तृतीयः परिकीर्तितः ॥ स गंधः कौरवी बिल्वं गंधिनी तिलकं तथा । प्रभृतीनां रसो योसौ निष्पीड्य परिगृह्यते ॥

१ गोमयम् । २ हरिद्रा । ३ ह्रीवेरम् । ४ आम्रपल्लवाः । ५ सर्षपम् । ६ मयूरपिच्छम् । ७ सर्पकंचुकी । ८ कस्तूरी । ९ देवदारु । १० पारसपीपल । ११ सोंफ । १२ तालीसपत्र ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ससंमर्दोद्भवो गंधः संमर्दज इतीर्यते ॥ मृगनाभिसमुद्भूतस्तत्कोशोद्भव एव च । गंधः प्राण्यंगजः प्रोक्तो मोददः स्वर्गवासिनाम् ॥ सर्वेषु गंधजातेषु प्रशस्तो मलयोद्भवः । तस्मात्सर्वप्रयत्नेन दद्यान्मलयजं सदा ॥ देवभेदेन गंधास्तत्रैव—कृष्णागुरुः सकर्पूरः सहितो मलयोद्भवैः । वैष्णवप्रीतिदो गंधः कामाख्यायाश्च भैरवे ॥ कुंकुमागुरुकस्तूरीचंद्रभागैः समीकृतैः । त्रिपुराप्रीतिदो गंधस्तथा चंड्याश्च शंभुना ॥" (शारदातिलके तु) "गंधाष्टकं तत्त्रिविधं शक्तिविष्णुशिवात्मकम् । चंदनागुरुकर्पूरचौरकुंकुमरोचनाः ॥ जटामांसीकैपियुताः शक्तेर्गंधाष्टकं विदुः ॥ चंदनागुरुह्रीवेरकुष्ठकुंकुमसेव्यैकाः । जटामांसी मुरमिति विष्णोर्गंधाष्टकं विदुः ॥ चंदनागुरुकर्पूरतमालजलकुंकुमम् । कुशीतं कुष्ठसंयुक्तं शैवं गंधाष्टकं विदुः ॥ गंधदाने अंगुलीविचारः—अनामिकया च देवस्य ऋषीणां च तथैव च । गंधानुलेपनं कार्यं प्रयत्नेन विशेषतः ॥ पितॄणामर्पयेद्गंधं तर्जन्या च सदैव हि । तथैव मध्यमाङ्गुल्या धार्यो गंधः स्वयं बुधैः ॥ गंधादिदाने मुद्रा—मध्यमानामिकाङ्गुष्ठैरङ्गुल्यग्रेण पार्वति । दद्याच्च विमलं गंधं मूलमंत्रेण साधकः ॥ अङ्गुष्ठ तर्जनीभ्यां च पुष्पं देवे निवेदयेत् । मध्यमानामिकाभ्यां तु मध्यपर्वणि देशिकः ॥ अङ्गुष्ठाग्रेण देवेशि धृत्वा धूपं निवेदयेत् । उत्तोलनं त्रिधा कृत्वा गायत्र्या मूलयोगतः ॥ तत्त्वाख्यमुद्रया देवि नैवेद्यं विनिवेदयेत् । मूलेनाचमनं दद्यात्तांबूलं तत्त्वमुद्रया ॥ गंधदाने फलम्—गंधेन लभते कामं गंधो धर्मप्रदः सदा । अर्थानां साधको गंधो गंधे मोक्षः प्रतिष्ठितः ॥" (भविष्येपि) "चंदनेन विलिप्यार्च्चामग्निष्टोमफलं लभेत् । विलिप्य कृष्णागुरुणा वाजपेयफलं लभेत् ॥" ग्राह्याणि पुष्पाणि (शारदातिलके) "कमले

१ कचूर । २ गोरोचन । ३ रक्तचंदन । ४ उशीर ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

करवीरे द्वे कुमुदे तुलसीद्वयम् । जातीद्वयं केतकी द्वे कह्लारं चंपकोत्पले ॥ कुंदमंदारपुन्नागपाटलानागचंपकम् । आरग्वधं कर्णिकारं पारंती नवमालिका ॥ सौगंधिकं सकोरंटं पलाशाशोकमल्लिकाः । धत्तूरं सर्जकं बिल्वमर्जुनं मुनिपत्रकम् ॥ अन्यान्यपि सुगंधीनि पत्रपुष्पाणि देशिकैः । उपदिष्टानि पूजायामाददीत विचक्षणः ॥ मलिनं भूमिसंस्पृष्टं कृमिकेशादिदूषितम् । अङ्गस्पृष्टं समाघ्रातं त्यजेत्पर्युषितं गुरुः ॥" (ग्रंथान्तरे) "पंकजं पंचरात्रं स्यादशरात्रं च बिल्वकम् । एकादशाहं तुलसी नैव पर्युषिता भवेत् ॥ जातीशमीकुशाः कंकुः मल्लिका करवीरजम् । नागपुन्नागकाशोकरक्तनीलोत्पलानि च ॥ चंपकं बकुलं चैव पद्मबिल्वं पवित्रकम् । एतानि सर्वदेवानां संग्राह्याणि समानि च ॥ पत्रं वा यदि वा पुष्पं फलं वापि तथैव च । केशवार्थे शिवार्थे वा यथोत्पन्नं तथार्पयेत् ॥ मध्यमानामिकामध्ये पुष्पं संगृह्य पूजयेत् । अङ्गुष्ठतर्जनीभ्यां तु निर्माल्यमपनोदयेत् ॥" बिल्वपत्रे विशेषः (पटले) "त्रिजटापत्रकैकेन हेरंबं हरिमर्चयेत् । कैवल्यं तस्य तेनैव शक्तिपूजा विशेषतः ॥ पत्रं वा यदि वा पुष्पं फलं नेष्टमधोमुखम् । यथोत्पन्नं तथा देयं बिल्वपत्रमधोमुखम् ॥ देवभेदेन वर्ज्याक्षतादीनि–नाक्षतैरर्चयेद्विष्णुं न तुलस्या गणाधिपम् ॥ न दूर्वया यजेद्देवीं बिल्वपत्रैर्न भास्करम् ॥ उन्मत्तमर्कपुष्पं च विष्णोर्वर्ज्यं सदा बुधैः । फलं च कृमिसंयुक्तं प्रयत्नात्तद्विवर्जयेत् ॥" (मंत्रमहोदधौ) "अक्षतानर्कधत्तूरौ विष्णौ नैवार्पयेत्सुधीः । बंधूकं केतकीं कुंदं केशरं कुटजं जपाम् ॥ शंकरे नार्पयेद्विद्वान्मालतीं यूथिकामपि । शक्तौ दूर्वार्कमंदारान्मालूरं तगरं रवौ ॥ विनायके तु तुलसीं नार्पयेज्जातुचिद्बुधः ॥" (आह्निकतत्त्वे) "वर्ज्यं पर्युषितं तोयं वर्ज्यं पर्युषितं दलम् । न वर्ज्यं जाह्नवीतोयं न वर्ज्यं तुलसीदलम् ॥ शिवे विवर्जयेत्कुंदमुन्मत्तं च हरौ तथा । देवी

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नामर्कमंदारौ सूर्यस्य तगरं तथा ॥" (लघुहारीतः) "स्नानं कृत्वा च ये केचित्पुष्पं गृह्णंति वै द्विजाः । देवतास्तन्न गृह्णन्ति भस्मीभवति काष्ठवत्" इति। एतत्तु द्वितीयस्नानाभिप्रायकमिति रत्नाकरः॥ तथा च (मत्स्यसूक्तेपि) " स्नात्वा मध्याह्नसमये न च्छिंद्यात्कुसुमं नरः । तत्पुष्पस्यार्चने देवि रौरवे परिपच्यते ॥ धूपविचारः (विष्णुधर्मोत्तरे) "धूपदः सर्वमाप्नोति दीपदः सर्वमश्नुते॥" धूपद्रव्याणि (शारदातिलके) "अगरूशीरगुग्गुलुशर्करामधुचंदनैः । धपयेद्घाज्यसंमिश्रैर्नीचैर्देवस्य देशिकः ॥" (ग्रंथांतरे) "अगुरु तगरु कुष्ठं शैलजं शर्करा स्यादुभयघनपुरस्ताच्चंदनैलाश्च साक्षात् । त्वचनखरमुशीरं मांसिकर्पूरतालीसदलजलकचोरं जाति युग्धूपराजः ॥" (तंत्रसारे) "गुग्गुलुः सरलं दारु पत्रं मलयसंभवम् । ह्रीबेरमगुरुं कुष्ठं गुडं सर्जरसं घनम् ॥ हरितकीं नखीं लाक्षां जटामांसी च शैलजम् । षोडशाङ्गं विदुर्धूपं दैवे पित्र्ये च कर्मणि ॥ (अन्यच्च) चंदनोभयकुष्ठं च नखसर्जः कचोरकः । एतद्गुडसमानेन धूपं भवति चोत्तमम् ॥ शर्करा नखगंधं च जटामांसीलघुः समम् । क्षौद्रेण सह संमिश्रं धूपं भवति चोत्तमम् ॥ " (दशाङ्गधूपो मदनरत्ने) "षड्भागकुष्ठं द्विगुणो गुडश्च लाक्षात्रयं पंचनखस्य भागाः । हरीतकीसर्जरसं समांशं भागैकमेकं त्रिलवं शिलाजम् । घनस्य चत्वारि पुरस्य चैको धूपो दशाङ्गः कथितो मुनीन्द्रैः ॥" (वामनपुराणे) रुहिकाख्यं कणं दारु सिह्लकं सागुरुं सितम् । शंखं जातिफलं श्रीशे धूपानि स्युः प्रियाणि वै॥" धूपनिवेदने अंगुलीविचारः (तंत्रसारे) "मध्यमानाभिकाङ्गुल्योर्मध्यपर्वणि देशिकः । अंगुष्ठाग्रेण देवेशि धृत्वा धूपं निवेदयेत् ॥ ततः समर्प्पयेद्धूपं घंटावाद्यजयस्वनैः । न भूमौ वितरेद्धूपं नासने न घटे तथा । यथा

१ मोथा । २ एलची । ३ तज । ४ नखनखी । ५ जटमांसी । ६ हावूबेर । ७ कचूर । ८ जावत्री । ९ देवदारु । १० कृष्णागरु ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तथाधारगतं कृत्वा तं विनिवेदयेत् ॥" धूपादिस्थानं (यामले) "निवेदयेत्पुरोभागे गंधं पुष्पं च भूषणम्। दीपं दक्षिणतो दद्यात्पुरतो वा न वामतः ॥ वामतस्तु तथा धूपमग्रे वा न तु दक्षिणे। नैवेद्यं दक्षिणे भागे पुरतो वा न पृष्ठतः ॥ धूपदीपौ सुभोज्यं च देवताग्रे निवेदयेत्।" दीपविचारः (शारदातिलके) "वर्त्याकर्पूरगर्भिण्या सर्पिषा तिलजेन वा। आरोप्य दर्शयेद्दीपानुच्चैः सौरभशालिनः ॥" (कालिकापुराणे) न मिश्रीकृत्य दद्यात्तु दीपं स्नेहे घृतादिकम् ॥ घृतेन दीपकं नित्यं तिलतैलेन वा पुनः ॥ ज्वालयेन्मुनिशार्दूल सन्निधौ जगदीशितुः। कार्पासवर्तिका ग्राह्या न दीर्घा न च सूक्ष्मिका॥" (आह्निकतत्त्वे) "सर्वंसहा वसुमती सहते न त्विदं द्वयम्। अकार्य्यपादघातं च दीपतापं तथैव च ॥" (कालिकापुराणे) "सुवृत्तवर्तिसस्नेहपात्रेऽभ्रे सुदर्शने। मृन्मये वृक्षकोटौ तु दीपं दद्यात्प्रयत्नतः ॥ तैजसं दारवं लोहं मार्तिक्यं नारिकेलजम्। तृणध्वजोद्भवं चापि दीपपात्रं प्रशस्यते ॥ नैव निर्वापयेद्दीपं देवार्थमुपकल्पितम्। दीपहर्ता भवेदंधः काणो निर्वापको भवेत् ॥" (वाराहपुराणे) "दीपं स्पृष्ट्वा तु यो देवि मम कार्याणि कारयेत्। तस्यापराधाद्वै भूमे पापं प्राप्नोति मानवः ॥" (यामले) "दीपं घृतयुतं रक्षेत्तैलयुक्तं च वामतः ॥ दक्षिणे च सितां वर्तिं वामतो रक्तवर्तिकाम्॥ दीपमहिमा—पुरश्चरणकृत्ये च दीपं शृण्विह भैरव। दीपेन लोकाञ्जयति दीपस्तेजोमयः स्मृतः ॥ चतुर्वर्गप्रदो दीपस्तस्माद्दीपैर्यजेच्छ्रिये ॥" (विष्णुधर्मोत्तरे) "यावदक्षिनिमेषाणि दीपो देवालये ज्वलेत्। तावर्षसहस्राणि स्वर्गलोके महीयते ॥" नैवेद्यविचारः (शारदातिलके) "स्वादूपदंशं विमलं पायसं सहशर्करम्। कदलीफलसंयुक्तं साज्यं मंत्री निवेदयेत् ॥ तत्र तत्र जलं दद्यादुपचारांतरान्तरम् ॥ नैवेद्यलक्षणम्—निवेदनीयं यद्द्रव्यं प्रशस्तं प्रयतं तथा ॥ तद्भक्ष्यार्हं पंचविधं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नैवेद्यामिति कथ्यते ॥ भक्ष्यं भोज्यं च लेह्यं च पेयं चूष्यं च पंचमम् ॥ सर्वत्र चैतन्नैवेद्यमाराध्यास्यै निवेदयेत् ॥ पात्राणि-
तैजसेषु च पात्रेषु सौवर्णे राजते तथा । ताम्रे वा प्रस्तरे वापि पद्मपत्रेथ वा पुनः ॥ यज्ञदारुमये वापि नैवेद्यं स्थापयेद्बुधः ।
सर्वाऽभावे च माहेये स्वहस्तघटिते यदि ॥ नैवेद्यकालः–अर्वाग्विसर्जनाद्द्रव्यं नैवेद्यं सर्वमुच्यते । विसर्जिते जगन्नाथे निर्माल्यं
भवति क्षणात् ॥ " (नैवेद्यस्थापनक्रमो गौतमीये) "नैवेद्यं दक्षिणे भागे पुरतो वा न पृष्ठतः । दक्षिणं तु परित्यज्य वामे चैव नि
धापयेत् ॥ अभोज्यं तद्भवेदन्नं पानीयं च सुरोपमम् ॥ " (आह्निकतत्त्वे) "तृषार्ताः पशवो रुद्धाः कन्यका च रजस्वला ।
देवता च सनिर्माल्या हंति पुण्यं पुरा कृतम् ॥ " (देवलः) " चांडालेन शुना वापि दृष्टं हविर्याज्ञिकम् । बिडालादिभिरु
च्छिष्टं दुष्टमन्नं विवर्जयेत् ॥ " (पद्मपुराणे) "हविः शाल्योदनं दिव्यमाज्ययुक्तं सशर्करम् । नैवेद्यं देवदेवाय यावकं पायसं तथा ॥
नैवेद्यवस्त्वलाभे तु फलानि च निवेदयेत् । फलानामप्यलाभे तु तोयान्यपि निवेदयेत् ॥" नैवेद्यभक्षणविचारः (कालिकापुराणे)
" यो यदेवार्चनरतः स तन्नैवेद्यभक्षकः । केवलं सौरशैवे त वैष्णवो नैव भक्षयेत् ॥ समानं त्वन्यनैवेद्यं भक्षयेदन्यदैवतः ॥"
शिवनैवेद्ये विशेषः (भविष्ये) "शालग्रामोद्भवे लिंगे बाणलिंग स्वयंभुवि । रसलिंगे तथार्षे च सुप्रसिद्धप्रतिष्ठिते ॥ हृदये चंद्रकान्ते
च स्वर्णरौप्यादिनिर्मिते । चांद्रायणसमं ज्ञेयं शंभोर्नैवेद्यभक्षणम् ॥ लिंगे स्वयंभुवे बाणे रत्नजे रसनिर्मिते । सिद्धप्रतिष्ठिते
चैव न चंडाधिकृतिर्भवेत् ॥ यत्र चंडाधिकारोस्ति तद्भोक्तव्यं न मानवैः । चंडाधिकारो नो यत्र भोक्तव्यं तत्र भक्तितः ॥"
(हेमाद्रौ परिशिष्टे) " अग्राह्यं शिवनैवेद्यं पत्रं पुष्पं फलं जलम् । शालग्रामशिलासंगात्सर्वं याति पवित्रताम् ॥ " (पुरश्चरण

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

चंद्रिकायाम्) "सुषुम्नावर्त्मना पुष्पमात्रायोद्वासयेत्सुधीः । निर्माल्यं मस्तके धार्यं सर्वाङ्गेष्वनुलेपनम् ॥ नैवेद्यं चोपभुंजीत दत्वा तद्भक्तिशालिने ॥ इति । भक्तिशालिने विष्वक्सेनायेत्यर्थः । तथा च (गौतमीये) "गणेशे वक्रतुंडाय सूर्ये चंडांशवेऽपयेत् । विष्णौ तु विष्वक्सेनाय शिवे चण्डेश्वराय च ॥ शक्त्युच्छिष्टे शेसिकायै दद्यादर्चनासिद्धये । अन्यथा नैव सिद्धिः स्यादर्चको नरकं व्रजेत् ॥" देवनिर्माल्यत्यागे दोषः (रुद्रयामले) "निवेदितं च यद्द्रव्यं भोक्तव्यं तद्विधानतः । तन्न चेद्भुज्यते मोहाद्भोक्तुमायान्ति देवताः ॥" तांबूलादिविचारः (नारदीयपुराणे) "भोजनानंतरं देयमद्भिः कर्पूरवासितैः । मध्यमाचमनं मध्ये पानीयं करमार्जनम् ॥ फलं तांबूलसहितं दक्षिणां कनकान्विताम् । पुष्पांजलिं ततः कुर्याद्भक्त्याऽऽदर्शं प्रदर्शयेत् ॥ नीराजनं ततः कार्यं कार्पूरं विभवे सति । समर्प्य मुकुटादीनि भूषणं छत्रचामरे ॥ प्रसादसुमुखं ध्यात्वा कुर्याच्चैव प्रदक्षिणाम् । नमस्कारं ततः कुर्यात्साष्टांगं भक्तिपूर्वकम् ॥" नीराजनकरणप्रकारः (कालोत्तरतंत्रे) "पंचनीराजनं कुर्य्यात्प्रथमं दीपमालया । द्वितीयं सोदकाब्जेन तृतीयं धौतवाससा ॥ चूताश्वत्थादिपत्रैश्च चतुर्थं परिकीर्त्तितम् । पंचमं प्रणिपातेन साष्टांगेन यथाविधि" (हरिभक्तिविलासे) "आदौ चतुष्पादतले च विष्णो द्वौ नाभिदेशे मुखमंडलैकम् । सर्वेषु चाङ्गेष्वपि सप्तवारानारार्त्तिकं भक्तज्जनस्तु कुर्य्यात् ॥ साष्टाङ्गनमस्कारः—उरसा शिरसा दृष्ट्या मनसा वचसा तथा । पद्भ्यां कराभ्यां जानुभ्यां प्रणामोऽष्टाङ्ग उच्यते ॥ नवधा भक्तिः (भागवते) "श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम् । अर्चनं वंदनं दास्यं सख्यमात्मनिवेदनम् ॥ इति पुंसार्पिता विष्णौ भक्तिश्चेन्नवलक्षणा । क्रियते भगवत्यद्धा सोपि याति परां गतिम् ॥" निर्माल्यग्रहणविचारः (आह्निकतत्त्वे) "पादोदकं च

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

निर्माल्यं नैवेद्यं च विशेषतः । महाप्रसाद इत्युक्ता ग्राह्यं विष्णोः प्रयत्नतः ॥" (पद्मपुराणे) "ये पिबन्ति नरा नित्यं शालग्राम शिलोदकम् । प्रक्षालयंत्यसंदिग्धं ब्रह्महत्यादिपातकम् ॥" (पुलस्त्यः) "शालग्रामशिलावारि सोमपानं दिनेदिने । पात्रांतरेण संग्राह्यं न करेण कदाचन॥" शिवलिंगे विशेषः (निर्णयसिंधौ) "स्नापयित्वा विधानेन यो लिंगस्नपनोदकम् । त्रिः पिबेत्त्रिविधं पापं तस्येहाशु विनश्यति ॥ लिङ्गस्नपनवार्भिर्यः कुर्यान्मूर्ध्न्यभिषेचनम् । गंगास्नानफलं तस्य जायतेऽत्र विपाप्मनः ॥ बाणलिङ्गानि राजेन्द्र ख्यातानि भुवनत्रये । न प्रतिष्ठा न संस्कारो न च निर्माल्यकल्पना ॥" प्रदक्षिणाविचारः (लिंगार्चनचंद्रिकायाम्) "एकां चंडयां रवौ सप्त तिस्रो दद्याद्विनायके । चतस्रो विष्णवे दद्याच्छिवे तिस्रः प्रदक्षिणाः ॥" शिवप्रदक्षिणायां विशेषः (शिवरहस्ये) "प्रदक्षिणात्रयं कुर्यात्तथा पंचदशाथ वा । अष्टौ द्वादश वा कार्य्या ह्यधिका वापि शक्तितः ॥ नैकां प्रदक्षिणां कुर्य्यात्सांबस्य परमात्मनः । एकां प्रदक्षिणां कृत्वा शंभोः पुण्यात्प्रहीयते ॥ प्रदक्षिणत्रयान्नूनं नैव कार्य्यं महेश्वरे । पूजां कृत्वा तु यः शंभोर्न करोति प्रदक्षिणाम् ॥ सा पूजा निष्फला तस्य पूजकः स च दांभिकः ॥ भक्त्या करोति यः सम्यक् केवलं तु प्रदक्षिणाम् । पूजा सर्वा कृता तेन स सम्यक् शिवपूजकः॥ चण्डसोमसूत्रादिसहितशिवपूजायां प्रदक्षिणाविचारः—एका चंडया रवेः सप्त तिस्रः कार्य्या विनायके । हरेश्चतस्रः कर्तव्याः शिवस्यार्द्धा प्रदक्षिणा ॥ वृषं चंडं वृषं चैव सोमसूत्रं पुनर्वृषम् । चंडं च सोमसूत्रं च पुनश्चंडं पुनर्वृषम् ॥ अपसव्यं यतीनां तु सव्यं तु ब्रह्मचारिणाम् । सव्यापसव्यं गृहिणामेवं शंभोः प्रदक्षिणा ॥ सव्यं व्रजेत्ततोऽसव्यं प्रनालं नैव लंघयेत् ॥" आसनाद्युपचारफलम् (शैवरत्नाकरे) "आवाहनं तु यो दद्यात्स च क्रतुफलं लभेत् । आसनं रुचिरं दत्वा शतक्रतुत्व

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

माप्नुयात् ॥ पाद्येन पातकं हन्यादर्घ्येणाप्नोत्यनर्घताम् । ततश्चाचमनं दत्वा सुचित्तः सुखितां व्रजेत् ॥ स्नानं व्याधिभयं हन्या द्वस्त्रेणायुष्यवर्द्धनम् । उपवीतं तु यो दद्याद्ब्रह्मवेत्तृत्वमेव च ॥ भूषणानि च यो दद्यादनापद्यमवाप्नुयात् । गंधेन लभते काममक्षतै रक्षतं भवेत् ॥ नानापुष्पप्रदानेन स्वर्गे राज्यमवाप्नुयात् । धूपो दहति पापानि दीपो मृत्युविनाशनः ॥ सर्वमानस्तु नैवेद्यं दत्वा तृप्तिरतो भवेत् । मुखवासनदानेन कीर्त्तिमान्भवति ध्रुवम् ॥ नीराजनेन शुद्धात्मा दर्पणेन प्रकाशयेत् । फलदः पुत्रवान्मर्त्यस्तांबू लात्स्वर्गमाप्नुयात् ॥ प्रदक्षिणां तु यः कुर्य्यात्पापं हंति पदेपदे । दण्डप्रणामं यः कुर्यादेवमुद्दिश्य सन्निधौ ॥ वर्षाणि वसते स्वर्गे देहान्तं रेणुसंख्यया ॥ स्तोत्रेण दिव्यदेहोपि वाग्ग्मी भवति तत्क्षणात् । पुराणपठनेनैव सर्वपापक्षयो भवेत् ॥" पंचामृतस्नानफलम् (बृह न्नारदीये) "पयःस्नानं प्रकुर्वंति ये नरा मम मूर्द्धनि । शताश्वमेधजं पुण्यं बिंदुना बिंदुना स्मृतम् ॥ क्षीरस्नानेन सौभाग्यं दध्ना मिष्टा न्नभोजनम् । घृतेन स्नापयेद्यो मां नरो मम पुरं व्रजेत् ॥ स्नानं शर्करया यस्तु कारयेद्वस्त्रपूतया । स राजा जायते लोके पुनः स्वगो दिह च्युतः ॥ कारयेन्मधुना स्नानं भक्त्या वै मम मूर्द्धनि । गजाश्वरथसंकीर्णं स राज्यं लभते भुवि ॥ स्नापयेयुर्वेदमंत्रैर्यो मां पंचामृतेन तु । न जातु जननीगर्भं प्रविशन्ति च ते नराः ॥ शंखे तीर्थोदकं कृत्वा यः स्नापयति मां नरः । धारया बिंदुना वापि स्वकुलं तारयेद्धि सः ॥" (स्कांदेपि) "अर्घ्यं कृत्वा तु शंखेन यः करोति प्रदक्षिणम् ॥ प्रदक्षिणीकृता तेन सप्तद्वीपा वसुंधरा" इति । एतद्विष्णुपूजायां ज्ञेयम् ॥ महास्नाने पंचामृतप्रमाणम् (हेमाद्रौ शिवधर्मे) "स्नानं पलशतं ज्ञेयमभ्यंगः पंचविंशतिः । पला नां द्वे सहस्रे तु महास्नानं प्रकीर्त्तितम् ॥ पंचविंशपलं लिंगे अभ्यंगं कारयेदथ । शिवस्य सर्पिषा स्नानं प्रोक्तं पलशतेन च ॥ ताव

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ता मधुना चैव दध्ना चैव ततः पुनः । तावतैव च क्षीरेण गव्येनैव भवेत्ततः ॥ भूयः सार्द्धसहस्रेण पलानामैक्षवेण च । रसेन कारये त्स्नानं भक्त्या चोष्णांबुना ततः । पुनः शीतांबुना दत्वा वस्त्रपूतेन मंत्रवित् । स्नापयेद्भक्तितो भूयो गंधपात्रस्थितेन तु ॥" विष्ण्वादौ तु (स्कांदे) "क्षीराद्दशगुणं दध्ना घृतेनैव दशोत्तरम् । घृताद्दशगुणं क्षौद्रं क्षौद्राच्चैक्षवजं तथा ॥" पंचगव्यस्नानम् (कालिकापुराणे) "कपिलापंचगव्येन कुशवारियुतेन च । स्नापयेन्मंत्रपूतेन ब्राह्मं स्नानं तदुच्यते ॥ एकाहमपि यो लिंगे ब्राह्मं स्नानं समाचरेत् । विधूतसर्वपापानि रुद्रलोके महीयते ॥" वस्त्राणि (जयसिंहकल्पद्रुमे) "पीतकौशेयवसनं विष्णुप्रीत्यै प्रकीर्तितम् । रक्तं शक्त्यर्कविघ्नानां शिवस्य च सितं प्रियम् ॥ मलहीनं तथाऽच्छिद्रं क्षौमं कार्पासमेव वा ॥ देवभेदेन निषिद्धवाद्यानि—शिवागारे झल्लकं च सूर्यागारे तु शंखकम् । दुर्गागारे वंशवाद्यं मधुरीं च न वादयेत् ॥ तत्रैव । वादित्राणामभावे तु पूजाकाले च सर्वदा । घंटाशब्दो नरैः कार्यः सर्ववाद्यमयी यतः ॥ स्नाने धूपे तथा दीपे नैवेद्ये भूषणे तथा । घंटानादं प्रकुर्वीत तथा नीराजनेपि च ॥" इति पूजाविचारप्रकरणम् ॥

अथ होमविचारप्रकरणम् । तत्र तावन्मण्डपकुण्डादिनिर्म्माणप्रकारः । (शारदातिलके) "नक्षत्रराशिवाराणामनुकूले शुभेहनि । ततो भूमितले शुद्धे तुषांगारविवर्जिते ॥ १ ॥ पुण्याहं वाचयित्वा तु मण्डपं रचयेच्छुभम् । पंचभिः सप्तभिर्हस्तैर्नवभिर्वा मितांतरम् ॥ २ ॥ षोडशस्तंभसंयुक्तं चत्वारस्तेषु मध्यगाः । अष्टहस्तसमुच्छ्रायाः संस्थाप्या द्वादशाभितः ॥ ३ ॥ पंचहस्तप्रमाणास्ते विच्छिद्रा ऋजवः शुभाः । तत्पंचमांशं निखनेन्मेदिन्यां तंत्रवित्तमः ॥ ४ ॥ नारिकेलदलैर्वंशैश्छादयेत्तत्समंततः । द्वारेषु तोरणानि स्युः क्रमात्क्षीरमहीरुहाम् ॥ ५ ॥ स्तंभोच्छ्रायः स्मृतस्तेषां सप्तहस्तैः पृथक् पृथक् । दशाङ्गुलप्रमाणेन तत्परीणाह ईरितः ॥ ६ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तिर्यक् फलकमानं स्यात्स्तंभानामर्द्धमानतः। शूलानि कल्पयेन्मध्ये तोरणे हस्तमानतः॥ ७॥ दिक्षु ध्वजान्निबध्नीयाल्लोकपालस मप्रभान्। वितानादर्शमालाद्यैरलंकुर्वीत मण्डपम्॥ ८॥ तत्त्रिभागमिते क्षेत्रेऽरत्निमात्रसमन्विताम्। चतुरस्रां ततो वेदिं मण्डलाय प्रकल्पयेत्॥ ९॥ प्राक् प्रोक्त मण्डपे विद्वान्वेदिकाया बहिस्त्रिधा। क्षेत्रं विभज्य मध्यांशे पूर्वादि परिकल्पयेत्॥ १०॥ अष्टा स्वाशासु कुंडानि रम्याकाराण्यनुक्रमात्। चतुरस्रं योनिमर्द्धचंद्रं त्र्यस्रं सुवर्तुलम्॥ ११॥ षडस्रं पंकजाकारमष्टास्रं तानि नामतः। आचार्यकुंडं मध्ये स्याद्वौरीपतिमहेन्द्रयोः॥ १२॥ हस्तमानमितां भूमिं पूर्ववत्परिकल्पयेत्। समंतात्कुण्डमेतत्स्याच्चतुरस्रं शुभावहम्॥ १३॥ चतुर्विंशत्यंगुलाढ्यं हस्तं तंत्रविदो विदुः। कर्तुर्दक्षिणहस्तस्य मध्यमाङ्गुलिपर्वणः॥ १४॥ मध्यस्य दीर्घ मानेन मानांगुलमुदीरितम्। यवानामष्टभिः कृतं मानांगुलमुदीरितम्॥ १५॥ (योनिकुंडरचना) चतुरस्रीकृतं क्षेत्रं पंचधा विभ जेत्सुधीः॥ न्यसेत्पुरस्तादेकांशं कोणार्द्धार्द्धप्रमाणतः॥ १६॥ भ्रामयेत्कोणमानेन तथान्यदपि मंत्रवित्। सूत्रयुग्मं ततो दद्यात्कुंडं योनिनिभं भवेत्॥ १७॥ (अर्द्धचंद्राकारकुंडरचना) चतुरस्रीकृतं क्षेत्रं दशधा विभजेत्पुनः। एकमेकं त्यजेदंशमध ऊर्ध्वं च तंत्र वित्॥ १८॥ ज्यासूत्रं पातयेदग्रे तन्मानाद्भ्रामयेत्ततः। अर्द्धचंद्रनिभं कुंडं रमणीयमिदं भवेत्॥ १९॥ (त्र्यस्रकुंडरचना) चतुर्द्धा भेदिते क्षेत्रे न्यसेदुभयपार्श्वयोः। एकैकमंशं तन्मानादग्रतो लांछयेत्ततः। सत्रयुग्मं ततः कुर्यात्र्यस्रं कुंडमुदाहृतम्॥ २०॥ (वृत्त कुंडम्)। अष्टादशांशे क्षेत्रे च न्यसेदेकं बहिर्बुधः। भ्रामयेत्तेन मानेन वृत्तं कुंडमनुत्तमम्॥ २१॥ (षडस्रकुंडम्) अष्टधा विभजे त्क्षेत्रं मध्यसूत्रस्य पार्श्वयोः। भागं न्यसेदेकमेकं भागेनानेन मध्यतः॥ २२॥ कुर्यात्पार्श्वद्वये मत्स्यचतुष्कं तंत्रवित्तमः। सूत्रषट्कं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ततो दद्यात्षडस्रं कुंडमुत्तमम् ॥ २३ ॥ (पद्मकुंडम्) चतुरस्रीकृतं क्षेत्रं विभज्याष्टादशांशतः । एकं भागं बहिर्न्यस्य भ्रामयेत्तेन वर्त्तुलम् ॥ २४ ॥ वृत्तानि कर्णिकादीनां बहिस्त्रीणि प्रकल्पयेत् । पद्मकुंडमिति प्रोक्तं विलोचनमनोहरम् ॥२५॥ (चतुरस्रकुण्डम्) पूर्ववद्विभजेत्क्षेत्रं चतुर्विंशतिभागतः । एकं भागं बहिर्न्यस्य चतुरस्रं प्रकल्पयेत् ॥२६॥ (अष्टास्रकुंडम्) अंतःस्थचतुरस्रस्य कोणा दर्द्धप्रमाणतः । बाह्यस्य चतुरस्रस्य कोणाभ्यां परिकल्पयेत् ॥ २७ ॥ दिशं प्रति यथान्यासमष्टौ सूत्राणि पातयेत् । अष्टास्रं कुंडमेतद्धि तंत्रविद्भिरुदाहृतम् ॥ २८ ॥ यावत्कुंडस्य विस्तारः खननं तावदीरितम् ॥ कुंडानां यादृशं रूपं मेखलानां च तादृशम् ॥ २९ ॥ कुंडानां मेखलास्तिस्रो मुष्टिमात्रे तु ताः क्रमात् । उत्सेधायामतो ज्ञेया द्व्येकार्द्धांगुलसंमिताः ॥ ३० ॥ अरत्निमात्रे कुंडे स्युस्तास्त्रिद्व्येकांगुलात्मिकाः । एकहस्तमिते कुंडे वेदाग्निनयनांगुलाः ॥ ३१ ॥ मेखलानां भवेदन्तः परितो नेमिरंगुलात् । एकहस्तस्य कुंडस्य वर्द्धयेत्तत्क्रमात्सुधीः ॥ ३२ ॥ दशहस्तांतमन्येषामर्द्धांगुलवशात्पृथक् । कुंडे द्विहस्ते ता ज्ञेया रसवेदगुणांगुलाः ॥ ३३ ॥ चतुर्हस्तेषु कुंडेषु वसुतर्कयुगांगुलाः ॥ कुंडे रसकरे ताः स्युर्दशाष्ट त्वंगुलान्विताः ॥ ३४ ॥ वसुहस्तमिते कुंडे भानुपंक्त्यष्टकान्विताः । दशहस्तमिते कुंडे मनुभानुदशांगुलाः ॥ ३५ ॥ विस्तारोत्सेधतो ज्ञेया मेखला सर्वतो बुधैः । होतुरग्रे योनिराशासुपर्यश्वत्थपत्रवत् ॥३६॥ मुष्ट्यरत्न्येकहस्तानां कुंडानां योनिरीरिता । षट्चतुर्व्यंगुलायामविस्तारोन्नतिशालिनी ॥ ३७ ॥ एकांगुलं तु योन्यग्रं कर्यादीषदधोमुखम् । एकैकांगुलतो योनिं कुंडेष्वन्येषु वर्द्धयेत् ॥ ३८ ॥ यवयवक्रमेणैव योन्य ग्रमपि वर्द्धयेत् । स्थलादारभ्य नालं स्याद्योन्यामध्यं सरंध्रकम् ॥ ३९॥ नार्पयेत्कुंडकोणेषु योनिं तां तंत्रवित्तमः । कुंडानां कल्प

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

येदंतर्नाभिमंबुजसन्निभाम् ॥ ४० ॥ तत्तत्कुंडानुरूपं वा मानमस्य निगद्यते । मुष्टचरत्न्येकहस्ताभ्यां नाभिरुत्सेधतारतः ॥४१॥
द्वित्रिवेदांगुलोपेता कुंडेष्वन्येषु वर्द्धयेत् । यवद्वयक्रमणैव नाभिं पृथगुदारधीः ॥ ४२ ॥ योनिकुंडे योनिमञ्जकुंडे नाभिं विवर्ज्जयेत् ॥ नाभिक्षेत्रं त्रिधा भित्त्वा मध्ये कुर्वीत कर्णिकाम् ॥ ४३ ॥ बहिरंशद्वये नाष्टौ पत्राणि परिकल्पयेत् ॥ (होमप्रमाणेन कुंडप्रमाणम्) मुष्टिमात्रमितं कुंडं शतार्द्धे संप्रचक्षते । शतहोमेऽरत्निमात्रं हस्तमात्रं सहस्रके ॥ ४४ ॥ द्विहस्तमयुते लक्षे चतुर्हस्तमुदीरितम् ॥ दशलक्षे तु षड्हस्तं कोट्यामष्टकरं स्मृतम् ॥ ४५ ॥ (चतुरस्रादिकुंडफलम्) सर्वसिद्धिकरं कुंडं चतुरस्रमुदाहृतम् । पुत्रप्रदं योनिकुंडमर्द्धेन्द्वाभं शुभप्रदम् ॥ ४६ ॥ शत्रुक्षयकरं त्र्यस्रं वर्तुलं शान्तिकर्मणि ।

पेज नं. १५ चित्र.

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

छेदमारणयोः कुण्डं षडस्रं पद्मसन्निभम् ॥ ४७ ॥ वृष्टिदं रोगशमनं कुंडमष्टास्रमीरितम् ॥ (वर्णभेदेन कुंडप्रकारः) विप्राणां चतुरस्रं स्याद्वाज्ञां वर्तुलमिष्यते ॥४८॥ वैश्यानामर्द्धचंद्राभं शूद्राणां त्र्यस्रमीरितम् ॥ चतुरस्रं तु सर्वेषां केचिदिच्छन्ति तांत्रिकाः ॥ ४९॥ (कुंडस्वरूपम्) कुंडरूपं तु जानीयात्परमं प्रकृतेर्वपुः । प्राच्यां शिरः समाख्यातं बाहू दक्षिणसौम्ययोः ॥५०॥ उदरं कुंडमित्युक्तं योनिः पादौ तु पश्चिमे ॥ (कुंडाभावे स्थंडिलं कार्यम्) नित्यं नैमित्तिकं काम्यं स्थंडिले वा समाचरेत् ॥५१॥ हस्तमात्रेण तत्कुर्याद्वालुकाभिः सुशोभनम् । अंगुलोत्सेधसंयुक्तं चतुरस्रं समंततः ॥५२॥" " बौधायनमते तु कुंडाकारं स्थंडिलमुक्तम् कुंडवन्मेखलां कृत्वा योनिं कृत्वा ततः परम् । बौधायनमते प्रोक्तं स्थंडिलं चतुरस्रकम् ॥ कुंडाभावे तु होमार्थं स्थंडिलं पीठमेव वा ॥१॥ " कुंडखाते फलविचारः (हेमाद्रौ) "खातेधिके भवेद्रोगी हीने धेनुधनक्षयः । वक्रकुंडे तु संतापो मरणं भिन्नमेखले ॥ मेखलारहिते शोकोऽप्यधिके वित्तसंक्षयः । भार्याविनाशनं प्रोक्तं कुंडे योन्या विना कृते ॥ अपत्यध्वंसनं प्रोक्तं कुंडं यत्कंठवर्जितम् ॥ " अथायुतहोममधिकृत्य वेदिदिग्विचारः (मत्स्यपुराणे) गर्त्तस्योत्तरपूर्वेण वितस्तिद्वयविस्तृताम् । वप्रद्वयकृतां वेदिं वितस्त्युच्छ्राय संयुताम् । संस्थापनाय देवानां चतुरस्रामुदक्प्लुवाम् ॥" (स्कांदे तु) "तस्माच्चोत्तरपूर्वेण स्थंडिलं हस्तमात्रकम् । त्रिवप्रं चतुरस्रं च वितस्त्युच्छ्रायसंमितम्" इति वेदेस्त्रिमेखलात्वमुक्तम् । (व्रतराजेपि)" बाह्यमात्रायतां वेदिं कुर्याच्छुद्धमृदा बुधः । तद्वेद्यां सर्वतोभद्रमण्डलं विलिखेत्ततः ॥ भद्रविचारः—शैवव्रतं विना सर्वव्रतोद्यापनकर्म्मसु । कार्यं सुशास्त्रदृष्ट्या च सर्वतोभद्रमण्डलम् ॥ गणपतिव्रते प्रोक्तं भद्रं वैनायकाभिधम् । देव्या व्रते गौरीभद्रं सूर्ये सूर्यस्य मण्डलम् ॥ शैवे च लिंगतोभद्रं सर्वतोभद्रकं हरेः ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

स्वस्वभद्रालाभके तु कार्यं वै हरिमण्डलम् ॥ मंडलकरणे प्रकारः—निम्नतोन्नतगताहीने सुश्लक्ष्णे वेदिकातले । ईशानादिस्रुवेणार्द्धे विलिप्ते गोमयेन च ॥ देवाराधनमंत्रेण मंत्रितात्पंचगव्यतः । अभ्युक्षितेस्त्रमंत्रेण कृत्वा दिक्साधनं ततः ॥ खटिकामानसूत्रं च गंधा द्यैरपि पूजयेत् ॥" भद्रार्थे वर्णनिश्चयः (पंचरात्रे) "रजांसि पंचवर्णानि मंडलार्थं हि कारयेत् । शालितंडुलजं शुक्लं रक्तं कौसुंभसिंदु रम् ॥ हरितालोद्भवं पीतं कृष्णं दग्धयवोद्भवम् । हरितं बिल्वपत्रोत्थमथवा कृष्णपीतजम् ॥ वर्णपरत्वे धान्यानि—श्वेतत्वे तंडुलाः प्रोक्ता श्चणकान्नं तु पीतके । रक्तवर्णे मसूराश्च गोधूमा वा स्मृता बुधैः ॥ अथवा रक्तवर्णे तु कुंकुमाक्ताक्षताः स्मृताः । हरिद्वर्णे च मुद्गान्नं माषान्नं कृष्णवर्णके" ॥ अथ सर्वकार्येषु प्रधानभूतसर्वतोभद्रमण्डलप्रकारः (हेमाद्रौ स्कांदे) "प्रागुदीच्यायता रेखाः कुर्यादेकोनविंशतिम् । खंडैंदुस्त्रिपदैः कोणे शृंखला पंचभिः पदैः ॥ एकादशपदा वल्ली भद्रं तु नवभिः पदैः । चतुर्विंशत्पदा वापी परिधिर्विंशतिः पदैः ॥ मध्ये षोडशभिः कोष्ठैः पद्ममष्टदलं स्मृतम् । श्वेतेंदुःशृंखला कृष्णा वल्ली नीलेन पूरयेत् ॥ भद्रारुणा सिता वापी परिधिः पीतवर्णकः । बाह्यान्तरदला श्वेता कर्णिका पीतवर्णिका ॥ परिध्यावेष्टितं पद्मं बाह्ये सत्त्वर जस्तमः । तन्मध्ये स्थापयेद्देवान् ब्रह्मा द्यांश्चसुरेश्वरान् ॥ इति । अथ सर्वतोभद्राशक्तौ अष्टदलाख्यं पद्मम् । उक्तं च । भद्रेण पूजनाशक्तौ कार्यमष्टदलं शुभम् । गोधूमान्नेन तत्कार्यं तंडुलेनाथ वा शुभम् ॥ मंडलप्रकारः—आद्यात्तृतीयं तृतीयाच्च भूतं भूताद्वितीयं द्वितीयाच्चतुर्थम् । तस्मात्तथाद्यं पुनरेव कृत्वा दलाष्टकं तंडुलपूरितं च" ॥ १ ॥ अथ शिवमंत्रानुष्ठानेषु प्रधानभूतलिंगतोभद्ररचनाप्रकारः । तत्र तावदेकलिंगतोभद्रं गौरीतिल कमंडलं (रुद्रयामले) "तिर्यगूर्ध्वगता रेखाः कार्याः स्निग्धास्त्रयोदश । कोणेंदुस्त्रिपदः कार्यः शृंखलास्त्रिपदाः स्मृताः ॥ वल्ली तु

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

त्रिपदा नीला भद्रं रक्तं प्रकल्पयेत् । पदैर्द्वादशभिः स्पष्टमुत्तरे पूर्वदक्षिणे ॥ पश्चिमायां महारुद्रमष्टाविंशतिकोष्ठकैः । लिंगपार्श्वे तथा मूर्ध्नि अष्टौ कोष्ठाः सुपीतकाः ॥ लिंगमेकं तथा गौर्यास्तिस्रः स्युरत्र मण्डले । पूजयेन्मंडलं चैतत्तस्य गौरी प्रसीदति" ॥ अथ चतु लिंगभद्रमंडलम् (लिंगपुराणे) "रेखास्त्वष्टादश प्रोक्ताश्चतुर्लिंगसमुद्भवे । कोणेंद्वस्त्रिपदः श्वेतस्त्रिपदैः कृष्णशृंखला ॥ वल्ली सप्त पदा नीला भद्रं रक्तं चतुष्पदम् । भद्रपार्श्वे महारुद्रं कृष्णमष्टादशैः पदैः ॥ शिवस्य पार्श्वतो वापीं कुर्यात्पंचपदां सिताम् । एकं पदं तथा पीतं भद्रवाप्योस्तु मध्यतः ॥ शिरसि शृंखलायाश्च कुर्यात्पीतं पदत्रयम् । लिंगानां स्कंदतः कोष्ठा विंशती रक्तवर्णकाः ॥ परिधिः पीतवर्णस्तु पदैः षोडशभिः स्मृतम् । पदैस्तु नवभिः पश्चाद्रक्तं पद्मं सकर्णिकम्" इति ॥ (अथाष्ट लिंगतोभद्रमग्निपुराणे) "चतुर्विंशतिरालेख्या रेखाः प्राग्दक्षिणायताः । कोणेषु शृंखलाः पंच पदावल्यस्तु पार्श्वतः ॥ पदैर्नव भिरालेख्याश्चतुर्भिर्लघुशृंखलाः । लघुवल्यः पदैः षड्भिस्ततोष्टादशभिः पदैः ॥ कृत्वा लिंगानि वाप्यः स्युस्त्रयोदशभिरंतरा । ततो वीथिद्वयेनैव पीठं कुर्याद्विचक्षणः ॥ तस्य पादाः पंचपदैर्द्वाराण्यपि तथैव च । एकाशीतिपदं मध्ये पद्मं स्वस्तिकमुच्यते ॥ कोणेषु शृंखलाः कार्याः पदैस्त्रिभिरतः परम् । पदैश्चतुर्भिर्दिक्षु स्युर्भद्राण्येषां समंततः ॥ एकादशपदा वल्ल्यो मध्येष्टदलमालिखेत् । पद्मं नवपदं ह्येवं लिंगतोभद्रमुच्यते ॥ शृंखलाः कृष्णवर्णेन वल्ली नीलेन पूरयेत् । रक्तेन शृंखला लघ्वीर्वल्ली पीतेन पूरयेत् ॥ लिंगानि कृष्णवर्णानि श्वेतेनाप्यथ वापिकाः । पीठं सपादं श्वेतेन पीतेन द्वारपूरणम् ॥ मध्ये स्युः शृंखला रक्ता वल्ली नीलेन पूरयेत् । भद्राणि पीतवर्णानि पीता पंकजकर्णिका ॥ दलानि श्वेतवर्णानि यद्वा चित्राणि कल्पयेत् । तिस्रो रेखा बहिः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कार्याः सितरक्तासितंताः क्रमात् " इति ॥ ॥ अथ हरिहरात्मकं द्वादशालिंगतोभद्रमण्डलम् (लिंगपुराणे) "प्रागुदीच्यायता रेखाः षट्त्रिंशद्धि प्रकल्पयेत् । पदानि द्वादशशतं पंचविंशतिरेव च ॥ खंडेंदुस्त्रिपदः कोणे शृंखला षट्पदैः स्मृता । त्रयोदश पदा वल्ली भद्रं तु नवभिः पदैः ॥ त्रयोदशपदा वापी लिंगमष्टादशैः स्मृतम् । लिंगत्रयस्य पंक्तौ तु शोभाकोष्ठाश्चतुर्दश ॥ तेषा मुपरि पंक्तौ तु कोष्ठाः सप्तदशैव तु । पूजापंक्तिस्तु विज्ञेया परितः परिकल्पिता ॥ पूजापंक्त्यंतरापंक्तौ कोष्ठा द्व्यशीतिसंख्यया । परिधिः स तु विज्ञेयोंऽतरामंडलयोर्द्वयोः ॥ परिध्यंतरकोष्ठेषु सर्वतोभद्रमालिखेत् । विशेषश्चात्र विज्ञेयः शृंखला षट्पदा भवेत् ॥ त्रयोदशपदा वल्ली भद्रं तु नवभिः पदैः । पंचविंशत्पदा वापी परिधिः षोडशात्मकः ॥ मध्ये नवपदं पद्मं कर्णिका केसरान्वितम् । सत्त्वं रजस्तमो वर्णाः परितो मंडलस्य तु ॥ त्रयः परिधयः कार्यास्तत्र द्वाराणि कारयेत् । सितेंदुः शृंखला कृष्णा वल्ली नीला प्रकीर्त्तिता ॥ भद्रं चैवारुणं ज्ञेयं वापी स्याच्छ्वेतवर्णिका । लिंगानि कृष्णवर्णानि पार्श्वतो द्वादशैव तु ॥ परिधिः पीतवर्णः स्यात्कमलं पंचवर्णकम् " इति ॥ अथ द्वितीयं द्वादशालिंगतोभद्रम् (रुद्रयामले) " रुद्रउवाच । उद्धारं कथयिष्येहं मदर्चार्थं तव प्रिये । चतुस्त्रिंशत्समा रेखाः कुर्यात्पूर्वोत्तराः शुभाः ॥ मध्ये वृत्तं समालेख्य तन्मध्ये च दशारकम् । बहिरष्टदलं पद्मं ततः षोडशपत्रकम् ॥ चतुर्विंशतिपत्राढ्यं द्वात्रिंशत्पत्रकं तथा । चत्वारिंशत्पत्रकं तु वृत्तं सूर्यसमप्रभम् ॥ खंडेंदुस्त्रिपदैः कोणे शृंखला दशकोष्ठिका । एकविंशत्पदा वल्ली भद्रं तु षट्पदैस्तथा ॥ अष्टादशपदै लिंगं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भद्रं चाष्टपदं तथा । त्रयोदशपदा वापी कुर्याल्लिंगस्य सन्निधौ ॥ पूज्योपर्यपि भद्राणि भवन्ति नवभिः पदैः । एवं द्वादशलिं
गाढ्यं वापीषोडशकान्वितम् ॥ षट्पदाष्टकभद्राढ्यं पूज्यं द्वादशकात्मकम् । मध्ये विंशतिभद्रं तु कथितं पूर्वसूरिभिः ॥ वर्णक्रम
मथो वक्ष्ये मंडलस्य च सिद्धये । घृष्टतंडुलापिष्टेन कृष्णवर्णेन निर्मितम् ॥ लिंगजातं सितेंदुः स्याद्वल्ली बिल्वदलप्रभा । शृंखला
कृष्णवर्णा च पीतं भद्रद्वयं भवेत् । सिता वाप्यस्तथा पूज्यो मध्यभद्रे त्वयं क्रमः ॥ पूज्योपर्यरुणे भद्रे सिते द्वे मध्यमं सितम् ।
सत्त्वं रजस्तमश्चैव बाह्यतः परिधित्रयम् ॥ एवं सुशोभितं कार्यं मण्डलं शिवपूजने ॥ इति ॥ ॥ अथ सूर्यमंत्रानुष्ठानेषु सूर्यमण्ड
लम् । रेखाविंशतिसंयुक्तं भीमरथ्यास्तु मण्डलम् ॥ सूर्यपूजासु सर्वासु शस्यते मण्डलं त्विदम् ॥ खंडेंदुस्त्रिपदः कार्यः शृंखला
षट्पदा मता । त्रयोदशपदैर्वल्ली भद्रं तु त्रिपदं मतम् ॥ सूर्यत्रयं प्रकुर्वीत सप्तविंशतिभिः पदैः । सूर्यत्रयं चतुष्कोणे पदमर्धासितं
भवेत् ॥ पदैस्तु नवभिः कृत्वा भवेत्सूर्यत्रयं ततः । सूर्योपरि भवेद्भद्रं पदद्वादशसंमितम् ॥ ऊर्ध्वमिंदुं प्रकुर्वीत चतुर्भिस्तु सितैः
पदैः । परिधिः षोडशपदा पद्मं नवपदं ततः ॥ सत्त्वं रजस्तम इति रेखाः स्युर्मंडलाद्बहिः । कृष्णा च शृंखला ज्ञेया वल्ली नीला
प्रकीर्त्तिता ॥ भद्रान्पीतान्प्रकुर्वीत रवीन्रक्तान्प्रकारयेत् । पीतश्च परिधिः प्रोक्तः पद्मं रक्तं तथैव च ॥ इति ॥ अथ गणेशानुष्ठानेषु
गणपतिभद्रम् । अथातः संप्रवक्ष्यामि मंडलं सर्वसिद्धिदम् । नाम्ना च विघ्नमर्दाख्यं विनायकव्रते हितम् ॥ तिर्यगूर्ध्वं सप्तदश रेखाः
कार्याः सुशोभनाः । खंडेंदुस्त्रिपदः कोणे शृंखला च चतुष्पदैः ॥ कार्या नवपदा वल्ली भद्रं रक्तं चतुष्पदम् ॥ ततो विंशतिको

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

णेषु कार्यो गणपतिः शुभः । कोष्ठद्वयेन मुकुटं गणेशस्य च कारयेत् ॥ पीतश्च पारीधिः कार्यः पदैर्विंशतिभिस्तथा । मध्ये षोड शकोष्ठेन पद्मं कार्यं सुशोभनम् ॥ सर्वतोभद्रदेवान् वै विशेषेणाऽत्र योजयेत्" इति गणपतिभद्रम् ॥ ॥ अथ सर्वमंत्रानुष्ठानयोग्य शान्तिहोमप्रयोगानुक्रमः ॥ (संस्कारभास्करे) "नारदीये वसिष्ठे च वाराहे च विशेषतः । कात्यायनोक्तग्रंथेषु शान्तयस्त्रिविधाः स्मृताः ॥ शांतिक्रमं प्रवक्ष्यामि नारदेन यथोदितम् । गणेशं पूजयेदादौ स्वस्तिपुण्याहवाचनम् ॥ मातृणां पूजनं कार्यं नांदीश्राद्धमतः परम् । आचार्यं वरयित्वाथ ब्रह्माणं गाणपत्यकम् ॥ सदस्यमृत्विजश्चैव जापकान्वरयेत्ततः । दिग्रक्षणं ततः कार्यं पंचगव्यं यथाविधि ॥ भूमिं संपूज्य विधिवत्तत्र संस्कारपंचकम् । स्थांडिलेग्निं प्रतिष्ठाप्य कलशान्स्थापयेत्क्रमात् ॥ मूर्त्यभ्युत्तारणं प्राणप्रतिष्ठा स्थापना

निरंक पृष्ठ १९ चित्र.

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

र्चनम् । ग्रहादीन्स्थापयित्वाथ स्थापयेद्वुद्रकुंभकम् ॥ ब्रह्मासनं ततो दत्त्वा कारयेत्कुशकंडिकाम् । लिंगोक्तैर्नाममंत्रैर्वा यथाविधि यथाक्रमम् ॥ देवताग्रहहोमं च यथासंख्यपुरःसरम् । पूजास्विष्टं नवाहुत्यो बलिं पूर्णाहुतिस्तथा ॥ संस्रवादिविमोकान्तं होमशेषं समापयेत् ॥ श्रेयः संपाद्य दानं च ह्यभिषेको विसर्जनम् । विप्राशिषः प्रगृह्णीयात्तान्मिष्टान्नेन भोजयेत्" ॥ इति यजुर्वेदिनां होमप्रयोगानुक्रमः ॥ अथ सर्वकर्मोपयोगित्वात्साधारणं किंचिदुच्यते (वराहपुराणे) "सुस्नातः सम्यगाचान्तः कृतसंध्यादिकाक्रियः । जितेंद्रियः सत्यवादी सर्वकर्म्मसु शस्यते ॥ अधौतकारुधौते च परिदध्यान्न वाससी । अहतं तु परिदध्यात्सर्वकर्मणि संयतः" ॥ (कात्यायनः) "ईषद्धौतं नवं श्वेतं सदृशं यन्न धारितम् । अहतं तद्विजानीयात्सर्वकर्मसु पावनम् ॥ स्वयं धौतेन कर्त्तव्याः क्रिया धर्म्या विपश्चिता । न तु रजकधौतेन नोपभुक्तेन वा क्वचित्" ॥ (शातातपः) "अहतं यंत्रनिर्मुक्तं वासः प्रोक्तं स्वयं भुवा । शस्तं तन्माङ्गलिकेषु तावत्कालं न सर्वदा" ॥ (मार्कण्डेयः) "अन्यदेव भवेद्वासः शयनीये नराधिप । अन्यद्वृथ्यासु देवानामर्चायामन्यदेव हि ॥ अन्यच्च लोकयात्रायामन्यदीश्वरदर्शने । अभावे धौतवस्त्रस्य शाणक्षौमाविकानि च ॥ कुतपं योगपट्टं वा विवासा येन नो भवेत् ॥ (विष्णुपुराणे) "होमदेवार्चनाद्यासु क्रियास्वाचमने तथा । नैकवस्त्रः प्रवर्त्तेत द्विजवाचनके जपे" ॥ (शातातपः) "सव्यदेशात्परिभ्रष्टं कटिदेशे धृतांबरम् । एकवस्त्रं तु तं विद्याद्दैवे पित्र्ये च वर्जयेत्" ॥ (व्याघ्रव्यादः) "कापायं कृष्णवस्त्रं च मलिनं केशदूषितम् । जीर्णं च संधितं वापि पारक्यं मैथुने धृतम् ॥ छिन्नाग्रमुपवस्त्रं च कुत्सितं धर्मतो विदुः" ॥ इति ॥ अयं च निषेधः सति संभवे बोध्यः । (आपस्तंबः) "आर्द्रवासास्तु यः कुर्याज्जपहोमपरिग्रहान् । सर्वं तद्राक्षसं विद्याद्व

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

हिर्जानु च यत्कृतम् ॥ यंज्जले शुष्कवस्त्रेण स्थले चैवार्द्रवाससा । जपहोमस्तथा दानं तत्सर्वं निष्फलं भवेत् " ॥ (संग्रहे) "वामे पृष्ठे तथा नाभौ कच्छत्रयमुदाहृतम् । त्रिभिः कच्छैः परिज्ञेयो विप्रो यः स शुचिर्भवेत् ॥ आदौ कच्छस्ततो नीवी नाभिमध्ये च वाससी । नीवी दक्षिणतः स्थाप्या एतत्त्रिकच्छलक्षणम् ॥ शयनं चार्द्रपादेन शुष्कपादेन भोजनम् । नोत्तरीयमधः कुर्याद्रात्रि वासस्तथा दिवा । कटिवेष्टयं तु यद्वस्त्रं पुरीषो येन वा कृतः । मूत्रमैथुनकृद्वस्त्रं धर्मकार्ये विवर्ज्जयेत् " ॥ (हेमाद्रौ गौतमः) स्नाने दाने जपे होमे दैवे पित्र्ये च कर्मणि । बध्नीयान्नासुरीं कक्षां शेषकाले यथारुचि ॥ (तत्रैव याज्ञवल्क्यः) "परिधानाद्बहिः कक्षा निबद्धा चासुरी मता । धर्मकर्मणि विद्वद्भिर्वर्जनीया प्रयत्नतः ॥ (हेमाद्रौ प्रचेताः) "स्नातोऽधिकारी भवति दैवे पित्र्ये च कर्मणि । पवित्राङ्गस्तथा जाप्ये दाने च विधिचोदिते" ॥ (आग्नेये) "स्नानानामपि सर्वेषां वारुणेन च मानवः । कर्तुमर्हति कर्माणि विधिवत्सर्वदा द्विजः॥संध्यां विना कर्मकरणे निष्फलता तत्रैव–संध्याहीनोऽशुचिर्नित्यमनर्हः सर्वकर्मसु । यदन्यत्कुरुते कर्म न तस्य फलमश्नुते" ॥ (मार्कण्डेयः) "इक्षुरापः पयो मूलं तांबूलं फलमौषधम् । भक्षयित्वापि कर्तव्याः स्नानदानादिकाः क्रियाः ॥ एतदापद्विषयकम् ॥ कुशपाणिः सदा तिष्ठद्ब्राह्मणो दंभवर्जितः । स नित्यं हन्ति पापानि तूलराशिमिवानलः " ॥ (विश्वामित्रः) "यज्ञोपवीते द्वे धार्ये श्रौते स्मार्ते च कर्मणि । तृतीयमुत्तरीयार्थं वस्त्राऽभावे तादिष्यते" ॥ (कात्यायनः) "पित्र्यमंत्रानुब्रुवाणे आत्मालंभेऽधमेक्षणे । अधोवायुसमुत्सर्ग प्रहासेऽनृतभाषणे ॥ मार्ज्जारमूषकस्पर्शे आक्रुष्टे क्रोधसंभवे । निमित्तेष्वेषु सर्व्वेषु कर्म्म कुर्व्वन्नपः स्पृशेत् ॥ यत्र दिङ्नियमो नास्ति जपादिषु कथंचन । तिस्रस्तत्र दिशः प्रोक्ता ऐंद्री सौम्यापराजिता ॥ आसीनः प्रङ्मुख ऊर्ध्वो वा

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नियमो यत्र नेदृशः । तदासीनेन कर्तव्यं न प्रह्वेन न तिष्ठता ॥ स्नानमाचमनं होमं भोजनं देवतार्चनम् । प्रौढपादो न कुर्वीत स्वाध्यायं पितृतर्पणम् ॥ प्रौढपादलक्षणम् । आसनारूढपादस्तु जानुनोर्वाथ जंघयोः । कृतावसक्थिको यश्च प्रौढपादः स उच्यते" ॥ (प्रयोगपारिजाते) "स्नाने होमे जपे दाने स्वाध्याये पितृकर्मणि । करौ सदर्भौ कुर्वीत तथा संध्याभिवादने ॥" (अत्रिस्मृतौ) "अनामिकामूलदेशे पवित्रं धारयेद्द्विजः" । पवित्रे दर्भसंख्यामाह (मार्कंडेयः) "चतुर्भिर्दर्भपिञ्जलैर्ब्राह्मणस्य पवित्रकम् । एकैक न्यूनमुद्दिष्टं वर्णेवर्णे यथाक्रमम् ॥ सर्वेषां वा भवेद्वाभ्यां पवित्रं ग्रथितं न वा । चतुर्भिः शान्तिके कार्यं पौष्टिके पंचभिस्तथा । पैतृकेतु त्रिदर्भाश्च द्वौ दर्भौ नित्यकर्मणि" इति ॥ (हेमाद्रौ नागाह्निके च) "अन्यान्यपि पवित्राणि कुशदूर्वामयानि च । हेमात्मकपवित्रस्य कलां नार्हन्ति षोडशीम् ॥ मषाणां षोडशादूर्ध्वं कुर्याद्धेमपवित्रकम् । तेभ्यः स्वल्पतरं न्यूनं न कुर्वीत कदाचन" ॥ (शारदातिलके तु) "ताम्रतारसुवर्णानामर्कषोडशखेंदुभिः । कृता त्रिशक्तिमुद्रेयं तीव्रदारिद्र्यनाशिनी" ॥ (प्रयोगरत्ने हारीतः) "जपहोमहरा ह्येते असुरा दिव्यरूपिणः । पवित्रकृतहस्तस्य विद्रवन्ति दिशो दश ॥ यथा वज्रं सुरेंद्रस्य यथा चक्रं हरेस्तथा । त्रिशूलं च त्रिनेत्रस्य ब्राह्मणस्य पवित्रकम्" ॥ (कात्यायनः) "श्राद्धे यज्ञे जपे होमे वैश्वदेवे सुरार्चने । धृतत्रिपुंड्रः पूतात्मा मृत्युं जयति मानवः ॥ ऊर्ध्वपुंड्रं मृदा कुर्याद्भस्मना तु त्रिपुंड्रकम् । उभयं चंदनेनैव अभ्यङ्गोत्सववरात्रिषु ॥ तथा । सदोपवीतिना भाव्यं सदा बद्धशिखेन च । विशिखो व्युपवीतश्च यत्करोति न तत्कृतम्" ॥ (भारद्वाजः) "दक्षिणं बाहुमुद्धृत्य वामस्कंधे निवेशितम् । यज्ञोपवीतमित्युक्तं देवकार्येषु शस्यते" ॥ (विष्णुधर्मोत्तरे) "तिलकं कुंकुमेनैव सदा मङ्गलकर्मणि ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कारयित्वा सुमतिमान्न श्वेतचंदनं मृदा "॥ ऋषिच्छंदआद्यावश्यकतामाह (याज्ञवल्क्यः) " आर्षं छंदश्च दैवत्यं विनियोग स्तथैव च । वेदितव्यं प्रयत्नेन ब्राह्मणेन विशेषतः ॥ अविदित्वा तु यः कुर्याद्याजनाध्ययनं जपम् । होममंतर्जलादीनि तस्य चाल्पफलं भवेत्"॥ आर्षादिलक्षणानि (हेमाद्रौ) " येन यद्दृषिणा दृष्टं सिद्धिः प्राप्ता च येन वै । मंत्रेण तस्य तत्प्रोक्तमृषेर्भाव स्तदार्षकम् ॥ छंदसा छन्द उद्दिष्टं वाससी इव चाकृतेः । आत्मा संछादितो देवैर्भृत्योर्भीतैस्तु वै पुरा ॥ आदित्यैर्वसुभी रुद्रैस्तेन छंदांसि तानि वै ॥ यस्य यस्य तु मंत्रस्य उद्दिष्टा देवता तु या । तदाकारं भवेत्तस्य देवत्वं देवतोच्यते ॥ पुरा कल्पे समुत्पन्ना मंत्राः कर्म्मार्थ एव च । अनेन चेदं कर्त्तव्यं विनियोगः स उच्यते ॥ नैरुक्तं यच्च मंत्रस्य विनियोगप्रयोजनम् । प्रतिष्ठानं स्तुतिश्चैव ब्राह्मणं तदिहोच्यते ॥ एवं पंचविधं योगं जयार्थं गृह्यनुस्मरेत् । होमे चान्तर्जले योगे स्वाध्याये याजने तथा ॥" अत्रापवादः (कृष्णभट्टीये) "न च स्मरेद्दर्षिं छंदः श्राद्धे वैतानिके मखे । अन्यच्च । अग्निहोत्रे वैश्वदेवे विवाहादिविधौ तथा ॥ होमकाले न दृश्यंते प्रायश्छंदर्षिदेवताः ॥ शान्तिकादिषु कार्येषु मंत्रपाठजपादिषु ॥ होमेनैव प्रकर्त्तव्याः कदाचिद्दर्षिदेवताः ॥" (कात्यायनः) "स्वशाखाश्रयमुत्सृज्य परशाखाश्रयं च यः । कर्त्तुमिच्छति दुर्म्मेधा मोघं तत्तस्य यत्फलम् ॥ यन्नाम्ना तं स्वशाखायां पारक्यम विरोधि यत् । विद्वद्भिस्तदनुष्ठेयमग्निहोत्रादिकर्म्मवत् ॥ बह्वल्पं वा स्वगृह्योक्तं यस्य कर्म प्रकीर्त्तितम् । तस्य तावति शास्त्रार्थे कृते सर्वः कृतो भवेत् ॥ प्रवृत्तमन्यथा कुर्याद्यदि मोहात्कथंचन । यतस्तदन्यथाभूतं तत एव समापयेत् ॥ प्रवृत्तम् आरब्धम् । अन्यथा भूतम् क्रमाद्यन्यत्वेन यद्वैपरीत्यमापन्नमित्यर्थः । समाप्ते यद्विजानीयान्मयैतदयथा कृतम् । तावदेव पुनः कुर्य्यान्नावृत्तिः सर्वकर्म्मणः॥"

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(याज्ञवल्क्यः) "रौद्रपित्रासुरान्मंत्रांस्तथा दैवाभिचारिकान् । व्याहृत्यालभ्य चात्मानमपः स्पृष्ट्वान्यदाचरेत् ॥" (हेमाद्रौ बौधायनः) 'कर्म्मयुक्तो नाभेरधः स्पर्शं वर्जयेत् ॥' (याज्ञवल्क्यः) "यदि वाग्यमलोपः स्याज्जपादिषु कथंचन । व्याहरेद्वैष्णवं मंत्रं स्मरेद्वा विष्णुमव्ययम् ॥" (मनुस्मृतौ) "चाण्डालश्च वराहश्च कुक्कुटः श्वा तथैव च । रजस्वला च षण्ढश्च नेक्षेरन्नश्नतो द्विजान् ॥ होमे प्रदाने भोज्ये च यदेभिरभिवीक्ष्यते । दैवे हविषि पित्र्ये वा तद्वच्छत्ययथातथम् ॥" अथ सर्वकर्मोपयोगित्वान्नवग्रहमख विचार उच्यते (मात्स्ये याज्ञवल्क्ये च) "श्रीकामः शान्तिकामो वा ग्रहयज्ञं समाचरेत् । वृष्ट्यायुःपुष्टिकामो वा तथैवाभिचरन्पुनः ॥ ग्रहशांतिं प्रवक्ष्यामि पुराणश्रुतिचोदिताम् । पुण्येह्नि विप्रकथिते कृत्वा ब्राह्मणवाचनम् ॥ ग्रहान्ग्रहाधिदेवांश्च स्थाप्य होमं समाचरेत् । ग्रहयज्ञास्त्रयः प्रोक्ताः पुराणश्रुतिभाषिताः ॥ गर्त्तस्योत्तरपूर्वेण वितस्तिद्वयविस्तृताम् । वप्रद्वयवृतां वेदिं वितस्त्युच्छ्रायसंयुताम् ॥ संस्थापनाय देवानां चतुरस्रामुदक्प्लवाम् । अग्निप्रणयनं कृत्वा तस्यामावाहयेत्सुरान् ॥ देवताश्च ततः स्थाप्या विंशतिर्द्वादशाधिकाः । सूर्यः सोमस्तथा भौमो बुधजीवसितार्कजाः ॥ राहुः केतुरिति प्रोक्ता ग्रहा लोकहितावहाः । संस्मरेद्रक्तमादित्यमंगारकसमन्वितम् ॥ सोमशुक्रौ तथा श्वेतौ बुधजीवौ च पिंगलौ । मंदो राहुस्तथा कृष्णौ धूम्रान्केतुगणान्विदुः ॥ ग्रहवर्णानि देयानि वासांसि कुसुमानि च । धूपोत्र सुरभिर्देय उपविष्टाद्वितानकम् ॥ शोभनं स्थापयेत्प्राज्ञः फलपुष्पसमन्वितम् । गुडौदनं रवेर्दद्यात्सोमाय घृतपायसम् ॥ अंगारकाय संयावं बुधाय क्षीरषाष्टिकम् । दध्योदनं तु जीवाय शुक्राय च घृतोदनम् ॥ शनैश्चराय कृसरमाजमांसं च राहवे । चित्रौदनं तु केतुभ्यः सर्वभक्षैरथार्चयेत् ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

प्रागुत्तरेण तस्माच्च दध्यक्षतविभूषितम् । चूतपल्लवसंछन्नं फलवस्त्रयुगान्वितम् ॥ पंचरत्नसमायुक्तं पंचभंगसमन्वितम् । स्थापये
दत्रर्ण कुंभं वरुणं तत्र विन्यसेत् ॥ गंगाद्याः सरितः सर्वाः समुद्राश्च सरांसि च ॥ गजाश्वरथ्यावल्मीकसंगमाद्धदगोकुलात् ।
मृदमानीय विप्रेंद्र सर्वौषधिसमन्विताम् ॥ स्नानार्थं विन्यसेत्तत्र यजमानस्य धर्मवित् । सर्वे समुद्राः सरितस्तीर्थानि जलदा
नदाः ॥ आयांतु यजमानस्य दुरितक्षयकारकाः ॥ एवमावाहयित्वा तानमरान्मुनिसत्तम । होमं समाचरेत्सर्पिर्यवव्रीहिति
लादिना ॥ (समिधः) अर्कः पलाशः खदिरस्त्वपामार्गोथ पिप्पलः । उदुंबरः शमी दूर्वा कुशाश्च समिधस्त्विमाः ॥ एकैकस्याष्टश
तकमष्टाविंशति वा पुनः । होतव्या मधुसर्पिर्भ्यां दध्ना चैव समन्विताः ॥ प्रादेशमात्राः समिधः सरला अपलाशिनीः । समिधः
कल्पयेत्प्राज्ञः सर्वकर्मसु सर्वदा ॥ देवानामपि सर्वेषामुपांशु परमार्थवित् । स्वेन स्वेनैव मंत्रेण होतव्याः समिधः पृथक् ॥ होतव्यं च
घृताद्युक्तं चरुभक्ष्यादिकं पुनः । मंत्रैर्दशाहुतीर्हुत्वा होमं व्याहृतिभिस्ततः ॥ उदङ्मुखाः प्राङ्मुखा वा कुर्युर्ब्राह्मणपुंगवाः । मंत्रवं
तश्च कर्त्तव्याश्चरवः प्रतिदैवतम् ॥ हुत्वौदनं चरुं सम्यक् ततो होमं समारभेत्" ॥ होममंत्राः (याज्ञवल्क्ये) "आकृष्णेन इमं
देवा अग्निर्मूर्धादिवः ककुत् । उद्बुध्यस्वेतिच ऋचो यथासंख्यं प्रकीर्त्तिताः ॥ बृहस्पतेअतियदर्य्यस्तथैवान्नात्परिश्रुतः । शन्नोदेवीस्तथा
काण्डात्केतुं कृण्वन्निमांस्तथा इति । कयानश्चित्रआभुवदिति राहोरुदाहृतः । इति मात्स्ये पाठः ॥ पूर्णाहुतिं तु मूर्धानं दिवइत्यभिपा
तयेत् । अथाभिषेकमंत्रेण वाद्यमंगलगीतकैः ॥ यजमानस्य कर्त्तव्यं चतुर्भिः स्नापनं द्विजैः । ततः शुक्लांबरधरः शुक्लमाल्यानुले
पनः ॥ सर्वौषधैः सर्वगंधैः स्नापितो वेदपुंगवैः । यजमानः सपत्नीकः सर्त्विजस्तु समाहितः ॥ दक्षिणाभिः प्रयत्नेन पूजयेद्गतविस्मयः ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सूर्याय कपिलां धेनुं शंखं दद्यात्तथेंदवे । रक्तं धुरंधरं दद्याद्भौमाय ककुदान्वितम् ॥ बुधाय जातरूपं तु गुरवे पीतवाससी । श्वेताश्वं गुरवे दद्यात्कृष्णां गामर्कसूनवे ॥ आयसं राहवे दद्यात्केतुभ्यश्छागमुत्तमम् । सुवर्णेन समाः कार्या यजमानेन दक्षिणाः । सर्वेषामथवा गावो दातव्या हेमभूषिताः ॥ सुवर्णमथवा दद्याद्गुरुर्वा येन तुष्यति । एवं संपूजयेद्भक्त्या वित्तशाठ्येन वर्जितः ॥ वस्त्रकांचनरत्नाद्यैर्धूपमाल्यानुलेपनैः । अनेन विधिना यस्तु ग्रहपूजां समाचरेत् । सर्वान्कामानवाप्नोति प्रेत्य स्वर्गे महीयते ॥ यस्तु पीडाकरो नित्यमल्पवित्तस्य च ग्रहः । स तं यत्नेन संपूज्य शेषानप्यर्चयेन्नरः" ॥ अथ नवग्रहपूजावश्यकता (स्कंदपुराणे) "विवाहोत्सवयज्ञेषु प्रतिष्ठादिषु कर्मसु । निर्विघ्नार्थं मुनिश्रेष्ठ तथोद्वेगाद्भुतेषु च ॥ वश्यकर्माभिचारादि तथैवोच्चाटनादिकम् । नवग्रहमखं कृत्वा ततः काम्यं समाचरेत् ॥ अन्यथा फलदं पुंसां न काम्यं जायते क्वचित् । तस्मादयुतहोमस्य विधानं तु समाचरेत् ॥ देवदानवगंधर्वा यक्षराक्षसकिन्नराः । पीड्यंते ग्रहपीडाभिः किं पुनर्भुवि मानवाः ॥ शनैश्चरेण सौदासो नरमांसे नियोजितः । राहुणा पीडितो राजा नलो भ्रांतो महीतले ॥ अंगारकविरोधेन रामो राष्ट्राद्विवासितः । अष्टमेन शशांकेन हिरण्यकशिपुर्मृतः ॥ रविणा सप्तमस्थेन रावणो विनिपातितः । गुरुणा जन्मसंस्थेन हतो राजा सुयोधनः ॥ पाण्डवा बुधपीडायां विकर्मणि वियोजिताः । षष्ठेनोशनसा युद्धे हिरण्याक्षो निपातितः ॥ एते चान्ये च बहवो ग्रहदोषैस्तु पीडिताः । वृष्ट्यायुःपुष्टिकामो वा ग्रहयज्ञं समाचरेत् ॥ तथा । अन्नहीनो दहेद्राष्ट्रं मंत्रहीनस्तु ऋत्विजः । यजमानमदाक्षिण्यो नास्ति यज्ञसमो रिपुः ॥ अहिंसकस्य दांतस्य धर्मार्जितधनस्य च । नित्यं च नियमस्थस्य सदा सानुग्रहा ग्रहाः ॥ ग्रहा गावो नरेंद्राश्च ब्राह्मणाश्च विशेषतः । पूजिताः पूजयंत्येते निर्दहंत्यवमानिताः ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ग्रहाणामिदमातिथ्यं कुर्यात्संवत्सरादपि । आरोग्यबलसंपन्नो जीवेच्च शरदां शतम् ॥ " अथायुतहोमादिग्रहमखलक्षणानि तद्विधिश्च (मात्स्ये शान्तिरत्ने च) स चतुर्धा केवलः अयुतहोमो लक्षहोमः कोटिहोमश्चेति । तत्राऽद्यो याज्ञवल्क्याद्यैरुक्तः । त्रयो मात्स्ये उक्ताः। "ग्रहयज्ञस्त्रिधा प्रोक्तः पुराणश्रुतिकोविदैः । प्रथमोयुतहोमः स्याल्लक्षहोमस्ततः परम् ॥ तृतीयः कोटिहोमस्तु सर्वकामफलप्रदः" ॥ ते द्विविधाः । नैमित्तिकाः काम्याश्च । तत्राऽयुतहोमो मात्स्योक्तः पूर्व एव वर्णितः । अधुना लक्षहोमकोटिहोमौ वक्ष्यामि । तदुक्तम् (मत्स्यपुराणे) "अयुतेनाहुतीनां च नवग्रहमखः स्मृतः । कथितोऽयुतहोमोयं लक्षहोममतः शृणु ॥ सर्वकामाप्तये यस्माल्लक्षहोमं विदुर्बुधाः॥ ग्रहतांरावलं लब्ध्वा कृत्वा ब्राह्मणवाचनम् । गृहस्योत्तरपूर्वेण मण्डपं कारयेद्बुधः ॥रुद्रायतनभूमौ वा चतुरस्रमुदङ्मुखम्। दशहस्तमथाष्टौ वा हस्तान्कुर्याद्विधानतः ॥ प्रागुदक्प्लवनां भूमिं कारयेद्यत्नतो बुधः । प्रागुत्तरं समासाद्य प्रदेशं मण्डपस्य तु ॥ शोभनं कारयेत्कुण्डं यथावल्लक्षणान्वितम् । चतुरस्रं समंतात्तु योनिवक्त्रं समेखलम् ॥ चतुरङ्गुलविस्तारा मेखला तद्वदुच्छ्रिता । प्रागुदक्प्लवना कार्या सर्वतः समवस्थिता ॥ शान्त्यर्थं सर्वलोकानां नवग्रहमखः स्मृतः । मानहीनाधिकं कुण्डमनेकभयदं भवेत् ॥ यस्मात्तस्मात्सुसंपूर्णं शान्तिकुंडं विधीयते । अस्मादशगुणः प्रोक्तो लक्षहोमः स्वयंभुवा॥ आहुतीभिः प्रयत्नेन दक्षिणाभिस्तथैव च ॥ द्विहस्तविस्तृतं तद्वच्चतुर्हस्तायतं पुनः । लक्षहोमे भवेत्कुंडं योनिवक्त्रं त्रिमेखलम् ॥ तस्य चोत्तरपूर्वेण वितस्तित्रयसंस्थितम् । प्रागुदक्प्लवनं तच्च चतुरस्रं समंततः ॥ विष्कंभार्द्धोच्छ्रितं प्रोक्तं स्थंडिलं विश्वकर्मणा । संस्थापनाय देवानां वप्रत्रयसमावृतम् ॥ द्व्यङ्गुलो ह्युच्छ्रितो वप्रः प्रथमः स उदाहृतः । अङ्गुलोच्छ्रायसंयुक्तं वप्रद्वयमथोपरि ॥ त्र्यङ्गुलस्य च विस्तारः सर्वेषां कथ्यते बुधैः । दशांगु

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

लोच्छ्रिता भित्तिः स्थंडिले स्यात्तथोपरि ॥ तस्मिन्नावाहयेद्देवान् पूर्ववत्पुष्पतंडुलैः । आदित्याभिमुखाः सर्वाः साधिप्रत्यधिदेवताः । स्थापनीया मुनिश्रेष्ठ नोत्तरेण पराङ्मुखाः ॥ पूर्ववत्कुंभमामंत्र्य तद्धोमं समाचरेत् । सहस्राणां शतं कृत्वा समित्संख्याधिकं पुनः ॥ घृतकुंभवसोर्धारां पातयेदनलोपरि । औदुंबरीं तथा चार्द्रां ऋज्वीं कोटरवर्जिताम् ॥ बाहुमात्रां स्रुचं कृत्वा ततः स्तंभद्वयोपरि । घृतधारां तथा सम्यगग्नेरुपरि पातयेत् ॥ श्रावयेत्सूक्तमाग्नेयं वैष्णवं रुद्रमैंदवम् । महावैश्वानरं साम ज्येष्ठसाम च वाचयेत् ॥ स्नानं च यजमानस्य पूर्ववत्स्वस्तिवाचनम् । दातव्या यजमानेन पूर्ववद्दक्षिणाः पृथक् ॥ कामक्रोधविहीनेन ऋत्विग्भ्यः शांतचेतसा । नवग्रहमखे विप्राश्चत्वारो वेदवेदिनः ॥ अथवा ऋत्विजौ शांतौ द्वावेव श्रुतिकोविदौ । कार्यावयुतहोमे तु न प्रसज्येत विस्तरे ॥ तद्वच्च दश चाष्टौ च लक्षहोमे तु ऋत्विजः । कर्त्तव्याः शक्तितस्तद्वच्चत्वारो वा विमत्सराः ॥ नवग्रहमखात्सर्वं लक्षहोमे दशोत्तरम् । भक्ष्यान्दद्यान्मुनिश्रेष्ठ भूषणान्यपि शक्तितः॥ शयनानि सवस्त्राणि हेमानि कटकानि च । स्वर्णांङ्गुलिपवित्राणि कंठसूत्राणि शक्तिमान् ॥ न कुर्याद्दक्षिणाहीनं वित्तशाठ्येन मानवः । अददल्लोभतो मोहात्कुलक्षयमवाप्नुयात् ॥ अन्नदानं यथाशक्ति कर्त्तव्यं भूतिमिच्छता॥अन्नहीनः कृतो यस्माद्दुर्भिक्षफलदो भवेत् । लक्षहोमस्तु कर्त्तव्यो यथावित्तं भवेद्बहु ॥ यतः सर्वानवाप्नोति कुर्वन्कामान्विधानतः ”॥ इति लक्षहोमः ॥ अथ कोटिहोमोपि (मात्स्ये) “अस्माच्छतगुणः प्रोक्तः कोटिहोमः स्वयंभुवा। आहुतिभिः प्रयत्नेन दक्षिणाभिः फलेन च ॥ पूर्ववद्ग्रहदेवानामावाहनविसर्जने । होममंत्रास्त एवोक्ताः स्नाने दाने तथैव च ॥ कुंडमण्डपवेदीनां विशेषोयं निबोध मे ॥ कोटिहोमे चतुर्हस्तं चतुरस्रं तु सर्वतः॥ योनिवक्रद्वयोपेतं तदप्याहुस्त्रिमेखलम् ॥ द्वयङ्गुलाभ्युच्छ्रिता

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कार्या प्रथमा मेखला बुधैः। त्र्यंगुलाभ्युच्छ्रिता तद्वद्द्वितीया परिकीर्त्तिता॥ उच्छ्रायविस्ताराभ्यां च तृतीया चतुरङ्गुला। द्व्यङ्गुलश्चेति विस्तारः पूर्वयोरेव शस्यते॥वितस्तिमात्रा योनिः स्यात्षट्सप्ताङ्गुलविस्तृता। कूर्म्मपृष्ठोन्नता मध्ये पार्श्वयोश्चाङ्गुलोच्छ्रिता॥गजोष्ठसदृशी तद्वदायता छिद्रसंयुता। एतत्सर्वेषु कुण्डेषु योनिलक्षणमुच्यते॥वेदिश्च कोटिहोमे स्याद्वितस्तीनां चतुष्टयम्। चतुरस्रा समंताच्च त्रिभिर्वप्रैस्तु संयुता॥ वप्रप्रमाणं पूर्वोक्तं वेदीनां च तथोच्छ्रयः। तथा षोडशहस्तः स्यान्मण्डपश्च चतुर्मुखः॥पूर्वद्वारे च संस्थाप्य बह्वृचं वेदपारगम्। यजुर्विदं तथा याम्ये पश्चिमे सामवेदिनम्॥ अथर्ववेदिनं तद्वदुत्तरे स्थापयेद्बुधः। अष्टौ तु होमकाः कार्य्या वेदवेदाङ्गवेदिनः॥ एवं द्वादश विप्रांस्तु वस्त्रमाल्यानुलेपनैः। पूर्ववत्पूजयेद्भक्त्या वस्त्राभरणभूषणैः॥ रात्रिसूक्तं च रौद्रं च पवमानं सुमंगलम्। पूर्वतो बह्वृचः शान्तिं पठन्नास्ते ह्युदङ्मुखः॥ शान्तं शाक्रं च सौम्यं च कौष्मांडं शान्तिमेव च। पावयेद्दक्षिणद्वारि यजुर्वेदिनमुत्तमम्। सुपर्णमथ वैराजमाग्नेयं रुद्रसंहिताम्। ज्येष्ठसाम तथा शान्तिं छंदोगः पश्चिमे जपेत्॥ शान्तिसूक्तं च सौरं च तथा शाकुनकं शुभम्। पौष्टिकं च महाराज्यमुत्तरेणाप्यथर्ववित्॥ पंचभिः सप्तभिर्वापि होमः कार्योत्र पूर्ववत्। स्नाने दाने च मंत्राः स्युस्त एव ऋषिसत्तम॥ अनेन विधिना यस्तु कोटिहोमं समाचरेत्। सर्व्वान्कामानवाप्नोति ततो विष्णुपदं व्रजेत्"॥ इति। ब्राह्मणभोजनसंख्या (मदनरत्ने)। "एकमेकाहुतौ विप्रं होमं त्वन्नेन भोजयेत्। अत्यर्थो मध्यमश्चापि विप्रमेकं शताहुतौ॥ सहस्रस्याहुतेर्वैकं जघन्योपि प्रभोजयेत्। अन्यथा दहति क्षिप्रं तद्राष्ट्रं नात्र संशयः॥ अतो दातुमशक्तो यो दक्षिणां चान्नमेव वा। जपैः प्रणामैः स्तोत्रैश्च तोषयेत्तर्पयेद्गुरून्" इति। अथाग्निकर्म तत्र तावत्कुण्डसंस्कारादि (पारस्करगृह्यसूत्रे) "परिसमुह्यो

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पलिप्योल्लिख्योद्धृत्याऽभ्युक्ष्याऽग्निमुपसमाधाय दक्षिणतो ब्राह्मासनमास्तीर्य प्रणीय परिस्तीर्यार्थवदासाद्य पवित्रे कृत्वा प्रोक्षणीः संस्कृत्यार्थवत्प्रोक्ष्य निरूप्याज्यमधिश्रित्य पर्यग्नि कुर्यात् । स्रुवं प्रतप्य संमृज्याभ्युक्ष्य पुनः प्रतप्य निदध्यादाज्यमुद्वास्यो त्पूयावेक्ष्य प्रोक्षणीश्च पूर्ववदुपयमनकुशानादाय समिधोभ्याधाय पर्युक्ष्य जुहुयादेष एव विधिर्यत्र क्वचिद्धोमः" । इति ॥ अथ पारस्करगृह्योक्तकुशकंडिकासूत्राणां हरिहरभाष्यनानास्मृतिकारिकाभिर्व्याख्या लिख्यते । तत्र तावत्कर्ता सुस्नातः शुचिः शुक्लांबरधरस्सोत्तरीयः कर्मस्थानमागत्य वारणादियज्ञियवृक्षोद्भवासने प्राग्ग्रानुदग्ग्रान् वा कुशानास्तीर्य तत्र प्राङ्मुख उपविश्य आचम्य प्राणानायम्य देशकालौ स्मृत्वा। अमुककर्माङ्गतया पंचभूसंस्कारान् करिष्ये इति संकल्पं कुर्यात् । तथा च(कात्यायनः) "संकल्प एव मुख्यः स्यात्स्नानदानादिकर्मसु । कर्म संकल्परहितं तत्सर्वं निष्फलं भवेत्" इति । ततः शुद्धायां भूमौ चतुर्विंशत्यंगुलायतं स्थंडिलं परिकल्पयेत् । तथा चोक्तम् । " स्थंडिलं मृन्मयं कार्यं चतुर्विंशांगुलायतम् । द्विरंगुलं भवेत्कंठं व्यासस्य वचनं यथा ॥"(कर्मप्रदीपे विशेषः) अष्टांगुलसमुत्सेधं चतुर्विंशांगुलायतम्। पन्नगास्तत्र सीदंन्ति तदर्थं स्थंडिलं भवेत्"॥ परिसमूहनादिविचारः । परिसमुह्य इति सूत्रम् । त्रिभिर्दर्भैः पांसूनपसार्य इति (हरिहरभाष्यम् । बादरायणोपि) "कृमिकीटपतंगाश्च विचरन्ति महीतले । तेषां संरक्षणार्थाय परिसमुह्येति कथ्यते॥" दर्भसंख्या (कारिकायाम्) "धृत्वाङ्गुष्ठकनिष्ठाभ्यां मूलैः साग्रैः कुशत्रयम् । तदग्रैस्तस्य रजसां पूर्वस्यामपसर्पणम् ॥ ' उपलिप्य ' इति सूत्रम् । गोमयोदकेन इति हरिहरः । कारिकायाम् "पुरा इंद्रेण वज्रेण हतो वृत्रो महासुरः । व्यापिता मेदसा पृथ्वी तदर्थमुपलेपनम् ॥ गोमये वसते लक्ष्मीः पवित्रा सर्व मङ्गला ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यज्ञार्थं संस्कृता भूमिस्तदर्थमुपलेपनम्॥" गोमयलक्षणम् (कल्पवल्लयाम्) "रुग्णा वृद्धा प्रसूता च वन्ध्या संधिन्यमेध्यभुक्। मृतवत्सा च नैतासां ग्राह्यं मूत्रं शकृत्पयः॥ स्वच्छं तु गोमयं ग्राह्यं स्थाने च पतिते शुचौ। उपर्य्यधः परित्यज्य आर्द्रं जंतु विवर्जितम्॥ 'त्रिरुल्लिख्य' इति सूत्रम्। त्रिः खादिरेण हस्तमात्रेण खड्गाकृतिना स्फ्येन उल्लिख्य प्रागग्रा उदक्संस्थाः स्थंडिल परिमाणास्तिस्रो रेखाः कृत्वा इति हरिहरः। (कल्पवल्लयामपि) "उल्लेखनं ततः कुर्यादस्थिकण्टकमेव च। तेषामुद्धरणार्थाय उल्लेखः कथितो बुधैः॥" (कुशकंडीभाष्येपि) "रेखात्रयमुदक्संस्थं प्रागग्रं स्थंडिलाधि। अथवा तत्र कुर्वीत द्वादशांगुलमानतः॥" (संग्रहेपि) "फलेन फलमाप्नोति पुष्पेण श्रियमृच्छति। पत्रेण धनलाभं च दीर्घमायुः कुशेन तु॥ भवेन्नखेन कुनखी कीलेन व्याधिमृच्छति। भस्मना हुतनाशः स्यान्मृन्मयेन कलिर्ध्रुवम्॥ तस्मात्फलेन पत्रेण कुशेन कुसुमेन वा। प्राग्लेखोल्लेखने विप्र सिद्धिः कर्मसु सर्वदा॥" इति। (प्रयोगचिंतामणौ) " प्रथमा सात्त्विकी ज्ञेया द्वितीया राजसी मता। तृतीया तामसी तासां देवा ब्रह्माच्युतेश्वराः॥ 'उद्धृत्य' इति सूत्रम्। अनामिकाङ्गुष्ठाभ्यां यथोल्लिखिताभ्यो लेखाभ्यः पांसूनुद्धृत्य इति हरिहरः। (कर्म प्रदीपेपि) "अंगुष्ठोपकनिष्ठाभ्यामग्निकार्यं तथोत्करम्। रेखाभ्यः समुपादायारत्निमात्रे निधापयेत्॥" (कारिकायाम्)"ये भ्रमंति पिशाचाद्या आकाशपथगामिनः। तेषां संरक्षणार्थाय उद्धृत्य कथितं बुधैः॥ 'अभ्युक्ष्य' इति सूत्रम्। मणिकाद्भिरभ्युक्ष्याभिषिच्येति हरिहरः। (कारिकायामपि) "आपो देवगणाः सर्वे आपः पितृगणाः स्मृताः। तेनैवाभ्युक्षणं प्रोक्तमृषिभिर्वेदवादिभिः॥" (संग्रहे विशेषः) "उत्तानेन तु हस्तेन कर्त्तव्यं प्रोक्षणं बुधैः। अवाचीनेन हस्तेन कर्त्तव्यं तदवेक्षणम्। मुष्टीकृतेन हस्तेन चाभ्यु

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

क्षणमुदाहृतम् ॥" एते पंच भूसंस्काराः । अनंतरं कुशकण्डिकाविचारः क्रियते । 'अग्निमुपसमाधाय' इति सूत्रम् । कर्मसाधनभूतं लौकिकं स्मार्तं श्रौतं वाग्निम् आत्माभिमुखं स्थापयित्वा इति हरिहरः । तथा च (प्रयोगरत्ने अग्निः) " पात्रांतरेणापिहितं ताम्रपात्रादिके शुभे । अग्निप्रणयनं कुर्याच्छरावे तादृशेपि वा ॥" (प्रयोगपारिजाते) " शुभं पात्रं तु कांस्यं स्यात्तेनाग्निं प्रणयेद्बुधः । तस्याभावे शरावेण नवेनापि दृढेन च ॥" (संस्कारभास्करे) "शरावे भिन्नपात्रे वा कपाले चोल्मुकेपि वा । नाग्निप्रणयनं कुर्याद्व्याधिहानिभयावहम्" इत्यत्र शरावनिषेधकं वचनं मुख्यपात्राऽसंभवे वेदितव्यम् । कपालं खर्परम् । उल्मुकं ज्वलदग्नेरेकदेशमित्यर्थः । (कल्पवल्ल्याम्) "संपुटेनाग्निमानीय स्थाप्याग्नेर्दिशि कुंडतः । आमक्रव्यभुजौ तस्मात्त्यक्त्वा कुंडे विनिक्षिपेत् ॥" (कुशकंडिकाभाष्ये) "अग्निमानीय पात्रे तु प्रक्षिपेदक्षतोदकम् । यद्येवं नैव कुर्वीत यजमानभयावहम् ॥" (कल्पवल्ल्यामपि) "आनीतपात्रयोरेव प्लावनं तत्क्षणे भवेत् । नो चेत्कर्तुर्मनस्तापः स्यात्संतापस्तयोरपि ॥" अग्निनियमः (प्रयोगरत्ने संग्रहे च) " उत्तमो रणिजन्योग्निर्मध्यमः सूर्यकान्तजः । उत्तमः श्रोत्रियागारान्मध्यमः स्वगृहादिजः ॥" (शारदातिलकेपि) "सूर्यकांतादिसंभूतं यद्वा श्रोत्रियगेहजम् । आनीय चाग्निं पात्रेण क्रव्यादांशं परित्यजेत् ॥" (मंत्रमहोदधौ) "सूर्यकांतादरणितः श्रोत्रियागारतोपि वा । पात्रेण पिहिते पात्रे वह्निमेवानयेत्ततः ॥ अस्त्रेणादाय तत्पात्रं वर्मणोद्धाटयेत्तु तम् । अस्त्रमंत्रेण नैर्ऋत्ये क्रव्यादांशं ततस्त्यजेत् । मूलेन पुरतो धृत्वा संस्कारांश्च ततश्चरेत् ॥" त्याज्याग्निमाह (देवलः) "चांडालाग्निरमेध्याग्निः सूतकाग्निश्च कर्हिचित् । पतिताग्निश्चिताग्निश्च न शिष्टग्रहणोचितः ॥ कर्मविशेषे अग्निनामानि । (प्रयोगरत्ने संग्रहे च) । "पावको लौकिके ह्यग्निः प्रथमः संप्रकीर्तितः ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अग्निस्तु मारुतो नाम गर्भाधाने विधीयते ॥ ततः पुंसवने ज्ञेयः पावमानस्तथैव च । सीमंते मंगलो नाम प्रबलो जातकर्माणि ॥
नाम्नि वै पार्थिवो ह्यग्निः प्राशने तु शुचिः स्मृतः । सभ्यो नाम स चौले तु व्रतादेशे समुद्भवः ॥ गोदाने सूर्यनामाग्निर्विवाहे
योजको मतः । आवसथ्ये द्विजो ज्ञेयो वैश्वदेवे तु रुक्मकः ॥ प्रायश्चित्ते विटश्चैव पाकयज्ञेषु पावकः । देवानां हव्यवाहश्च पितॄणां
कव्यवाहनः ॥ शांतिके वरदः प्रोक्तः पौष्टिके बलवर्धनः । पूर्णाहुत्यां मृडो नाम क्रोधाग्निश्चाभिचारके ॥ वश्यार्थे कामदो नाम
वनदाहे तु दूषकः । कुक्षौ तु जाठरो ज्ञेयः क्रव्यादो मृतदाहके ॥ वह्निनामा लक्षहोमे कोटिहोमे हुताशनः । वृषोत्सर्गेऽध्वरो नाम
शुचये ब्राह्मणः स्मृतः ॥ समुद्रे वाडवो ह्यग्निः क्षये संवर्तकस्तथा । ब्रह्मा वै गार्हपत्यश्च ईश्वरो दक्षिणस्तथा ॥ विष्णुराहवनीयः
स्यादग्निहोत्रे त्रयोग्नयः । ज्ञात्वैवमग्निनामानि गृह्यकर्म समाचरेत् ॥" ग्रहहोमे विशेषः (स्कांदे) "आदित्ये कपिलो नाम पिंगलः
सोम उच्यते । धूमकेतुस्तथा भौमे जाठरोग्निर्बुधे स्मृतः ॥ गुरौ चैव शिखी नाम शुक्रे भवति हाटकः । शनैश्चरे महातेजा राहुके
त्वोर्हुताशनः ॥" अथाग्निजिह्वानामानि । याभिर्हव्यं समश्नाति हुतं सम्यग् द्विजोत्तमैः ॥ काली करालीं च मनोजवा च सुलोहिता
चैव सुधूम्रवर्णा । स्फुर्लिंगिनी विश्वरुचिस्तथा च चलायमाना इति सप्त जिह्वाः ॥ एताश्चोक्ता विशेषेण ज्ञातव्या ब्राह्मणेन तु ।
आहूय चैव होतव्यो यो यत्र विहितो विधिः ॥ अविदित्वा तु यो ह्यग्निं होमयेदविचक्षणः । न हुतं न च संस्कारो न तु यज्ञफलं
भवेत्" इति ॥ अन्यत्र जिह्वैककरणमुक्तम् । "जिह्वैककरणं प्रोक्तं सप्तानामेकया ऋचा । समुद्रादूर्मिरनया होतव्यं कर्मसिद्धये" ॥
जिह्वास्थानानि (वसिष्ठकल्पे) "कुंडस्य पूर्वदिग्भागे काली जिह्वा प्रकीर्तिता । आग्नेये तु कराल्याख्या दक्षिणे तु मनोजवा ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सुलोहिता नैर्ऋते च धूम्रवर्णा तु वारुणे । स्फुलिंगिनी तु वायव्ये सौम्ये विश्वरुचिस्तथा ॥ काल्यां करालयां वा कुर्याच्छांतिकं पौष्टिकं तथा । मनोजवायां जिह्वायामभिचारोभिधीयते ॥ सुलोहितायां जिह्वायां तस्यामुच्चाटनं विदुः । सर्वार्थसिद्धिकां विश्वरुचिं मंत्रविदो विदुः ॥ अपरे वसुधारेति जिह्वां पूर्वोदितां जगुः । उपजिह्वेति सा प्रोक्ता लक्ष्मीस्तत्र प्रतिष्ठिता ॥ कुंडस्य मध्यमं पार्श्वमग्नेरास्यं प्रकीर्तितम् । तस्मिन्सर्वाणि कार्याणि साधनीयानि नित्यशः" ॥ (संग्रहे विशेषः) "विवाहे वारुणी जिह्वा मध्यमा यज्ञकर्मसु । उत्तरा चोपनयने दक्षिणा पितृकर्मसु ॥ प्राचीना सर्वकार्येषु ह्याग्नेयी सर्वकर्मसु । ऐशानी चोग्रकार्येषु बुध्येत्तद्धोमलक्षणम्" इति ॥ 'दक्षिणतो ब्रह्मासनमास्तीर्य' इति सूत्रम् । तस्याग्नेर्दक्षिणस्यां दिशि ब्रह्मणे आसनं वारणादियज्ञियदारुनिर्मितं पीठमास्तीर्य कुशैः स्तीर्त्वा तत्र वरणाभरणाभ्यां पूर्वसंपादितं कर्मसुतत्त्वज्ञं ब्राह्मणं तदभावे पंचाशत्कुशनिर्मितमुपवेश्य इति हरिहरभाष्यम् ॥ तथाचोक्तम् (कारिकायाम्) " अग्नेर्दक्षिणतो ब्रह्मासनं कृत्वा कुशास्तृतम् । ब्रह्माणं वरयेदग्निमुत्तरेण गुणान्वितम् ॥ आसनं ब्रह्मणः कार्यं वारणं वाविकंकतम् । चतुरस्रं हस्तमात्रं मूलदंडसमन्वितम् ॥ द्विषडंगुलसंख्यातो मूलदंडोऽविकंकतात् । करिष्येऽमुककर्माहं ब्रह्मा त्वं तत्र मे भव ॥ ब्रह्मा भवामि चेत्युक्त्वा गच्छेदग्नेस्तु पूर्वतः । अपरेणाथवा कुर्यादासनस्येक्षणं ततः ॥ एकदेशं तृणस्यापि स्वासने चोपवेशयेत् ॥ " (त्रिकारिकायाम्) "उत्तरे सर्वपात्राणि प्रणीतादीन्यनुक्रमात् । पूर्वेणैव द्विजाः सर्वे ब्रह्मा किमुत दक्षिणे ॥ दक्षिणे दानवाः प्रोक्ताः पिशाचोरगराक्षसाः । तेषां संरक्षणार्थाय ब्रह्मा तिष्ठति दक्षिणे " ॥ ब्रह्मलक्षणम् (प्रयोगचिंतामणौ व्यासः) " वेदैकनिष्ठं धर्मज्ञं कुलीनं श्रोत्रियं शुचिम् । स्वशाखाध्यमनालस्यं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

विप्रं कर्तारमीप्सितम्"इति। ब्रह्मवरणार्थमलंकारमाह (तत्रैव) "वस्त्रयुग्मं तथाप्पूरं केयूरं कर्णभूषणम्। अंगुलीभूषणं चैव मणिबंधस्य भूषणम्॥ कंठाभरणयुक्तानि प्रारंभे सर्वकर्मणि॥" विप्राभावे दर्भवटुमाह (कुशकण्डीभाष्ये हारीतः) "कुशग्रंथिमयं विप्रं ब्रह्माणमुपवेशयेत्" इति। तल्लक्षणम्(परिशिष्टे) "पंचाशता भवेद्ब्रह्मा तदर्द्धेन तु विष्टरः। ऊर्ध्वकेशो भवेद्ब्रह्मा लंबकेशस्तु विष्टरः॥ दक्षिणावर्तको ब्रह्मा वामावर्तस्तु विष्टरः॥ 'प्रणीय' इति सूत्रम्। अप इति शेषः। तद्यथा अग्नेरुत्तरतः प्राग्ग्रं कुशैरासनद्वयं कल्पयित्वा वारणं द्वादशांगुलदीर्घं चतुरंगुलविस्तारं चतुरङ्गुलखातं चमसं सव्यहस्ते कृत्वा दक्षिणहस्तोद्धृतपात्रस्थोदकेन पूरयित्वा पश्चिमासने निधायालभ्य पूर्वासने स्थापयित्वा इति हरिहरभाष्यम्॥ (कर्मप्रदीपेपि)"द्वादशांगुलदीर्घेण चतुरस्रः सगर्तकः। प्रस्थमात्रोदकग्राही प्रणीताचमसो भवेत्" इति॥ 'परिस्तीर्य' इति सूत्रम्। आग्निं बर्हिर्मुष्टिमादाय ईशानादिप्रागग्रैर्बर्हिर्भिरुदक्संस्थमग्नेः परिस्तरणं कृत्वा इति हरिहरभाष्यम्॥ परिस्तरणप्रयोजनम् (कारिकायाम्) "वेदिका दर्भहीना तु विनश्या प्रोच्यते बुधैः। परिधानं ततः कुर्याद्दर्भैणैव विशेषतः॥" स्थाननियमः (नारदपंचरात्रे) "एकमेखलके कुंडे मेखलाधः परिस्तरेत्। द्विमेखले द्वितीयायां तृतीयायां त्रिमेखले॥" दर्भसंख्या (कारिकायाम्) "अग्निं षोडशभिर्दर्भैः परिस्तीर्य दिशं प्रति। प्रागादीशानपर्यंतमुदक्संस्था परिस्तृतिः" इति॥ एकैकस्यां दिशि चत्वारि एवं षोडश। तच्च प्रागुदगग्रैः। दक्षिणतः प्रागग्रैः प्रत्यगुदगग्रैः। उत्तरतः प्रागग्रैरिति संस्कारभास्करे॥ बर्हिर्लक्षणम् (हेमाद्रौ कात्यायनेनोक्तम्) 'कुशा दीर्घाश्च बर्हिषः' इति। 'उपमूलंलूनबर्हिषां मुष्टिर्बर्हिरिति' कुशकण्डिकाटीकाकारः॥ 'अर्थवदासाद्य' इति सूत्रम्। यावद्भिः पदार्थैरर्थः प्रयोजनं तावतः पदार्थान् द्वंद्वं प्राक्संस्थान् उदग

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ग्रानग्नेरुत्तरतः पश्चाद्वा आसाद्य इति हरिहरः ॥ (कारिकायाम्) "अग्नेरुत्तरतस्तानि आसाद्योदग्विलानि च । प्रागग्राणि यदा पश्चात्सादयेत्प्राग्विलानि च॥ आसादनं तु पात्राणां प्रादेशांतरके बुधः । अंगुलद्वयमानेन द्वंद्वं द्वंद्वांतरे न्यसेत्" इति ॥उत्तरतश्चेदुदक्संस्थम् असंभवे प्राक्संस्थं पश्चिमसंस्थमुदक्संस्थमपीति देवयाज्ञिकभाष्ये ॥ पवित्रलक्षणम् (छंदोगपरिशिष्टे) "अनंतर्गर्भिणं साग्रं कौशं द्विदलमेव च । प्रादेशमात्रं विज्ञेयं पवित्रं यत्र कुत्रचित् ॥ तदेव दर्भपिंजूल्या लक्षणं समुदाहृतम् । आज्यस्योत्पवनार्थं यत्तदप्येतावदेवतु ॥" पवित्रप्रयोजनम् (लघुंकारिकायाम्) "इंद्रवज्रं हरेश्चक्रं त्रिशूलं शंकरस्य च । दर्भरूपेण ते त्रीणि पवित्रच्छेदनानि च ॥ पुरा वृत्रवधे प्राप्ते रक्तपूर्णा वसुंधरा । द्वौ दर्भौ देवतात्रीणि पवित्रच्छेदनानि च" ॥ प्रोक्षणीविचारः (कर्मप्रदीपे) " वारणं पाणिपात्रं च द्वादशांगुलविस्तृतम् । पद्मपत्राकृतिर्वापि प्रोक्षणीपात्रमीरितम् ॥" आज्यंस्थाली–"आज्यस्थाली कांस्यमयी यद्वा ताम्रमयी तथा । प्रादेशमात्रदीर्घा सा ग्रहीतव्याऽव्रणा शुभा " ॥ (कर्मप्रदीपे) "आज्यस्थाली च कर्तव्या तैजसी द्रव्यसंभवा । महीमयी वा कर्तव्या सर्वास्वाज्याहुतीषु च ॥ आज्यस्थालीप्रमाणं च यथाकामं तु कारयेत् । सुदृढामव्रणां भद्रामाज्यस्थालीं प्रचक्षते " चरुस्थाली–(रत्नमालायाम्) "दृढा प्रादेशमात्रोर्ध्वं तिर्यङ् नातिबृहन्मुखी । मृन्मयौदुंबरी वापि चरुस्थाली प्रशस्यते ॥" संमार्जनकुशानाह (बादरायणः) "स्रुवसंमार्जनार्थाय पंच वाथ त्रयोपि वा । प्रादेशमात्रान्गृह्णीयात्संमार्जकुशसंज्ञकान् ॥ उपयमनकुशाः सप्त पंच वाथ त्रयोपि वा " ॥ समिल्लक्षणम् (छंदोगपरिशिष्टे) " नांगुष्ठादधिका ग्राह्या समित्स्थूलतया क्वचित् । न वियुक्ता त्वचा चैव न सकीटा न पाटिता ॥ प्रादेशान्नाधिका नोना न तथा स्याद्विशाखिका । न सपर्णा न निर्वीर्य्या होमेषु च विज

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नता ॥" (हेमाद्रौ मरीचिः) "प्रागग्राः समिधो ग्राह्या अखंडा नौष्ठपाटिताः । काम्येषु वश्यकर्मादौ विपरीता जिघांसति ॥ वि शीर्णा विदला ह्रस्वा वक्रा बहुशिराः कृशाः । दीर्घाः स्थूला घुणैर्जुष्टाः कर्मसिद्धिविनाशकाः॥ होतव्या मधुसर्पिर्भ्यां दध्ना क्षीरेण संयुताः । प्रादेशमात्राः समिधा अशाखा अपलाशिनीः ॥" (आगमे तु विशेषः) "विशीर्णा द्विदला ह्रस्वा वक्रा स्थूला कृशा द्विधा । कृमिविद्धा च दीर्घा च निस्त्वक्च परिवर्जिता ॥ वर्ज्यसमिद्धोमे फलं तत्रैव–विशीर्णायुः क्षयं कुर्याद्विदला व्याधिसंभ वम् । ह्रस्वया मृत्युमाप्नोति वक्रा विघ्नकरी तथा ॥ स्थूलया ह्रियते लक्ष्मीः कृशया जायते क्षयः । द्विधया नेत्ररोगः स्यात्कीट दष्टार्थनाशिनी ॥ द्वेषं प्रकुर्वते दीर्घाः प्राणघ्ना निस्त्वचः स्मृताः. । सक्षीरा नाधिका नोनाः समिधः सर्वकामदाः ॥ आर्द्रा सत्वक् समाविद्धा तर्जन्यंगुलवर्तुला । ईदृशीं होमयेत्प्राज्ञः प्राप्नोति विपुलां श्रियम् ॥ श्रौते स्मार्ते च ताः प्रोक्ताः समिधः पारिकीर्तिताः ॥" सामिद्वृक्षानाह (मरीचिः) "पलाशः खदिरोऽश्वत्थः शमी वट उदुंबरः । अपामार्गार्कदूर्वाश्च कुशाश्चेत्यपरे विदुः " ॥ (ब्रह्मपुराणेपि) "शमीपलाशन्यग्रोधप्लक्षवैकंकतोद्भवाः । अश्वत्थोदुंबरौ बिल्वश्चंदनस्सरलस्तथा ॥ सालश्च देवदारुश्च खादिरश्चैव याज्ञियाः ॥" स्रुवलक्षणम् (संस्कारभास्करे) "खादिरादेः स्रुवः कार्यो हस्तमात्रप्रमाणतः । अंगुष्ठपर्वखातं तत्त्रिभागं दीर्घपुष्करम् " ॥ (संग्रहे विशेषः) "शमीमयः स्रुवः कार्यस्तदलाभेन्यवृक्षजः । खादिरस्तु स्रुवः कार्यः सर्वकामार्थसिद्धये ॥ अन्यच्च । खादिरोवाथ वार्णो वा द्विवितस्तिः स्रुवः स्मृतः । स्रुवोंतश्चतुर्विंशः स्यात्षड्देवास्त त्र संस्थिताः ॥ अग्निरुद्रौ यमश्चैव विष्णुः शक्रः प्रजापतिः । मूले चतुरंगुलेग्निर्द्वितीये रुद्रदैवतम् ॥ तृतीये यमनो देवश्चतुर्थे

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

विष्णुदेवता। पंचमे शक्रदेवः स्यात्षष्ठे चैव प्रजापतिः ॥ यममग्निं परित्यज्य शक्रं रुद्रं प्रजापतिम्। विष्णुस्थेन च हूयेत एवं कर्म शुभप्रदम्" इति। (कारिकायाम्) "अग्रे धृत्वा तु वैधव्यं मध्ये धृत्वा प्रजाक्षयः। मूले च म्रियते होता स्रुवस्थानं कथं भवेत्॥ अग्रान्मध्यस्तु यन्मध्यं मूलान्मध्यस्तु मध्यमम्। स्रुवं च धारयेद्विद्वानायुरारोग्यदं सदा॥ अरत्निमात्रकः स्रुवः। अङ्गुष्ठ वृत्तपुष्कलः। अग्निः सूर्यश्च सोमश्च विरिंचिरनिलो यमः॥ एते वै षड् देवाश्च चतुरंगुलभागिनः। अग्निभागेर्थनाशाय सूर्ये व्याधिकरो भवेत्॥ सोमे च निष्फलो धर्मो विरिंचिः सर्वकामदः। अनिले रोगमाप्नोति यमे मृत्युः प्रजायते"॥(शौनकेन विशेष उक्तः) "खादिरेण स्रुवः कार्यः पालाशेन जुहूर्भवेत्। तदभावे पलाशस्य पर्णाभ्यां हूयते हविः॥ पलाशपर्णाभावे तु पर्णैर्वा पिप्पलोद्भवैः॥" पलाशपर्णं मध्यमं ग्राह्यम् 'मध्यमेन पर्णेन जुहोति' इति श्रुतेः। (स्रुचि विशेषः) "षट्त्रिंशांगुलां स्रुचं कारयेत्खादिरादिभिः। कर्दमे गोपदाकारं पुष्करं तद्वदेव हि॥ पुष्कराग्रं षडंशं तु खातं द्व्यंगुलविस्तृतम्। अंगुष्ठैकं स्थूलतरे दंडे तस्य च कंकणम्" इति। (स्रुग् धारणे कारिका) "अग्निः सोमो हरिर्ब्रह्मा वायुः कीनाश एव च। षडंगुलविभागेन स्रुचि देवा व्यवस्थिताः॥" आज्यविचारः (पिंगलामते) "उत्तमं गोघृतं प्रोक्तं मध्यमं महिषीभवम्। अधमं छागलीजातं तस्माद्गव्यं प्रशस्यते॥" चरुविचारः (रेणुकारिकायाम्) "त्रिभिः प्रक्षालितं दैवे सकृत्पित्र्ये च कर्मणि। पात्रासादनकाले च तेषां प्रक्षालनं भवेत्॥ हविष्येषु यवा मुख्या दस्तनु व्रीहयः स्मृताः। यथोक्तवस्त्वसंपत्तौ ग्राह्यं तदनुकारि यत्॥ यवानामिव गोधूमा व्रीहीणामिव शालयः। अभावे व्रीहियवयोर्दध्ना वा पयसापि वा॥" पूर्णपात्रविचारः (कारिकायाम्) "अकृते पूर्णपात्रे च च्छिद्रयज्ञः प्रजायते। पूर्णपात्रे च संपूर्णे सर्व

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

संपूर्णता भवेत् ॥ अष्टमुष्टिर्भवेत्किंचित्किंचिदष्टौ च पुष्कलम् । पुष्कलानि च चत्वारि पूर्णपात्रं प्रचक्षते ॥" (गदाधरभाष्ये) "यावतान्नेन भोक्तुस्तु तृप्तिः पूर्णैव जायते । तद्धरार्थमतः कुर्यात्पूर्णपात्रमिति स्थितिः ॥ यवैर्वा व्रीहिभिः पूर्णं भवेत्तत्पूर्णपात्रकम् । वराभिलषितं द्रव्यं सारभूतं तदुच्यते ॥ अन्यच्च । गौर्वरिष्ठतमा विप्रैर्वेदेष्वपि निगद्यते । न ततोन्यद्धरं यस्मात्तस्माद्गौर्वर उच्यते ॥ आसां गवामभावे तु दक्षिणा त्वभिधीयते । वरस्तत्र भवेद्दानमपि वाच्छादयेद्गुरुम्" इति ॥ 'पवित्रे कृत्वा' इतिसूत्रम् । प्रथमं त्रिभिः कुशतरुणैरग्रतः प्रादेशमात्रं विहाय द्वे कुशतरुणे प्रच्छिद्य । इति हरिहरः ॥ (रेणुकारिकायामपि) "एवमासादनं कृत्वा पवित्रच्छेदनैः कुशैः । अंगुष्ठांगुलिपर्वभ्यां छिंद्यात्प्रादेशसंमितम्" इति ॥ अंगुलिरनामिकापर्व· 'प्रोक्षणीः संस्कृत्य' इति सूत्रम् ॥ प्रोक्षणीपात्रं प्रणीतासन्निधौ निधाय तत्र पात्रांतरेण हस्तेन वा प्रणीतोदकमासिच्य पवित्राभ्यामुत्पूय पवित्रे प्रोक्षणीषु निधाय दक्षिणेन हस्तेन प्रोक्षणीपात्रमुत्थाप्य सव्ये कृत्वा तदुदकं दक्षिणेनोच्छाल्य प्रणीतोदकेन प्रोक्ष्य । इति हरिहरभाष्यम् । 'अर्थवत्प्रोक्ष्य' इति सूत्रम् । अर्थवंति प्रयोजनवंति आज्यस्थाल्यादीनि पूर्णपात्रपर्यंतानि प्रोक्षणीभिरद्भिरासादनक्रमेणैकैकशः प्रोक्ष्य असंचरे प्रणीताग्योरन्तराले प्रोक्षणीपात्रं निधाय इति हरिहरभाष्यम् ॥ (कारिकायामपि) "पात्राणि क्रमशः प्रोक्ष्य निदध्यात्तामसंचरे । असंचरः प्रणीताग्योरंतरेण प्रकीर्तितः ॥ स्वालंभान्निर्वपेदापमाज्यं स्थाल्यां यथार्हतः ॥" 'निरूप्याज्यम्' इति सूत्रम् । आसादितमाज्यम् आज्यस्थाल्यां पश्चादग्नेर्निहितायां प्रक्षिप्य चरुश्चेच्चरुस्थाल्यां प्रणीतोदकमासिच्य आसादितांस्तंडुलान्प्रक्षिप्य इति हरिहरभाष्यम् ॥ "अधिश्रित्य" इति सूत्रम् । तत्राज्यं ब्रह्माधिश्रयति तदुत्तरतः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

स्वयं चरुमेवं युगपदज्ञावारोप्य। इति हरिहरभाष्यम् ॥ ' पर्याग्नि कुर्यात् ' इति सूत्रम् । ज्वलदुल्मुकं प्रदक्षिणमाज्यचर्वोः समं ताद्भामयेत् अर्द्धश्रिते चरौ। इति हरिहरभाष्यम् ॥ अपणलक्षणम् (कारिकायाम्) "अन्वर्थः श्रपितः स्विन्नो ह्यदग्धोऽकठिनः शुभः। न चातिशिथिलः पच्यो न चरुश्चारसस्तथा। द्वयोः पर्यग्निकरणं कर्तव्यं ज्वलदग्निना ॥ इति ॥ 'स्रुवं प्रतप्य संमृज्य ' इति सूत्रम् ॥ दक्षिणेन हस्तेन स्रुवमादाय प्रांचमधोमुखमग्नौ तापयित्वा सव्ये पाणौ कृत्वा दक्षिणेन संमार्गाग्रैर्मूलतोऽग्रपर्यंतं मूलैरग्रमारभ्य अधस्तान्मूलपर्यंतम् । इति हरिहरः ॥ " पुनः प्रतप्य निदध्यात् " इति सूत्रम् ॥ पुनः पूर्ववत्प्रतप्य दक्षिणतो निदध्यात्। इति हरिहरः ॥"आज्यमुद्वास्य" इति सूत्रम्। आज्यमुत्थाप्य चरोः पूर्वेण नीत्वाऽग्नेरुत्तरतः स्थापयित्वा चरुमुत्थाप्य आज्यस्य पश्चिमतो नीत्वा आज्यस्योत्तरतः स्थापयित्वा आज्यमग्नेः पश्चादानीय चरुं चानीय आज्यस्योत्तरतो निधाय। इति हरिहरभाष्यम् ॥"उत्पूय" इति सूत्रम्॥ ऊर्द्धं पूर्ववत् पवित्राभ्याम्। इति हरिहरः॥ "अवेक्ष्य" इति सूत्रम्॥ अवलोक्याज्यं तस्मादप द्रव्यनिरसनम्। इति हरिहरः। "प्रोक्षणीश्च पूर्ववत्" इति सूत्रम् ॥ पवित्राभ्यामुत्पूय पूर्ववत्। इति हरिहरः। "उपयमनान्कुशा नादाय" इति सूत्रम्॥ दक्षिणपाणिना गृहीत्वा सव्ये निधाय। इति हरिहरः॥ (कारिकायामपि) "यथा चक्रायुधं विष्णोर्यथा शूलं हरस्य च। यथा वज्रं सुरेंद्रस्य तथा विप्रकरे कुशाः ॥" "समिधोऽभ्याधाय" इति सूत्रम्॥ तिष्ठन्समिधः प्रक्षिप्य। इति हरिहरः ॥ (कारिकायामपि) "लाजहोमे समिद्धोमे ऊर्ध्वहोमे तथैव च। तिष्ठतैव हि कर्त्तव्याः स्वाहाकारा अपि ध्रुवम्"॥ "पर्युक्ष्य जुहुयात्" इति सूत्रम्॥ प्रोक्षण्युदकेन सर्वेण सपवित्रेण दक्षिणचुलुकेन गृहीतेन अग्निमीशानादि उदगपवर्गं परिषिच्य जुहुयात् आघारादीन्

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

संस्रवधारणार्थं पात्रं प्रणीताग्न्योर्मध्ये निदध्यात् । इति हरिहरभाष्यम् ॥ (कारिकायामपि) "अधोमुख ऊर्ध्वपादः प्राङ्मुखो हव्यवाहनः । तिष्ठत्येव स्वभावेन आहुतिः कुत्र दीयते ॥ सपवित्रांबुहस्तेन वह्नेः कुर्यात्प्रदक्षिणाम् । हव्यवाट् सलिलं दृष्ट्वा बिभेति संमुखो भवेत् ॥" (त्रिकारिकायाम्) "आघारौ नासिका ज्ञेया आज्यभागौ च चक्षुषी । वक्त्रश्चोदरकुक्षी च कटी व्याहृतिभिः स्मृताः ॥ शिरो हस्तौ च पादौ च पंच वारुणकाः स्मृताः । प्रजापतिः स्विष्टकृतं श्रोत्रे द्वे परिकीर्तिते ॥" (शारदा तिलके) "सधूमोग्निः शिरो ज्ञेयो निर्धूमश्चक्षुरेव च । ज्वलत्कृष्णो भवेत्कर्णः काष्ठमग्नेर्मनस्तथा ॥ अग्निर्ज्वालायते यत्र शुद्धस्फटिकसन्निभः । तन्मुखं तस्य विज्ञेयं चतुरंगुलमानतः ॥ प्रज्वलोग्निस्तथा जिह्वा एतदेवाग्निलक्षणम् । आस्यांतर्जुहुयादग्नेर्विपश्चित्सर्वकर्मसु ॥ कर्णहोमेभवेद्व्याधिर्नेत्रेंधत्वमुदाहृतम् । नासिकायां मनःपीडा मस्तके च धनक्षयः" ॥ (कारिकायामपि) "अग्निकर्णे हुतं दद्याद्दुर्भिक्षं मरणं ध्रुवम् । नासिकायां मनोदुःखं नेत्रे ग्रामो विनश्यति ॥" (संस्कारभास्करे) "अन्वारंभे कृते होमे ब्रह्मणा दक्षिणे करे । वहुकाष्ठैः समिंधीयादर्चिष्मंतं क्रियाक्षमम् ॥ स्रुवेणाज्यं गृहीत्वाग्नेः प्रत्यगुत्तरदेशतः । आरभ्य दिशमाग्नेयीमाज्यधारामृजुं हरेत् ॥ मनसा संस्मरेत्स्वाहायुक्तं चैव प्रजापतिम् । नैर्ऋतिं दिशमाश्रित्य ऐशानीं पूर्ववत्क्षिपेत् ॥ तत्रेन्द्राय पदं स्वाहायुक्तं चोपांशुकं भवेत् । स्वाहेत्याघारयेदेतावाघाराविति भाषितौ ॥ प्राच्यौ वा जुहुयादेतावृजू संततमेवच । जुहुयादग्नये स्वाहा सोमायेति तथापराम् ॥ प्रथमेशानकोणाग्रे द्वितीयाग्नेयकोणगा । सुसमिद्धेथ वा वह्नौ होतव्ये चोत्तराहुतिः ॥ भूरादिनवसु स्विष्टकृते चाद्यचतुष्टये । अन्वारंभो भवेत्तेषु सोन्वारंभः कुशेन वै ॥" अग्निपूजाविचारः (विष्णुधर्मोत्तरे) "मध्येपि गंधपुष्पादीन्दद्यादग्नेर्न

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

संशयः । बहिर्नैवेद्यमात्रं तु दातव्यमिति निश्चयः ॥" इति ॥ व्याहृतिहोमविचारः (कारिकायाम्) "आज्येन व्याहृतीर्हुत्वा भूर्भुवः स्वरिति क्रमात्। पंचवारुणकं तद्वदंते चैव प्रजापतिः॥" "प्राङ् महाव्याहृतिभिः स्विष्टकृदन्यच्चेदाज्याद्धविः" इति पारस्करसूत्रम्। अस्यार्थः (हरिहरभाष्ये) यत्र होमे आज्यादन्यद्धविः स्यात् । अत्र हविःशब्देन चरुरेव हविः । यत्र चरुः स्यात्तत्र महाव्याहृतिभिः प्राक् स्विष्टकृद्धवति । अन्यत्रान्तेपीति भाष्यकारः । स्विष्टकृद्धोमः सर्वहोमद्रव्यैः कार्यः॥अन्वाधानविचारः-यद्यपि यजुषामन्वाधानं गोभिलहरिहरगदाधरादिभिर्नोक्तत्वात्स्मार्तं कर्मणि नान्वाधानं तथापि शिष्टाचारप्राप्तत्वात्सर्वहोमे प्रत्याहुतित्यागस्य कर्तुमशक्यत्वादन्वाधानं कार्यम् ॥ अग्निप्रज्वलनमाह (आपस्तंबः) " न कुर्यादग्निधमनं कदाचिद्व्यजनादिना । मुखेनैव धमेदग्निं धमन्या वेणुजातया" (देवलोपि) "जुहूतश्चाथ पर्णेन पाणिशूर्पपटादिना । न कुर्यादग्निधमनं तथा च व्यजनादिना ॥ पर्णेनैव भवेद्व्याधिः शूर्पेण धननाशनम् । पाणिना मृत्युमाप्नोति पटेन विफलं भवेत् ॥ व्यजनेनातिदुःखाय आयुःपुण्यं मुखाद्धमात् । मुखेन धमयेदग्निं मुखादग्निरजायत ॥ अग्निं मुखेनेति तु यल्लौकिके योजयेच्च तत् । वेणोरग्निप्रसूतित्वाद्वेणुरग्नेश्च पातनः ॥ तस्मा द्वेणुधमन्यैव धमेदग्निं विचक्षणः ॥" (छंदोगपरिशिष्टे) "योऽनर्चिषि जुहोत्यग्नौ व्यंगारिणि च मानवः । मंदाग्निश्चामयावी च दरिद्रश्चैव जायते ॥ तस्मात्समिद्धे होतव्यं नासमिद्धे कथंचन । आरोग्यमिच्छतायुश्च श्रियमात्यंतिकीं पराम् ॥ " अथ होममुद्रा लक्षणम् (कारिकायाम्) "होममुद्रा त्रिधा ज्ञेया मृगी हंसी च सूकरी । सूकरी सर्वाङ्गुलीभिर्हंसी मुक्तकनिष्ठिका ॥ मृगी कनिष्ठ तर्जन्योर्मुद्रात्रयमुदाहृतम् । यज्ञे शान्तिककल्याणे मृगी हंसी प्रकीर्तिता॥ अभिचारादिके होमे सूकरी कथिता बुधैः ॥" पंचमुद्राः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कथिताः (कुशकण्डिकाभाष्ये) "मयूरी कुक्कुटी हंसी सूकरी च मृगी तथा। पंचमुद्रा विजानीयाद्धोमद्रव्यग्रहे बुधैः ॥ न्युब्जेन पाणिना द्रव्यं तर्जनीरहितेन यत्। क्रियते हवनं विप्रैर्मयूरीं तां विदुर्बुधाः ॥ अंगुष्ठयन्त्रिताः सर्वा अंगुल्यो त्तानलक्षिताः । हवनं क्रियते याभिः कुक्कुटी सा प्रकीर्तिता ॥ विकनिष्ठिका तु हंसी मुकुलाभा च सूकरी। मध्यमा नामिकांगुष्ठैर्मृगी चैवोपलक्षिता ॥ फलमूलयजौ ज्ञेया मुद्रा श्रेष्ठा शिखंडिनी । जारमारणकर्तव्ये कुक्कुटी तु प्रकीर्तिता ॥ वश्योच्चाटनपूर्वाणां कर्मणां सूकरी मता । शांतिके पौष्टिके कार्ये मृगी हंसी तथोत्तमा ॥" शाकल्यप्रमाणम् (महार्णवे) "तिलास्तु द्विगुणाः प्रोक्ता यवेभ्यश्चैव सर्वदा । अन्ये सौगंधिकाः स्निग्धा गुग्गुलादियवैः समाः ॥" (त्रिकारिकायाम्) "आयुःक्षयं यवाधिक्यं यवसाम्यं धनक्षयम् । सर्वकामसमृद्ध्यर्थं तिलाधिक्यं सदैव हि ॥" अथ द्रव्यभेदेनाहुतिप्रमाणम् (शारदातिलके.) "अथात्र होमद्रव्याणां प्रमाणमभिधीयते। कर्षमात्रं घृतं होमे शुक्तिमात्रं पयः स्मृतम् ॥ उक्तानि पंचगव्यानि तत्समानि मनीषिभिः । तत्समं मधु दुग्धान्नमक्षमात्रमुदाहृतम् ॥ दधि प्रसृतिमात्रं स्याल्लाजाः स्युर्मुष्टिसंमिताः। पृथुकास्तत्प्र माणाः स्युः साक्तवोऽपि तथा मताः ॥ गुडं पलार्द्धमानं स्याच्छर्करापि तथा मता। ग्रासार्द्धं चरुमानं स्यादिक्षुः पर्वावधिर्मतः ॥ एकैकं पत्रपुष्पाणि तथाऽपूपानि कल्पयेत्। कदलीफलनारंगफलान्येकैकशो विदुः ॥ मातुलुंगं चतुःखंडं पनसं दशधा कृतम्। अष्टधा नारिकेलानि खंडितानि विदुर्बुधाः ॥ त्रिधा कृतं फलं बिल्वं कपित्थं खंडितं त्रिधा। उर्वारुकफलं होमे चोदितं खंडितं त्रिधा॥ फलान्यन्यानि खंडानि समिधः स्युर्दशांगुलाः। दूर्वात्रयं समुद्दिष्टं गुडूची चतुरंगुला ॥ व्रीहयो मुष्टिमात्राः स्युर्मुद्गमाषा यवा

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अपि । तण्डुलाः स्युस्तदर्द्धांशाः कोद्रवा मुष्टिसंमिताः ॥ गोधूमा रक्तकलभा विहिता मुष्टिमानतः । तिलाश्चुलुकमात्राः स्युः सर्षपास्त त्प्रमाणकाः ॥ शुक्तिप्रमाणं लवणं मरीचान्येकविंशतिः । पुरं वदरमानं स्याद्रामठं तत्समं स्मृतम् ॥ चंदनागुरुकर्पूरकस्तूरीकुंकुमा नि च । तिंतिडीबीजमानानि समुद्दिष्टानि देशिकैः ॥" अथ काम्यहोमादौ वह्निवासस्तत्फलं च (मुहूर्त्तचिंतामणौ) " सैकातिथिर्वार युता कृता ४ ता शेषे गुणे३भ्रे० भुवि वह्निवासः । सौख्याय होमे शशि१युग्म२शेषे प्राणार्थनाशो दिवि भूतले च॥होमे खेटाहुतिफलमपि तत्रैव । सूर्यभात्त्रित्रिभे चांद्रे सूर्यविच्छुक्रपंगवः । चंद्रारेज्यागुशिखिनो नेष्टा होमाहुतिः खले "॥ (ग्रंथांतरे) " अग्नेः स्थापनवेलायां पूर्णाहुत्यामथापि वा । आहुतिर्वह्निवासश्च विलोक्यौ शान्तिकर्मणि" इति ॥ अस्यापवादः (ज्योतिर्निबंधे संस्कारभास्करे च) दुर्गाहो मविधौ विवाहसमये सीमंतपुत्रोत्सवे गर्भाधानविधौ च वास्तुसमये विष्णोः प्रतिष्ठादिषु ॥ मौंजीबंधनवैश्वदेवकरणे संस्कारनैमि त्तिके होमे नित्यभवे न दोषकथनं चक्रं च वह्नेरपि" इति॥(शांतिसारेपि) "संस्कारेषु विचारोस्य न कार्यो नापि वैष्णवे । नित्ये नैमि त्तिके कार्यो न चाब्देमुनिभिः स्मृतः"॥ इति ॥ संस्कारेषु गर्भाधानादिषोडशसंस्कारेषु । वैष्णवे विष्णुप्रतिष्ठादिषु । नित्ये नित्यहोमे । नैमित्तिके मूलशांत्यादौ आब्दिके युगादिनिमित्तहोमे । इत्यर्थः । जपाद्यंगहोमेपि न दिनं शोध्यं तस्य स्वतंत्रकालत्वाभावात् ॥ इति । दैवाद्धोमकरणे शान्तिः (विष्णुधर्मोत्तरे) "क्रूरग्रहमुखे चैव संजाते हवने शुभे । शांतिं विधाय गां दद्याद्ब्राह्मणाय कुटुंबिने॥आयसीं प्रतिमां कृत्वा निक्षिपेत्तामधोमुखीम् । गोमूत्रमधुगंधाद्यैरर्चितां प्रतिमां ततः ॥ श्वभ्रे निधाय संपूज्य तत्र होमो विधीयते ॥" इति ॥ होमारंभे प्रथमतो गणपतये ह्याहुतिर्देया ॥ तथा च (भविष्योत्तरे) " गणाधिपतये देया प्रथमा तु वराहुतिः ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अन्यथा विफलं विप्र भवतीह न संशयः ॥ आघारावाज्यभागौ तु आज्येनैव यथाक्रमम् । एकैकस्याहुतिं हुत्वा अन्यहोमं ततः परम् ॥ केवलं ग्रहयज्ञं च सर्वशांत्यादिकेषु च । प्रणवादिश्च तल्लिंगः स्वाहाकारान्त एव च ॥ जुहुयात्सर्वदेवानां वेद्यां ये चोपकल्पिताः ॥" (संस्कारभास्करे शौनकः) "अंते पूर्णाहुतिं हुत्वा समुद्रादूर्मिसूक्ततः । सततमाज्यधारां तां पूर्णाहुतिमथाचरेत् "॥ (मात्स्येऽग्निपुराणे च) "मूर्द्धानं दिवमंत्रेणावशेषघृतधारया । दद्यादुत्थाय पूर्णां वै नोपविश्य कदाचन" ॥ (ग्रहकल्पवल्ल्याम् । "शुक्रज्योत्यनुवाकेन घृतेनाच्छिन्नधारया । होमांते सर्वकल्याणी देया पूर्णाहुतिः सदा " ॥ इति ॥ पूर्णाहुतावाज्यविचारः (कारिकायाम्) "अन्यदाज्यं समानीयाधिश्रिते स्रुक्स्रुवावुभौ । तौ प्रतप्य च संमार्गकुशैः संमृज्य सिंचयेत् ॥ पुनः प्रताप्य याम्यायां निदध्यात्स्रुक्स्रुवौ च तौ । आज्यमुद्धास्य चोत्पूयोवक्ष्यापद्रव्यनिष्कृतिः ॥ चतुर्गृहीतमाज्यं तद्गृहीत्वा स्रुचि मध्यतः ॥ वस्त्रतांबूलपूगादिफलपूष्पसमन्विताम् । अधोमुखस्रुवच्छिन्नां गंधाक्षतसमन्विताम् ॥ पूर्वं दक्षिणहस्तेन पश्चाद्वामेन पाणिना ॥ अग्रमध्यममध्यस्थं मूलमध्यममध्यतः पाणिद्वयेन होतव्यं पाणिरेको निरर्थकः ॥ गृहीत्वाथ स्रुवं कर्ता शंखसन्निभमुद्रया । वामस्तनांतमानीय नाभिमूलात्स्रुचं ततः ॥ सततेत्यनुवाकांते मखे सूक्तान्विशेषतः । श्रावयेत्सूक्तमाग्नेयं वैष्णवं रौद्रमैंदवम् ॥ महावैश्वानरं चापि चमकानि ततः पठेत् । केचित्कर्मसु पूर्णाहुतिहोमो न कर्त्तव्यः तदुक्तम् (प्रयोगरत्ने) "विवाहादिक्रियायां च शालायां वास्तुपूजने । नित्यहोमे वृषोत्सर्गे न पूर्णाहुतिमाचरेत् ॥ होमांते बलिदानम् (हेमाद्रौ) " होमावसाने कृततूर्यनादो गुरुर्गृहीत्वा बलिपुष्पधूपम् ॥ आवाहयेल्लोकपतीन् क्रमेण मंत्रैरमीभिर्यजमानयुक्तः" ॥ (प्राचीनहोमपद्धतौ) "पूर्णाहुतिमथो हुत्वा

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

बर्हिर्होमादिकं चरेत्" इति ॥ "बर्हिर्हुत्वा प्राश्नाति" इति सूत्रम् । सर्वहोमं हुत्वा शेषप्राशनमिति कात्यायनोक्तेः । सर्वेषामां हुतीनां होमद्रव्यं स्रुवेऽवशेषितं संस्रवत्वेन प्रसिद्धं पात्रान्तरे प्रक्षिप्यते तत्प्राश्यमिति हरिहरः ॥ (शांतिरत्ने) "ऐशान्यामाहरेद्भस्म स्रुचा वाथ स्रुवेण वा । अंकनं कारयेत्तेन शिरःकंठांसकेषु च ॥" इति ॥ (नारदः) "श्रेयः संपाद्य दानं च अभिषेको विसर्जनम् । विप्राशिषः प्रगृह्णीयात्तान्मिष्टान्नेन भोजयेत् ॥" ब्राह्मणभोजनसंख्या (मंत्रमहोदधौ) "शांतौ वश्ये भोजयेत होमाद्दिप्रान् दशांशतः । उत्तमं तद्भवेत्कर्म तत्त्वांशेन तु मध्यमम् ॥ होमाच्छतांशतो विप्रभोजनं त्वधमं तु तत् । शांतेर्द्विगुणितं विप्र भोजनं स्तंभने मतम् ॥ त्रिगुणं द्वेषणोच्चाटे मारणे होमसंमितम्" । दक्षिणाविचारः (ब्रह्मवैवर्त्ते) "यज्ञो दक्षिणया सार्द्धं पुत्रेण च फलेन च । कर्मिणां फलदाता चेत्येवं वेदविदो विदुः" ॥ कृत्वा कर्म च तस्यैव तूर्णं दद्याच्च दक्षिणाम् । तत्कर्मफलमाप्नोति वेदैरुक्तमिदं मुने ॥ मुहूर्त्ते समतीते तु भवेच्छतगुणा च सा । त्रिरात्रे तद्दशगुणा सप्ताहे द्विगुणा ततः ॥ मासे लक्षगुणा प्रोक्ता ब्राह्मणाना च वर्द्धते । संवत्सरव्यतीते तु सा त्रिकोटिगुणा भवेत् ॥ कर्म्म तद्यजमानानां सर्वं च निष्फलं भवेत् । स ब्रह्मस्वापहारीच न कर्माहोऽशुचिर्नरः ॥" इति श्रीबीकानेरराज्यान्तर्गतश्रीरत्नगढनगरनिवासिना गौडवंशोद्भवश्रीवासिष्ठगोत्रश्रीरामकृष्णपौत्रेण श्रीकस्तूरीचंद्रसूनुना श्रीमहादेवभक्तशुक्लयजुर्वेदीयमाध्यंदिनबाजसनेयीशाखानुयायिना वैद्यपंडितश्रीचतुर्थीलालशर्मणा विरचिते अनुष्ठानप्रकाशे महानिबंधे विचारकांडे स्मार्तहवनविचारप्रकरणं समाप्तम् ॥ ॥ अथ तंत्रोक्तमंत्रानुष्ठानविचारः । पुरश्चरण चंद्रिकायाम्–"पुण्यक्षेत्रादिकं गत्वा कुर्य्याद्भूमिपरिग्रहम् । तथा ह्यमुकमंत्रस्य पुरश्चरणसिद्धये ॥ ममेयं गृह्यते भूमिर्मंत्रो मे

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सिध्यतामिति । भूमेः परिग्रहं कृत्वा परिमाणं च सर्वतः ॥ ग्रामक्रोशमितं स्थानं नद्यादौ स्वेच्छया मितम् । नगरा
दावर्धक्रोशं क्रोशयुग्ममथापि वा ॥ आहारादिविहारार्थं तावतीं भूमिमाक्रमेत् । क्षीरवृक्षोद्भवान्कीलान् स्वस्वमंत्राभिमं
त्रितान् । निखनेदशदिग्भागे तेष्वस्त्रं च प्रपूजयेत् ॥ क्षेत्रे चाकीलिते मंत्री निर्विघ्नैः परिभूयते । क्षेत्रपालादिकं तत्र पूजये
द्विधिवत्ततः ॥ दिक्पतिभ्यो बलिं दत्त्वा ततः क्षेत्रं समाश्रयेत् । क्षेत्रमध्यं समाश्रित्य कूर्मचक्रं विचिंतयेत् ॥ (मंत्रम
होदधौ) "चिकीर्षुर्दैवतोपास्तिमादौ भावि विचारयेत् । स्नानदानादिकं कृत्वा स्मृत्वा हरिपदांबुजम् ॥ शयीत कुशशय्यायां
प्रार्थयेद्वृषभध्वजम् । भगवन्देवदेवेश शूलभृद्वृषवाहन ॥ इष्टानिष्टे समाचक्ष्व मम सुप्तस्य शाश्वतः । इत्यादिभिः शिवं प्रार्थ्य
निद्रां कुर्य्यान्निराकुलः ॥ स्वप्नं दृष्टं निशि प्रातर्गुरवे विनिवेदयेत् । तमंतरेणमंत्रस्य स्वयं स्वप्नं विचारयेत् ॥" अनंतरकृत्यम् (देवी
भागवते) "आदौ कुर्य्याद्व्रतं मंत्री देहशोधनकारकम् । पुरश्चर्यां ततः कुर्य्यात्समस्तफलभाग्भवेत् ॥ पुरश्चरणमादौ च कर्मणां
सिद्धिकारकम् । स्वाध्यायाभ्यसनस्यादौ प्राजापत्यं चरेद्द्विजः ॥ केशश्मश्रुलोमनखान् वापयित्वा प्लुतः शुचिः । तिष्ठेदहनि
रात्रौ तु शुचिरासीत वाग्यतः ॥ यस्य कस्यापि मंत्रस्य पुरश्चरणमारभेत् । व्याहृतित्रयसंयुक्तां गायत्रीं चायुतं जपेत् ॥ नृसिंहा
र्कवराहाणां तांत्रिकं वैदिकं तथा । विना जप्त्वा तु गायत्रीं तत्सर्वं निष्फलं भवेत् ॥ " ऋग्विधाने (शौनकः) निष्कृतिर्नहि
वेदानां मंत्राणां कलिदोषतः । कलिदोषनिवृत्त्यर्थं गायत्रीमाश्रयेद्द्विजः ॥ गायत्रीमंत्रसिद्ध्यर्थं गायत्रीं ह्ययुतं जपेत् । सर्वेषां वेदमं
त्राणां सिद्ध्यर्थं लक्षकं जपेत् " ॥ (शारदातिलके मंत्रमहोदधौ च) "प्रातरुत्थाय शिरसि ध्यात्वा गुरुपदांबुजम् । आवश्यकं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

विनिर्वर्त्य स्नातुं यायात्सरित्तटे ॥ देशिको विधिवत्स्नात्वा कृत्वा पौर्वाह्णिकीः क्रियाः । यायादलंकृतो मौनी यागार्थं यागमण्डम्॥ गृहद्वारमथागत्य द्वारपूजां समाचरेत् ॥ द्वारमस्त्रांबुना प्रोक्ष्य गणेशं चोर्ध्वतो यजेत् । महालक्ष्मीं दक्षभागे वामभागे सरस्वतीम्॥ पुनर्दक्षे यजेद्विघ्नं गंगां च यमुनामपि । पुनर्वामे क्षेत्रपालं स्वःसिंधुयमुने अपि ॥ पुनर्दक्षे तु धातारं विधातारं तु वामतः । तद्वन्निधी शंखपद्मौ ततोर्च्चेद्द्वारपालकान् ॥ द्वारपूजां विधायेत्थं प्रविश्यार्चनमंदिरम् । विशेन्मृद्वासने मंत्री प्राङ्मुखो वाप्युदङ्मुखः ॥ बद्धपद्मासनो मौनी समाहितजितेंद्रियः । स्थापयेद्दक्षिणे भागे पूजाद्रव्याणि देशिकः ॥ सुवासितांबुसंपूर्णं सव्ये कुंभं सुशोभनम् । प्रक्षालनाय करयोः पश्चात्पात्रं निवेशयेत्॥ घृतप्रज्वालितान्दीपान्स्थापयेत्परितः शुभान् । दर्पणं चामरं छत्रं तालवृन्तं मनोहरम्॥ मंगलांकुरपत्राणि स्थापयेद्दिक्षु देशिकः । कृतांजलिपुटो भूत्वा वामदक्षिणपार्श्वयोः ॥ नत्वा गुरुं गणेशानं भूतशुद्धिं समाचरेत् । भूतशुद्धिविधायैव प्राणस्थापनमाचरेत् ।(रामतापन्याम्)" देवो भूत्वा यजेद्देवं नादेवो देवमर्चयेत् । देवार्चायोग्यताप्राप्त्यै भूतशुद्धिं समाचरेत् ॥ भूतशुद्धिं विधायैव प्राणस्थापनमाचरेत् । भूतशुद्धिविहीनेन कृता पूजाद्धिचारवत् ॥ विपरीतफलं दद्यादभक्त्या पूजनं यथा ॥" (मंत्रमहोदधौ) " भूतशुद्धिं तथा प्राणप्रतिष्ठां मातृकास्थितिम् । पंचधोक्तां प्रकुर्वीत ततोन्यां मातृकां चरेत् ॥ श्रीकंठाद्याञ्शंभुभक्तो वैष्णवः केशवादिकान् । गणेशाद्यांस्तु तत्सेवी शक्तिभाङ् मातृकाः कलाः ॥ उक्ता कला मातृकैवं तत्तद्भक्तः समाचरेत् । ततः स्वमूलमंत्रस्य न्यासान्कल्पोदितांश्चरेत् ॥ ऋषिच्छंदोदैवतानि मूर्ध्नि वक्त्रे हृदि न्यसेत् । बीजं गुह्ये पदोः शक्तिमंगानि करयोरपि ॥ अंगुष्ठादिष्वंगुलीषु करस्य तत्त्वपृष्ठयोः । अंगुष्ठाभ्यां तर्जनीभ्यां नम इत्यादिकं वदेत् ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

हृदयादिष्वथांगानि जातियुक्तानि विन्यसेत् ॥ स्वस्वमुद्राभिरधुना प्रोच्यंते जातयश्च ताः । हृदयाय नमश्चेति शिरसे स्वाहा युतम् ॥ शिखायै वषडंगं च कवचाय हुमित्यपि । नेत्रत्रयाय वौषट् स्यादस्त्राय फडितीरितम् ॥ जातिषट्कं द्विनेत्रे तु नेत्राभ्यां वौषडुच्चरेत् । पंचांगे नेत्रसंत्यागो मुद्रांगानामथोच्यते ॥ मुद्रालक्षणमपि तत्रैव । प्रसारितमनंगुष्ठं तर्जन्यादिचतुष्टयम् । हृदि मूर्ध्नि हि चांगुष्ठहीनो मुष्टिः शिखातले । स्कंधमारभ्य नाभ्यंता दशांगुल्यस्तु वर्मणि । तर्जन्यादित्रयं नेत्रत्रये नेत्रद्वये द्वयम् ॥ प्रसारिताभ्यां हस्ताभ्यां कृत्वा तालत्रयं सुधीः । तर्जन्यंगुष्ठयोरग्रे स्फालयन् बंधयोद्दिशः ॥ एषास्त्रमुद्रा श्रीविष्णोरंगमुद्रा उदीरता । हृद्यंगुलित्रयं न्यसेत्तर्जन्यादिद्वयं तु के ॥ शिखाप्रदेशेऽथांगुष्ठं दशांगुल्यस्तु वर्मणि । हृद्वन्नेत्रं पूर्वमस्त्रं शक्तेरंगस्य मुद्रिकाः ॥ मुष्टी विनिर्गतांगुष्ठौ संयुक्तौ हृदि विन्यसेत् । निस्तर्जनी तादृशौ तु शिरस्यथ शिखातले ॥ निरंगुष्ठकनिष्ठौ तौ निरंगुष्ठप्रदेशिनी । मुष्टी पृथक्कृतौ स्कंधाद्धृदंतं वर्मणि स्मृतौ ॥ तर्जन्यादित्रयं नेत्रे तलास्फोटोस्त्र ईरितः । शैवी षडंगमुद्रोक्ता वर्णन्यासमथो चरेत् । जप्ता अप्यफला मंत्रा विन्नदा न्यासमंतरा । पीठस्य देवतान्यासादेहे पीठं प्रकल्पयेत् । ततो देहमये पीठे ध्यायेत्स्वाभीष्टदेवताम् । तत्तन्मुद्रां प्रदर्श्याथ कुर्यान्मानसपूजनम् ॥ मनसा पूजयित्वैव क्षणं तद्गतमानसः । स्थित्वा मूलमनुं विद्वान् जपेदष्टोत्तरं शतम् ॥ जपं निवेद्य देवाय स्थापयेदर्घ्यमुत्तमम् । अंतर्यागं विधायेत्थं बाह्यपूजनमाचरेत् ॥ अंतर्यागबहिर्यागौ गृहस्थः सर्वदाचरेत् । आद्यमेव ब्रह्मचारी वानप्रस्थो यतिस्तथा । बहिर्यागविचारोपि

१ इडभाव आर्षः ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तत्रैव "वर्द्धिन्यां प्रक्षिपेत्किंचिदघौदकमनन्यधीः । प्राणानायम्य मूलेन वामे गुरुत्रयं नमेत् ॥ दक्षिणे च गणेशानं पीठपूजामथाचरेत् ॥ स्वर्णादिनिर्मिते यंत्रे यद्वा चंदननिर्मिते । मंडूकात्परतत्त्वांतं दिङ्मध्ये पीठशक्तयः ॥ शालग्रामे मणौ यंत्रे नित्यपूजां समाचरेत् । हेमादिप्रतिमायां वा स्थापितायां यथाविधि ॥ लिंगं वा लक्षणोपेतं तत्रावाहनमाचरेत् । शालग्रामे स्थिरायां वा नावाहन विसर्जने ॥ एवं संपूज्य देवेशं जपारंभणमाचरेत् ॥" इति तंत्रोक्तभूतशुद्ध्यादिविचारः ॥ अथ गृहादिषु जपकरणे कूर्म्मचक्रे दीपस्थान विचारः (शारदातिलके) "दीपस्थानं समाश्रित्य कृतं कर्म्म फलप्रदम् । चतुरस्रां भुवं भित्त्वा कोष्ठानां नवकं लिखेत् ॥ पूर्वकोष्ठादि विलिखेत्सप्तवर्गाननुक्रमात् । लक्षावीशे मध्यकोष्ठे स्वरान्युग्मक्रमाल्लिखेत् ॥ दिक्षु पूर्वादितो यंत्र ग्रामस्याद्याक्षरं भवेत् । मुखं तत्तस्य जानीयाद्धस्तावुभयतः स्थितौ ॥ कोष्ठे कुक्षी उभे पादौ द्विशिष्टं पुच्छमीरितम् । क्रमेणाऽनेन विभजेन्मध्यस्थमपि भागतः ॥ मुखस्थो लभते सिद्धिं करस्थः स्वल्पभोगभाक् । कुक्षिस्थित उदासीनः पादस्थो दुःखमाप्नुयात् ॥ पुच्छस्थः पीड्यते मंत्री बंधनोच्चाटनादिभिः । कूर्म्मचक्रमिदं प्रोक्तं मंत्राणां सिद्धिसाधनम् ॥" (बालार्चनकौमुद्याम्) " दीपस्थानं मया प्रोक्तं त्रिषु लोकेषु दुर्लभम् । दीपस्थानं पुरा पश्येद्ग्रामे वा विषयेपि वा ॥ यत्र कुत्रापि वा पश्येत्कार्यसिद्धिर्भवेत्प्रिये । क्षेत्राधिपस्य नाम्ना हि दीपस्थानं विचार

कूर्मचक्रमिदम् ।

ई. ल. क्ष.	पू. क ख ग घ ङ			अ. च छ ज झ ञ
उ. श ष स ह	अं अः	अ आ	इ ई	द. ट ठ ड ढ ण
	ओ औ		उ ऊ	
	ए ऐ	ल ऌ	ऋ ॠ	
य र ल व वा.	प फ ब भ म प.			त थ द ध न नै.

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

येत् ॥ दीपस्थाने जपं कुर्य्याद्धोमादस्य फलं लभेत् ॥" (तंत्रराजेपि) " कूर्म्मस्थितिं सुविज्ञाय यो जपेदवधिस्थितः । स प्राप्नोति फलान्युक्तान्यन्यथा नाशमेति च ॥ तस्मात्कूर्म्मविभागं तु विज्ञायाखिलमाचरेत् । स चतुर्धा स्थितो लोके तत्प्रकारं शृणु प्रिये ॥ प्रथमस्तु पुरः कूर्म्मस्ततो देशगतस्तथा । ग्रामगो गृहगश्चेति चतुर्धा तद्व्यवस्थितिः ॥ देशं ग्रामं गृहं वापि नवधा विभजेत्ततः । क्षेत्रसाधकमंत्राणामेकमेवाद्यमक्षरम् ॥ यदि स्यात्स ध्रुवो मंत्रः क्षिप्रमेव सुसिध्यति ॥" कूर्मपरिहारः (देवीपुराणे) "कुरुक्षेत्रे प्रयागे च गंगासागरसंगमे । महाकाले च काश्यां च कूर्म्मस्थानं न चिंतयेत् ॥" (विश्वामित्रकल्पेपि) "काशीपुरी च केदारो महाकालोथ नासिकम् । त्र्यंबकं च महाक्षेत्रं पंचदीपा इमे भुवि ॥ एतेषु सर्व्वतो दीपाः कूर्मासनमितस्ततः॥" (गौतमीये) "पर्वते सिंधुतीरे वा पुण्यारण्ये नदीतटे । यदि कुर्यात्पुरश्चर्य्यां तत्र कूर्म्मं न चिंतयेत् ॥ ग्रामे वा यदि वा वास्तौ गृहे तं च विचिंतयेत् ॥ " इति ॥ एतत्कूर्म्मचक्रं तंत्रोक्तमंत्रेषु द्रष्टव्यं न वैदिकेष्विति शांतिकमलाकरे ॥ इति कूर्म्मचक्र विचारः ॥ अथ मंत्राणां दशसंस्काराः (शारदातिलके) "मंत्राणां दश कथ्यंते संस्काराः सिद्धिदायिनः । जननं जीवनं पश्चात्ताडनं बोधनं तथा ॥ अथाभिषेको विमलीकरणाप्यायने पुनः । तर्पणं दीपनं गुप्तिर्दशैता मंत्रसंस्क्रियाः ॥ तेषां स्वरूपम् (तत्रैव) मंत्राणां मातृकायंत्रादुद्धारो जननं स्मृतम् । प्रणवान्तरितान्कृत्वा मंत्रवर्णाञ्जपेत्सुधीः ॥ एतज्जीवनमित्याहुर्मंत्रतंत्रविशारदाः । मंत्रवर्णान्समालिख्य ताडयेच्चंदनांभसा ॥ प्रत्येकं वायुना मंत्री ताडनं तदुदाहृतम् । विलिख्य मंत्रं तं मंत्री प्रसूनैः करवीरजैः ॥ तन्मंत्राक्षरसंख्यातैर्हन्याद्घातेन बोधनम् । स्वतंत्रोक्तविधानेन मंत्री मंत्राणसंख्यया ॥ अश्वत्थपल्लवैर्मंत्रमभिषिंचेद्विशुद्धये ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

संचिंत्य मनसा मंत्रं ज्योतिर्मंत्रेण निर्दहेत् ॥ मंत्रे मलत्रयं मंत्री विमलीकरणं त्विदम् । तारं व्योमाग्निमनुयुग्दंडो ज्योतिर्मनुर्मतः ॥ कुशोदकेन जप्तेन प्रत्यर्णं प्रोक्षणं मनोः । तेन मंत्रेण विधिवदेतदाप्यायनं मतम् ॥ मंत्रेण वारिणा मंत्रतर्पणं तर्पणं स्मृतम् । तार मायारमायोगे मनोर्दीपनमुच्यते ॥ जप्यमानस्य मंत्रस्य गोपनं त्वप्रकाशनम् । संस्कारा दश संप्रोक्ताः सर्वतंत्रेषु गोपिताः ॥ यान्कृत्वा संप्रदायेन मंत्री वाञ्छितमश्नुते ॥" इति मंत्राणां दश संस्काराः॥अथोत्कीलनम् (मंत्रमहोदधौ)"शिवेन कीलिता विद्या तदुत्कीलनमुच्यते । मायां तारपुटां मंत्री जपेदष्टोत्तरं शतम्॥मंत्रस्यादौ तथा वान्ते भवेत्सिद्धिप्रदा तु सा।एष नूनं विधिर्गोप्यः सिद्धिकामेन मंत्रिणा॥"अथ कलौ सिद्धिप्रदा मंत्राः(मंत्रमहोदधौ) "सिद्धिप्रदाः कलियुगे ये मंत्रास्तान्वदाम्यतः । त्र्यर्ण एकाक्षरोनुष्टुप्त्रिविधो नरकेसरी॥एकाक्षरोर्जुनोबुष्टुप् द्विविधस्तुरगाननः।चिंतामणिः क्षेत्रपालः भैरवो यक्षनायकः॥गोपालो गजवक्त्रश्च चेटका यक्षिणी तथा। मातंगी सुंदरी श्यामा तारा कर्णपिशाचिनी॥शबर्य्येकजटा वामा काली नीलसरस्वती । त्रिपुरा कालरात्रिश्च कलाविष्टप्रदा इमे॥" इति ॥ अथ शापरहिता मंत्राः "भीष्मपर्वणि या गीता सा प्रशस्ता कलौ युगे । विष्णोः सहस्रनामाख्यं स्तोत्रं पापप्रणाशनम् ॥ गजेंद्रमोक्षणं चैव तथा कारुण्यकः स्तवः । नारसिंहं तथा स्तोत्रं स्तोत्रं श्रीरामसंज्ञकम् ॥ देव्याः सप्तशतीस्तोत्रं तथा नामसहस्रकम् । श्लोकाष्टकं नीलकंठं शैवं नामसहस्रकम् ॥ त्रिपुरायाः प्रसादाख्यं सूर्य्यस्य स्तवराजकम् । पैत्रो रुचिस्तवो यश्च इंद्राक्षी स्तोत्रमेव च ॥ वैष्णवं च महालक्ष्म्याः स्तोत्रमिंद्रेण भाषितम् । भार्गवाख्येन रामेण शतान्यन्यानि कारणात् ॥" कलौ तंत्रोक्त मंत्रेणैव सिद्धिः । तथा च (तंत्रसारे) "आगमोक्तविधानेन कलौ मंत्रं जपेत्सुधीः । न हि देवाः प्रसीदंति कलौ चान्यविधानतः॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कृते श्रुत्युक्तमार्गः स्यात्त्रेतायां स्मृतिसंभवः । द्वापरे तु पुराणोक्तः कलावागमसंभवः ॥" अथावाहनादिमुद्रालक्षणानि (शारदातिलके) "आवाहनादिका मुद्राः प्रवक्ष्यामि यथाक्रमम् । याभिर्विरचिताभिस्तु मोदन्ते सर्वदेवताः ॥ सम्यक्संपूरितः पुष्पैः कराभ्यां कल्पितोंजलिः । आवाहनी समाख्याता मुद्रा देशिकसत्तमैः ॥ अधोमुखी कृता सैव प्रोक्ता स्थापनकर्म्मणि । आश्लिष्टमुष्टियुगला प्रोन्नतांगुष्ठयुग्मका ॥ सन्निधाने समुद्दिष्टा मुद्रेयं तंत्रवेदिभिः । अङ्गुष्ठगर्भिणी सैव सन्निरोधे समीरिता ॥ उत्तानौ द्वौ कृतौमुष्टी संमुखीकरणी स्मृता । देवतांगे षडंगानां न्यासः स्यात्सकलीकृतिः ॥ सव्यहस्तकृता मुष्टिर्दीर्घाधोमुखतर्जनी । अवगुण्ठन मुद्रेयमभितो भ्रामिता सती ॥ अन्योन्याभिमुखाश्लिष्टकनिष्ठानामिका पुनः । तथा च तर्जनीमध्या धेनुमुद्रा समीरिता ॥ अमृतीकरणं कुर्यात्तया देशिकसत्तमः । अन्योन्यग्रथितांगुष्ठा प्रसारितकरांगुली ॥ महामुद्रेयमुदिता परमीकरणे बुधैः ॥" (तंत्रसारे) "योजनात्सर्वदेवानां द्रावणात्पापसंहतेः । तस्मान्मुद्रेति सा ख्याता सर्वकामार्थसाधिनी ॥ कुंभमुद्रा—दक्षांगुष्ठं पराङ्गुष्ठे क्षिप्त्वा हस्तद्वयेन च । सावकाशामेकमुष्टिं कुर्यात्सा कुंभमुद्रिका ॥ कूर्ममुद्रा—वामहस्ते च तर्जन्यां दक्षिणस्य कनिष्ठिका । तथा दक्षिणतर्जन्यां वामांगुष्ठं नियोजयेत् ॥ उन्नतं दक्षिणांगुष्ठं वामस्य मध्यमादिकाः । अंगुलीर्योजयेत्पृष्ठे दक्षिणस्य करस्य च ॥ वामस्य पितृतीर्थेन मध्यमानामिके तथा । अधोमुखे च ते कुर्याद्दक्षिणस्य करस्य च ॥ कूर्मपृष्ठसमं कुर्याद्दक्षपार्णिं च सर्वतः । कूर्ममुद्रेयमाख्याता देवताध्यानकर्मणि ॥ अस्त्रमुद्रा—दक्षस्य तर्जनीमध्ये सव्ये करतले क्षिपेत् । अभिघातेन शब्दः स्यादस्त्रमुद्रा समीरिता ॥ मत्स्यमुद्रा—दक्षपाणेः पृष्ठदेशे वामपाणितलं न्यसेत् । अंगुष्ठौ चालयेत्सम्यङ् मुद्रेयं मत्स्यरूपिणी ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

धेनुमुद्रा–दक्षानामासमायुक्ता वामहस्तकनिष्ठिका । वामानामासमायुक्ता दक्षपाणिकनिष्ठिका ॥ दक्षस्य मध्यमाक्रांता वामहस्तस्य तर्जनी । वाममध्यमयाक्रांता दक्षहस्तस्य तर्जनी ॥ संयुतौ कारयेद्विद्वानंगुष्ठावुभयोरपि । धेनुमुद्रा निगदिता गोपिता साधकोत्तमैः ॥ परिवृत्तकरौ पश्चात्तर्जनीमध्यमे युते । कनिष्ठानामिकांगुष्ठं परस्परयुतं कुरु ॥ धेनुमुद्रेयमाख्याता अमृतीकरणं भवेत् ॥ शंखमुद्रा–वामांगुष्ठं तु संगृह्य दक्षिणेन तु मुष्टिना । कृत्वोत्तानं ततो मुष्टिमंगुष्ठं तु प्रसारयेत् ॥ वामांगुल्यस्तथाश्लिष्टाः संयुताः सुप्रसारिताः । दक्षिणांगुष्ठसंस्पृष्टा ज्ञेयैषा शंखमुद्रिका ॥ गरुडमुद्रा–मिथस्तर्जनिके श्लिष्टे श्लिष्टावङ्गुष्ठकौ तथा । मध्यमानामिके तु द्वौ पक्षाविव विचालयेत्॥ एषा गरुडमुद्रा स्याद्विष्णोः संतोषवर्द्धिनी ॥ योनिमुद्रा–मध्यमे कुटिले कृत्वा तर्जन्युपरि संस्थिते । अनामिके मध्यगते तथैव हि कनिष्ठिके ॥ सर्वा एकत्र संयोज्या अंगुष्ठपरिपीडिताः । एषा तु प्रथमा मुद्रा योनिमुद्रेति संज्ञिता ॥ प्रार्थनामुद्रा–प्रसृताङ्गुलिकौ हस्तौ मिथः श्लिष्टौ च संमुखौ । कुर्यात्स्वे हृदये सेयं मुद्रा प्रार्थनसंज्ञिका ॥ पंकजमुद्रा–संमुखीकृत्य हस्तौ द्वौ किंचित्संकुचितांगुली । मुकुली तु समाख्याता पङ्कजा प्रसृतैव सा" ॥ ॥ अथ पद्मासनाद्यासनलक्षणम् (शारदातिलके) "पद्मासनं स्वस्तिकाख्यं वज्रं भद्रासनं तथा । वीरासनमिति प्रोक्तं क्रमादासनपंचकम् ॥ ऊर्वोरुपरि विन्यस्य सम्यक्पादतले उभे । अङ्गुष्ठौ च निबध्नीयाद्धस्ताभ्यां व्युक्रमात्ततः ॥ पद्मासनमिति प्रोक्तं योगिनां हृदयंगमम् ॥ स्वस्तिकासनम्–जानूर्वोरंतरे सम्यक्कृत्वा पादतले उभे । ऋजुकायो विशेद्योगी स्वस्तिकं तत्प्रचक्षते ॥ भद्रासनम्–सीमन्याः पार्श्वयोर्न्यस्येद्गुल्फयुग्मं सुनिश्चलम् । वृषणाधः पार्श्वपादौ पाणिभ्यां परिबंधयेत् ॥ भद्रासनं समुद्दिष्टं योगिभिः पूजितं परम् ॥ वज्रासनम्–ऊर्वोः पादौ

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

क्रमान्व्यस्येज्जान्वोः प्रत्यङ्मुखांगुली । करौ निदध्यादाख्यातं वज्रासनमनुत्तमम् ॥ वीरासनम् एकंपादमधः कृत्वा विन्यस्योरौ तथेतरम् । ऋजुकायो विशेद्योगी वीरासनमितीरितम् ॥" प्राणायामलक्षणम् । तत्रैव–"इडया कर्षयेद्वायुं बाह्यं षोडशमात्रया । धारयेत्पूरितं योगी चतुःषष्ट्या तु मात्रया ॥ सुषुम्नामध्यगं सम्यग्द्वात्रिंशन्मात्रया शनैः । नाड्या पिंगलया चैनं रेचयेद्योगवित्तमः ॥ प्राणायाममिदं प्राहुर्योगशास्त्रविशारदाः । प्राणायामो हि द्विविधः सगर्भोऽगर्भ एव च ॥ जपध्यानादिभिर्युक्तं सगर्भं तं विदुर्बुधाः । तदपेतं विगर्भं च प्राणायामं परे विदुः ॥" (देवीपुराणे) "श्रुतिस्मृत्यादिकर्मादौ सगर्भः प्राणसंयमः । अगर्भो ध्यानमात्रं तु स चामंत्रः प्रकीर्तितः ॥" प्राणायामप्रकारे (योगियाज्ञवल्क्यः) "नासापुटेनानिलमेव बाह्यमाकृष्य तेनैव शनैः समस्तम् । नाडीषु सर्वासु च पूरयेद्यः स पूरको नाम महानिरोधः ॥ न रेचकं नैव तु पूरकं वा नासाग्रभागे स्थितमेव वायुम् । सुनिश्चलं धारयति क्रमेण कुंभाख्यमेतं प्रवदंति तज्ज्ञाः ॥ निःसार्य नासाविवरादशेषं प्राणं बहिः शून्य इवानिलेन । निरुच्छ्वसंस्तिष्ठति चोर्ध्ववायुः स रेचको नाम महानिरोधः ॥" (कात्यायनः) "दक्षिणे रेचयेद्वायुं वामेनापूरितोदरम् । कुंभकेन जपं कुर्य्यात्प्राणायामभवेदिति" ॥ (प्रयोगपारिजाते) "पंचाङ्गुलीभिर्नासाग्रं पीडयेत्प्रणवेनवै । मुद्रेयं सर्वपापघ्नी वानप्रस्थगृहस्थयोः ॥ कनिष्ठानामिकाङ्गुष्ठैर्यतेश्च ब्रह्मचारिणः ॥" गायत्रीप्राणायामे विशेषः (योगियाज्ञवल्क्यः) "सव्याहृतिं सप्रणवां गायत्रीं शिरसा सह । त्रिःपठेदायतप्राणः प्राणायामः स उच्यते" ॥ (शौनकः) "नासिकामंगुलीभिस्तु तर्जनीमध्यमाहते । सव्येन तु समाकृष्य दक्षिणेन विसर्जयेत् ॥ प्रणवं व्याहृतीः सप्त गायत्रीं शिरसा सह । त्रिः पठेदायतप्राणः प्राणायामः स उच्यते ॥" (विश्वामित्रकल्पे) "उत्तमं नवधा

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

चैव मध्यमं ऋतुसंख्यया । अधमं त्रयमित्याहुः प्राणायामो विधीयते " ॥ (अगस्त्यसंहितायाम्) " प्राणायामैर्विना यद्य त्कृतं कर्म निरर्थकम् । अतो यत्नेन कर्त्तव्यः प्राणायामः शुभार्थिना " ॥ इति प्राणायामः ॥ ॥ अथ तां त्रिकाग्निस्थापनादिविचारः (शारदातिलके) " अथाग्निजननं वक्ष्ये सर्वतंत्रानुसारतः । आचार्यकुंडे विधिवत्संस्कृते शास्त्र वर्त्मना । अष्टादश स्युः संस्काराः कुंडानां तंत्रचोदिताः ॥ वीक्षणं मूलमंत्रेण शरेण प्रोक्षणं मतम् । तेनैवताडनं दर्भैर्वर्म्म णाभ्युक्षणं स्मृतम्॥ अस्त्रेण खननोद्धारौ हृन्मंत्रेण प्रपूरणम् । समीकरणमस्त्रेण सेचनं वर्मणा मतम्॥कुट्टनं हेतिमंत्रेण वर्ममंत्रेण मार्ज नम् । विलेपनं कलारूपकल्पनं तदनंतरम् ॥ त्रिसूत्रीकरणं पश्चाद्धृदयेनार्चनं मतम् ॥ अस्त्रेण वज्रीकरणं हृन्मंत्रेण कुशैः शुभैः । चतुष्पथं तनुत्रेण तनुयाद्दक्षपाटनम् ॥ यागे कुंडानि संस्कुर्यात्संस्कारैरेभिरीरितैः । अथवा तानि संस्कुर्याच्चतुर्भिर्वीक्षणादिभिः संस्कारचतुष्टयम् (मंत्रमहोदधौ)"प्राणायामं षडंगं च कृत्वा मूलेन मंत्रवित्। कुंडे वा स्थंडिले कुर्यात्संस्काराणां चतुष्टयम्॥"मूलेने क्षणमस्त्रेण प्रोक्षणं ताडनं कुशैः । वर्म्मणा मुष्टिनासिंच्य लिखेद्यंत्रं तदंतरे ॥ वह्निकोणषडस्राष्टदलभूमंदिरात्मकम् । मध्ये तारपुरां मायां लिखित्वा पीठमर्चयेत्॥मंडलात्परतत्वांतं पीठशक्तीर्जयादिकाः । वागीशीवागीश्वरयोर्योगपीठात्मने नमः॥मायादिकः पीठमं त्रस्तयोस्तेनासनं दिशेत् । यजेत्तौ तारमायाभ्यां गंधाद्यैरुपचारकैः॥लक्ष्मीनारायणौ स्वच्चैर्द्वैष्णवे होमकर्माणि॥" (शारदातिलके) "तिस्रस्तिस्रो लिखेल्लेखा हृदा प्रागुदगग्रगाः । प्राग्ग्राणां स्मृता देवा मुकुंदेशपुरंदराः॥रेखाणामुदग्ग्राणां ब्रह्मवैवस्वतेंदवः । अथवा षट्कोणावृत्तं त्रिकोणं तत्र संलिखेत् ॥ वर्मणाभ्युक्ष्य तारेण योगपीठमथार्चयेत् । वागीश्वरीमृतुस्नातां नीलेंदीवरसन्निभाम् ॥ वागी

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

श्वरेण संयुक्तामुपचारैः प्रपूजयेत् ॥" (मंत्रमहोदधौ) "सूर्यकांतादरणितः श्रोत्रियागारतोपि वा । पात्रेण पिहिते पात्रे वह्निमानाययेत्ततः॥अस्त्रेणादाय तत्पात्रं वर्मणोद्धाट्येत्ततम् ।अस्त्रमंत्रेण नैर्ऋत्ये क्रव्यादांशं ततस्त्यजेत्॥मूलेन पुरतो धृत्वा संस्कारांश्च ततश्चरेत् । वीक्षणाद्यान्पुरा प्रोक्तानल्पप्रोक्षणमाचरन्॥परमात्मानलेनाथ जाठरेणापि वह्निना । स्मरन्नैक्यं वह्निबीजाच्चैतन्यं योजयेत्ततः ॥ तारेण चाभिमंत्र्याग्निं सुधया धेनुमुद्रया । अमृतीकृत्य संरक्षेदस्त्रमंत्रेण मंत्रवित् ॥ मुद्रयात्ववगुंठन्या कवचेनावगुंठयेत् । कुंडोपरि ततो वह्निं भ्रामयेत्त्रिर्ध्रुवं पठन् ॥ शय्यागतामृतुस्नातां नीलेन्दीवरधारिणीम् । देवेन भुज्यमानां तां स्मृत्वा तद्योनिमण्डले ॥ ईशरेतोधिया वह्निं स्थापयेदात्मसंमुखम् । मूलं नवार्णं च पठञ्जानुस्पृष्टधरातलः ॥ नवार्णमंत्रः हूं वह्निचैतन्यायनमः । रेफाधीशेंदुसंयुक्तं गगनं वह्निचैततः । तन्यायहृदयांतोयं नवार्णोग्निनिधापने ॥ विश्राण्याचमनं देवीदेवयोर्ज्वालयेद्वसुम् । चतुर्विंशतिवर्णेन मंत्रेण श्रयणादिभिः ॥ चिंतिपगलहनद्वंद्वं दहयुग्मं पचद्वयम्। सर्वज्ञाज्ञापयस्वाहा मंत्रो वेदभुजाक्षरः॥प्रदर्श्य ज्वालिनीं मुद्रामुत्थाय विहितांजलिः । श्लोकरूपेण मंत्रेणोपतिष्ठेद्धुताशनम् ॥ अग्निं प्रज्वलितं वंदे जातवेदं हुताशनम् । सुवर्णवर्णममलं समिद्धं सर्वतोमुखम् ॥ कुशकण्डिकापि तत्रैव । परिषिंचेत्ततस्तोयैः कुंडं स्थंडिलमेव वा । दर्भैः परिस्तरेदग्निंप्रागग्रैरुदगग्रकैः ॥ प्रत्यग्दक्षिणसौम्यासु न्यसेत्त्रीन्परिधीन् क्रमात् । पालाशान्बिल्वजांस्तेषु ब्रह्मविष्णुशिवान्यजेत् ॥ वह्नौ तत्पीठमभ्यर्च्यावाहयेत्स्वहृदोनलम् । गंधादिभिः समभ्यर्च्य पूजयेत्पावकं व्रती ॥ षट्सु कोणेषु मध्ये च जिह्वास्तद्देवता यजेत् ॥ ईशानादिषु वाय्वंतकोणेषु षट् समर्चयेत् । हिरण्याद्यतिरक्तां तां मध्ये तु बहुरूपिणीम् ॥ केसरेष्वंगपूजा स्याद्दलेष्वष्टसु मूर्तयः ॥ मातरोष्टौ दलांतेषु भैरवाः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

स्युस्तदग्रतः ॥ धरापुरे तु शक्राद्या वज्राद्यायुधसंयुताः । एवमावरणैर्युक्तं सप्तभिः पावकं यजेत्॥ वामे कुशानथास्तीर्य तत्र वस्तूनि निक्षिपेत् । प्रणीताप्रोक्षणीपात्रे आज्यस्थालीं स्रुवं स्रुचम्॥अधोमुखानि चैतानि होमद्रव्यं घृतं कुशान् । समिधः पंच पालाशीरन्य दप्युपयोगि यत् ॥ कृत्वा पवित्रे मूलेन प्रोक्षितानि शुभांभसा । उत्तानानि विधायाथ प्रणीतां पूरयेज्जलैः ॥ तीर्थमंत्रेण तीर्थानि सृण्या तत्राह्वयेत्सुधीः ॥ पवित्रे अक्षतांस्तत्र निक्षिप्योत्पवनं चरेत् ॥ अथोदीच्यां निधायैतां प्रोक्षण्यां तज्जलं क्षिपेत् ॥ हवनीयं द्रव्यजातमुक्षेत्तोयैः पवित्रगैः ॥ मूलेन मूलगायत्र्या यद्वा हृदयमंत्रतः । दक्षिणे पीठमासाद्य तत्र ब्रह्माणमाह्वयेत् ॥ हस्ताभ्यां स्रुक् स्रुवौ धृत्वा तापयेत्त्रिरधोमुखौ । वामहस्तेन तौ धृत्वा दर्भैर्दक्षेण मार्जयेत् ॥ संप्रोक्ष्य प्रोक्षणीतोयैः प्रतप्य पूर्ववत्पुनः । न्यस्याग्नौ मार्जनान्दर्भांस्तयोः शक्तित्रयं न्यसेत् ॥ इच्छाज्ञानक्रिया संज्ञा चतुर्थी नमसान्विता । दीर्घत्रयेंडुयुग्व्योमपूर्वकं स्थानकत्रये ॥ हृदा शुचिं न्यसेच्छक्तिं स्रुवे शंभुं ततस्तु तौ । सूत्रत्रयेण संवेष्ट्य संपूज्य कुसुमादिभिः॥ कुशोपरि न्यसेद्दक्षे तयोः संस्कार ईरितः । अस्त्रोक्षितायामाज्यस्य स्थाल्यामाज्यं विनिक्षिपेत् ॥ वीक्षणादिकसंस्कारसंस्कृतं मूलमंत्रतः । गोमुद्रयामृतीकृत्य षट् संस्कारांस्तत श्चरेत्॥कुण्डो धृते वायुकोणे स्थितेंगारे विनिक्षिपेत्। हृदेति तापनं प्रोक्तं दर्भयुग्मं प्रदीपितम्॥आज्ये क्षिपेद् हृदा मंत्री पवित्रीकरणं त्विदम् । आज्यं नीराजयेद्दीप्तदर्भयुग्मेन वर्मणा ॥ अभिद्योतनमुक्तं तद्दीप्तं दर्भत्रयं घृते । दर्शयेदस्त्रेणोद्योतो गृहीत्वा घृतपात्रिकाम् ॥ संयोज्याग्नौ तदंगारात्सलिलं संस्पृशेत्सुधीः । अंगुष्ठानामिकाभ्यां तु दर्भावादाय निक्षिपेत् ॥ त्रिरग्निसंमुखे त्याज्यमस्त्रेणोत्पवनं त्विदम् । हृदात्मसंमुखं तद्वदाज्यक्षेपस्तु संप्लवः ॥ नीराजनादिसंस्कारेष्वग्नौ दर्भान्विनिक्षिपेत् । दर्भद्वयं ग्रंथियुत

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

घृतमध्ये विनिक्षिपेत् ॥ वामदक्षिणयोः पक्षौ स्मृत्वा नाडीत्रयं स्मरेत् । दक्षिणाद्वामतो मध्याद्धृदादाय घृतं सुधीः ॥
अग्नयेग्निप्रियासोमाय स्वाहेत्यग्निनेत्रयोः । जुहुयादग्नीषोमाभ्यां स्वाहेत्यक्ष्णि तृतीयके ॥ पातयेदाहुतेः शेषामाहुतिग्रहणस्थले ।
भूयो हृदा दक्षभागादादायाज्यं मुखे यजेत् ॥ अग्नये स्विष्टकृते तन्नेत्रास्योद्घाटनं मतम् । नरसिंहं विना विष्णुमंत्रे नेत्रद्वयं यजेत् ॥
नरसिंहान्यदेवेषु वह्नेर्नेत्रत्रयं स्मृतम् । महाव्याहृतिभिर्व्यस्तसमस्ताभिश्चतुष्टयम् ॥ आहुतीनां त्रयं वह्निमंत्रेणैव ततश्चरेत् ॥"
घृताहुतिभिरष्टाभिरेकैकां संस्कृतिं चरेत् । ओमस्याग्नेरमुं संस्कारं करोम्यग्निवल्लभा ॥ इत्थं मनुं जपन्गर्भाधानं पुंसवनं ततः ।
सीमंतोन्नयनं जातकर्म कृत्वा ततश्चरेत् ॥ वह्नौ पंचसमिद्धोमान्नालापनयनं वसोः । कुर्यादेवाग्निधानेन पूर्ववन्नामशुष्मणः ॥ नामानंत
रमेतस्य पितरौ स्वेऽर्पयेद्धृदि । अन्नप्राशं तथा चौलोपनयौ दारयोजनम् । संस्काराः स्युर्विवाहांता मृत्यंताः क्रूरकर्मणि ॥
एकैकामाहुतिं कुर्याद्वह्नेर्जिह्वांगमूर्तिभिः । इंद्रादिभिश्च वज्राद्यैर्द्वितीयैर्जुहुयात्ततः ॥ स्रुवेणाज्यं चतुर्वारं निधाय स्रुचि तां
सुधीः । अपिधाय स्रुवेणैतौ गृह्णीयात्करयुग्मतः ॥ तिष्ठन्मूलं तयोर्नाभौ कृत्वाग्ने कुसुमं क्षिपेत् । वामस्तनांतं तन्मूलं कृत्वा
ग्निमनुना सुधीः ॥ जुहुयाद्धौषडंतेन संपत्त्यर्थमतंद्रितः । महागणेशमंत्रेण व्यस्तेन दशधा ततः ॥ जुहुयाच्च समस्तेन चतुर्वारं
घृताहुतीः ॥ पूर्वपूर्वयुतं बीजषट्कं वाणाश्च सायकाः । मुनयो मार्गणाश्चेति विभागस्तन्मनोः स्मृतः ॥ एवं कृत्वाग्निसंस्कारं
पीठं देवस्य पूजयेत् । तत्रेष्टदेवमावाह्य मुद्रा आवाहनादिकाः ॥ प्रदर्श्य वह्निरूपस्य देवस्य वदने पुनः । मूलेन जुहु
यात्पंचनेत्रसंख्या घृताहुतीः ॥ वक्त्रैकीकरणं त्वग्निर्देवयोस्तेन जायते । नाडीसंधानसिद्ध्यर्थं बहिरेव तयोस्ततः ॥ जुहुयान्मूलमं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

त्रेण रुद्रसंख्या घृताहुतीः । इष्टदेवस्यावृत्तीनामेकैकामाहुतिं चरेत् ॥ ततस्तु मूलमंत्रेण दशधा जुहुयाद्धृतम् । ततः कल्पोक्तद्रव्येण दशांशं जुहुयाज्जपात् ॥ होमं समाप्य कुर्वीत पूर्णाहुतिमनन्यधीः । होमावशिष्टेनाज्येन पूरयित्वा स्रुचं सुधीः ॥ पुष्पं फलं निधायाग्रे श्रुवेणाच्छाद्य तां पुनः । उत्थितो वौषडंतेन मूलेन जुहुयाद्वसौ ॥ तद्द्रव्येणावृतीनां च जुहुयादाहुतिं पृथक् । देवं विसृज्य स्वहृदि वह्नेर्जिह्वांगमूर्तिभिः॥जुहुयाद्व्याहृतीर्हुत्वा प्रोक्षेत्तांप्रोक्षणीजलैः । संप्रार्थ्यानेन मनुना नत्वा तं विसृजेद्धृदि ॥ भोभो वह्ने महाशक्ते सर्वकर्मप्रसाधक । कर्मांतरेपि संप्राप्ते सान्निध्यं कुरु सादरम् ॥ वह्नौ पवित्रे निक्षिप्य प्रणीतांबु भुवि क्षिपेत् । विधिं विसृज्य सकुशान्पारिधिं विन्यसेद्वसौ । एवं होमं समाप्याथ तर्पयेद्देवतां जलैः ॥ आवाह्य तद्दशांशेन तर्पणादभिषेचनम् ॥ तर्पयामि नमश्चेति द्वितीयांतेष्टपूर्वकम् । मूलांते तु पदं देयं सिंचामीत्याभिषेचने ॥ ततो नानाविधैरन्नैस्तर्पयेद्द्विजसत्तमान् । इष्टरूपान्समाराध्य तेभ्यो दद्याच्च दक्षिणाम् ॥ न्यूनं संपूर्णतामेति ब्राह्मणाराधनान्नृणाम् । देवताश्च प्रसीदंति संपद्यंते मनोरथाः ॥ इति श्रीवीकानेरविषयान्तर्गतश्रीरत्नगढनिवासिना वसिष्ठगोत्रोद्भवश्रीरामकृष्णामरचन्द्रपौत्रेण श्रीकस्तूरीचंद्रसूनुना श्रीमहादेवभक्तवाजसनेयिशाखानुयायिना गौडपण्डितेन श्रीचतुर्थीलालशर्मणा विरचिते अनुष्ठानप्रकाशे विचारकाण्डे तंत्रोक्तविधानविचारप्रकरणं समाप्तम् ॥ समाप्तश्चायं विचारकाण्डः प्रथमः ॥ १ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.



CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

॥ इत्यनुष्ठानप्रकाशांतर्गतविचारकाण्डः प्रथमः ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अथ सर्वमंत्रानुष्ठानोपयोगिपद्धतिकांडः ॥ तत्रादौ प्रारंभादिनात्पूर्वकृत्यम् । चन्द्रतारादिबलान्विते सुदिने सुमुहूर्ते तीर्थपुण्यक्षेत्रानि र्जनस्थानादौ अनुष्ठानयोग्यभूमेः परिग्रहं कृत्वा तत्र मार्जनदहनखननसंप्लावनादिभिः स्मृत्युक्तैः शोधनोपायैः शुद्धिं संपाद्य पुरश्च रणात् प्राक् तृतीयदिवसे क्षौरादिकं विधाय शुद्धः सन् जपस्थानस्य चतुर्दिक्षु क्रोशं क्रोशद्वयं वा क्षेत्रं चतुरस्रमाहारादिविहारार्थं परिकल्प्य जपस्थानभूमौ कूर्म्मसंशोधनं कुर्यात् । ततो जपस्थानस्य चतुर्दिक्षु अश्वत्थोदुम्बरप्लक्षाणामन्यतमस्य वितास्तिमात्रान् दश कीलान् 'ॐनमः सुदर्शनायास्त्राय फट्' इति मंत्रेणाष्टोत्तरशताभिमंत्रितान् "ॐये चात्र विघ्नकर्तारो भुवि दिव्यंतरिक्षगाः ॥ विघ्न भूताश्च ये चान्ये मम मंत्रस्य सिद्धिषु ॥ १ ॥ मयैतत्कीलितं क्षेत्रं परित्यज्य विदूरतः ॥ अपसर्प्पंतु ते सर्वे निर्विघ्नं सिद्धिरस्तु मे ॥ २ ॥" इति मंत्रद्वयेन निखनेत् ततस्तेषु 'ॐसुदर्शनायास्त्राय फट्' इति मंत्रेण प्रत्येकमस्त्रं संपूज्य तत्रैव पूर्वादिक्रमेण इन्द्रादि लोकपालानावाह्य पंचोपचारैः संपूजयेत् ॥ ततो जपस्थानमध्ये गणेशं कूर्म्मानंतवसुधाक्षेत्रपालवास्तुपुरुषान् द्विजांश्च संपूज्य दिक्पालेभ्यः क्षेत्रपालवास्तुगणपतिभ्यश्च माषभक्तबलीन् दत्त्वा बाह्ये भूतबलिं दद्यात् । तत्र मंत्रः "ॐ ये रौद्रा रौद्रकर्माणो रौद्रस्था नानिवासिनः ॥ मातरोप्युग्ररूपाश्च गणाधिपतयश्च ये ॥ १ ॥ विघ्नभूताश्च ये चान्ये दिग्विदिक्षु समाश्रिताः ॥ ते सर्वे प्रीतमनसः प्रतिगृह्णंत्विमं बलिम् ॥२॥" इति मंत्रद्वयेन दशादिक्षु भूतेभ्यो बलिं दत्वा हस्तौ पादौ प्रक्षाल्याऽऽचामेत् । ततस्तस्मिन्रात्रौ देवतोपा स्तिं चिकीर्षुरादौ शुभाशुभस्वप्नं विचारयेत् । तद्यथा स्नानादिकं कृत्वा हरिपादांबुजं स्मृत्वा कुशासनादिशय्यायां यथासुखं सुप्त्वा वृषध्वजं प्रार्थयेत तत्र मंत्राः । "ॐ भगवन् देवदेवेश शूलभृद्वृषवाहन ॥ इष्टानिष्टे समाचक्ष्व मम सुप्तस्य शाश्वत ॥ १ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ॐ नमोऽजाय त्रिनेत्राय पिंगलाय महात्मने ॥ वामाय विश्वरूपाय स्वप्नाधिपतये नमः ॥ २ ॥ स्वप्ने कथय मे तथ्यं सर्वकार्येष्वशेषतः ॥ क्रियासिद्धिं विधास्यामि त्वत्प्रसादान्महेश्वर ॥३॥ एभिर्मंत्रैः शिवं प्रार्थ्य निद्रां कुर्यात्ततो निशि ॥ दृष्टं स्वप्नं प्रातर्गुरवे निवेदयेत् वा स्वयं विचारयेत् । ततो ब्राह्मे मुहूर्ते उत्थाय प्रातःस्मरणं कृत्वा उषसि दंतधावनपूर्वकं स्नात्वा संध्यादिनित्यक्रियां प्रातः संपाद्य शरीरशुद्धचर्थं प्रायश्चित्तं कुर्यात् । तद्यथा तत्रादौ नदीतडागादिकं गत्वा सुप्रक्षालिततत्तीरे स्नानोपकरणानि स्थापयेत् । ततः पाणिपादं प्रक्षाल्य नाभिमात्रं जलं गत्वा कुशपवित्रहस्तो बद्धशिखी । आचम्य । देशकालौ संकीर्त्य । मम ज्ञाताज्ञातसमस्तपापक्षयार्थं करिष्यमाणामुकदेवमंत्रपुरश्चरणाधिकारार्थं शरीरशुद्धचर्थममुकप्रायश्चित्तांगभूतान्यादौ भस्मादिभिरष्टौ स्नानानि करिष्ये इति संकल्प्य । वामहस्ते दक्षिणहस्तेन यज्ञियभस्म गृहीत्वा । पश्चादुदकमिश्रणानंतरं दक्षिणहस्तेन संमर्द्याभिमंत्रयेत् । तत्र मंत्राः । ॐ अग्निरिति भस्म । ॐ वायुरिति भस्म । ॐ जलमिति भस्म । ॐ स्थलमिति भस्म । ॐ व्योमेति भस्म । ॐ

---

१ अथ स्वप्नानि मंत्रमहोदधौ तत्रादौ शुभानि । लिंगं चंद्रार्कयोर्बिंबं भारतीं जाह्नवीं गुरुम् ॥ रक्ताम्बितरणं युद्धे जयोऽनलसमर्चनम् ॥ १ ॥ शिखिहंसरथांगाढ्ये रथे स्नानं च मोहनम् ॥ आरोहणं सारसस्य धरालाभश्च निम्नगा ॥ २ ॥ प्रासादः स्यंदनः पद्मं छत्रं कन्या द्रुमः फली ॥ नागो दीपो हयः पुष्पं वृषभोश्वश्च पर्वतः ॥ ३ ॥ सुराघटो ग्रहास्तारा नारी सूर्योदयोप्सराः ॥ हर्म्यशैलविमानानामारोहो गगनेगमः ॥४॥ मद्यमांसादनं विष्ठालेपो रुधिरसेचनम् ॥ दध्योदनादनं राज्याभिषेको गोवृषध्वजाः ॥५॥ सिंहः सिंहासनं शंखो वाद्यित्रं रोचना दधि ॥ चंदनं दर्पणश्चैषां स्वप्ने सदर्शनं शुभम् ॥ ६ ॥ अथाशुभस्वप्नानि । तैलाभ्यक्तः कृष्णवर्णो नग्नो ना गर्तवायसौ ॥ शुष्कः कंटकिवृक्षश्च चांडालो दीर्घकंधरः ॥ ७ ॥ प्रासादस्तटहीनश्चैनेते स्वप्नाः शुभावहाः ॥ शांतिं कुर्वीत दुःस्वप्ने जपेन्मंत्रमनन्यधीः ॥ ८ ॥ इति स्वप्नानि ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सर्वं ठ्ँ हवा इदं भस्म । ॐ मन एतानि चक्षूंषि भस्मानीत्यभिमंत्र्य । ॐ ईशानः सर्वविद्यानामीश्वरः सर्वभूतानाम् ॥ ब्रह्माधि
पतिर्ब्रह्मणोधिपतिर्ब्रह्मा शिवो मे अस्तु सदाशिवोम् ॥ १ ॥ ॐ ईशानाय नमः इति शिरसि मर्दयेत् । ॐ तत्पुरुषायविद्महेमहा
देवायधीमहितन्नोरुद्रःप्रचोदयात् ॥ २ ॥ ॐ तत्पुरुषाय नमः ॥ इति मुखे० । ॐ अघोरेभ्योथघोरेभ्योघोरघोरतरेभ्यःसर्वेभ्यः
शर्वसर्वेभ्योनमस्तेऽअस्तुरुद्ररूपेभ्यः ॥ ३ ॥ ॐ अघोराय नमः इति हृदये । ॐ वामदेवाय नमो ज्येष्ठाय नमः श्रेष्ठाय नमो
रुद्राय नमः कालाय नमः कलविकरणाय नमो बलविकरणाय नमः ॥ ४ ॥ ॐ वामदेवाय नमो गुह्ये ॥ ॐ सद्योजातं
प्रपद्यामिसद्योजातायवैनमोनमः ÷ ॥ भवेभवेनातिभवेभवस्वमांभवोद्भवायनमः ÷ ॥ ५ ॥ ॐ सद्योजाताय नमः पादयोः ॥ ॐ
प्रसद्यभस्मनायोनिमपश्चपृथिवीमग्ने ॥ स ठ्ँ सृज्यमातृभिङ्गअयोतिष्मान्पुनरासदः ॥ ६ ॥ इति मंत्रेण प्रणवेन वा सर्वाङ्गे च भस्म
विलिंपेत् । ततः स्नात्वाचम्य गोमयस्नानं कुर्य्यात् । तद्यथा ॥ शुद्धगोमयमादाय । प्रणवेन दिक्षु दक्षिणभागं तीर्थे चोत्तरभागं
प्रक्षिप्यशेषम् ॥ "ॐ अग्रमग्रश्चरंतीनामौषधीनां रसं वने ॥ तासां वृषभपत्नीनां पवित्रं कायशोधनम् ॥ यन्मे रोगांश्च शोकांश्च पापं
मे हर गोमय ॥ १ ॥" ॐ मानस्तोकेतनयेमानुऽआयुषिमानोगोषुमानोऽअश्वेषुरीरिषः ॥ मानोव्वीराइद्रुद्रभामिनोव्वधीर्हविष्म
न्तः सदमित्वाहवामहे ॥२॥ इत्यभिमंत्र्यसूर्यायदर्शयित्वा ॥" ॐ गंधद्वारांदुराधर्षांनित्यपुष्टांकरीषिणीम् ॥ ईश्वरींसर्वभूतानांतामि

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

होपह्वयेश्रियम् ॥१॥" इति मंत्रेण दक्षिणहस्तगृहीतेनगोमयेनशिरसोनाभ्यंतंवामहस्तगृहीतेन मंत्रावृत्त्यानाभितः पादपर्यंतं विलेपन
मिति सर्वाङ्गमालिप्य । स्नात्वा द्विराचामेत्॥अथ मृत्तिकास्नानम्॥शुद्धतीर्थमृत्तिकामादाय "अश्वक्रांते रथक्रान्ते विष्णुक्रांते वसुंधरे॥
मृत्तिके हरमे पापं यन्मया कायसंचितम्॥१॥उद्धतासि वराहेण कृष्णेन शतबाहुना ॥ मृत्तिके हर मे पापं यन्मया दुष्कृतं कृतम्॥२॥
त्वया हतेन पापेन सर्वपापैः प्रमुच्यते ॥ इत्यभिमंत्र्य । ॐ इदम्विष्णुर्विचक्रमेत्रेधानिदधेपदम् ॥ समूढ मस्यपाꣳसुरेस्वाहा ॥ इति
मंत्रेण शिरःप्रभृत्यंगानि विलिंपेत् । ततो द्विराचम्य शुद्धोदकस्नानं कुर्यात् । ॐ आपोहिष्ठामयोभुवस्तानऽऊर्जेदधातन ॥ महेरणं॥
युचक्षसे ॥१॥ यवऽशिवतमोरसस्तस्यभाजयतेहनऽ ॥ उशतीरिवमातरऽ ॥२॥ तस्माअरङ्गमामवोयस्यक्षयायजिन्वथ ॥आपोज
नयथाचनऽ॥३॥इति स्नात्वा आचम्य पंचगव्यस्नानं कुर्यात् । गायत्र्या गोमूत्रम् ॥१॥ गंधद्वारेति गोमयम् । गंधद्वारांदुराधर्षांनित्य
पुष्टांकरीषिणींम् ॥ईश्वरींसर्वभूतानांतामिहोपह्वयेश्रियम् ॥२॥ आप्यायस्वेति पयःस्नानम् । ॐ आप्यायस्वसमेतुतेविश्वतः सोम
वृष्ण्यम् ॥ भवावाजस्यसंगथे ॥ ३ ॥ दधिक्राव्णेति दधिस्नानम् ॥ ॐ दधिक्राव्णोऽअकारिषञ्जिष्णो रश्वस्यवाजिनः ॥ सुर
भिनोमुखाकरत्प्रणऽआयूꣳषितारिषत् ॥ ४ ॥ तेजोसीत्याज्यस्नानम् ॥ ॐतेजोसिशुक्रमस्यमृतमसिधामनामासिप्रियन्देवानामना
धृष्टन्देवयजनमसि ॥ ५ ॥ देवस्यत्वेति कुशोदकस्नानम् । ॐ देवस्य त्वासवितुःप्रसवेश्विनोर्बाहुभ्यांम्पूष्णोहस्ताभ्याम् ॥ ६ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

एवं पंचगव्यस्नानं कृत्वा शुद्धोदकेन स्नात्वा जले अघमर्षणम् । द्रुपदादिवेति च वारत्रयमावर्तयेत् । ततः स्नानाङ्गतर्पणम् । सव्ये न प्राङ्मुखः । ॐ ब्रह्मादयो देवास्तृप्यन्ताम् ॥ १ ॥ ॐ गौतमादय ऋषयस्तृप्यन्ताम् ॥ १ ॥ इति देवतीर्थेन एकैकमंजलिं जले क्षिपेत् । तत उदङ्मुखोयज्ञोपवीतं कंठीकृत्वा ॐ सनकादयो मनुष्यास्तृप्यन्ताम् ॥ २ ॥ इति प्रजापतितीर्थेन अंजलिद्वयं दद्यात् ततोऽपसव्ये न दक्षिणाभिमुखः कृष्णतिलोदकैः ॐ कव्यवाडनलादयो देवपितरस्तृप्यन्ताम् ॥ ३ ॥ ॐ अस्मत्पितृपितामहप्रपितामहास्तृप्यन्ताम् ॥ ३ ॥ ॐ अस्मन्मातृपितामहीप्रपितामह्यस्तृप्यन्ताम् ॥ ३ ॥ ॐ अस्मन्मातामहप्रमातामहवृद्धप्रमातामहास्तृप्यन्ताम् ॥ ३ ॥ ॐ अस्मन्मातामहीप्रमातामहीवृद्धप्रमातामह्यस्तृप्यन्ताम् ॥ ३ ॥ ॐ आब्रह्मस्तम्बपर्यंतं जगत्तृप्यताम् ॥ ३ ॥ एवं तर्पणं कृत्वा ॐयन्मया दूषितं तोयं मलैः शारीरसम्भवैः ॥ तस्य पापस्य शुद्ध्यर्थं यक्ष्मैतत्ते तिलोदकम् ॥ इति यक्ष्मणे जलं दद्यात् । ततस्तीरमागत्य " ॐ अग्निदग्धाश्च ये जीवा येप्यदग्धाः कुले मम ॥ भूमौ दत्तेन तृप्यंतु तृप्ता यांतु परां गतिम् ॥" ॥ ३ ॥ इति जलांजलिं तटे निःक्षिपेत् । एवं स्नानाङ्गतर्पणं कृत्वा सव्येनाचम्य सूर्य्यायार्घ्यं दद्यात् । " ॐ एहि सूर्य्यसहस्रांशो तेजोराशे जगत्पते ॥ अनुकंपय मां देव गृहाणार्घ्यं नमोस्तुते ॥ १ ॥ " ततो जलाद्बहिर्निष्क्रम्य अहतं श्वेतं सदृशं धौतं वस्त्रं परिधाय उपवस्त्रं गृहीत्वा द्विराचम्य गृहं गच्छेत् । इति नद्यादिस्नानप्रयोगः ॥ ॥ अथ गृहस्नानकरणे तत्प्रयोगः ॥ गृहे उद्धृतोदकेन वा उष्णोदकेन स्नानं न तु पर्युषितशीतोदकेन ताम्रादिबृहत्पात्रे जलं गृहीत्वा " ॐ गंगे च यमुने चैव गोदावरि सरस्वति ॥ नर्मदे सिंधुकावेरि जलेस्मिन्सन्निधिं कुरु ॥ १ ॥ ॐ पुष्कराद्यानि तीर्थानि गंगाद्याः सरितस्तथा ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

आगच्छन्तु पवित्राणि स्नानकाले सदा मम ॥ २ ॥" इति तीर्थान्यावाह्य ॐ शन्नोदेवीरभिष्टयऽआपोभवन्तुपीतये ॥ शंयोरभिस्रवन्तुनः ॥ १ ॥ आपः पुनंतु० ॥ २ ॥ द्रुपदादिव० ॥ ३ ॥ ऋतं च सत्यं० ॥ ४ ॥ आपोहिष्ठा० ॥ ५ ॥ इति पंचभिर्ऋग्भिरभिमंत्र्य ॐ इमम्मेवरुणश्रुधीहवं मृडाचं मृडय ॥ त्वामवस्युराचके ॥ १ ॥ इत्यादिवारुणैर्मंत्रैः स्नात्वा वक्ष्यमाणैश्चतुर्भिर्मंत्रैः कुशत्रयेण शिरसि जलं प्रक्षिपेत् । तत्र मंत्राः "ॐ सिसृक्षोर्निखिलं विश्वं मुहुः शुक्रं प्रजापतेः ॥ मातरः सर्वभूतानामापो देव्यः पुनन्तु माम् ॥ १ ॥ अलक्ष्मीर्मलरूपा या सर्वभूतेषु संस्थिता ॥ क्षालयंति निजस्पर्शादापो देव्यः पुनन्तु माम् ॥ २ ॥ यन्मे केशेषु दौर्भाग्यं सीमंते यच्च मूर्द्धनि ॥ ललाटे कर्णयोरक्ष्णोरापस्तद्घ्नन्तु वो नमः ॥ ३ ॥ आयुरारोग्यमैश्वर्य्यमरिपक्षक्षयः सुखम् ॥ संतोषः क्षांतिरास्तिक्यं विद्या भवतु वो नमः ॥ ४ ॥" ततो हस्तयोरप आदाय नासिकायां संयोज्य ॐ ऋतं च सत्यं० इत्यघमर्षणं जपेत् । एवं स्नात्वा उपवस्त्रेण जलापनयनं कृत्वा शुष्कं शुभ्रं कार्पासवस्त्रं परिधाय स्नानार्द्रवस्त्रं परिपीड्य आचम्य तिलकं कुर्य्यात् । इति गृहस्थानां गृहे नित्यस्नानप्रकारः ॥

॥ अथ तिलकविधिः ॥ तत्रादौ भस्मत्रिपुंड्रप्रकारः । वामहस्ते दक्षिणहस्तेन अग्निहोत्रोत्थितं भस्मादाय उदकमिश्रणानंतरम् । ॐ अग्निरिति भस्म ॐ वायुरिति भस्म ॐ जलामिति भस्म ॐ स्थलामिति भस्म ॐ व्योमेति भस्म सर्व्वं ह० वाइदंभस्म मनएतानिचक्षूंषिभस्मानि इति भस्माभिमंत्र्य । ॐ त्र्यम्बकं यजामहे सुगन्धिम्पुष्टिवर्द्धनम् ॥ उर्वारुकमिवबन्धनान्मृत्योर्मुक्षीयमामृतात् ॥ ॐ तत्पुरुषाय नमः इति मंत्रेण भाले त्रिपुंड्रं कुर्य्यात् ॥ १ ॥ पुनः ॐ

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

त्र्यम्बकं पठित्वा ॐ अघोराय नमः इति दक्षिणांसे० ॥ २ ॥ पुनः ॐत्र्यम्बकं० ॐ सद्योजाताय नमः इति वामांसे० ॥ ३ ॥ पुनः ॐत्र्यम्बकं पठित्वा ॐ वामदेवाय नमः इति जठरे० ॥ ४ ॥ पुनः ॐ त्र्यम्बकं पठित्वा ॐ ईशानाय नमः इति वक्षसि च त्रिपुंड्रं कुर्य्यात् ॥ अथवा तत्पुरुषादिनामस्थले ॐतत्पुरुषाय विद्महे० ॥ १ ॥ अघोरेभ्योथघोरेभ्योः० ॥ २ ॥ सद्योजातामिति० ॥ ३ ॥ वामदेवाय इति० ॥ ४ ॥ ईशानः सर्वविद्यानामित्यादि ॥ ५ ॥ पंचमंत्रैस्त्रिपुंड्रकाणि विधेयानि एवं भस्मधारणं कृत्वा रुद्राक्षधारणं कार्य्यम् ॥ इति भस्मत्रिपुंड्रविधानम् ॥ अथ वैष्णवानामूर्ध्वपुंड्रविधानम् । गोपीचंदनतुलसीमूलसिंधुतीरजाह्नवीतीराणामन्यतममृदा केशवादि द्वादशनामभिर्ललाटादिषु द्वादशस्थानेषु तिलकं कार्य्यम् । तद्यथा । ॐ केशवाय नमः इति ललाटे कार्यम् ॥ १ ॥ ॐ नारायणाय नमः इति उदरे० ॥ २ ॥ ॐ माधवाय नमः इति हृदये ॥ ३ ॥ ॐ गोविंदाय नमः इति कंठे ॥ ४ ॥ ॐ विष्णवे नमः इति दक्षिणपार्श्वे ॥ ५ ॥ ॐ मधुसूदनाय नमः इति दक्षणबाहौ ॥ ६ ॥ ॐ त्रिविक्रमाय नमः इति दक्षिणकर्णदेशे ॥७॥ ॐ वामनाय० इति वामपार्श्वे ॥ ८ ॥ ॐ श्रीधराय० इति वामबाहौ ॥९॥ ॐ हृषीकेशाय नमः इति वामकर्णदेशे ॥१०॥ ॐ पद्मनाभाय० इति पृष्ठे ॥ ११ ॥ ॐ दामोदराय नमः इति ककुदि ॥ १२ ॥ एवं द्वादशस्थानेषु तिलकं कृत्वा "ललाटे तु गदां कुर्य्याद्धृदये नंदकं पुनः ॥ शंखं चक्रं भुजद्वंद्वे शार्ङ्गं बाणं च मूर्द्धनि ॥" एतानि चिह्नानि धारयेत् ॥ इति वैष्णवतिलकविधिः ॥ अथ प्रायश्चित्तांगविष्णुपूजा । तत्रादौ आचम्य प्राणानायम्य देशकालौ संकीर्त्य अमुकगोत्रोऽमुकशर्म्मा मम सर्वपापक्षयार्थं शरीरशुद्ध्यर्थं करिष्यमाणामुकमंत्रपुरश्चरणाधिकारार्थं पुरुषसूक्तेन श्रीमहाविष्णुपूजनमहं करिष्ये इति संकल्प्य स्वपुरतः चतुरस्रं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

हस्तमात्रं स्थंडिलं कृत्वा तदुपरि श्वेतवस्त्रं प्रसार्य तत्र तंडुलैरष्टदलं कृत्वा तन्मध्ये ताम्रकलशं स्थापयेत् । तद्यथा । ॐ भूर
सि॒भूमि॑र॒स्यदि॑तिरसिव्वि॒श्वधा॑या॒व्विश्व॑स्य॒भुव॑नस्यध॒र्त्रीम् ॥ पृ॒थिवीं॒य॑च्छपृथि॒वींदृ॑ꣳहपृथि॒वींमाहिꣳसीः ॥ इति कलशाधारभूमिं
स्पृष्ट्वा ॥ १ ॥ तत्र ॐ धा॒न्य॒मसिधिनु॒हिदे॒वान्प्रा॒णाय॑त्त्वोदा॒नाय॑त्वाव्व्या॒नाय॑त्त्वादी॒र्घामनु॒प्रसि॑ति॒मायु॑षेधान्दे॒वोव॑ः सवि॒ताहिर॑ण्यपा
णि॒ः प्रति॑गृभ्णा॒त्वच्छि॑द्रेणपा॒णिना॒चक्षु॑षेत्त्वाम॒हीना॒म्पयो॑सि ॥ इति धान्यं क्षिप्त्वा ॥ २ ॥ तस्योपरि ॐआजि॑घ्रक॒लशं॑म॒ह्यात्वा॑
व्विशंत्विंद॑वः पुन॑रू॒र्ज्जानिव॑र्तस्व॒सान॑ः ॥ स॒हस्रं॑ धुक्ष्वो॒रुधा॑रा॒पय॑स्वती॒ः पुन॒र्माव्विशताद्र॒यिः ॥ इति ताम्रकलशं स्थापयेत् ॥३॥ ततः
ॐ व्वरु॑णस्यो॒त्तम्भ॑नमसि॒व्वरु॑णस्य॒स्कम्भ॒सर्ज्जनस्थि॒ोव्वरु॑णस्यऽऋतस॒द॑न्यसि॒व्वरु॑णस्यऽऋत॒सद॑नमसि॒व्वरु॑णस्यऽऋत॒सद॑न॒मासी॑
द ॥ इति कलशे जलमापूर्य्य ॥४॥ ॐत्वां॑गं॒धर्व्वाऽअ॑ख॒नस्त्वामिन्द्र॒स्त्वांबृ॒हस्पति॑ः ॥ त्वामो॑षधे॒सोमो॒राजा॑व्वि॒द्वान्यक्ष्मा॑दमुच्यत॥
इति गंधम् ॥ ५ ॥ ॐयाऽओष॑धी॒ः पूर्व्वा॑जा॒तादे॒वेभ्य॑स्त्रियुगम्पु॒रा ॥ मनै॒नुब॒भ्रूणा॑म॒हꣳ॰ श॒तंधामा॑निस॒प्तच॑ ॥ इति सर्वौषधीः ॥
॥ ६ ॥ ॐकांडा॑त्कांडात्प्र॒रोह॑ंती॒परुषः॑परुष॒स्परि॑ ॥ एवा॒नो॑दूर्व्वे॒प्रत॑नुसह॒स्रे॑णश॒तेन॑च॥ इति दूर्वाम् ॥७॥ ॐ अ॒श्व॒त्थेवो॑नि॒षदनं॒पर्णे
वो॑व्वस॒तिष्कृ॒ता ॥ गो॒भाज॒ऽइत्किला॑सथ॒यत्स॒नव॑थ॒पूरुषम् ॥ इति पंचपल्लवान् ॥ ८ ॥ ॐ स्यो॒नापृ॑थिविनोभवानृ॒क्षरानि॒वेश॑नी ॥
यच्छा॑न॒ः शर्म्म॑स॒प्रथा॑ः ॥ इतिसप्तमृदः॥९॥ ॐया॑ः फ॒लिनी॒र्याऽअफ॒लाऽअ॑पुष्पा॒याश्च॑पु॒ष्पिणी॑ः॥ बृ॒हस्पति॑प्रसूता॒स्तानो॑मुञ्च॒न्त्वꣳ

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

हंसः । इति पूगीफलम् ॥ १० ॥ ॐ परिवाजंपतिःकविरग्निर्हव्यान्यक्रमीत् ॥ दधद्रत्नानिदाशुषे ॥ इति पंचरत्नानि ॥११॥ ॐ हिरण्यगर्भः समवर्तताग्रेभूतस्यजातःपतिरेकऽआसीत् ॥ सदाधारपृथिवींद्यामुतेमांकस्मै देवायहविषा विधेम ॥ इति हिरण्यम् ॥१२॥ ॐ सुजातोज्योतिषासहशर्मव्वरूथमासदत्स्वः ॥ व्वासोऽअग्नेव्विश्वरूपुठ्संव्ययस्वव्विभावसो ॥ इति वस्त्रं वा रक्तसूत्रं कंठेवेष्टयेत् ॥ ॥ १३ ॥ ॐपूर्णादर्व्विपरापतसुपूर्णापुनरापत । व्वस्नेवव्विक्रीणावहाऽइषमूर्जंठ्शतक्रतो ॥ इति पूर्णपात्रं निधाय ॥ १४ ॥ ॐ मनोजूतिर्जुषता इति प्रतिष्ठां कृत्वा तत्र ॐतत्त्वायामिब्रह्मणावन्दमानस्तदाशास्तेयजमानोहविर्भिः ॥ अहेडमानो व्वरुणेहवोद्ध्युरुशठ्समानऽआयुःप्रमोषीः । ॐभूर्भुवःस्वः वरुण इहागच्छ इह तिष्ठ इत्यावाह्य ॐ अपां पतिव रुणाय नमः । इति षोडशोपचारैः संपूज्य । 'कलशस्य मुखे विष्णुः०' इत्याद्यभिमंत्र्य ॥ ॐ देवदानवसंवादे० इति कल शं प्रार्थयेत् । ततस्तदुपरि पट्टवस्त्रं प्रसार्य तत्र गंधेन अष्टदलं यंत्रं विलिख्य तन्मध्ये तुलसीदलोपरि शालिग्रामप्रतिमाम् अथवा स्वर्णमयीं विष्णुमूर्तिम् अभ्युत्तारणपूर्विकां स्थापयेत्॥तत्र स्वर्णमूर्तिश्चेत्तर्हि मूर्तिं पात्रे निधाय घृतेनाभ्यज्य तदुपरि दुग्धजलधारां दद्यात् । सूक्तंच पठेत् । तत्र मंत्राः ॥ ॐसमुद्रस्युत्त्वाव्वकयाग्नेपरिव्ययामसि ॥ पावकोऽअस्मभ्यंठ्शिवोभव ॥ १ ॥ हिमस्य त्वाजरायुणाग्नेपरिव्ययामसि ॥ पावकोऽअस्मभ्यं ठ् शिवोभव ॥ २ ॥ अपामिदन्ययनठ्समुद्रस्य निवेशनम् ॥ अन्याँस्ते ऽअ

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

स्मत्तंपन्तुहेतयं÷पावकोऽअस्मभ्यं ठ शिवोभंव ॥ ३ ॥ नमंस्तेहरंसेशोचिषेंनमस्तें ऽअस्त्वार्चिषें ॥ अन्याँस्तेंऽअस्मत्तंपन्तुहेतयं÷ पावकोऽअस्मभ्यंठ शिवोभव ॥ ४ ॥ प्राणदाऽअपानदाव्यांनदाव्वर्चोदाव्वरिवोदाः ॥ अन्याँस्तेंऽअस्मत्तंपन्तुहेतयं÷ पावकोऽअस्मभ्यंठ शिवोभंव ॥ ५ ॥ इत्यभ्युत्तारणसूक्तम् ॥ ततः पंचामृतेन संस्नाप्य । ॐ आपोहिष्ठेत्यादिऋचेल शुद्धजलेन प्रोक्ष्य । स्थापितकलशोपरि संस्थाप्य ॥ ॐ मनोंजतिर्ज्जुषतामाज्यस्यबृहस्पतिंर्यज्ञमिमन्तंनोत्वरिष्टंयज्ञठ्ठसमिमंदंधातु ॥ विश्वें देवासंऽइहमांदयंतामो३म्प्रतिंष्ठ ॥ १ ॥ इति प्रतिष्ठाप्य पुष्पाणि विकीर्य स्वशरीरे देवाङ्गे च पुरुषसूक्तन्यासं कुर्यात् ॥ "देवो भूत्वा देवं यजेत" इति वाक्यात् ॥ अथाङ्गन्यासः । सहस्रशीर्षेत्यादिषोडशर्चसूक्तस्य नारायण ऋषिः । पुरुषो देवता । अनुष्टुप् छन्दः । अन्त्यायास्त्रिष्टुप्छन्दः । न्यासे पूजायां च विनियोगः ॥ ॐसहस्रंशीर्षा० ॥ इति वामकरे ॥ १ ॥ ॐपुरुंषऽएवेदठ्ठसर्वम्० ॥ इति दक्षिणकरे ॥ २ ॥ ॐ एतावांनस्यमहिमा० ॥ इति वामपादे ॥ ३ ॥ ॐत्रिपादूर्ध्व० ॥ इति दक्षिणपादे ॥ ४ ॥ ॐ ततों व्विराट्० ॥ इति वामजानुनि ॥ ५ ॥ ॐतस्मांद्यज्ञात्सर्व्वहुतः० ॥ इति दक्षिणजानुनि ॥ ६ ॥ ॐतस्मांद्यज्ञात्सर्व्वहुतऽऋचः० ॥ इति वामकटौ ॥ ७ ॥ ॐतस्मादश्वां० ॥ इति दक्षिणकटौ ॥ ८ ॥ ॐतंयज्ञं० ॥ इति नाभौ ॥ ९ ॥ ॐयत्पुरु० ॥ इति हृदये ॥ १० ॥ ॐब्राह्मणोस्यु० ॥ इति कंठे ॥ ११ ॥ ॐचंद्रमामनंसो० ॥ इति वामबाहौ ॥ १२ ॥ नाभ्यांऽआसीत्० ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

दक्षिणबाहौ ॥ १३ ॥ ॐयत्पुरुषेण० ॥ इति मुखे ॥ १४ ॥ ॐसप्तास्यासन् ॥ इति नेत्रयोः ॥ १५ ॥ ॐयज्ञेनयज्ञमय० ॥ इति मूर्ध्नि ॥ १६ ॥ अथ पञ्चाङ्गन्यासः । ॐअद्भ्यःसंभृतः० ॥ इति हृदये ॥ १ ॥ ॐवेदाहमेतम् ॥ इति शिरसि ॥ २ ॥ ॐप्रजापतिश्च० ॥ इति शिखायै वषट् ॥ ३ ॥ ॐयोदेवेभ्यऽआतपति० ॥ इति कवचाय हुम् ॥ ४ ॥ ॐरुचम्ब्राह्मञ्च० ॥ इत्यस्त्राय फट् ॥ ५ ॥ एवं न्यासं कृत्वा कलशं शंखघंटे च संपूज्य देवं ध्यायन् घंटानादं कृत्वा पूजां कुर्यात् । तत्र प्रयोगः । ॐसहस्रशीर्षापुरुषःसहस्राक्षः सहस्रपात् ॥ सभूमिंठ्सर्व्वतस्पत्वात्यतिष्ठद्दशाङ्गुलम् ॥ ॐश्रीमहाविष्णवे नमः ॥ आवाहनं समर्पयामि । इत्या वाहनम् ॥ १ ॥ (शालिग्रामपूजायामावाहनाभावात्पत्रपुष्पं निवेदयेत् ।) ॐ पुरुषऽएवेदठ्सर्व्वंयद्भूतंयच्च भाव्यम् ॥ उतामृत त्वस्येशानोयदन्नेनातिरोहति ॥ २ ॥ ॐ महाविष्णवे नमः आसनं स० ॥ ॐ एतावानस्यमहिमातोज्यायाँश्चपूरुषः ॥ पादोस्यविश्वाभूतानित्रिपादस्यामृतंदिवि ॥ ३ ॥ ॐ महाविष्णवे नमः पाद्यं सम० ॥ ॐ त्रिपादूर्द्ध्वऽउदैत्पुरुषः पादोस्येहाभवत्पुनः ॥ ततोविष्वङ्व्यक्रामत्साशनानशनेऽअभि ॥ ४ ॥ ॐ महाविष्णवे नमः अर्घ्यं स० ॥ ॐततोविराडजायताविराजोऽअधिपुरुषः ॥ सजातोऽअत्यरिच्यतपश्चाद्भूमिमथोपुरः ॥ ॐ महाविष्णवे नमः आचमनीयं स० । ॐ तस्माद्यज्ञात्सर्व्वहुतःसम्भृतम्पृषदाज्यम् । पशूँस्ताँश्चक्रेवायव्यानारण्यान्ग्राम्याश्चये ॥ ५ ॥ ॐ महाविष्णवे नमः स्नानं स० "ॐ पयः पृथिव्यामित्यादि मंत्रैः पृथक्

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पृथक् स्नानं शुद्धोदकस्नानं पुरुषसूक्तेनाभिषेकश्च कार्यः ॥ ॐ तस्माद्यज्ञात्सर्व्वहुतऽऋचः सामानियज्ञिरे ॥ छन्दाꣳसियज्ञिरे ॥ तस्माद्यजुस्तस्मा दजायत ॥ ७ ॥ ॐ महाविष्णवे० वस्त्रं स० ॥ वस्त्रान्ते आचमनं स० ॥ ॐ तस्मादश्वाऽअजायन्तयेकेचोभयादतः ॥ गावोहजज्ञिरेतस्मात्तस्माज्जाताऽअजावयः ÷ ॥ ८ ॥ ॐ महाविष्णवे० उपवीतं स० ॥ उपवीतांते आचमनं स० ॥ ॐ तंयज्ञम्बर्हिषिप्प्रौक्षन्पुरुषञ्जातमग्रतः ॥ तेनदेवाऽअयजन्तसाध्याऽऋषयश्चये ॥ ९ ॥ ॐ महाविष्णवे नमः चंदनं स० ॥ ॐ यत्पुरुषंव्यदधुः कतिधाव्यकल्पयन् ॥ मुखङ्किमस्यासीत्किबाहू किमूरूपादाऽउच्येते ॥ १० ॥ ॐ महाविष्णवे नमः पुष्पाणि तुलसीपत्राणि च स० ॥ ॐ ब्राह्मणोस्यमुखमासीद्बाहूराजन्य÷कृतः ॥ ऊरूतदस्ययद्वैश्य÷पद्भ्याꣳशूद्रोऽअजायत ॥ ११ ॥ ॐ महाविष्णवे नमः धूपं स० ॥ ॐ चंद्रमामनसोजातश्चक्षोः सूर्य्योऽअजायत ॥ श्रोत्राद्वायुश्चप्राणश्चमुखादग्निरजायत ॥ १ ॥ ॐ महाविष्णवे नमः दीपं सम० ॥ ॐ नाभ्याऽआसीदन्तरिक्षꣳशीर्ष्णोद्यौः समवर्त्तत ॥ पद्भ्याम्भूमिर्द्दिशः श्रोत्रात्तथालोकाँ २ ॥ ऽअकल्पयन् ॥ १३ ॥ ॐ महाविष्णवे नमः नैवेद्यं स० ॥ नैवेद्यान्ते आचमनं स० ॥ ॐ यत्पुरुषेणहविषादेवायज्ञमतन्वत ॥ वसन्तोस्यासीदाज्यङ्ग्रीष्मऽइध्मꣳशरद्धविः ॥ १४ ॥ महाविष्णवे नमः मुखवासतांबूलं स० ॥ ॐ हिरण्यगर्भः समवर्ततां० ॥ १५ ॥ ॐ महाविष्णवे नमः दक्षिणां स० ॥ ततो नीराजनम् स० ॥ ॐ सप्तास्यासन्परिधयस्त्रिꣳसप्तसमिधः ÷ कृताः ॥ देवायद्यज्ञन्तन्वानाऽ

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अबंध्नन्पुरुषम्पशुम् ॥ १५ ॥ ॐ महाविष्णवे नमः प्रदक्षिणां स० ॥ ॐ यज्ञेनंयज्ञमयजन्तेदुवास्तानिधर्माणिप्रथमान्यासन् ॥ तेहुनाकंम्महिमानं÷सचन्तुयत्रपूर्वेसाध्याःसन्तिं देवाः ॥ ६ ॥ महाविष्णवे नमः मंत्रपुष्पांजलिं स०। ततः साष्टांगप्रणामः॥ अथ नमस्कारः ॥ ॐ अद्य÷ सम्भृतंपृथिव्यैरसांच्चविश्वकर्म्मणंसमवर्त्ततात्रे ॥ तस्यत्वष्टाव्विदधद्रूपमेतितन्नमर्त्यस्यदेवत्वमाजानमग्रे ॥ १ ॥ व्वेदाहमेतम्पुरुषम्ममहान्तंमादित्यवर्णन्तमसंः परस्तात् ॥ तमेववि्दित्वातिमृत्युमेतिनान्य÷ पन्थांविद्यतेयनाय ॥ २ ॥ ॐ प्रजापतिश्चरतिगर्भेऽअन्तरजायमानोबहुधाव्विजायते ॥ तस्यधीरापरिपश्यन्तिधीरास्तस्मिन्ह्तस्थुर्भुवनानिव्विश्वा ॥ ३ ॥ ॐ योदेवेभ्यऽआतपतियोदेवानाम्पुरोहितः ॥ पूर्व्योयोदेवेभ्योजातोनमोरुचायब्राह्मये ॥ ४ ॥ रुचम्ब्राह्मञ्जनयन्तोदेवाऽअग्रेतदब्रुवन्॥ यस्त्वैवम्ब्राह्मणोव्विद्यात्तस्यदेवाऽअसन्वशे ॥ ५ ॥ ॐ श्रीश्चतेलक्ष्मीश्चपत्न्यावहोरात्रेपार्श्वेनक्षत्राणिरूपमश्विनौव्यात्तम्॥ इष्णन्निषाणामुम्मऽइषाणसर्व्वलोकम्मऽइषाण ॥६॥ ॐ महाविष्णवे नमः स्तुतिपाठं स०॥ ततः। "जितं ते पुंडरीकाक्ष नमस्ते विश्वभावन ॥ सुब्रह्मण्य नमस्तेऽस्तु महापुरुषपूर्वज ॥ १ ॥ नमो हिरण्यगर्भाय प्रधानव्यक्तिरूपिणे ॥ ॐ नमो वासुदेवाय शुद्धज्ञानस्वरूपिणे ॥ २ ॥ देवानां दानवानां च सामान्यमसि दैवतम् ॥ सर्वदा चरणद्वन्द्वं व्रजामि शरणं तव ॥ ३ ॥ एकस्त्वमसि लोकस्य स्रष्टा संहारकस्तथा ॥ अध्यक्षश्चानुमन्ता च गुणमायासमावृत्तः ॥४॥ संसारसागरं घोरमनन्तं क्लेशभाजनम् ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

त्वामेव शरणं प्राप्य निस्तरन्ति मनीषिणः ॥ ५ ॥ न ते रूपं न चाकारो नायुधानि न चास्पदम् ॥ तथाऽपि पुरुषाकारो भक्तानां त्वं प्रकाशसे ॥ ६ ॥ नैव किञ्चित्परोक्षं ते प्रत्यक्षोऽसि न कस्य चित् ॥ नैव किञ्चिदसाध्यं ते न च साध्योऽसि कस्यचित् ॥ ७ ॥ कार्याणां कारणं पूर्वं वचसां वाच्यमुत्तमम् ॥ योगिनां परमां सिद्धिं परमं ते पदं विदुः ॥ ८ ॥ अहं भीतोऽस्मि देवेश संसारेऽस्मिन्महाभये ॥ त्राहि मां पुण्डरीकाक्ष न जाने शरणं परम् ॥ ९ ॥ कालेष्वपि च सर्वेषु दिक्षु सर्वासु चाच्युत ॥ शरीरेऽपि गतौ चापि वर्तते मे महद्भयम् ॥ १० ॥ त्वत्पादकमलादन्यन्न मे जन्मान्तरेष्वपि ॥ निमित्तं कुशलस्यास्ति येन गच्छामि सद्गतिम् ॥ ११ ॥ विज्ञानं यदिदं प्राप्तं यदिदं ज्ञानमर्जितम् ॥ जन्मान्तरेऽपि मे देव माभूदस्य परिक्षयः ॥ १२ ॥ दुर्गतावपि जातायां त्वं गतिस्त्वं मतिर्मम ॥ यदि नाथं च विज्ञेयं तावतास्मि कृती सदा ॥ १३ ॥ आकामकलुषं चित्तं मम ते पादयोः स्थितम् ॥ कामये वैष्णवत्वं तु सर्वजन्मसु केवलम्॥१४॥"एवं महापुरुषविद्यास्तवेन स्तुत्वा । ॐ अनेन षोडशोपचारपूजनेन पापहा श्रीमहाविष्णुः प्रीयताम्॥इति परमेश्वरार्पणं कुर्यात्॥एवं विष्णुपूजां कृत्वा पुरुषसूक्तेन प्रत्यृचँ संतर्प्य मंत्रान्ते सर्वत्र भगवान् पापापहा महाविष्णुस्तृप्यताम् इति पठेत्॥इति विष्णुतर्पणम्॥अथ विष्णुश्राद्धम् । आचम्य देशकालौ संकीर्त्य प्रायश्चित्तांगतया विष्णु श्राद्धसंपत्तये श्रीविष्णूद्देशेन त्र्यधिकयुग्मब्राह्मणभोजनपर्याप्तमामं तन्निष्क्रयद्रव्यदानं करिष्ये ॥ इति संकल्प्य ब्राह्मणं गंधादिना संपूज्य पापापह श्रीविष्णुप्रीतये विष्णुश्राद्धस्य संपूर्णतासिद्धयेँ युग्मब्राह्मणभोजनपर्याप्तमामान्नं तन्निष्क्रयद्रव्यं वा अमुकशर्मणे ब्राह्मणाय तुभ्यहं संप्रददे । एवं चतुर्भ्यो ब्राह्मणेभ्यो दत्वा प्रायश्चित्तांगमादौ गोदानं तन्निष्क्रयद्रव्यं वा दद्यात् ॥ तत्र प्रत्यक्षगोदानपक्षे देश

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कालौ संकीर्त्य प्रारीप्सितप्रायश्चित्तस्य पूर्वांगतया विहितं गोदानं करिष्ये । इति संकल्प्य ब्राह्मणं वृत्वा यथाविधि ब्राह्मणपूजनं धेनुपूजनं च कुर्यात् । ततो गोपुच्छे देवर्षिपितृतर्पणं कृत्वा कांस्यपात्रे गोपुच्छं निधाय दुग्धतिलकुशसुवर्णयुतं कृत्वा दक्षिणहस्तेन गृहीत्वा देशकालौ संकीर्त्य मम समस्तपापक्षयार्थं पापापहश्रीमहाविष्णुप्रीत्यर्थमिमां गां सवत्सां सोपस्करां यथाशक्ति विभूषितां रुद्रदैवत्यां तुभ्यमहं संप्रददे इत्युच्चार्य संकल्पजलयुतं गोपुच्छं विप्रहस्ते दद्यात् ॥ "ॐ यज्ञसाधनभूता या विश्वस्याघौघनाशिनी ॥ विश्वरूपधरो देवः प्रीयतामनया गवा ॥ १ ॥" इति प्रार्थयेत् । ततः गोदानसांगतासिद्ध्यर्थं विप्राय दक्षिणां दत्त्वा अनेन गोदानकर्मणा पापापहश्रीमहाविष्णुः प्रीयताम् इति जलमुत्सृजेत् । गोदानासम्भवे यथाशक्ति तन्मूल्यं देयम् । तद्यथा देशकालौ संकीर्त्य प्रायश्चित्तपूर्वांगतया विहितं यथाशक्ति गोनिष्क्रयीभूतद्रव्यदानं करिष्ये इति संकल्प्य ब्राह्मणं संपूज्य देयद्रव्यं गृहीत्वा देशकालौ संकीर्त्य प्रायश्चित्तपूर्वांगतया विहितमिदं गोनिष्क्रयीभूतं यथाशक्ति रजतद्रव्यं तुभ्यमहं संप्रददे इति दद्यात् नात्र दक्षिणा ॥ इति प्रायश्चित्तधेनुदानम् ॥ प्रायश्चित्तहोमः ॥ तत्रादौ शुद्धमृदा चतुरस्रं स्थंडिलं कृत्वा देशकालौ संकीर्त्य अद्य प्रायश्चित्तपूर्वांगतया विहितमाज्येन सह पंचगव्यहवनं करिष्ये ॥ तदंगतया पंचभूसंस्कारपूर्वकमग्निस्थापनं च करिष्ये इति संकल्प्य पंचभूसंस्कारान् कृत्वा यथाविधि विड्नामाग्निं प्रतिष्ठाप्य पात्रासादनं कुर्यात् तद्यथा अग्नेरुत्तरतः पलाशपत्रं यज्ञियकाष्ठं हरितानि सप्त कुशपत्राणि गोमूत्रादीनि पृथक्पृथक् पंचगव्यानि आज्यम् इत्यादिहवनद्रव्याणि निधाय दक्षिणत आज्याधिश्रपणानंतरं पलाशपत्रपुटके ताम्राया गोमूत्रम् अष्टमाषं गायत्र्यादाय श्वेतगोर्गोमयं षोडशमाषं गंधद्वारेति मंत्रेण निक्षिप्य

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पीतगोः क्षीरं द्वादशमाषम् ॥ ॐआप्यायस्वेतिमंत्रेण ग्राह्यम् । नीलाया दधि षड्माषम् । ॐदधिक्राव्णेति मंत्रेण निक्षिप्य ॥ कृष्णाया घृतम् अष्टमाषम् ॐ तेजोसीति मंत्रेण गृह्णीयात् यथोक्तगोरभावे श्वेताया अपि गोमूत्रादिकं ग्राह्यम् ॥ ततः देवस्यत्वेति मंत्रेण कुशोदकं चतुर्मार्षं च प्रक्षिप्य प्रणवेन यज्ञकाष्ठेनालोडच प्रणवेनाभिमंत्रयेत् ततः अग्निपर्युक्षणानंतरम् आज्येन आघारावाज्यभागं हुत्वा अन्वाधानं कुर्यात् तद्यथा अस्मिन्नन्वाहितेऽग्नावग्निं वायुं सूर्यं प्रजापतिं चाज्येन प्रत्येकं व्यस्तसमस्तव्याहृत्या अष्टाविंशतिसंख्यया यक्ष्ये पुनरत्र प्रधानं पृथिवीं विष्णुं रुद्रं ब्रह्माणमग्निं सोमं सवितारं प्रजापतिं परमात्मानम् एता ब्रह्मकूर्चदेवताः मिलितपंचगव्यद्रव्येण एकैकयाहुत्या यक्ष्ये शेषेण स्विष्टकृतमित्यादि अन्वाधाय ॥ अथाज्येन प्रधानहोमः । ॐ भूः स्वाहा इदमग्नये न मम ॥ ॐ भुवः स्वाहा इदं वायवे न मम ॥ ॐ स्वः स्वाहा इदं सूर्याय न मम ॥ ॐभूर्भुवः स्वाहा इदं प्रजापतये न मम ॥ एवं सप्तवारान्कृत्वा अष्टाविंशत्याहुतयो भवंति । एवं सप्तविंशतिवारान् कृत्वा अष्टोत्तरशताहुतयो भवंति । ततः पंचगव्येन प्रतिमंत्रमेकैकाहुतिः । ॐस्योना पृथिविनोभवानृक्षरानिवेशनी ॥ यच्छा नः शर्म्मसप्रथाः स्वाहा इदं पृथिव्यै न मम ॥ १ ॥ ॐ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् ॥ समूढमस्यपा ꣳ सुरे स्वाहा । इदं विष्णवे ॥ २ ॥ ॐमानस्तोकेतनयेमानऽ आयुषिमानो गोषु मानोऽअश्वेषुरीरिषः ॥ मानोव्वीरान्रुद्रभामिनो व्वधीर्हविष्मंतस्सदमित्वाहवामहे स्वाहा इदं रुद्राय० ॥ उदकोपस्पर्शनम् ॥ ३ ॥ ॐ ब्रह्म यज्ञानं प्रथमम्पुरस्ताद्विसीमतःसुरुचोवेनऽआवः ॥ सबुध्न्याऽउपमाऽअस्यविष्ठाःसतश्चयोनिमसतश्चविवः स्वाहा । इदं ब्रह्मणे न मम ॥ ४ ॥ ॐ अग्नये स्वाहा इदमग्नये न मम ॥ ५ ॥ ॐ सोमाय स्वाहा इदं सोमाय न मम ॥ ६ ॥ ॐ तत्स

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वितु० स्वाहा इदं सवित्रे न मम ॥ ७ ॥ ॐ प्रजापतये स्वाहा इदं प्रजापतये न मम ॥ ८ ॥ ॐ परमात्मने स्वाहा इदं परमात्मने न मम ॥ ९ ॥ ॐ अग्नये स्विष्टकृते स्वाहा इदमग्नये स्विष्टकृते न मम ॥ १० ॥ ततो भूरादिप्रजापत्यंता नवाज्याहुतीर्हुत्वा संस्रवप्राशनादि प्रणीताविमोकांतं कृत्वा ब्रह्मणे पूर्णपात्रं दत्त्वा ततो देशकालौ संकीर्त्य अद्यदिनमारभ्यामुकव्रतग्रहणं करिष्ये इति द्विजान्पृष्ट्वा । कुरुष्वेत्यनुज्ञातः पंचगव्यप्राशनं कुर्य्यात् तत्र मंत्रः । ॐ यत्त्वगास्थिगतं पापं देहे तिष्ठति मामके ॥ प्राशनात्पंचगव्यस्य दहत्यग्निरिवेंधनम् ॥ १ ॥ इति सर्वं हुतशेषपंचगव्यं प्रणवेन पिबेत् । तद्दिने उपवासः । ततः संकल्पितप्रायश्चित्तद्रव्यं ब्राह्मणेभ्यो दत्त्वा यथाशक्ति ब्राह्मणान् भोजयित्वा कर्मेश्वरार्पणं कुर्यात् । ततः संकल्पितव्रतमनुष्ठाय पूर्ववत् व्याहृत्याज्यहोमविष्णुश्राद्धगोदानानि कुर्य्यात । व्रतकरणाशक्तौ प्राजापत्ये गामेकां दद्यात् अतिकृच्छ्रे सांतपने च गोद्वयम् २ ॥ पराके तप्तकृच्छ्रे च गोत्रयम् ३॥कृच्छ्रातिकृच्छ्रे गवां चतुष्टयं वा ॥ चांद्रायणेष्टौ ८ पंच ५ चतस्र ४ स्तिस्रो ३ वा गावः ॥ मासं पयोव्रते यावकव्रते मासोपवासे च पंच गावः ॥ मासं गोमूत्रयावकव्रते षट् गावो देयाः ॥ गोदानाशक्तौ निष्कनिष्कार्धनिष्कपादान्यतमप्रमाणहेमं रौप्यं वा धेनुमूल्यं वा देयम् । अत्यशक्तेन निष्कपादार्धरजतं तत्समं धान्यादि वा देयम् ॥ अशीतिगुंजात्मकः कर्षः चत्वारः कर्षाः निष्कमिति ॥ अथ प्राजापत्यप्रत्याम्नायाः ॥ प्राजापत्यकरणाशक्तौ धेनुमेकाम् १ ॥ अथवा दशसहस्रगायत्रीजपः २ ॥ गायत्र्या सहस्रं तिलहोमः ३ ॥ [क्वचित्सहस्रं व्याहृत्या तिलहोम उक्तः ३॥] शतद्वयं प्राणयामा वा ॥ ४ ॥ द्वादशब्राह्मणभोजनं वा ५ ॥ वेदसंहितापारायणम् ६ ॥ योजनतीर्थयात्रा ७ ॥ द्वादशसहस्रं नमस्काराः ८ ॥ इति

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

प्राजापत्यप्रत्याम्नायाः ॥ अहोरात्र उपवासाशक्तौ एकविप्रभोजनम् १ ॥ वा सहस्रं गायत्रीजपः २ ॥ द्वादश प्राणायामा वा इति स्मृत्यर्थसारे इति प्रायश्चित्तप्रयोगः ॥ एवं प्रायश्चितं पापानुसारं कृत्वा मंत्रसिद्ध्यर्थं गायत्र्या अयुतं जपान्कुर्यात् । तद्यथा । देशकालौ संकीर्त्य ज्ञाताज्ञातपापक्षयार्थं करिष्यमाणामुकमंत्रपुरश्चरणाधिकारार्थं मंत्रसिद्ध्यर्थं च गायत्र्या अयुतजपानहं करिष्ये इति संकल्प्य स्वयं विप्रद्वारा वा कुर्य्यात् । (तदुक्तं देवीभागवते) " यस्य कस्यापि मंत्रस्य पुरश्चरणमारभेत् ॥ व्याहृतित्रयसंयुक्तां गायत्रीं चायुतं जपेत् ॥ १ ॥ नृसिंहार्कवराहाणां तांत्रिकं वैदिकं तथा ॥ विना जप्त्वा तु गायत्रीं तत्सर्वं निष्फलं भवेत् ॥ २ ॥ एवं सप्रणवव्याहृतिकगायत्र्ययुतं जप्त्वा । आपोहिष्ठा० इत्यादि ऋचम् ३ ॥ स्वस्तिन इत्याद्याः स्वस्तिमतीः ॥ पुनंतु मा इत्याद्याः पावमानीश्च सर्वाजप्त्वा ॐ गायत्र्याऽऽचार्यमृषिं विश्वामित्रं तर्पयामि । गायत्रीछंदस्तर्पयामि । सवितारं देवतां तर्पयामि । इति तर्पणं कृत्वा कद्रुदायेत्यादीनि रुद्रसूक्तानि सकृज्जपेत् । तद्दिने उपवासः । अशक्तस्य हविष्यान्नेन एकभक्तव्रतम इति सर्वमंत्रपुरश्चरणारंभात्पूर्वदिनकृत्यम् ॥ ॥ अथानुष्ठानारंभदिनकर्म ॥ चंद्रतारादिबलान्विते पूर्वोक्ते सुमुहूर्ते प्रातरुत्थाय तीर्थादौ यथाविधि स्नात्वा संध्यादिनित्यावश्यकं समाप्य आचार्यं जापकांश्चाहूय तेभ्य आसनार्घ्यादिकं दत्त्वा मङ्गलस्नानं कुर्य्यात् । तद्यथा । यजमानः शुद्धपीठे प्राङ्मुख उदङ्मुखो वा उपविश्य हस्तौ पादौ प्रक्षाल्य द्विराचम्य प्राणानायम्य देशकालौ संकीर्त्य ब्राह्मणद्वारा करिष्यमाणामुकमंत्रपुरश्चरणकर्माङ्गतया मङ्गलस्नानमहं करिष्ये । इति संकल्पः । ततो यथाचारं मंगलवाद्यघोषपुरःसरं पुत्रवतीवृद्धसुवासिनीभिर्हस्तैः सुगंधितैलाभ्यंजनं तिलामलकादीनां सर्वौषध्यादिसुगंधचूर्णैनोद्वर्तनम्

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

उष्णोदकेन मंगलस्नानं पत्न्या सह कृत्वा नवं श्वेतं सदृशं स्ववर्णेन सकृद्धौतं प्रागुदग्वा प्रसारितं नान्यधारि=महतं वस्त्रं नाभिपृष्ठकटिषु बद्धत्रिकच्छम् " ॐ परिधास्यै यशोधास्यै दीर्घायुत्वाय जरदष्टिरश्नि ॥ शतं च जीवामि शरदः पुरूची रायस्पोषमभिसंव्ययिष्ये ॥ १ ॥ इति मंत्रेण परिधाय । ॐ यशसा मा द्यावापृथिवी यशसेंद्राबृहस्पती ॥ यशो भगश्च मा विदद्यशो मा प्रतिपद्यताम् ॥१॥ इति मंत्रेणोत्तरीयं धृत्वा यथाविधि नूतनयज्ञोपवीतं च धारयेत्॥पत्नी तु अहते क्षौमवस्त्रे श्वेतपीतरक्तरंजिते नीलीरंजितं विना अमंत्रकं परिधाय प्रतिवस्त्रं स्मार्तविधिना द्विराचमनम् ॥ पत्न्यास्तु यथोक्तं कार्यम् । ततः शुभासने प्राङ्मुख उपविश्य स्वदक्षिणतः पत्नीं चोपवेश्य करद्वये अनामिकामध्यपर्वणि कुशपवित्रमथवा यथाशक्ति सुवर्णात्मक पवित्रद्वयं च धृत्वा कुंकुमकेशरान्यतममंगलद्रव्येण तिलकं यथाचारं कृत्वा द्विराचम्य प्राणानायम्य शांतिपाठं पठित्वा लक्ष्मीनारायणादिदेवान् प्रणमेत् । अथ शांतिपाठमंत्राः ॥ " ॐआनो भद्राः क्रतवो यन्तु विश्वतो दब्धासोऽअपरीतासऽउद्भिदः ॥ देवानोयथासदमिद्वृधेऽअसन्नप्रायुवोरक्षितारो दिवेदिवे ॥ १ ॥ देवानां भद्रा सुमतिर्ऋजूयतान्देवानाꣳरातिरभिनोनिवर्तताम् ॥ देवानाꣳसख्यमुपसेदिमावयन्देवानऽआयुः प्रतिरन्तुजीवसे ॥ २ ॥ तान्पूर्वयानिविदाहूमहेवयम्भगंमित्रमदितिन्दक्षमस्रिधम् ॥ अर्यमणम्वरुणꣳसोममश्विनासरस्वतीनꣳसुभगामयस्करत् ॥ ३ ॥ तन्नोवातोमयोभुवातुभेषजन्तन्माता पृथिवीतत्पिताद्यौः ॥ तद्ग्रावाणꣳसोमसुतोमयोभुवस्तदश्विनाशृणुतन्धिष्ण्यायुवम् ॥ ४ ॥ तमीशानञ्जगतस्तस्थुषस्पतिन्धियञ्जिन्वमवसेहूमहेवयु

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यम् ॥ पूषानोयथाव्वेदंसामसद्वृधेरक्षितापायुरदब्धंस्वस्तयें ॥ ५ ॥ स्वस्तिनऽइन्द्रोवृद्धश्रवाःस्वस्तिनःपूषाव्विश्ववेदाः ॥ स्वस्ति
नस्तार्क्ष्योऽआरिष्टनेमिःस्वस्तिनोबृहस्पतिर्दधातु ॥ ६ ॥ पृषदश्वामरुतःपृश्निमातरःशुभंयावानोव्विदथेषुजग्मयः ॥ अग्निजिह्वा
मनवःसूरचक्षसोव्विश्वेनोदेवाऽअवसागमन्निह ॥ ७ ॥ भद्रङ्कर्णेभिःशृणुयामदेवाभद्रम्पश्येमाक्षभिर्यजत्राः ॥ स्थिरैरङ्गैस्तुष्टुवाꣳसस
स्तनूभिर्व्यशेमहिदेवहितंयदायुः ॥ ८ ॥ शतमिन्नुशरदोऽअन्ति देवायत्रानश्चक्राजरसंन्तनूनाम् ॥ पुत्रासोयत्रपितरोभवन्तिमानोमध्या
रीरिषतायुर्गन्तोः ॥ ९ ॥ अदितिद्यौरदितिरन्तरिक्षमदितिर्म्मातासपितासपुत्रः ॥ विश्वेदेवाऽअदितिःपञ्चजनाऽअदितिर्जातमदि
तिर्जनित्वम् ॥ १० ॥ तम्पत्नीभिरनुगच्छेमदेवाःपुत्रैर्भ्रातृभिरुतवाहिरण्यैः ॥ नाकङ्कृभ्णानाःसुकृतस्यलोकेतृतीयेपृष्ठेऽअधिरोचने
दिवः ॥ ११ ॥ आयुष्यँम्ववर्च्चस्यꣳरायस्पोषमौद्भिदम् ॥ इदꣳहिरण्यंवर्च्चस्वज्जैत्रायाविंशतादुमाम् ॥ १२ ॥ द्यौःशान्तिरन्तरिक्ष
ꣳशान्तिःपृथिवीशान्तिरापःशान्तिरोषधयःशान्तिः ॥ व्वनस्पतयः शान्तिर्व्विश्वेदेवाः शान्तिर्ब्रह्मशान्तिः सर्व्वꣳशान्तिः शान्ति
रेवशान्तिःसामाशान्तिरेधि ॥ १३ ॥ यतो यतः समीहसेततोनोऽअभयङ्कुरु ॥ शन्नःकुरुप्रजाभ्योभयन्नःपशुभ्यः ॥ १४ ॥
सुशांतिर्भवतु ॥ ॐ श्रीमहागणाधिपतये नमः ॥ ॐ लक्ष्मीनारायणाभ्यां नमः ॥ ॐ उमामहेश्वराभ्यां नमः ॥ ॐ वाणीहिरण्यग
र्भाभ्यां नमः ॥ ॐ शचीपुरंदराभ्यां नमः ॥ मातापितृचरणकमलेभ्यो नमः ॥ ॐ कुलदेवताभ्यो नमः ॥ ॐइष्टदेवताभ्यो नमः ॥ ॐग्राम

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

देवताभ्यो नमः ॥ ॐ स्थानदेवताभ्यो नमः ॥ ॐ वास्तुदेवताभ्यो नमः ॥ ॐ सर्वेभ्यो देवेभ्यो नमः ॥ ॐ सर्वेभ्यो ब्राह्मणेभ्यो नमोनमः ॥ ॐ पुण्यं पुण्याहं दीर्घमायुरस्तु ॥ ॐ सुमुखश्चैकदंतश्च कपिलो गजकर्णकः ॥ लंबोदरश्च विकटो विघ्ननाशो विनायकः ॥ १ ॥ धूम्रकेतुर्गणाध्यक्षो भालचंद्रो गजाननः ॥ द्वादशैतानि नामानि यः पठेच्छृणुयादपि ॥ २ ॥ विद्यारंभे विवाहे च प्रवेशे निर्गमे तथा ॥ संग्रामे संकटे चैव विघ्नस्तस्य न जायते ॥ ३ ॥ शुक्लांबरधरं देवं शशिवर्णं चतुर्भुजम् ॥ प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशांतये ॥ ४ ॥ अभीप्सितार्थसिद्ध्यर्थं पूजितो यः सुरासुरैः ॥ सर्वविघ्नहरस्तस्मै गणाधिपतये नमः ॥ ५ ॥ सर्वमंगलमांगल्ये शिवे सर्वार्थसाधिके ॥ शरण्ये त्र्यंबके गौरि नारायणि नमोस्तुते ॥ ६ ॥ सर्वदा सर्वकार्येषु नास्ति तेषाममंगलम् ॥ येषां हृदिस्थो भगवान्मंगलायतनो हरिः ॥ ७ ॥ लाभस्तेषां जयस्तेषां कुतस्तेषां पराजयः ॥ येषामिंदीवरश्यामो हृदयस्थो जनार्दनः ॥ ८ ॥ विनायकं गुरुं भानुं ब्रह्म विष्णुमहेश्वरान् ॥ सरस्वतीं प्रणम्यादौ सर्वकार्यार्थसिद्धये ॥ ९ ॥ सर्वेष्वारंभकार्येषु त्रयस्त्रिभुवनेश्वराः ॥ देवा दिशंतु नः सिद्धिं ब्रह्मेशानजनार्दनाः ॥ १० ॥ वक्रतुंड महाकाय सूर्यकोटिसमप्रभ ॥ अविघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ॥ ११ ॥ इति प्रणम्य संकल्पं कुर्यात् ॥ अथ संकल्पः ॥ तत्रादौ दक्षिणहस्ते कुशत्रययवगंधपुष्पजलान्यादाय ॐ विष्णुर्विष्णुर्विष्णुः ॐ तत्सद्ब्रह्म श्रीमद्भगवतो महापुरुषस्य विष्णोराज्ञया प्रवर्तमानस्य अद्य श्रीब्रह्मणो द्वितीये परार्द्धे एकपञ्चाशत्तमे वर्षे प्रथममासे प्रथमपक्षे प्रथमदिवसे अह्नो द्वितीये यामे तृतीये मुहूर्ते रथन्तरादिद्वात्रिंशत्कल्पानां मध्ये अष्टमे श्वेतवाराहकल्पे स्वयंभुवादिमन्वन्तराणां मध्ये सप्तमे वैवस्वतमन्वन्तरे कृतत्रेताद्वापरकलिसंज्ञानां चतुर्णां युगानां मध्ये वर्तमाने अष्टाविंशतितमे कलियुगे तत्प्रथमचरणे तथा पञ्चा

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

शत्कोटियोजनविस्तीर्णभूमण्डलान्तर्गतसप्तद्वीपमध्यवर्तिनि जंबूद्वीपे तत्रापि नवखण्डानां मध्ये नवसहस्रयोजनविस्तीर्णे भरतखण्डे तत्रापि परमपवित्रे भारते वर्षे आर्यावर्तान्तर्गतब्रह्मावर्तैकदेशे अमुकक्षेत्रे श्रीगंगायमुनयोरमुकदिग्भागे नर्मदाया अमुकप्रदेशे देवब्राह्मणानां सन्निधौ श्रीमन्नृपविक्रमादित्यराज्यादमुकसंख्यापरिमिते प्रवर्तमानवत्सरे प्रभवादिषष्टिसंवत्सराणां मध्येऽमुकनाम्नि संवत्सरे अमुकायने अमुकर्तौ अमुकमासे अमुकपक्षे अमुकतिथौ अमुकवासरे अमुकनक्षत्रे अमुकयोगे अमुककरणे अमुकराशिस्थे चन्द्रे अमुकराशिस्थे सूर्ये अमुकराशिस्थिते देवगुरौ शेषेषु ग्रहेषु यथायथाराशिस्थानस्थितेषु सत्सु एवं गुणविशेषेण विशिष्टायां शुभपुण्यतिथौ अमुकगोत्रोऽमुकशर्माहमात्मनः श्रुतिस्मृतिपुराणोक्तफलावाप्तये अस्मिन्पुण्याहे मम कलत्रादिभिः सह जन्मराशेः सकाशान्नामराशेः शकाशाद्वा जन्मलग्नाद्वर्षलग्नाद्वोचराद्वा ये केचिच्चतुर्थाष्टमद्वादशाद्यनिष्टस्थानस्थिताः क्रूरग्रहास्तैः सूचितं सूचयिष्यमाणं च यत्सर्वारिष्टं तद्विनाशार्थं सर्वदा तृतीयैकादशशुभस्थानस्थितवदुत्तमबलप्राप्त्यर्थं तथा दशान्तर्दशाचोपदशादिनदशाजनितपीडाऽल्पायुराधिदैवाधिभौतिकाध्यात्मिकजनितक्लेशनिवृत्तिपूर्वकशरीरारोग्यार्थं परमैश्वर्य्यादिप्राप्त्यर्थम् अमुकदेवताप्रीत्यर्थममुकसंख्यापरिमितामुकमंत्रजपपुरश्चरणं स्वयं ब्राह्मणद्वारा वा करिष्ये इति तदंगत्वेन गणपतिपूजनं स्वस्तिपुण्याहवाचनं मातृकापूजनं नांदीश्राद्धमाचार्यादिवरणं च करिष्ये इति संकल्प्य स्ववामे कर्मार्थजलपूरितकलशार्चनम् । "ॐतत्वा यामिब्रह्मणाव्वन्दमानस्तदाशास्तेयजमानोहविर्भिः॥अहेडमानोवरुणेहबोध्युरुशꣳसमानऽआयुः प्रमोषीः॥अस्मिन्कलशे ॐ वरुण इहागच्छेह तिष्ठ इत्यावाह्य ॐअपांपतये वरुणाय नमः इति गंधाक्षतपुष्पैः संपूज्य कलशस्य मुखे विष्णुरित्याद्यभिमंत्र्य ॐगंगे च

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यमुने चैव गोदावरि सरस्वति ॥ नर्मदे सिंधुकावेरि जलेस्मिन्सन्निधिं कुरु ॥ १ ॥ अस्मिन्कलशे सर्वाणि तीर्थान्यावाहयामि पूजयामि नमस्करोमि इति तीर्थान्यावाह्य देवदानवसंवादे इति प्रार्थयेत् ॥ ततो दूर्वाभिः कलशोदकेन संभारान् ॐ अपवित्रः पवित्रो वा सर्वावस्थां गतोपि वा ॥ यः स्मरेत्पुंडरीकाक्षं स बाह्याभ्यन्तरः शुचिः ॥१॥ इति मंत्रेण संप्रोक्ष्य दीपपूजनं कुर्यात् । भो दीपत्वं ब्रह्मरूप अन्धकारनिवारक ॥ इमां मया कृतां पूजां गृहंस्तेजःप्रवर्धय ॥ १ ॥ दीपाय नमः ॥ इति गंधाक्षतपुष्पैः पूजयेत् ॥ अथ गणपतिपूजनम् । तत्रादौ ध्यानम् । श्वेताङ्गं श्वेतवस्त्रं सितकुसुमगणैः पूजितं श्वेतगंधैः क्षीराब्धौ रत्नदीपैः सुरतरुविमले रत्नसिंहासनस्थम् ॥ दोर्भिः पाशाङ्कुशेष्टाभयधृतिविशदं चंद्रमौलिं निनेत्रं ध्यायेच्छांत्यर्थमीशं गणपतिममलं श्रीसमेतं प्रसन्नम् ॥ १ ॥ ॐ भूर्भुवः स्वः सिद्धिबुद्धिसहितमहागणपतये नमः ध्यायामि इति ध्यानम् ॥१॥ पुष्पाण्यादाय । हे हेरंब त्वमेह्येहि अंबिकात्र्यंबकात्मज ॥ सिद्धिबुद्धि पते त्र्यक्ष लक्षलाभपितुः पितः ॥ १ ॥ नागास्य नागाहार त्वं गणराज चतुर्भुज ॥ भूषितः स्वायुधैर्दिव्यैः पाशांकुशपरश्वधैः ॥२ ॥ आवाहयामि पूजार्थं रक्षार्थं च मम क्रतोः ॥ इहागत्य गृहाण त्वं पूजां क्रतुं च रक्ष मे ॥ ३ ॥ ॐ गणानान्त्वागणपतिꣳहवामहे प्रियाणान्त्वा प्रियपतिꣳहवामहेनिधीनान्त्वानिधिपतिꣳहवामहेव्वसोमम ॥ आहमजानिगर्भधमात्वमजासिगर्भधम् ॥ ॐ भूर्भुवः स्वः सिद्धिबुद्धिसहितमहागणाधिपतये नमः गणपतिमावाहयामि स्थापयामि इत्यावाह्य ॐ भूर्भुवः स्वः सिद्धिबुद्धिसहितमहागणाधिपतये नमः । इति मंत्रेण पद्यादिभिः षोडशोपचारैः संपूज्य विशेषार्घ्यं दद्यात् । ॐ रक्षरक्ष गणाध्यक्ष रक्ष त्रैलोक्यरक्षक ॥ भक्तानामभयं कर्ता त्राता भव भवार्णवात् ॥ १ ॥ द्वैमातुर कृपासिंधो षाण्मातुराग्रज प्रभो ॥ वरद त्वं वरं देहि

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वांछितं वांछितार्थद ॥ २ ॥ गृहाणार्घ्यमिदं देव सर्वदेवनमस्कृत ॥ अनेनः सफलार्घ्येण फलदोस्तु सदा मम ॥ ३ ॥ ॐ भू० सि० म० विशेषार्घ्यस० (प्रार्थना) विघ्नेश्वराय वरदाय सुरप्रियाय लम्बोदराय सकलाय जगद्धिताय ॥ नागाननाय श्रुतियज्ञविभूषिताय गौरीसुताय गणनाथ नमोनमस्ते ॥ १ ॥ भक्तार्तिनाशनपराय गणेश्वराय सर्वेश्वराय शुभदाय सुरेश्वराय ॥ विद्याधराय विकटाय च वामनाय भक्तप्रसन्नवरदाय नमोनमस्ते ॥ २ ॥ नमस्ते ब्रह्मरूपाय विष्णुरूपाय ते नमः ॥ नमस्ते रुद्ररूपाय करिरूपाय ते नमः ॥ ३ ॥ विश्वरूपस्वरूपाय नमस्ते ब्रह्मचारिणे ॥ भक्तप्रियाय देवाय नमस्तुभ्यं विनायक ॥ ४ ॥ लम्बोदर नमस्तुभ्यं सततं मोदकप्रिय ॥ निर्विघ्नं कुरु मे देव सर्वकर्येषु सर्वदा ॥ ५ ॥ त्वां विघ्नशत्रुदलनेति च सुंदरेति भक्तप्रियेति सुखदेति वरप्रदेति ॥ विद्याप्रदेत्यघहरेति च ये स्तुवंति तेभ्यो गणेश वरदो भव नित्य मेव ॥ ६ ॥ इति प्रार्थ्य अनया पूजया सिद्धिबुद्धिसहितमहागणपतिः सांगः सपरिवारः प्रीयताम् ॥ इति गणपतिपूजनम् ॥ अथ पुण्याहवाचनम् ॥ तत्रादौ स्वाग्ने पूर्वोक्तकलशस्थापनविधिना अव्रणं ताम्रकलशं संस्थाप्य तत्र वरुणं संपूज्य प्रार्थयेत् । ॐ नमोनमस्ते स्फटिकप्रभाय सुश्वेतहाराय सुमंगलाय ॥ सुपाशहस्ताय झषासनाय जलाधिनाथाय नमोनमस्ते ॥ १ ॥ पाशपाणे नमस्तुभ्यं पद्मिनीजीवनायक ॥ पुण्याहवाचनं यावत्तावत्त्वं सन्निधौ भव ॥ २ ॥ इति प्रार्थ्य पुण्याहवाचनं कुर्य्यात् । अवनि कृतजानुमंडलः कमलमुकुलसदृशमंजलिं शिरस्याधायानंतरं दक्षिणेन पाणिना स्वर्णपूर्णकलशं धारयित्वा दीर्घा नागा नद्यो गिरयस्त्रीणि विष्णुपदानि च ॥ ॐत्रीणिपदाव्विचक्रमेव्विष्णुर्गोपाऽअदाभ्यः ॥ अतोधर्माणिधारयन् ॥ १ ॥ तेनायुःप्रमाणेन

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पुण्यं पुण्याहं दीर्घमायुरस्त्विति भवंतो ब्रुवंतु इति यजमानः पुण्यं पुण्याहं दीर्घमायुरस्त्विति द्विजाः । एवं सर्वत्र यजमानवचनो त्तरं ब्राह्मणाः प्रतिवचनं दद्युः । ब्राह्मणानां हस्ते सुप्रोक्षितमस्तु ॐ शिवा आपः संतु.इति जलं दद्यात् । संतु शिवा आपः इति प्रतिवचनम् । ॐ सौमनस्यमस्तु इति पुष्पम् । अस्तु सौमनस्यम्० । ॐ अक्षतं चारिष्टं चास्तु इत्यक्षतान् । अस्त्वक्षतमरिष्टं च । ॐ गंधाः पांतु । इति गंधम्० ॥ ॐ सौमंगल्यं चास्तु । ॐ अक्षताः पांतु आयुष्यमस्तु० । ॐ पुष्पाणि पांतु सौश्रियमस्तु । ॐ तांबूलानि पांतु ऐश्वर्यमस्तु० । ॐ दक्षिणाः पांतु बहुधनमस्तु । पुनरत्राः पांतु स्वर्चितमस्त्वितिविप्रा ब्रूयुः ॥ यजमानः आचार्यादीन्प्रणम्य श्रीर्यशो विद्या विनयो वित्तं बहुपुत्रं चायुषं चास्त्विति भवंतो ब्रुवंतु इति वदेत् । ते च श्रीर्यशो विद्या विनयो वित्तं बहुपुत्रं चायुष्यं चास्तु इत्युक्त्वा दीर्घमायुः शांतिः पुष्टिस्तुष्टिश्चास्त्विति यजमानं मूर्ध्न्यभिषिंचेयुः ॥ यं कृत्वा सर्ववेदयज्ञक्रियाकरणकर्मारंभाः शोभनाः प्रवर्तंते तमहमोंकारमादिं कृत्वा ऋग्यजुःसामाशीर्वचनं बहुऋषिमतं समनुज्ञातं भवद्भिरनुज्ञातः पुण्यं पुण्याहं वाचयिष्ये । ॐ वाच्यतां ब्राह्मणानां हस्तेष्वक्षतान्दद्यात्तेचाशिषो दद्युः । ॐ भद्रङ्कर्णेभिः शृणुयामदेवाभद्रम्पश्येमाक्षभिर्यजत्राः ॥ स्थिरैरङ्गैस्तुष्टुवाꣳसस्तनूभिर्व्यशेमहिदेवहितंयदायुः ॥ १ ॥ देवानांभद्रासुमतिर्ऋजूयतान्देवानाꣳरातिरभिनोनिवर्तताम् ॥ देवानाꣳसख्यमुपसेदिमाव्वयन्देवानऽआयुःप्रतिरन्तुजीवसे ॥ २ ॥ नतद्रक्षाꣳसिनपिशाचास्तरन्तिदेवानामोजःप्रथमजꣳह्येतत् ॥ योबिभर्तिदाक्षायणꣳहिरण्यꣳसदेवेषुकृणुतेदीर्घमायुःसमनुष्येषुकृणुतेदीर्घमायुः ॥ ३ ॥ दीर्घायुस्तऽओषधेखनितायस्मैचत्वाखनाम्यहम् ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अथोत्वन्दीर्घायुर्भूत्वाशतंवल्शाव्विरोहतात् ॥ ४ ॥ द्रुविणोदाद्रविणसस्तुरस्यद्रविणोदाःसनरस्युप्रियंसत् ॥ द्रुविणोदाव्वीरवतीमि शन्नोद्रविणोदारासतेदीर्घमायुः ॥ ५ ॥ सवितापश्चात्तात्सवितापुरस्तात्सवितोत्तरात्तात्सविताधरात्तात् ॥ सविता नः सुवतुसर्वतातिं सवितानोरासतान्दीर्घमायुः ॥ ६ ॥ नवोनवोभवतिजायमानोह्नान्केतुरुषसामेत्यग्रम् ॥ भागन्देवेभ्योविदधात्ययंप्रचंद्रमास्तिर तेदीर्घमायुः ॥ ७ ॥ उच्चादिविदक्षिणावन्तोऽअस्थुर्येऽअश्वदाःसहतेसूर्येण ॥ हिरण्यदाऽअमृतत्वंभजन्तेवासोदाःसोमप्रतिरन्तुआयुः ॥८॥ इत्याशीर्वादः ॥ व्रतजपनियमतपःस्वाध्यायक्रतुदयादमदानविशिष्टानां सर्वेषां ब्राह्मणानां मनः समाधीयताम् । इति यजमानः । समाहितमनसः स्मः इति द्विजाः । प्रसीदंतु भवंतः इति यजमानो ब्रूयात् । प्रसन्नाः स्मः इति द्विजा ब्रूयुः । ततो यजमानो ब्रूयात् ॐ शांतिरस्तु अस्त्विति द्विजाः प्रतिवचनं सर्वत्र दद्युः । ॐ पुष्टिरस्तु ॐ तुष्टिरस्तु ॐ वृद्धिरस्तु ॐ अविघ्नमस्तु ॐ आयुष्यमस्तु ॐ आरोग्यमस्तु ॐ शिवं कर्मास्तु ॐ कर्मसमृद्धिरस्तु ॐ वेदसमृद्धिरस्तु ॐ शास्त्रसमृद्धिरस्तु ॐ धनधान्यसमृद्धिरस्तु ॐ पुत्रपौत्रसमृद्धिरस्तु ॐ इष्टसंपदस्तु ॐ अरिष्टनिरसनमस्तु ॐ यत्पापं यद्रोगं नः अशुभम् अकल्याणं तद्दूरे प्रतिहतमस्तु ॐ यच्छ्रेयस्तदस्तु ॐ उत्तरे कर्मणि निर्विघ्नमस्तु ॐ उत्तरोत्तरमहरहरभिवृद्धिरस्तु ॐ उत्तरोत्तराः क्रियाः शुभाः शोभनाः संपद्यंताम् । ॐ तिथिकरणमुहूर्तनक्षत्रग्रहलग्नसंपदस्तु ॥ ६ ॥ [उदकसेकः] ॐ तिथिकरणमुहूर्तनक्षत्रग्रहलग्नाधिदेवताः प्रीयंताम् । ॐ तिथिकरणे समुहूर्ते सनक्षत्रे सग्रहे साधिदेवते प्रीयेताम् । ॐ दुर्गापांचाल्यौ प्रीयेताम्। ॐ अग्निपुरोगा विश्वेदेवाः प्रीयंता

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

म् । ॐ इंद्रपुरोगा मरुद्गणाः प्रीयंताम् । ॐ माहेश्वरीपुरोगा उमामातरः प्रीयंताम् । ॐ अरुंधतीपुरोगा एकपत्न्यः प्रीयन्ताम् । ॐ विष्णुपुरोगाः सर्वे देवाः प्रीयंताम् । ॐ ब्रह्मपुरोगाः सर्वे वेदाः प्रीयन्ताम् । ॐ ब्रह्म च ब्राह्मणाश्च प्रीयंताम् । ॐ श्रीसरस्वत्यौ प्रीयेताम् । ॐ श्रद्धामेधे प्रीयेताम् । ॐ भगवती कात्यायनी प्रीयताम् । ॐ भगवती माहेश्वरी प्रीयताम् । ॐ भगवती ऋद्धिकरी प्रीयताम् । ॐ भगवती सिद्धिकरी प्रीयताम् । ॐ भगवती पुष्टिकरी प्रीयताम् । ॐ भगवती तुष्टिकरी प्रीयताम् । ॐ भगवंतौ विघ्नविनायकौ प्रीयेताम् । ॐ सर्वाः कुलदेवताः प्रीयंताम् । ॐ सर्वा ग्रामदेवताः प्रीयंताम् । ॐ हताश्च ब्रह्मद्विषः ॐ हताश्च परिपंथिनः । ॐ हताश्च विघ्नकर्तारः शत्रवः पराभवं यांतु । ॐ शाम्यंतु घोराणि । ॐ शाम्यंतु पापानि । ॐ शाम्यंत्वीतयः । ॐ शुभानि वर्द्धन्ताम् । ॐ शिवा आपः संतु । ॐ शिवा ऋतवः संतु । ॐ शिवा औषधयः संतु । ॐ शिवा नद्यः संतु । ॐ शिवा गिरयः संतु । ॐ शिवा अतिथयः संतु । ॐ शिवा अग्नयः संतु । ॐ शिवा आहुतयः संतु । ॐ अहोरात्रे शिवे स्याताम् ॥ ॐ निकामेनिकामेनःपर्ज्जन्योव्वर्षतुफलवत्योनऽओषधयःपच्यन्तां योगक्षेमो नः कल्पताम् ॥ १ ॥ ॐ शुक्रांगारकबुधबृहस्पतिशनैश्चरराहुकेतुसोमसहिता आदित्यपुरोगाः सर्वे ग्रहाः प्रीयंताम् । ॐ भगवान्नारायणः प्रीयताम् । ॐ भगवान्पर्ज्जन्यः प्रीयताम् । ॐ भगवान्स्वामी महासेनः प्रीयताम् । ॐ पुण्याहकालान्वाचयिष्ये । इति यजमानः । ॐ वाच्यताम् इति प्रतिवचनम् । ब्राह्मचं पुण्यं महद्यच्च सृष्ट्युत्पादनकारकम् । वेदवृक्षोद्भवं नित्यं तत्पुण्याहं ब्रुवंतु नः ॥ १ ॥ भो ब्राह्मणाः मया क्रियमाणस्यामुकमंत्रपुरश्चरणाख्यस्य कर्मणः पुण्याहं भवंतो ब्रुवंतु ॐ पुण्याहम् ३ ॥ एवं प्रति

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वचनं च त्रिः पठित्वा । ॐ पुनंतुमादेवजुनाःपुनन्तुमनसाधिय÷ ॥ पुनन्तुव्विश्वाभूतानिजातवेदःपुनीहिमा ॥ १ ॥ पृथिव्यामुद्धतायां तु यत्कल्याणं पुराकृतम् ॥ ऋषिभिः सिद्धगंधर्वैस्तत्कल्याणं ब्रुवंतु नः ॥ १ ॥ भो ब्राह्मणाः मया० कर्मणः कल्याणं भवंतो ब्रुवंतु । ॐ कल्याणम् ३ ॥ ॐ यथेमाँव्वाचंकल्याणीमावदानिजनेभ्यःब्रह्मराजन्याभ्याठ्ँशूद्रायचार्य्यायचस्वायचारणायच॥प्प्रियोदेवानांदक्षिणायैदातुरिहभूयासमयम्मेकामःसमृध्यतामुपमादोनमतु ॥ १ ॥ सागरस्य यथा वृद्धिर्महालक्ष्म्यादिभिः कृता ॥ संपूर्णा सुप्रभावा च तां च ऋद्धिं ब्रुवंतु नः ॥ भोब्राह्मणाः मया क्रिय० कर्मणः ऋद्धिं भवंतो ब्रुवंतु । ॐ ऋध्यताम् ॥३ ॥ ॐ सुत्रस्यऽऋद्धिरसगन्मज्योतिरमृताऽअभूम ॥ दिवंम्पृथिव्याऽअध्यारूहामाव्विदामदेवान्त्स्वर्ज्योतिः÷॥१॥ स्वस्तिस्तु या विनाशाख्या पुण्यकल्याणवृद्धिदा ॥ विनायकप्रिया नित्यं तां च स्वस्तिं ब्रुवंतु नः ॥१॥ भो ब्राह्मणाः मया० कर्मणः स्वस्तिं भ० । ॐ स्वस्ति ३ ॥ ॐ स्वस्तिनऽइंद्रोवृद्धश्रवाःस्वस्तिनःपूषाव्विश्ववेदाः ॥ स्वस्तिनस्तार्क्ष्योऽअरिष्टनेमिःस्वस्तिनो बृहस्पतिर्दधातु ॥१॥ समुद्रमथनाज्जाता जगदानंदकारिका ॥ हरिप्रिया च माङ्गल्या तां श्रियं च ब्रुवंतु नः ॥१॥ भो ब्राह्मणाः मया० कर्मणः श्रीरस्विति भवंतो ब्रुवंतु अस्तु श्रीः ३ ॥ ॐ श्रीश्चं ते लक्ष्मीश्चपत्न्यावहोरात्रेपार्श्वेनक्षत्राणिरूपमश्विनौव्यात्तम् ॥ इष्णन्निषाणामुम्मऽइषाणसर्व्वलोकम्मऽइषाण ॥१॥ अस्मिन्पुण्याहवाचने न्यूनातिरिक्तो यो विधिः स उपविष्टब्राह्मणानां वचनात् श्रीम

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

हागणपतिप्रसादाच्च सर्वः परिपूर्णोस्तु । ॐ अस्तु परिपूर्ण इति विप्राः । [अथाभिषेकः] अभिषेके पत्नी वामतः एकस्मिन्कलशे वरुणोदकं गृहीत्वाऽविधुराश्चत्वारो ब्राह्मणा दूर्वाम्रपल्लवैर्यजमानमभिषिंचेयुः ॥ तत्र मंत्राः ॥ ॐ पर्य÷पृथिव्यां० १ पंचनद्यः २ वरुणस्योत्तम्० ३ पुनंतु मा० ४ देवस्यत्वासवितुःप्रसवेश्विनोर्बाहुभ्यांम्पूष्णोहस्ताभ्याम् ॥ सरस्वत्यैव्वाचोयन्तुरश्र्यन्त्रियेदधामिबृहस्पतेष्ट्वासाम्राज्येनाभिषिञ्चाम्यसौ ॥६॥ देवस्यत्वा० सरस्वत्यैव्वाचोयन्तुर्यन्त्रेणाग्ने÷साम्राज्येनाभिषिंचामि॥७॥देवस्यत्वा०अश्विनोर्भैषज्येनतेजसाब्रह्मव्वर्च्चसायाभिषिञ्चामिसरस्वत्यैभैषज्येनव्वीर्यायान्नाद्यायाभिषिंचामीन्द्रस्येन्द्रियेणबलायश्रियैयशसेभिषिंचामि ॥८॥विश्वानिदेवसवितर्दुरितानिपरासुवयद्भद्रंतन्नऽआसुव ९ धामच्छदग्निरिन्द्रोब्रह्मादेवोबृहस्पतिं÷सचेतसोव्विश्वेदेवायज्ञम्प्रावन्तुनः शुभे १० त्वँयविष्ठदाशुषोनृंत्पाहिशृणुधीगिरःरक्षतोकमुतत्मना ११ अन्नपतेन्नस्यनोधेह्यनमीवस्यशुष्मिणःप्रप्रदातारन्तारिषऽऊर्ज्जन्नोधेहिद्विपदेशंचतुष्पदे १२ ॐद्यौःशांतिरन्त० १३ यतोंयतःसमीहसे० १४ अमृताभिषेकोस्तुशांतिःशान्तिःशांतिःसुशांतिर्भवतु ततःपुत्रवतीभिर्वृद्धसुवासिनीभिर्नीराजनंकार्यम्॥ ॐअनाधृष्टापुरस्तादग्नेराधिपत्युऽआयुर्म्मेदाःपुत्रवतीदक्षिणतइन्द्रस्याधिपत्येप्रजाम्मेदाःविधृतिरुपरिष्टाद्बृहस्पतेराधिपत्येऽओजोमेदाव्विश्वाभ्योमानाष्ट्राभ्यस्पाहिमनारश्चोसि ॥ १ ॥ अनेन पुण्याहवाचनेन अमुकमंत्रजपदेवता प्रीयताम् इति पुण्याहवाचनम् ॥ ॥ अथ मातृकापूजनम् ॥ तत्र तावत् षड्विनायकपूजनम् । गोधूमादिधान्यपुञ्जेषु हरि

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

द्वारंजितेषु षड्विनायकाः स्थाप्याः॥ तद्यथा ॥ मोदश्चैव प्रमोदश्च सुमुखो दुर्मुखस्तथा ॥ अविघ्नो विघ्नकर्ता च षडेते विघ्ननायकाः ॥१॥ ॐ मोदाय नमः मोदमावाहयामि ॥१॥ ॐ प्रमोदाय० प्रमोदमा० ॥२॥ ॐ सुमुखाय० सुमुखमा० ॥३॥ ॐ दुर्मुखाय दुर्मुखमा० ॥ ४ ॥ ॐ अविघ्नाय० अविघ्नमा० ॥ ५ ॥ ॐ विघ्नकर्त्रे नमः विघ्नकर्तारमावाहयामि ॥ ६ ॥ इत्यावाह्य ॐ मनोजूतिरिति प्रतिष्ठाप्य ॐ मोदादिषड्विनायकेभ्यो नमः इति नाममंत्रेण षोडशोपचारैः संपूजयेत् ॥ अनया पूजया मोदादिषड्विनायकाः प्रीयन्ताम् । ततो गौर्यादिमातृका अक्षतपुंजेषु पूगीफलेषु वा निवेश्याः । तत्रायं क्रमः । गौरी पद्मा शची मेधा सावित्री विजया जया ॥ देवसेना स्वधा स्वाहा मातरो लोकमातरः ॥ १ ॥ हृष्टिः पुष्टिस्तथा तुष्टिरात्मनः कुलदेवताः ॥ गणेशेनाधिका ह्येता वृद्धौ पूज्याश्च षोडश ॥ २ ॥ ॐ गणेशाय नमः गणेशमावाहयामि ॥ १ ॥ ॐ गौर्य्यै नमः गौरीमावाहयामि ॥ २ ॥ ॐ पद्मायै नमः पद्मामावाहयामि ॥ ३ ॥ ॐ शच्यै नमः शचीमावाहयामि ॥४॥ ॐ मेधायै नमः मेधाम्० ॥५॥ ॐ सावित्र्यै० सावित्रीम्० ॥ ६ ॥ ॐ विजयायै० विजयाम्० ॥ ७ ॥ ॐ जयायै० जयाम्० ॥८॥ ॐ देवसेनायै० देवसेनाम्० ॥९॥ ॐ स्वधायै० स्वधाम्० ॥१०॥ ॐ स्वाहायै स्वाहाम्० ॥११॥ ॐ मातृभ्यो नमः मातृरावा० ॥ १२ ॥ ॐ लोकमातृभ्यो०लोकमातृरावा० ॥ १३ ॥ ॐ हृष्टयै० हृष्टिम्० ॥ १४ ॥ ॐ पुष्टयै० पुष्टिम् ॥ १५ ॥ ॐ तुष्टयै० तुष्टिमा० ॥ १६ ॥ ॐ कुलदेवतायै नमः कुलदेवतामावाहयामि ॥१७॥ इत्यावाह्य ॐमनोजूतिर्जुषतामाज्यस्यबृहस्पतिर्यज्ञमिमन्तनोत्वरिष्टंयज्ञठ्ंसमिमंदधातु ॥ विश्वेदेवासऽइहमादयन्तामो३म्प्रतिष्ठ ॥ इति प्रतिष्ठाप्य ॐ गौर्य्यादिषोडशमातृकाभ्यो नमः इति नाममंत्रेण षोडशोपचारैः संपूजयेत् ततः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कुड्येआवाहितमातृणामुपरिघृतेनकुंकुमाक्तेन दक्षिणोत्तराः सप्त पञ्च तिस्रो वा धारा दद्यात्॥ ॐ व्यसो÷पवित्रंमसिशतधारंवसो÷पवित्रंमसिसहस्रधारंदेवस्त्वांसवितापुनातु ॥ व्वसो÷पवित्रेणशतधारेणसुप्वाकामधुक्षः ॥ १ ॥ अथ घृतमातृकानामानि ॐ श्रीश्च लक्ष्मीर्धृतिर्मेधा पुष्टिः श्रद्धा सरस्वती ॥ मांगल्येषु प्रपूज्यंते सप्तैता घृतमातरः ॥२॥ ॐ श्रियै नमः श्रियमावाहयामि ॥ १ ॥ ॐ लक्ष्म्यै नमः लक्ष्मीमा० ॥२॥ ॐ धृत्यै० धृतिमा० ॥३॥ ॐ मेधायै० मेधामा० ॥४॥ ॐ पुष्ट्यै० पुष्टिमा० ॥५॥ ॐ श्रद्धायै० श्रद्धामा० ॥ ६ ॥ ॐ सरस्वत्यै नमः सरस्वतीमावाहयामि ॥७॥ इत्यावाह्य ॐ घृतमातृकाभ्यो नमः इति षोडशोपचारैः पूजयेत् अथ स्थलमातरः॥ तत्रैव तंडुलपुंजेषु॥ "ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा ॥ वाराही च तथेंद्राणी चामुंडा सप्तमातरः ॥" ॐ ब्राह्म्यै नमः ब्राह्मीमावाहयामि १॥ ॐ माहेश्वर्यै०माहेश्वरीमा०॥२॥ॐ कौमार्यै०कौमारीमा०॥३॥ ॐ वैष्णव्यै० वैष्णवीमा०॥४॥ ॐ वाराह्यै० वाराहीमा० ॥५॥ ॐ इन्द्राण्यै० इंद्राणीमा० ॥६॥ ॐ चामुंडायै नमः चामुंडामावाहयामि इत्यावाह्य ॥ ॐ ब्राह्म्यादि सप्तमातृकाभ्यो नमः इति नाममंत्रेण षोडशोपचारैः पूजयेत् ॥ अथायुष्यमंत्रजपः ॥ ॐआयुष्यंवर्चस्यठ्ंरायस्पोषमौद्भिदम् ॥ इदठ्ंहिरण्यम्वर्चस्वज्जैत्रायाविंशतादुमाग् ॥ १ ॥ नतद्रक्षाठ्ंसिनपिशाचास्तरन्तिदेवानामोजः÷प्रथमजठ्ंह्येतत् ॥ योबिभर्तिदाक्षायणठ्ंहिरण्यठ्ंसदेवेषुकृणुतेदीर्घमायुः÷समनुष्येषुकृणुतेदीर्घमायु÷॥२॥ यदाबध्नंदाक्षायणाहिरण्यठ्ंशतानीकायसुमनस्यमानाः॥ तन्मऽआबध्नामिशतशारदायायुष्माञ्जरदष्टिर्यथासम् ॥ ३ ॥ इति मातृकापूजनम् ॥ अथ सांकल्पिकनांदीश्राद्धप्रयोगः । तत्रादौ आचम्य प्रा

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

णानायम्य देशकालौ संकीर्त्य अद्यामुकमंत्रपुरश्चरणकर्माङ्गत्वेन सांकल्पिकविधिना ब्राह्मणयुग्मभोजनपर्याप्तान्ननिष्क्रयीभूतयथा शक्तिहिरण्येन नांदीश्राद्धं करिष्ये । इति संकल्पः । ततः पाद्यादिदानम् । सत्यवसुसंज्ञकाः विश्वेदेवाः नांदीमुखाः ॐ भूर्भुवः स्वः इदं वः पाद्यं पादावनेजनं पादप्रक्षालनं स्वाहा संपद्यतां वृद्धिः ॥ १ ॥ अमुकगोत्रामातृपितामहीप्रपितामह्यः नांदीमुख्यः ॐ भूर्भुवः स्वः इदं वः पाद्यं पादप्रक्षालनं स्वाहा संपद्यतां वृद्धिः ॥ २ ॥ अमुकगोत्रा पितृपितामहप्रपितामहाः नांदीमुखाः ॐ भूर्भुवः स्वः इदं वः पाद्यं पादप्रक्षालनं स्वाहा संपद्यतां वृद्धिः ॥ ३ ॥ (द्वितीयगोत्राः) मातामहप्रमातामहवृद्धप्रमातामहाः सपत्नीकाः नांदीमुखाः ॐ भूर्भुवःस्वः इदं वः पाद्यं पादप्रक्षालनं स्वाहा संपद्यतां वृद्धिः ॥ ४ ॥ अथासनदानम् ॥ सत्यवसुसंज्ञकानां विश्वेषां देवानां नांदीमुखानाम् ॐ भूर्भुवः स्वः इदमासनं सुखासनं स्वाहा नमः संपद्यतां वृद्धिः नांदीश्राद्धे क्षणौ क्रियेताम् । ॐ तथा प्राप्नुतां भवन्तौ प्राप्नुवावः ॥ १ ॥ अमुकगोत्राणां मातृपितामहीप्रपितामहीनां नांदीमुखीनाम् ॐ भूर्भुवः स्वः इदमासनं सुखासनं स्वाहा नमः संपद्यतां वृद्धिः नांदीश्राद्धे क्षणौ क्रियेताम् । ॐ तथा प्राप्नुतां भवंतौ प्राप्नुवावः ॥ २ ॥ अमुकगोत्राणांपितृपितामहप्रपितामहानां नांदीमुखानाम् । ॐ भूर्भुवः स्वः इदमासनं सुखासनं स्वाहा नमः संपद्यतां वृद्धिः नांदीश्राद्धे ॥ ३ ॥ द्वितीयगोत्राणां मातामहप्रमातामहवृद्धप्रमातामहानां सपत्नीकानां नांदीमुखानाम् ॐ भूर्भुवः स्वः इदमासनं सुखासनं स्वाहा संपद्यतां वृद्धिः नांदीश्राद्धे क्षणौ० ॥ ४ ॥ ततो गंधादिदानम् । सत्यवसुसंज्ञकेभ्यो विश्वेभ्यो देवेभ्यो नांदीमुखेभ्य इदं गंधाद्यर्चनं स्वाहा संपद्यतां वृद्धिः ॥ १ ॥ अमुकगोत्राभ्यो मातृपितामहीप्रपितामहीभ्यो नांदीमुखीभ्यः इदं गंधाद्यर्चनं स्वाहा

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

संपद्यतां वृद्धिः ॥ २ ॥ अमुकगोत्रेभ्यः पितृपितामहप्रपितामहेभ्यो नांदीमुखेभ्यः इदं गंधा० ॥ ३ ॥ द्वितीयगोत्रेभ्यो माता महप्रमातामहवृद्धप्रमातामहेभ्यः सपत्नीकेभ्यो नांदीमुखेभ्य इदं गंधाद्यर्चनं स्वाहा संपद्यतां वृद्धिः ॥ ४ ॥ ततो भोजननिष्क यद्रव्यदानम् ॥ सत्यवसुसंज्ञकेभ्यो विश्वेभ्यो देवेभ्यो नांदीमुखेभ्यो ब्राह्मणयुग्मभोजनपर्याप्तमन्नं तन्निष्क्रयीभूतं किंचिद्धिरण्यं दत्तम मृतरूपेण स्वाहा संपद्यतां वृद्धिः ॥ १ ॥ अमुकगोत्राभ्यो मातृपितामहीप्रपितामहीभ्यो नांदीमुखीभ्यो ब्राह्मणयुग्म० ॥ २ ॥ अमुक गोत्रेभ्यः पितृपितामहप्रपितामहेभ्यो नांदीमुखेभ्यो ब्राह्मणयुग्मभोजनपर्याप्तमन्नं तन्निष्क्रयी० ॥३॥ द्वितीयगोत्रेभ्यो मातामहप्रमाता महवृद्धप्रमातामहेभ्यः सपत्नीकेभ्यो नांदीमुखेभ्यो ब्राह्मणयुग्म० ॥ ततः सक्षीरमुदकदानम् । सत्यवसुसंज्ञकाः विश्वेदेवाः नांदीमुखाः प्रीयंताम् । अमुकगोत्राः मातृपितामहीप्रपितामह्यः प्रीयंताम् । पितृपितामहप्रपितामहाः प्रीयंताम् । द्वितीयगोत्राः मातामहप्रमा तामहवृद्धप्रमातामहाः सपत्नीकाः प्रीयंताम् । अथाशिषो ग्रहणम् । गोत्रं नो वर्द्धताम् । [वर्द्धतां वो गोत्रम्] दातारो नोऽभिवर्धंताम् [अभिवर्धंतां वो दातारः] वेदाश्च नोभिवर्धंताम् [वर्धन्तां वो वेदाः] संततिर्नो वर्द्धताम् [वर्धतां वः संततिः] श्रद्धा च नो माव्य गमत् [माव्यगमद्वः श्रद्धा] बहु देयं च नोऽस्तु [अस्तु वो बहु देयम्] अन्नं च नो बहु भवेत् [भवतु वो बहन्नम्] अतिथींश्च लभामहे [लभन्तां वोऽतिथयः] याचितारश्च नः संतु [संतु वो याचितारः] एता आशिषः सत्याः संतु [संत्वेताः सत्याशिषः] ततो दक्षिणादानम् । सत्यवसुसंज्ञकेभ्यो विश्वेभ्यो देवेभ्यो नांदीमुखेभ्यः कृतस्य नांदीश्राद्धस्य फलप्रतिष्ठासिद्धयर्थं द्राक्षामल कयवमूलनिष्क्रयीभूतां दक्षिणां दातुमहमुत्सृजे संपद्यतां वृद्धिः ॥ १ ॥ [यवमूलमार्द्रकम्] अमुकगोत्राभ्यो मातृपितामहो

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

प्रपितामहीभ्यो नांदीमुखीभ्यः कृतस्य० ॥ २ ॥ अमुकगोत्रेभ्यः पितृपितामहप्रपितामहेभ्यो नांदीमुखेभ्यः कृतस्य० ॥ ॥ ३ ॥ द्वितीयगोत्रेभ्यो मातामहप्रमातामहवृद्धप्रमातामहेभ्यः सपत्नीकेभ्यो नांदीमुखेभ्यः कृतस्य० ॥ ४ ॥ ततो नांदीश्राद्धं संपन्नं सुसंपन्नमिति पठित्वा । ॐ व्वाजेव्वाजे० ॥ १ ॥ आमावाजस्य २ इति मंत्रद्वयेन विसर्जयेत् ॥ अस्मिन्नांदीश्राद्धे न्यूनाति रिक्तो यो विधिः स उपविष्टब्राह्मणानां वचनात् नांदीमुखप्रसादात्सर्वः परिपूर्णोस्तु ॥ [अस्तुपरिपूर्णः] ॥ इति नांदीश्राद्धम् ॥ ॥ अथाचार्यजापकवरणम् ॥ तत्र तावत् शुद्धकुलोत्पन्नान्सदाचारपरायणान् संध्यादिषट्कर्मयुक्तान् वेदशास्त्रज्ञान् सुशीलान्नीरोगान् नातिवयस्कान् अव्यंगान् आस्तिकान्स्नातांश्च ब्राह्मणानाहूय तेषां पादप्रक्षालनं कृत्वा । आसनेषु प्राङ्मुखानुपवेश्य स्वयं यज मान उदङ्मुख उपविश्य । आचम्य वरणद्रव्याणि गृहीत्वा ॥ आचार्यस्य जान्वालभ्य । देशकालौ स्मृत्वा । अमुकगोत्रोऽमुक शर्मा अमुककामनासिद्ध्यर्थम् अमुकदेवताप्रीतये करिष्यमाणामुकमंत्रजपपुरश्चरणकर्मणि अमुकगोत्रममुकशर्माणं ब्राह्मणमेभिर्गं धाक्षततांबूलमुद्रिकासनमालाकमंडलुवासोभिराचार्यत्वेन त्वामहं वृणे । इति वृत्वा । ॐ वृतोस्मीति प्रतिवचनानंतरं गंधाक्षतपुष्प मालादिभिराचार्यं संपूज्य । यज्ञकंकणं बद्धा । ॐ यथा शक्रस्य वागीश आचार्यः सर्वकर्मसु ॥ तथा मया त्वमाचार्यो वृतोस्मिन् यज्ञकर्माणि ॥ १ ॥ इति प्रार्थयेत् । इत्याचार्यं वृत्वा । दशाऽष्टौ पंच चतुरो वा जापकानेकतंत्रेण पृथग्वा वृणुयात् । तद्यथा । अद्यामुकगोत्रोऽमुकशर्मा अमुककामनार्थम् अमुकदेवताप्रीतये करिष्यमाणामुकमंत्रपुरश्चरणकर्मणि अमुकसंख्यापरिमितामुकमंत्र जपकरणार्थम् अमुकामुकगोत्रोत्पन्नानमुकामुकशर्मणो विप्रानेभिर्गंधाक्षतपुष्पतांबूलमुद्रिकासनमालाकमंडलुवासोभिर्जापकत्वेन

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

युष्मानहं वृणे। इति वृत्वा। ॐ वृताः स्मः॥ इति तरुक्त प्रत्येकं गंधाक्षतपुष्पमालावरणद्रव्यैः संपूज्य सर्वेषां पृथक्पृथक् यज्ञसूत्रं बद्धा प्रार्थयेत्। ॐ जापकाश्च यथा पूर्वं शक्रादीनां मखेऽभवन्। यूयं तथा मे भवितुं जापकाऽर्हथ सत्तमाः॥ १॥ इति प्रार्थ्य यजमानाचार्यजापकाः परस्परं यज्ञकंकणं बध्नीयुः। गंधाद्यर्चनं च कुर्युः। अथ प्रार्थना। ॐ अस्य यागस्य निष्पत्तौ भवंतोऽभ्यर्थिता मया॥ सुप्रसन्नैः प्रकर्त्तव्यं शांतिकं विधिपूर्वकम्॥ १॥ अंगीकुर्वंतु कर्मैतत्कल्पद्रुमसमाशिषः॥ यथोक्तनियमैर्युक्ता जपार्थं स्थिरबुद्धयः॥ २॥ अस्मिन् यज्ञे मया पूज्याः संतु मे नियमान्विताः॥ अक्रोधनाः शौचपराः सततं ब्रह्मचारिणः॥ ३॥ देवध्यानरता नित्यं प्रसन्नमनसः सदा॥ अदुष्टभाषणाः संतु मा संतु परनिंदकाः॥ ४॥ ममापि नियमा ह्येते भवंतु भवतामपि॥ इति प्रार्थ्य प्रत्येकं वस्त्रद्वयम् २ आसनं १ यज्ञोपवीतं १ अर्घ्यपात्रम् १ आचमनपात्रं १ जलकमंडलुः १ सुवर्णांगुलीयकद्वयं २ रुद्राक्षमालां १ च दद्यात्। आचार्याय द्विगुणं देयम्॥ इत्याचार्यजापकवरणप्रयोगः॥ ततः सर्वे जापका वक्ष्यमाणजपक्रमेण न्यासध्यानपूर्वकं जपं कुर्य्युः॥ ॥ इति श्रीबीकानेरविषयान्तर्गतश्रीरत्नगढनगरनिवासिना गौडवंशावतंसेन श्रीवसिष्ठगोत्रोद्भवेन श्रीरामकृष्णामरचंद्रपौत्रेण श्रीकस्तूरीचंद्रचतुर्भुजसूनुना श्रीमहादेवभक्तवाजसनेयिना पण्डितश्रीचतुर्थीलालशर्मणा विरचिते अनुष्ठानप्रकाशे पद्धतिकाण्डे सर्वमंत्रजपोपयोगिप्रारंभदिनकृत्यप्रयोगप्रकरणं प्रथमम्॥ १॥ ॥ ॥ अथ सर्वमंत्रानुष्ठानोपयोगिजपक्रमः॥ कृतस्नानादिनित्यक्रियः पूर्वोक्तजपस्थानसमीपमागत्य पादप्रक्षालनमाचमनं च कृत्वा द्वारपूजां कुर्यात्। तद्यथा। ताम्राद्यर्घपात्रं गृहीत्वा ॐ ह्रः द्वारार्घ्यं साधयामीत्युक्त्वा ॐ फट् इति पात्रं प्रक्षाल्य। ॐ नमः इति

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

जलेनापूर्य्य ॥ ॐ गंगे च यमुने चैव गोदावरि सरस्वति ॥ नर्मदे सिंधुकावेरि जलेस्मिन्सन्निधिं कुरु ॥ १ ॥ इति तीर्थान्यावाह्य । ॐ इति प्रणवेन गंधपुष्पे निक्षिप्य धेनुमुद्रां प्रदर्श्य । मूलमंत्रेणाभिमंत्रयेत् । एवं सामान्यार्घ्यं संपाद्य । ॐ अस्त्रायफडित्यभिमंत्रि तजलेन द्वारं संप्रोक्ष्य । ऊर्ध्वशाखायाम् । ॐ गं गणपतये नमः ॥ १ ॥ तद्दक्षिणे भागे ॐ महालक्ष्म्यै नमः ॥ २ ॥ वामभागे ॐ सरस्वत्यै नमः ॥ २ ॥ दक्षिणशाखायाम् ॐ विघ्नेशाय नमः ॥ १ ॥ ॐ गंगायै नमः ॥ २ ॥ ॐ यमुनायै नमः ॥ ३ ॥ वाम शाखायाम् ॐ क्षेत्रपालाय नमः ॥१॥ ॐ स्वःसिंधवे नमः ॥ २ ॥ ॐ यमुनायै नमः ॥ ३ ॥ पुनर्दक्षिणशाखायाम् ॐ धात्रे नमः ॥ १ ॥ वामशाखायाम् ॐ विधात्रे नमः ॥ २ ॥ पुनर्दक्षिणशाखायाम् ॐ शंखनिधये नमः ॥ १ ॥ वामशाखायाम् ॐ पद्मनिधये नमः ॥२॥ देहल्याम् ॐ अस्त्राय नमः ॥१॥ इति गंधादिभिरभ्यर्च्य तत्तद्देवताद्वारपालान् पूजयेत् । तद्यथा । विष्णोर्द्वारे ॐ नंदाय नयः ॥ १ ॥ ॐ सुनंदाय नमः ॥२॥ ॐ चंडाय नमः ॥३॥ ॐ प्रचंडाय नमः ॥ ४॥ ॐ बलाय नमः ॥ ५ ॥ ॐ प्रबलाय नमः ॥६॥ ॐ भद्राय नमः ॥७॥ ॐ सुभद्राय नमः॥८॥इति विष्णुद्वारपालान् पूजयेत् ॥ (शिवानुष्ठाने) ॐ नंदिने नमः॥१॥ॐ महाकालाय नमः ॥२॥ ॐ गणेशाय नमः ॥३॥ ॐ वृषभाय नमः ॥४॥ ॐ भृंगिणे नमः ॥५॥ ॐ रिटये नमः॥६॥ॐ स्कंदाय नमः॥७॥ ॐ चंडेश्व राय नमः ॥ ८ ॥ इति शिवद्वारपालाः ॥ (गणेशानुष्ठाने) ॐ वक्रतुंडाय नमः ॥ १ ॥ ॐ एकदंष्ट्राय नमः ॥ २ ॥ ॐ महोदराय नमः ॥ ३ ॥ ॐ गजाननाय नमः ॥ ४ ॥ ॐ लंबोदराय नमः ॥ ५ ॥ ॐ विकटाय नमः ॥ ६ ॥ ॐ विघ्नराजाय नमः ॥ ॥ ७ ॥ ॐ धूम्रवर्णाय नमः ॥ ८ ॥ इति गणेशद्वारपालाः ॥ (शक्त्यनुष्ठाने) ॐब्राह्म्यै नमः ॥ १ ॥ ॐ माहेश्वर्य्यै नमः ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ॐकौमार्य्यै नमः ॥ ३ ॥ ॐ वैष्णव्यै नमः ॥ ४ ॥ ॐ वाराह्यै नमः ॥ ५ ॥ ॐ इंद्राण्यै नमः ॥ ६ ॥ ॐ चामुंडायै नमः ॥ ७ ॥ ॐ महालक्ष्म्यै नमः ॥ ८ ॥ इति देवीद्वारपालांश्च पूजयेत् ॥ ततः पूर्वादिदिक्षु.क्रमेण ॐ इंद्राय नमः ॥ १ ॥ आग्नेय्याम् ॐ अग्नये नमः ॥ २ ॥ याम्याम् ॐ यमाय नमः ॥ ३ ॥ नैर्ऋत्याम् ॐ निर्ऋतये नमः ॥ ४ ॥ पश्चिमायाम् ॐ वरुणाय नमः ॥ ५ ॥ वायव्याम् ॐ वायवे नमः ॥ ६ ॥ उत्तरस्याम् ॐ कुबेराय नमः ॥ ७ ॥ ईशान्याम् ॐ ईशानाय नमः ॥ ८ ॥ इति दिक्पालान् पूजयेत् ॥ एवं द्वारपूजां विधाय । आत्मानं शंकरं ध्यात्वा.ॐ शिवाज्ञया इतोन्यत्र व्रजंतु सर्व एव हि इति मंत्रं मूलमंत्रं च पठन् द्विव्यदृष्ट्यवलोकनेन दिव्यान्विघ्नान्निवार्य । ॐ फडिति मंत्रेणाऽर्घ्यपानीयैः प्रोक्षणेनान्तरिक्षस्थानुत्सार्य । तेनैव मंत्रेण भूमौ वामपादपार्ष्णिघातेन धरागतान्विघ्नानुत्सारयेत् । ततः ॐ अपसर्पंतु ते भूता ये भूता भूमिसंस्थिताः ॥ ये भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया ॥ १ ॥ अपक्रामंतु भूतानि पिशाचाः सर्वतो दिशम् ॥ सर्वेषामविरोधेन ब्रह्मकर्म्म समारभे ॥ २ ॥ इति मंत्रद्वयेन सर्वान् विघ्नान् निवार्य्य अवकाशप्रदानाय शनैः स्वाङ्गं संकोचयन् वामशाखां स्पृशन् दक्षिणपादेन प्राविशेत् । एवं यागमंडपं प्राविश्य स्वेष्टदेवं संस्मृत्य घंटास्वनं कृत्वा वाससा द्वारमाच्छाद्य पंचगव्यार्घतोयाभ्याम् । ॐ अपवित्रः पवित्रो वा सर्वावस्थां गतोपि वा ॥ यः स्मरेत्पुंडरीकाक्षं सवाह्याभ्यंतरः शुचिः ॥ १ ॥ इति मंत्रेण मंडपांतरं प्रोक्ष्य । ईशान्याम् ॐ ब्रह्मणे नमः ॥ ॐ वास्तुपुरुषाय नमः ॥ ॐ क्षेत्रपालाय नमः ॥ इति ब्रह्मवास्तुपुरुषक्षेत्रपालान् संपूज्य॥ ॐ तीक्ष्णदंष्ट्र महाकाय कल्पांतदहनोपम ॥ भैरवाय नमस्तुभ्यमनुज्ञां देहि मे प्रभो ॥ १ ॥ इति प्रार्थयेत् ॥ अथासनादिविधा

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नम् ॥ तत्र तावत् आसनभूमौ कूर्मशोधनं कार्यम् । तद्यथा । जपस्थानभूमिं नवधा कृत्वा पूर्वादिसप्तकोष्ठेषु क्रमेण कवर्ग १ चवर्ग २ टवर्ग ३ तवर्ग ४ पवर्ग ५ यवर्ग ६ शवर्गान् ७ लिखित्वा ईशान्यामष्टमे कोष्ठे 'ल०' 'क्ष०' इति द्वौ वर्णौ विलिख्य मध्यकोष्ठमपि नवधा विभज्य तत्र पूर्वादिषु अष्टदिक्षु अकारादिस्वरद्वयं क्रमेण लिखेत् ॥ यत्र कोष्ठे क्षेत्रस्य वा ग्रामस्य साधकस्य वा नामादिवर्णो भवेत् तदेव कूर्मसुखं जपसिद्धिदं भवति । तत्रैव दीपस्थापनं कुर्य्यात् ॥ यत्र जपकर्ता एक एव तदा कूर्म्ममुखे उपविश्य जपं तत्रैव दीपस्थापनं च कुर्यात् । यत्र बहवो जापकास्तत्र कूर्म्ममुखोपरि दीपमेव स्थापयेत् स्थानाभावात् ॥ एवं कूर्म्मशोधनं दीपस्थानशोधनं च विधाय आसनाधो जलादिना त्रिकोणं कृत्वा तत्र ॐ कूर्म्माय नमः । ॐ ह्रीं आधार शक्तिकमलासनाय नमः । ॐ पृथिव्यै नमः । इति गंधाक्षतपुष्पैः संपूज्य । तदुपर्यनुद्विग्नकरं कुशासनम् १ तदुपरि मृगाजिनम् २ तदुपरि कंबलाद्यासनम् ३ आस्तीर्य्य । स्थापितानां त्रयाणामासनानामुपरि क्रमेण ॐ अनंतासनाय नमः ॥ १ ॥ ॐ विमलासनाय नमः ॥ २ ॥ ॐ पद्मासनाय नमः ॥ ३ ॥ इति मंत्रत्रयेण त्रीन् दर्भान् प्रत्येकं निदध्यात् (काष्ठादिनिषिद्धासनानि वर्जयेत्) एवमासनं संस्थाप्य तत्र प्राङ्मुख उदङ्मुखो वा उपविश्य स्वस्तिकासनपद्मासनवीरासनेष्वन्यतममासनं कुर्यात् ॥ तत्रासनमंत्रः ॥ पृथ्वीति मंत्रस्य मेरुपृष्ठऋषिः । कूर्मो देवता । सुतलं छंदः । आसने विनियोगः ॥ ॐ पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता ॥ त्वं च धारय मां देवि पवित्रं कुरु चासनम् ॥ १ ॥ ततो मूलमंत्रेण शिखां बद्धा आचम्य ॥ ततः पाद्यार्घ्याचमनीयमधुपर्कस्नानार्थं पंचपात्राणि पुष्पादींश्च दक्षिणपार्श्वे संस्थाप्य जलपात्रं व्यजनं छत्रादर्शचामराणि च वामे

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

स्थापयेत् । ततः करद्वये अनामिकामूलयोः कुशपवित्रद्वयं स्वर्णपवित्रद्वयं वा परिधाय स्मार्त्तविधिना द्विराचम्य । प्राणानायम्य । देशकालौ संकीर्त्य ममात्मनः श्रुतिस्मृतिपुराणोक्तफलप्राप्त्यर्थममुककामनासिद्ध्यर्थम् अमुकदेवताप्रीतयेऽमुकमंत्रपुरश्चरणान्त र्गतामुकसंख्यापरिमितविहितामुकमंत्रजपं करिष्ये इति । तदंगत्वेन भूतशुद्धिप्राणप्रतिष्ठाऽन्तर्मातृकाबहिर्मातृकान्यासांश्च करिष्ये इति संकल्प्य । ऋत्विग्भिस्तु देशकालसंकीर्तनांते यजमानेन वृतोहं करिष्यामि इति प्रत्येकं संकल्पः । ततः कृतांजलिपुटः भूतशुद्ध्यादिकर्म्म कुर्यात् । तद्यथा । ॐ सूर्यः सोमो यमः कालः संध्या भूतानि पंच च ॥ एते शुभाऽशुभस्येह कर्मणो मम साक्षिणः ॥ १ ॥ भो देव प्राकृतं चित्तं पापाक्रांतमभून्मम ॥ तान्निस्सारय चित्तान्मे पाप तेस्तु नमोनमः ॥ २ ॥ इति प्रार्थ्य वामभागे ॐ गुरुभ्यो नमः ॥ दक्षिणे ॐ गणेशाय नमः॥ इति नत्वा करयोः ॐ अस्त्राय फडित्यस्त्रं न्यस्य तदुपरि तालत्रयं कृत्वा अंगुष्ठतर्जनीभ्यां शब्दं कुर्वन् ॐ नमः सुदर्शनाय अस्त्रा यफडिति मंत्रेण दिग्बंधनं कृत्वा वह्निप्रकारत्रयं विभाव्य मूलेनाचम्य प्राणानायम्य भूतशुद्धिं कुर्यात्। अथ भूतशुद्धिप्रकारः॥ कुंभकप्राणायामेन मूलाधारात् कुण्डलनीं परदेवतां बिसतंतुनिभां समुत्थाप्य ब्रह्मरंध्रगतां स्मृत्वा हृदयस्थं जीवं प्रदीपकलिकाकारं गृहीत्वा । सुषुम्नामार्गेण ब्रह्मरंध्रं गत्वा । ॐ हंसः सोहामिति मंत्रेण जीवं ब्रह्माणि संयोजयेत् । ततः पादादिजानुपर्यंतं चतुष्कोणं वज्रलांछितं स्वर्णवर्णं पृथ्वीमण्डलम् (लँ) इति भूबीजाढ्यं स्मरेत् ॥ १ ॥ जान्वादिनाभिपर्य्यंतम् अर्द्धचंद्राकारं पद्मद्वयांकितं श्वेतवर्णम् अपां स्थानं सोममंडलम् (वं) इति वरुणबीजाढ्यं स्मरेत्॥२॥नाभ्या दिहृदयपर्यंतं त्रिकोणं स्वस्तिकांकितं रक्तवर्णम् अग्निमंडलं (रं) इति वह्निबीजाढ्यं स्मरेत् ॥ ३ ॥ हृदयादिभ्रूमध्यपर्यंतं वृत्तं षड्

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

बिंदुलांछितं धूम्राभं वायुमंडलम् (यं) वायुबीजाढ्यं स्मरेत् ॥ ४ ॥ भ्रूमध्यादारभ्य ब्रह्मरंध्रांतं वृत्तं स्वच्छं मनोहरम् आकाशमंडलं (हं) व्योमबीजाढ्यं स्मरेत् ॥ ५ ॥ एवं भूतगणं स्मृत्वा ततः पूर्वोक्तभूमंडले पादेंद्रिय १ गमन २ घ्राण ३ गंध ४ ब्रह्म ५ निवृत्ति ६ समान ७ गंतव्यदेशा ८ श्च एवमष्टौ पदार्थाश्चिंत्याः ॥ १ ॥ जलमंडले हस्तेंद्रिय १ ग्रहण २ ग्राह्य ३ रसना ४ रस ५ विष्णु ६ प्रतिष्ठा ७ उदाना ८ ध्येयाः ॥ २ ॥ तेजोमंडले पायु १ विसर्ग २ विसर्जनीय ३ चक्षू ४ रूप ५ शिव ६ विद्या ७ व्याना ८ ध्येयाः ॥ ३ ॥ वायुमंडले उपस्था १ऽऽ नंद २ स्त्री ३ स्पर्शन ४ स्पर्श ५ ईशान ६ शांति ७ अपाना ८ ध्येयाः ॥ ४ ॥ आकाश मंडले वाग् १ वक्तव्य २ं वदन ३ श्रोत्र ४ शब्द ५ सदाशिव ६ शांत्यतीता ७ प्राणा ८ इत्यष्टौ चिंत्याः ॥ ५ ॥ एवं भूतानि संचिंत्य पूर्वपूर्वकार्यस्योत्तरोत्तरकारणे विलापनं ब्रह्मपर्य्यंतं कार्य्यम् । तद्यथा । ' ॐ लंफट् ' इत्यनेन पंचगुणां पृथ्वीमप्सु उपसंहरामीति जले भुवं विलापयेत् ॥ १ ॥ ' ॐ वंहुंफट् ' इति चतुर्गुणा अपोऽग्नौ उपसंहरामीति वह्नौ जलं विलापयेत् ॥ २ ॥ 'ॐ रंहुंफट् ' इति त्रिगुणं तेजो वायौ उपसंहरामीति वह्निं वायौ विलापयेत् ॥३॥ 'ॐयंहुंफट् ' इति द्विगुणं वायुमाकाशे उपसंहरामीति वायुमाकाशे विलापयेत् ॥ ४ ॥ 'ॐ हंहुंफट् ' इत्येकगुणमाकाशमहंकारे उपसंहरामीत्याकाशमहंकारे विलापयेत् ॥ ५ ॥ ॐ अहंकारं महत्तत्वे उपसंहरामीत्यहंकारं महतत्त्वे विलापयेत् ॥ ६ ॥ ॐ महत्तत्वं प्रकृतावुपसंहरामीति महत्तत्वं प्रकृतौ विलापयेत् । ॐ प्रकृतिमात्मनि उपसंहरामीत्यनेन मायामात्मनि विलापयेत् । एवं शुद्धः सच्चिन्मयो भूत्वा वासनामयं पापपूरुषं चिंतयेत् । तद्यथा । वामकुक्षिस्थितं कृष्णमंगुष्ठपरिमाणकम् ॥ ब्रह्महत्याशिरोयुक्तं कनकस्तेयबाहुकम् ॥ १ ॥ मदिरापानहृदयं गुरुतल्पकटी

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

युतम् ॥ तत्संसर्गिपदद्वन्द्वमुपपातकमस्तकम् ॥२॥ खड्गचर्मधरं दुष्टमधोवक्त्रं सुदुःसहम् ॥ एवं पापपूरुषं चिंतयित्वा पूरकप्राणायामे यँ इति वायुबीजेन द्वात्रिंशद्वारं ३२ षोडश १६ वारं वा आवर्तितेन पापपूरुषं शोषयेत् । ततः स्वशरीरयुतं पापं कुंभके रँरँरँर

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सर्वाङ्गे । इति ऋष्यादिन्यासः । अथ षडङ्गन्यासः । ॐ ङँकँखँघँगँनभोवाय्वग्निवार्भूम्यात्मने हृदयाय नमः ॥ ञँचँछँझँजँशब्दस्पर्शरूपरसगंधात्मने शिरसे स्वाहा । णँटँठँढँडँश्रोत्रत्वङ्नयनजिह्वाघ्राणात्मने शिखायै वषट् । नँतँथँधँदँवाक्पाणिपादपायूपस्थात्मने कवचाय हुम् ॥ मँपँफँभँबँवक्तव्यादानगमनविसर्गानंदात्मने नेत्रत्रयाय वौषट् । शँयँरँवँलँहँषँक्षँसँलँ बुद्धिमनोहंकारचित्तात्मने अस्त्राय फट् । एवं षडंगन्यासं कृत्वा । नाभेरारभ्य पादांतम् 'आँ' इति पांशबीजं विन्यसेत् । हृदयादारभ्य नाभ्यंतं 'ह्रीं' इति शक्तिबीजं न्यसेत् । मस्तकादारभ्य हृदयांतम् 'क्रौं' इति सृणिबीजं न्यसेत् ॥ ॐ यँ त्वगात्मने नमः ॥ १ ॥ ॐ रँ असृगात्मने नमः ॥ २ ॥ ॐ लँ मांसात्मने नमः ॥ ३ ॥ ॐ वँ मेदात्मने नमः ॥ ४ ॥ ॐ शँ अस्थ्यात्मने नमः ॥ ५ ॥ ॐ षँ मज्जात्मने नमः ॥ ६ ॥ ॐ सँ शुक्रात्मने नमः ॥ ७ ॥ ॐ हों ओजात्मने नमः ॥ ८ ॥ ॐ हँ प्राणात्मने नमः ॥ ९ ॥ ॐ सँ जीवात्मने नमः ॥ १० ॥ इति हृदि विन्यस्य । ॐ यँरँलँवँशँषँसँहँलँक्षँ इति मूर्द्धादिचरणावधिव्यापकं कृत्वा प्राणशक्तिं देवीं ध्यायेत् । "पाशं चापासृक्कपाले सृणीषूञ्च शूलं हस्तैर्बिभ्रतीं रक्तवर्णाम् ॥ रक्तोदन्वत्पोतरक्तांबुजस्थां देवीं ध्यायेत्प्राणशक्तिं त्रिनेत्राम् ॥ १ ॥ इति ध्यात्वा । हृदि करं निधाय । ॐआँह्रीँक्रौँयँरँलँवँशँषँसँहोंॐ क्षँसँहँ सः ह्रीं ॐ मम प्राणा इह प्राणाः । ॐ आँह्रीँक्रौँयँरँलँवँशँषँसँहों ॐ क्षँसँहँसः ह्रीं ॐ मम जीव इह स्थितः । ॐआँह्रीँक्रौँयँरँलँवँशँषँसँहोंआँक्षँसँहँसःह्रीं ॐ मम सर्वेन्द्रियाणि । ॐ ह्रीँक्रौँयँरँलँवँशँषँसँहों ॐ क्षँसँहँसः ह्रीँॐ मम वाङ्मनश्चक्षुःश्रोत्रजिह्वाघ्राण प्राणा इहागत्य सुखं तिष्ठंतु स्वाहा । इति मंत्रं वारत्रयं पठेत् । ततः ॐॐॐॐॐॐॐॐॐॐॐॐॐॐॐॐॐॐ इति प्रणवस्य

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पञ्चदशावृत्तीः १५ कृत्वा । अनेन मम देहस्य पंचदशसंस्काराः संपद्यन्तामित्युक्त्वा प्राणायामं कुर्य्यात् । इति प्राणप्रतिष्ठा ॥ अथ मातृकान्यासः ॥ तत्र तावदंतर्मातृकान्यासः । ॐ अस्य श्रीअन्तर्मातृकान्यासमंत्रस्य प्रजापतिर्ऋषिः । गायत्रीछंदः । सरस्वती देवता । हलो बीजानि । स्वराः शक्तयः । क्षं कीलकम् । अखिलाप्तये न्यासे विनियोगः । ॐ अँ प्रजापतिऋषये नमः आं शिरसि । ॐ इँ गायत्रीछंदसे नमः ईं वदने । ॐ उँ सरस्वतीदेवतायै नमः ऊँ हृदये । ॐ एँ हलभ्योभ्यो बीजेभ्यो नमः ऐँ गुह्ये । ॐ ओं स्वरशक्तिभ्यो नमः औं पादयोः । ॐ अँ क्षँ कीलकाय नमः अः सर्वाङ्गेषु इति ऋष्यादिन्यासः । अथ करन्यासः । ॐअँकँखँगँघँङँआँ अङ्गुष्ठाभ्यां नमः । ॐइँचँछँजँझँञँईं तर्जनीभ्यां नमः । ॐउँटँठँडँढँणँऊँ मध्यमाभ्यां नमः । ॐएँतँथँदँधँनँऐँ अनामिकाभ्यां नमः । ॐ ओँ पँफँबँभँमँ औं कनिष्ठिकाभ्यां नमः । ॐ अँयँरँलँवँशँषँसँहँक्षँ अः करतलकरपृष्ठाभ्यां नमः । इति करन्यासः । अथ हृदयादिषडङ्गन्यासः ॥ ॐ अँकँखँगँघँङँआँ हृदयाय नमः । ॐइँचँछँजँझँञँईं शिरसे स्वाहा । ॐ उँटँठँडँढँणँऊँ शिखायै वषट् । ॐ एँतँथँदँधँनँऐं कवचायहुम् । ॐ औं पँफँबँभँमँ औं नेत्रत्रयाय वौषट् ॐ अँ यँरँलँवँशँषँसँहँक्षँअःअस्त्रायफट् । इति हृदयादिन्यासः ॥ ततः पूरके प्राणायामे कंठस्थषोडशदलपद्मे ॐ अँआँइँईँउँऊँऋँॠँऌँॡँएँऐँओंऔंअँअः इति षोडशस्वरान् न्यसेत् ॥ कुंभकप्राणायामे हृदयस्थे द्वादशदले ॐ कँ नमः । खँ नमः । गँ नमः । घँ नमः । ङँ नमः । चँ नमः । छँ नमः । जँ नमः । झँ नमः । ञँ नमः । टँ नमः । ठँ नमः । इति द्वादश वर्णान् ॥ नाभौ दशदले ॐ डँनमः । ढँनमः । णँनमः । तँनमः । थँनमः । दँनमः । धँनमः । नँनमः । पँनमः । फँनमः । १० इति डादिफांतान् । तदधोलिंगेषड्दले ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ॐ बँनमः । भँनमः । मँनमः । यँनमः रँनमः । लँनमः । इति वादिलांतान् । आधारे गुदे चतुर्दले ॐ वँनमः । शँनमः । षँनमः । सँनमः । इति वादिसांतान् ॥ रेचके ललाटे द्विदले ॐहँनमः । क्षँनमः । इति द्वौ वर्णौ विन्यसेत् ॥ अथ ध्यानम् ॥ आधारे लिङ्गनाभौ प्रकटितहृदये तालुमूले ललाटे द्वे पत्रे षोडशारे द्विदशदशदले द्वादशार्द्धे चतुष्के ॥ वासान्ते वालमध्ये ड फ क ठ सहिते कण्ठदेशे स्वराणां हंक्षंतत्त्वार्थयुक्तं सकलदलगतं वर्णरूपं नमामि ॥ १ ॥ इत्यंत र्मातृकान्यासः । अथ बहिर्मातृकान्यासः । ऋष्यादिषडंगन्यासः पूर्ववत् । ॐ अँनमः शिरसि ॐआं नमः मुखे ॐइंनमः दक्षिण नेत्रे ॐईंनमः वामनेत्रे ॐउँनमः दक्षिणकर्णे ॐऊँनमः वामकर्णे ॐऋंनमः दक्षिणनासापुटे ॐॠंनमः वामनासापुटे ॐऌँनमः दक्षिणकपोले ॐ ॡँनमः वामकपोले ॐएँनमः ऊर्ध्वोष्ठे ऐंनमः अधरोष्ठे ॐ ओंनमः ऊर्ध्वदंतपंक्तौ ॐऔँ नमः अधोदंतपंक्तौ ॐ अंनमः मूर्ध्नि ॐ अँः नमः मुखवृत्ते ॐ कंनमः दक्षिणबाहुमूले ॐ खंनमः दक्षिणकूर्परे ॐ गंनमः दक्षिणमणिबंधे ॐ घंनमः दक्षिणां गुलिमूले ॐ ङंनमः दक्षिणांगुल्यग्रे ॐ चंनमः वामबाहुमूले ॐ छंनमः वामकूर्परे । ॐ जंनमः वाममणिबंधे ॐ झंनमः वामांगु लिमूले । ॐ ञंनमः वामांगुल्यग्रे ॐ टंनमः दक्षिणपादमूले ॐ ठँनमः दक्षिणजानुनि । ॐ डंनमः दक्षिणगुल्फे ॐ ढंनमः दक्षपदां गुलिमूले । ॐ णंनमः दक्षपादांगुल्यग्रे । ॐ तंनमः वामपादमूले । ॐ थंनमः वामजानुनि । ॐ दंनमः वामगुल्फे ॐ धंनमः वामपा दांगुलिमूले । ॐ नंनमः वामपादांगुल्यग्रे । ॐ पंनमः दक्षपार्श्वे ॐ फंनमः वामपार्श्वे । ॐ बंनमः पृष्ठे ॐ भंनमः नाभौ । ॐ मंनमः उदरे । ॐ यंत्वगात्मने नमः हृदये । ॐ रंअसृगात्मने नमः दक्षांसे । ॐ लंमांसात्मने नमः ककुदि । ॐ वंमेदात्मने नमः वामांसे ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ॐ शंअस्थ्यात्मने नमः हृदयादिदक्षहस्तांतम् ॐ षंमज्जात्मने नमः हृदयादिवामहस्तांतम् । ॐ संशुक्रात्मने नमः हृदयादिपादां
तम् । ॐ हंप्राणात्मने नमः हृदयादिवामपादांतम् । ॐ लंजीवात्मने नमः जठरे । ॐक्षं परमात्मने नमः मुखे । एवं बहिर्मातृका
न्यासं कृत्वा ध्यायेत् । पंचाशल्लिपिभिर्विभक्तमुखदोर्हृत्पद्मवक्षःस्थलां भास्वन्मौलिनिबद्धचंद्रशकलमापीनतुंगस्तनीम् ॥ मुद्रा
क्षगुणंसुधाढ्यकलशंविद्यांचहस्तांबुजैर्विभ्राणांविशदप्रभांत्रिनयनांवाग्देवतामाश्रये ॥ १ ॥ इति ध्यानम् । एवं मातृकान्यासं कृत्वा
तत्तद्देवताकलान्यासंकुर्यात् । "शंभुभक्तश्चेत् श्रीकंठादिमातृकाकलान्यासं वैष्णवस्तु केशवादिन्यासं गणेशभक्तो विघ्नेशादिकला
न्यासं शाक्तश्चेत् निवृत्त्यादिकलान्यासं च कुर्यात् । तत्कलान्यासस्तु स्वस्वप्रयोगेस्पष्टो भविष्यति" एवं तत्ततद्देवताकलान्यासं
कृत्वा प्राणानायम्य स्वमूलमंत्रस्य कल्पोदितान् ऋषिच्छंदोदैवतादिन्यासान् तत्तदङ्गेषु न्यस्य करन्यासं हृदयादिषडङ्गन्यासं च
कृत्वा पीठन्यासं कुर्यात् स्वदेहं पीठमयं विचिंत्य न्यसेत् तद्यथा आधारे ॐ मंमंडूकाय नमः ॥ १॥ लिंगे ॐ कंकालाग्निरुद्राय
नमः ॥२॥ नाभौ कूंकूर्माय नमः ॥३॥ हृदये ॐ आंआधारशक्तये नमः ॥३॥ ॐ अंअनंताय नमः ॥४॥ ॐ धंधरायै नमः ॥५॥
ॐ सुंसुधासिंधवे नमः ॥६॥ ॐ श्वंश्वेतद्वीपाय नमः ॥ ७॥ ॐ सुंसुरांघ्रिपाय नमः ॥८॥ ॐ मंमणिहर्म्याय नमः ॥९॥ ॐ हेंहेम
पीठाय नमः ॥ १० ॥ दक्षांसे ॐ धंधर्म्माय नमः ॥ ११ ॥ वामांसे ॐ ज्ञां ज्ञानाय नमः ॥ १२ ॥ वामोरौ ॐ वैंवैराज्ञाय
नमः ॥ १३ ॥ दक्षोरौ ॐ ऐंऐश्वर्याय नमः ॥ १४ ॥ मुखे ॐ अंअधर्म्माय नमः ॥ १५ ॥ वामपार्श्वे ॐ अंअज्ञानाय नमः
॥ १६ ॥ नाभौ ॐअंअवैराग्याय नमः ॥ १७ ॥ दक्षपार्श्वे ॐ अंअनैश्वर्याय नमः ॥ १८ ॥ पुनर्हृदये ॐ अंअनंताय नमः॥१९॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ॐ तंतत्त्वपद्माय नमः ॥ २० ॥ ॐ आंआनंदमयकंदाय नमः ॥२१॥ ॐ संसंविन्नालाय नमः ॥२२॥ ॐ विंविकारमयकेसरेभ्यो नमः ॥ २३ ॥ ॐ प्रंप्रकृत्यात्मकपत्रेभ्यो नमः ॥२४॥ ॐ पंपंचाशद्वर्णकर्णिकायै नमः ॥२५॥ कर्णिकायाम् ॐ सूंसूर्य्यमंडलाय नमः ॥ २६ ॥ ॐ इंइन्दुमंडलाय नमः ॥ २७ ॥ ॐ पांपावकमंडलाय नमः ॥२८॥ ॐ संसत्त्वाय नमः ॥ २९ ॥ ॐ रंरजसे नमः ॥ ३० ॥ ॐ तंतमसे नमः ॥ ३१ ॥ ॐ आंआत्मने नमः ॥ ३२ ॥ ॐ अंअंतरात्मने नमः ॥ ३३ ॥ ॐ पंपरमात्मने नमः ॥ ३४ ॥ ॐ ह्रीं ज्ञानात्मने नमः ॥ ३५ ॥ ॐ मां मायातत्त्वाय नमः ॥३६॥ ॐ कंकलातत्त्वाय नमः ॥३७॥ ॐविंविद्यातत्त्वाय नमः॥३८॥ॐपं परतत्त्वाय नमः ॥ ३९ ॥ इति पीठदेवताः मानसोपचारैः संपूज्य तत्रैव तत्तत्कल्पोक्तपीठशक्तीर्विन्यस्य संपूज्य ॐ ह्रींनमो भगवते सकलगुणात्मशक्तियुक्तायानन्ताय योगपीठात्मने नमः इत्यासनमंत्रेण व्यापकं कृत्वा स्वहृदये मूलमंत्रदेवतां ध्यायेत् । ध्यानं तु स्वस्वमंत्रोक्तं ज्ञेयम् ॥ एवं ध्यात्वा ॐ लं पृथिव्यात्मकं गंधं समर्पयामि नमः ॥१॥ ॐ हं आकाशात्मकं पुष्पं समर्पयामि नमः ॥ २ ॥ ॐ यं वाय्वात्मकं धूपं समर्पयामि नमः ॥ ३ ॥ ॐ रं वह्न्यात्मकं दीपं समर्पयामि नमः ॥ ४ ॥ ॐवं अमृतात्मकं नैवेद्यं समर्पयामि नमः ॥ ५ ॥ इति मानसोपचारैः संपूज्य यथाशक्ति मूलमंत्रं जपित्वा पुनर्ऋष्यादिकं विधाय गुह्यातिगुह्येत्यादिना देवदक्षिणकरे जपं समर्प्य क्षणं तद्गतमानसः कुंडलीमुत्थाप्य ब्रह्मरंध्रे संयोज्य तदुत्पन्नामृतधाराभिर्हृदय कमलमध्यगतं मंत्रदेवं संतर्प्य कुंडलीं मूलाधारे संस्थाप्य मूलं यथाशक्ति जपित्वा प्रणमेत् ॥ इत्यान्तर्यागविधानम् ॥ अथ बहिर्यागविधानम् ॥ तत्रादौ देशकालौ स्मृत्वा अमुकमंत्रपुरश्चरणकर्मणि अमुकदेवताप्रीत्यर्थं यथासंभवैर्द्रव्यैर्यथाशक्त्यमुकदेव

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तापूजनं वैदिकैस्तंत्रोक्तैश्च मंत्रैः करिष्ये इति संकल्प्य पात्रस्थापनं कुर्यात् । स्ववामाग्रे त्रिकोणषट्कोणवृत्तचतुरस्रमंडलं गंधेन विधाय शंखमुद्रया अवष्टभ्य अमुकदेवार्घ्यमंडलाय नमः । इति संपूज्य । तत्र ॐ फडिति प्रक्षालितमाधारं संस्थाप्य ॐ वह्निमंडलाय दशकलात्मने पात्रासनाय नमः । इति संपूज्य । आधारे पूर्वादिषु दशाग्निकलाः पूजयेत् । ॐ यं धूम्रार्चिकायै नमः ॥ १ ॥ ॐ रं ऊष्मायै नमः ॥ २ ॥ ॐ लं ज्वलिन्यै नमः ॥ ३ ॥ ॐ वं ज्वालिन्यै नमः ॥४॥ ॐ शं विस्फुलिंगिन्यै नमः ॥ ५ ॥ ॐ षं सुश्रियै नमः ॥६॥ ॐ सं सुरूपायै नमः ॥७॥ ॐ हं कपिलायै नमः ॥८॥ ॐ लं हव्यवहायै नमः ॥९॥ ॐ क्षं कव्यवहायै नमः ॥१०॥ इति संपूज्य । ॐ क्लीं महाजलचराय हुंफट् स्वाहा पांचजन्याय नमः । इति मंत्रेण क्षालितं शंखं तत्र संस्थाप्य । ॐ अं सूर्यमंडलाय द्वादशकलात्मने सामान्यार्घ्यपात्राय नमः । इति संपूज्य । पात्रे स्वाग्रादिप्रादक्षिण्येन द्वादशसूर्यकलाः पूजयेत् ॥ ॐ कं भं तापिन्यै नमः ॥ १ ॥ ॐ खं वं तापिन्यै नमः ॥२ ॥ ॐ गं फं धूम्रायै नमः ॥ ३ ॥ ॐ घं पं मरीच्यै नमः ॥ ४ ॥ ॐ ङं नं ज्वालिन्यै नमः ॥ ५ ॥ ॐ चं धं रुच्यै नमः ॥ ६ ॥ ॐ छं दं सुषुम्नायै नमः ॥ ७ ॥ ॐ जं थं भोगदायै नमः ॥ ८ ॥ ॐ झं तं विश्वायै नमः ॥ ९ ॥ ॐ ञं णं बोधिन्यै नमः ॥१०॥ ॐ टं ढं धारिण्यै नमः ॥ ११ ॥ ॐ ठं ढं क्षमायै नमः ॥१२॥ इति संपूज्य । क्षंलंहंसंषंशंवंलंरंयंमंभंबंफंपंनंधंदंथंतंणंढंडंठंटंञंझंजंछंचंडंघंगंखंकंअःअंऔंओंऐंएंऌंलृंऋंॠंऊंउंईंइंआंअं ५१ इति विलोममातृकां मूलमंत्रं विलोमं च पठन् जलमापूर्य्य ॐ सोममंडलाय षोडशकलात्मने अमुकपात्रामृताय नमः । इति संपूज्य । जले षोडश चन्द्रकलाः पूजयेत् । ॐ अं अमृतायै नमः ॥ १॥ ॐ आं मानदायै नमः ॥ २ ॥ ॐ इं पूषायै नमः ॥ ३ ॥ ॐ ईं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तुष्टयै नमः ॥ ४ ॥ ॐ उं पुष्टयै नमः ॥ ५ ॥ ॐ ऊं रत्यै नमः ॥ ६ ॥ ॐ ऋं धृत्यै नमः ॥ ७ ॥ ॐ ॠं शशिन्यै नमः ॥ ८ ॥ ॐ लृं चन्द्रिकायै नमः ॥ ९ ॥ ॐ लॄं कांत्यै नमः ॥ १० ॥ ॐ एं ज्योत्स्नायै नमः ॥ ११ ॥ ॐ ऐं श्रियै नमः ॥ १२ ॥ ॐ ओं प्रीत्यै नमः ॥ १३ ॥ ॐ औं अंगदायै नमः ॥ १४ ॥ ॐ अं पूर्णायै नमः ॥ १५ ॥ ॐ अः पूर्णामृतायै नमः । इति संपूज्य ॥ गंगे च यमुने चैव गोदावरि सरस्वति । नर्मदे सिंधुकावेरि जलेस्मिन्सन्निधिं कुरु ॥ इत्यंकुशमुद्रया सूर्यमंडलात्तीर्थान्यावाह्य हुं इत्यवगुंठ्य मूलेनाष्टधा अभिमंत्र्य फट् इति छोटिकया संरक्ष्य मंत्रोक्तषडंगं संपूज्य नमः इति संपूज्य मूलमष्टधा जपन् मत्स्यमुद्रयाऽऽच्छादयेत्। पुनः वं इति धेनुमुद्रयाऽमृतीकृत्य संरोधिन्या निरुध्य शंखमुसलचक्रमुद्राः प्रदर्श्य महामुद्रया परमीकृत्य लिंगमुद्रां प्रदर्श्य नमेत्। शिवसूर्यार्चने शंखस्थाने शंखेतरताम्रादिपात्रस्थापनं कुर्यात् । इति तंत्रोक्तशंखाद्यर्घ्यपात्रस्थापनम् । ततः शंखाद्दक्षिणभागे प्रोक्षणीपात्रपूरणं कृत्वा तज्जलेनात्मानं पूजासामग्रीं च मूलमंत्रेण प्रोक्ष्य तद्दक्षिणतः पाद्यार्घ्याचमनीयमधुपर्कपात्राणि शंखवत्संस्थाप्य अशक्तश्चेत्तर्हि एकमेव पात्रं संस्थाप्य सामान्यविधिना पूजयेत्। तेषु च वस्तूनि क्षिपेत् । यथा पाद्यपात्रे श्यामाकविष्णुक्रांताब्जदूर्वाः क्षिपेत् । अर्घ्यपात्रे दूर्वातिलदर्भाग्रसर्षपयवपुष्पफलाक्षतगंधान् क्षिपेत् । आचमनीयपात्रे लवंगजातीपत्रकंकोलानि प्रक्षिपेत् । मधुपर्कपात्रे दध्याज्यमधूनि च स्थापयेत् । एवं पूजापात्राणि संपाद्य ॐ जगद्धनिमंत्रमातः स्वाहा ॥ इति घंटां संपूज्य घंटानादं कृत्वा मूलेनाचम्य प्राणानायम्य वामभागे ॐ गुरुभ्यो नमः ॥ १ ॥ पं परमगुरुभ्यो नमः ॥२॥ पं परमेष्ठिगुरुभ्यो नमः ॥ ३ ॥ दक्षिणभागे ॐ गं गणपतये नमः ॥ १ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

इति प्रणम्य पीठे ॐ मंमंडूकादिपरतत्त्वांतपीठदेवताभ्यो नमः । इति पूर्ववत्पीठदेवताः संपूज्य तत्रैव तत्तत्कल्पोक्त पीठशक्तीः पूजयेत् । तत्र ॐ ह्रीं नमो भगवते सकलगुणात्मशक्तियुक्तायानंताय योगपीठात्मने नमः ॥ इति पुष्पांज लिनासनं दत्त्वा तत्र महीद्यौरित्यादिवैदिकैर्मंत्रैस्ताम्रकलशं यथाविधि पूर्णपात्रांतं संस्थाप्य तत्र तत्वायामीति वरुणमावाह्य षोडशोपचारैः संपूज्य तदुपरि पट्टवस्त्रं प्रसार्य्य तत्र मंत्रदेवतायंत्रं तद्गंधेन विलिख्य तन्मध्ये मूलमंत्रेण स्वर्णमयीं मूलमंत्रदेवताप्रतिमां सावयवां स्वर्णादियंत्रं वा अग्न्युत्तारणपूर्वकं स्थापयेत् । अथ अग्न्युत्तारणप्राणप्रतिष्ठाप्रयोगः ॥ आचम्य प्राणानायम्य देशकालौ संकीर्त्य मम आत्मनः श्रुतिस्मृतिपुराणोक्तफलप्राप्त्यर्थममुककामनासिद्ध्यर्थममुकदेवनूतनप्रति माया यंत्रस्य वा अग्न्युत्तारणपूर्वकं प्राणप्रतिष्ठां करिष्ये । इति संकल्प्य । यंत्रं मूर्तिं वा ताम्रपात्रे निधाय घृतेनाभ्यज्य तदुपरि दुग्धधारां जलधरां च दद्यात् । तत्र मंत्राः । ॐ स॒मु॒द्र॒स्य॒त्त्वाव॑क॒याग्ने॒परि॑व्ययामसि । पा॒व॒कोऽअस्म्मभ्य॑ꣳशि॒वोभ॑व ॥ १ ॥ हि॒मस्य॑ त्वा ज॒रायु॒णाग्ने॒परि॑व्ययामसि ॥ पा॒व॒कोऽअ॒स्म्मब्भ्य॑ꣳ शि॒वो भ॑व॥ २ ॥ उपज्मन्नुप॑वेत॒सेव॑तरन॒दीष्ष्वा॑ । अग्ने॑पि त्तम॒पामसि॒मण्डू॑कि॒ताभि॒राग॑हि॒सेमन्नो॑ य॒ज्ञम्पा॑व॒कव॑र्णꣳशि॒वङ्क॑धि ॥ ३ ॥ अ॒पामि॒दन्न्यय॑नꣳसमु॒द्रस्य॑नि॒वेश॑नम् ॥ अ॒न्न्याँ स्ते॑ऽअ॒स्म्मत्त॑पन्तुहे॒तयः॑ ॥ पा॒व॒कोऽअ॒स्म्मब्भ्य॑ꣳशि॒वो भ॑व ॥ ४ ॥ अग्ने॑पावक॒रोचि॑षाम॒न्द्रया॑दे॒वजि॒ह्वया॑ ॥ आदे॒वान्व॑क्षि॒ यक्षि॑च ॥ ५ ॥ सन॑ः पावकदीदि॒वोग्ने॑दे॒वाँ २ ॥ ऽइ॒हाव॑हउप॑य॒ज्ञꣳहवि॒श्श्चन॑ः ॥ ६ ॥ पा॒व॒कया॒यश्श्चि॒तय॑न्त्याकृ॒पाक्षाम॑न्न्रुरुचऽ

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

उषसोनभानुना ॥ तूर्व्वन्नयामन्नेतशस्यनूरणऽआयोघृणेनतंतृषाणोऽअजरं÷॥ ७ ॥ नमस्तेहरसेशोचिषेनमस्तेऽअस्त्वर्चिषे ॥ अन्याँ स्तेऽअस्म्मत्तपन्तुहेतयं÷पावकोऽअस्म्मभ्यँ शिवोभव ॥ ८ ॥ नृषदेव्वेडप्सुषदेव्वेड्ढर्हिषदेव्वेड्नसदेव्वेड्स्वर्व्विदेव्वेट् ॥ ९ ॥ येदेवादेवानांऽयज्ञियानाँसंव्वत्सरीणमुपंभागमासते ॥ अहुतादोहविषोयज्ञेऽअस्म्मन्त्स्वयम्पिबन्तुमधुनोघृतस्यं ॥१० ॥ येदेवादेवेष्वधिदेवत्त्वमायन्येब्रह्मणःपुरऽएतारोऽअस्य ॥ येब्भ्योनऽऋतेपवतेधामकिञ्चन ननेदिवोनपृथिव्याऽअधिस्नुषु ॥ ११ ॥ प्राणदाऽअपानदाव्यानदाव्वँचोदाव्वँरिवोदाः ॥ अन्याँस्तेऽअस्म्मत्तपन्तुहेत्तयं÷पावकोऽअस्म्मभ्यँ शिवोभव ॥१२॥ इत्यग्न्युत्तारणसूक्तम्॥अथ प्राणप्रतिष्ठा॥अस्य श्रीप्राणप्रतिष्ठामंत्रस्य ब्रह्मविष्णुमहेश्वरा ऋषयः।ऋग्यजुःसामानि च्छंदांसि॥क्रियामयवपुःप्राणाख्या देवताः। आँबीजम्। ह्रींशक्तिः क्रौं कीलकम्। अस्यां नूतनमूर्त्तौ प्राणप्रतिष्ठापने विनियोगः। ॐ आँह्रीक्रौंयँरलँवँशँषँसँहोंहँसः ॥१३॥ अस्या अमुकदेवप्रतिमायाः प्राणा इह प्राणाः ॥ पुनः ॐ आँह्रीक्रौंयँरलँवँशँषँसँहोंहँसः ॥१४॥ अस्या अमुकदेवप्रतिमाया जीव इह स्थितः। पुनः ॐ आँह्रीक्रौंयँरँ० १४ इत्यादि अस्या अमुकदेवप्रतिमायाः सर्वेंद्रियाणि वाङ्मनस्त्वक्चक्षुःश्रोत्रजिह्वाघ्राणपाणिपाद पायूपस्थानि इहैवागत्य सुखं चिरं तिष्ठंतु स्वाहा॥ ॐ मनोंजूतिर्जुषतामाज्यंस्यबृहस्पतिंर्य्यज्ञमिमन्तनोत्वरिंष्टंयज्ञठ्ँसमिमंदधातु॥ विश्वेदेवासऽइहमादयन्तामोऽम्प्रतिष्ठ ॥ १ ॥ एषवैप्रतिष्ठानामयज्ञोयत्रैतेनयज्ञेनयजन्ते सर्वमेव प्रतिष्ठितं भवति ॥ २ ॥ इति प्रति

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ष्ठाप्य। पंचोपचारैः संपूज्य संस्कारसिद्धये पञ्चदशप्रणवावृत्तीः कृत्वा अनेन अस्या अमुकदेवप्रतिमायाः गर्भाधानादिपंचदशसं स्कारान्संपादयामि इति वदेत्। एवं प्राणप्रतिष्ठां कृत्वा षोडशोपचारैः राजोपचारैर्वा पूजयेत्।" तत्र विष्णुं पुरुषसूक्तेन॥ शिवं त्र्यंब कमंत्रेण पंचाक्षरेण वा॥ गणपतिं तन्मूलमंत्रेण। देवीं श्रीसूक्तेन सूर्य्यं पुरुषसूक्तेन तन्मूलमंत्रेण वा षोडशोपचारैः पूजयेत्। सर्वेषां वा पुरुषसूक्तेन पूजाकरणम्" ॥ अथ सर्वदेवोपयोगिषोडशोपचारपूजाप्रयोगः ॥ ॐ आत्मसंस्थमजं शुद्धं त्वामहं परमेश्वर॥ अरण्या मिवहव्याशं मूर्तावावाहयाम्यहम् ॥१॥ ॐ सहस्रं शीर्षापुरुष÷सहस्राक्षंसहस्रपात् ॥ सभूमिंठ्सर्व्वतस्पृत्वात्यतिष्ठद्दशाङ्गुलम् ॥१॥ ततो मूलमंत्रमुच्चार्य्य। ॐ भूर्भुवः स्वः अमुकदेवमावाहयामि। इत्यावाह्य आवाहनमुद्रां प्रदर्शयेत्। इत्यावाहनम् ॥ १ ॥ तवेयं महिमा मूर्त्तिस्तस्यां त्वां सर्वगं प्रभो। भक्तिस्नेहसमाकृष्टदीपवत्स्थापयाम्यहम्। ततो मूलमुच्चार्य्य। ॐ भूर्भुवः स्वः अमुकदेव इह ति ष्ठ। इति स्थापनीमुद्रया स्थापनम् ॥२॥ "देवीपूजायां स्त्रीलिंगेनोच्चारणं कार्यम्"॥ अनन्या तव देवेश मूर्तिशक्तिरियं प्रभो॥ सान्नि ध्यं कुरु तस्यां त्वं भक्तानुग्रहतत्पर ॥ १ ॥ ततो मूलं पठित्वा । ॐभू० अमुकदेव इह संनिधेहि इति तन्मुद्रया संनिधापनम ॥ ३ ॥ आज्ञया तव देवेश कृपांभोधे गुणांबुधे ॥ आत्मानंदैकतृप्तं त्वां निरुणध्मि पितर्गुरो ॥ १ ॥ मूलं पठित्वा ॐ भू०अमुक देव इह संनिरुध्यस्व इति तन्मुद्रया संनिरोधनम् ॥ ४ ॥ अज्ञानाद्दुर्मनस्याद्वा वैकल्यात्साधनस्य च ॥ यदपूर्णं भवेत्कृत्यं तदप्यभिमुखो भव ॥ १ ॥ ततो मूलं पठित्वा ॐ भू० अमुकदेव इह संमुखो भव इति तन्मुद्रया सन्मुखीकरणम् ॥ ५ ॥ दशापी यूषवर्षिण्या पूरयन्यज्ञविष्टरम् ॥ मूर्तावायज्ञसंपूर्तेः स्थितो भव महेश्वर ॥ १ ॥ इति प्रार्थनीमुद्रया प्रार्थयेत्। अभक्तवाङ्मनश्चक्षुः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

श्रोत्रदूरातिसद्द्युते ॥ स्वतेजःपञ्जरेणाशु वेष्टितो भव सर्वतः ॥ १ ॥ मूलं पठित्वा ॐ भू० अमुकदेव अवगुंठितो भव । इति तन्मुद्रया अवगुंठनम् ॥ ६ ॥ ततः षडङ्गेन सकलीकरणम् । मूलेन धेनुमुद्रया अमृतीकरणम् । मूलेन महामुद्रया परमीकरणम् यस्य दर्शनमिच्छंति देवाः स्वाभीष्टसिद्धये । तस्मै ते परमेशाय स्वागतं स्वागतं च मे ॥ १ ॥ मूलं पठित्वा ॐ भू० अमुकदेव सुस्वागतमिति सुस्वागतम्॥७॥"देवदेव महाराज प्रियेश्वर प्रजापते॥आसनं दिव्यमीशान दास्येऽहं परमेश्वर॥१॥" ॐपुरुषऽएवेदꣳसर्वंयद्भूतंयच्चभाव्यम् ॥ उतामृतत्वस्येशानोयदन्नेनातिरोहति॥मूलं पठित्वा ॐभू०अमुकदेवाय इदमासनम्।इत्यासनं दद्यात्॥२॥ "यद्भक्तिलेशसंपर्कात्परमानंदविग्रहम् ॥ तस्मै ते चरणाब्जाय पाद्यं शुद्धाय कल्पये" ॐ एतावानस्यमहिमातोज्यायाँश्चपूरुषः ॥ पादोस्यविश्वाभूतानित्रिपादस्यामृतन्दिवि ॥ १ ॥ मूलं पठित्वा ॐभू० अमुकदेवाय नमः पाद्यं समर्पयामि । इति पाद्यम् ॥ ३॥ "तापत्रयहरं दिव्यं परमानंदलक्षणम्॥तापत्रयविनिर्मुक्तं तवार्घ्यं कल्पयाम्यहम्॥"ॐ त्रिपादूर्ध्वऽउदैत्पुरुषःपादोस्येहाभवत्पुनः॥ ततोविष्वङ्व्यक्रामत्साशनानशनेऽअभि ॥ मूलं पठित्वा ॐ भू० अमुकदेवाय० इदमर्घ्यम् । इत्यर्घ्यम् ॥ ४ ॥ "वेदानामपि वेद्याय देवानां देवतात्मने ॥ आचामं कल्पयामीश शुद्धानां शुद्धिहेतवे ॥" ततोविराडजायतविराजोऽअधिपूरुषः । सजातोऽअत्यरिच्यतपश्चाद्भूमिमथोपुरः ॥ मूलं पठित्वा ॐ भू० अमुकदेवाय० आचमनीयं० इत्याचमनम्॥ ५ ॥ "सर्वकालुष्यहीनाय परि

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पूर्णसुखात्मने॥मधुपर्कमिदं देव कल्पयामि प्रसीदमे॥"मूलं पठित्वा ॐ भू० अमुकदेवाय० मधुपर्कं स० इति मधुपर्कं दत्त्वाचमनं दद्यात् ॥६॥"ॐस्नेहं गृहाण स्नेहेन लोकनाथ महाशय॥सर्वलोकेषु शुद्धात्मन्ददामि स्नेहमुत्तमम्॥"मूलंपठित्वा ॐभू०अमुकदेवाय०सुगंधतैलं स० इति सुगंधतैलं दद्यात्॥७॥"गङ्गासरस्वतीरेवापयोष्णीनर्मदाजलैः॥स्नापितोऽसि मया देव तथा शान्तिं कुरुष्व मे" ॥ ॐतस्माद्यज्ञात्सर्व्वहुतः सम्भृतम्पृषदाज्यम् ॥ पशूँस्ताँश्चक्रेवायव्यानारण्याग्राम्याश्चये ॥ मलं पठित्वा ॐभू० अमुकदेवाय स्नानं स० इति स्नानम् ॥ ८ ॥ अथ पयःस्नानम् । "कामधेनुसमुत्पन्नं सर्वेषां जीवनं परम् ॥ पावनं यज्ञहेतुश्च पयः स्नानार्थमर्पितम्॥"ॐ पयः पृथिव्याम्पयऽओषधीषु ॥ पयोदिव्यन्तरिक्षेपयोधात्पयस्वतीष्प्रदिशः सन्तुमह्यम् ॥ १ ॥ मूलं पठित्वा ॐभू० अमुकदेवाय पयःस्नानं स० ॥ ९ ॥ दधिस्नानम् । "पयसस्तु समुद्भूतं मधुराम्लं शशिप्रभम् ॥ दध्यानीतं मया देव स्नानार्थं प्रतिगृह्यताम्॥"ॐदधिक्राव्णोऽअकारिषञ्जिष्णोरश्वस्यवाजिनः॥सुरभिनोमुखाकरत्प्रणआयूꣳषितारिषत्॥ मूलंपठित्वा ॐभू०अमुकदेवाय दधिस्नानं स० ॥ १० ॥ अथ घृतस्नानम् ।"नवनीतसमुत्पन्नं सर्वसन्तोषकारकम् ॥ घृतं तुभ्यं प्रदास्यामि स्नानार्थं प्रतिगृह्यताम्"ॐ घृतम्मिमिक्षेघृतमस्ययोनिर्घृतेश्रितोघृतम्वस्यधाम ॥ अनुष्वधमावह मादयस्वस्वाहा कृतंवृषभंवक्षिहव्यम् ॥ मूलं पठित्वा ॐ भू०अमुकदेवाय घृतस्नानं स० ॥११॥ अथ मधुस्नानम्।"तरुपुष्पसमुद्भूतं सुस्वादु मधुरं मधु ॥ तेजःपुष्टिकरं दिव्यं स्नानार्थं प्रतिगृह्यताम्" ॐ मधुव्वाताऽऋतायतेमधुक्षरन्तिसिन्धवः॥माध्वीर्न्नःसन्त्वोषधीः ॥ ॐमधुनक्तमुतोषसोमधुमत्पार्थिवꣳरजः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

जं÷ ॥ मधुद्यौरस्तुनः पिता ॥ ॐमधुमान्नोव्वनस्प्पतिर्म्मधुमाँ ॥ ऽअस्तुसूर्य्य÷ ॥ माध्वीर्गावोभवन्तुनः ॥ मूलं पठित्वा ॐभू० अमुकदेवाय० मधुस्नानं स० ॥ १२ ॥ अथ शर्करोदकस्नानम् ॥ " इक्षुसारमुद्भूता शर्करा पुष्टिकारिका ॥ मालापहारिका दिव्या स्नानार्थं प्रतिगृह्यताम्"॥ॐअपारसमुद्वयसꣳसूर्य्येसन्तꣳसमाहितम् ॥ अपाꣳरसस्ययोरसस्तंव्वोगृह्णाम्म्युत्तममुपयामगृहीतोसीन्द्रायत्त्वा ॥ जुष्टंगृह्णाम्येषतेयोनिरिन्द्रायत्त्वायुष्टृतमम् ॥ मूलं पठित्वा ॐ भू०अमुकदेवाय० शर्करोदकस्नानं स० ॥ १३ ॥ अथ पञ्चामृतस्नानम् ॥ "पयो दधि घृतं चैव मधु च शर्करायुतम् ॥ पञ्चामृतं मया नीतं स्नानार्थं प्रतिगृह्यताम् ॥" ॐपञ्चनद्यःसरस्वतीमपियन्तिसस्रोतसः ॥ सरस्वतीतुपञ्चधासोदेशेभवत्सरित् ॥ मूलं पठित्वा ॐ भू० अमुकदेवाय०पञ्चामृतस्नानं स० ॥ १४ ॥ अथ गन्धोदकस्नानम् ॥ "मलयाचलसंभूतं चन्दनागुरुसंभवम् ॥ चन्दनं देवदेवेश स्नानार्थं प्रतिगृह्यताम् ॥" ॐगन्धद्वारांदुराधर्षांनित्यपुष्टांकरीषिणीम् ॥ ईश्वरींसर्वभूतानांतामिहोपह्वयेश्रियम् ॥ मूलं पठित्वा ॐ भू० अमुकदेवाय० गंधोदकस्नानं स० ॐवरुणस्योत्तम्भनमसिव्वरुणस्यस्कंभसर्ज्जनीस्थोव्वरुणस्यऽऋतसदन्यसि ॥ व्वरुणस्यऽऋतसदनमसिव्वरुणस्यऽऋतसदनमासीद ॥ मूलं पठित्वा ॐ भू० अमुकदेवाय शुद्धोदकस्नानं स० ॥ एवं स्नानं समर्प्य ॥ १५ ॥ शिवसूर्यातिरिक्तदेवेषु शंखेनाभिषेकं कुर्य्यात् ॥ अथाभिषेकः । हरिः ॐ ॐ सहस्रशीर्षा० ॥ १ ॥ पुरुषए० ॥२॥ एतावान० ॥३॥ त्रिपादूर्ध्व०॥४॥ततोव्वि० राड०॥५॥तस्मा

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यज्ञात्स० ॥६॥ तस्माद्यज्ञात्सर्व्वहुत० ॥ ७ ॥ तस्मादश्वाऽअजायन्त० ॥ ८ ॥ तꣳयज्ञम्बर्हिषि० ॥९॥ यत्पुरुषꣳव्यदधुःकति धा० ॥ १० ॥ ब्राह्मणोस्यमुखमासीद्० ॥ ११ ॥ चन्द्रमामनसोजातश्चक्षोः० ॥ १२ ॥ नाभ्याऽआसीदन्तरिक्षꣳ ॥ १३ ॥ यत्पुरुषेणहविषा० ॥ १४ ॥ सप्तास्यासन्परिधयस्त्रिः० ॥ १५ ॥ यज्ञेनयज्ञमयजन्त० ॥ १६ ॥ एवं पुरुषसूक्तेन वा अथर्वशिरसा तत्तन्मूलमंत्रेण वा यथाशक्ति अभिषेकं कृत्वा । ॐ अनेन अभिषेककर्म्मणामुकदेवता प्रीयताम् । इति समर्प्य आचमनं दद्यात् ॥ वस्त्रम् । "सर्वभूषादिके सौम्ये लोकलज्जानिवारणे ॥ मयोपपादिते तुभ्यं वाससी प्रतिगृह्यताम् ॥" ॐ तस्माद्यज्ञात्सर्व्वहुतऽऋचःसामानियज्ञिरेछन्दाꣳसियज्ञिरेतस्माद्यजुस्तस्मादजायत । मूलं पठित्वा ॐ भू०अमुकदेवाय वस्त्रं स०(आचमनम्) ॥ १६ ॥ "पीतं विष्णौ सितं शंभौ रक्तं विघ्नार्कशक्तिषु ॥ सच्छिद्रं मलिनं जीर्णं त्यजेत्तैलादिदूषितम्" ॥यज्ञोपवीतम्॥"नवभिस्तन्तुभिर्युक्तं त्रिगुणं देवतामयम् ॥ उपवीतं चोत्तरीयं गृहाण परमेश्वर ॥" ॐतस्मादश्वाऽ अजायन्तयेकेचोभयादतः ॥ गावो ह्यजिरेतस्मात्तस्माज्जाताऽअजावयः÷ ॥ मूलं पठित्वा ॐ भू० अमुकदेवाय० यज्ञोपवीतं समर्पयामि ॥ १७ ॥ (आचमनम्) ॥ गंधम् "श्रीखण्डं चन्दनं दिव्यं गन्धाढ्यं सुमनोहरम्॥ विलेपनं सुरश्रेष्ठ चन्दनं प्रतिगृह्यताम् " । ॐतंयज्ञम्बर्हिषिप्रौक्षन्पुरुषञ्जातमग्रतः÷ ॥ तेनदेवाऽअयजन्तसाध्याऽऋषयश्चये॥मूलं पठित्वा ॐभू०अमुकदेवाय गंधं समर्पयामि ॥१८॥"अंगुष्ठौ कनिष्ठामूल

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ल्यौ गंधमुद्रा' अक्षतान् "अक्षताश्च सुरश्रेष्ठ कुङ्कुमाक्ताः सुशोभिताः ॥ मया निवेदिता भक्त्या गृहाण परमेश्वर॥" ॐ अक्षन्नमीमदन्त ह्यवप्रियाऽअधूषत॥ अस्तोषतस्वभानवोविप्रानविष्ट्यामतीयोजान्विन्द्रतेहरी ॥ मूलं पठित्वा ॐ भू० अमुकदेवाय अक्षतान्स० ॥ १९ ॥ पुष्पाणि । "माल्यादीनि सुगन्धीनि मालत्यादीनि वै प्रभो ॥ मया नीतानि पुष्पाणि गृहाण परमेश्वर ॥ " ॐ यत्पुरुषं व्यदधुःकतिधाव्यकल्पयन् ॥ मुखङ्किमस्यासीत्किबाहूकिमूरूपादाऽउच्येते । मूलं पठित्वा ॐ भू० अमुकदेवाय पुष्पाणि समर्पयामि ॥ २० ॥ "तर्जन्यंगुष्ठयोगेन पुष्पमुद्रा" "पुष्पं पत्रं फलं देवे न प्रदद्यादधोमुखम् ॥ पुष्पांजलौ न तद्दोषस्तथापर्य्युषित तस्य च"॥ अत्रावसरे तत्तत्प्रयोगोक्तामावरणपूजां कृत्वा धूपादिनिवेदनं कार्यम्। धूपम्॥ "वनस्पतिरसोद्भूतो गन्धाढ्यो गन्धउत्तमः। आघ्रेयः सर्वदेवानां धूपोऽयं प्रतिगृह्यताम्"॥ ॐ ब्राह्मणोस्यमुखमासीद्बाहूराजन्युःकृतः॥ ऊरूतदस्ययद्वैश्यःपद्भ्याᳬशूद्रोऽअजायत। मूलं पठित्वा ॐ भ० अमुकदेवाय सांगाय० धूपं समर्पयामि ॥ २१ ॥ 'तर्जनीमूलयोरंगुष्ठयोगो धूपमुद्रा' दीपम् । "ॐ सुप्रकाशो महादीपः सर्वतस्तिमिरापहः ॥ सबाह्याभ्यंतरं ज्योतिर्दीपोयं प्रतिगृह्यताम्" ॥ ॐ चन्द्रमामनसोजातश्चक्षोःसूर्य्योऽअजायत ॥ श्रोत्राद्वायुश्च प्राणश्चमुखादग्निरजायत ॥ मूलं पठित्वा ॐ भू० अमुकदेवाय सांगाय० दीपं स० ॥ २२ ॥ "घृतदीपो दक्षिणे स्यात्तैलदीपस्तु वामतः ॥ सितवर्तियुतो दक्षे वामांगे रक्तवर्तिका"॥ 'मध्यमांगुष्ठयोगो दीपमुद्रा' नैवेद्यम् । ततः स्वर्णादिभा

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

जने देवताग्रे देवदक्षिणतो वा साज्यं सशर्करं पायसादि नैवेद्यं परिवेष्य ॐ 'यं' इति वायुबीजेन द्वादशवाराभिमंत्रितजलेन प्रोक्ष्य तेनैव 'यं' बीजेन नैवेद्यदोषं संशोष्य दक्षिणकरे 'रं' इति बीजं विचिंत्य दक्षकरपृष्ठे वामकरं दत्वा नैवेद्यं प्रदर्श्य तेनैव 'रं' इति अग्निबीजोत्थाग्निना दोषं दग्ध्वा वामकरे 'वं' इति बीजं ध्यात्वा तत्पृष्ठे दक्षहस्तं दत्वा नैवेद्यं प्रदर्श्य 'वं' इति सुधाबीजोत्थामृतप्लुतं स्मृत्वा मूलमंत्रेण प्रोक्ष्य तत्स्पृष्ट्वाऽष्टवारं मूलमंत्रं प्रजप्य धेनुमुद्रां प्रदर्श्य संपूज्य देवे पुष्पांजलिं दत्वा देवस्योद्धृतं तेजः स्मृत्वा वामांगुष्ठस्पृष्टनैवेद्यं सजलदक्षहस्तेन "सत्पात्रसिद्धं सुहविर्विविधानेकभक्षणम्। निवेदयामि देवेश सानुगाय गृहाण तत् ॥" ॐ नाभ्यांऽआसीदन्तरिक्षꣳशीर्ष्णोद्यौःसमवर्त्तत॥पद्भ्याम्भूमिर्द्दिशꣳश्रोत्रात्तथालोकाꣳ॥ अकल्पयन् ॥ १ ॥ ॐ सांगायामुकदेवाय नमः इदं नैवेद्यं समर्पयामि इति पठित्वा भूतले देवदक्षिणे जलं क्षिप्त्वा नैवेद्यमुद्रां प्रदर्शयेत् । 'अनामामूलयोरंगुष्ठयोगो नैवेद्यमुद्रा' ततः सपुष्पाभ्यां कराभ्यां भक्ष्यपात्रमुद्धरन् 'निवेदयामि भवते जुषाणेदं हविर्हरे' ॥ इति मंत्रेण ग्रासमुद्रां प्रदर्श्य वामहस्तेन पद्माभां मुद्रां कृत्वा दक्षिणहस्तेन [ॐ प्राणाय स्वाहा इति प्राणमुद्रां प्रदर्शयेत्] ॥१॥ [ॐ अपानाय स्वाहा] इत्यपानमुद्रां प्रदर्शयेत् ॥ २ ॥ [ॐ उदानाय स्वाहा] इत्युदानमुद्रां प्रदर्शयेत् ॥ ३ ॥ [ॐ व्यानाय स्वाहा] इति व्यानमुद्रां प्रदर्शयेत् ॥ ४ ॥ [ॐ समानाय स्वाहा] इति समानमुद्रां प्रदर्शयेत् ॥ ५ ॥ ततः अंतःपटं दत्वा—ब्रह्मेशाद्यैः परित उरुभिः सूपविष्टैः समैतैर्लक्ष्म्या सिंजद्वलयकरया सादरं वीज्यमानः ॥ नर्मक्ष्वेलीप्रहसनमुखैर्व्याप्नुवन्पंक्तिमध्यं भुंक्ते पात्रे कनकघटिते षड्रसं श्रीरमेशः ॥ १ ॥ शालीभक्तं सुपक्वं शिशिरकरसितं पायसापूपसूपं लेह्यं पेयं च चोष्यं सितमृ

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तफलं द्वारिकाद्यं सुखाद्यम् ॥ आज्यं प्राज्यं सभोज्यं नयनरुचिकरं राजिकैलामरीचस्वादीयः शाकराजीपरिकरममृताहारजोषं जुषस्व ॥ २ ॥ इति नैवेद्यं समर्प्य ॥ आचमनम् ॥ "समस्तदेवदेवेश सर्वतृप्तिकरं परम् ॥ अखंडानंदसंपूर्ण गृहाण जलमुत्तमम् ॥ १ ॥" इत्याचमनं दद्यात् । इति नैवेद्यम् ॥ अत्र साग्निकश्चेत्तदाग्नौ होमं वैश्वदेवं च कृत्वा मूर्त्तौ देवे वह्निं नियोज्याचमनोदकं दद्यात् । ततो नैवेद्यांशं तत्तदुच्छिष्टभोजने निवेदयेत् । तद्यथा । विष्णोरुच्छिष्टं विष्वक्सेनाय ॥१॥ शिवस्योच्छिष्टं चंडेश्वराय ॥२॥ सूर्यस्योच्छिष्टं चंडांशवे ॥३॥ गणेशस्योच्छिष्टं वक्रतुंडाय ॥४॥ शक्तेरुच्छिष्टं शेशिकायै निवेदयेत ॥२३॥ तांबूलम् । "पूगीफलं महद्दिव्यं नागवल्लीदलैर्युतम् ॥ एलाचूर्णादिसंयुक्तं तांबूलं प्रतिगृह्यताम्" । मूलं पठित्वा ॐ भू० अमुकदेवाय नमः॥ ताम्बूलं समर्पयामि ॥ २४ ॥ फलम् । "इदं फलं मया देव स्थापितं पुरतस्तव ॥ तेन मे सफलावाप्तिर्भवेज्जन्मनि जन्मनि" । ॐ याः फलिनीरुर्याऽअफलाऽअपुष्पायाश्च पुष्पिणीः ॥ बृहस्पतिप्रसूतास्तानोमुञ्चन्त्वꣳहसः । मूलं पठित्वा ॐ भू० अमुकदेवाय० फलं समर्पयामि ॥ २५ ॥ छत्राद्यर्पणम् ॥ "बुद्धिः सवासना कृत्ता दर्पणं मंगलानि च ॥ मनोवृत्तिर्विचित्रा ते नृत्यरूपेण कल्पिता ॥ १ ॥ ध्वनयो गीतरूपेण शब्दा वाद्यप्रभेदतः ॥ छत्राणि नवपद्मानि कल्पितानि मया प्रभो ॥ २ ॥ सुषुम्ना ध्वजरूपेण प्राणाद्याश्चामरा मताः ॥ अहंकारोंगजत्वेन वेगः कृतो रथात्मना ॥३॥ इंद्रियाण्यश्वरूपाणि शब्दादिरथवर्त्मना ॥ मनः प्रग्रहरूपेण बुद्धिः सारथिरूपतः ॥ ४ ॥ सर्वमन्यत्तथा कृत्तं तवोपकरणात्मना ॥ एवं सार्द्धचतुष्टयश्लोकान् पठित्वा छत्रादि

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

समर्पयेत् ॥२६॥ दक्षिणा"हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः।अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे" ॥ ॐ हिरण्यगर्भः समवर्त्तताग्रे भूतस्य जातः पतिरेकऽआसीत्॥सदाधारपृथिवीन्द्यामुतेमाङ्कस्मै देवायहविषा विधेम ॥ मूलं पठित्वा ॐ भू० अमुकदेवाय दक्षिणां समर्पयामि इति हिरण्यादिदक्षिणां दद्यात् ॥ २७ ॥ कर्पूरार्तिक्यम् ॥ "कदलीगर्भसंभूतं कर्पूरं च प्रदीपितम् । आरार्तिक्यमहं कुर्वे पश्य मे वरदोभव" ॥ ॐ इदꣳहविर्ऽप्रजननम्मेऽअस्तुदशवीरꣳसर्व्वगणꣳस्वस्तये ॥ आत्मसनिप्रजासनिपशुसनिलोकसन्त्यभयसनिअग्निꣳप्रजाम्बहुलाम्मेकरोत्त्वन्नम्पयोरेतोऽअस्म्मासुधत्त॥मूलं पठित्वा ॐभू० अमुकदेवाय कर्पूरारार्तिक्यं प्रदर्शयामि ॥ २८ ॥ प्रदक्षिणा।"यानि कानि च पापानि जन्मान्तरकृतानि वै।तानि सर्वाणि नश्यन्तु प्रदक्षिणपदेपदे॥" ॐ सप्तास्यासन्परिधयस्त्रिꣳसप्तसमिधःकृताः ॥ देवायद्यज्ञन्तन्वानाऽअबध्नन्पुरुषम्पशुम् ॥ मूलं पठित्वा ॐ भू० अमुकदेवाय० प्रदक्षिणां समर्पयामि ॥ विष्णौ चतस्रः प्रदक्षिणाः ४ शिवे तिस्रः ३ दुर्गायामेका १ गणेशे तिस्रः ३ रवौ सप्त ७ प्रदक्षिणाः कार्याः ॥ २९ ॥ नानापत्रपुष्पैः पुष्पांजलिः॥"नानासुगन्धपुष्पाणि यथाकालोद्भवानि च। पुष्पाञ्जलिं मया दत्तं गृहाण परमेश्वर ॥" ॐ यज्ञेनयज्ञमयजन्तदेवास्तानिधर्म्माणिप्रथमान्यासन् ॥ तेहनाकम्महिमानꣳसचन्तयत्रपूर्व्वेसाद्ध्याꣳसन्तिदेवाꣳ ॥मूलं पठित्वा ॐ भू० अमुकदेवाय पुष्पांजलिं स० ॥ ३० ॥ प्रणामः। 'ॐ प्रपन्नं पाहि मामीश भीतं मृत्युग्रहार्णवात् ॥' इति वदन्साष्टांगप्रणामेना

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

त्मानं निवेदयेत् ॥ ३१ ॥ ततस्तत्तत्स्तुतिपाठेन देवं स्तुत्वा ब्रह्मार्पणं कुर्यात् । एवं जपदेवतापूजां कृत्वा मालायाः संस्कारान्कुर्यात् ॥ अथ मालासंस्कारः । तत्रादौ कुशोदकसहितैः पंचगव्यैर्मालां प्रक्षाल्य अश्वत्थपत्रनवकैरचिते कमले स्थापयित्वा ॐ ह्रीँ अँआँइँईँउँऊँऋँॠँऌँॡँ एँऐओँ औँअँअः कँखँगँघँङँ चँछँजँझँञँ टँठँडँढँणँ तँथँदँधँनँ पँफँबँभँमँ यँरँलँवँशँषँसँहँळँक्षँइत्येतानि मातृकाक्षराणि मूलमंत्रं च मालायां विन्यस्य पुनः पंचगव्येन प्रोक्ष्य ॐ सद्योजातंप्रपद्यामिसद्योजातायवैनमोनमः भवेभवेनातिभवेभव स्वमांभवोद्भवायनमः ॥ १ ॥ इति मंत्रेण शीतजलेन प्रक्षालयेत्॥ॐ वामदेवायनमोज्येष्ठायनमःश्रेष्ठायनमोरुद्रायनमःकालायनमः कलविकरणायनमोबलविकरणायनमोबलायनमोबलप्रमथनायनमःसर्वभूतदमनायनमोमनोन्मनायनमः ॥ १ ॥ इतिमंत्रेणचंदनागुरुकर्पूरादिसुगंधद्रव्यैर्घर्षयेत्।ॐ अघोरेभ्योथघोरेभ्योघोरघोरतरेभ्यः ॥ सर्वेभ्यःसर्वसर्वेभ्योनमस्तेअस्तुरुद्ररूपेभ्यः ॥ १ ॥ इति मंत्रण तां धूपयेत् । ॐ तत्पुरुषायविद्महेमहादेवायधीमहि ॥ तन्नोरुद्रःप्रचोदयात् ॥ १ ॥ इति मंत्रेण मालायाश्चंदनं लेपयेत ॥ ॐ ईशानःसर्वविद्यानामीश्वरःसर्वभूतानाम्ब्रह्माधिपतिर्ब्रह्मणोधिपतिर्ब्रह्माशिवोमेअस्तुसदाशिवोम् ॥ १ ॥ इति मंत्रेण मेरुसहितं प्रत्येकमणिं सकृत्सकृदेवाभिमंत्रयेत् इत्यभिमंत्र्य प्राणप्रतिष्ठां कुर्यात् । तद्यथा । अस्य श्रीप्राणप्रतिष्ठामंत्रस्य ब्रह्मविष्णुमहेश्वरा ऋषयः ऋग्यजुःसामानि च्छंदांसि क्रियामयवपुःप्राणाख्या देवता । आँबीजँ ह्रींशक्तिः क्रौंकीलकम् अस्यां

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मालायां प्राणप्रतिष्ठापने विनियोगः। ॐ आँह्रींक्रौंअँयँरँलँवँशँषँसँहँळँक्षँअः क्रौंह्रींआँहँसः सोहँ अस्यां मालायां प्राण इह प्राणास्तिष्ठंतु ॐ आँह्रींक्रौंअँयँरँलँवँशँषँसँहँळँक्षँअःक्रौंह्रींआँहँसःसोहं अस्यां मालायां जीव इह स्थितः ॐ आँह्रींक्रौंअँयँरँलँवँशँषँसँहँळँक्षँअः क्रौंह्रींआँहँसःसोहँ अस्यां मालायां सर्वेंद्रियाणि वाङ्मनस्त्वक्चक्षुःश्रोत्रजिह्वाघ्राणपाणिपादपायूपस्थानीहागत्य स्वस्ति सुखं चिरं तिष्ठंतु स्वाहा । एवं प्राणप्रतिष्ठां कृत्वा पुष्पाक्षतान् कुंकुमाक्तान् निःक्षिप्य गर्भाधानादिपंचदशसंस्कारसिद्ध्यर्थं पंचदशप्रणवावृत्तिं कृत्वा प्राणशक्तिं ध्यायेत् ॥ रक्ताम्भोधिस्थपोतोल्लसदरुणसरोजाधिरूढा कराब्जैः पाशं कोदण्डमिक्षूद्भवमथगुणमप्यङ्कुशं पञ्चबाणान् ॥ बिभ्राणासृक्कपालं त्रिनयनलसिता पीनवक्षोरुहाढ्या देवी बालार्कवर्णा भवतु सुखकरी प्राणशक्तिः परा नः ॥१॥ एवं प्राणप्रतिष्ठां कृत्वा तत्रेष्टदेवतामावाह्य मूलमंत्रेण षोडशोपचारैः संपूज्य "ॐ ह्रीं मालेमाले महामाये सर्वशक्तिस्वरूपिणी॥चतुर्वर्गस्त्वयि न्यस्तस्तस्मान्मे सिद्धिदा भव॥१॥इति प्रार्थ्य।'ॐअविघ्नं कुरु माले त्वं सर्वकार्येषु सर्वदा'।इति तामादाय मंत्रदेवतांध्यायन् हृदये मालां धारयन् मंत्रार्थं स्मरन् मध्यंदिनावधि जपेत्।ततो जपांते पुनः प्रणवमुक्त्वा "ॐत्वं माले सर्वदेवानां प्रीतिदा शुभदा भव॥ शिवं कुरुष्व मे भद्रे यशो वीर्यं च सर्वदा॥१॥तेन सत्येन सिद्धिं मे देहि मातर्नमोस्तु ते॥" ॐ ह्रीं सिद्ध्यै नमः। इति मालां शिरसि निधाय प्राणानायम्य गोमुखीं रहसि स्थापयेत् । एवं संस्कृतां मालां न कस्यापि दर्शयेत् । नाशुचिः स्पर्शयेत् नान्यं दद्यात् । अशुचिस्थान न निधापयेत् । स्वयोनिवद्धृतं कुर्यात् । ततः पूर्ववत् मूलमंत्रस्य ऋष्यादिन्यासं करन्यासं हृदयादिषडंगन्यासं च कृत्वा पुनः देवतां पंचोपचारैः संपूज्य नीराजनं कृत्वा पुष्पांजलिं च दत्वा "ॐगुह्यातिगुह्यगोप्ता त्वं गृहाणास्मत्कृतंजपम्॥ सिद्धिर्भ

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वतु मे देव त्वत्प्रसादात्त्वयि स्थितिः"॥१॥ॐ इतःपूर्वं प्राणबुद्धिदेहधर्माधिकारतो जाग्रत्स्वप्नसुषुप्त्यवस्थासु मनसा वाचा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना यत्स्मृतं यदुक्तं यत्कृतं तत्सर्वं ब्रह्मार्पणं भवतु स्वाहा। 'मां मदीयं च सकलं हरये ते समर्पये' ॐ तत्सदिति॥ इति देवदक्षिणकरे जपसमर्पणजलं दद्यात्। अथ क्षमापनम्॥ "आवाहनं न जानामि न जानामि तवाऽर्चनम्॥ पूजां चैव न जानामि क्षमस्व परमेश्वर॥१॥ अन्यथा शरणं नास्ति त्वमेव शरणं मम॥ तस्मात्कारुण्यभावेन रक्षस्व परमेश्वर॥ २॥ गतं पापं गतं दुःखं गतं दारिद्र्यमेव च॥ आगता सुखसंपत्तिः पुण्या च तव दर्शनात्॥ ३॥ मंत्रहीनं क्रियाहीनं भक्तिहीनं सुरेश्वर॥ यत्पूजितं मया देव परिपूर्णं तदस्तु मे॥ ४॥ यदक्षरपदभ्रष्टं मात्राहीनं च यद्भवेत्॥ तत्सर्वं क्षम्यतां देव प्रसीद परमेश्वर॥ ५॥ इति प्रार्थयेत्। प्रत्यहं समानसंख्य एव जपो न तु न्यूनाधिकः। प्रत्यहं भूशयनं हविष्यान्नेन एकभक्तभोजनं ब्रह्मचर्यं त्रिकालं देवतार्चनं च कार्यम्। जपांते प्रत्यहं पुरश्चरणांते वा दशांशहोमं कुर्यात्॥ इति श्रीबीकानेरविषयान्तर्गतश्रीरत्नगढनिवासिना गौडवंशावतंसश्रीवसिष्ठगोत्रोद्भवेन श्रीरामकृष्णामरचंद्रपौत्रेण श्रीकस्तूरीचंद्रसूनुना श्रीमहादेवभक्तवाजसनेयिना पण्डितश्रीचतुर्थीलालशर्मणा विरचिते अनुष्ठानप्रकाशे पद्धतिखण्डे सर्वदेवोपयोगिजपक्रमपूजापद्धतिप्रकरणम्॥ २॥ ॥ अथ हवनप्रकरणम्॥ तावन्मंडपकुंडादिकरणप्रकारः। जपान्ते सुमुहूर्ते तुषांगारपिपीलिकादिविवर्जिते सुदेशे मण्डपं कर्तुं यथोचितं मार्जनदहनखननसंप्लावनसंलेपनादिभिः शोधनोपायैर्भूमिं संशोध्य। तत्र निर्विघ्नतार्थं गणेशं कूर्मं शेषं द्विजांश्च संपूज्य. भूम्यावाहनं कुर्य्यात्। ॐ भूरसिभूमिरस्यदितिरसिविश्वधायाविश्वस्यभुवनस्यधर्त्री॥ पृथिवींयच्छपृथिवींदृंहपृथिवींमाहिंसीः॥ १॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

आगच्छ सर्वकल्याणि वसुधे लोकधारिणि । उद्धृतासि वराहेण सशैलवनकानना ॥२॥ रत्नाकरे विष्णुना त्वं धृता वाराहरूपिणा ॥ आगच्छ वरदे धात्रि यज्ञेस्मिन्छुभदायिनि ॥ ३ ॥ ॐ भूर्भुवः स्वर्भूमे इहागच्छ इह तिष्ठ इत्यावाह्य । ॐ भूम्यै नमः । इति षोडशोपचारैः संपूज्य अंजलिं बद्धा प्रार्थयेत् । शेषमूर्ध्नि स्थितां रम्यां नानासुखविधायिनीम् ॥ विश्वधात्रीं महाभागां विश्वस्य जननीं पराम् ॥ १ ॥ यज्ञभागं प्रतीच्छस्व सुखार्थं प्रणमाम्यहम् । तवोपरि करिष्यामि मंडपं सुमनोहरम् ॥ २ ॥ क्षंतव्यं च त्वया देवि सानुकूला मखे भव ॥ निर्विघ्नं मम कर्मेदं यथा स्यात्त्वं तथा कुरु ॥ ३ ॥ इति संप्रार्थ्य । ताम्रपात्रे गंधदूर्वाक्षतफल पुष्पयवयुताऽर्घ्यमादाय जानुभ्यामवनिं गत्वा ।"ॐ मण्डपं कारयाम्यद्य त्वदूर्ध्वं शुभलक्षणम्॥ गृहणार्घ्यं मया दत्तं प्रसन्ना सर्वदा भव ॥ १ ॥"इत्यर्घ्यं दत्वा । स्वाभीष्टमानां भूमिं स्वीकृत्य । पंचगव्येन हरितैः कुशैर्भूमिं प्रोक्षयेत् । तत्र मंत्राः । ॐ इरा वती धेनुमतीहिभूतऽसूयवसिनीमनवेदशस्या ॥ व्यस्कभ्नारोदसीविष्णवेतेदुधर्थंपृथिवीमभितोमयूखैः॥ १ ॥ ॐ इदम्विष्णुर्विचक्रमे त्रेधानिदधेपदम्॥समूढमस्यपाꣳसुरे॥२॥ॐमानस्तोकेतनयेमानऽआयुषिमानोगोषुमानोऽअश्वेषुरीरिषः॥मानोव्वीरान्रुद्रभामिनोबधीर्हविष्मंतःसदमित्त्वाहवामहे॥३॥ॐशन्नोमित्रःशंव्वरुणःशन्नोभवत्वर्यमा॥शन्नऽइन्द्रोबृहस्पतिःशन्नोविष्णुरुरुक्रमः॥४॥ॐशन्नऽइन्द्राग्नीभवतामवोभिःशन्नऽइन्द्रावरुणारातहव्या ॥शन्नऽइन्द्रापूषणाव्वाजसातौशमिन्द्रासोमासुवितायशंयोः॥५॥ "ॐजितंते पुंडरीकाक्ष नमस्ते विश्वभावन ॥ सुब्रह्मण्य नमस्तेस्तु महापुरुष पूर्वज॥६॥"ॐ नृसिंह उग्ररूप प्रज्वल२स्वाहा ।ॐ देवस्यंत्वासवितुःप्र

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सुवेश्विनोर्बाहुभ्यांम्पूष्णोहस्ताभ्यांसरस्वत्यैव्वाचोयन्तुरग्नेस्साम्राज्येनाभिषिंञ्चामि॥७॥एतैर्मंत्रैः पृथिवीं प्रोक्षयेत्। ततः श्वेतसर्षपान् गृहीत्वा। "ॐ भूतानि राक्षसा वापि येऽत्र तिष्ठंति केचन॥ ते सर्वेप्यपसर्पंतु विष्णुयागं करोम्यहम्॥१॥ भूतप्रेतपिशाचाद्या ह्यपक्रामंतु राक्षसाः। स्थानादस्माद्व्रजंत्वन्यत्स्वीकरोमि भुवं त्विमम्॥ २॥ अपसर्पंतु ते भूता ये भूता भूमिसंस्थिताः! ये भता विघ्नकर्तारस्ते नश्यंतु शिवाज्ञया॥ ३॥ इति सर्वत्र विकीर्य। तत्र मंडपं हस्तोच्चं द्वादशाङ्गुलोच्चं वा विंशतिहस्तं वा षोडश १६ द्वादश १२ दशा १० ऽष्टा ८ ऽन्यतमहस्तात्मकं भूमेर्यथावकाशं वा षोडशस्तंभनिर्मितं चतुर्द्वारोपशोभितं तोरणध्वजपताकादिसहितं सुवितानवस्त्रादर्शच्छत्रचामरादिभिर्मण्डितं निर्वातं मण्डपं विधाय (तदभावे छायामंडपं वा कृत्वा) तमेव नवधा विभज्य मध्यभागे आहुतिप्रमाणं चतुरस्रं कुंडं स्थंडिलं वा कृत्वा तस्य ईशानकोणे ग्रहवेदीं हस्तमात्रां द्वादशाङ्गुलोच्चां वप्रद्वयवतीम्॥१॥ (पूर्वे) प्रधानदेवतापीठं चतुस्त्रिंशाङ्गुलविस्तारं द्वादशाङ्गुलोच्चम्॥२॥ (अग्निकोणे) मातृकापीठं हस्तमात्रं द्वादशाङ्गुलोच्चम्॥ ३॥ (निर्ऋतिकोणे) वास्तुपीठं हस्तमात्रं द्वादशाङ्गुलोच्चम्॥४॥ (वायवीयकोणे) योगिनीक्षेत्रपालपीठं हस्तमात्रं द्वादशाङ्गुलोच्चं च॥५॥कृत्वा ग्रहपीठादीशान्ये रुद्रपीठं द्वादशाङ्गुलमात्रं तृतीयांशेनोच्चं कारयेत्। अथवा मध्यभागे प्रधानदेवतावेदीं कृत्वा तस्याः समंतात् ईशानादिषु पूर्ववत् ग्रहादिमंडलचतुष्टयं संपाद्य। पश्चिमे उत्तरे ईशान्यां वा होमानुसारेण चतुरस्रं यथोक्तं कुंडं स्थंडिलं वा कुर्य्यात्। तत्र पंचकुंडीपक्षे मध्यपीठस्य समंतात् सपादकरान्तरदेशे पूर्वादिचतुर्षु दिक्षु चतुरस्र १ अर्धचंद्र २ वर्तुल ३ अष्टदल ४ निभानि चत्वारि कुंडानि संपाद्य पंचमंमिंद्रेशानयोर्मध्ये होमानुसारेण चतुरस्रमाचार्यकुंडं कार्यम्। अथवा कुण्ड

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

निर्माणस्यातीव दुष्करतया न्यूनाधिकतायां दोषश्रवणाच्च कुण्डस्थाने स्थंडिलान्येवाऽधुना कुर्य्यात् । एवं यथाविधि मण्डपादि रचयित्वा सुमुहूर्ते प्रातःकृत्यं निर्वृत्य शुद्धो भूत्वा गणेशादिस्मरणपूर्वकं यजमानो जापकैः सह मंगलघोषेणाचार्यहस्ते सामग्रीं दद्यात् । तान्युपकरणानि पश्चिमद्वारेणाचार्यो मंडपमध्ये उपकल्पयेत् ॥ विशेषस्तु मत्कृते जलाशयोत्सर्गप्रकाशे द्रष्टव्यः ॥ इति मण्डपकुण्डादिनिर्माणप्रकारः ॥ अथ प्रयोगः । सुमुहूर्ते यजमानः सपत्नीकः पूर्ववत्तिलतैलेन कृताभ्यंगो मंगलस्नानं कृत्वा मंगल घोषपुरःसरं जलयात्रां कृत्वा भूषितसंपूर्णकलशहस्तः "भद्रंकर्णेभिः" इति मंडपं प्रदक्षिणीकृत्य पश्चिमद्वारसमीपमागत्य द्वारपूजां कुर्यात् । तद्यथा । पादौ प्रक्षाल्य आचम्य सामान्यार्घ्यं प्रकल्प्य । 'ॐ अस्त्रायफट्' इत्यभिमंत्रितजलेन द्वारं प्रोक्ष्य (ऊर्ध्वशाखायाम्) ॐ गं गणपतये नमः । इति गणपतिं संपूज्य (तद्दक्षिणभागे) ॐ महालक्ष्म्यै नमः । (वामभागे) ॐ सरस्वत्यै नमः । इति पूजयेत् । (ततो दक्षिणशाखायाम्) ॐ विघ्नेशाय नमः । ॐ गंगायै नमः । ॐ यमुनायै० । (वामशाखायाम्) ॐ क्षेत्रपालाय नमः । ॐ स्वः सिंधवे नमः । ॐ यमुनायै नमः । इति संपूज्य (पुनर्दक्षिणशाखायाम्) ॐ धात्रे नमः । (वामशाखायाम्) । ॐ विधात्रे नमः (पुनर्दक्षिणशाखायाम्) । ॐ शंखनिधये नमः । (वामशाखायाम्) ॐ पद्मनिधये नमः । (अधोदेहल्या) ॐ अस्त्राय नमः । इत्यभ्यर्च्य । पूर्वोक्ततत्तद्देवद्वारपालानिंद्रादिदिक्पालांश्च पूजयेत् । ॐ द्वारपालेभ्यो नमः । ॐ इन्द्रादिदिक्पालेभ्यो नमः । एवं द्वारपूजां विधाय । नमस्कृत्य मूलमंत्रं पठन् यागमंडपं प्रविश्य "ॐ अपसर्पंतु ये भूता येभूता भूमिसंस्थिताः । ये भूता विघ्नकर्तारस्ते नश्यंतु शिवाज्ञया ॥१॥ अपक्रामंतु भूतानि पिशाचाः सर्वतोदिशम् ॥ सर्वेषामवरोधेन ब्रह्मकर्म स

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मारभे ॥ २ ॥" इति मंत्रद्वयेन गौरसर्षपान्सर्वत्र विकीर्य । ॐ आपोहिष्ठा० १ मानस्तोके० २ अपवित्र० ३ इति मंत्रैः मंड पांतरं प्रोक्ष्य । ईशान्याम् ॐ ब्रह्मणे नमः । वास्तुपुरुषाय नमः । क्षेत्रपालाय नमः । इति प्रणमेत् ॥ तत आचार्याज्ञया स्वासने प्राङ्मु ख उपविश्य स्वदक्षिणपार्श्वे संभारान् । वामपार्श्वे जलपूरितं कर्मपात्रं च संस्थाप्य पत्न्या समारब्धः स्मार्तविधिनाचम्य प्राणा नायम्य । ॐ आनोभद्राइत्यादिशांतिपाठं पूर्वोक्तं पठित्वा लक्ष्मीनारायणादिदेवान् प्रणमेत् । ततो देशकालौ संकीर्त्य । अमु कगोत्रोऽमुकशर्मा अमुकदेवताप्रीत्यर्थं अमुककामनया ब्राह्मणद्वारा कृतस्यामुकमंत्रपुरश्चरणस्य सांगतासिद्ध्यर्थममुकसंख्याप रिमितजपदशांशहोमतद्दशांशतर्पणतद्दशांशमार्जनतद्दशांशब्राह्मणभोजनरूपकर्म करिष्ये तदंगत्वेन गणपतिपूजनं पुण्याहवाचनं मातृकापूजनं नांदीश्राद्धमाचार्यादिवरणं च करिष्ये । इति संकल्प्य । ॐ सुमुखश्चैकदंतश्चेत्यादिस्मरणपूर्वकं गणपतिपूजनं पुण्या हवाचनं मातृकापूजनं नांदीश्राद्धं च पूर्ववत् कृत्वा आचार्यादिवरणं कुर्यात् । आचार्यस्य पादप्रक्षालनं कृत्वा । वरणद्रव्याणि जलं चादाय । आचार्यस्य दक्षिणजानुमालभ्य । देशकालौ संकीर्त्य कारिष्यमाणामुकजपदशांशहोमकर्मणि अमुकगोत्रममुकशर्मा णं ब्राह्मणमेभिर्गंधाक्षतपुष्पतांबूलमुद्रिकाकमंडलुयुग्मवासोभिराचार्यत्वेन त्वामहं वृणे इति वृत्वा वृतोस्मीति प्रतिवचनानंतरं गंधा दिभिः संपूज्य । "ॐ आचार्यस्तु यथा स्वर्गे शक्रादीनां बृहस्पतिः ॥ तथा त्वं मम यज्ञेस्मिन्नाचार्यो भव सुव्रत ॥ १ ॥" इति प्रार्थ येत् । (ब्रह्मवरणम्) तथैव देशकालौ संकीर्त्य कारिष्यमाणामुकजपदशांशहोमकर्मणि कृताकृतावेक्षणरूपब्रह्मकर्म्मकर्तुममुकगोत्रममु

१ वापीकूपतडागानां प्रतिष्ठायां महोत्सवे । व्रतादौ शान्तिके चैव पत्नी स्यादुत्तरे सदा ॥ शांतिकेषु च सर्वेषु प्रतिष्ठोद्यापनादिषु वामे उपविशेत्पत्नी व्याघ्रस्य वचनं यथा ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कशर्माणं ब्राह्मणमेभिर्गंधाक्षतपुष्पतांबूलमुद्रिकाकमंडलुवासोभिर्ब्रह्मत्वेन त्वामहं वृणे ॥ वृतोस्मीति प्रतिवचनानंतरं ब्रह्माणं संपूज्य । यथा चतुर्मुखो ब्रह्मा सर्वलोकपितामहः । तथा त्वं मम यज्ञेस्मिन्ब्रह्मा भव द्विजोत्तम ॥ १ ॥ इति प्रार्थयेत् । (ऋत्विग्वरणम्) सर्वानृत्विज उदङ्मुखानुपवेश्य । देशकालौ स्मृत्वा । करिष्यमाणामुकजपदशांशहोमकर्मणि तत्तत्कर्मकरणार्थममुकामुकगोत्रोत्पन्नानमुकशर्मण ऋत्विक्त्वेन युष्मानहं वृणे । वृताः स्म इति तैरुक्ते तान् गंधादिभिः संपूज्य । ऋत्विजश्च यथापूर्वं शक्रादीनां मखेऽभवन् ॥ यूयं तथा मे भवितुमृत्विजोर्हथ सत्तमाः ॥१॥ इति प्रार्थयेत् । यजमानर्त्विजः परस्परं यज्ञकंकणं बध्नीयुः ॥ ॐ व्रतेन दीक्षामाप्नोति दीक्षयाप्नोति दक्षिणाम् ॥ दक्षिणाश्रद्धामाप्नोति श्रद्धया सत्यमाप्यते ॥ १ ॥ (एतावद्रूपं यज्ञस्य यद्देवैर्ब्रह्मणा कृतम्॥तदेतत्सर्वमाप्नोति यज्ञे सौत्रामणीसुते ॥१॥) ततो यजमानस्य तिलकाशीर्वादः । ॐस्वस्तिनऽइंद्र इत्यादिमंत्रैः कार्य्यः॥ अथ प्रार्थना ॥ ब्राह्मणाः संतु मे शस्ताः पापात्पांतु समाहिताः ॥ देहिनां चैव दातारः पातारः सर्वदेहिनाम् ॥१॥ जपयज्ञैस्तथा होमैर्दानैश्च विविधैः पुनः॥देवानां च ऋषीणां च तृप्त्यर्थं याजकाः कृताः॥२॥येषां देहे स्थिता वेदा पावयंति जगत्त्रयम्॥रक्षंतु सततं तेषां जपयज्ञैर्व्यवस्थिताः॥३॥ब्राह्मणा जंगमं तीर्थं त्रिषु लोकेषु विश्रुतम्॥ तेषां वाक्योदकेनैव शुद्धयंति मलिना जनाः॥४॥पावनाः सर्ववर्णानां ब्राह्मणा ब्रह्मरूपिणः ॥ सर्वकर्मरता नित्यं वेदशास्त्रार्थकोविदाः ॥ ५ ॥ श्रोत्रियाः सत्यवाचश्च देवध्यानरताः सदा ॥ यद्वाक्यामृतसंसिक्ता शुद्धिं यान्ति नरद्रुमाः ॥ ६ ॥ अंगीकुर्वंतु कर्मैतत्कल्पद्रुमसमाशिषः ॥ यथोक्तनियमैर्युक्ता मंत्रार्थे स्थिरबुद्धयः ॥ ७ ॥ यत्कृपालोचनात्सर्वे ऋषयो वृद्धिमाप्नुयुः ॥ अस्मिन्होमे मया पूज्याः संतु मे नियमान्विताः ॥ ८ ॥ अक्रोधनाः शौचपराः सततं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ब्रह्मचारिणः॥ग्रहध्यानरता नित्यं प्रसन्नमनसः सदा॥९॥अदुष्टभाषणाः संतु मा संतु परनिंदकाः॥ ममापि नियमा ह्येते भवंतु भवता मपि॥१०॥अस्य यागस्य निष्पत्तौ भवंतोभ्यर्चिता मया॥सुप्रसन्नैः प्रकर्तव्यं शांतिकं विधिपूर्वकम्॥११॥इत्याचार्यादिवरणप्रयोगः॥ (अथाचार्यकर्म) आचम्य प्राणानायम्य देशकालौ स्मृत्वा अस्मिन् सनवग्रहमखामुकदेवतामंत्रपुरश्चरणजपदशांशहोमकर्मणि यजमा नेन वृतोहमाचार्यकर्म करिष्ये।तदंगत्वेन शरीरशुद्धचर्थं पुरुषसूक्तजपं करिष्ये इति संकल्प्य पुरुषसूक्तं षोडशर्चं जपेत्।तत आचार्यो वा महस्ते गौरसर्षपान् लाजामिश्रितान् गृहीत्वा दिग्रक्षणं कुर्यात॥तत्र मंत्राः।ॐरक्षोहणम्वलगहनम्वैष्णवीमिदमहन्तम्बलगमुत्किरामि यम्मेनिष्ठ्योयममात्योनिचखानेदहमहन्तम्वलगमुत्किरामियम्मेसमानोयमसमानोनिचखानेदमहन्तम्वलगमुत्किरामियम्मेसब न्धुर्यमसबन्धुर्निचखानेदमहन्तम्वलगमुत्किरामियम्मेसजातोयमसजातोनिचखानोत्कृत्याङ्किरामि१रक्षोहणोवोव्वलगहनंप्रोक्षा मिव्वैष्णवान्त्रक्षोहणोवोव्वलगहनोवनयामिव्वैष्णवान्त्रक्षोहणोवोव्वलगहनोवस्तृणामिव्वैष्णवान्त्रक्षोहणो वोव्वलगहनाऽउपदधामि व्वैष्णवीरक्षोहणोवोव्वलगहनोपयूहामिव्वैष्णवीव्वैष्णवमसिव्वैष्णवास्थ२रक्षसाम्भागोसिनिरस्तर्ठ्ंरक्षऽइदमहर्ठ्ंरक्षोभितिष्ठामीदमह र्ठ्ंरक्षोबबाधऽइदमहर्ठ्ंरक्षोधमन्तमोनयामिघृतेनद्यावापृथिवीप्रोर्णुव्वाथांवायोव्वेस्तोकानामग्निराज्यस्यव्वेत्तुस्वाहास्वाहाकृतेऽऊर्ध्वन भसंमास्तुङ्गच्छतम्३रक्षोहाव्विश्वचर्षणिरभियोनिमयोहतेद्रोणासुधस्थमासदत्॥४॥अपसर्पंतु ते भूतायेभूताभुवि संस्थिताः॥ येभूता

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

विघ्नकर्तारस्ते नश्यंतु शिवाज्ञया॥१॥अपक्रामंतु भूतानि पिशाचाः सर्वतो दिशम्॥ सर्वेषामविरोधेन शांतिकर्म समारभे॥२॥ यदत्र संस्थितं भूतं स्थानमाश्रित्य सर्वतः॥स्थानं त्यक्त्वा तु तत्सर्वं यत्रस्थं तत्र गच्छतु॥३॥ भूतप्रेतपिशाचाद्या अपक्रामंतु राक्षसाः॥स्थाना दस्माद्व्रजंत्वन्यत्स्वीकरोमि भुवं त्विमाम्॥४॥भूतानि राक्षसा वापि यत्र तिष्ठंति केचन॥ते सर्वेप्यपगच्छंतु शांतिकं तु करोम्यहम्॥५॥ इति मंत्रैरीशानादिसर्वदिक्षु विकिरेत्॥(उदकोपस्पर्शः)ततः(पंचगव्यकरणम्)तद्यथा। गायत्र्या गोमूत्रम् ॐतत्सवितु०॥१॥गंधद्वारामि ति गोमयम् ॐगंधद्वारां दुराधर्षांनित्यपुष्टां करीषिणीम्॥ईश्वरींसर्वभूतानां तामिहोपह्वये श्रियम्॥२॥आप्यायस्वेति क्षीरम्। ॐआप्या यस्व समेतु ते विश्वतः सोमवृष्ण्यम्। भवाव्वाजस्य सङ्गथे॥३॥दधिक्राव्णेतिदधि। ॐदधिक्राव्णोऽअकारिषञ्जिष्णोरश्वस्य व्वाजिनः सुरभिनो मुखाकरत्प्रणऽआयूंषि तारिषत्॥४॥तेजोसीत्याज्यम्॥ ॐ तेजोसि शुक्रमस्यमृतमसि धामनामासि प्रियन्देवानामना धृष्टन्देवयजनमसि॥५॥ देवस्यत्वेति कुशोदकम्।ॐ देवस्य त्वा सवितुः प्रसवेश्विनोर्बाहुभ्याम्पूष्णो हस्ताभ्याम्॥६॥ॐइति प्रणवेन यज्ञकाष्ठेनालोडय आपोहिष्ठेति त्रिभिर्मंत्रैः कर्मभूमिं यज्ञसंभारांश्च प्रोक्षयेत्॥ततो यजमानहस्तप्रमाणं चतुरस्रं चतुरंगुलोन्नतं स्थंडि लं विरच्य तत्र भूमिपूजनम्। ॐ भूरसि भूमिरस्यदितिरसि व्विश्वधाया व्विश्वस्य भुवनस्य धर्त्री॥पृथिवीन्यच्छपृथिवींदृंहपृथिवी म्माहिर्ठ्सीः ॐ भू० पृथिवीकूर्मानंतदेवताभ्यो नमः। इतिमंत्रेण षोडशोपचारैः संपूजयेत्। ततः कृतांजलिः।ॐ स्वस्तिनऽइन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः। स्वस्तिनस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु॥ १॥ इति वारत्रयं पठित्वा ॐ देवा आयांतु। यातुधाना अपयांतु। विष्णो देवयजनं रक्षस्व। इति प्रार्थयेत्॥ ततो नैर्ऋत्यां वास्तुमंडले वास्तुपूजां

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कृत्वा मण्डपपक्षे मण्डपपूजां च कुर्य्यात् । वास्तुपूजा मंडपपूजा तु मत्कृते प्रतिष्ठाप्रकाशे वोत्सर्गप्रकाशे द्रष्टव्या अत्र विस्तर भयान्न लिखिता ॥ इति दिग्रक्षणादिकर्म ॥ अथ वैदिकाऽग्निस्थापनप्रकारः ॥ मंडपपूजानंतरं यजमानः प्रक्षालितपाणिपादः स्वाचांतः सर्वैराचार्य्यादिभिर्ऋत्विग्भिः सहितः प्राग्द्वारेण मंडपान्तःप्रविश्य अभ्यायतनाद्दक्षिणतो ब्रह्मासनस्थानात् पश्चा द्यजमानः स्वासने उदङ्मुख उपविशेत् । आचार्य्यस्तु कुंडपश्चिमत उपविश्य आचम्य प्राणानायम्य । देशकालौ स्मृत्वा अद्यामुकमंत्रदशांशहवनकर्मण्यग्निप्रतिष्ठां करिष्ये । तदङ्गतया संमार्जनमेखलायोनिदेवतास्थापनपूजनादिकं करिष्ये इति च संकल्पं कुर्य्यात् । अथाभ्यायतनं संमृज्य कुशोदकेनाभ्युक्ष्य हस्ते पुष्पाण्यादाय । कुंडं स्पृष्ट्वा । ॐ आवाहयामि तत्कुंडं विश्वकर्म विनिर्मितम् ॥ शारीरं यच्च ते दिव्यमग्न्यधिष्ठानमद्भुतम् ॥ १ ॥ इत्यावाह्य ॐ कुंडाय नमः । इति कुंडं संपूज्य । ॐ ये च कुण्डे स्थिता देवाः कुंडांगे याश्च देवताः ॥ ऋद्धिं यच्छंतु ते सर्वे यज्ञसिद्धिं मुदान्विताः ॥ १ ॥ हे कुंड तव निर्माणं रचितं विश्वकर्मणा ॥ अस्माकं वांछितां सिद्धिं यज्ञसिद्धिं ददातु भोः ॥ २ ॥ इति प्रार्थ्य कुंडमध्ये विश्वकर्माणं पूजयेत् । ॐ विश्वकर्मन्निति मंत्रस्य भौवनऋषिस्त्रिष्टुप्छंदो विश्व कर्मा देवता विश्वकर्मपूजने विनियोगः । ॐव्विश्वकर्म्मन्हविषाव्वर्द्धनेनत्रातारमकृणोरवद्धचंतस्मैव्विशः समनंतपूर्व्वीरयमुग्रोव्विहव्यो यथासत् ॥ उपयामिगृहीतोसीन्द्रायत्वाविश्वकर्मणऽएषतेयोनिरिन्द्रायत्वाव्विश्वकर्मणे ॥ १ ॥ ॐ भूर्भुवःस्वः विश्वकर्मन्निहागच्छेह तिष्ठ इत्यावाह्य । ॐ विश्वकर्मणे नम इति गंधादिभिः संपूज्य । अज्ञानाज्ज्ञानतो वापि दोषाः स्युः खननोद्भवाः । नाशाय त्वं हि तान्सर्वा न्विश्वकर्म्मन्नमोस्तु ते ॥ इति संप्रार्थ्य उपरि मेखलायां श्वेतवर्णालंकृतायां विष्णुं स्थापयेत् । ॐ विष्णो यज्ञपते देव दुष्टदैत्यनिषू

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

दन॥विभो यज्ञस्य रक्षार्थं कुंडेस्मिन्सन्निधो भव ॥१॥ ॐ भूर्भुवः स्वर्विष्णो इहागच्छ इह तिष्ठेत्यावाह्य ॥ इदं विष्णुरिति मंत्रस्य मेधातिथिर्ऋषिर्गायत्रीछंदो विष्णुर्देवता विष्णुपूजने विनियोगः।ॐ इदं व्विष्णुर्व्विचक्रमे त्रेधा निदधे पदम् ॥समूढमस्यपा४ंसुरे॥ॐ विष्णवे नमः। इति मंत्रेण विष्णुं संपूज्य ॥ ॐ प्रथममेखलायै विष्णुदैवतायै श्वेतवर्णालंकृतायै नम इति मेखलां च पूजयेत् ॥ ततो मध्यमेखलायां रक्तवर्णालंकृतायां ब्रह्माणं स्थापयेत् ॥ ॐहंसपृष्ठसमारूढ देवदेवगणावृत ॥ रक्षार्थं मम सत्रस्य कुंडेऽस्मिन्सन्निधो भव ॥ १ ॥ ॐ भूर्भुवः स्वर्ब्रह्मन्निहागच्छ०इत्यावाह्य ॥ ब्रह्मजज्ञानमिति मंत्रस्य विवस्वान् ऋषिस्त्रिष्टुप्छंदो ब्रह्मा देवता ब्रह्मपूजने विनियोगः। ॐब्रह्मजज्ञानम्प्रथमम्पुरस्ताद्विसीमतः सुरचोव्वेनऽआवः सबुध्न्याऽउपमाऽअस्य व्विष्ठाः सतश्चयोनिमसतश्च व्विवः ॐ ब्रह्मणे नमः। इति मंत्रेण ब्रह्माणं संपूज्य। द्वितीयमेखलायै ब्रह्मदैवतायै रक्तवर्णालंकृतायै नमः। इति मेखलां च पूजयेत्। ततः अधोमे खलायां कृष्णवर्णालंकृतायां रुद्रं० ॐगंगाधर महादेव वृषारूढ महेश्वर ॥आगच्छ भगवन्रुद्र कुंडेऽस्मिन्सन्निधो भव॥१॥ॐभूर्भुवःस्वः रुद्र इहागच्छ इह तिष्ठ इत्यावाह्य। नमस्ते रुद्र मन्यव इति परमेष्ठी ऋषिर्गायत्री छंदः रुद्रो देवता रुद्रपूजने विनियोगः। ॐ नमस्ते रुद्र मन्यवऽउतोतऽइषवेनमः बाहुभ्यामुत ते नमः ॐ रुद्राय नमः। इति रुद्रं संपूज्य। ॐ तृतीयमेखलायै रुद्रदैवतायै कृष्णवर्णालंकृतायै नमः। इति मेखलां च पूजयेत् ॥ अथ योनिपूजा ॥ ॐ क्षत्रस्य योनीति मंत्रस्य विवस्वान् ऋषिर्द्विपदा गायत्री छंदः योनिर्देवता योनिपूजने विनियोगः ॥ ॐ क्षत्रस्य योनिरसि क्षत्रस्य नाभिरसि मात्वहिर्ठ्सीन्मामाहिर्ठ्सीऽ॥ॐ जगदुत्पत्तिहेतुकायै मनोभवयु तायै योन्यै नमः। इति गंधादिभिः संपूज्य ॥ योने त्वं विश्वरूपासि प्रकृतिर्विश्वधारिणी। कामस्था कामरूपा च वियोन्यै ते

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नमोनमः॥ इति प्रार्थयेत् ॥ अथ कंठपूजनम् ॥ जीवनं सर्वजंतूनां स्रगादिस्थानमुत्तमम् ॥ उत्तमांगस्य चाधारं कंठमावाहयाम्यहम् ॥१॥ इत्यावाह्य ॥ नीलग्रीवा इति परमेष्ठीऋषिरनुष्टुप्छंदो रुद्रो देवता कंठपूजने विनियोगः । ॐ नीलग्रीवाः शितिकंठादिवर्ठः रुद्राऽउपश्रिताः ॥ तेषा ँ सहस्रयोजनेवधन्वानितन्मसि । ॐ कंठाय नमः । इति संपूज्य । कंठमंगलरूपेण सर्वकुंडे प्रतिष्ठितः ॥ परितो मेखलास्त्वत्तो रचिता विश्वकर्म्मणा ॥१॥ इति प्रार्थयेत् ॥ ततो नाभिपूजा ॥ पद्माकाराथवा कुंडसदृशाकृतिबिभ्रती ॥ आधारः सर्वकुंडानां नाभिमावाहयाम्यहम् ॥ १ ॥ इत्यावाह्य ॥ नाभिर्मेचित्तामिति प्रजापतिर्ऋषिर्महापंक्तिर्जगतीछंदो रुद्रो देवता रुद्रपूजने विनियोगः । ॐनाभिर्म्मे चित्तं विज्ञानं पायुर्मेपचितिर्भसत् । आनंदनंदावाण्डौ मे भगः सौभाग्यं यशः । जंघाभ्यां पद्भ्यां धर्मोस्मि विशि राजा प्रतिष्ठितः ॥१॥ ॐ नाभ्यै नमः । इति संपूज्य ॐ । नाभे त्वं कुंडमध्ये तु सहदेवैः प्रतिष्ठिता ॥ अतस्त्वं पूजिता देवि शुभदा ऋद्धिदा भव ॥ १ ॥ इति नत्वा कुंडमध्ये निर्ऋतिकोणे वास्तुपुरुषं पूजयेत् । पुष्पाण्यादाय । आवाहयामि देवेशं वास्तु देवं महाबलम् ॥ देवदेवं गणाध्यक्षं पातालतलवासिनम् ॥१॥ इत्यावाह्य ॥ वास्तोष्पते इति प्रजापतिर्ऋषिस्त्रिष्टुप्छंदो वास्तुदैवता वास्तुपूजने विनियोगः । ॐ वास्तोष्पते प्रतिजानीह्यस्मान्त्स्वावेशोऽअनमीवो भवानः । यत्वेमहे प्रतितन्नो जुषस्व शन्नोऽ अस्तु द्विपदेशं चतुष्पदे ॥ १ ॥ ॐ वास्तुपुरुषाय नमः । इति संपूज्य । बालिं दत्त्वा । यस्य देहे स्थिता क्षोणी ब्रह्माण्डं विश्वमंडलम् ॥ व्यापिनं भीमरूपं च सुरूपं विश्वरूपिणम् ॥ १ ॥ पितामहसुतं मुख्यं वंदे वास्तोष्पतिं प्रभुम् । इति प्रणमेत् ॥ इति कुंडपूजा ॥ (अथाग्न्यानयनप्रकारः) आचार्यः सदाचारपंचमहायज्ञादिक्रियावतां ब्रह्मक्षत्रियविशां गृहात् ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अरणिमंथनाद्वा सूर्यकान्तमणेर्वा स्वस्तिवाचनपूर्वकमग्निं मृन्मये पात्रे ताम्रेण पात्रेण गृहीत्वा दर्भपाणिः सन् वेदघोषेण तूर्यनादेन ब्राह्मणैः परिवृत आनीय तैजसीं शक्तिं ध्यात्वा पृष्ठतोऽनवलोकयन् मंडपमागच्छेत् । इत्यग्न्यानयनप्रकारः ॥ ततो यथापरिमिते तुषकेशशर्करादिरहिते कुण्डे स्थंडिले वा चतुरस्रां भूमिं कुशैः परिसमूह्य तान्कुशानैशान्यां परित्यज्य । गोमयेनोपलिप्य खादिरस्रुवमूलेन प्रागग्रप्रादेशमात्रमुत्तरोत्तरक्रमेण त्रिरुल्लिख्योल्लेखनक्रमेण वानामिकाङ्गुष्ठाभ्यां मृदमुद्धृत्योर्ध्वं प्राक्षिप्य । जलेन न्युब्जपाणिनाभ्युक्ष्य कांस्यपात्रेण पिहितमग्निं कुंडस्याग्नेयकोणे निधाय ज्वलत्कुशेन ॐ क्रव्यादमग्निं प्रहिणोमि दूरं यमराज्यं गच्छतुरिप्रवाहः । इहैवायमितरो जातवेदा देवेभ्यो हव्यं वहतु प्रजानन् ॥ १ ॥ इति मंत्रेण क्रव्यादांशं नैर्ऋत्यां दिशि परित्यज्य । ॐ अग्निं दूतम्पुरोदधेहव्यवाहमुपब्रुवे । देवाँ२ऽआसादयादिह ॥ १ ॥ इति मंत्रेण योनिमार्गेणात्माभिमुखमग्निं संस्थापयेत् । तत अग्न्यानीतपात्रे साक्षतोदकं निषिच्य अग्निमुखं कृत्वा ध्यायेत् । ॐ चत्वारि शृङ्गा त्रयोऽअस्य पादा द्वे शीर्षे सप्तहस्तासोऽअस्य । त्रिधा बद्धो वृषभो रोरवीति महोदेवो मर्त्याँ२ऽआविवेश ॥ १ ॥ (सप्तहस्तश्चतुश्शृंगः सप्तजिह्वो द्विशीर्षकः । त्रिपात्प्रसन्नवदनः सुखासीनः शुचिस्मितः ॥ १ ॥ स्वाहां तु दक्षिणे पार्श्वे देवीं वामे स्वधां तथा । बिभ्रद्दक्षिणहस्तैस्तु शक्तिमन्नं स्रुचं स्रुवम्॥ २ ॥ तोमरं व्यजनं वामे घृतपात्रं च धारयन् । आत्माभिमुखमासीन एवंरूपो हुताशनः ॥३॥ इति ध्यात्वा । अग्ने वैश्वानर शांडिल्यगोत्र शांडिल्यासितदैवलेति त्रिप्रवरान्वित भूमिर्माता वरुणः पिता मेषध्वजः प्राङ्मुख मम संमखो भव । इति यथानामानमग्निं प्रतिष्ठाप्य । ॐ अग्निपुरुषाय नमः । इति

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मंत्रेण वायव्यकोणे बहिः अग्निं षोडशापचारैः संपूज्य । ॐअग्निं प्रज्वलितं वंदे जातवेदं हुताशनम् । हिरण्यवर्णमनलं समृद्धं विश्वतोमुखम् ॥२॥ इति प्रार्थयेत् ॥ इति वैदिकाग्निस्थापनप्रयोगः ॥ एवं कुंडसंस्कारपूर्वकमग्निस्थापनं कृत्वा ईशान्यां ग्रहपीठे ग्रहान् संस्थापयेत् । (अथ नवग्रहस्थापनप्रयोगः) तत्र पीठमध्ये वर्तुलद्वादशांगुलमंडले प्राङ्मुखं सूर्यं रक्तपुष्पाक्षतैरावाहयेत् । ॐ आकृष्णेनरजसावर्तमानोनिवेशयन्नमृतम्मर्त्यंञ्च ॥ हिरण्ययेनसवितारथेनादेवोयातिभुवनानिपश्यन् । ॐ भूर्भुवः स्वः कलिङ्गदेशोद्भव काश्यपगोत्र रक्तवर्ण भो सूर्य्य इहागच्छ इह तिष्ठ । ॐ सूर्य्याय नमः सर्यमावाहयामि ॥ १ ॥ आग्नेय्यां दिशि चतुरस्रेऽर्धचंद्राकारे वा चतुर्विंशत्यंगुले मण्डले सोमं शुक्लपुष्पैरावाहयेत् । ॐ इमंदेवाअसपत्नंठ्सुवध्वम्महतेक्षत्रायंमहतेज्यैष्ठ्यायंमहतेजानराज्यायेंद्रस्येंद्रियाय । इममुष्यंपुत्रममुष्यैंपुत्रमस्यैव्विशऽएषवोंमीराजासोमोस्माकंम्ब्राह्मणानाᳬंराजा । ॐ भूर्भुवः स्वः यमुनातीरदेशोद्भव आत्रेयगोत्र शुक्लवर्ण भो सोम इहा० ॐ सोमाय नमः सोममावाहयामि ॥ २ ॥ ततो दक्षिणस्यां दिशि त्रिकोणे त्र्यंगुले मण्डले दक्षिणाभिमुखं भौमं रक्तपुष्पाक्षतैः० । ॐ अग्निर्मूर्द्धादिवः ककुत्पतिंः पृथिव्याऽअयम् । अपाᳬंरेतांᳬंसिजिन्वति । ॐ भू० अवंतिदेशोद्भव भारद्वाजगोत्र रक्तवर्ण भो भौम इहा० ॐ भौमाय नमः ॥ भौममावाहयामि ॥ ३ ॥ ईशान्यां दिशि बाणाकारे चतुरंगुले मंडले उङ्मुखं बुधं पीतपुष्पाक्षतैः । ॐ उद्बुध्यस्वाग्नेप्रतिजागृहित्वमिष्टापूर्त्तेसंसृजेथामयञ्च । अस्मिन्त्सधस्थेऽअध्युत्तरस्मिन्विश्वेदेवायजमानश्चसीदत । ॐ भू० मगधदेशोद्भव आत्रेयगोत्र पीतवर्ण भो बुध इहा० ॐ बुधाय नमः बुधमावाहयामि ॥ ४ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

उत्तरस्यां दिशि । लम्बदीर्घचतुरस्रे पट्टाकारे षडंगुले मण्डले बृहस्पतिं पीतपुष्पाक्षतैः ॥ॐ बृहस्पतेऽअतियदर्योऽअर्हाद्युमद्विभातु क्रतुमज्जनेषु ॥ यद्दीदयच्छवसऽऋतप्रजातुतदस्मासुद्रविणन्धेहिचित्रम् ॥ ॐ भू० सिंधुदेशोद्भव आंगिरसगोत्र पीतवर्ण भो बृहस्पते इहा०ॐ बृहस्पतये नमः॥बृहस्पतिमावाहयामि॥५॥पूर्वस्यां दिशि पंचकोणे नवांगुले मंडले प्राङ्मुखं शुक्रं शुक्लपुष्पाक्षतैः॥ ॐ अन्नात्परिस्रुतोरसम्ब्रह्मणाव्यपिबत्क्षत्रम्पयः सोमम्प्रजापतिः।ऋतेनसत्यमिन्द्रियंविपानꣳशुक्रमन्धसऽइन्द्रस्येन्द्रियमिदम्पयोमृतम्मधु । ॐ भू० भोजकटदेशोद्भव भार्गवसगोत्र शुक्लवर्ण भो शुक्र इहा० ॐ शुक्राय नमः॥ शुक्रमावाहयामि॥ ६ ॥ पश्चिमायां दिशि धनुषाकारे द्व्यंगुले मण्डले प्रत्यङ्मुखं शनैश्चरं कृष्णपुष्पाक्षतैः । ॐ शन्नोदेवीरभिष्टयऽआपो भवन्तु पीतये। शंय्योरभिस्रवन्तुनः । ॐ भू० सौराष्ट्रदेशोद्भवकाश्यपगोत्रकृष्णवर्ण भो शनैश्चर इहा० । ॐ शनैश्चराय नमः । शनैश्चरमावाहयामि॥ ७ ॥ नैर्ऋत्यां दिशि शूर्पाकारे द्वादशांगुले मण्डले दक्षिणाभिमुखं राहुं कृष्णपुष्पाक्षतैः । ॐ कयानश्चित्रऽआभुवदूतीसदावृधःसखा । कयाशचिष्ठयावृता । ॐ भू० राठिनापुरोद्भवपैठीनसगोत्र कृष्णवर्ण भो राहो इहा० ॐ राहवे नमः ॥ राहुमावाहयामि ॥ ८ ॥ वायव्यां दिशि ध्वजाकारे षडंगुले मंडले दक्षिणाभिमुखं केतुं धूम्रपुष्पाक्षतैः । ॐ केतुꣳकृण्वन्नकेतवेपेशोमर्य्याऽअपेशसे । समुषद्भिरजायथाः । ॐ भूर्भुवः स्वः अंतर्वेदिसमुद्भव जैमिनिगोत्र धूम्रवर्ण भो केतो इहागच्छेह तिष्ठ । ॐ केतवे नमः । केतुमा

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वाहयामि ॥ ९ ॥ इति सूर्य्यादिनवग्रहस्थापनम् ॥ अथाधिदेवतास्थापनम् ॥ तत्र सूर्य्यदक्षिणपार्श्वे । ॐ त्र्यंबकंयजामहेसुगंधिम्पुष्टिवर्द्धनम् ॥ उर्व्वारुकमिवबंधनान्मृत्योर्म्मुक्षीयमामृतात् । ॐ भूर्भुवः स्वः ईश्वर इहागच्छेह तिष्ठ । ॐ ईश्वराय नमः । ईश्वरमावाहयामि ॥ १ ॥ (एवं सर्वत्र) सोमदक्षिणपार्श्वे । ॐ श्रीश्चतेलक्ष्मीश्चपत्न्यावहोरात्रेपार्श्वेनक्षत्राणिरूपमश्विनौव्यात्तम् । इष्णन्निषाणामुम्मऽइषाणसर्वलोकम्मऽइषाण । ॐ भू० उमे इहा० उमायैनमः ॥ उमम् ० ॥ २ ॥ भौमदक्षिणपार्श्वे । ॐ यदक्रन्दःप्रथमञ्जायमानऽउद्यन्त्समुद्रादुतवापुरीषात् । श्येनस्यपक्षाहरिणस्यबाहूऽउपस्तुत्यम्महिजातन्तेऽअर्वन् । ॐ भू० स्कंद इहा० स्कंदाय० स्कंदम् ०॥३ ॥ बुधदक्षिणपार्श्वे । ॐ विष्णोरराटमसिविष्णोः श्नप्त्रेस्थोविष्णोःस्यूरसिविष्णोर्ध्रुवोसि । वैष्णवमसिविष्णवेत्वा । ॐ भू० विष्णो इहा० विष्णवे नमः॥विष्णुम् ०॥४॥ गुरुदक्षिणपार्श्वे । ॐ आब्रह्मन्ब्राह्मणोब्रह्मवर्चसीजायतामाराष्ट्रेराजन्यःशूरऽइषव्योतिव्याधीमहारथोजायतान्दोग्ध्रीधेनुर्वोढानाड्वानाशुःसप्तिःपुरन्धिर्योषाजिष्णूरथेष्ठाः । सभेयोयुवास्यय्यजमानस्यवीरोजायतान्निकामेनिकामेनःपर्जन्योवर्षतुफलवत्योनऽओषधयःपच्यंताय्योगक्षेमोनःकल्पताम् । ॐ भू० ब्रह्मणे नमः ब्रह्माणम् ०॥५ ॥ शुक्रदक्षिणपार्श्वे । ॐसुजोषाऽइन्द्रसगंणोमरुद्भिःसोमम्पिबवृत्रहाशूराविद्वान् । जहिशत्रूँ १ रपमृधोनुदस्वाथाभयङ्कृणुहिविश्वतोनः । ॐ भू० इंद्र इहा० इंद्रायनमः इंद्रमावा० ॥ ६ ॥ शनिदक्षिणपार्श्वे । ॐ यमायत्वांगिरस्वतेपितृमतेस्वाहा । स्वाहाघर्मायस्वाहाघर्म्मःपित्रे

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ॐ भू०यम इहा०यमायनमः यमम्०॥७॥राहुदक्षिणपार्श्वे। ॐकार्षिरसिसमुद्रस्यत्त्वाक्षित्याऽउन्नयामि । समापोऽअद्भिरग्मतसमोष धीभिरोषधीः।ॐभू०काल इहा० ।कालाय०कालम्०॥८॥केतुदक्षिणपार्श्वे। ॐचित्रावसोस्वस्तितेपारमशीय। ॐभू०चित्रगुप्त इहा० ॐ चित्रगुप्ताय नमः। चित्रगुप्तमावाहयामि ॥ ९ ॥ इत्यधिदेवताः ॥ अथ प्रत्यधिदेवतास्थापनम् ॥ सूर्य्यस्य वामपार्श्वे । ॐ अग्निंदूतम्पुरोदधेहव्यवाहमुपब्रुवे । देवाँ २॥ऽआसादयादिह । ॐभू०अग्ने इहा० ॐ अग्नये नमः । अग्निमा० ॥ १ ॥ सोमवाम पार्श्वे । ॐ आपोहिष्ठामयोभुवस्तानऽऊर्जेदधातन । महेरणायचक्षसे ॐभू० आप इहागच्छत० अद्भ्यो नमः । आप० ॥२ ॥ भौम वामपार्श्वे । ॐ स्योनापृथिविनोभवानृक्षरानिवेशनी । यच्छानः शर्म्मसप्रथाः ॐभू०पृथिवि इहा० ॐ पृथिव्यै नमः । पृथिवीं०॥३॥ बुधवामपार्श्वे । ॐ इदम्विष्णुर्विचक्रमेत्रेधानिदधेपदम् । समूढमस्यपाꣳसुरेस्वाहा । ॐभू० विष्णो इहा० ॐविष्णवेनमः । वि ष्णुमावा० ॥ ४ ॥ गुरुवामपार्श्वे । ॐ त्रातारमिन्द्रमवितारमिन्द्रꣳहवेहवेसुहवꣳशूरमिन्द्रम् ॥ ह्वयामिशक्रम्पुरुहूतमि न्द्रꣳस्वस्तिनोमघवाधात्विन्द्रः । ॐ भू०इंद्र इहा० ॐ इंद्राय० इंद्रं० ॥५॥ शुक्रवामपार्श्वे । ॐअदित्यैरास्नासीन्द्राण्याऽउष्णीषं÷ पूषासिघर्म्मायदीष्व । ॐ भू०इंद्राणि इहा० ॐ इंद्राण्यै नमः । इंद्राणीं० ॥ ६ ॥ शनिवामपार्श्वे ॐप्रजापतेनत्वदेतान्यन्योविश्वा रूपाणिपरिताबभूव । यत्कामास्तेजुहुमस्तन्नोऽअस्तुव्वयꣳस्यामपतयोरयीणाम् । ॐ भू० प्रजापते इहा० ॐ प्रजापतये नमः ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

प्रजापतिम्०॥७॥राहुवामपार्श्वे। ॐनमोस्तुसर्पेभ्योयेकेचपृथिवीमनु। येऽअन्तरिक्षेयेदिवितेभ्यःसर्पेभ्योनमः। ॐ भू० सर्पा इहागच्छत इह तिष्ठत। ॐ सर्पेभ्यो नमः। ॐ सर्पान्० ॥८॥ केतुवामपार्श्वे। ॐब्रह्मयज्ञानम्प्रथमम्पुरस्ताद्विसीमतःसुरुचोव्वेनऽआवः॥ सबुध्न्याऽउपमाऽअस्यव्विष्ठाःसतश्चयोनिमसतश्चव्विवः। ॐभू० ब्रह्मन् इ० ॐब्रह्मणे नमः। ब्रह्माणमावाहयामि ॥ ९ ॥ इति प्रत्यधिदेवतास्थापनम् ॥ अथ पंचलोकपालस्थापनम् ॥ राहोरुत्तरतः। ॐ गुणानान्त्वा० ॐभू० गणपते इहा०॥१॥शनेरुत्तरतः ॐअंबेऽअंबिकेंबालिकेनमानयतिकश्चनससस्त्यश्वकःसुभद्रिकांकाम्पीलवासिनीम् ॐभू० दुर्गे इहा० दुर्गायै० २ रवेरुत्तरतः—ॐ आनोनियुद्भिःशतिनीभिरध्वरंसहस्रिणीभिरुपयाहियज्ञम्॥ वायोऽअस्मिन्त्सवनेमादयस्वयूयंपातःस्वस्तिभिःसदानःॐभू० वायो इहा० वायवे नमः ३ राहोर्दक्षणे—ॐघृतङ्घृतपावनंपिबतुव्वसाम्बसांपावनंपिबतान्तरिक्षस्यहविरसिस्वाहादिशः-प्रदिशऽआदिशो विदिशऽउद्दिशोदिग्भ्यःस्वाहा ॐभू० आकाश इहा०आकाशाय नमः॥४केतोर्दक्षणे ॐश्यावाङ्कशामधुमत्याश्विनासुनृतावतीतयाय ज्ञस्मिमिक्षताम् ॐ भू०अश्विनौ इहागच्छताम् अश्विभ्यां नमः॥५॥ अथ प्रागादितः पीठसमंताद्दिक्पालानावाहयेत्। पूर्वे-ॐ त्रातारमिन्द्रमवितारमिन्द्रंहवेहवेसुहवंशूरमिन्द्रम्॥ह्वयामिशक्रम्पुरुहूतमिन्द्रंस्वस्तिनोमघवाधात्विन्द्रः ॐभू० इन्द्र इहा०इन्द्राय नमः ॥१॥आग्नेय्याम्-ॐत्वन्नोऽअग्नेतवदेवपायुभिर्म्मघोनोरक्षतन्वश्चव्वन्द्य॥त्रातातोकस्यतनयेगवामस्यनिमेषंरक्षमाणस्तवव्रते ॐ अग्ने

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

इहा०अग्नये०॥२॥दक्षिणे-ॐयमायत्वांगिरस्वतेपितृमतेस्वाहा॥स्वाहाधर्मायस्वाहाधर्मंपित्रे।ॐभू०यमइहा०यमा०॥३॥नैर्ऋत्याम्
ॐ असुन्वन्तमयजमानमिच्छस्तेनस्येत्यामन्विहितस्करस्य अन्यमस्मदिच्छसातऽइत्यानमोदेविनिर्ऋतेतुभ्यमस्तुॐभू०निर्ऋते इ
हा०॥४॥पश्चिमे-ॐतत्वायामिब्रह्मणाव्वन्दमानस्तदाशास्तेयजमानोहविर्भिः॥ अहेडमानोव्वरुणेहबोध्युरुशꣳसमानऽआयुःप्रमो
षीः ॐ भू०वरुण इहा० ॥५॥ वायव्याम्-ॐआनोनियुद्भिः॥ शतिनीभिरध्वरꣳसहस्रिणीभिरुपयाहियज्ञम्॥वायोऽअस्मिन्त्सवने
मादयस्वयूयंपातस्वस्तिभिःसदानः।ॐभूव्वायो इहा०॥६॥उत्तरे-ॐवयꣳसोमव्रतेतवमनस्तनूषुबिभ्रतःप्रजावन्तःसचेमहि ॐभू०
सोम इहा०॥७॥ईशान्याम्-ॐतमीशानञ्जगतस्तस्थुषस्पतिन्धियञ्जिन्वमवसेहूमहेव्वयम्॥ पूषानोयथाव्वेदसामसद्वृधेरक्षिता
पायुरदब्धःस्वस्तयेॐभू० ईश्वर इहा०॥८॥ पूर्वेशानयोर्मध्ये ऊर्ध्वायाम्-ॐ अस्मेरुद्रामेहनापर्व्वतासोवृत्रहत्येभरहूतौसजोषाः॥
यꣳशꣳसतेस्तुवतेधायिपज्रइन्द्रज्येष्ठाऽअस्माँ२ऽअवन्तुदेवाः। ॐभू०ब्रह्मन्०ब्रह्मणे०॥ ९॥ निर्ऋतिपश्चिमयोर्मध्ये अधःस्थायाम्
ॐस्योनापृथिविनोभवानृक्षरानिवेशनःयच्छानꣳशर्मसप्रथाः॥ॐभूर्भुवःस्वः अनन्तइहागच्छइह तिष्ठअनंताय नमः।अनंतमावाहया
मि १० एवं ऋतुसंरक्षकादिक्पालदेवतास्थापनं कृत्वा।ॐमनोजूतिर्जुषतामाज्यस्यबृहस्पतिर्य्यज्ञमिमन्तनोत्वरिष्टंयज्ञꣳसमिमंदधातु
विश्वेदेवासऽइहमादयन्तामो३म्प्रतिष्ठ १ ॐआदित्यादिग्रहमंडलदेवताभ्यो नमः॥सुप्रतिष्ठिता वरदा भवत इति प्रतिष्ठाप्य।देशकालौ

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

संकीर्त्य इह सकलशांतिपूर्वकं सकलदुरितोपशमनद्वारा श्रीपरमेश्वरप्रीत्यर्थे सनवग्रहमखा मुकमंत्रपुरश्चरणहोमकर्मणि सूर्यादिनवग्रहाणामधिदेवतानां प्रत्यधिदेवतानां पंचलोकपालानां दशदिक्पालानां च पूजनं करिष्ये इति संकल्पयेत्। ततः ॐग्रहाऽऊर्ज्जाहुतयो॒व्व्यन्तो॒व्विप्राय॑म॒तिंतेषां॒व्विशि॑प्प्रियाणाम्व्वो॒हमिष॒मूर्ज्जं॒ठ्ठ॒सम॑ग्रभमुपया॒मगृ॑हीतो॒सीन्द्रा॑यत्वा॒जुष्टं॑ङ्गृह्णाम्ये॒षते॒योनि॒रिन्द्रा॑यत्वा॒जुष्ट॑तमम् ॥ १ ॥ ॐ भूर्भुवःस्वः सूर्य्यादिग्रहेभ्यो नमः । रुद्राद्यधिदेवताभ्यो नमः । अग्न्यादिप्रत्यधिदेवताभ्यो नमः । विनायकादिपंचलोक पालेभ्योनमः इंद्रादिदशदिक्पालेभ्यो नमः ।: इति नाममंत्रैः प्रत्येकं तत्तद्वर्णयुक्तगंधपुष्पधूपदीपनैवेद्यताम्बूलदक्षिणादिभिः संपूज्य ततो ग्रहवेदीसमीपे भूमौ पूर्वोक्तनाममंत्रैर्ग्रहदेवताभ्यो बलीन्दद्यात् । तद्यथा । सूर्याय गुडौदनम् । सोमाय घृतपायसम् । कुजाय मसूरान्नम् । बुधाय क्षीरौदनम् । गुरवे दध्योदनम् । शुक्राय घृतौदनम् । शनैश्चराय तिलपिष्टम् । राहवे तिलमाषान्नम् । केतवे चित्रौदनम् । अन्येभ्यः पायसबलीन्दत्त्वा प्रार्थयेत् । ॐ आदिदेव नमस्तुभ्यं सप्तसप्ते दिवाकर ॥ आयुरारोग्यं मे देहि कुरु शांतिं शुभप्रदाम् ॥ १ ॥ रोहिणीश सुधामूर्ते सुधारूप सुधाशन ॥ सोम सौम्यो भवास्माकं सर्वारिष्टं निवारय ॥ २ ॥ कुज कुप्रभवोपि त्वं मंगलः परिगद्यसे ॥ अमंगलं निहत्याशु सर्वदा यच्छ मंगलम् ॥ ३ ॥ बुध त्वं बुद्धिजननो बोधवान्सर्वदा नृणाम् ॥ तत्त्वावबोधं कुरु मे सोमपुत्र नमोस्तुते ॥ ४ ॥ वेदशास्त्रार्थतत्वज्ञ ज्ञानविज्ञानपारग ॥ विबुधार्तिहरो नित्यं देवाचार्य नमोऽस्तुते ॥ ५ ॥ भार्गवो भर्गजननः शुचिः श्रुतिविशारद ॥ हत्वा ग्रहकृतान्दोषानारोग्यं देहि मे सदा ॥ ६ ॥ कोणनीलांजनप्रख्यं मंदचेष्टाप्रसारिणम् ॥ छायामार्तंडसंभूतं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तं नमामि शनैश्चरम् ॥ ७ ॥ महाशिरा महावक्त्रो दीर्घदंष्ट्रो महाबलः ॥ मुंडकायोर्ध्वकेशी च पीडां हरतु मे तमः ॥ ८ ॥ अधः स्थार्धांग भोः केतो पत्रधूमसमप्रभ ॥ रौद्ररूप नमस्तुभ्यं मम पीडां निराकुरु ॥ ९ ॥ इति प्रार्थ्य । ॐ अनया पूजया आदित्याद्यावाहितग्रहमंडलदेवताः प्रीयंतामिति पठेत् ॥ तत ईशान्यां ग्रहसंबंधिरुद्रकलशम् ॐ महीद्यौरित्यादिमंत्रैः पूर्ववत् संस्थाप्य । तत्र तत्त्वायामीति वरुणमावाह्य संपूज्य । कलशस्य मुखे विष्णुरित्यभिमंत्र्य—देवदानवसंवादे० इत्यादि प्रार्थयेत् । ततस्तदुपरि । ॐअसंख्यातासहस्राणियेरुद्राऽअधिभूम्याम्।तेषाᳬसहस्रयोजनेवधन्वानितन्मसि । ॐ भूर्भुवः स्वः रुद्रा इहागच्छत इह तिष्ठत इत्यावाह्य । ॐ रुद्रेभ्यो नमः । इति षोडशोपचारैः संपूजयेत् ॥ (अनेन कलशोदकेन अभिषेकसमये पत्न्या सह यजमानमभिषिंचेत्) ॥ इति नवग्रहमण्डलपूजनम् ॥ ॥ अथ सर्वदेवमंत्रानुष्ठानोपयोगिसर्वतोभद्रमण्डलदेवतापूजनम् ॥ आचम्य प्राणानायम्य । देशकालौ स्मृत्वा । अमुकमंत्रपुरश्चरणहोमकर्मणि एतत्सर्वतोभद्रमण्डले वेदमंत्रैर्ब्रह्मादिषट्पंचाशद्देवतावाहनं प्रतिष्ठापूजनं च करिष्ये इति संकल्पं कृत्वा। पुष्पाक्षतानादाय मध्ये ब्रह्माणमावाहयेत्। ॐब्रह्मयज्ञानम्प्रथमम्पुरस्ताद्विसीमतᳬसुरुचोव्वेनऽआवᳬ। सबुध्न्याऽउपमाऽअस्यव्विष्ठाᳬसतश्चयोनिमसतश्चव्विवः ।ॐ भूर्भुवःस्वःब्रह्मन्निहागच्छ इह तिष्ठ ॐ ब्रह्मणेनमः १ उत्तरेसोम०। ॐवयᳬसोमव्रतेतवमनस्तनूषुबिभ्रतᳬ—प्रजावन्तᳬसचेमहि । ॐ भूर्भुवः स्वः सोम इहा०—ॐ सोमाय नमः ॥ २ ॥ ईशान्यामीशानम् ॥ॐ तमीशानञ्जगतस्तस्थुषस्पतिन्धियञ्जिन्वमवसेहूमहेव्वयम् । पूषानोयथावेदसामसद्वृधेरक्षितापायुरदब्धᳬस्व

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

स्तये । ॐभ०ईशान इहा०ॐ ईशानाय नमः ॥ ३ ॥ पूर्वस्यां दिशि इंद्रम् । ॐत्रातारमिन्द्रमवितारमिन्द्रꣳहवेहवेसुहवꣳशूरमिन्द्रम् । व्हयामिशक्रम्पुरुहूतमिन्द्रꣳस्वस्तिनोमघवाधात्विन्द्रः । ॐ भूर्भुवः स्वः इंद्र इहा० ॐ इंद्राय नमः ॥४॥ आग्नेय्यामग्निम् । ॐत्वन्नोऽअग्नेव्वरुणस्यविद्वान्देवस्यहेडोऽअवयासिसीष्ठाः यजिष्ठोवह्नितमꣳशोशुचानोव्विश्वाद्वेषाꣳसिप्रमुमुग्ध्यस्मत् । ॐभू०अग्ने इहा०ॐअग्नये नमः ॥ ५ ॥ दक्षिणे यमम् । ॐसुगन्नुपंथाम्प्रदिशन्नऽएहिज्योतिष्मद्धेह्यजरन्नऽआयु÷ । अपैतमृत्युरमृतंनऽआगन्नैवैवस्वतोनोऽअभयंकृणोतु । ॐ भू० यम इहा० ॐ यमाय नमः ॥ ६ ॥ नैर्ऋत्यां निर्ऋतिम् । ॐ असुन्वन्तमयजमानमिच्छस्तेनस्येत्यामन्विहितस्करस्य । अन्यमस्मदिच्छसातऽइत्यानमोदेविनिर्ऋतेतुभ्यमस्तु । ॐ भू० निर्ऋते इहा० ॐ निर्ऋतये नमः ॥७॥ पश्चिमे वरुणम् ॐ तत्त्वायामिब्रह्मणावन्दमानस्तदाशास्तेयजमानोहविर्भि÷ ॥ अहेडमानोव्वरुणेहवोध्युरुशꣳसमानऽआयुः प्रमोषीः । ॐ भू० वरुण इहा० ॐ वरुणाय नमः ॥ ८ ॥ वायव्यां वायुम् । ॐ आनोनियुद्भि÷ शतिनीभिरध्वरꣳसहस्रिणीभिरुपयाहियज्ञम् ॥ व्वायोऽअस्मिन्त्सवनेमादयस्वयूयम्पातस्वस्तिभिꣳसदानः ॥ ॐ भू० वायो इहा० ॐ वायवे नमः ॥ ९ ॥ वायु सोमयोर्मध्ये अष्टवसून् । ॐ व्वसो÷पवित्रमसिशतधारंव्वसो÷पवित्रमसिसहस्रधारम् । देवस्त्वासवितापुनातुव्वसोःपवित्रेणशतधारेणसुप्वाकामधुक्षः । ॐ भू० अष्टौवसव इहागच्छंतु इह तिष्ठंतु ॐ वसुभ्यो नमः ॥ १० ॥ सोमईशानयोर्मध्ये रुद्रान् । ॐ नमस्ते

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

रुद्रमन्यवऽउतोतइषवेनमः÷बाहुभ्यामुततेनमः÷। ॐ भूः० रूद्रा इहागच्छंतु ॐ रुद्रेभ्यो नमः ॥ ११ ॥ ईशानपूर्वयोर्मध्ये आदित्यान्। ॐ अदितिर्द्यौरदितिरन्तरिक्षमदितिर्म्मातासपितासपुत्रः। विश्वेदेवाऽअदितिःपञ्चजनाऽअदितिर्ज्जातमदितिर्ज्जनित्वम्॥ॐ भूः० आदित्या इहा० आदित्येभ्यो नमः॥१२॥ इन्द्राग्न्योर्मध्येऽश्विनौ। ॐ अश्विनातेजसाचक्षुः÷प्राणेनसरस्वतीवीर्य्यम्॥वाचेन्द्रोबलेन्द्रा यदधुरिन्द्रियम्। ॐ भूः० अश्विनौ इहागच्छतम् इह तिष्ठतम् ॐ अश्विभ्यां नमः ॥ १३ ॥ अग्नियमयोर्मध्ये विश्वेदेवान्सपितन्। ॐ विश्वेदेवासऽआगतशृणुतामऽइमꣳहवम् ॥ एवंबर्हिर्न्निषीदत ॥ ॐ भूः० वेश्वदेवा इहा० ॐ विश्वेभ्यो देवेभ्यो नमः॥१४॥ तत्रैव ॐ आयन्तुनःपितरःसोम्यासोग्निष्वात्ताःपथिभिर्देवयानैः÷। अस्मिन्यज्ञेस्वधयामदन्तोधिब्रुवन्तुतेवन्त्वस्मान्।ॐभूः०पितर इहा०पितृभ्यो नमः॥१५॥यमनिर्ऋत्योर्मध्ये यक्षान्।ॐअभित्यंदेवꣳसवितारमोण्योःकविक्रतुमर्च्चामिसत्यसवꣳरत्नधामभिप्रियम्मतिङ्कविम्। ऊर्ध्वायस्यामतिर्भाऽअदिद्युतत्सवीमनिहिरण्यपाणिरमिमीतसुक्रतुः÷कृपास्वः÷। प्रजाभ्यस्त्वाप्रजास्त्वानुप्राणन्तुप्रजास्त्वामनुप्राणिहि।ॐ भूः० यक्षा इहा० ॐ यक्षेभ्यो नमः॥१६॥निर्ऋतिवरुणयोर्मध्ये भूतनागान्। ॐ भूतायत्वानारातयेस्वरभिविक्ष्यꣳषदꣳहन्तान्दुर्य्याः÷पृथिव्यामुर्व्वन्तरिक्षमन्वेमिपृथिव्यास्त्वानाभौसादयाम्यदित्याऽउपस्थेग्नेहव्यꣳरक्ष।ॐभूः०भूतानिइहा०ॐभूतेभ्योनमः१७॥ तत्रैवसर्पान् ॐ नमोस्तुसर्प्पेभ्योयेकेचपृथिवीमनुयेऽअन्तरिक्षेयेदिवितेभ्यः÷सर्प्पेभ्योनमः÷।ॐभूः०सर्पा इहा०ॐ सर्पेभ्यो नमः१८

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वरुणवाय्वोर्मध्ये गंधर्वाप्सरसः।ॐ गन्धर्वस्त्वा विश्वावसुः परिदधातु विश्वस्यारिष्ट्यै यजमानस्य परिधिरस्या ग्निरिडऽईडितः। इन्द्रस्य बाहुरसि दक्षिणो विश्वस्यारिष्ट्यै यजमानस्य परिधिरस्या ग्निरिडऽईडितः। मित्रावरुणौत्वोत्तरतः परिधत्तां ध्रुवेण धर्म्मणा विश्वस्यारिष्ट्यै यजमानस्य परिधिरस्या ग्निरिडऽईडितः ॥ ॐ भूः गंधर्वा इहा० ॐ गंधर्वेभ्यो नमः ॥ १९ ॥ तत्रैवाप्सरसः । ॐ अयं पुरो हरिकेशः सूर्य्यरश्मिस्तस्य रथगृत्सश्चरथौजाश्चसेनानिग्रामण्यौ । पुञ्जिकस्थलाचक्रतुस्थलाचाप्सरसौ दंक्ष्णवः पशवो हेतिः पौरुषेयो वधो ग्रहितिस्तेभ्यो नमोऽस्तु ते नो वन्तु ते नो मृडयन्तु ते यं द्विष्मो यश्च नो द्वेष्टि तमेषाꣳ रम्भे दध्मः । ॐ भूः अप्सरस इहागच्छत इह तिष्ठत । ॐ अप्सरोभ्यो नमः ॥ २० ॥ ब्रह्मसोमयोर्मध्ये स्कंदं नंदीश्वरं शूलं च । ॐ यदक्रन्दः प्रथमजायमानऽउद्यन्त्समुद्रादुतवा पुरीषात् । श्येनस्य पक्षाहरिणस्य बाहूऽउपस्तुत्यम्महिजातं तेऽअर्व्वन् ॥ ॐभूः स्कंद इहा० ॐ स्कंदाय नमः ॥ २१ ॥ तदुत्तरे । ॐ आशुः शिशानो वृषभो न भीमो घनाघन क्षोभणश्चर्षणीनाम् । सङ्क्रन्दनो निमिषऽएकवीरः शतꣳसेनाऽअजयत्साकमिन्द्रः । ॐभूः नंदिन् इहा० ॐ नंदीश्वराय नमः ॥ २२ ॥ तत्रैव । ॐकार्षिरसि समुद्रस्य त्वाक्षित्याऽउन्नयामि समापोऽअद्भिरग्मत समोषधीभिरोषधीः । ॐ भूः शूलमहाकालौ इहागच्छतमिह तिष्ठतम् ॐशूलमहाकालाभ्यां नमः ॥ २३ ॥ ब्रह्मेशानयोर्मध्ये प्रजापतीन् । ॐ प्रजापतेनत्वदेतान्यन्योविश्वारूपाणि परिताबभूव । यत्कामास्ते जुहुमस्तन्नोऽअस्तुवयꣳस्यामपतयोरयीणाम्।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ॐ भू० प्रजापतय इहा० ॐ प्रजापतिभ्यो नमः ॥ २४ ॥ ब्रह्मेंद्रयोर्मध्ये दुर्गाम् । ॐ अम्बेऽअम्बिकेम्बालिकेनमानयति कश्चन । ससस्त्यश्वकः सुभद्रिकांकाम्पीलवासिनीम् ॥ ॐ भू० दुंग इहा० ॐ दुर्गायै नमः ॥ २५ ॥ दुर्गापूर्वं विष्णुम् । ॐ इदम्विष्णुर्विचक्रमेत्रेधानिदधेपदम् । समूढमस्यपाꣳसुरेस्वाहा । ॐ भू० विष्णो इहा०ॐ विष्णवे नमः ॥ २६ ॥ ब्रह्माग्न्योर्मध्ये पितॄन् । ॐ उदीरतामवरऽउत्परासऽउन्मध्यमाःपितरःसोम्यासः । असुंयऽईयुरवृकाऽऋतज्ञास्तेनोवंतुपितरोहवेषु । ॐ भू० पितर इहा० ॐ पितृभ्यो नमः ॥ २७ ॥ ब्रह्मयमयोर्मध्ये मृत्युरोगान् । ॐ परं मृत्योऽअनुपरेहिपंथांय्स्तेअन्यइतरोदेवयानात् ॥ चक्षुष्मतेशुण्वतेतेब्रवीमिमानःप्रजाꣳरीरिषोमोतवीरान् । ॐ भू० मृत्युरोगा इहा० ॐ मृत्युरोगेभ्यो नमः ॥२८॥ ॐ ब्रह्मनिर्ऋत्योर्मध्ये गंणपतिम् । ॐ गणानांत्वागणपतिꣳहवा०।ॐभू०गणपते इहा० ॐ गणपतये नमः ॥२९॥ ॐ ब्रह्मवरुणयोर्मध्ये अपः । ॐ अपोऽअद्यान्वचारिषꣳरसेनसमसृक्ष्महि पयस्वानग्नऽआगमन्तम्मासꣳसृजवर्चसाप्रजयाचधनेनच। ॐभू०आप इहा०ॐअद्भ्यो नमः ॥३०॥ ब्रह्मवायुमध्ये मरुतः। ॐ बृहदिन्द्रायगायतमरुतोवृत्रहंतमम्।येनज्योतिरजनयन्मृतावृधोदेवंदेवायुजागृवि।ॐ भू०मरुत इहा० ॐ मरुद्भ्यो नमः ॥ ३१ ॥ ब्रह्मणः पादमूले पृथिवीम्। ॐ मुहीद्यौःपृथिवीचनऽइमंयज्ञम्मिमिक्षताम्। पिपृतान्नोभरीमाभिः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ॐभू०पृथिवि इहा० ॐ पृथिव्यै नमः ॥३२॥ तत्रैव गंगादिसरितः । ॐ इमंमेगंगेयमुने सरस्वतिशुतुद्रिस्तोमँसचतापरुष्णिया ।
असिक्न्यामरुद्वधेवितस्तयार्जीकीयेशृणुह्यासुषोमया । ॐ भू० गंगादिसप्तसरित इहा० ॐ गंगादिसरिद्भ्यो नमः ॥ ३३ ॥
तत्रैव सप्तसागरान् । ॐमापोमौषधीर्हिंठ्सिधाम्नोधाम्नोराजँस्ततोव्वरुणनोमुञ्च ॥ यदाहुरध्याऽइतिव्वरुणेतिशपामहेततोव्वरुणनो
मुञ्च । ॐभू० सागरा इहा० ॐ सप्तसागरेभ्यो नमः ॥ ३४, ॥ तदुपरि मेरुं नाममंत्रेणावाहयेत् । ॐभू० मेरो इहा० ॐ
मेरवे नमः ॥ ३५ ॥ ततो मंडलाद्बहिः सोमादिसन्निधौ क्रमेण आयुधान्यावाहयेत् । उत्तरे गदामावाहयामि स्थापयामि ।
ॐभू० गदे इहा० ॐ गदायै नमः ॥ ३६ ॥ ईशान्यां त्रिशूलमा० ॐ त्रिशूलाय० ॥ ३७ ॥ पूर्वे वज्रमा० ॐ वज्राय० ॥ ३८ ॥
आग्नेय्याम् शक्तिं० ॐ शक्तये नमः ॥३९॥ दक्षिणस्यां दंडमा० ॐ दंडाय नमः ॥४०॥ नैर्ऋत्यां खड्गमा० ॐखड्गाय० ॥ ४१ ॥
पश्चिमे पाशमावा० ॐ पाशाय० ॥४२॥ वायव्याम् अंकुशमावा० ॐअंकुशाय० ॥ ४३ ॥ तद्बाह्ये उत्तरे ॐ गौतमाय० ॥४४॥
ईशान्याम् ॐ भारद्वाजाय० ॥ ४५ ॥ पूर्वे ॐविश्वामित्राय० ॥ ४६ ॥ आग्नेय्याम् ॐ कश्यपाय० ॥ ४७ ॥ दक्षिणे ॐ जमद
ग्नये० ॥ ४८ ॥ नैर्ऋत्याम् ॐवसिष्ठाय नमः ॥ ४९ ॥ पश्चिमे ॐ अत्रये० ॥५०॥ वायव्यम् ॐअरुंधत्यै नमः ॥५१॥ तद्बाह्येपू
र्वादिक्रमेण पूर्वे ।ॐ ऐंद्र्यै नमः॥५२॥आग्नेय्याम् । ॐ कौमार्यै०॥५३॥दक्षिणास्याम्। ब्राह्म्यै नमः॥५४॥नैर्ऋत्याम्। ॐवाराह्यै नमः
॥ ५५ ॥ पश्चिमायाम् । ॐ चामुंडायै नमः ॥ ५६ ॥ वायव्याम् । ॐ वैष्णव्यै नमः ॥ ५७ ॥ उत्तरस्याम् । ॐ

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

माहेश्वर्यै० ॥ ५८ ॥ ईशान्याम् । ॐ वैनायक्यै नमः ॥ ५९ ॥ इत्यावाह्य । ॐ मनोजूतिर्जुषतामिति प्रतिष्ठाप्य यथालब्धोपचारैः ब्रह्मादीन् संपूज्य वेदीमध्ये पद्मे ताम्रकलशं पूर्ववत् ॐ महीद्यौरित्यादिमंत्रैः पूर्णपात्रनिधानान्तं पूर्ववत् कृत्वा तत्र ॐ तत्त्वायामीति वरुणमावाह्य । ॐ अपांपतिवरुणाय नमः इति संपूज्य—कलशस्य मुखे विष्णुरित्य भिमंत्र्य—देवदानवसंवादे०इत्यादि प्रार्थयेत् ॥ ततः कलशोपरि पट्टवस्त्रं प्रसार्य्य तदुपरि गंधाष्टकेन प्रधानदेवतायंत्रं विलिख्य तन्मध्ये पलेन तदर्द्धेन वा सुवर्णेन रचितां प्रधानदेवप्रतिमां सावयवामभ्युत्तारणपूर्वकं स्थापयेत् । अथाभ्युत्तारणम् ॥ तत्र तावत्साचार्य्यो यजमानः देशकालौ संकीर्त्य अस्याः स्वर्णमय्यमुकदेवप्रतिमाया घटनादिदोषपरिहारार्थम् अभ्यु त्तारणपूर्वकं प्राणप्रतिष्ठां करिष्ये इति संकल्प्य मूर्तिंपात्रेनिधाय घृतेनाभ्यज्य उपरि दुग्धजलधारां कुर्यात् । (अभ्युत्तारणमंत्राः) ॐ समुद्रस्यत्वाव्वकयाग्ने परिव्ययामसिपावकोऽअस्मभ्यंठ्ँशिवोभव १ हिमस्यत्वाजरायुणाग्नेपरिव्ययामसिपावकोऽअस्म भ्यंठ्ँशिवोभव २ उपज्मन्नुपवेतुसेव्वंतरनदीष्वाअग्नेपितमुपामसिमंडूकिताभिरागंहिसेमन्नोयज्ञंपावकवर्णंठ्ँशिवङ्कृधि ३ अपामिदंन्ययनंठ्ँसमुद्रस्यनिवेशनम् अन्याँस्तेंऽअस्मत्तपन्तुहेतयं÷पावकोऽअस्मभ्यंठ्ँशिवोभव ४ अग्नेपावकरोचिषामुन्द्र यादेवजिह्वयाऽआदेवान्वक्षियाक्षिच ५ सन÷पावकदीदिवोग्नेदेवाँ २ ऽइहावह उपयज्ञंठ्ँहविश्चनः ६ पावकयायश्चितय

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

न्त्याकृपाक्षामन्रुरुचऽउषसोनुभानुना तूर्व्वन्नयामन्नेतशस्यनूरणऽआयोघृणेनततृषाणोऽअजरः ७ नमस्तेहरसेशोचिषेनमस्ते ऽअस्त्वर्चिषे अन्याँस्तेऽअस्मत्तपन्तुहेतयः पावकोऽअस्मभ्यꣳशिवोभव ८ नृषदेवेडप्सुषदेव्वेड्वेर्हिषदेवेड्वनसदेव्वेट्स्वर्व्विदेव्वेट् ९ येदेवादेवानांयज्ञियानाꣳसंवत्सरीणमुपभागमासतेअहुतादोहविषोयज्ञेअस्मिन्त्स्वयंपिबन्तुमधुनोघृतस्य १० येदेवादेवेष्वधिदेवत्वमायन्येब्रह्मणःपुरऽएतारोऽअस्य येभ्योनऽऋतेपवतेधामकिञ्चननतेदिवोनपृथिव्याऽअधिस्नुषु ११ प्राणदाऽअपानदाव्यानदाव्वर्चोदाव्वरिवोदाःअन्याँस्तेऽअस्मत्तपन्तुहेतयः पावकोऽअस्मभ्यꣳशिवोभव॥१२॥ इत्यग्न्युत्तारणमंत्राः । ततः प्राणप्रतिष्ठां कुर्यात् ।ॐ आँह्रींक्रौँयंरंलंवंशंषंसंहंक्षंहंसःसोहम् अस्या अमुकदेवप्रतिमायाः प्राणा इह प्राणाः ॐआँह्रींक्रौँयंरंलंवंशंषंसंहंक्षंहंसः सोहम् अस्या अमुकदेवप्रतिमायाः जीव इह स्थितः पुनः ॐ आँह्रींक्रौँयंरंलंवंशंषंसंहंक्षंहंसःसोहम् अस्या अमुकदेवप्रतिमायाः सर्वेंद्रियाणि वाङ्मनस्त्वक्चक्षुःश्रोत्रजिह्वाघ्राणपाणिपादपायूपस्थानि इहैवागत्य सुखं चिरं तिष्ठंतु स्वाहा । ॐ मनोर्जूतिर्जुषता० १एषवैप्रतिष्ठा०२ इति प्रतिष्ठाप्य । वृत्रस्यासीति नेत्रोन्मीलनम् । ॐ वृत्रस्यासिकनीनकश्चक्षुर्दाऽअसिचक्षुर्म्मेदेहि१। ततो गंधादिपंचोपचारान् दत्त्वा संस्कारसिद्धये षोडशप्रणवावृत्तिं कुर्यात् । अनेनास्या अमुकदेवप्रतिमाया गर्भाधानादिषोडशसंस्कारान् संपादयामि इति वदेत् । इति प्राणप्रतिष्ठां कृत्वा पूजयेत् । ॐ सहस्रशीर्षापुरुषः सहस्राक्षः सहस्रपात् सभूमिꣳसर्व्वतस्पृत्वात्यतिष्ठद्दशाङ्गुलम् ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

इत्यावाहनम् ॥ १ ॥ ॐपुरुषऽएवेदꣳसर्व्वंयद्भूतंयच्चभाव्यम् उतामृतत्वस्येशानोयदन्नेनातिरोहति । इत्यासनम्॥२॥ॐएतावानस्य महिमातोज्यायाँश्चपूरुषः पादोस्यविश्वाभूतानित्रिपादस्यामृतन्दिवि । इति पाद्यम्॥३॥ॐ त्रिपादूर्ध्वऽउदैत्पुरुषःपादोस्येहाभवत्पुनः ततोव्विष्वङ्व्यक्रामत्साशनानशनेऽअभि । इत्यर्घ्यम्॥४॥ॐ ततोव्विराडजायताव्विराजोऽअधिपुरुषःसजातोऽअत्यरिच्यतपश्चाद्भूमिमथोपुरः। इत्याचमनम्॥५॥ॐतस्माद्यज्ञात्सर्व्वहुतःसम्भृतंपृषदाज्यम्॥पशूँस्तांश्चक्रेव्वायव्यानारण्याग्राम्याश्चये।इति स्नानम्॥६॥ (पयः पृथिव्यामित्यादिपञ्चमन्त्रैःपंचामृतस्नानं कारयेत्)।पुनः शुद्धस्नानम्। ॐतस्माद्यज्ञात्सर्व्वहुतऽऋचःसामानियज्ञिरे छंदाꣳसियज्ञिरेतस्माद्यजुस्तस्मादजायत।इति वस्त्रम् (आचमनं च)॥७॥ ॐतस्मादश्वाऽअजायन्तयकेचोभयादतःगावोहयज्ञिरेतस्मात्तस्माज्जाताऽअजावयः।इति यज्ञोपवीतम्(आचमनं च)॥८॥ॐ तंयज्ञंब्बर्हिषिप्रोक्षन्पुरुषजातमग्रतः तेनदेवाऽअयजन्तसाद्ध्याऽऋषयश्चये। इति गंधम्॥९॥ॐयत्पुरुषंव्यदधुःकतिधाव्यकल्पयन्॥मुखाङ्किमस्यासीत्किबाहूकिमूरूपादाऽउच्येते।इति पुष्पाणि॥१०॥(ततःआवरणदेवतापूजनम्) ब्राह्मणोस्यमुखंमासीद्बाहूराजन्यःकृतऽऊरूतदस्ययद्वैश्यःपद्भ्याꣳशूद्रोऽअजायत।इति धूपम्॥११॥ॐचंद्रमामनसोजातश्चक्षोःसूर्य्योऽअजायत श्रोत्राद्वायुश्चप्राणश्चमुखादग्निरजायत । इति दीपम्॥१२॥ॐ नाभ्याऽआसीदुंतरिक्षꣳशीर्ष्णोद्यौः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

समवर्तत पद्भ्याम्भूमिर्दिशः श्रोत्रात्तथालोकां २९ऽअकल्पयन्। इति नैवेद्यम्(आचमनंच)॥१३॥ॐ यत्पुरुषेणहविषादेवायज्ञमतन्वत वसुन्तोस्यासीदाज्यंइध्मःशरद्धविः।इति दक्षिणाम्॥१४॥(ततो नीराजनम्)ॐ सप्तास्यासन्परिधयस्त्रिःसप्तसमिधः÷कृताः देवायद्यज्ञन्तन्वानाऽअबध्नम्पुरुषम्पशुम्॥१५॥इति प्रदक्षिणाम्।यज्ञेन यज्ञमयजन्तदेवास्तानिधर्म्माणिप्रथमान्यासन् तेहनाकम्म हिमानः÷ सचन्तयत्र पूर्व्वेसाध्याःसन्तिदेवाः। इति मंत्रपुष्पांजलिम्॥१६॥ततस्तत्तत्स्तवेन स्तुत्वा साष्टांगं प्रणम्य देवाय पूजां निवेदयेत्। इति सर्वतोभद्रपूजापद्धतिः समाप्ता ॥

पेज नंबर १० चित्र.

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अथ शिवमंत्रानुष्ठाने द्वादशलिंगतोभद्रपूजाप्रद्धतिः ॥ आचम्य प्राणानायम्य । देशकालौ संकीर्त्य श्रीभवानीशंकरप्रीतिद्वारा अ मुककार्यसिद्धये एतद्वादशलिंगतोभद्रमंडले देवतावाहनं प्रतिष्ठापूजनं च करिष्ये इति संकल्प्य पुष्पाक्षतानादाय मंडलबाह्ये ईशान कोणे ॐ गुरुवे नमः । गुरुमावाहयामि स्थापयामि (एवं सर्वत्र) ॥१॥ आग्नेय्याम् ॐ गणपतये नमः॥२॥नैर्ऋत्याम् ॐ दुर्गायै नमः ॥ ३ ॥ वायव्याम् ॐ क्षेत्रपालाय नमः ॥ ४ ॥ ततो भद्रमध्ये । श्रीसदाशिवाय नमः ॥५॥ ततः अष्टदले (पूर्वस्यां दिशि) ॐ का लाग्निरुद्राय नमः ॥१॥ ॐ कूर्माय ॥२॥ ॐ मंडूकाय ॥३॥ (आग्नेय्याम्) ॐ वाराहाय ॥ ४ ॥ ॐ अनंताय ॥५॥ (दक्षिणे) ॐ पृथिव्यै ॥ ६ ॥ ॐ स्कंदाय ॥ ७ ॥ ॐ सुधासिंधवे नमः ॥८॥ (नैर्ऋत्यां दिशि) ॐ नलाय ॥ ९ ॥ ॐ पद्माय ॥१० ॥ (पश्चिमे) ॐ पत्रेभ्यः० ॥ ११ ॥ ॐ केसरेभ्य० ॥ १२ ॥ ॐ कर्णिकायै० ॥ १३ ॥ (वायव्याम्) ॐ सिंहासनाय ॥ १४ ॥ ॐ पद्मासनाय ॥ १५ ॥ (उत्तरे) ॐ धर्माय ॥ १६ ॥ ॐ ज्ञानाय ॥ १७ ॥ ॐ वैराग्याय ॥ १८॥ (ईशान्याम्) ॐ ऐश्वर्याय ॥१९॥ ॐ चिदाकाशाय ॥२०॥ (पद्ममध्ये) ॐ योगपीठात्मने ॥ २१ ॥ ततः (कर्णिकोपरि) पूर्वे ॐ पृथिव्यै ॥१॥ (दक्षिणे) ॐ कपालाय० ॥२॥ (पश्चिमे) ॐ सप्तसरिद्भ्यः० ॥३॥ (उत्तरे) ॐ सप्तसागरेभ्यः ॥४॥ (कर्णिकासमीपे) चत्वारि श्वेतभद्राणि तद्देवतास्थापनम् (पूर्वे) ॐ तत्पुरुषाय॥१॥ (दक्षिणे) ॐ अघोराय ॥२॥ (पश्चिमे) ॐ सद्योजाताय० ॥ ३ ॥ (उत्तरे) ॐ वामदे वाय० ॥ ४ ॥ अथ तत्समीपे कृष्णानि अष्टौभद्राणि तद्देवतास्थापनम् ऐशान्यादिक्रमेण (ऐशान्ये) ॐ भगवत्यै अष्टौऽभद्रणि ॥ १ ॥ (पूर्वे) ॐ उमायै ॥ २ ॥ (आग्नेय्याम्) ॐ शंकरप्रियायै ॥३॥ (दक्षिणे) ॐ पार्वत्यै ॥ ४ ॥ (नैर्ऋत्ये) ॐ गौर्यै ॥५॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(पश्चिमे) ॐ काल्यै ॥ ६ ॥ (वायव्याम्) ॐ कौम्यै ॥ ७ ॥ (उत्तरे) ॐ विश्वंभर्यै० ॥ ८॥ ततः कृष्णभद्राणामधः अष्टौ रक्त भद्राणि तद्देवतास्थापनमैशान्यादि क्रमेण (ऐशान्याम्) ॐ नंदिने० ॥१॥ (पूर्वे) ॐ महाकालाय ॥२॥ (आग्नेय्याम्) ॐ वृष भाय ॥ ३ ॥ (दक्षिणे) ॐ भृंगकिरीटिने ॥ ४ ॥ (नैर्ऋत्याम्) ॐ स्कंदाय ॥५॥ (पश्चिमे) ॐ उमापतये ॥ ६ ॥ (वायव्याम्) ॐ चंडेश्वराय ॥ ७ ॥ (उत्तरे) ॐ सोमसूत्राय० ॥८॥ अथ लिंगोपरि चत्वारि श्वेतभद्राणि तद्देवतास्थापनम् (पूर्वे) ॐ धात्रे० ॥ १ ॥ (दक्षिणे) ॐ मित्राय ॥२॥ (पश्चिमे) ॐ यमाय ॥३॥ (उत्तरे) ॐ रुद्राय ॥ ४ ॥ ततः तत्समीपे लिंगोपरि अष्टौ पीत भद्राणि तद्देवतास्थापनमीशानादिक्रमेण (ईशान्ये) ॐ वरुणाय ॥१॥ (पूर्वे) ॐ सूर्याय ॥२॥ (आग्नेय्याम्) ॐ भगाय ॥३॥ (दक्षिणे) ॐ विवस्वते ॥ ४ ॥ (नैर्ऋते) ॐ पुरुषोत्तमाय ॥ ५ ॥ (पश्चिमे) ॐ सवित्रे ॥ ६ ॥ (वायव्याम्) ॐ त्वष्ट्रे ॥ ७ ॥ (उत्तरे) ॐ विष्णवे ॥ ८ ॥ ततो द्वादशलिंगदेवतास्थापनं पूर्वादिक्रमेण (पूर्वे) ॐ शिवाय ॥ १ ॥ ॐ एकनेत्राय ॥ २ ॥ ॐ एकरुद्राय ॥ ३ ॥ (दक्षिणे) ॐ त्रिमूर्तये ॥ १ ॥ ॐ श्रीकंठाय ॥ २ ॥ ॐ वामदेवाय ॥ ३ ॥ (पश्चिमे) ॐ ज्येष्ठाय ॥ १ ॥ ॐ श्रेष्ठाय ॥२॥ ॐ रुद्राय ॥ ३ ॥ (उत्तरे) ॐ कालाय ॥ १ ॥ ॐ कलविकर्णाय० ॥ २ ॥ ॐ बलविकर्णाय ॥३॥ अथ श्वेतषोडशवापीदेवतास्थापनम् ईशान्यादिक्रमेण--ॐ अणिमायै ॥ १ ॥ ॐ महिमायै ॥ २ ॥ ॐ लघिमायै ॥३॥ ॐ गरि मायै ॥ ४ ॥ ॐ प्राप्त्यै० ॥ ५ ॥ ॐ प्राकाम्यायै ॥ ६ ॥ ॐ ईशितायै ॥ ७ ॥ ॐ वशितायै ॥ ८ ॥ ॐ ब्राह्म्यै ॥ ९ ॥ॐ माहेश्वर्यै ॥ १० ॥ ॐ कौमार्यै ॥ ११ ॥ ॐ वैष्णव्यै ॥ १२ ॥ ॐ वाराह्यै ॥ १३ ॥ ॐ इन्द्राण्यै ॥ १४ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ॐ चामुंडायै ॥ १५ ॥ ॐ चंडिकायै ॥ १६ ॥ ततः वापीसमीपे अष्टौ रक्तभद्राणि तदेवतास्थापनम् ईशान्यादिक्रमेण
ॐ असितांगाय १ ॐ रुरुभैरवाय २ ॐ चंडभैरवाय ३ ॐ क्रोधभैरवाय ४ ॐ उन्मत्तभैरवाय ५ ॐ कालभैरवाय ६ ॐ भीष
णभैरवाय ७ ॐ संहारभैरवाय ८॥ अथाष्टवल्लीदेवतास्थापनम् ऐशान्यादिक्रमेण—ॐ घृताच्यै १ ॐ मेनकायै २ ॐ रंभायै ३ ॐ
उर्वश्यै ४ ॐ त्तिलोत्तमायै ५ ॐ सुकेशायै ६ ॐ मंजुघोषायै ७ ॐ अप्सरायै ८॥ ततः मंडलमध्ये परिधिसमीपे शृंखलादेवतास्था
पनम् आग्नेय्यादिक्रमेण (आग्नेय्याम्) ॐ भवाय० १ ॐ शिवाय० २ ॐ रुद्राय० ३ ॐ पशुपतये० ४ ॐ उग्राय० ५ ॐ महा
देवाय० ६ ॐ भीमाय ७ ॐ ईशानाय ८ ॐ अनंताय ९ ॐ वासुकये० १० ॥ ततः नैर्ऋत्यपरिधिसमीपे शृंखलादेवताः ॐ
तक्षकाय ॥१॥ ॐ कुलीरकाय ॥२॥ ॐ कर्कोटकाय ॥३॥ ॐ शंखपालाय॥४॥ॐ कवलाय ॥५॥ ॐअश्वतराय ॥६॥ ॐवैन्या
य ॥७॥ ॐ अंगाय ॥८॥ॐ हैहयाय ॥९॥ ॐ अर्जुनाय ॥१०॥ ततः वायव्ये दश शृंखलादेवताः । ॐ शाकुंतलाय ॥१॥ ॐ भर
ताय ॥२॥ ॐ नलाय ॥३॥ ॐ रामाय ॥४॥ ॐ सार्वभौमाय ॥५॥ ॐ निषधाय॥६॥ॐ विंध्याचलाय ॥७॥ॐ माल्यवते॥८॥
ॐ पारियात्राय ॥९॥ ॐ सह्याय ॥१०॥ ततः ईशान्यपरिधिसमीपे दशशृंखलादेवतास्थापनम् ॐ हेमकूटाय॥१॥ ॐ गंधमाद
नाय ॥२॥ ॐ कुलाचलाय॥३॥ॐ हिमवते ॥४॥ ॐ रैवताचलाय ॥५॥ॐ देवगिरये ॥६॥ ॐ मलयाचलाय ॥७॥ ॐ कनका
चलाय ॥८॥ॐ पृथिव्यै॥९॥ॐ अनंताय॥१०॥इति शृंखलादेवताः॥अथ चतुर्दिक्षु खंडेन्दुदेवतास्थापनम्—ऐशान्यादिक्रमेण (ऐशा
न्याम्)ॐ अश्विनीकुमाराभ्याम्॥१॥(आग्नेय्याम्) ॐ विश्वेभ्योदेवेभ्यो॥२॥(नैर्ऋते) ॐ पितृभ्यो॥३॥(वायव्याम्)ॐ नागेभ्यः॥४॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ततः मंडलाद्बहिः प्रथमं सत्त्वपरिधौ पूर्वादिक्रमेण देवताः ॐ इन्द्राय॥१॥ॐ अग्नये ॥२॥ॐ यमाय ॥३॥ ॐ निर्ऋतये ॥ ४ ॥ ॐ वरुणाय ॥५॥ ॐ वायवे ॥ ६ ॥ ॐ कुबेराय ॥७॥ ॐ ईशानाय ॥८॥ (इन्द्रेशानयोर्मध्ये) ॐ ब्रह्मणे ॥ ९ ॥ (वरुणनिर्ऋत्योर्मध्ये) ॐ अनंताय ॥१०॥ (तद्बहिः रजःपरिधौ) पूर्वादिक्रमेण देवताः—ॐ वज्राय ॥१॥ ॐ शक्तये ॥२॥ ॐ दण्डाय ॥३॥ ॐ खड्गाय ॥४॥ ॐ पाशाय ॥५॥ ॐ अंकुशाय ॥६॥ ॐ गदायै ॥७॥ ॐ त्रिशूलाय॥८॥ॐ पद्माय॥९॥ॐ चक्राय॥१०॥तद्बहिस्तमोमयकृष्णपरिधौ पूर्वादिक्रमेण देवताः ॐ कश्यपाय ॥ १ ॥ ॐ अत्रये ॥ २ ॥ ॐ भरद्वाजाय ॥ ३ ॥ ॐ विश्वामित्राय ॥४॥ ॐ गौतमाय ॥५॥ ॐ जमदग्नये ॥६॥ ॐ वसिष्ठाय ॥७॥ ॐ अरुंधत्यै० ॥८॥ ॐ ततः (पूर्वे) ॐ ऋग्वेदाय०॥ १ ॥ (दक्षिणे) ॐ यजुर्वेदाय० ॥२॥ (पश्चिमे) ॐ सामवेदाय ॥३॥ (उत्तरे) ॐ अथर्ववेदाय ॥ ४ ॥ एवं १८० देवताः संस्थाप्य षोडशोपचारैः संपूज्य ततः प्रधानदेवताशिवप्रतिमां स्वर्णमयीमभ्युत्तारणपूर्वकं मंडलमध्यस्थताम्रकलशेपूर्ववत् संस्थाप्य पूजयेत् ॥ इति द्वादशलिंगतोभद्रमंडलपूजाविधानम् ॥

पेज नंबर १४ चित्र.

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

॥ अथ होमविधानम् ॥ तत्रादौ कुशकण्डिका॥आचार्योऽग्नेर्दक्षिणतः परिस्तरणभूमिं त्यक्त्वा ब्रह्मणे आसनं दत्त्वा तदुपरि प्राग्ग्रान्कुशानास्तीर्य ब्रह्माणमग्निप्रदक्षिणक्रमेणानीय अस्मिन्नमुकमंत्रजपदशांशहोमकर्माणि त्वं मे ब्रह्मा भव । इत्यभिधाय वरणकर्म्मणा पूर्वं संपादितं ब्राह्मणं तदभावे पञ्चाशत्कुशनिर्मितं कल्पितासने उपवेशयेत्॥ततः प्रणीतापात्रं पुरतः कृत्वा जलेनापूर्य्य कुशत्रयेणाच्छाद्य ब्रह्मणो मुखमवलोक्य अग्नेरुत्तरतः कुशोपरि निदध्यात् ॥ (परिस्तरणम्) बर्हिषश्चतुर्थभागमादाय चतुर्भिश्चतुर्भिर्दर्भैरुत्तराग्रैः प्राच्याम् १ प्रागग्रैर्दक्षिणस्याम् २ उदग्ग्रैः प्रतीच्याम् ३ पुनः प्रागग्रैरग्नितः उदीच्याम् ४ परिस्तरणं कुर्य्यात् ॥ ततोऽग्नेरुत्तरतः पश्चिमदिशि पवित्रच्छेदनार्थं कुशत्रयम् ३ पवित्रकरणार्थं पवित्रे साग्रे अनंतर्गर्भे द्वे कुशपत्रे २ ॥ प्रोक्षणीपात्रम् १ आज्यस्थाली १ चरुस्थाली १ संमार्जनकुशाः पंच ५ उपयमनकुशाः सप्त ७ समिधस्तिस्रः ३ पलाश्यः प्रादेशमात्राः स्रुवः खादिरो हस्तमात्रः १ आज्यं गव्यम् चर्वर्थाः तंडुलाः पूर्णपात्रम् ॥ दक्षिणावरो वा ॥ पवित्रच्छेदनकुशानां पूर्वपूर्वदिशिक्रमेणासादनीम् ॥ ततः पवित्रच्छेदनम् ॥ पवित्रकरणम् ॥ द्वयोः पवित्रयोरुपरि पवित्रत्रयं निधाय अग्रतः प्रादेशमात्रं विहाय त्रिभिः कुशैर्द्वे कुशतृणे प्रच्छिद्य द्वयोर्मूलं त्रीणि चोत्तरतः क्षिपेत् ॥ ततः सपवित्रहस्तेन प्रणीतोदकं त्रिः प्रोक्षणीपात्रे निक्षिप्य अनामिकाङ्गुष्ठाभ्यामुत्तराग्रे पवित्रे गृहीत्वा त्रिरुत्पवनम् । प्रोक्षणीपात्रस्य सव्यहस्ते करणम् । अनामिकाङ्गुष्ठाभ्यां पवित्रे गृहीत्वा त्रिरुद्गिंगनम् । ततः प्रणीतोदकेन प्रोक्षणीप्रोक्षणम् । प्रोक्षणीजलेन आज्यस्थाल्यादीनि पूर्णपात्रपर्यंतानि क्रमेणैकैकशः प्रोक्ष्य असंचरे प्रणीताभ्योरंतराले प्रोक्षणीपात्रं निधाय आसादितमाज्यं पश्चादग्नेर्निहितायामाज्यस्थाल्यां प्रक्षिप्य चरुस्थाल्यां

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

प्रणीतोदकमासिच्य आसादितांस्तंडुलान्प्रक्षिप्य तत्राज्यं ब्रह्माधिश्रयति । तदुत्तरतः स्वयं चरुमेव युगपदग्रावारोप्य ईषच्छृते चरौ ज्वलदुल्मुकं प्रदक्षिणम् आज्यचर्वोः समंताद्भ्रामयेत् । ततो दक्षिणपाणिना स्रुवमादाय अधोमुखमग्नौ तापयित्वा सव्ये पाणौ कृत्वा दक्षिणेन सम्मार्जनाग्रैर्मूलतोग्रपर्यंतं मूलैरग्रमारभ्य अवस्तान्मूलपर्यंतं संमृज्य प्रणीतोदकेनाभिषिच्य पुनः प्रताप्य दक्षिणतो निदध्यात् । ततः आज्यमुत्थाप्य चरोः पूर्वेण नीत्वाऽग्नेरुत्तरतः स्थापयित्वा चरुमुत्थाप्य आज्यस्य पश्चिमतो नीत्वाज्यस्योत्तरतः स्थापयित्वा आज्यमग्नेः पश्चादानीय चरुं चानीय आज्यस्योत्तरतो निदध्यात् । ततः पूर्ववत्पवित्राभ्या माज्यमुत्पूय अवलोक्य तस्मादपद्रव्यनिरसनं पुनः प्रोक्षण्युत्पवनम् । तत उपयमनकुशानादाय उत्तिष्ठन् प्रजापतिं मनसा ध्यात्वा तूष्णीमग्नौ घृताक्ताः समिधस्तिस्रः प्रक्षिपेत् । तत उपविश्य प्रोक्षण्युदकेन सपवित्रेणाग्निमीशानाद्युदक्पर्यंतं परिषिच्य दक्षि णजान्वाच्य ब्रह्मणान्वारब्धः यजमानेनान्वारब्धश्च समिद्धतमेग्नौ स्रुवेणाज्याहुतीर्जुहुयात् । (तत्राघारावाज्यभागादिषु स्रुवावस्थि तहुतशेषघृतस्य प्रोक्षणीपात्रे प्रक्षेपः ततो यजमानेन द्रव्यत्यागः कार्यः सर्वत्र यथाकालं प्रत्याहुतित्यागस्य कर्तुमशक्यत्वात्) देशकालौ संकीर्त्य अस्मिन् अमुकदेवतामंत्रजपकृतपुरश्चरणदशांशहवनाख्ये कर्मणि इदं संपादितं समिच्चरुतिलाज्यादिहविर्द्रव्यं यायाः यक्ष्यमाणदेवतास्तस्यैतस्यै देवतायै न मम यथादैवतमस्त्विति द्रव्यत्यागं कुर्य्यात् । अथ होमः ॥ (अग्नेरुत्तरभागे) ॐ प्रजापतये स्वाहा । इदं प्रजापतये न मम । (अग्नेर्दक्षिणभागे) ॐ इंद्राय स्वाहा । इदमिंद्राय न मम इत्याघारौ(मध्ये समिद्धतमे) ॐ अग्नये स्वाहा इदमग्नये न मम ॥ ॐ सोमायस्वाहा । इदंसोमाय न मम इत्याज्यभागौ ॥ अथाचार्योऽग्निं संपूज्यः नवग्रहहोमं कुर्यात् ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सच अनन्वारब्धकर्तृको होमः) तत्रादौनवग्रहाणां सामिधः--अर्कः पलाशःखदिरोह्यपामार्गोऽथ पिप्पलःउदुंबरःशमी दूर्वाः कुशाश्च सामिधः क्रमात् ॥१॥ तिलाज्यचरुपक्वं च हविर्मुख्यं प्रकीर्तितम् ॥ ततो दधिक्षीरघृताक्ताः चरुसाकल्यसहिताऽर्कादिसमिधः सूर्यादिभ्यस्तत्तन्मंत्रान्ते प्रत्येकमष्टाष्टसंख्यया जुहुयात् । तत्र क्रमः ॐगणानान्त्वागणपतिꣳहवामहेप्रियाणान्त्वाप्रियपतिꣳहवामहे निधीनान्त्वानिधिपतिꣳहवामहेव्वसोमम ॥ आहमजानिगर्भधमात्वमजासिगर्भधं स्वाहा इदं गणपतये नमम १ (एवं सर्वत्र)। (अर्कम्) ॥ ॐ आकृष्णेनरजसाव्वर्त्तमानोनिवेशयन्नमृतंमर्त्यंचहिरण्ययेनसवितारथेनादेवोयातिभुवनानिपश्यन् स्वाहा इदं सूर्य्याय १ (पलाशम्) हु ॐ इमंदेवाऽअसपत्नꣳसुवध्वंमहतेक्षत्रायमहतेज्यैष्ठ्यायमहतेजानराज्यायेंद्रस्येंद्रियायेमममुष्यपुत्रममुष्यैपुत्रमस्यै व्विशऽएषवोमीराजासोमोस्माकंब्राह्मणानाꣳराजा स्वाहा इदं चंद्रमसे २ (खदिरम्) ॐ अग्निर्म्मूर्द्धादिवःककुत्पतिःपृथिव्याऽअयम् अपाꣳरेताꣳसिजिन्वाति स्वाहा इदं भौमाय ३ (अपामार्गम्) ॐउद्बुध्यस्वाग्नेप्रतिजागृहित्वमिष्टापूर्तेसꣳसृजेथामयंचअस्मिन्त्सधस्थेऽअध्युत्तरस्मिन्विश्वेदेवायजमानश्चसीदतस्वाहा इदं बुधाय ४ (अश्वत्थम्) ॐ बृहस्पतेऽअतियदर्य्योऽअर्हाद्युमद्विभातिक्रतुमज्जनेषुयद्दीदयच्छवसऽऋतप्रजाततदस्मासुद्रविणंधेहिचित्रꣳ स्वाहा इदं गुरवे ५ (उदुंबरम्) ॐ अन्नात्परिस्रुतोरसं ब्रह्मणाव्यपिबत्क्षत्रंपयःसोमम्प्रजापतिः ऋतेनसत्यमिंद्रियंविपानꣳशुक्रमन्धसऽइंद्रस्येन्द्रियमिदंपयोमृतंमधु स्वाहा इति शुक्राय

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

६ (शमीम्) ॐ शन्नोदेवीरभीष्टयऽआपोभवन्तुपीतयेशंय्योरभिस्रवन्तुनःस्वाहा इदं शनैश्चराय ७ (दूर्वाम्) ॐ कयानश्चित्रऽआभुवदूतीसदावृधःसखा ॥ कयाशचिष्ठयावृतास्वाहा इदं राहवे ८ (दर्भम्) ॐ केतुंकृण्वन्नकेतवेपेशोमर्य्याअपेशसे समुषद्भिरजायथाःस्वाहा इदं केतवे ९॥इति नवग्रहाणां होमः ॥ ततो हस्ते जलमादाय अनेन समिधादिकृतेन होमेन सूर्य्यादयो ग्रहाः प्रीयंतां न ममेत्युत्सृजेत् ॥ अथाधिदेवताप्रत्यधिदेवतानां होमः ॥ ईश्वरादिभ्यः पालाश्यः समिधस्तैरेव द्रव्यैः सह चतुश्चतुः संख्यकाभिराहुतिभिर्जुहुयात्। ॐत्र्यंबकंयजामहेसुगंधिम्पुष्टिवर्द्धनम् उर्व्वारुकमिवबंधनान्मृत्योर्मुक्षीयमामृतात् स्वाहा इदमीश्वराय १ ॐ श्रीश्चतेलक्ष्मीश्चपत्न्यावहोरात्रेपार्श्वेनक्षत्राणिरूपमश्विनौव्यात्तम् इष्णन्निषाणामुम्मऽइषाणसर्वलोकम्मऽइषाणस्वाहाइदमुमायै २ ॐयदक्रन्दःप्रथमंजायमानऽउद्यन्त्समुद्रादुतवापुरीषात् श्येनस्यपक्षाहरिणस्यबाहूऽउपस्तुत्यंमहिजातन्तेऽअर्व्वन्स्वाहा इदं स्कंदाय ३ ॐविष्णोरराटमसिविष्णोःश्नप्त्रेस्थोविष्णोःस्यूरसिविष्णोर्ध्रुवोसिवैष्णवमसिविष्णवेत्वास्वाहा इदं विष्णवे ४ ॐ ब्रह्मयज्ञानं प्रथमंपुरस्ताद्विसीमतःसुरुचोव्वेनऽआवःसबुध्न्याउपमाऽअस्यव्विष्ठाःसतश्चयोनिमसतश्चव्विवः÷स्वाहा इदं ब्रह्मणे ५ ॐ सजोषा इन्द्रसगंणोमरुद्भिःसोमम्पिबवृत्रहाशूरव्विद्वान्जहिशत्रूँ १ रपमृधोनुदस्वाथाभयङ्कृणुहिव्विश्वतोनःस्वाहा ॥ इदमिंद्राय ॥ ६ ॥ ॐ यमायत्वांगिरस्वतेपितृमतेस्वाहास्वाहा धर्म्मायस्वाहाधर्म्मः पित्रेस्वाहा इदं यमाय ॥ ७ ॥ ॐ कार्षिरसिसमुद्रस्यत्वाक्षित्याऽ

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

उन्नयामिसमापोऽअद्भिरग्मतसमोषधीभिरोषधीःस्वाहा इदं कालाय॥८॥ॐ चित्रावसोस्वस्तितेपारमशीयस्वाहा॥इदं चित्रगुप्ताय ९॥
अनेन सघृततिलयवचरुसमिद्धोमेन ईश्वराधिदेवताः प्रीयन्तां न ममेति जलमुत्सृजेत् । यथावाणप्रहाराणामिति यजमानमूर्द्धाभि
षेकः ॥ अथ प्रत्यधिदेवताहोमः ॥ ॐअग्निदूतंपुरोदधेहव्यवाहमुपब्रुवेदेवाँ २ऽआसादयादिहस्वाहा इदमग्नये ॥१॥ ॐ आपोहि
ष्ठामयोभुवस्तानऽऊर्जेदधातन महेरणायचक्षसे १ योवःशिवतमोरसस्तस्यभाजयतेहनः उशतीरिवमातरः २ तस्माऽअरङ्गमामवो य
स्यक्षयायजिन्वथ आपोजनयथाचनःस्वाहा ३ इदमद्भ्यः ॥२॥ॐस्योनापृथिविनोभवानृक्षरानिवेशनीयच्छानःशर्मसप्रथाःस्वाहा॥
इदं पृथिव्यै॥३॥ॐ इदंविष्णुर्विचक्रमेत्रेधानिदधेपदम् समूढमस्यपाᳬसुरेस्वाहा इदं विष्णवे॥४॥ॐ त्रातारमिन्द्रमवितारमिन्द्रꣳहवें
हवेसुहवꣳशूरमिन्द्रम् व्हयामिशक्रम्पुरुहुतमिन्द्रꣳस्वस्तिनोमघवाधात्विन्द्रःस्वाहा ०॥इदमिंद्राय॥५॥ॐ अदित्यैरास्नासीन्द्राण्याऽउ
ष्णीषःपूषासिधर्म्मायदीष्वस्वाहा॥इदमिंद्राण्यै॥६॥ ॐ प्रजापतेनत्वदेतान्यन्योविश्वारूपाणिपरिताबभूवयत्कामास्तेजुहुमस्तन्नोऽ
अस्तुव्वयꣳस्यामपतयोरयीणाम् स्वाहा॥इदं प्रजापतये॥७॥ॐ नमोस्तुसर्पेभ्योयेकेचपृथिवीमनु येऽअन्तरिक्षेयेदिवितेभ्यःसर्पेभ्यो
नमःस्वाहा इदं सर्पेभ्यः॥८॥ॐ ब्रह्मयज्ञानम्प्रथमम्पुरस्ताद्विसीमतःसुरुचोव्वेनऽआवःसबुध्न्याऽउपमाऽअस्यव्विष्ठाः सतश्चयोनिम
सतश्चव्विवःस्वाहा॥इदं ब्रह्मणे॥९॥अनेन समिधादिकृतेन होमेन अग्न्या दिप्रत्यधिदेवताः प्रीयंतां न मम इत्युत्सृजेत्॥अथ पंचलोकपा

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

लदेवताहोमः ॥विनायकादिपंचलोकपालेभ्य इन्द्रादिदशदिक्पालेभ्यश्च प्रत्येकं पूर्वोक्तद्रव्येण द्वेद्वे आहुती जुहुयात् ॐ गुणानान्त्वागु णपतिंठ्हवामहेप्रियाणान्त्वाप्रियपतिंठ्हवामहेनिधीनान्त्वानिधिपतिंठ्हवामहेव्वसोमम आहमजानिगर्भधमात्त्वमजासिगर्भधंस्वा हा॥इदं गणपतये॥ १॥ॐ अंबेऽअंबिकेऽम्बालिकेनमानयतिकश्चन ससस्त्यश्वकꣳसुभद्रिकांकाम्पीलवासिनींꣳस्वाहा इदं दुर्गायै॥२॥ ॐ आनोनियुद्भिःशतिनीभिरध्वरꣳसहस्त्रिणीभिरुपयाहियज्ञम् वायो अस्मिन्त्सवनेमादयस्वयूयम्पातस्वस्तिभिꣳसदानꣳस्वाहा॥इदं वायवे॥३॥ ॐ घृतंघृतपावानꣳपिवतवसाम्वसापावानꣳपिवतान्तरिक्षस्यहविरसिस्वाहा दिशः÷प्रदिशऽआदिशोविदिशऽउद्दिशोदिग्भ्य ꣳस्वाहा इदमाकाशाय॥४॥ॐ यावाङ्कशामधुमत्यश्विनासूनृतावतीतयायज्ञम्मिमिक्षताम् स्वाहा इदमश्विभ्याम्॥५॥अनेन होमेन पंच लोकपालदेवताः प्रीयंतां न ममेति जलमुत्सृजेत् । यथाबाणप्रहाराणामिति यजमानमूर्द्धाभिषेकः ॥ अथ दशादिक्पालहोमः । ॐ त्रातारमिन्द्रमवितारमिन्द्रंठ्हवेहवेसुहवंठ्शूरमिन्द्रम् ह्वयामिशक्रम्पुरुहूतमिन्द्रंठ्स्वस्तिनोमघवाधात्विन्द्रः÷स्वाहा इदमिन्द्राय ॥ ॥ १ ॥ ॐ त्वन्नोऽअग्नेतवपायुभिर्म्मघोनोरक्षतन्वश्चवन्ध ॥ त्रातातोकस्यतनयेगवामस्यनिमेषंठ्रक्षमाणस्तवव्रतेस्वाहा इदमग्नये ॥ २ ॥ ॐ यमायत्वांगिरस्वतेपितृमतेस्वाहास्वाहाधर्मायस्वाहाधर्म्मꣳपित्रेस्वाहा इदं यमाय ॥ ३ ॥ ॐ असुन्वन्तमयजमानमि च्छस्तेनस्येत्यामन्विहितस्करस्यअन्यमस्मदिच्छसातऽइत्यानमोदेविनिर्ऋतेतुभ्यमस्तुस्वाहा इदं निर्ऋतये ॥ ४ ॥ ॐ तत्त्वा

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यामिब्रह्मणाव्वन्दमानस्तदाशास्तेयजमानोहविर्भिः÷अहेडमानोव्वरुणेहबोध्युरुशꣳसमानऽआयुः प्रमोषीꣳस्वाहा इदं वरुणाय ॥ ॥ ५ ॥ ॐ आनोनियुद्भिः÷शतिनीभिरध्वरꣳसहस्त्रिणीभिरुपयाहियज्ञम् । वायोऽअस्मिन्त्सवनेमादयस्वयूयम्पातस्वस्तिभिꣳसदानꣳस्वाहा इदं वायवे ॥ ६ ॥ ॐ व्वयꣳसोमव्रतेतवमनस्तनूषुविभ्रतः प्रजावन्तꣳसचेमहिस्वाहा इदं कुबेराय ॥ ॥ ७ ॥ ॐ तमीशानञ्जगतस्तस्थुषस्पतिंधियञ्जिन्वमवसेहूमहेव्वयम् पूषानोयथाव्वेदसामसद्वृधेरक्षितापायुरदब्धꣳस्वस्तयेस्वाहा इदमीशानाय ॥ ८ ॥ ॐ अस्मेरुद्रामेहनापर्वतासोवृत्रहत्येभरहूतौसजोषाः÷यꣳशꣳसंतेस्तुवतेधायिवज्रऽइंद्रज्येष्ठाऽअस्माँऽअवन्तुदेवाःस्वाहा इदं ब्रह्मणे ॥ ९ ॥ ॐ स्योनापृथिविनोभवानृक्षरानिवेशनीयच्छानुः शर्मसप्रथाः÷स्वाहा इदमनंताय ॥१०॥

अनेन होमेन इन्द्रादयो दिक्पालदेवताः प्रीयन्तां न ममेति जलमुत्सृजेत् ॥ इति दिक्पालहोमः ॥ अथ पितामहादिदेवानामेकैकाहुत्या होमः ॥ ॐ ब्रह्मयज्ञानंप्रथमंपुरस्ताद्विसीमतःसुरुचोव्वेनऽआवः सबुध्न्याउपमाऽअस्यव्विष्ठाःसतःश्चयोनिमसतश्चव्विवः÷स्वाहा इदं ब्रह्मणे॥१॥ॐ इदंविष्णुर्विचक्रमेत्रेधानिदधेपदम् समूढमस्यपाꣳसुरेस्वाहा इदं विष्णवे॥२॥ ॐ त्र्यंबकंयजामहे०इदं शिवाय ॥ ३ ॥ ॐ गणानान्त्वा०स्वाहा इदं गणपतये ॥४॥ ॐ श्रीश्चतेलक्ष्मीश्च०स्वाहा इदं लक्ष्म्यै ॥ ५ ॥ ॐ पञ्चनद्यःसरस्वतीं०स्वाहा इदं सरस्वत्यै ॥ ६ ॥ ॐ अंबेअंबिकेऽम्बालिकेनमानयतिकश्चनससस्त्यश्वकःसुभद्रिकांकाम्पीलवासिनीꣳस्वाहा इदं दुर्गायै ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

॥ ७ ॥ ॐ नाहिस्पर्शमविदन्नन्यमस्माद्वैश्वानरात्पुरऽएतारमग्नेऽएमेनमवृधन्नमृताऽअमर्त्यंवैश्वानरंक्षैत्राजित्यायदेवाऽस्वाहा इदं क्षेत्रपालाय ॥ ८ ॥ ॐ भूतायत्वानारातयेस्वरभिविख्येषंदृꣳहंतादुर्वीं ऽ पृथिव्यामुर्व्वन्तरिक्षमन्वेमिपृथिव्यास्त्वानाभौसादयाम्यदित्याऽउपस्थेग्नेहव्यꣳरक्षस्वाहा इदं भूतेभ्यः ॥ ९ ॥ ॐवास्तोष्पतेप्रतिजानीह्यस्मान्त्स्वावेशोऽअनमीवोभवानऽयस्त्वे महेप्रतितन्नो जुषस्वशन्नो भवद्विपदेशञ्चतुष्पदेस्वाहा इदंवास्तोष्पतये ॥ १० ॥ ॐविश्वकर्म्मन्हविषाव्वर्द्धनेनत्रातारमिन्द्रमकृणोरवद्ध्यम् तस्मैव्विशःसमनमन्तपूर्व्वीरयमुग्रोविहव्योषथासत्स्वाहा इदं विश्वकर्मणे ॥ ११ ॥ एवंग्रहमंडलदेवताहोमं कृत्वा ततः सर्वतोभद्रादिमंडलस्थापितदेवताभ्यः शिवमंत्रहोमे लिंगतोभद्रदेवताभ्यश्च सकृत्सकृत्संख्यया प्रत्येकं तिलयवपायसाज्यद्रव्येण होमं कुर्यात्॥ततः प्रधानदेवतायै तत्तत्कल्पोक्तद्रव्यैस्तिलपायसाज्यसमिधादिभिश्च जपदशांशेन होमं कृत्वा यंत्रस्थावरणदेवताभ्यश्चैकैकाहुतीर्जुहुर्यात् । ततो देशकालौ संकीर्त्य अद्यामुकमंत्रजपदशांशहोमस्यकृतस्य कर्मणः सांगतासिद्ध्यर्थं स्थापितदेवतानां मृडाग्नेश्चोत्तरपूजनं करिष्ये इति संकल्प्य ॐ अग्नेनयसुपथारायेऽअस्मान्विश्वानिदेवव्वयुनानिविद्वान्युयोध्यस्मज्जुहुराणमेनोभूयिष्ठान्तेनमऽउक्तिं विधेम १ ॐ मृडाग्नये नमः इति मंत्रेणाग्निं गंधादिपंचोपचारैः संपूज्य स्थापितदेवतानामुत्तरपूजनं कुर्यात ॥ ॐ भूर्भुवः स्वः सूर्यादिस्थापितदेवताभ्यो नमः इति गंधादिपंचोपचारैः संपूज्य अनया पूजया मृडाग्निः स्थापितदेवताश्च

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

प्रीयन्तामित्युत्सृजेत् । ततो हुतशेषहविर्द्रव्यं गृहीत्वा ब्रह्मणान्वारब्धः स्विष्टकृद्धोमं कुर्यात् । ॐ अग्नये स्विष्टकृते स्वाहा इदमग्नये स्विष्टकृते न मम । ततो भूराद्या नवाज्याहुतयः—ॐभूः स्वाहा इदमग्नये न मम १ ॐ भुवः स्वाहा इदं वायवे न मम २ ॐ स्वः स्वाहा इदं सूर्याय न मम ३ ॐत्वन्नो॑ऽअग्ने॒व्वरु॑णस्यव्वि॒द्वान्दे॒वस्य॒हेडो॒ऽअव॑यासिसीष्ठाᳬ यजि॑ष्ठो॒व्वह्नि॑तम॒ᳬ शोशु॑चानो॒व्विश्वा॒द्वेषा᳭ᳬसि॒प्रमु॑मुग्ध्य॒स्मत्स्वाहा इदमग्नीवरुणाभ्यां न मम ४ ॐसत्त्वन्नो॑ऽअग्नेव्व॒मोभ॑वोति॒नेदि॑ष्ठोऽअ॒स्याऽउ॒षसो॒व्युष्टौअवय॒क्ष्वनो॒व्वरु॑ण॒ᳬ ररा॑णोव्वी॒हिमृ॑डीक॒ᳬ सु॒हवो॑नऽएधिस्वाहा इदमग्नीवरुणाभ्यां न मम ५ ॐअ॒याश्चा॒ग्नेस्यन॑भिश॒स्तीश्च॑स॒त्यमि॑त्वम॒याऽअ॑सिअ॒यानो॑य॒ज्ञंव॑हास्य॒यानो॑धेहिभेष॒जᳬ स्वाहा इदमग्नये न मम ६ ॐये॒ते॑श॒तंव॒रु॑णं॒येसह॒स्रंय॒ज्ञिया॒ᳬ पाशावितता॑महा॒न्तᳬ तेभि॑र्नोऽअद्यस॑वि॒तोतव्विष्णुर्व्विश्वे॑मुञ्चन्तुम॒रुत॑ᳬ स्व॒र्क्काᳬ स्वाहा॑ इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुभ्द्यः स्वर्क्केभ्यश्च न मम७। ॐउदु॑त्त॒मंवरु॑ण॒पाश॑म॒स्मदवा॑ध॒मंविम॑द्ध्य॒म७श्र॑थायअथा॑व॒यमा॑दित्यव्र॒तेतवाना॑गसो॒अदि॑तयेस्याम स्वाहा इदं वरुणायादित्यायादितये च न मम ८। ॐ प्रजापतये स्वाहा इदं प्रजापतये न मम ९॥ इति नवाहुतयः ॥ अथ बलिदानम् । तच्चैवम् अग्न्यायतनस्य समंताद्दिवि दिक्षु च दशदिक्पालानां माषभक्तबलयो देयाः ॥ देशकालौ स्मृत्वा अद्य पूर्वकृतस्य कर्मणः सांगतासिद्ध्यर्थं दिक्पालपूर्वकम् आदित्यादिग्रहमंडलस्थापितदेवताभ्यो बलिदानं करिष्ये इति

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

संकल्पयेत् । पूर्वे ॐ त्रातारमिन्द्रं० १ इन्द्राय सांगाय सपरिवाराय सायुधाय सशक्तिकाय इमं सदीपमाषभक्तबलिं समर्पयामि भो इंद्र दिशं रक्ष बलिं भक्ष मम सकुटुंबस्याभ्युदयं कुरु आयुःकर्ता क्षेमकर्ता शांतिकर्त्ता पुष्टिकर्ता तुष्टि कर्ता निर्विघ्नकर्ता वरदो भव अनेन बलिदानेन इंद्रः प्रीयताम् । (एवं सर्वत्र)। १ आग्नेय्यां दिशि ॐ त्वन्नोऽअग्नेतवंदेव० अग्नये सांगाय सपरिवाराय० भो अग्ने दिशं रक्ष बलिं भक्ष० आयुःकर्ता० अनेन बलि०अग्निः प्रीयताम् २। दक्षिणस्याम् ॐ यमाय त्वांगिं० यमाय सांगाय० भो यम दिशं० आयुःकर्ता० अनेन बलिदानेन यमः प्रीयताम् ३। नैर्ऋत्याम् । ॐ असुंन्वन्तमयंजमानमिच्छ० निर्ऋतये सांगाय० भोनिर्ऋते दि० अनेन बलि० निर्ऋतिः प्रीयताम् ॥ ४ ॥ पश्चिमे ॐ तत्त्वा यामि० वरुणाय सांगाय० भो वरुण०दिशं०आयुःकर्ता० अनेन बलि० वरुणः प्रीयताम् ५। वायव्या ०ॐ आनों नियु०वायवे सांगाय० भो वायो दिशं० अनेन बलिदा० वायुः प्रीयताम् ६ ॥ उत्तरे ॐ वयर्ठ्सोमव्र० कुबेराय० भो कुबेर० अनेन सोमः प्रीयताम् ७। ऐशान्याम् ॐ तमीशानं०ईश्वराय सांगाय०भो ईश्वर दिशं०अनेन बालिदानेन ईश्वरः प्रीयताम्८। पूर्वेशानयोर्मध्ये ॐअस्मेरुद्रा०ब्रह्मणे सांगाय० भोब्रह्मन्०अनेन बलिदानेन ब्रह्मा प्रीयताम् ९। निर्ऋतिपश्चिमयोर्मध्ये ॐस्योनापृथिविनो० ॐ अनंताय सांगाय०भो अनंत दिशं०आयुःकर्ता०अनेन बालिदानेन अनंतः प्रीयताम् ।१० (ततो ग्रहवेदीसमीपे ग्रहाणां बलयः) ॐ आकृष्णेन०सूर्याय सांगाय० ईश्वराग्निरूपाधिप्रत्यधिदेवतासहिताय इमं सदीपभाषभक्तबलिं समर्पयामि भो सूर्य इमं बलिं गृहाण मम सकुटुंबस्याभ्युदयं कुरु

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

आयुःकर्ता०अनेन बलिदानेन सूर्यः प्रीयताम् १। ॐ इमं देवा० ॐ सोमाय सांगाय उमांबुरूपाधिप्रत्यधिदेवतासहिताय० भो सोम इमं बलिं० २। ॐ अग्निर्मूर्द्धा० ॐ भौमाय सां० स्कंदभूमिरूपाधिप्रत्यधिदेवतासहिताय०भो भौम इमं बलिं गृ० ३। ॐ उद्बुध्यस्वा० बुधाय सां० नारायणविष्णुरूपाधिप्रत्यधिदेवतासहिताय० इमं माष० भो बुध इमं० ४। ॐ बृहस्पते० बृहस्पतये सांगाय०ब्रह्मेंद्ररूपाधिप्रत्यधिदेवतासहिताय०भो बृहस्पते इमं०अनेन बलिं०५। ॐ अन्नात्परि० शुक्राय सांगाय०इंद्रेन्द्राणीरूपाधि प्रत्यधिदेवतासहिताय०भोःशुक्र इमं बलिं०६।ॐ शन्नादेवी०शनैश्चराय सां०यमप्रजापतिरूपाधिप्रत्यधिदेवतासहिताय०भो शनैश्चर इमं बलिं०७। ॐ कयानश्चित्र०राहवे सांगाय०! कालरूपाधिप्रत्यधिदेवतासहिताय०भो राहो इमं बलिं०अनेन बलिदानेन राहुः प्रीयताम् ८। ॐ केतुंकृण्वन्न० केतवे सांगाय० चित्रगुप्तब्रह्मरूपाधिप्रत्यधिदेवतासहिताय० भो केतो इमं बलिं० अनेन केतुः प्रीयताम् ९। ततः पंचलोकपालेभ्यो बलिः। ॐ गणानांत्वा०गणपतये सांगाय० भो गणपते०इमं बलिं० १। ॐ अम्बेऽअंबिके०दुर्गायै० सांगायै० भो दुर्गे इमं०२।ॐ आनोनियुद्भि० वायवे सांगाय० भो वायो० इमं० ३। ॐ घृतंघृत० आकाशाय० भो आकाश इमं०४। ॐ यावांकशा० अश्विभ्यां सांगाभ्यां इमं बलिं० भो अश्विनौ० ५। ॐ वास्तोष्पते सांगाय० भो वास्तो० ६। ततो मातृणामेकमेव बलिं दद्यात्। ॐ समुख्येदेव्याधियासन्दक्षिणयोरुचक्षसामामुऽआयुंष्प्रमोषीमोऽअहन्तवंव्वीराम्बिंदेयुतवंदेविसुन्दृशि गौर्यादिमातृभ्यः इमं सदीपमाषभक्तबलिं०भोभो गौर्यादिमातर इमं बलिं गृह्णीत आयुःकर्त्र्यः क्षेमकर्त्र्यःअनेन बलिदानेन गौर्यादिमा

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तरः प्रीयन्ताम्॥ततः प्रधानदेवताभ्यो बलिं दत्त्वा क्षेत्रपालाय महाबलिं दद्यात्। अथ क्षेत्रपालबलिः।एकस्मिन्वंशपात्रे कुशानास्तीर्य तदुपरि आहारचतुर्गुणं द्विगुणं वा माषभक्तदध्योदनं जलपात्रं च निधाय हरिद्राकुंकुमसिंदूरकज्जलद्रव्यपताकादीपयुतं कृत्वा अद्येत्यादि० सकलारिष्टशांतिपूर्वकं प्रारिप्सितस्य कर्मणःसांगतासिद्ध्यर्थं क्षेत्रपालपूजनं बलिदानं च करिष्ये इति संकल्प्य ॐ न हिस्पुर्शमविंदन्नन्यमस्माद्वैश्वानरात्पुरंऽएतारंमग्नेऽ एमेनमधन्नमृताऽअमर्त्यंवैश्वानरंक्षेत्राजित्याय देवाः १ क्षेत्रपालाय नमः इति मंत्रेण षोडशोपचारैः संपूज्य प्रार्थयेत्। ॐ नमो क्षेत्रपालस्त्वं भूतप्रेतगणैः सह॥पूजां बलिं गृहाणेमं सौम्यो भवतु सर्वदा ॥ १ ॥ देहिमे आयुरा रोग्यं निर्विघ्नं कुरु सर्वदा। अनेन पूजनेन क्षेत्रपालः प्रीयताम्। ततो बलिदानम्। ॐ क्षेत्रपाल महावाहो महाबलपराक्रम॥ क्षेत्राणां रक्षणार्थाय बलिं गृह्ण नमोस्तु ते ॥ १ ॥ क्षेत्रपालाय सांगाय भूतप्रेतपिशाचशाकिनीवेतालादिपरिवारयुताय सायुधाय सशक्तिकाय सवाहनाय इमं सदीपदधिमाषभक्तबलिं समर्पयामि भोभोः क्षेत्रपाल सर्वतो दिशं रक्ष बलिं भक्ष मम सकुटुम्बस्याभ्युदयं कुरु आयुःकर्ता क्षेमकर्ता शांतिकर्ता पुष्टिकर्ता तुष्टिकर्ता निर्विघ्नकर्ता वरदो भव। अनेन बलिदानेन क्षेत्रपालः प्रीयताम्। (इमं बलिं अनवेक्ष्यमाणेन दुर्ब्राह्मणेन नीत्वा निःक्षिपेत्। यजमानोपि तस्य पृष्ठतो द्वारपर्यंतं गत्वा जलं क्षिपेत्)॥ इति क्षेत्रपालबलिः ॥ अथ भूतेभ्यस्तत्रैव बलिदानम् ॥ शूर्पमध्ये पिष्टमयदीपमाषान्नदध्योदनहरिद्रासिंदूरकज्जलगंधरक्तपुष्पाणि संस्थाप्य गीतवादित्रकुटुंबजनसहितश्चत्वरे गत्वा तत्र गंधपुष्पाद्यर्चितं शूर्पं स्थापयेदेभिर्मंत्रैः—ॐ बलिं गृह्णंतु ते देवा आदित्या वसवस्तथा। मरुतश्चाश्विनौ रुद्राः सुपर्णाः पन्नगा ग्रहाः ॥ १ ॥ जृंभकाः सिद्धगंधर्वा माला विद्याधरानुगाः ॥ असुरा

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यातुधानाश्च पिशाचा डाकिनीगणाः ॥ २ ॥ शकुयो यक्षवेताला ये च विघ्नविनायकाः ॥ जगतां शान्तिकर्तारः क्रमाद्याश्चैव मातरः ॥ ३ ॥ मा विघ्नं मा च मे रोगो मा संतु परिपंथिनः । सौम्या भवंतु तृप्ताश्च भूताः प्रेताः सुखावहाः ॥ ४ ॥ ते सर्वे तृप्तिमायांतु रक्षां कुर्वंतु मेऽध्वरे । देवताभ्यः पितृभ्यश्च भूतेभ्यः सह जंतुभिः ॥ ५ ॥ एतत्स्थानाधिवासिभ्यः प्रयच्छामि वलिं नमः ॥ त्रैलोक्ये यानि भूतानि स्थावराणि चराणि च ॥ ६ ॥ ब्रह्मा विष्णुः शिवैः सार्द्धं रक्षां कुर्वंतु तानि मे । देवदानवगंधर्वा यज्ञराक्षसपन्नगाः ॥ ७ ॥ ऋषवो मुनयो गावो देवमातर एव च । एते ममाध्वरे रक्षां कुर्वंतु प्रमदान्विताः ॥ ८ ॥ एतेभ्यो भूतेभ्यो गंधादिकं वः स्वाहा इति वलिं दत्त्वा गृहे आगत्य पाणिपादं प्रक्षाल्याचमनं कुर्य्यात् ॥ इति बलिदान प्रकारः ॥ अथ पूर्णाहुतिहोमः ॥ देशकालौ स्मृत्वा कृतस्य कर्मणः सांगतासिद्ध्यर्थं वसोर्धारासमन्वितं पूर्णाहुतिहोमं करिष्ये इति संकल्पं कृत्वा आज्याधिश्रयणमाज्योद्वासनमवेक्षणमुत्पवनं स्रुक्स्रुवप्रतपनं सूत्रेण वेष्टनं चतुर्गृहीतेनाज्यग्रहणं तदुपार घृतप्लुतनारिकेलस्य निधानं तस्य पूजनं च कृत्वा सपत्नीको यजमानो गुरोर्दक्षिणस्कंधं स्पृशन् जुहुयात् तत्र मंत्राः—ॐ सुमुद्रादूर्मिर्मधुमाँ २ उदारदुपाꣳशुनासममृतत्वमानट्। घृतस्यनामगुह्यय्यदस्तिजिह्वादेवानाममृतस्यनाभिः ॥१॥ व्वयन्नामप्रब्रवामाघृतस्यास्मिन्यज्ञेधारयामानमोभिः । उपब्रह्माशृणवच्छस्यमानञ्चतुꣳशृंगोव्वमीद्गौरएतत् ॥२॥ चत्वारिशृंगात्रयोऽअस्युपादाद्वेशीर्षेसप्तहस्तासोऽअस्य त्रिधाबद्धोवृषभोरोरवीतिमहोदेवोमर्त्याँआविवेश॥३॥ त्रिधाहितम्पणिभिर्गुह्यमानंगविदेवासोघृतमन्वविन्द

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

न्इन्द्रऽएकꣳ सूर्य्यऽएकञ्जजानव्वेनादेकꣳस्वधयानिष्ठतक्षुः॥४॥एताऽअर्षन्तिहृद्यात्समुद्राच्छतव्व्रजारिपुणानावचक्षेघृतस्यधाराऽअ
भिचाकशीमिहिरण्ययोव्वेतसोमध्यऽआसाम्॥५॥ सम्पक्स्रवन्तिसरितोनधेनाऽअन्तर्हृदामनसापूयमानाःएतेऽअर्य्यत्त्यूर्म्मयोघृतस्य
मृगाऽइवक्षिपणोरीय्यमाणाः ॥ ६ ॥ सिन्धोरिवप्राध्वनेशूघनासोव्वातप्प्रमियःपतयन्तिजिह्वाःघृतस्यधाराऽअरुषोनव्वाजीकाष्ठांभि
न्दन्नूर्म्मिभिःपिन्वमानः ॥ ७ ॥ अभिप्प्रवन्तसमनेव्वयोय्याः कल्याण्यःस्मयमानासोऽअग्निम् घृतस्यधाराः समिधोनसन्तताजु
षाणोहर्य्यतिजातवेदाः ॥ ८ ॥ कन्याऽइवव्वहतुमेतवाऽउऽअञ्जाञ्जानाऽअभिचाकशीमि यत्रसोमः सूयतेयत्रयज्ञोघृतस्यधाराऽ
अभितत्पवन्ते ॥ ९ ॥ अभ्यर्षतसुष्टुतिङ्गव्यमाजिभस्मासुभद्राद्रविणानिधत्त इमंयज्ञन्नयतदेवतानोघृतस्यधारामधुमत्यवन्ते ॥
॥ १० ॥ धामन्तेव्विश्वम्भुवनमधिश्रितमन्तःसमुद्रेहृद्यन्तरायुषिअयामनीकेसमिथेयऽआमृतस्तमस्याममधुमंतंतऽऊर्म्मिम् ॥
॥ ११ ॥ पुनस्त्वादित्यारुद्राव्वसवःसमिन्धताम्पुनर्ब्रह्माणोव्वसुनीथयज्ञैः घृतेनत्वन्तन्वँव्वर्धयस्वसत्याः सन्तुयजमानस्य
कामाः ॥ १२ ॥ सप्ततेऽअग्नेसमिधः सप्तजिह्वाःसप्तऽऋषयःसप्तधामप्रियाणि सप्तहोत्राः सप्तधात्वायजन्तिसप्तयोनीरापृणस्वा
घृतेनस्वाहा ॥ १३ ॥ पूर्णादर्व्विपरापतसुपूर्णापुनरापत वस्नेवव्विक्रीणावहाऽइषमूर्ज्जꣳशतक्रतो स्वाहा ॥ १४ ॥ इदमग्नये
वैश्वानराय वसुरुद्रादित्येभ्यः शतक्रतवे सप्तवते अग्नये अद्भ्यश्च न मम। ततो वसोर्द्धारां जुहुयात् । तत्र मंत्रः—

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ॐ सप्ततेऽअग्नेसमिधः सप्तजिह्वाः सप्तऽऋषयः सप्तधाम प्रियाणि सप्तहोत्राः सप्तधात्वा यजन्ति सप्तयोनीरापृणस्वा घृतेन स्वाहा १ शुक्र
ज्योतिश्च चित्रज्योतिश्च सत्यज्योतिश्च ज्योतिष्मांश्च शुक्रश्चऽऋतपाश्चात्यंहाः २ ईदृङ्चान्यादृङ्च सदृङ्च प्रतिसदृङ्च मितश्च सम्मि
तश्च सभराः ३ ऋतश्च सत्यश्च ध्रुवश्च धरुणश्च धर्त्ता च विधर्त्ता च विधारयः ४ ऋतजिच्च सत्यजिच्च सेनजिच्च सुषेणश्च अंतिमित्रश्च दूरेऽ
अमित्रश्च गणः ५ ईदृक्षासऽएतादृक्षासऽऊषुणः सदृक्षासः प्रतिसदृक्षासऽएतनमितासश्च सम्मितासो नोऽअद्य सभरसो मरुतो यज्ञेऽअ
स्मिन् ६ स्वतवांश्च प्रघासी च सान्तपनश्च गृहमेधी च क्रीडी च शाकी चोज्जेषी ७ इन्द्रन्दैवीर्विशो मरुतोनुवर्त्मानो भवन्यथेन्द्रन्दैवीर्विशो
मरुतोनुवर्त्मानो भवन् एवमिमं यजमानन्दैवीश्च विशो मानुषीश्चानुवर्त्मानो भवन्तु ८ इमꣳस्तनमूर्ज्जस्वन्तन्धयापाम्प्रपीनमग्ने सरिर
रस्य मध्ये उत्सञ्जुषस्व मधुमन्तमर्व्वन्त्समुद्रियꣳसदनमाविशस्व ९ घृतम्मिमिक्षे घृतमस्य योनिर्घृते श्रितो घृतम्वस्य धाम ॥ अनुष्ठ
धमावहमादयस्स्वस्वाहाकृतं वृषभ वक्षि हव्यम् ॥ इति पूर्णाहुतिहोमः। ततस्त्र्यायुषकरणम् । श्रद्धां मेधां यशः प्रज्ञां विद्यां पुष्टिं श्रिय
बलम् । तेज आयुष्यमारोग्यं देहि मे हव्यवाहन ॥ १ ॥ ॐ त्र्यायुषञ्जमदग्नेरिति ललोटकस्य पस्य त्र्यायुषमिति ग्रीवायाम् यद्देवेषु
त्र्यायुषमिति दक्षिणांसे तन्नोऽअस्तु त्र्यायुषमिति हृदि ॥ ततः संस्रवप्राशनम् । पवित्राभ्यां मार्ज्जनम् ॥ अग्नौ पवित्रप्रतिपत्तिः। ब्रह्मणे पूर्ण
पात्रदानम् । तद्यथा अद्येत्यादि पठित्वा अद्य कृतैतदमुकजपदशांशहोमकर्मप्रतिष्ठार्थमिदं पूर्णपात्रं प्रजापतिदैवतममुकगोत्रायामुक

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

शर्मणे ब्राह्मणाय ब्रह्मणे तुभ्यमहं संप्रददे । ॐ स्वस्तीति प्रतिवचनम् । ततो ब्रह्मग्रंथिविमोकः । ततः प्रणीतोदकेन ॐ सुमित्रियानऽ आपऽओषधयः संत्विति ॐ आपः शिवाः शिवतमाः शान्ताः शान्ततमास्तास्ते कृण्वन्तु भेषजमिति च यजमानमूर्धानमभिषिंचति।ततः ॐ दुर्मित्रियास्तस्मैसन्तुयोस्मान्द्वेष्टि यं च वयं द्विष्म इति ईशान्यां प्रणीतां न्युब्जीकुर्यात्।ततः आस्तरणक्रमेण वर्हिरुत्थाप्याज्येनाभिघार्य ॐ देवागातुविदोगातुवित्वागातुमितमनसस्पतऽइमं देवयुज्ञꣳस्वाहावातेधाꣳस्वाहा इति मंत्रेण हस्तेनैव जुहुयात्।एवं होमं समाप्य होमान्ते जले जपदेवतां संपूज्य होमदशांशेन दुग्धमिश्रजलेन मूलमंत्रांते--ॐ अमुकदेवतां तर्पयामि इत्युक्त्वा तर्पणं कुर्य्यात्।ततस्तर्पणदशांशेन मूलमंत्रांते--आत्मानमभिषिंचामि नमः इति यजमानमूर्ध्न्यभिषेकः कार्य्यः ॥ ततो ग्रहकलशदेवताकलशानामुदकमेकस्मिन्पात्रे एकीकृत्य दूर्वापंचपल्लवैरुदङ्मुख आचार्यस्तिष्ठन् जापका ऋत्विजश्च सपत्नीकं यजमानं प्राङ्मुखमुपविष्टमभिषिंचेयुः (अभिषेके पत्नी वामतः) ॐ आपोहिष्ठामयोभुवस्तानऽऊर्जेदधातनमहेरणा युचक्षसे॥१॥योवः÷शिवतमोरसस्तस्यभाजयतेहनः÷उशतीरिवमातरः÷ ॥२॥ तस्माऽअरङ्गमामवोयस्यक्षयायजिन्वथआपोजनयथाचनः॥३॥ॐत्रातारमिन्द्रमवितारमिन्द्रꣳहवेहवेसुहवꣳशूरमिन्द्रं ह्वयामिशक्रम्पुरुहूतमिन्द्रꣳस्वस्तिनोमघवाधात्विन्द्रः॥४॥ ॐ वरुणस्योत्तम्भनमसिवरुणस्यस्कंभसर्जनीस्थोवरुणस्यऽऋतुसदन्यसिवरुणस्यऽऋतुसदनमसिवरुणस्यऽऋतुसदनमासीद॥५॥भगप्रणेः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तुर्भगसत्यराधोभगेमान्धियमुदेव्रादर्दन्नंभगप्रानोजनयगोभिरश्वैर्भगप्रनृभिर्न्नृवन्तः स्याम ६ इदमापंप्रवहतावद्यच्चमलंयच्चयत् यच्चाभिदुद्रोहानृतंरुयच्चशेपेऽअभीरुणंमआपोमातस्मादेनंसंपवमानश्चमुञ्चतु ७ पुनंतुमादेवजनाःपुनन्तुमनसाधियंः पुनंतुविश्वाभूतानिजातवेदःपुनीहिमाः॥८॥आप्यायस्वसमेतुतेविश्वतंः सोमवृष्णयम्भवावाजस्यसङ्गथे ९ पयंः पृथिव्याम्पयऽओषधीषुपयोदिव्यन्तरिक्षेपयोधाःपयस्वतीःप्रदिशःसन्तुमह्यम्॥१०॥देवस्यंत्वासवितुःप्रसवेश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्यां सरस्वत्यैवाचोयंतुरुर्यश्रियेदधामिबृहस्पतेंष्ट्वासाम्राज्येनाभिषिञ्चामि ॥११॥ देवस्यंत्वासवितुःप्रसवेश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्याम् अश्विनोर्भैषज्येनतेजसे ब्रह्मवर्चसायाभिषिंञ्चामि सरस्वत्यैभैषज्येनवीर्य्यायान्नाद्यायाभिषिञ्चामीन्द्रस्येन्द्रियेणबलायश्रियैयशसेभिषिंञ्चामि ॥ १३ ॥ पालाशं भवतितेनब्राह्मणेभिषिञ्चतिब्रह्मवैपालाशोब्रह्मणैवैनमेतदभिषिञ्चति ॥ १४ ॥ सर्वेषांवाऽएषवेदानाछंरसोयत्साम सर्वेषामेनैवमेतद्वेदानाछंरसेनाभिषिञ्चति ॥ १५ ॥ यद्देवकुल्पाअहोतिप्राणावैकुल्पाऽअमृतमुपवैप्राणऽअमृतेनैवैनमेतदभिषिञ्चति ॥ १६ ॥ दीर्घायुत्वायबलायवर्चसेसुप्रजास्त्वायसहसाऽअर्थोजीवशरदंःशतम् ॥ १७ ॥ द्यौःशांतिरन्तरिक्षछंशान्तिंः पृथिवीशान्तिरांपःशान्तिरोषधयःशांन्तिंः वनस्पतयःशांतिर्विश्वेदेवाःशान्तिर्ब्रह्मशान्तिःसर्वछंशांतिःशान्तिरेवशान्तिंः सामाशान्तिरेधि॥१८॥ अथ पौराणिका मंत्राः॥ सुरास्त्वामभिषिंचंतु ब्रह्मविष्णुमहेश्वराः ॥ वासुदेवो जगन्नाथस्तथा संकर्षणो विभुः॥ १ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

प्रद्युम्नश्चानिरुद्धश्च भवन्तु विजयाय ते आखंडलाग्निर्भगवान्यमो वै निर्ऋतिस्तथा ॥२॥ वरुणः पवनश्चैव धनाध्यक्षस्तथा शिवः॥ ब्रह्मणा सहिताः सर्वे दिक्पालाः पांतु ते सदा ॥ ३ ॥ कीर्तिर्लक्ष्मीर्धृतिर्मेधा पुष्टिः श्रद्धा क्रिया मतिः । बुद्धिर्लज्जा वपुः शान्ति स्तुष्टिः कांतिस्तु मातरः ॥४॥ एतास्त्वामभिषिंचंतु देवपत्न्यः समागताः ॥ आदित्यश्चंन्द्रमा भौमो बुधजीवसितार्कजाः ॥ ५ ॥ ग्रहास्त्वामभिषिंचंतु राहुः केतुश्च तर्पिताः॥ देवदानवगंधर्वा यक्षराक्षसपन्नगाः ॥ ६ ॥ ऋषयो मुनयो गावो देवमातर एव च । देवपत्न्यो द्रुमा नागा दैत्याश्चाप्सरसां गणाः ॥ ७ ॥ अस्त्राणि सर्वशस्त्राणि राजानो वाहनानि च । औषधानि च रत्नानि कालस्यावयवाश्च ये ॥ ८ ॥ सरितः सागराः शैलास्तीर्थानि जलदा नदाः । एते त्वामभिषिंचंतु सर्वकामार्थसिद्धये ॥ ९ ॥ आदित्या वसवो रूद्रा विश्वेदेवा मरुद्गणाः । अभिषिंचंतु ते सर्वे धर्मकामार्थसिद्धये ॥ १० ॥ अमृताभिषेकोस्तु ॥ एवमभिषे कानंतरं सर्वौषधीरनुलिप्य शुद्धोदकेन स्नात्वा उभयोः स्नानवस्त्रत्यागः । शुक्लमाल्यांवरधरो धृतमंगलतिलकः सपत्नीको यजमानः स्वासने उपविश्य आचम्य आज्यावलोकनं कुर्यात् । ॐ रूपेणवोरूपमभ्यागान्तुथोवोविश्ववेदाविभजतुऋतस्यपथाप्रेतचन्द्रदक्षि णाविस्वःपश्यव्यन्तरिक्षंयतस्वसदस्यैतं ॥ १ ॥ रूपठरूपम्प्रतिरूपोबभूवतदस्यरूपम्प्रतिचक्षणाय इन्द्रोमायाभिःपुरुरूपईयते युक्ताह्यस्यहरयःशतादशेत्ययंवैहरयोयंवैदशचसहस्राणिबहूनिचनन्तातदेतद्ब्रह्मपूर्वमनुमवाह्यजमनुंसर्वानुशासनम् ॥ २ ॥ इत्याज्ये मुखमवलोक्य देशकालौ स्मृत्वा ममायुरारोग्यप्राप्तये ससुवर्णमिदमाज्यपात्रममुकगोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे ॥ ९६ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

इति कस्मै चिद्ब्राह्मणायदद्यात् ॥ (ततो ब्राह्मणभोजनसंकल्पः) कृतस्य कर्मणः सांगतासिद्ध्यर्थममुकसंख्याकब्राह्मणान् भोजयिष्ये इति संकल्प्य यथाशक्त्या आचार्याय दक्षिणां दद्यात् । ततो ऋत्विगादिभ्यो यथाशक्ति दक्षिणां दत्त्वा अन्येभ्यो ब्राह्मणेभ्योपि यथाशक्ति भूयसीं दक्षिणां दत्त्वा तेषामाशिषो गृह्णीयात् । ते च ॐ स्वस्तिनऽइंद्रोवृद्धश्रवाःस्वस्तिनः पूषाविश्ववेदाः स्वस्तिनस्तार्क्ष्योऽअरिष्टनेमिःस्वस्तिनोबृहस्पतिर्दधातु ॥ १ ॥ ॐ श्रीवर्चस्यमायुष्यमारोग्यमाविधात्पवमानम्महीयतेधान्यंधनं पशुंबहुपुत्रलाभंशतसंवत्सरंदीर्घमायुः ॥ २ ॥ पुनस्त्वादित्यारुद्रावसवःसमिन्धताम्पुनर्ब्रह्माणोवसुनीथयज्ञैः ॥ घृतेनत्वन्तन्वंवर्द्धयस्वसत्याःसन्तुयजमानस्यकामाः ॥ ३ ॥ मंत्रार्थाः सफलाः संतु पूर्णाः सन्तु मनोरथाः । शत्रूणां बुद्धिनाशोस्तु मित्राणामुदयस्तव ॥ ४ ॥ इत्याशिषो दद्युः ॥ ततो देवताग्निविसर्जनम् ॥ यांतु देवगणाः सर्वे स्वशक्त्या पूजिता मया । इष्टकामप्रसिद्ध्यर्थं पुनरागमनाय च ॥ १ ॥ ॐ उत्तिष्ठब्रह्मणस्पतेदेवयन्तस्त्वेमहेउपप्रयन्तुमरुतः सुदानवऽइन्द्रप्राशूर्भवासचा ॥ २ ॥ उमांतिके गणपतिर्ब्रह्माण्डे ब्रह्म गच्छतु । वैकुंठे भगवान्विष्णुः कैलासे च महेश्वरः ॥ ३ ॥ लक्ष्मीर्विष्णुसमीपे च कलशश्चैव सागरे । पन्नगा यान्तु पाताले काश्मीरे च सरस्वती ॥ ४ ॥ स्वात्मपीठेषु योगिन्यः क्षेत्रपालो महाबलः । वेदाश्च ब्रह्मणः पार्श्वे मातरो मातृमण्डले

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

॥ ५ ॥ रविः कलिंगं यमुनां च चंद्रमा भौमो ह्यवंतीं शशिजश्च कोशलान् । सिंधुं गुरुर्भोजकटं भृगुश्च मंदः सुराष्ट्रं पवनं च राहुः ॥ केतुर्गिरिं शक्रमुखाश्च देवाः स्वांस्वां पुरीं यांतु यथाक्रमेण ॥ ६ ॥ ब्रह्मोर्द्धतां नागपतिस्तथाऽधो याम्यामगस्त्यो ध्रुव उत्तरां च । सप्तर्षयो राशिभयोगपक्षगंधर्वयक्षोगिरयो नदाश्च । स्थानानि गच्छंतु यथासमायुर्ह्याशीश्च संतानसुखं प्रदद्युः ॥ ७ ॥ (आवाहितदेवताः स्वस्वस्थानानि गच्छत) गच्छ गच्छ सुरश्रेष्ठ स्वस्थाने परमेश्वर । यत्र ब्रह्मादयो देवास्तत्र गच्छ हुताशन ॥ १ ॥ ॐ यज्ञयज्ञंगच्छयज्ञपतिंगच्छस्वांयोनिंगच्छस्वाहा ॥ एषतेयज्ञोयज्ञपतेसहसूक्तवाकःसर्ववीरस्तञ्जुषस्वस्वाहा ॥ २ ॥ यज्ञ नारायण स्वस्थाने गच्छ ॥ एवं देवान्विसृज्य यज्ञोपकरणादिकं ऋत्विग्भ्यो दत्त्वा गुर्वादीन्संपूज्य करौ संपुटीकृत्य मया यत्कृतम् अमुकदेवतामंत्रपुरश्चरणाख्यं यज्ञकर्म तत्कालहीनं भक्तिहीनं श्रद्धाहीनं द्रव्यहीनं च भवतां ब्राह्मणानां वचनात् श्रीसूर्याद्यावाहितदेव ताप्रसादाच्च सर्वविधैः परिपूर्णमास्त्विति भवन्तो ब्रुवन्तु ॥ अस्तु परिपूर्णम् इति ब्राह्मणा ब्रूयुः ॥ ततो मार्ज्जनदशांशन वा ब्राह्मण शतं पंचाशद्विंशतिं वा शक्त्यनुरूपं भोजयित्वा—ॐ यस्य स्मृत्या च नामोक्त्या तपःपूजाक्रियादिषु । न्यूनं संपूर्णतां याति सद्यो वंदे तमच्युतम् ॥ १ ॥ प्रमादात्कुर्वतां कर्म प्रच्येवेताध्वरेषु यत् । स्मरणादेव तद्विष्णोः संपूर्णं स्यादिति श्रुतिः ॥ २ ॥ ॐ विष्णवे नमो विष्णवे नमो विष्णवे नमः इत्युक्त्वा कुटुंबजनैः परिवृतः स्वयं भोजनं कुर्यात् ॥ इति श्रीबीकानेरविषयान्तर्गतश्रीरत्नगढनगरनिवासिना गौड

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वंशावतंसश्रीवसिष्ठगोत्रोद्भवेन श्रीरामकृष्णामरचंद्रपौत्रेण श्रीचतुर्भुजदत्तात्मजेन श्रीकस्तूरीचंद्रसूनुना श्रीमहादेवभक्तवाजसनेयि
ना पंडितश्रीचतुर्थीलालशर्मणा विरचिते अनुष्ठानप्रकाशे पद्धतिखंडे सर्वमंत्रानुष्ठानोपयोगिवैदिकहोमविधानप्रकरणं समाप्तम् ॥३॥
अथ तंत्रोक्तहवनविधिः ॥ तत्र तावदग्निस्थापनप्रकारः ॥ आचम्य मूलेन प्राणानायम्य मूलमंत्रेण षडंगन्यासं कृत्वा कुंडे स्थंडि
ले वा संस्कारचतुष्टयं कुर्यात् । तद्यथा—मूलेन कुंडं वीक्ष्य ॐ फट् इत्यस्त्रेण संप्रोक्ष्य तेनैव मंत्रेण कुशत्रयेण संताड्य ॐ हुं इति
वर्म्मणा मुष्टिनासिंच्य स्रुवेण कुशमूलेन वा प्रागग्रा उत्तरोत्तरक्रमेण तिस्रो रेखाः स्थंडिलप्रमाणाः प्रादेशमात्रा वा कृत्वा तदुपरि
उदग्ग्राः प्राक्प्राक् क्रमेण तिस्रो रेखाः कुर्यात् । ततस्तासु प्रागग्रासु क्रमेण ॐ मुकुंदाय नमः १ ॐ ईशानाय नमः २ ॐ पुरं
दराय नमः ३ इति गंधादिभिः संपूज्य उदग्ग्रासु ॐ ब्रह्मणे नमः १ ॐ वैवस्वताय नमः २ ॐ इंदवे नमः ३ इति पूजयेत् ।
अथ वा कुंडे स्थंडिले वा मध्ये त्रिकोणं तद्बाह्ये षट्कोणं तद्बाह्ये वृत्तं तद्बाह्ये अष्टदलं तद्बाह्ये चतुरस्रं चतुर्द्वारयुतं भूमंदिरयंत्रं
लिखित्वा तत्र मध्ये त्रिकोणे ॐ ह्रीं ॐ लिखेत् । ततः ॐ मंडूकादिपरतत्त्वांतपीठदेवताभ्यो नमः ॐ जयादिपीठशक्तिभ्यो
नमः इति पीठं संपूज्य यंत्रमध्ये सुवर्णस्य शकलं निधाय ॐ ह्रा वागीश्यैवागीश्वरायोगपीठात्मने नमः इत्यासनं दत्त्वा
ॐ आग्नेययोगपीठाय नमः इति पीठं संपूज्य तत्र ऋतुस्नातां नीलेंदीवरसन्निभां वागीश्वरेण संयुक्तां वागीश्वरीं ध्यात्वा

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

॥ वह्नियंत्रमिदम् ॥



ॐ ह्रीं वागीश्यैवागीश्वराय नमः (वैष्णवहोमे तु ॐ ह्रीं लक्ष्मीनारायणाभ्यां नमः) इति गंधादिभिः संपूज्य मूलमंत्रमुच्चार्य्य ॐ कुंडाय नमः इति कुंडं पूजयेत् ॥ ततः सूर्यकान्त मणेः सकाशात् वा अरणितः श्रोत्रियागारतो वा कांस्यपात्रेण पिहितमग्निं ॐ फट् इत्यस्त्रेणादाय कुंडबाह्ये आग्नेय्यां निधाय ॐ हुं इति वर्म्मणा उद्घाट्य ज्वलितकुशेन ॐ फट् इति मंत्रेण नैर्ऋत्यां क्रव्यादांशं परित्यजेत् । ततो मूलमंत्रेणाग्निं पुरतो धृत्वा तेनैव वीक्ष्य ॐ फट् इत्यस्त्रे ण अल्पं प्रोक्ष्य तेनैव कुशत्रयेण संताडय ॐ हुं वर्मणा संसिच्य जाठरेणाग्निनानीतस्याग्नेरैक्यं स्मरन् ॐ रं इति वह्निबीजेन चैतन्यं संयोज्य ॐ इति तारेणाभिमंत्र्य धेनुमुद्रया ॐ वं इति सुधाबीजेन अमृतीकृत्य ॐ फट् इत्यस्त्रेण संरक्ष्य अवगुंठिन्या मुद्रया ॐ हुं इति कवचेनावगुंठयेत् ततो बाहुभ्यां वह्निपात्रं समुद्धृत्य प्रणवेन कुंडोपरि त्रिर्विर्भ्राम्य—शय्यागतां ऋतुस्नातां नीलें दीवरधारिणीम्॥देवेन भुज्यमानां तां स्मरेत्तद्योनिमण्डले—इति ध्यात्वा जानुस्पृष्टधरातलो मूलमंत्रेण योनौ शिवरेतोधिया आत्मसं मुखं वह्निं धृत्वा ॐ हुं वह्निचैतन्याय नमः इति कुंडमध्ये स्थापयेत् । ततः ॐ वागश्यैवागीश्वराय नमः इत्याचमनं दत्त्वा ॐ चित् पिंगल हन २ दह २ पच २ सर्वज्ञाज्ञापय स्वाहा इति मंत्रेणाग्निं प्रज्वालयेत् । ततो ज्वालिनीं मुद्रां प्रदर्श्य उत्थाय ॐ अग्निं प्रज्व

१ मंत्रमहोदधौ—मणिबंधयुतौ कृत्वा प्रसृतांगुलिकौ करौ । कनिष्ठांगुष्ठयुगले मिलित्वांतःप्रसारिते ॥ ज्वालिनी नाम मुद्रेयं वैश्वानरप्रियंकरी ॥ १ ॥ इत्युक्तम् ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

लितं वंदे जातवेदं हुताशनम्। सुवर्णवर्णममलं समिद्धं विश्वतोमुखम्-इति प्रार्थयेत्।ततोग्नेरमुकनामासि इति नाम कृत्वा-वैश्वानरेति मंत्रस्य भृगुर्ऋषिर्गायत्री छंदः अग्निर्देवता रं बीजं स्वाहा शक्तिर्हवने प्रार्थनायां च विनियोगः ॐ वैश्वानर जातवेद इहावह लोहि ताक्ष सर्वकर्माणि साधय स्वाहा ॥ २६ ॥ इति मंत्रेणाग्निं पाद्यादिभिः संपूज्य न्यासं कुर्यात्। ॐ स्त्रूँ हिरण्यायै नमः लिंगे १ ॐ ष्त्रूँ गगनायै नमो गुदे २ ॐ श्त्रूं रक्तायै नमो मूर्ध्नि ३ व्त्रूँ कृष्णायै नमः वक्त्रे ४ ॐ ल्त्रूँ सुप्रभायै नमो नासिकायाम् ५ ॐ प्त्रूँ बहुरूपायै नमः नेत्रे ६ ॐ य्त्रूँ अतिरिक्तायै नमः सर्वाङ्गे ७ इत्यग्नेर्जिह्वान्यासं कृत्वा ॐ देवताभ्यो नमो लिंगे १ ॐ पितृभ्यो नमो गुदे २ॐ गंधर्वेभ्यो नमः मूर्ध्नि ३ ॐ यक्षेभ्यो नमः वक्त्रे ४ ॐ नागेभ्यो नमो नासिकायाम् ५ॐ पिशाचेभ्यो नमः नेत्रे ६ ॐ राक्षसेभ्यो नमः सर्वाङ्गे ७ इति जिह्वादेवतान्यासं कुर्य्यात् ॥ ततः ॐ सहस्रार्चिषे हृदयाय नमः ॐ स्वस्ति पूर्णाय शिरसे स्वाहा २ ॐ उत्तिष्ठ पुरुषाय शिखायै वषट् ३ ॐ धूमव्यापिने कवचाय हुं ४ ॐ सप्तजिह्वाय नेत्रत्रयाय वौषट् ५ ॐ धनुर्धराय अस्त्राय फट् ६ इति न्यासं कृत्वा ॐ अग्नये जातवेदसे नमो मूर्ध्नि १ ॐ अग्नये सप्तजिह्वाय नमो वामांसे २ ॐ अग्नये हव्यवाहनाय नमो वामपार्श्वे ३ ॐ अग्नये अश्वोदरजाय नमो वामकटौ ४ ॐ अग्नये वैश्वानराय नमो लिंगे ५ ॐ अग्नये कौमारतेजसे नमो दक्षिणकटौ ६ ॐ अग्नये विश्वमुखाय नमो दक्षिणपार्श्वे ७ ॐ अग्नये देवमुखाय नमो दक्षांसे ८ एवं वह्निन्यासं कृत्वा रं वह्नयासनाय नम इत्यासनं प्रकल्प्य ध्यायेत्। अथ ध्यानम्-इष्टं शक्तिं स्वस्तिकाभीतिमुच्चैर्दोर्घैर्दोर्भि र्धारयंतं जपाभम्। हेमाकल्पं पद्मसंस्थं त्रिनेत्रं ध्यायेद्वह्निं बद्धमौलिं जटाभिः इति॥ इति ध्यात्वा मानसोपचारैः संपूजयेत्॥ ततः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

शुद्धो दकेन कुंडं स्थंडिलं वा परिषिच्य प्राचीवर्जं दक्षिणे प्रागग्रैः पश्चिमे उदगग्रैः उत्तरे प्रागग्रैश्च दर्भैर्मध्यस्थमेखलायां परिस्तीर्य्यत्रीन् परिधीन् क्रमात् निक्षिपेत् । ततस्तेषूपरि मेखलाक्रमेण ॐ ब्रह्मणे नमः १ ॐ विष्णवे नमः २ ॐ शिवाय नमः ३ इति गंधादिभिः संपूज्य योन्यां ॐ गौर्य्यै नमः इति गौरीं पूजयेत् । ततः ॐ वैश्वानर जातवेद इहावह लोहिताक्ष सर्वकर्माणि साधय स्वाहा इति वह्निं मध्ये गंधादिभिः संपूज्य वह्नेरावरणपूजां कृत्वा कुंडयोनिं वस्त्रेणाच्छाद्य कुंडं नवसूत्रेण संवेष्ट्य कुशकंडिकां कुर्यात् इति । इति तंत्रोक्तः अग्निस्थापनप्रकारः ॥ अथ तांत्रिककुशकंडिका ॥ स्ववामे कुशानास्तीर्य तत्र क्रमेण प्रणीतां १ प्रोक्षणीं २ आज्यस्थालीं ३ स्रुवं ४ स्रुचं ५ च अधोमुखानि चैतानि न्यस्य होमद्रव्यं घृतं कुशान् समिधः पंच पालाशीः समिधः ५ अन्यदप्युपयोगि यत् तन्निधाय पवित्रे २ कृत्वा मूलमंत्रेण शुद्धां भसा तानि प्रोक्ष्य उत्तानानि विधाय प्रणीतां जलेन पूरयेत् । तत्र ॐ गंगे च यमुने चैव गोदावरि सरस्वति । नर्मदे सिंधुकावेरि जलेस्मिन्संनिधिं कुरु ॥ १ ॥ इति मंत्रेण कुशमुद्रया तीर्थान्यावाह्य पवित्रे २ अक्षतांश्च तत्र निक्षिप्य उत्पवनं चरेत् । तत उदीच्यां प्रणीतां निधाय प्रोक्षण्यां तज्जलं क्षिप्त्वा पवित्राभ्यां जलमानीय हवनीयं द्रव्यजातं प्रोक्षयेत् । ततो मूलमंत्रेण मूलगायत्र्या वा दक्षिणे पीठमासाद्य तत्र ॐ अणिमादिपीठदेवताभ्यो नमः इति पीठशक्तीः संपूज्य ॐ नमो ब्रह्मणे इति ब्रह्माणमावाह्य षोडशोपचारैः पूजयेत् ॥ ततो हस्ताभ्यां स्रुक्स्रुवौ धृत्वा अधोमुखौ वह्नौ त्रिवारं तापयित्वा वामहस्तेन तौ धृत्वा

१ (कुशमुद्रा) ऋज्वीं मध्यमिकां कृत्वा तर्जनीं मध्यपर्वणि । संयोज्याकुंचयेत्किंचिन्मुद्रैषा कुशसंज्ञिका ॥ १ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

दक्षिणहस्तेन दर्भैर्यथाक्रमं तदग्रमूलमध्यानि शोधयित्वा प्रोक्षणीजलेन संप्रोक्ष्य पूर्ववत् पुनः प्रताप्य दर्भानग्नौ निःक्षिप्य तयोः स्रुक्स्रुवयोः शक्तित्रयं न्यसेत्। मूले हां इच्छाशक्त्यै नमः १ मध्ये हीं ज्ञानशक्त्यै नमः२ अन्ते हूं क्रियाशक्त्यै नमः ३ ततः स्रुवे नमः शक्त्यै १ नमः शंभवे २ इति न्यस्य तौ सव्यत्रयेण संवेष्टच कुंकुमपुष्पादिभिः संपूज्य आत्मनो दक्षिणभागे कुशोपरि स्थापयेत्। तत आज्यस्थालीमानीय ॐ फट् इति वारिणा प्रोक्ष्य तस्यामाज्यं निक्षिप्य मूलमंत्रतो गोमुद्रयाऽभृतीकृत्य षट्संस्कारांश्चरेत्–(तद्यथा) कुंडोद्धृते वायुकोणे स्थितेंगारे ॐ नम इति मंत्रेणाज्यस्थालीं निधाय तापनं कर्य्यादिति तापनम् १। दर्भयुगलं संदीप्य। ॐ नम इत्याज्ये विनिक्षिपेदिति पवित्रीकरणम् २ पुनर्दर्भयुग्मप्रदीप्तं ॐ हुं इति वर्म्मणा आज्योपरि भ्रामयित्वा दर्भयुग्ममग्नौ विसर्जयेत् इत्यभिद्योतनम् ३। ततः ॐ फडिति मंत्रेण घृते प्रज्वलितं दर्भत्रयं प्रदर्श्य तानग्नौ न्यसेदित्युद्योतनम् ४। ततः घृतस्थालीं गृहीत्वा तदंगारान् वह्नौ संयोज्य जलं संस्पृश्य तत अंगुष्ठानामिकाभ्यां प्रादेशसंमितौ दर्भौ गृहीत्वा ॐ फट् इत्यस्त्रेण घृतमुत्पवेत इत्युत्पवनम् ५। ॐ नम इति मंत्रेणात्मसंमुखं कृत्वा घृतसंप्लवनं कुर्य्यात् ६ ॥ इति घृतस्य षट्संस्काराः॥ ततः प्रादेशमात्रं सग्रंथिदर्भयुग्मं घृतमध्ये क्षिप्त्वा आज्यस्य द्वौ भागौ कृत्वा कृष्णशुक्लौ पक्षौ स्मरेत्। ततो वामे इडां नाडीं दक्षिणे पिंगलां मध्य सुषुम्णां ध्यात्वा होमं कुर्य्यात्–(तद्यथा) ॐ नम इति मंत्रेण स्रुवेण दक्षिणभागादाज्यं गृहीत्वा (अग्नेर्दक्षिणलोचने) ॐ अग्नये स्वाहा इदमग्नये १ (तद्द्वारभागादाज्यमादाय वामलोचने) ॐ सोमाय स्वाहा इदं सोमाय २ (तन्मध्यादाज्यं गृहीत्वा अग्नेर्भाललोचने) ॐ अग्नीषोमाभ्यां स्वाहा इदं० ३ इति जुहुयात्। तत ॐ नमः इति स्रुवेणाज्यं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

दक्षिणभागादादाय (वह्निमुखे) ॐ अग्नये स्विष्टकृते स्वाहा इदं० इति जुहुयात् । ततो महाव्याहृतिहोमः । ॐभूः स्वाहा । ॐ भुवः स्वाहा । ॐस्वः स्वाहा । ततो वैश्वानर जातवेद इहावह लोहिताक्ष सर्वकर्म्माणि साधय स्वाहा इति मंत्रेण त्रिवारं हुत्वा अग्नेर्गर्भाधानादिकाः क्रियाः संपादयेत्–(शुभे कर्मणि गर्भाधानादिविवाहांतं क्रूरकर्मणि गर्भाधानादिमरणांतं संस्कारान् कुर्यात्) । तत्र प्रणवेन घृताहुतिभिरष्टाभिरेकं संस्कारं कुर्यात् । तत्र क्रमः–ॐ अस्याग्नेर्गर्भाधानसंस्कारं करोमि स्वाहा १ ॐ अग्नेः पुंसवन संस्कारं करोमि स्वाहा २ ॐ अग्नेः सीमंतोन्नयनसंस्कारं करोमि स्वाहा ३ ॐ अग्नेर्जातकर्मसंस्कारं क० स्वाहा ४ ॐ अग्ने र्नामकर्मसंस्कारंक० स्वाहा ५ ॐ अग्नेर्निष्क्रमणसं स्कारं० स्वाहा ६ ॐ अग्नेः कर्णवेधसंस्कारं० स्वाहा ७ ॐ अग्ने रन्नप्राशनसं०स्वाहा ८ ॐ अग्नेश्चौलसंस्का० स्वा० ९ ॐ अग्नेरुपनयनसं० स्वाहा १० ॐ अग्नेर्वेदारंभसं० स्वाहा ११ ॐ अग्नेर्महानाम्नीमहाव्रतसं० स्वाहा १२ ॐ अग्नेरुपनिषद्व्रतसं० स्वाहा १३ ॐ अग्नेर्व्रतविसर्गसं० स्वाहा १४ ॐ अग्नेः केशां तगोदानसं० स्वाहा १५ ॐ अग्नेर्विवाहसंस्कारं करोमि स्वाहा १६ एवं संस्कारान् संपाद्य वह्नेः पितरौ ॐ पार्वतीपरमेश्वराभ्यां नमः इति मंत्रेण संपूज्य आत्मनि योजयित्वा मूलाग्रघृतसंप्लुताः पंचसमिधो मनसा ध्यात्वा जुहुयात् । ततः अग्नेः सप्तजिह्वादि मूर्तिभ्यस्तत्तन्मंत्रेणैकैकामाज्याहुतिं जुहुयात् । तद्यथा ॐ स्ष्रूं हिरण्यायै अग्निजिह्वायै नमः स्वाहा इदं हिरण्यायै अग्नि जिह्वायै न मम १ ॐ ष्ष्रूं गगनायै अ० नमः स्वाहा इदं ग० २ ॐ श्रूं रक्तायै अ०स्वाहा० इदं रक्तायै० ३ ॐ व्रूं कृष्णायै अ० स्वाहा इदं कृष्णायै० ४ ॐ ल्रूं सुप्रभायै अ०स्वाहा इदं सुप्रभायै० ५ ॐ ह्रूं बहुरूपायै अ०स्वाहा इदं बहुरू

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पौय० ६ ॐ ह्रूँ अतिरक्तायै अ० स्वाहा इदं अतिरक्तायै ७॥ अथ जिह्वादिदेवताहोमः ॥ ॐ देवताभ्यो नमः स्वाहा इदं देव० १ ॐ पितृभ्यः स्वाहा इदं पि० २ ॐ गंधर्वेभ्यः स्वाहा इदं गं० ३ ॐ यक्षेभ्यः स्वाहा इदं य० ४ ॐ नागेभ्यः स्वाहा इदं नागे० ५ ॐ पिशाचेभ्यः स्वाहा इदं पि० ६ ॐ राक्षसेभ्यः स्वाहा इदं रा० ७॥ अथाग्नेरंगदेवताहोमः ॥ (ततः केसरेषु अग्न्यादिकोणे मध्ये दिक्षु च) ॐ सहस्रार्चिषे हृदयाय नमः स्वाहा १ ॐ स्वस्ति पूर्णाय शिरसे स्वाहा २ ॐ उत्तिष्ठ पुरुषाय शिखायै वषट् स्वाहा ३ ॐ धूमव्यापिने कवचाय हुं स्वाहा ४ ॐ सप्तजिह्वाय नेत्रत्रयाय वौषट् स्वाहा ५ ॐ धनुर्धरायास्त्राय फट् स्वाहा ६॥ (ततः पूर्वादिदलेषु) ॐ अग्नये जातवेदसे नमः स्वाहा १ ॐ अग्नये सप्तजिह्वाय स्वाहा २ ॐ अग्नये हव्यवाहनाय स्वाहा ३ ॐ अग्नये अश्वोदरजाय स्वाहा ४ ॐ अग्नये वैश्वानराय स्वाहा ५ ॐ अग्नये कौमारतेजसे स्वाहा ६ ॐ अग्नये विश्वमुखाय स्वाहा ७ ॐ अग्नये देवमुखाय स्वाहा ८॥ इत्यष्टमूर्तिहोमः ॥ अथ सायुधदिग्पालहोमः ॥ ॐ इंद्राय सुराधिपतये वज्रहस्ताय स्वाहा १ ॐ वह्नये तेजोधिपतये छागवाहनाय शक्तिहस्ताय स्वाहा २ ॐ यमाय प्रेताधिपतये दंडहस्ताय स्वाहा ३ ॐ नैर्ऋतये रक्षाधिपतये खड्गहस्ताय स्वाहा ४ ॐ वरुणाय जलाधिपतये पाशहस्ताय स्वाहा ५ ॐ वायवे प्राणाधिपतये ध्वजहस्ताय स्वाहा ६ ॐ सोमाय क्षेत्राधिपतये गदाहस्ताय स्वाहा ७ ॐ ईशानायं विद्याधिपतये त्रिशूलहस्ताय स्वाहा ८॥ एवं वह्नियंत्रदेवताहोमं कृत्वा ततः स्रुवेण चतुर्वारमाज्यमादाय स्रुचि निधाय स्रुवेण तां पिधाय उत्तिष्ठन् ॐ वैश्वानर जातवेद इहावह लोहिताक्ष सर्वकर्माणि साधय स्वाहा वौषट् इत्यनेन जुहुयात् । ततो विघ्नेश्वरमंत्रेण दशाहुतीर्जुहुयात् तद्यथा—ॐ स्वाहा १ ॐ श्रीं स्वाहा २ ॐ श्रीं ह्रीं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

स्वाहा ३ ॐ श्रीं ह्रीं क्लीं स्वाहा ४ ॐ श्रीं ह्रीं क्लीं ग्लौं स्वाहा ५ ॐ श्रीं ह्रीं क्लीं ग्लौं गं स्वाहा ६ ॐ श्रीं ह्रीं क्लीं ग्लौं गं गणपतये स्वाहा ७ ॐ श्रीं ह्रीं क्लीं ग्लौं गं गणपतये वरवरदस्वाहा ८ ॐ श्रीं ह्रीं क्लीं ग्लौं गं गणपतये वरवरद सर्वजनं मे स्वाहा ९ ॐ श्रीं ह्रीं क्लीं ग्लौं गं गणपतये वरवरद सर्वजनं मे वशमानय स्वाहा १० एवं दशाहुतीर्हुत्वा पुनः समस्तमंत्रेण चतुर्वारं जुहुयात् । एवमग्निसंस्कारं कृत्वा देवतायाः पीठं पूजयेत् ॥ ततो हुताशने इष्टदेवताम् आवाह्य आवाहनादिका मुद्राः प्रदर्श्य वह्निरूपां तां देवतां पूजयेत् । ततो वह्निरूपस्य देवस्य मुखे मूलमंत्रेण पंचविंशतिसंख्यया घृताहुतीर्हुत्वा वह्निदैवतयोरात्मना सहैक्यं विभाव्य मूलमंत्रेण नाडीसंधानार्थमेकादशाहुतीराज्येन जुहुयात् । ततः इष्टदेवताया आवरणदेवताभ्य एकैकां घृताहुतिं हुत्वा पुनर्मूलमंत्रेण दशधा घृतं जुहुयात् । ततः कल्पोक्तद्रव्येण जपदशांशं मूलमंत्रेण हुत्वा होमं समाप्य पूर्णाहुतिं दद्यात् । तद्यथा—होमावशिष्टेनाज्येन स्रुचं पूरयित्वा तदग्रे पुष्पं फलं निधाय तां स्रुवेणाच्छाद्य उत्थाय तयोर्मूलं नाभौ कृत्वा मूलमंत्रं वौषट् इत्यंतं पठित्वा ॐ इतः पूर्वं प्राणबुद्धिदेहधर्माधिकारतो जाग्रत्स्वप्नसुषुप्त्यवस्थासु मनसा वाचा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना यत्स्मृतं यदुक्तं यत्कृतं तत्सर्वं ब्रह्मार्पणं भवतु स्वाहा मां मदीयं च सकलं हरये ते समर्पये ॐ तत्सदिति मंत्रेण पूर्णाहुतिं दद्यात् । एवं पूर्णाहुतिं दत्त्वा संहारमुद्रयाः देवतां स्वात्मनि उद्वास्य पुनर्व्याहृतिभिर्हुत्वा अग्नेर्जिह्वादीनांपूर्ववत् एकैकाहुतिं दत्त्वा मेखलोपरि अद्भिः परिषिच्यात्मनि पावकं योजयित्वा ततः ॐ भोभो वह्ने महाशक्ते सर्वकर्मप्रसाधक ॥ कर्मांतरेपि संप्राप्ते सान्निध्यं कुरु सादरम् ॥ १ ॥ इति संप्रार्थ्य नत्वा अग्निं विसृजेत् ॥ ततो दक्षिणादानम् ॥ सुवर्णमयुते दद्यात् लक्षे दशसुवर्णकम् ॥ दक्षिणा तु प्रदातव्या

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यथा होमे तथा जपे ॥१॥ ततो वह्नौ पवित्रे निक्षिप्य प्रणीताम्बु भुवि क्षिप्त्वा सकुशान् परिधीन् अग्नौ क्षिपेत् । एवं होमं समाप्य मूलमंत्रेण होमदशांशेन दुग्धमिश्रजलेन ॐ अमुकदेवतां तर्पयामि इति तर्पणं कृत्वा तदशांशेन मूलमंत्रांते अभिषिंचामि इत्यभिषेकं कुर्यात् । ततो नानाविधैरन्नैर्द्विजसत्तमान्भोजयित्वा तेभ्यो दक्षिणां दत्त्वा 'न्यूनं सम्पूर्णतां०' वाचयेत् ॥ इति शारदा तिलक मंत्रमहोदधिप्रोक्तं तांत्रिकहवनविधानं समाप्तम् ॥ इति श्रीबीकानेरविषयान्तर्गतश्रीरत्नगढनगरनिवासिना गौडवंशावतंसेन श्रीवासिष्ठगोत्रोद्भवेन श्रीरामकृष्णामरचंद्रपौत्रेण श्रीकस्तूरीचंद्रचतुर्भुजसूनुना श्रीमहादेवभक्तवाजसनेयिना पंडितश्रीचतुर्थीलाल शर्म्मणा विरचिते अनुष्ठानप्रकाशे पद्धतिकाण्डे सर्वदेवोपयोगितंत्रोक्तहोमप्रयोगप्रकरणम् ॥ ४ ॥ समाप्तश्चायं द्वितियः पद्धतिकाण्डः ॥ २ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

॥ इत्यनुष्ठानप्रकाशांतर्गतपद्धतिकाण्डो द्वितीयः ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अथ पुरश्चरणप्रयोगकाण्डः ॥ प्रथमं तावत्सकलविघ्ननिवर्त्तकश्रीगणेशमंत्रपुरश्चरणप्रकरणम्॥सिंदूराभं त्रिनेत्रं पृथुतरजठरं हस्तपद्मैर्दधानं दंतं पाशांकुशेष्टान् पुरुकरविलसद्बीजपूराभिरामम् । बालेंदूद्द्योतमौलिं करिपतिवदनं दानपूरार्द्रगंडं भोगींद्रावद्धमौलिं भजत गणपतिं रक्तवस्त्रांगरागम्॥ १॥चन्द्रतारादिबलान्विते सुमुहूर्ते विविक्ते देशे जपस्थानं प्रकल्प्य तत्र भूशुद्धिं कूर्मशुद्धिम् आसनादिशुद्धिं च पूर्ववत् कृत्वा पूर्वदिने स्वदेहशुद्ध्यर्थमयुतगायत्रीजपं कुर्य्यात् । ततः प्रारंभदिने प्रातर्नित्यमावश्यकं कर्म समाप्य पूर्वोक्तविधिना मंगलस्नानं गणेशपूजनादिजापकवरणांतं सर्वं सम्पाद्य स्वासने प्राङ्मुख उदङ्मुखो वा उपविश्य आचम्य प्राणानायम्य देशकालौ संकीर्त्य अमुककामनासिद्धये अमुक श्रीगणपतिदेवताप्रीतये अमुक श्रीगणपतिमंत्रस्यामुकसंख्यात्मकजपपुरश्चरणं करिष्ये । तदंगत्वेनास नादिशुद्धिं भूतशुद्धिं प्राणप्रतिष्ठामंतर्मातृकान्यासं बहिर्मातृकान्यासं विघ्नेशादिकलामातृकान्यासं च करिष्ये इति च संकल्प्य बहिर्मातृकान्यासांतं पूर्ववत्सर्व्वं कृत्वा सर्वगणेशमंत्रांगभूतविघ्नेशादिकलामातृकान्यासं कुर्य्यात् । तद्यथा—ॐ अस्य विघ्नेशादिकलामातृकान्यासस्य गणक ऋषिर्निचृत् गायत्री छन्दः विनायको देवता ह्रलो बीजानि स्वराः शक्तयः सर्वेष्टसिद्धये न्यासे विनियोगः ॥ अथ षडङ्गन्यासः ॥ ॐ गां हृदयाय नमः ॥ १ ॥ ॐ गीं शिरसे स्वाहा ॥ २ ॥ ॐ गूं शिखायै वषट् ॥ ३ ॥ ॐ गैं कवचाय हुम् ॥ ४ ॥ ॐ गौं नेत्रत्रयाय वौषट् ॥ ५ ॥ ॐ गः अस्त्राय फट् ॥ ६ ॥ एवं षडंगन्यासं कृत्वा गजाननं ध्यायेत् ॥ अथ ध्यानं—गुणांकुशवराभीतिपाणिं रक्ताब्जहस्तया ॥ प्रिययालिंगितं रक्तं त्रिनेत्रं गणपं भजे ॥ १ ॥ एवं ध्यात्वा कलान्यासं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कुर्यात् ॥ तत्र क्रमः ॥ ॐ अं विघ्नेशह्रीभ्यां नमः ललाटे ॥ १ ॥ ॐ आं विघ्नराजश्रीभ्यां नमः मुखवृत्ते ॥ २ ॥ ॐ इं विनायक पुष्टिभ्यां नमः दक्षिणनेत्रे ॥ ३ ॥ ॐ ईं शिवोत्तमशान्तिभ्यां नमः वामनेत्रे ॥ ४ ॥ ॐ उं विघ्नकृत्स्वास्तिभ्यां नमः दक्षिणकर्णे॥५॥ ॐ ऊं विघ्नहर्तृसरस्वतीभ्यां नमः वामकर्णे ॥ ६ ॥ ॐ ऋं गणस्वाहाभ्यां नमः दक्षिणनासापुटे ॥ ७ ॥ ॐ ॠं एकदंतसुमेधाभ्यां० वामनासापुटे ॥ ८ ॥ ॐ ऌं द्विदंतकांतिभ्यां० दक्षिणगंडे ॥ ९ ॥ ॐ ॡं गजवक्त्रकामिनीभ्यां नमः वामगंडे ॥ १० ॥ ॐ एं निरंजनमोहिनीभ्यां नमः ऊर्ध्वोष्ठे ॥ ११ ॥ ॐ ऐं कपर्दिनटीभ्यां० अधरोष्ठे ॥ १२ ॥ ॐ ओं दीर्घजिह्वपार्वतीभ्यां० ऊर्ध्वदंतपंक्तौ ॥ १३ ॥ ॐ औं शंकुकर्णज्वालिनीभ्यां० अधोदंतपंक्तौ ॥ १४ ॥ ॐ अं वृषभध्वजनंदाभ्यां० शिरसि ॥ १५ ॥ ॐ अः गणेश सुरेशाभ्यां० मुखे ॥ १६ ॥ ॐ कं गजेंद्रकामरूपिणीभ्यां० दक्षिणबाहुमूले ॥ १७ ॥ ॐ खं शूर्पकर्णोमाभ्यां नमः दक्षिणकूर्परे ॥ १८ ॥ ॐ गं त्रिलोचनतेजोवतीभ्यां० दक्षिणमणिबंधे ॥ १९ ॥ ॐ घं लंबोदरसत्याभ्यां० दक्षांगुलिमूले ॥ २० ॥ ॐ ङं महा नंदविघ्नेशीभ्यां० दक्षांगुल्यग्रे ॥ २१ ॥ ॐ चं चतुर्मूर्तिसुरूपिणीभ्यां० वामबाहुमूले ॥ २२ ॥ ॐ छं सदाशिवकामदाभ्यां वाम कूर्परे ॥ २३ ॥ ॐ जं आमोदमदजिह्वाभ्यां० .वाममणिबंधे ॥ २४ ॥ ॐ झं दुर्मुखभूतिभ्यां वामांगुलिमूले ॥ २५ ॥ ॐ ञं सुमुखभौतिकाभ्यां नमः वामांगुल्यग्रे ॥ २६ ॥ ॐ टं प्रमोदसिताभ्यां नमः दक्षपादमूले ॥ २७ ॥ ॐ ठं एकपादरमाभ्यां नमः दक्षजानुनि ॥ २८ ॥ ॐ डं द्विजिह्वमहिषीभ्यां नमः दक्षगुल्फे ॥ २९ ॥ ॐ ढं शूरभंजनीभ्यां नमः दक्षपादांगुलिमूले ॥३०॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ॐ णं वीरविकरणाभ्यां नमः दक्षपादांगुल्यग्रे ॥ ३१ ॥ ॐ तं षण्मुखभृकुटीभ्यां नमः वामपादमूले ॥ ३२ ॥ ॐ थं वरदलज्जाभ्यां नमः वामजानुनि ॥ ३३ ॥ ॐ दं वामदेवदीर्घघोणाभ्यां नमः वामगुल्फे ॥ ३४ ॥ ॐ धं वक्रतुंडधनुर्धराभ्यां नमः वामांगुलिमूले ॥ ३५ ॥ ॐ नं द्विरदयामिनीभ्यां नमः वामांगुल्यग्रे ॥ ३६ ॥ ॐ पं सेनानीरात्रिभ्यां नमः दक्षपार्श्वे ॥ ३७ ॥ ॐ फं कामांधग्रामणीभ्यां नमः वामपार्श्वे ॥ ३८ ॥ ॐ बं मत्तशशिप्रभाभ्यां नमः पृष्ठे ॥३९॥ ॐ भं विमत्तलोललोचनाभ्यां नमः नाभौ ॥ ४० ॥ ॐ मं मत्तवाहनचंचलाभ्यां नमः जठरे ॥ ४१ ॥ ॐ यं त्वगात्मभ्यां जटीदीप्तिभ्यां नमः हृदि ॥ ४२ ॥ ॐ रं असृगात्मभ्यां मुंडीसुभगाभ्यां नमः दक्षांसे ॥ ४३ ॥ ॐ लं मांसात्मभ्यां खड्गीदुर्भगाभ्यां नमः ककुदि ॥ ४४ ॥ ॐ वं मेदात्मभ्यां वरेण्यशिवाभ्यां नमः वामांसे ॥४५॥ ॐ शं अस्थ्यात्मभ्यां वृषकेतनभगाभ्यां नमः हृदयादिदक्षहस्तांतम् ॥४६॥ ॐ षं मज्जात्मभ्यां भक्तिप्रियभगिनीभ्यां नमः हृदयादिवामहस्तांतम् ॥४७॥ ॐ सं शुक्रात्मभ्यां गणेशभोगिनीभ्यां नमः हृदयादिदक्षपादांतम् ॥४८॥ ॐ हं प्राणात्मभ्यां मेघनादसुभगाभ्यां नमः हृदयादिवामपादांतम् ॥४९॥ ॐ ळं शक्त्यात्मभ्यां व्याप्तिकालरात्रिभ्यां नमः जठरे ॥५०॥ ॐ क्षं परमात्मभ्यां गणेश्वरकालिकाभ्यां नमः मुखे॥५१॥एवं कलान्यासं कृत्वा प्राणायाम्य मूलमंत्रन्यासं कुर्यात्॥एवं कलान्यासः सर्वेगणपतिमंत्रेषु कार्यः॥अथ वक्रतुंडगणेशमंत्रो मंत्रमहोदधौ॥यथा–'ॐ वक्रतुंडाय हुं' इति षडक्षरो मूलमंत्रः॥अस्य श्रीगणेशमंत्रस्य भार्गवऋषिः अनुष्टुप् छन्दः विघ्नेशो देवता वं बीजं यं शक्तिः सर्वेष्टसिद्धये जपे विनियोगः । अथ ऋष्यादिन्यासः । ॐ भार्गवऋषये

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नमः सिरशि ॥१॥ ॐ अनुष्टुप्छन्दसे नमः मुखे ॥२॥ ॐ विघ्नेशदेवतायै नमः हृदये ॥ ३ ॥ ॐ वं बीजाय नमः गुह्ये ॥ ४ ॥ ॐ यं शक्तये नमः पादयोः ॥ ५ ॥ अथ करन्यासः । ॐ वं अंगुष्ठाभ्यां नमः ॥ ॐ क्रं तर्जनीभ्यां नमः ॥ ॐ तुं मध्यमाभ्यां नमः ॥ ॐ डां अनामिकाभ्यां नमः ॥ ॐ यं कनिष्ठिकाभ्यां नमः ॥ ॐ हुं करतलकरपृष्ठाभ्यां नमः ॥ अथ षडङ्गन्यासः । ॐ वं नमः हृदयाय नमः ॥ १ ॥ ॐ क्रं नमः शिरसे स्वाहा ॥ २ ॥ ॐ तुं नमः शिखायै वषट् ॥ ३ ॥ ॐ डां नमः कवचाय हुं ॥ ४ ॥ ॐ यं नमः नेत्रत्रयाय वौषट् ॥ ५ ॥ ॐ हुं नमः अस्त्राय फट् ॥ ६ ॥ अथ वर्णन्यासः । ॐ वं नमः भ्रूमध्ये ॥ १ ॥ ॐ क्रं नमः कंठे ॥ २ ॥ ॐ तुं नमः हृदये ॥ ३ ॥ ॐ डां नमः नाभौ ॥ ४ ॥ ॐ यं नमः लिंगे ॥ ५ ॥ ॐ हुं नमः पादयोः ॥ ६ ॥ इति वर्णन्यासं कृत्वा ॐ वक्रतुंडाय हुं नमः इति सर्वांगे व्यापकं न्यस्य ध्यायेत् । उद्यद्दिनेश्वररुचिं निजहस्तपद्मे पाशांकुशाभय वरान्दधतं गजास्यम् ॥ रक्तांबरं सकलदुःखहरं गणेशं ध्यायेत्प्रसन्नमखिलाभरणाभिरामम् ॥ १ ॥ इति ध्यात्वा स्वदेहे ॐ मं मण्डूकादिपरतत्त्वान्तपीठदेवताभ्यो नमः इति न्यस्य पीठपूजां कुर्यात् । तद्यथा—पुष्पाक्षतानादाय स्ववामभागे श्रीगुरुभ्यो नमः ॥१॥ दक्षिणे गणपतये नमः ॥२॥ मध्ये स्वेष्टदेवतायै नमः ॥३॥ पीठमध्ये ॐ मं मंडूकाय नमः ॥१॥ ॐ कां कालाग्निरुद्राय नमः ॥२॥ ॐ आं आधारशक्त्यै नमः॥३॥ॐ कूं कूर्म्माय नमः॥४॥ॐ अं अनन्ताय नमः॥५॥ ॐ पृं पृथिव्यै नमः॥६॥ ॐ क्षीं क्षीरसागराय नमः ॥ ७ ॥ ॐ रं रत्नद्वीपाय नमः ॥ ८ ॥ ॐ रं रत्नमंडपाय नमः ॥ ९ ॥ ॐ कं कल्पवृक्षायनमः ॥ १० ॥ ॐ रं रत्नवेदि

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कायै नमः ॥११॥ ॐ रं रत्नसिंहासनाय नमः ॥१२॥ इत्युपर्युपरि संपूज्य आग्नेय्याम् ॐ धं धर्माय नमः॥१३॥ नैर्ऋत्यां ॐ ज्ञा ज्ञानाय नमः ॥१४॥ वायव्यां वैं वैराग्याय नमः ॥१५॥ ईशान्यां ॐ ऐं ऐश्वर्याय नमः ॥१६॥ पूर्वे ॐ अं अधर्माय नमः ॥१७॥ दक्षिणे ॐ अं अज्ञानाय नमः ॥ १८ ॥ पश्चिमे ॐ अं अवैराग्याय नमः ॥ १९ ॥ उत्तरे ॐ अं अनैश्वर्याय नमः ॥२०॥ इति पूजयेत् ॥ ततो मध्ये आं आनन्दकन्दाय नमः॥२१॥ ॐ सं संविन्नालाय नमः॥२२॥ ॐ सं सर्वतत्त्वकमलासनाय नमः॥२३॥ ॐः प्रं प्रकृतिमयपत्रेभ्यो नमः ॥२४॥ ॐ विं विकारामयकेसरेभ्यो नमः ॥२५॥ ॐ पं पञ्चाशद्वर्णाढ्यकर्णिकाभ्यो नमः ॥ २६ ॥ ॐ आं अर्कमंडलाय द्वादशकलात्मने नमः ॥ २७ ॥ ॐ सों सोममण्डलाय षोडशकलात्मने नमः ॥ २८ ॥ ॐ वं वह्निमण्डलाय दशकलात्मने नमः ॥ २९ ॥ ॐ सं सत्त्वाय नमः ॥ ३० ॥ ॐ रं रजसे नमः ॥ ३१ ॥ ॐ तं तमसे नमः ॥ ३२ ॥ ॐ अं आत्मने नमः ॥ ३३ ॥ ॐ पं परमात्मने नमः ॥ ३४ ॥ ॐ ह्रीं ज्ञानात्मने नमः ॐ मं मायातत्त्वाय० ॥ ३५ ॥ ॐ कं कलातत्त्वाय० ॥ ३६ ॥ ॐ विं विद्यातत्त्वाय० ॥ ३७ ॥ ॐ पं परतत्त्वाय नमः ॥ .३८ ॥ एवं पीठदेवताः संपूज्य पीठशक्तीः प्रतिष्ठाप्य पूजयेत् । तत्राष्टदिक्षु मध्ये च क्रमेण ॐ तीव्रायै नमः ॥ १ ॥ ॐ चालिन्यै नमः ॥ २ ॥ ॐ नंदायै नमः ॥ ३ ॥ ॐ भोगदायै नमः ॥ ४ ॥ ॐ कामरूपिण्यै नमः ॥ ५ ॥ ॐ उग्रायै नमः ॥ ६ ॥ ॐ तेजोवत्यै नमः ॥ ७ ॥ ॐ सत्यायै नमः ॥ ८ ॥ ॐ विघ्ननाशिन्यै नमः ॥ ९ ॥ इति विनायकस्य सर्वमंत्राणामेताः पीठशक्तयो

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ज्ञेयाः । ततः ॐ गं सर्वशक्तिकमलासनाय नमः इति मंत्रेणासनं दत्त्वा तद्देशे ॐ वक्रतुंडाय हुम् इति मूलमंत्रेण मूर्तिं प्रकल्प्य तस्यां गणेशमावाह्य पूर्वोक्तपद्धतिमार्गेण षोडशोपचारैः संपूज्य ततः आवरणार्चनं कुर्यात् । तत्र क्रमः यंत्रोद्धारश्च-मध्ये षट्कोणमंडले आग्नेयादिकोणेषु क्रमेण ॐ वं हृदयाय नमः ॥ १ ॥ ॐ क्रं शिरसे स्वाहा ॥ २ ॥ ॐ तुं शिखायै वषट् ॥ ३ ॥ ॐ डां कवचाय हुम् ॥४॥ इत्यभ्यर्च्य स्वाग्रे ॐ यं नेत्रत्रयाय वौषट् ॥५॥ दिक्षु ॐ हुं अस्त्राय फट् ॥ ६ ॥ इति प्रथमावरणार्चनम् ॥ १ ॥ ततः पूर्वादिष्वष्टदलेषु क्रमेण ॐ विद्यादिमायै नमः ॥ १ ॥ ॐ विधात्र्यै नमः ॥ २ ॥ ॐ भोगदायै नमः ॥ ३ ॥ ॐ विघ्नघातिन्यै नमः ॥ ४ ॥ ॐ निधिप्रदीपायै नमः ॥ ५ ॥ ॐ पापघ्न्यै नमः ॥ ६ ॥ ॐ पुण्यायै नमः ॥ ७ ॥ ॐ शशिप्रभायै नमः ॥ ८ ॥ इति द्वितीयावरणम् ॥ २ ॥ ततो हलग्रेषु ॐ वक्रतुंडाय नमः ॥ १ ॥ ॐ एकदंष्ट्राय नमः ॥ २ ॥ ॐ महोदराय नमः ॥ ३ ॥ ॐ गजास्याय नमः ॥ ४ ॥ ॐ लंबोदराय नमः ॥ ५ ॥ ॐ विकटाय नमः ॥ ६ ॥ ॐ विघ्नराजाय नमः ॥ ७ ॥ ॐ धूम्रवर्णाय नमः ॥ ८ ॥ इति तृतीयावरणम् ॥ ३ ॥ ततो भूपुरे पूर्वादिक्रमेण [पूर्वे] ॐ लं इंद्राय नमः ॥१॥ [आग्नेय्याम्] ॐ रं अग्नये नमः ॥ २ ॥ [दक्षिणे] ॐ मं यमाय नमः ॥ ३ ॥ [नैर्ऋत्याम् ।] ॐ क्षं निर्ऋतये नमः ॥ ४ ॥ [पश्चिमे] ॐ वं वरुणाय नमः ॥ ५ ॥ [वायव्याम्] ॐ यं वायवे नमः ॥ ६ ॥ [उत्तरे] ॐ कुं कुबेराय नमः ॥ ७ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

[ऐशान्ये] ॐ हं ईशानाय नमः ॥ ८ ॥ [ईशानपूर्वयोर्मध्ये] ॐ अं ब्रह्मणे नमः ॥९॥ निर्ऋतिवरूणयोर्मध्ये ॐ अं अनंताय नमः ॥ १० ॥ इति चतुर्थावरणम् ॥ ४ ॥ पुनः पूर्वादिदिक्षु इन्द्रादिसमीपे ॐ वं वज्राय नमः ॥ १ ॥ ॐ शं शक्त्यै नमः ॥ २ ॥ ॐ दं दंडाय नमः ॥३॥ ॐ खं खड्गाय नमः ॥ ४ ॥ ॐ पां पाशाय नमः ॥ ५ ॥ ॐ अं अंकुशाय नमः ॥६॥ ॐ गं गदायै नमः ॥७॥ ॐ त्रिं त्रिशूलाय नमः ॥८॥ ॐ पं पद्माय नमः ॥९॥ ॐ चं चक्राय नमः ॥१०॥ इति पंच मावरणम् ॥५॥ एवं पंचावरणैर्गणनायकं संपूज्य षड्लक्षं मंत्रं जपेत्। ततो जपांते इक्षु १ सक्तु २ रंभाफल ३ चिपिट ४ तिल ५ मोदक ६ नारिकेल ७ लाजै ८ रित्यष्टभिर्द्रव्यैर्जपदशांशतो हुत्वा तद्दशां शेन तर्पणं तद्दशांशेन मार्जनं तद्दशांशेन शुद्धान् विप्रांश्च भोजयेत्। एवं कृते मंत्रः सिद्धो भवति। अनंतरं ततः सिद्धमंत्रेण स्वकामनार्थं प्रयोगान् कुर्यात्। तत्र प्रकारः। " ब्रह्मचर्यरतो मंत्री जपेद्द्विसह

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मकम् ॥ षण्मासमध्यादारिद्र्यं नाशयत्येव निश्चितम् ॥ १ ॥ चतुर्थ्यादिचतुर्थ्यंतं जपेदष्टशसहस्रकम् ॥ प्रत्यहं जुहुयादष्टोत्तरं शतमतंद्रितः ॥ २ ॥ पूर्वोक्तं फलमाप्नोति षण्मासाद्भक्तितत्परः ॥ आज्याक्तान्नस्य होमेन भवेद्धनसमृद्धिमान् ॥ ३ ॥ पृथुकै र्नारिकेलैर्वा मरिचैर्वा सहस्रकम् ॥ प्रत्यहं जुह्वतो मासाज्जायते धनसंचयः ॥ ४ ॥ जीरसिंधुमरीचाक्तैरष्टद्रव्यैः सहस्रकम् ॥ जुह्वन्प्र तिदिनं पक्षात्स्यात्कुबेर इवार्थवान् ॥ ५॥ चतुःशतं चतुश्चत्वारिंशदाद्यं दिनं प्रति ॥ तर्पयेन्मूलमंत्रेण मंडलादिष्टमाप्नुयात् ॥ ६ ॥ इति वक्रतुंडगणपतिमंत्रः प्रथमः ॥१॥ अथ गणपतेर्द्वितीयमंत्रोमंत्रमहोदधौ ॐ—"रायस्पोषस्यदादिता निंधिदो रत्नधातुमान् ॥ रक्षो हणोवलगहनो वक्रतुंडायहुम् ॥" एकत्रिंशद्वर्णयुक्तो मंत्रोभीष्टप्रदायकः ॥ अस्य ऋष्यादिन्यासांतं पूर्ववत् कृत्वा—ॐ रायस्पोषस्य हृदयाय नमः ॥ १ ॥ ॐ ददिता शिरसे स्वाहा ॥ २ ॥ ॐ निधिदो रत्नधातुमान् शिखायै वषट् ॥ ३ ॥ ॐ रक्षोहणो कवचाय हुम् ॥४॥ ॐ बलगहनो नेत्रत्रयाय वौषट् ॥५॥ ॐ वक्रतुंडाय हुम् अस्त्राय फट्॥६॥अन्यत्सर्व्वं पूर्ववत् ॥ इति गणपतेर्द्वितीयोमंत्रः॥२॥ अथोच्छिष्टगणपतिमंत्रप्रयोगस्तत्रैव ॥ 'ॐ हस्तिपिशाचिलिखे स्वाहा' इति नवाक्षरो मंत्रः ॥ अस्य श्रीउच्छिष्टगणेशमंत्रस्य कंकोलऋषिः—विराट् छन्दः—उच्छिष्टगणपतिर्देवता—अखिलाप्तये जपे विनियोगः ॥ ॐ कं कंकोलऋषये नमः शिरसि ॥ १ ॥ ॐ विराट्छन्दसे नमः मुखे ॥ २ ॥ ॐ उच्छिष्टगणपतिदेवतायै नमः हृदये ॥ ३ ॥ इति ऋष्यादिन्यासं कृत्वा हृदयादिन्यासं कुर्य्यात् ॥ ॐ हस्तिहृदयाय नमः ॥ १ ॥ ॐ पिशाचि शिरसे स्वाहा ॥ २ ॥ ॐ लिखे शिखायै वषट् ॥ ३ ॥ ॐ स्वाहा कवचाय हुम् ॥ ४ ॥ ॐ हस्तिपिशाचिलिखेस्वाहा ॥ अस्त्रायफट् ॥ ५ ॥ पंचांगे नेत्रहीनं कार्य्यम् ॥ इति पंचांगन्यासं कृत्वा ध्यायेत् ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

' चतुर्भुजं रक्ततनुं त्रिनेत्रं पाशांकुशौ मोदकपात्रदंतौ ॥ करैर्दधानं सरसीरुहस्थमुन्मत्तमुच्छिष्टगणेशमीडे ॥१॥ इति ध्यात्वा पूर्वोक्ते पीठे उच्छिष्टगणपतिं पूजयेत ' तत्र प्रथमावरणे पूर्ववत् हृदयाद्यंगानि संपूजयेत्॥१॥द्वितीयावरणे अष्टसु दिक्षु ॐ ब्राह्म्यै नमः॥१॥ ॐ माहेश्वर्यै नमः ॥ २ ॥ ॐ कौमार्यै नमः ॥ ३ ॥ ॐ वैष्णव्यै नमः ॥ ४ ॥ ॐ वाराह्यै नमः ॥ ५ ॥ ॐ इंद्राण्यै नमः ॥ ६ ॥ ॐ चामुण्डायै नमः ॥७॥ ॐ लक्ष्म्यै नमः ॥ ८ ॥ इति पूजयेत् ॥ २ ॥ तृतीयावरणे दशसु दिक्षु ॐ वक्रतुण्डाय नमः ॥१ ॥ ॐ एकदंष्ट्राय० ॥ २ ॥ ॐ लंबोदराय० ॥ ३ ॥ ॐ विकटाय० ॥ ४ ॥ ॐ धूम्रवर्णाय० ॥ ५ ॥ ॐ विघ्नराजाय० ॥ ६ ॥ ॐ गजाननाय० ॥ ७ ॥ ॐ विनायकाय० ॥ ८ ॥ ॐ गणपतये० ॥ ९ ॥ ॐ हस्तिंदताय० ॥१०॥ इति पूजयेत् ॥ ३ ॥ चतुर्थावरणे पूर्वादिषु दिक्षु पूर्ववदिंद्रादयो दशदिक्पालाः पूज्याः ॥ ४ ॥ पंचमावरणे वज्राद्यायुधानि पूजयेत् । एवं संपूज्य ॐ हस्तिपिशाचि लिखे स्वाहा इति लक्षमेकं मंत्रान् जपेत् ॥ ततो जपान्ते जपदशांशतस्तिलहोमं कृत्वा तद्दशांशेन तर्पणं तद्दशांशेन मार्जनं तद्दशांशेन विप्रांश्च भोजयेत् ॥ एवं सिद्धे मंत्रे काम्यान्प्रयोगान्मंत्री साधयेत् । तत्प्रकारोपि तत्रैव । स्वांगुष्ठप्रमाणां रक्तचन्दनेन श्वेतार्केण वा गणेशप्रतिमां रम्यामुक्तलक्षणलक्षितां कृत्वा विधानेन प्रतिष्ठाप्य नित्यं मधुना तां संस्नाप्य कृष्णचतुर्दशीमारभ्य शुक्लचतुर्दशीपर्यन्तं सगुडं पायसं प्रत्यहं निवेद्य प्रत्यहं सहस्रं मन्त्रान् जपेत् । जपांते प्रत्यहं तावत् सघृततिलाहुतिं दद्यात् ॥ गणेशोहमिति ध्यायन्नुच्छिष्टेनाऽऽवृतो रहः ॥ पक्षाद्राज्यमवाप्नोति नृपजोऽन्योपि वा नरः ॥१॥ कुलालमृत्स्नाप्रतिमा पूजितैवं सुराज्यदा ॥ वल्मीकमृत्कृता लाभमेवमिष्टा प्रयच्छति ॥ २ ॥ गौडी सौभाग्यदा सैवं लावणी क्षोभयेदरीन् ॥ निंबजा नाशयेच्छत्रून् प्रतिमैयं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

समर्चिता ॥ ३ ॥ मध्वक्तैर्होमतो लाजैर्वशयेदखिलं जगत् ॥ सुप्तोधिशय्यमुच्छिष्टो जपञ्छत्रून् वशं नयेत् ॥ ४ ॥ कटुतैलान्वितै राजीपुष्पैर्विद्वेषयेदरीन् ॥ द्यूते विवादे समरे युक्तोयं जयमावहेत् ॥ ५ ॥ कुबेराख्यमनोर्जापान्निधीनां स्वामितामियात् ॥ लेभाते राज्यमनरि वानरेशविभीषणौ ॥ ६ ॥ रक्तवस्त्रांगरागाद्यस्तांबूलं निश्यदञ्जपेत् ॥ यद्वा निवेदितं तस्मै मोदकं भक्षयञ्जपेत् ॥ ७ ॥ पिशितं वा फलं वापितेनतेन बलिं हरेत् ॥ बलिमंत्रोपि तत्रैव–ॐ गं हं क्रौं ग्लौं उच्छिष्टगणेशाय महायक्षायायं बलिः इत्येको नविंशतिवर्णात्मको बलिमन्त्रः ॥ इति उच्छिष्टगणपतिमंत्रविधानम् ॥ अथोच्छिष्टगणपतिमंत्रो द्वितीयोपि तत्रैव ॥ ॐ नमो भगवते एकदंष्ट्राय हस्तिमुखाय लंबोदराय उच्छिष्टमहात्मने आँ क्रों ह्रीं गँ घे घे स्वाहा इति सप्तत्रिंशदक्षरोमंत्रः ॥ अस्य मन्त्रस्य गणक ऋषिः–गायत्रीछन्दः–उच्छिष्टगणपतिर्देवता–अखिलाप्तये जपे विनियोगः ॥ ॐ गणकऋषये नमः शिरसि ॥ १ ॥ ॐ गायत्री छन्दसे नमो मुखे ॥ २ ॥ ॐ उच्छिष्टगणपतिदेवतायै नमः हृदये ॥ ३ ॥ इति ऋष्यादिन्यासः ॥ अथ षडंगन्यासः ॥ ॐ नमो भगवते हृदयाय नमः ॥ १ ॥ ॐ एकदंष्ट्राय हस्तिमुखाय शिरसे स्वाहा ॥ २ ॥ ॐ लंबोदराय शिखायै वषट् ॥ ३ ॥ ॐ उच्छिष्ट महात्मने कवचाय हुम् ॥ ४ ॥ ॐ आं क्रों ह्रीं गं नेत्रत्रयाय वौषट् ॥ ५ ॥ ॐ घे घे स्वाहा अस्त्राय फट् ॥ ६ ॥ इति षडंगं कृत्वा ध्यायेत् ॥ शरान्धनुः पाशसृणी स्वहस्तैर्दधानमारक्तसरोरुहस्थम् ॥ विवस्त्रपत्न्यां सुरतप्रवृत्तमुच्छिष्टमम्बासुतमाश्रयेहम् ॥ १ ॥ इति ध्यात्वा पूर्वोक्ते पीठे गणपतिं संपूज्य पूर्ववल्लक्षावृत्त्या मंत्रं जपेत् । ततो जपांते घृतेन दशांशहोमादिपुरश्चरणं समाप्य स्वाभीष्ट सिद्धये वक्ष्यमाणविधानं कुर्य्यात् । तदुक्तं मन्त्रमहोदधौ–कृष्णाष्टम्यादिकृष्णचतुर्दशीपर्य्यंतं प्रत्यहमष्टोत्तरसहस्रं जप्त्वा तदशां

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

शेन घृतं हुत्वा तर्पयेत् । एवं कृतो हि मन्त्रोयं सर्वार्थसिद्धिं प्रयच्छति ॥ धनं धान्यं सुतान्पौत्रान्सौभाग्यमतुलं यशः ॥ मूर्तिं कुर्य्याद्गणेशस्य शुभाहे निम्बदारुणा ॥ १ ॥ प्राणप्रतिष्ठां कृत्वाथ तदग्रे मन्त्रमाजपेत् ॥ यं ध्यात्वा दासवत्सोपि वश्यो भवति निश्चितम् ॥ २ ॥ नदीजलं समादाय सप्तविंशतिसंख्यया ॥ मन्त्रयित्वा मुखे तेन प्रक्षाल्येशसभां व्रजेत् ॥ ३ ॥ पश्येद्यं दृश्यते येन स वश्यो जायते क्षणात् ॥ चतुःसहस्रधत्तूरपुष्पाणि मनुनार्पयेत् ॥ ४ ॥ गणेशाय नृपादीनां जनानां वश्यता कृते ॥ सुन्दरी वामपादस्य रेणुमादाय तत्र तु ॥ ५ ॥ संस्थाप्य गणनाथस्य प्रतिमां व्रजपेन्मनुम् ॥ तां ध्यात्वा रविसाहस्रं सा समायाति दूरतः ॥ ६ ॥ श्वेतार्केणाथ निंबेन कृत्वा मूर्तिं धृतांशुकाम् ॥ चतुर्थ्यां पूजयेद्रात्रौ रक्तैः कुसुमचन्दनैः ॥ ७ ॥ जप्त्वा सहस्रं तां मूर्तिं क्षिपेद्रात्रौ सरित्तटे ॥ स्वेष्टं कार्य्यं समाचष्टे स्वप्ने तस्य गणाधिपः ॥ ८ ॥ सहस्रं निंबकाष्ठानां होमादुच्चाट्येदरीन् ॥ वह्निणः समिधा होमाद्रिपुर्य्यमपुरं व्रजेत् ॥ ९ ॥ वानरस्यास्थि संजप्तं क्षिप्तमुच्चाट्येद्गृहे ॥ जप्तं नरास्थि कन्याया गृहे क्षिप्तं तदातिकृत् ॥ १० ॥ कुलालस्य मृदा स्त्रीणां वामपादस्य रेणुना ॥ कृत्वा पुत्तलिकां तस्या हृदि स्त्रीनाम संलिखेत् ॥११॥ निखनेन्मंत्रसंजप्तैर्निम्बकाष्ठैः क्षितावियाम् ॥ सोन्मत्ता भवति क्षिप्रमुद्धृतायां सुखं भवेत् ॥१२॥ शत्रावेवं कृता सा तु लशुनेन समन्विता ॥ १३ ॥ शरावान्तर्गता सम्यक् पूजिता द्वारि विद्विषः ॥ निखाता पक्षमात्रेण शत्रूच्चाटनकृत्स्मृता ॥ १४ ॥ विषमे समनुप्राप्ते सितार्कनिंबदारुजम् ॥ गणपं पूजितं सम्यक् कुसुमैरक्तचंदनैः ॥ १५ ॥ मद्यभाण्डस्थितं हस्तमात्रे तं निखनेत्स्थले ॥ तत्रोपविश्य प्रजपेन्मंत्री नक्तं दिवा मनुम् ॥ १६ ॥ सप्ताहमध्ये नश्यंति सर्वे घोरा उपद्रवाः ॥ शत्रवो वशतां

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यान्ति वर्द्धन्ते धनसंपदः ॥ १७ ॥ दुष्टस्त्रीवामपादस्य रजसा निजदेहजैः ॥ मलैर्मूत्रपुरीषाद्यैः कुंभकारमृदापि च ॥ १८ ॥ एतैः कृत्वा गणेशस्य प्रतिमां मद्यभांडगाम् ॥ संपूज्य निखनेद्भूमौ हस्तार्द्धे पूरिते पुनः ॥ १९ ॥ संस्थाप्य वह्नौ जुहुयात् कुसुमैर्हयमारजैः ॥ सहस्रं सा भवेद्दासी तत्त्वाचमनसाधनैः ॥ २० ॥ एवमादिप्रयोगाणां नवार्णेनापि साधयेत् ॥ इति उच्छिष्टगणपतिमंत्रो द्वितीयः ॥ अथ उच्छिष्टगणपतिमंत्रस्तृतीयोपि तत्रैव ॥ तद्यथा—ॐ हस्तिमुखाय लम्बोदराय उच्छिष्टमहात्मने आंक्रोंह्रींक्लींह्रींहूंघेघेउच्छिष्टाय स्वाहा ॥ अस्य मंत्रस्य ऋष्यादिन्यासं पूर्वमंत्रवत् कृत्वा मूलमंत्रेण करन्यासं षडंगन्यासं च कुर्यात् ॥ अथ षडंगन्यासः ॥ ॐ हस्तिमुखाय हृदयाय नमः ॥ १ ॥ ॐ लम्बोदराय शिरसे स्वाहा ॥ २ ॥ ॐ उच्छिष्टमहात्मने शिखायै वषट् ॥ ३ ॥ आं क्रोंह्रींक्लींह्रींहूंकवचाय हुम् ॥४॥ ॐ घघे उच्छिष्टाय नेत्रत्रयाय वौषट् ॥५॥ ॐ स्वाहा अस्त्राय फट्॥६॥ एवं षडंगन्यासं कुर्यात्॥ अन्यत् सर्वं पूर्ववज्ज्ञेयम् । उच्छिष्टगजवक्त्रस्य मंत्रेष्वेषु न शोधनम् ॥ सिद्धादिचक्रं मासादेः प्राप्तास्ते सिद्धिदा गुरोः ॥ १ ॥ मनवोऽमी सदा गोप्या न प्रकाश्या यतस्ततः ॥ परीक्षिताय शिष्याय प्रदेया निजसूनवे ॥ २ ॥ अथ लक्ष्मीविनायकमंत्रप्रयोगः मंत्रमहोदधौ—"ॐ श्रीं गं सौम्याय गणपतये वरवरद सर्वजनं मे वशमानय स्वाहा" इत्यष्टाविंशतिवर्णो लक्ष्मीविनायकमंत्रः ॥ अस्य लक्ष्मीविनायकमंत्रस्य—अन्तर्यामी ऋषिर्गायत्री छंदः—लक्ष्मीविनायको देवता—श्रीबीजम् स्वाहा शक्तिः—ममाभीष्टसिद्ध्यर्थे जपे विनियोगः ॥ ॐ अन्तर्यामिऋषये नमः शिरसि ॥ १ ॥ ॐ गायत्रीछंदसे नमः मुखे ॥ २ ॥ ॐ लक्ष्मीविनायकदेवतायै नमः हृदये ॥ ३ ॥ ॐ श्रीबीजाय नमो गुह्ये ॥ ४ ॥ ॐ स्वाहाशक्तये नमः पादयोः ॥ ५ ॥ इति

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ऋष्यादिन्यासः ॥ अथ षडंगन्यासः । ॐ श्रां गाँ हृदयाय नमः ॥ १ ॥ ॐ श्रीं गीं शिरसे स्वाहा ॥ २ ॥ ॐ श्रूं गूँ शिखायै वषट् ॥ ३ ॥ ॐ श्र ग कवचाय हुम् ॥ ४ ॥ ॐ श्रौं गौं नेत्रत्रयाय वौषट् ॥ ५ ॥ ॐ श्रः गँ अस्त्राय फट् ॥ ६ ॥ इति षडंगं कृत्वा ध्यायेत् ॥ अथ ध्यानम् ॥ दंताभये चक्रवरौ दधानं कराग्रगं स्वर्णघटं त्रिनेत्रम् ॥ धृताब्जयालिंगितम ब्धिपुत्र्या लक्ष्मीगणेशं कनकाभमीडे ॥ १ ॥ इति ध्यात्वा पूर्वोक्ते पीठे लक्ष्मीगणेशं संपूज्य मध्ये षट्कोणमंडले पूर्ववत् हृदयाद्यंगानि संपूज्य अष्टदलेषु ॐ बलायै नमः ॥ १ ॥ ॐ विमलायै नमः ॥ २ ॥ ॐ कमलायै नमः ॥ ३ ॥ ॐ वनमा लिकायै नमः ॥४॥ ॐ बिभीषिकायै नमः ॥ ५ ॥ ॐ मालिकायै नमः ॥ ६ ॥ ॐ शाङ्ग्यै नमः ॥ ७ ॥ ॐ वसुमालिकायै नमः ॥ ॥ ८ ॥ इत्यष्टौ शक्तीः संपूज्य तत्रैव दक्षिणपार्श्वे ॐ शंखाय नमः ॥ १ ॥ वामपार्श्वे ॐ पद्मनिधये नमः ॥ २ ॥ इति पूजयेत् । ततो भूपुरे पूर्वादिदिक्षु इंद्रादिलोकपालान् तद्बहिरस्त्राणि च पूर्ववत्पूजयेत् । ततश्चतुर्लक्षावृत्त्या मंत्रं जप्त्वा तद्दशांशेन बिल्व वृक्षसमिद्भिर्होमं कृत्वा तद्दशांशतस्तर्पणं तद्दशांशेन मार्ज्जनं तद्दशांशेन विप्रांश्च भोजयेत् ॥ एवं सिद्धे मनौ मंत्री प्रयोगान्कर्तुम र्हति । ऊरुमात्रे जले स्थित्वा मंत्री ध्यात्वार्कमण्डले ॥ १ ॥ एवं त्रिलक्षं जपतो धनवृद्धिः प्रजायते ॥ बिल्वमूलं समास्थाय ताव ज्जप्ते फलं हि तत् ॥ २ ॥ अशोककाष्ठैर्ज्वलिते वह्नावाज्याक्ततण्डुलैः ॥ होमतो वशयेद्विश्वमर्ककाष्ठे शुचावपि ॥ ३ ॥ खदि राग्नौ नरपतिं लक्ष्मीं पायसहोमतः ॥ इति लक्ष्मीविनायकप्रयोगः ॥ अथ त्रैलोक्यमोहनगणपतिप्रयोगः मंत्रमहोदधौ—ॐ वक्र तुंडैकदष्ट्राय क्लीं ह्रीं श्रीं गं गणपते वरवरद सर्वजनं मे वशमानय स्वाहा इति त्रयस्त्रिंशद्वर्णात्मको मंत्रः । अस्य त्रैलोक्यमोहन

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

करगणेशमंत्रस्य-गणक ऋषिः-गायत्री छंदः-त्रैलोक्यमोहनकरो गणेशो देवता-ममाभीष्टसिद्ध्यर्थं जपे विनियोगः । ऋष्यादिन्या
सं कृत्वा षडंगं कुर्यात् । अथ षडंगन्यासः ॥ ॐ वक्रतुंडैकदष्ट्राय क्लीं ह्रीं श्रीं गं हृदयाय नमः ॥ १ ॥ गणपतये शिरसे स्वाहा ॥२॥
वरवरद शिखायै वषट् ॥३॥ सर्वजनं कवचाय हुम्॥४॥ मे वशमानय नेत्रत्रयाय वौषट्॥५॥ स्वाहा अस्त्राय फट्॥६॥इति षडङ्गन्यासं
कृत्वा ध्यायेत् । गदाबीजपूरे धनुः शूलचक्रे सरोजोत्पले पाशधीन्याश्र? दन्तान् ॥ करैः संदधानं स्वशुंडाग्रराजन्मणीकुम्भमङ्का
धिरूढं स्वपत्न्या॥ सरोजन्मना भूषणानां भरेणोज्ज्वलद्धस्ततन्व्या समालिङ्गिताङ्गम् ॥ करीन्द्राननं चन्द्रचूडं त्रिनेत्रं जगन्मोहनं
रक्तकान्ति भजे तम् ॥ १ ॥ एवं ध्यात्वा पूर्वोदिते पीठे गणनायकं संपूज्य आवरणपूजां कुर्यात् । तत्र मध्ये षट्कोणमंडले पूर्व
वत् हृदयादीनि संपूज्य अष्टदलेषु ॐ वामायै नमः ॥ १ ॥ ॐ ज्येष्ठायैनमः ॥ २ ॥ ॐ रौद्र्य नमः ॥ ३ ॥ ॐ काल्यै नमः
॥ ४ ॥ कलविकरिण्यै नमः ॥ ५ ॥ ॐ बलप्रमथिन्यै नमः ॥ ६ ॥ ॐ सर्वभूतदमन्यै नमः ॥ ७ ॥ ॐ मनोन्मन्यै नमः ॥ ८ ॥
ततः पूर्वादिचतुर्दिक्षु पूर्वे ॐ प्रमोदाय नमः ॥ १ ॥ दक्षिणे ॐ सुमुखाय नमः ॥ २ ॥ पश्चिमे ॐ दुर्मुखाय नमः ॥ ३ ॥ उत्तरे
ॐ विघ्ननाशकाय नमः ॥ ४ ॥ ततो दलाग्रेषु ॐ आं ब्राह्म्यै नमः ॥ १ ॥ ॐ ईं माहेश्वर्यै नमः ॥ २ ॥ ॐ ऊँ कौमार्यै नमः ॥३॥ ॐ ऋं
वैष्णव्यै नमः ॥ ४ ॥ ॐ लृं वाराह्यै नमः ॥ ५ ॥ ॐ ऐं इंद्राण्यै नमः ॥६॥ ॐ औं चामुंडायै नमः ॥७॥ ॐ अः लक्ष्म्यै नमः ॥ ८ ॥
इति मातृः संपूज्य भूपुरे पूर्वादिषु पूर्ववत् इन्द्रादिदश दिक्पालान् तद्बहिः तदायुधान्यपि च पूजयेत्।एवमावरणपूजां कृत्वा चतुर्लक्षं वारं
मंत्रं जप्त्वा तद्दशांशेन पूर्वोक्तैरष्टद्रव्यैर्हुत्वा तत्तद्दशांशेन तर्पणमार्जनब्राह्मणभोजनरूपकर्म कुर्यात् ॥ एवं सिद्धे मंत्रे स्वेष्टप्रयोगान्

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

साधयेत् ॥ वशयेत्कमलैर्भूपान्मन्त्रिणः कमुदैर्हुतैः ॥ समिद्भरैश्चलदलसमुद्भूतैर्द्धरासुरान्॥ १॥उदुंबरोत्थैर्नृपतीन्पुक्षैर्वाटैर्विशोन्तिमान्॥ क्षौद्रेण कनकप्राप्तिर्गोप्राप्तिः पयसा गवाम् ॥ २ ॥ ऋद्धिर्दध्योदनैरन्नं घृतैः श्रीर्वेतसैर्जलम् ॥ अथ हरिद्रागणपतिप्रयोगः ॥ ॐ हुं गं ग्लौं हरिद्रागणपतये वरवरद सर्वजनहृदयं स्तंभय स्तंभय स्वाहा ॥ ३२ ॥ अस्य हरिद्रागणनायकमंत्रस्य मदन–ऋषिः–अनुष्टुप्छन्दः–हरिद्रागणनायको देवता–ममाभीष्टसिद्ध्यर्थं जपे विनियोगः ॥ ॐ मदनऋषये नमः शिरसि ॥ १ ॥ ॐ अनुष्टुप्छंदसे नमः मुखे ॥ २ ॥ ॐ हरिद्रागणनायकदेवतायै नमः हृदये ॥ ३ ॥ ॐ हुं गं ग्लौं अंगुष्ठाभ्यां नमः ॥ १ ॥ ॐ हरिद्रागणपतये तर्जनीभ्यां नमः ॥२॥ ॐ वरवरद मध्यमाभ्यां नमः ॥ ३ ॥ ॐ सर्वजनहृदयम् अनामिकाभ्यां नमः ॥ ४ ॥ ॐ स्तंभयस्तंभय कनिष्ठिकाभ्यां नमः ॥ ५ ॥ ॐ स्वाहा करतलकरपृष्ठाभ्यां नमः ॥ ६ ॥ इति करन्यासः ॥ अथ हृदयादिषडंगन्यासः ॥ ॐ हुं गं ग्लौं हृदयाय नमः ॥ १ ॥ ॐ हरिद्रागणपतये शिरसे स्वाहा ॥ २ ॥ ॐ वरवरद शिखायै वषट् ॥ ३ ॥ ॐ सर्वजनहृदयं कवचाय हुम् ॥ ४ ॥ ॐ स्तंभयस्तंभय नेत्रत्रयाय वौषट् ॥ ५ ॥ ॐ स्वाहा अस्त्राय फट् ॥ ६ ॥ इति षडंगन्यासं कृत्वा ध्यायेत् ॥ पाशांकुशौ मोदकमेकदंतं करैर्दधानं कनकासनस्थम् ॥ हारिद्रखण्डप्रतिमं त्रिनेत्रं पीतांशुकं रात्रिगणेशमीडे ॥ १॥ इति ध्यात्वा पूर्वोक्ते पीठे संपूज्य पूर्ववत् आवरणपूजां कृत्वा चतुर्लक्षं वारं मंत्रं जप्त्वा जपान्ते हरिद्रामिश्रितैस्तंडुलैर्दशांशहोमं कृत्वा तत्तद्दशांशेन तर्पणमार्जनब्राह्मणभोजनानि कुर्य्यात् ॥ एवमाराधितो मंत्रः सिद्धो यच्छेन्मनोरथान् ॥ शुक्लपक्षे चतुर्थ्यां तु कन्यापिष्टहारिद्रया ॥ १ ॥ बिलिप्यांगं जले स्नात्वा पूजयेद्गणनायकम् ॥ तर्पयित्वा पुरस्तस्य सहस्रं साष्टकं जपेत् ॥ २ ॥ शतं हुत्वा

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

साज्यापूपैर्भोजयेद्ब्रह्मचारिणः ॥ कुमारीरपि संतोष्य गुरुं प्राप्नोति वांछितम् ॥ ३ ॥ लाजैः कन्यामवाप्नोति कन्यापि लभते वरम् ॥ वंध्या नारी रजःस्नाता पूजयित्वा गणाधिपम् ॥४॥ पलप्रमाणगोमूत्रे पिष्टाः सिंधुवचानिशाः ॥ सहस्रं मंत्रयेत्कन्या वटून संभोज्य मोदकैः ॥ ५ ॥ पीत्वा तदौषधं पुत्रं लभते गुणसागरम् ॥ वाणीस्तंभं रिपुस्तंभं कुर्य्यान्मनुरुपासितः ॥ ६ ॥ जलाग्निचौरसिंहास्त्रप्रमुखानपि रोधयेत् ॥ प्रोक्ता एते गणेशस्य मंत्रा इष्टमभीप्सता ॥ ७ ॥ गोपनीया न दुष्टेभ्यो वदनीयाः कथं चन ॥ इति मंत्रमहोदधौ हरिद्रागणपतिमंत्रविधानं समाप्तम् ॥ ॥ अथ उच्छिष्टगणपतिकवचम् ॥ उक्तं च रुद्रयामले ॥ देव्युवाच ॥ देव देव जगन्नाथ सृष्टिस्थितिलयात्मक ॥ विना ध्यानं विना मंत्रं विना होमं विना जपम् ॥ १ ॥ यस्य स्मरणमात्रेण लभ्यते शीघ्रचिंतितम् ॥ तदेव श्रोतुमिच्छामि कथयस्व जगत्प्रभो ॥ २ ॥ ईश्वर उवाच ॥ शृणु देवि प्रवक्ष्यामि गुह्याद्गुह्यतरं महत् ॥ उच्छिष्टगणनाथस्य कवचं सर्वसिद्धिदम् ॥ ३ ॥ अल्पायासैर्विना कष्टैर्जपमात्रेण सिद्धिदम् ॥ राकांते निर्जनेरण्ये गह्वरे च रणांगणे ॥ ४ ॥ सिंधुतीरे च गांगीये कूले वृक्षतले जले ॥ सर्वदेवालये तीर्थे लब्ध्वा सम्यक् जपं चरेत् ॥५॥ स्नानशौचादिकं नास्ति नास्ति निर्बंधनं प्रिये ॥ दारिद्र्यांतकरं शीघ्रं सर्वतत्त्वं जनप्रिये ॥६॥ सहस्रशपथं कृत्वा यदि स्नेहोस्ति मां प्रति ॥ निंदकाय कुशिष्याय खलाय कुटिलाय च ॥७॥ दुष्टाय परशिष्याय घातकाय शठाय च ॥ वंचकाय वरघ्राय ब्राह्मणीगमनाय च ॥ ८ ॥ अशक्ताय च क्रूराय गुरुद्रोहरताय च ॥ न दातव्यं न दातव्यं न दातव्यं कदा चन ॥ ९ ॥ गुरुभक्ताय दातव्यं सच्छिष्याय विशेषतः ॥ तेषां सिध्यंति शीघ्रेण ह्यन्यथा न च सिध्यति ॥१०॥ गुरुसंतोषमात्रेण कलौ प्रत्यक्षसिद्धिदम्॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

देहोच्छिष्टैः प्रजप्तव्यं तथोच्छिष्टैर्महामनुम् ॥११॥ आकाशे च फलं प्राप्तं नान्यथा वचनं मम ॥ एषा राजवती विद्या विना पुण्यं न लभ्यते ॥१२॥ अथ वक्ष्यामि देवेशि कवचं मंत्रपूर्वकम्॥यस्य विज्ञानमात्रेण राजभोगफलप्रदम् ॥१३॥ कवचम्—ऋषिर्मे गणकः पातु शिरश्चैव च निरंतरम् ॥ त्राहि मां देवी गायत्री ऋषि श्छन्दः सदा मुखे ॥१४॥ हृदये पातु मां नित्यमुच्छिष्टगणदेवता ॥ गुह्ये रक्षतु तद्बीजं स्वाहाशक्तिश्च पादयोः ॥ १५ ॥ कामकीलकसर्वांगे विनियोगश्च सर्वदा ॥ पार्श्वद्वये सदा पातु स्वशक्तिं गणनायकः ॥ १६ ॥ शिखायां पातु तद्बीजं भ्रूमध्ये तारबीजकम् ॥ हस्तिवक्त्राय शिरसि लंबोदर ललाटके ॥ १७ ॥ उच्छिष्टो नेत्रयोः पातु कर्णे पातु महात्मने ॥ पाशांकुशमहाबीजं नासिकायां च रक्षतु ॥ १८ ॥ भूतीश्वरः परां पातु आस्यं जिह्वां स्वयं वपुः ॥ तद्बीजं पातु मां नित्यं ग्रीवायां कंठदेशके ॥ १९ ॥ गंबीजं च तथा रक्षेत्तथा त्वग्रे च पृष्ठके ॥ सर्वकामश्च हृत् पातु पातु मां च करद्वये ॥ २० ॥ उच्छिष्टाय च हृदये वह्निबीजं तथोदरे ॥ मायाबीजं तथा कट्यां द्वावूरू सिद्धिदायकः ॥ २१ ॥ जंघायां गणनाथश्च पादौ पातु विनायकः ॥ शिरसः पादपर्यंतमुच्छिष्टगणनायकः ॥ २२ ॥ आपादमस्तकांतं च उमापुत्रश्च पातुमाम् ॥ दिशोष्टौ च तथाकाशे पाताले विदिशोष्टके ॥२३॥ अहर्निशं च मां पातु मदचंचललोचनः ॥ जलेनले च संग्रामे दुष्टकारागृहे वने ॥२४॥ राजद्वारपथे घोरे पातु मां गणनायकः ॥ इदं तु कवचं गुह्यं मम वक्त्राद्विनिर्गतम् ॥ २५ ॥ त्रलोक्ये सततं पातु द्विभुजश्च चतुर्भुजः ॥ बाह्यमाभ्यंतरं पातु सिद्धिबुद्धिविनायकः ॥ २६ ॥ सर्वसिद्धिप्रदं देवि कवचं त्वृद्धिसिद्धिदम् ॥ एकांते प्रजपेन्मंत्रं कवचं युक्तिसंयुतम् ॥ २७ ॥ इदं रहस्यं कवचमौच्छिष्टगणनायकम् ॥ सर्वकर्म्मसु देवेशि इदं कवचनायकम् ॥ २८ ॥ एतत्कवचमा

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

माहात्म्यं वर्णितुं नैव शक्यते ॥ धर्मार्थकाममोक्षं च नानाफलप्रदं नृणाम् ॥ २९ ॥ शिवपुत्रः सदा पातु पातु मां च सुरार्चितः ॥ गजाननः सदा पातु गणराजश्च पातु माम् ॥३०॥ सदाशक्तिरतः पातु पातु मां कामविह्वलः ॥ सर्वाभरणभूषाढ्यः पातु मां सिंदूरार्चितः ॥ ३१ ॥ पंचमोदकरः पातु पातु मां पार्वतीसुतः ॥ पांशाकुशधरः पातु पातु मां च धनेश्वरः ॥३२॥ गदाधरः सदा पातु पातु मां काममोहितः ॥ नग्ननारीरतः पातु पातु मां च गणेश्वरः ॥ ३३ ॥ अतर्क्यवरदः पातु शक्तियुक्तः सदावतु ॥ भालचंद्रः सदा पातु नानारत्नविभूषितः ॥३४॥ उच्छिष्टगणनाथश्च मदाघूर्णितलोचनः ॥ नारीयोनिरसास्वादः पातु मां गजकर्णकः ॥३५॥ प्रसन्नवदनः पातु पातु मां भगवल्लभः ॥ जटाधरः सदा पातु पातु मां च किरीटिकः ॥ ३६ ॥ पद्मासनस्थितः पातु रक्तवर्णश्च पातु माम् ॥ नग्नसामपदोन्मत्तः पातु मां गणदैवताम् ॥३७॥ वामांगे सुंदरीयुक्तः पातु मां मन्मथः प्रभुः ॥ क्षेत्रपः पिशितं पातु पातु मां श्रुतिपाठकः ॥ ३८ ॥ भूषणाढ्यस्तु मां पातु नानाभोगसमन्वितः ॥ स्मिताननः सदा पातु श्रीगणेशकुलान्वितः ॥ ३९ ॥ श्रीरक्तचंदनमयः सुलक्षणगणेश्वरः ॥ श्वेतार्कगणनाथश्च हरिद्रागणनायकः ॥ ४० ॥ पारिभद्रगणेशश्च पातु सप्तगणेश्वरः ॥ प्रवालकगणाध्यक्षो गजदंतो गणेश्वरः ॥ ४१ ॥ हरबीजगणेशश्च भद्राक्षगणनायकः ॥ दिव्यौषधीसमुद्भूतो गणेशश्चिंतितप्रदः ॥ ४२ ॥ लवणस्य गणाध्यक्षो मृत्तिकागणनायकः ॥ तंडुलाक्षगणाध्यक्षोप्रवालाक्षगणेश्वरः ॥४३॥ स्फटिकाक्षगणाध्यक्षो रुद्राक्षगणदैवतः॥ नवरत्नगणेशश्च आदिदेवो गणेश्वरः ॥ ४४ ॥ पंचाननश्चतुर्वक्त्रो षडाननगणेश्वरः॥ मयूरवाहनः पातु पातु मां मूषकासनः ॥ ४५ ॥ पातु मां देवदेवेशः पातु मामृषिपूजितः॥पातु मां सर्वदा देवो देवदानवपूजितः॥४६॥ त्रैलोक्यपूजितो देवः पातु मां च विभुः प्रभुः॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

रंगस्थं च सदा पातु सागरस्थं सदावतु ॥ ४७ ॥ भूमिष्ठं च सदा पातु पातालस्थं सदावतु ॥ अंतरिक्षे सदा पातु आकाशस्थं सदा वतु ॥ ४८ ॥ चतुष्पथे सदा पातु त्रिपथस्थं च पाहि माम् ॥ बिल्वस्थं च वनस्थं च पाहि मां सर्वतस्तनम् ॥ ४९ ॥ राजद्वारस्थितं पातु पातु मां शीघ्रसिद्धिदः ॥ भवानीपूजितः पातु ब्रह्मविष्णुशिवार्चितः ॥ ५० ॥ इदं तु कवचं देवि पठनात्सर्वसिद्धिदम् ॥ उच्छिष्टगणनाथस्य समंत्रं कवचं परम् ॥ ५१ ॥ स्मरणाद्भूभुजत्वं च लभ्यते सांगकं ध्रुवम् ॥ वाचा सिद्धिकरं शीघ्रं परसैन्यविदारणम् ॥ ५२ ॥ प्रातर्मध्याह्नसायाह्ने दिवा रात्रौ पठेन्नरः ॥ चतुर्थ्यां दिवसे रात्रौ पूजने मान दायकम् ॥ ५३ ॥ सर्वसौभाग्यदं शीघ्रं दारिद्र्यार्णवघातकम् ॥ सुदारासु प्रजासौख्यं सर्वसिद्धिकरं नृणाम् ॥ ५४ ॥ जलेथवानले रण्ये सिंधुतीरे सरित्तटे ॥ श्मशाने दूरदेशे च रणे पर्वतगह्वरे ॥ ५५ ॥ राजद्वारे भये घोरे निर्भयो जायते ध्रुवम् ॥ सागरे च महा शीते दुर्भिक्षे दुष्टसंकटे ॥ ५६ ॥ भूतप्रेतपिशाचादियक्षराक्षसजे भये ॥ राक्षसीयक्षिणीक्रूराशाकिनीडाकिनीगणाः ॥ ५७ ॥ राजमृत्युहरं देवि कवचं कामधेनुवत् ॥ अनंतफलदं देवि मतिं मोक्षं च पार्वति ॥ ५८ ॥ कवचेन विना मन्त्रं यो जपेद्गणनायकम् ॥ इह जन्मनि पापिष्ठो जन्मांते मूषको भवेत् ॥ ५९ ॥ इति परमरहस्यं देवदेवार्चनं च कवचपरमदिव्यं पार्वतीपुत्ररूपम् ॥ पठति परमभोगैश्वर्यमोक्षप्रदं च लभति सकलसौख्यं शक्तिपुत्रप्रसादात् ॥ ६० ॥ इति श्रीरुद्रयामलतंत्रे उमामहेश्वरसंवादे उच्छिष्टगणेश कवचं समाप्तम् ॥ शुभमस्तु ॥ अथ हरिद्रागणेशकवचम् ॥ ईश्वर उवाच ॥ शृणु वक्ष्यामि कवचं सर्वसिद्धिकरं प्रिये ॥ पठित्वा पाठयित्वा च मुच्यते सर्वसंकटात् ॥ १ ॥ अज्ञात्वा कवचं देवि गणेशस्य मनुं जपेत् ॥ सिद्धिर्न जायते तस्य कल्पको

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

टिशतैरपि ॥ २ ॥ ॐ आमोदश्च शिरः पातु प्रमोदश्च शिखोपरि ॥ संमोदो भ्रूयुगे पातु भ्रूमध्ये च गणाधिपः ॥ ३ ॥ गणक्रीड श्चक्षियुगं नासायां गणनायकः ॥ गजक्रीडाचितः पातु वदने सर्वसिद्धये ॥ ४ ॥ जिह्वायां सुमुखः पातु ग्रीवायां दुर्मुखः सदा ॥ विघ्नेशो हृदये पातु विघ्ननाशश्च वक्षसि ॥ ५ ॥ गणानां नायकः पातु बाहुयुग्मे सदा मम ॥ विघ्नकर्ता च उदरे विघ्नहर्ता च लिंगके ॥ ६ ॥ गजवक्त्रः कटौ देशे एकदंतो नितंबके ॥ लंबोदरः सदा पातु गुह्यदेशे ममारुणः ॥ ७ ॥ व्यालयज्ञोपवीती मां पातु पादयुगे सदा ॥ जापकः सर्वदा पातु जानुजंघं गणाधिपः ॥ ८ ॥ हारिद्रः सर्वदा पातु सर्वांगे गणनायकः ॥ य इदं प्रपठेन्नित्यं गणेशस्य महेश्वरि ॥ ९ ॥ कवचं सर्वसिद्धाख्यं सर्वविघ्नविनाशनम् ॥ सर्वसिद्धिकरं साक्षात्सर्वपापविमोचनम् ॥ १० ॥ सर्वसंपत्प्रदं साक्षा त्सर्वपापविमोक्षणम् ॥ सर्वसंपत्प्रदं साक्षात्सर्वशत्रुक्षयंकरम् ॥ ११ ॥ ग्रहपीडा ज्वरा रोगा ये चान्ये गुह्यकादयः ॥ पठनाद्धारणा देवि नाशमायांति तत्क्षणात् ॥ १२ ॥ धनधान्यकरं देवि कवचं सुरपूजितम् ॥ समो नास्ति महेशानि त्रैलोक्ये कवचस्य च ॥ १३ ॥ हारिद्रस्य महेशानि कवचस्य च भूतले ॥ किमन्यैरसदालापैर्यत्रायुर्व्ययमाप्नुयात् ॥ १४ ॥ इति विश्वसारतंत्रे हरिद्रा गणेशकवचं समाप्तम् ॥

॥ अथ पार्थिवगणेशविधानम् ॥ रुद्रयामले—महादेव उवाच ॥ यथा पार्थिवलिंगं तु सर्वसिद्धिविधायकम् ॥ तथा विघ्नेश्वरं देवं पार्थिवं सर्वकामदम् ॥ १ ॥ निर्विघ्नं जायते कार्य्यं सर्वा सिद्धिं प्रमाँल्लभेत् ॥ षट् कर्माणि तथा वक्ष्ये शृणुष्वैकमना भव ॥ २ ॥ रक्तोपचारैः सिंदूरैः रक्तमाल्यांबरैस्तथा ॥ जपापुष्पैः कारवीरैः कुसुमैः क्षीरपायसैः ॥ ३ ॥ संपूज्य वश्यतामेति यंयं चिंतयते नरः ॥ शुक्लमाल्यैः शुक्लवस्त्रैरोदनैर्दधिमिश्रितैः ॥ ४ ॥ मालतीकुसुमैर्धूपैर्दशांगैः शांति

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

लब्धये ॥ कवितायाः पटुत्वं च जायते नात्र संशयः ॥ ५ ॥ मोहने मधुभिः स्नाप्य मधुपायसमर्पयेत् ॥ असितैः कुसुमैः पूज्यो दमने नासितागुरुम् ॥६॥ समारोप्यार्चयेद्भक्त्या त्रैलोक्यं मोहयेत् क्षणात् ॥ स्तंभने निशया युक्तैरुपचारैः समर्चयेत् ॥७॥ आढकी भक्तनैवेद्यैः श्वेतदूर्वाभिरेव च ॥ कारयेन्निंबजरसं धूपं शत्रोस्तु तद्भवेत् ॥ ८ ॥ मारणे माहिषे चर्मण्यास्थायासितकंबलम् ॥ धत्तू-रैरर्चयेत्पुष्पैः सर्षपाक्षतमिश्रितैः ॥ ९ ॥ नैवेद्यं गुडसंमिश्रं महिषीक्षीरसंयुतम् ॥ भक्तं शाल्युद्भवं देयं छागमांससम न्वितम् ॥ १० ॥ अभिषेकस्तु तैलेन महागणपतौ भवेत् ॥ धूपं श्मशानजतरोः पुष्पैः सद्यः समर्पयेत् ॥ ११ ॥ एवं ग णाधिपं कृत्वा पूजयेत्पार्थिवं नरः ॥ यंयं काममभिध्यायेत्तंतं सद्यः समाप्नुयात् ॥ १२ ॥ पद्मपुराणेपि—सहस्रं दशसाहस्रं लक्षं कोटिं तथैव च ॥ यः करोति गणेशानां पार्थिवानां नरोत्तमः ॥१॥ सर्वसिद्धिमवाप्नोति नात्र कार्या विचारणा ॥ अथ सर्वकार्यसि द्धिप्रदपार्थिवगणेशपूजाप्रयोगः ॥ सुमुहूर्ते प्रातर्नित्यावश्यकं कृत्वा शिवालयादिषु कृतगोमयमंडले स्वासने उदङ्मुख उपविश्य भस्मत्रिपुंड्रं कृत्वा मूलेन आचम्य प्राणानायम्य देशकालौ संकीर्त्य अमुककामनासिद्ध्यर्थं पार्थिवगणपतिपूजां करिष्ये । इति संकल्प्य तदंगत्वेन भूतशुद्धिं प्राणप्रतिष्ठामन्तर्मातृकाबहिर्मातृकागणेशादिकलामातृकान्यासं च पूर्ववत्कुर्यात ॥ तत अश्वत्थमूल जां तुलसीमूलजां शुद्धस्थलजां वा मृदमानीयं ॐ पृथ्वि त्वया धृता लोकाः० ॥ १ ॥ इति धरां प्रार्थ्य ॐ गं गणपतये नमः मृदाहरणम्॥ ॐ गीं गणपतये नमः सेचनम् ॥ॐ गूं हेरंबाय नमः संयोजनम् ॥ ॐ गैं धरणीधराय नमः ॥ॐ गौं क्षिप्रप्रसादनाय नमः इति चतुर्भुजामेकदंतां सुंदरीं मूर्तिं कृत्वा ॐ गः सर्वसिद्धिप्रदाय नमः ॥ १ ॥ इति मस्तकोपरि रक्ताक्षतान् दत्वा

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

हृदिस्थं देवं संचिंत्य मानसोपचारैः संपूज्य । नासाग्रेणांजलिस्थसाक्षतपुष्पैः संयोज्य देवमस्तके अक्षतपुष्पादि निधाय प्राणप्रतिष्ठां कुर्यात् ॥ "प्राणप्रतिष्ठा" अस्य श्रीप्राणप्रतिष्ठामंत्रस्य ब्रह्मविष्णुरुद्रा ऋषयः । ऋग्यजुःसामानि च्छंदांसि । प्राणशक्तिर्देवता । आँ बीजम् । ह्रीं शक्तिः । क्रौं कीलकम् । देवे प्राणप्रतिष्ठापने विनियोगः । ऋष्यादिन्यासं कृत्वा ॐ आँ ह्रीं क्रौं यँरँलँवँशँषँसँहौंहंसः १४ अस्या गणपतिप्रतिमायाः प्राणा इह प्राणाः ॥ १ ॥ ॐ आँ ह्रीं क्रौं यँरँलँवँशँषँसँहौंप्हंसः १४ अस्या गणपतिप्रतिमाया जीव इह स्थितः ॥ २ ॥ पुनः ॐ आँ ह्रीं क्रौं यँरँलँवँशँषँसँहौंहंसः १४ अस्या गणपतिप्रतिमायाः सर्वेंद्रियाणि वाङ्मनस्त्वक्चक्षुःश्रोत्रजिह्वाघ्राणप्राणा इहैवागत्य सुखं चिरं तिष्ठंतु स्वाहा ॥ ३ ॥ इति त्रिः जपेदिति प्राणप्रतिष्ठा ॥ ततः स्ववामभागे कलशं संपूज्य देवं ध्यायेत् ॥ स्वशरीरे देवे च न्यासं कुर्यात् ॥ ॐ गं गणपतये नमः ॥ अस्य श्रीमहागणपतिमंत्रस्य गणक ऋषिः । निचृद्गायत्रीछंदः । गणपतिर्देवता । गं बीजम् । ॐ शक्तिः । स्वाहा कीलकम् । न्यासे विनियोगः । ऋष्यादिन्यस्य ॥ ॐ गां हृदयाय नमः ॥ १ ॥ ॐ गीं शिरसे स्वाहा ॥ २ ॥ ॐ गूं शिखायै वषट् ॥ ३ ॥ ॐ गैं कवचायहुम् ॥ ४ ॥ ॐ गौं नेत्रत्रयाय वौषट् ॥ ५ ॥ ॐ गः अस्त्राय फट् ॥ ६ ॥ इति न्यासं कृत्वा ध्यायेत् ॥ रक्तो रक्तांगरागांशुककुसुमयुतस्तुंदिलश्चंद्रमौलिर्नेत्रैर्युक्तस्त्रिभिर्वामनकरचरणो बीजपुष्पांतनासः ॥ हस्ताग्रैरुप्तपाशांकुशरदवरदो नागवक्त्रोहिभूषो देवः पद्मासनो नो भवतु सुरनुतो भूतये विघ्नराजः ॥ १ ॥ इति ध्यात्वा ॥ ॐ गणपतये नमः ॥ इतिमूलमंत्रेण वक्ष्यमाणनाममंत्रेण च पूजयेत् ॥ ॐ गणंजयाय नमः आवाहनम् ॥ १ ॥ ॐ गणपतये नमः आसनं० ॥ २ ॥ ॐ हेरंबाय नमः पाद्यं० ॥ ३ ॥ ॐ धरणी

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

धराय नमः अर्घ्यं० ॥ ४ ॥ ॐ महागणपतये नमः मधुपर्कं० ॥ ५ ॥ ॐ यक्षेश्वराय नमः आचमनीयं० ॥ ६ ॥ ॐ क्षिप्र प्रसादाय नमः मलापकर्षणं० ॥ ७ ॥ ॐ अमोघसिद्धये नमः पंचामृतस्नानं० ॥ ८ ॥ ॐ अमृताय नमः शुद्धोदकस्नानं कारयेत् ॥ ९ ॥ ततो रुद्रेण गाणपत्येनाथर्वशीर्षेण वा महाभिषेकः कार्यः ॥"अथर्वशीर्षं तु अग्रे वक्ष्यते" ॐ मंत्राय नमः वस्त्रं० ॥ १० ॥ ॐ चिंतामणये नमः उपवीतं० ॥ ११ ॥ ॐ निधये नमः गंधं० ॥१२॥ ॐ सुमंगलाय नमः रक्ताक्षतान्० ॥१३॥ ॐ बीजाय नमः पुष्पं० ॥ १४ ॥ ॐ आशापूरकाय नमः धूपं० ॥ १५ ॥ ॐ वरदाय नमः दीपं० ॥ १६ ॥ ॐ शिवाय नमः महानैवेद्यं० ॥ १७ ॥ ॐ काश्यपाय नमः तांबूलं० ॥ १८ ॥ ॐ नंदनाय नमः दक्षिणां० ॥ १९ ॥ ॐ वाचासिद्धाय नमः फलं० ॥ २० ॥ ॐ ढौंढिविनायकाय नमः नीराजनं० ॥ २१ ॥ ॐ सर्वसंकटनाशनाय नमः मंत्रपुष्पाजलिं० ॥ २२ ॥ ॐ कुमारगुरवे नमः इति तिस्रः प्रदक्षिणाः ० ॥ २३ ॥ ॐ अघनाशिने नमः नमस्कारं समर्पयामि ॥ २४ ॥ एवं चतुर्विंशत्युपचारान्समर्प्य ततो गणंजयादिढौंढिविनायकांतैरेकविंशतिनामभिरेकविंशतिश्वेतदूर्वांकुरान् अभावे अन्यान् समर्प्य मूलमंत्रमष्टोत्तरशतं जप्त्वा विशेषार्घ्यं दद्यात्॥ ॐ रक्ष रक्ष गणाध्यक्ष रक्ष त्रैलोक्यरक्षक भक्तानामभयं कर्ता त्राता भव भवार्णवात् ॥ १ ॥ द्वैमातुर कृपासिंधो षाण्मातुराग्रज प्रभो ॥ वरद त्वं वरं देहि वांछितं वांछितार्थद ॥ २ ॥ गृहाणार्घ्यमिदं देव सर्वदेवनमस्कृत ॥ अनेन सफलार्घ्येण फलदोस्तु सदा मम ॥ ३ ॥ इत्यर्घ्यं दत्वा ॐ अंगहीनं क्रियाहीनं भक्तिहीनं गणाधिप ॥ पूजितोसि यथा देव तत् क्षमस्व जगत्पते ॥ १ ॥ इति प्रार्थयेत् ॥ ततो विसर्जनम् ॥ एवं प्रकारेण सहस्र

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मयुतं लक्षं कोटिं वा पार्थिवगणपतीन् कृत्वाऽन्ते माघादिशुभकाले उद्यापनं कुर्यात् ॥ तदुद्यापनविधानं तु मत्कृते उद्याप
नप्रकाशे द्रष्टव्यम् ॥ " कारागृहान्मुक्तिकामः " एकविंशतिदिनपर्यन्तमेकोत्तरवृद्ध्या पार्थिवगणेशान् कृत्वा पूर्वोक्तप्रकारेण
संपूज्य पुनर्द्वाविंशतिदिनमारभ्य एकैकह्रासेन प्रथमादिनपर्यंतं गणेशान्कृत्वा यावद्गणेशा भवंति तावत्प्रत्यहं गणेशाथर्वशीर्ष
णाभिषेकः ॥ ॐ नमो हेरंब मदमोहित मम संकटान्निवारय निवारय स्वाहा ॥ १ ॥ इति मंत्रस्यापि तावत्सहस्रजपः ॥
अभीष्टसिद्धिर्भवति ॥ इति पार्थिवगणेशपूजाप्रयोगः समाप्तः ॥ श्रीगणाधिराजाय नमः ॥ अथ गणेशाथर्वशीर्षम् ॥ ॐ
नमस्तेगणपतये त्वमेवप्रत्यक्षंतत्त्वमसि । त्वमेवकेवलंकर्त्तासि । त्वमेवकेवलंधर्त्तासि । त्वमेवकेवलंहर्त्तासि । त्वमेवसर्वं
खल्विदंब्रह्मासि । त्वंसाक्षादात्मासिनित्यम् । ऋतं वच्मि । सत्यं वच्मि । अव त्वं माम् । अव वक्तारम् । अवश्रो
तारम् । अवदातारम् । अवधातारम् । अवानूचानमवशिष्यम् । अवपश्चात्तात् । अवपुरस्तात् । अवोत्तरात्तात् । अवद
क्षिणात्तात् । अवचोर्ध्वात्तात् । अवाधरात्तात् । सर्वतोमांपाहिपाहिसमंतात् । त्वंवाङ्मयस्त्वंचिन्मयः । त्वमानंदमयस्त्वं
ब्रह्ममयः । त्वंसच्चिदानंदाद्वितीयोऽसि । त्वं प्रत्यक्षंब्रह्मासित्वंज्ञानमयोंविज्ञानमयोसि । सर्वंजगदिदंत्वत्तो जायते । सर्वंजगदिदं
त्वत्तस्तिष्ठति । सर्वंजगदिदंत्वयिलयमेष्यति । सर्वंजगदिदं त्वायिप्रत्येति । त्वंभूमिरापोऽनलोऽनिलोनभः त्वंचत्वारिवाक्पदानि ।
त्वं गुणत्रयातीतः । त्वमवस्थात्रयातीतः । त्वंदेहत्रयातीतः ॥ त्वंकालत्रयातीतः । त्वंमूलाधारस्थितोसिनित्यम् । त्वंशक्तित्रया
त्मकः । त्वांयोगिनोध्यायन्तिनित्यम् ॥ त्वंब्रह्मात्वं विष्णुस्त्वंरुद्रस्त्वमिन्द्रस्त्वमग्निस्त्वंवायुस्त्वंसूर्यस्त्वंचंद्रमास्त्वंब्रह्मभूर्भुवः स्व

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

रोम् । गणादीन् पूर्वमुच्चार्य वर्णादींस्तदनंतरम् ॥ अनुस्वारः परतरः । अर्धेंदुलसितम् । तारेणरुद्धम् । एतत्तवमनुस्वरूपम् ॥ गकारः पूर्वरूपम् । अकारोमध्यमरूपम् । अनुस्वारश्चांत्यरूपम् । बिंदुरुत्तररूपम् ॥ नादःसंधानम् ॥ स ᳪ हितासंधिः सैषा गणेशविद्या । गणक ऋषिः । निचृद्गायत्री छंदः । गणपतिर्देवता ॐ गँ गणपतये नमः । "एकदंतायविद्महेवक्रतुंडायधीमहि ॥ तन्नोदंति प्रचोदयात् । एकदंतं चतुर्हस्तं पाशमङ्कुशधारिणम् । रदं च वरदं हस्तैर्बिभ्राणं मूषकध्वजम् ॥ रक्तं लंबोदरं शूर्पकर्णकं रक्तवाससम् । रक्तगंधानुलिप्तांगं रक्तपुष्पैः सुपूजितम् ॥ भक्तानुकंपिनं देवं जगत्कारणमच्युतम् ॥ आविर्भूतं च सृष्ट्यादौ प्रकृतेः पुरुषात्परम् ॥ एवं ध्यायति यो नित्यं स योगी योगिनां वरः ॥ नमो व्रातपतये नमो गणपतये नमः प्रमथपतये नमस्तेस्तु लंबोदरायैकदंताय विघ्ननाशिने शिवसुताय श्रीवरदमूर्तये नमः ॥ एतदथर्वशीर्षं योधीते स ब्रह्मभूयाय कल्पते स सर्वविघ्नैर्न बाध्यते । स सर्वत्र सुखमेधते स पंचमहापापात्प्रमुच्यते । सायमधीयानो दिवसकृतं पापं नाशयति । प्रातरधीयानो रात्रिकृतं पापं नाशयति । सायं प्रातः प्रयुंजानो अपापो भवति । सर्वत्राधीयानोऽपविघ्नो भवति । धर्ममर्थं कामं मोक्षं च विंदति । इदमथर्वशीर्षमशिष्याय न देयम् ॥ यो यदि मोहाद्दास्यति स पापीयान् भवति । सहस्रावर्तनाद्यंयं काममधीते । तंतमनेनसाधयेत् । अनेन गणपतिमभिषिंचति स वाग्मी भवति । चतुर्थ्यामनश्नञ्जपति स विद्यावान् भवति । इत्यथर्वणवाक्यम् ॥ ब्रह्माद्यावरणं विद्यान्न बिभेति कदाचनेति । यो दूर्वांकुरैर्यजति स वैश्रवणोपमो भवति । यो लाजैर्यजति स यशोवान् भवति । स मेधावान् भवति । यो मोदकसहस्रेण यजति स वांछितफलमवाप्नोति यः साज्यसमिद्भिर्यजति स सर्वं लभते । स सर्वं लभते । अष्टौ ब्राह्मणान् सम्यग्ग्राहयित्वा सूर्यवर्चस्वी

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भवति । सूर्यग्रहे महानद्यां प्रतिमासन्निधौ वा जप्त्वा सिद्धमंत्रो भवति । महाविघ्नात्प्रमुच्यते । महादोषात्प्रमुच्यते । महाप्रत्यवाया त्प्रमुच्यते । स सर्वविद्भवति ससर्वविद्भवति । य एवं वेद । इत्युपनिषत् । शान्तिः शान्तिः शान्तिः ॥ इति गणेशाथर्वशीर्षम् ॥

इति श्रीबीकानेरविषयान्तर्गतश्रीरत्नंगढनगरनिवासिना गौडवंशावतंसवसिष्ठगोत्रोद्भवश्रीरामकृष्णपौत्रेण श्रीकस्तूरीचंद्रसूनुनाम हादेवभक्तपंडितश्रीचतुर्थीलालशर्मणा विरचितेऽनुष्ठानप्रकाशे महानिबंधे पुरश्चरणकाण्डे श्रीगणपतिमंत्रानुष्ठानप्रकरणं समाप्तम्॥ १॥

अथ शिवमंत्रपुरश्चरणप्रकरणम् ॥ कैलासाद्रिनिभं शशांकशकलस्फूर्जज्जटामंडितं नासालोकनतत्परं त्रिनयनं वीरासनाध्यासितम्॥ मुद्राटंककुरंगजानुविलसत्पाणिं प्रसन्नाननं कक्षाबद्धभुजंगमं मुनिवृतं वंदे महेशं परम् ॥ १ ॥ अथ वक्ष्ये महेशस्य मंत्रान्सर्वार्थ सिद्धिदान् ॥ यैः पूर्वमृषयः प्राप्ताः शिवसायुज्यमंजसा ॥ २ ॥ तत्रादौ शिवस्य सर्वमंत्रारंभप्रयोगः ॥ शिवालयादिषु यथावज्जप स्थानं प्रकल्प्य पूर्वदिने प्रायश्चित्तादि कृत्वा आरंभदिने प्रातर्नित्यावश्यकं समाप्य स्वासने प्राङ्मुख उदङ्मुखो वा शिवसन्निधौ उपविश्य भस्मत्रिपुंड्रं रुद्राक्षधारणं च कुर्यात् ॥ ततः आचम्य प्राणानायम्य देशकालौ संकीर्त्य मम सर्वपापनिवृत्तिपूर्वक ममुककामनासिद्धये श्रीसदाशिवप्रीतये शिवस्यामुकमंत्रजपपुरश्चरणं करिष्ये तदंगत्वेन भूतशुद्धिं प्राणप्रतिष्ठां मातृकान्यासं श्रीकं ठादिकलान्यासं च करिष्ये इति च संकल्प्य पूर्वोक्तपद्धतिमार्गेण बहिर्मातृकान्यासांतं कृत्वा श्रीकंठादिकलामातृकान्यासं कुर्यात् तद्यथा—अस्य श्रीकण्ठादिकलान्यासस्य दक्षिणामूर्तिर्ऋषिः । गायत्रीछंदः अर्धनारीश्वरो देवता । ह्लो बीजानि । स्वराः शक्तयश्चतु । र्विधपुरुषार्थसिद्धयर्थे न्यासे विनियोगः॥ ॐ दक्षिणामूर्तिऋषये नमः शिरसि ॥ १ ॥ ॐ गायत्रीछंदसे नमः मुखे ॥ २ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ॐ अर्धनारीश्वरदेवतायै नमः हृदये ॥ ३ ॥ ॐ हलबीजाय नमः गुह्ये ॥ ४ ॥ स्वरशक्तये नमः पादयोः ॥ ५ ॥ इति ऋष्यादि न्यासः ॥ ॐ ह्लां अंगुष्ठाभ्यां नमः ॥ १ ॥ ॐ ह्लीं तर्जनीभ्यां नमः ॥२॥ ह्लूं मध्यमाभ्यां नमः ॥ ३ ॥ ॐ ह्लैं अनामिकाभ्यां नमः ॥ ४ ॥ ॐ ह्लौं कनिष्ठिकाभ्यां नमः ॥५॥ ॐ ह्लः करतलकरपृष्ठाभ्यां नमः ॥६॥ इति करन्यासः ॥ ॐ ह्लां हृदयाय नमः ॥ १ ॥ ॐ ह्लीं शिरसे स्वाहा ॥ २ ॥ ॐ ह्लूं शिखायै वषट् ॥ ३ ॥ ॐ ह्लैं कवचायहुं ॥ ४ ॥ ॐ ह्लौं नेत्रत्रयाय वौषट् ॥ ५ ॥ ॐ ह्लः अस्त्राय फट् ॥ ६ ॥ इति षडंगन्यासः ॥ अथ ध्यानम् ॥ पाशांकुशवराक्षस्रक्पाणिशीतांशुशेखरम् ॥ त्र्यक्षंरक्तसुवर्णाभमर्द्धनारीश्वरं भजे ॥ १ ॥ बन्धूककांचननिभं रुचिराक्षमालां पाशांकुशौ च वरदं निज बाहुदण्डैः ॥ बिभ्राणमिन्दुशकलाभरणं त्रिनेत्रमर्धाम्बिकेशमनिशं वपुराश्रयामः ॥ १ ॥ इति ध्यात्वा श्रीकण्ठाद्यान् न्यसेत् ॥ ॐ ह्लौं अं श्रीकण्ठेशपूर्णोदरीभ्यां नमो मस्तके ॥ १ ॥ 'प्रणवमादौ सर्वत्र' ॥ ॐ ह्लौं आं अनन्तेशविरजाभ्यां नम आननवृत्ते ॥२॥ ॐ ह्लौं इं सूक्ष्मेशशाल्मलीभ्यां नमः दक्षिणनेत्रे ॥ ३ ॥ ॐ ह्लौं ईं त्रिमूर्त्तिलोलाक्षिभ्यां नमो वामनेत्रे ॥ ४ ॥ ॐ ह्लौं उं अमरेश वर्तुलाक्षीभ्यां नमो दक्षकर्णे ॥ ५ ॥ ॐ ह्लौं ऊं अर्घीशदीर्घघोणाभ्यां नमो वामकर्णे ॥ ६ ॥ ॐ ह्लौं ऋं भारभूतीशदीर्घमुखीभ्यां नमो दक्षनासापुटे ॥ ७ ॥ ॐ ह्लौं ॠं तिथीशगोमुखीभ्यां नमो वामनासापुटे ॥ ८ ॥ ॐ ह्लौं ऌं स्थाण्वीशदीर्घजिह्वाभ्यां नमो दक्षगण्डे ॥ ९ ॥ ॐ ह्लौं ॡं हरेशकुण्डोदरीभ्यां नमः वामगण्डे ॥ १० ॥ ॐ ह्लौं एं झिण्टीशोर्ध्वकेशीभ्यां नमः ऊर्ध्वोष्ठे ॥ ११ ॥ ॐ ह्लौं ऐं भौतिकेशविकृतमुखीभ्यां नम अधरोष्ठे ॥ १२ ॥ ॐ ह्लौं ओं सद्योजातेशज्वालामुखीभ्यां नम ऊर्ध्वदन्तपंक्तौ ॥ १३ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ॐ ह्रौं औं अनुग्राहेशोल्कामुखीभ्यां नमः अधोदन्तपंक्तौ ॥१४॥ ॐ ह्रौं अं अक्रूरेशश्रीमुखीभ्यां नमः शिरसि ॥ १५ ॥ ॐ ह्रौं अः महासेनेशविद्यामुखीभ्यां नमः मुखमध्ये ॥ १६ ॥ ॐ ह्रौं कं क्रोधीशमहाकालीभ्यां नमः दक्षस्कंधे ॥ १७ ॥ ॐ ह्रौं खं चण्डेशसरस्वतीभ्यां नमः दक्षकूर्परे ॥ १८ ॥ ॐ ह्रौं गं पञ्चान्तकेशसर्वसिद्धिगौरीभ्यां नमः दक्षमणिबंधे ॥१९॥ ॐ ह्रौं घं शिवोत्तमेशत्रैलोक्यविद्याभ्यां नमः दक्षांगुलिमूले ॥ २० ॥ ॐ ह्रौं ङं एकरुद्रेशमंत्रशक्तिभ्यां नमः दक्षांङ्गुल्यग्रे ॥ २१ ॥ ॐ ह्रौं चं कूर्मेशात्मशक्तिभ्यां नमः वामस्कंधे ॥ २२ ॥ ॐ ह्रौं छं एक नेत्रेशमूलमातृकाभ्यां नमः वामकूर्परे ॥ २३ ॥ ॐ ह्रौं जं चतुराननेशलम्बोदरीभ्यां नमः वामस्कंधे ॥ २४ ॥ ॐ ह्रौं झं अजेशद्रविणीभ्यां नमः वामाङ्गुलिमूले ॥ २५ ॥ ॐ ह्रौं ञं सर्वेशनागरीभ्यां नमः वामाङ्गुल्यग्रेषु ॥ २६ ॥ ॐ ह्रौं टं सोमेशखेचरीभ्यां नमः दक्षपादमूले ॥ २७ ॥ ॐ ह्रौं ठं लाङ्गलीशमञ्जरीभ्यां नमः दक्षजानुनि ॥ २८ ॥ ॐ ह्रौं डं दारुकेशरूपिणीभ्यां नमः दक्षगुल्फे ॥२९॥ ॐ ह्रौं ढं अर्धनारीशवीरिणीभ्यां नमः दक्षपादाङ्गुलिमूले ॥ ३० ॥ ॐ ह्रौं णं उमाकांतेशकाकोदरीभ्यां नमः दक्षाङ्गुल्यग्रे ॥ ३१ ॥ ॐ ह्रौं तं आषाढीशपूतनाभ्यां नमः वामोरुमूले ॥ ३२ ॥ ॐ ह्रौं थं दण्डीशभद्रकालीभ्यां नमः वामजानुनि ॥३३॥ ॐ ह्रौं दं अत्रीशयोगिनीभ्यां नमः वामगुल्फे ॥ ३४ ॥ ॐ ह्रौं धं मीनेशशंखिनीभ्यां नमः वामपादाङ्गुलिमूले ॥३५॥ ॐ ह्रौं नं मेषेशतर्जनीभ्यां नमः वामपादाङ्गुल्यग्रे ॥ ३६ ॥ ॐ ह्रौं पं लोहितेशकालरात्रिभ्यां नमः दक्षकुक्षौ ॥ ३७ ॥ ॐ ह्रौं फं शिखीशकुब्जिनीभ्यां नमः वामकुक्षौ ॥ ॥ ३८ ॥ ॐ ह्रौं बं छगलाण्डेशकपार्दिनीभ्यां नमः पृष्ठे ॥ ३९ ॥ ॐ ह्रौं भं द्विरण्डेशवज्राभ्यां नमः नाभौ ॥४०॥ ॐ ह्रौं मं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

महाकालेशजयाभ्यां नमः उदरे ॥४१॥ ॐ ह्रौं यं त्वगात्मभ्यां वालीशसुमुखेश्वरीभ्यां नमः हृदये ॥ ४२ ॥ ॐ ह्रौं रं असृगा
त्मभ्यां भुजंगेशरेवतीभ्यां नमः दक्षांसे ॥४३॥ ॐ ह्रौं लं मांसात्मभ्यां पिनाकीशमाधवीभ्यां नमः ककुदि ॥ ४४ ॥ ॐ ह्रौं वं मेदसा
त्मभ्यां खड्गीशवारुणीभ्यां नमः हृदयादिवामांसे ॥ ४५ ॥ ॐ ह्रौं शं अस्थ्यात्मभ्यां केशवायवीभ्यां नमः हृदयादिदक्षकराग्रा
न्तम् ॥ ४६ ॥ ॐ ह्रौं षं मज्जात्मभ्यां श्वेतेशरक्षोविदारिणीभ्यां नमः हृदयादिवामकराग्रांतम् ॥ ४७ ॥ ॐ ह्रौं सं शुक्रात्मभ्यां
भृग्वीशसहजाभ्यां नमः हृदयादिवामपादाग्रान्तम् ॥ ४८ ॥ ॐ ह्रौं हं प्राणात्मभ्यां लकुलीशलक्ष्मीभ्यां नमः हृदयादिदक्षपादां
तम् ॥ ४९ ॥ ॐ ह्रौं ळं शक्त्यात्मभ्यां शिवेशव्यापिनीभ्यां हृदयादिनाभ्यंतम् ॥ ५० ॥ ॐ ह्रौं क्षं परमात्मभ्यां संवर्तकेशमा
याभ्यां नमः ॥ हृदयादिशिरोन्तम् ॥ ५१ ॥ एवं श्रीकण्ठादिकलान्यासं कृत्वा ध्यायेत् । " अत्र रुद्राः स्मृता रक्ता धृतशूलकपा
लकाः ॥ शक्तयो रुद्रपीठस्थाः सिंदूरारुणविग्रहाः ॥ रक्तोत्पलकपालाभ्यामलंकृतकराम्बुजाः " इति ध्यात्वा मूलमंत्रेण प्राणायामं
कुर्यात् ॥ इति श्रीकण्ठादिन्यासः ॥ अयं न्यासः सर्वशिवमंत्रेषु ज्ञेयः ॥ अथ शिवपंचाक्षरमंत्रपुरश्चरणप्रयोगः ॥ तत्र मन्त्रन्यासः
अस्य श्रीशिवपंचाक्षरमन्त्रस्य वामदेव ऋषिः । पंक्तिश्छंद॥सदाशिवो देवता ॥ ॐ बीजम् । नमः शक्तिः । शिवायेति कीलकम् चतुर्वि
धपुरुषार्थसिद्धयर्थे न्यासे विनियोगः ॥ ॐ वामदेवऋषये नमः शिरसि ॥ १ ॥ ॐ पंक्तिच्छन्दसे नमः मुखे ॥ २ ॥ ॐ श्रीसदा
शिवदेवतायै नमः हृदये ॥ ३ ॥ ॐ बीजाय नमः गुह्ये ॥ ४ ॥ ॐ नमः शक्तये नमः पादयोः ॥ ५ ॥ ॐ शिवाय कीलकाय
नमः सर्वांगे ॥६॥ इति ऋष्यादिन्यासः ॥ अथ करन्यासः ॥ ॐ ॐ अङ्गुष्ठाभ्यां नमः ॥१॥ ॐ नं तर्जनीभ्यां नमः ॥२॥ ॐ मं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मध्यमाभ्यां नमः ॥३॥ ॐ शिं अनामिकाभ्यां नमः ॥४॥ ॐ वां कनिष्ठिकाभ्यां नमः ॥५॥ ॐ यं करतलकरपृष्ठाभ्यां नमः ॥६॥
अथ हृदयादिन्यासः ॥ ॐ ॐ हृदयाय नमः ॥१॥ ॐ नं शिरसे स्वाहा ॥२॥ ॐ मं शिखायैवषट् ॥३॥ ॐ शिं कवचायहुम्॥४॥
ॐ वां नेत्रत्रयाय वौषट् ॥५॥ ॐ यं अस्त्राय फट् ॥६॥ अथ पंचमूर्तिन्यासः । ॐ नं तत्पुरुषाय नमः इति तर्जन्याम् ॥१॥ ॐ मं अघो
राय नमः मध्यमायाम् ॥२॥ ॐ शिं सद्योजाताय नमः कनिष्ठिकायाम् ॥३॥ ॐ वां वामदेवाय नमः अनामिकायाम् ॥४॥ ॐ यं
ईशानाय नमः इत्यंगुष्ठे ॥५॥ ॐ नं तत्पुरुषाय नमः मुखे ॥१॥ ॐ मं अघोराय नमः हृदये ॥२॥ ॐ शिं सद्योजाताय नमः पादयोः
॥३॥ ॐ वां वामदेवाय नमः गुह्ये ॥४॥ ॐ यं ईशानाय नमः मूर्ध्नि ॥५॥ अथ वक्त्रन्यासः ॥ ॐ नं तत्पुरुषाय नमः पूर्ववक्त्रे ॥१॥
ॐ मं अघोराय नमः दक्षिणवक्त्रे ॥ २ ॥ ॐ शिं सद्योजाताय नमः पश्चिमवक्त्रे ॥ ३ ॥ ॐ वां वामदेवाय नमः उत्तरवक्त्रे ॥४॥
ॐ यं ईशानाय नमः इत्यूर्ध्ववक्त्रे ॥ ५ ॥ अथ गोलकन्यासः ॥ ॐ ॐ नमः हृदये ॥ १ ॥ ॐ नं नमः वक्त्रे ॥ २ ॥ ॐ मं
नमः दक्षांसे ॥ ३ ॥ ॐ शिं नमः वामांसे ॥ ४ ॥ ॐ वां नमः दक्षिणोरौ ॥ ५ ॥ ॐ यं नमः वामोरौ ॥ ६ ॥ इति प्रथम
न्यासः ॥ १ ॥ ॐ ॐ नमः कंठे ॥ १ ॥ ॐ नं नमः नाभौ ॥ २ ॥ ॐ मं नमः दक्षिणपार्श्वे ॥ ३ ॥ ॐ शिं नमः वामपार्श्वे
॥ ४ ॥ ॐ वां नमः पृष्ठे ॥५॥ ॐ यं नमः हृदये ॥ ६ ॥ इति द्वितीयो न्यासः ॥ २ ॥ ॐ ॐ नमः मूर्ध्नि ॥ १ ॥ ॐ नं नमः
मुखे ॥ २ ॥ ॐ मं नमः दक्षिणनेत्रे ॥ ३ ॥ ॐ शिं नमः वामनेत्रे ॥ ४ ॥ ॐ वां नमः दक्षिणनासापुटे ॥ ५ ॥ ॐ यं नमः वाम
नासापुटे ॥ ६ ॥ इति तृतीयो न्यासः ॥ ३ ॥ ॐ नं नमः हस्तांगुल्यग्रेषु ॥ १ ॥ ॐ मं नमः हस्तांगुलीमूलेषु ॥ २ ॥ ॐ

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

शिं नमः मणिबंधयोः ॥ ३ ॥ ॐ वां नमः कूर्परयोः ॥ ४ ॥ ॐ यं नमः बाहुमूलयोः ॥ ५ ॥ इति चतुर्थो न्यासः ॥ ४ ॥
ॐ नं नमः पादांगुल्यग्रेषु ॥ १ ॥ ॐ मं नमः पादांगुलीमूलेषु ॥ २ ॥ शिं नमः गुल्फयोः ॥ ३ ॥ ॐ वां नमः जानुनोः ॥ ४ ॥
ॐ यं नमः जंघयोः ॥ ५ ॥ इति पंचम न्यासः ॥५॥ ॐ ॐ नमः शिरसि ॥१॥ ॐ नं नमः गुह्ये ॥२॥ ॐ मं नमः हृदये ॥३॥
ॐ शिं नमः कुक्षिद्वये ॥४॥ ॐ वां नमः ऊरुद्वये ॥५॥ ॐ यं नमः पादद्वये ॥ ६ ॥ इति षष्ठो न्यासः ॥६॥ ॐ ॐ नमः हृदये
॥ १ ॥ ॐ नं नमो वक्त्रांबुजे ॥ २ ॥ ॐ मं नमः टंके ॥ ३ ॥ ॐ शिं नमः मृगे ॥ ४ ॥ ॐ वां नमः अभये ॥ ५ ॥ ॐ यं
नमः वरे ॥ ६ ॥ इति सप्तमन्यासः ॥७॥ ॐ ॐ नमः वक्त्रे ॥ १ ॥ ॐ नं नमः अंसयोः ॥ २ ॥ ॐ मं नमः हृदये ॥ ३ ॥
ॐ शिं नमः पादद्वये ॥ ४ ॥ ॐ वां नमः ऊरुद्वये ॥ ५ ॥ ॐ यं नमः जठरे ॥ ६ ॥ इत्यष्टमन्यासः ॥ ८ ॥ ॐ नं तत्पुरुषाय
नमः मूर्ध्नि ॥ १ ॥ ॐ मं अघोराय नमः भाले ॥ २ ॥ ॐ शिं सद्योजाताय नमः उदरे ॥ ३ ॥ ॐ वां वामदेवाय नमः अंसयोः
॥ ४ ॥ ॐ यं ईशानाय नमः हृदये ॥ ५ ॥ इति नवमन्यासः ॥ ९ ॥ "ॐ नमोस्तु स्थाणुभूताय ज्योतिर्लिङ्गामृतात्मने ॥
चतुर्मूर्तिवपुःस्थायाभाषितांगाय शंभवे ॥ १ ॥ इति व्यापकं न्यसेत् ॥ १० ॥ एवं दश न्यासान्कृत्वा पार्वतीपतिं ध्यायेत् ॥ अथ
ध्यानम् ॥ ध्यायेन्नित्यं महेशं रजतगिरिनिभं चारुचंद्रावतंसं रत्नाकल्पोज्ज्वलांगं परशुमृगवराभीतिहस्तं प्रसन्नम् ॥ पद्मासीनं समं
तात्स्तुतममरगणैर्व्याघ्रकृत्तिं वसानं विश्वाद्यं विश्ववंद्यं निखिलभयहरं पंचवक्त्रं त्रिनेत्रम् ॥ १ ॥ इति ध्यात्वा मानसोपचारैः संपू
ज्य शंखं विना अर्घ्यस्थापनादि पूर्ववत्कृत्वा पीठपूजां कुर्य्यात् ॥ तद्यथा ॥ शैवे पीठे—ॐ मण्डूकादिपरतत्वान्तदेवताभ्यो
नमः ॥ इति पूर्वोक्तपीठदेवताः संपूज्य स्वाभ्यादिप्रादक्षिण्येन ॥ ॐ वामायै नमः ॥१॥ ॐ ज्येष्ठायै नमः ॥ २ ॥ ॐ रौद्र्यै नमः ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

॥ ३ ॥ ॐ काल्यै नमः ॥ ४ ॥ ॐ कलविकारिण्यै नमः ॥ ५ ॥ ॐ बलविकारिण्यै नमः ॥ ६ ॥ ॐ बलप्रमथिन्यै नमः ॥ ७ ॥ ॐ सर्वभूतदमन्यै नमः ॥ ८ ॥ (मध्ये) ॐ मनोन्मन्यै नमः ॥ ९ ॥ इति पीठशक्तीः पूजयेत् ॥ ततः ॥ ॐ नमो भगवते सकल गुणात्मशक्तियुक्तायाऽनंताय योगपीठात्मने नमः ॥ इति मंत्रेणासनं दत्वा तत्र "ॐ नमः शिवाय" इति मूलमंत्रेण मूर्तिं प्रकल्प्य 'अथवा स्वर्णमयीं संस्थाप्य' आवाहनादिपुष्पांतैरुपचारैः [पूर्वोक्तमंत्रैः] संपूज्य पुष्पांजलिं दत्वा आवरणपूजां कुर्यात् ॥ तद्यथा ॥ कर्णिकायाम् ईशान्याम्–ॐ ईशानाय नमः ॥ १ ॥ पूर्वे–ॐ तत्पुरुषाय नमः ॥२॥ दक्षिणे–ॐ अघोराय नमः ॥३॥ पश्चिमे–ॐ वामदेवाय नमः ॥ ४ ॥ उत्तरे–ॐ सद्योजाताय नमः ॥ ५ ॥ इति पंचमूर्तीः पूजयेत् ॥ इति प्रथमावरणम् ॥ १ ॥ पुनः ईशानादिषु । ॐ निवृत्त्यै नमः ॥ १ ॥ ॐ प्रतिष्ठायै नमः ॥ २ ॥ ॐ विद्यायै नमः ॥ ३ ॥ ॐ शांत्यै नमः ॥ ४ ॥ शांत्यतीतायै नमः ॥५॥ इति कलाः पूजयेत् ॥ इति द्वितीयावरणम् ॥२॥ ततः पूर्वादिदिक्षु । ॐ सूर्याय नमः ॥१॥ ॐ इन्दवे नमः ॥२॥ ॐ क्षित्यै नमः ॥ ३ ॥ ॐ तोयाय नमः ॥ ४॥ ॐ अग्नये नमः ॥५॥ ॐ पवनाय नमः ॥ ६ ॥ ॐ आकाशाय नमः ॥७॥ ॐ यज्वने नमः ॥ ८ ॥ इत्यष्टमूर्तीः पूजयेत् ॥ इति तृतीयावरणम् ॥३॥ ततः पूर्वादिपत्रेषु । ॐ अनंताय नमः ॥१॥ ॐ सूक्ष्माय नमः ॥ २ ॥ ॐ शिवोत्तमाय नमः ॥३॥ ॐ एकनेत्राय नमः ॥ ४ ॥ ॐ एकरुद्राय नमः ॥ ५ ॥ ॐ त्रिमूर्त्तयेनमः ॥६॥ ॐ श्रीकंठाय नमः ॥ ७ ॥ ॐ शिखंडिने नमः ॥ ८ ॥ इति विघ्नेशान् पूजयेत् ॥ इति चतुर्थावरणम् ॥ ४ ॥ तद्बाह्ये उत्तरादि क्रमेण । ॐ उमायै नमः ॥ १ ॥ ॐ चंडेश्वराय नमः ॥ २ ॥ ॐ नंदिने नमः ॥ ३ ॥ ॐ महाकालाय नमः ॥ ४ ॥ ॐ गणेशाय नमः ॥ ५ ॥ ॐ वृषभाय नमः ॥ ६ ॥ ॐ भृंगरिटये नमः ॥ ७ ॥ ॐ स्कंदाय नमः ॥ ८ ॥ इति गणान् पूजयेत्

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

इति पंचमावरणम् ॥ ५ ॥ तद्बाह्ये भूपुरे पूर्वादिक्रमेण । ॐ इंद्राय नमः ॥ १ ॥ ॐ अग्नये नमः ॥ २ ॥ ॐ यमाय नमः ॥ ३ ॥ निर्ऋतये नमः ॥ ४ ॥ ॐ वरुणाय नमः ॥ ५ ॥ ॐ वायवे नमः ॥ ६ ॥ ॐ कुबेराय नमः ॥ ७॥ ॐ ईशानाय नमः ॥८॥ "ईशानपूर्वयोर्मध्ये" ॐ ब्रह्मणे नमः ॥ ९ ॥ "निर्ऋतिपश्चिमयोर्मध्ये" ॐ अनंताय नमः ॥ १० ॥ इति दिक्पालान् पूजयेत्॥ इति षष्ठावरणम् ॥ ६ ॥ तद्बाह्येपूर्वादिषु तत्तत्समीपे । ॐ वज्राय नमः ॥ १ ॥ ॐ शक्त्यै नमः ॥ २ ॥ ॐ दंडाय नमः ॥ ३ ॥ ॐखड्गाय नमः ॥ ४ ॥ ॐ पाशाय नमः ॥ ५ ॥ ॐ अंकुशाय नमः ॥ ६ ॥ ॐ गदायै नमः ॥ ७ ॥ ॐ त्रिशूलाय नमः ॥ ८ ॥ ॐ पद्माय नमः ॥९॥ ॐ चक्राय नमः ॥१०॥ इत्यायुधानि संपूजयेत् ॥ इसि सप्तमावरणम् ॥७॥ एवमावरणपूजां कृत्वा धूपदीपादिप्रार्थनांतं तत्तन्मंत्रेण संपूजयेत् ॥ ततस्तन्मनाश्चतुर्विंशतिलक्षात्मकं जपपुरश्चरणं कृत्वा जपान्ते तद्दशांशेन वा चतुर्विंश तिसहस्रमंत्रैः पायसं त्रिमधुप्लुतं हुत्वा तद्दशांशेन दुग्धमिश्रजलेन तर्पणं कृत्वा तद्दशांशतो मार्ज्जनं तद्दशांशेन शुद्धान्विप्रांश्च पाय सादिना भोजयेत् । एवंकृते सिद्धो मंत्रो भवति । तत्सिद्धमंत्रेण सर्वार्थान्साधयेत् । तथा च शारदातिलके अष्टादशे पटले । "ततः सिद्धो भवेन्मन्त्रः साधकाभीष्टसिद्धिदः ॥ इत्थं संपूजयेद्देवं सहस्रं नित्यशो जपेत् ॥ १ ॥ सर्वपापविनिर्मुक्तः प्राप्नुयाद्वाञ्छितां श्रियम् ॥ द्विसहस्रं जपेद्रोगान्मुच्यते नात्र संशयः ॥ २ ॥ त्रिसहस्रं जपेन्मन्त्रं दीर्घमायुरवाप्नुयात् ॥ सहस्रवृद्ध्याप्रजपेत्सर्वा न्कामानवाप्नुयात् ॥ ३ ॥ आज्यान्वितैस्तिलैः शुद्धैर्जुहुयाल्लक्षमादरात् ॥ उत्पातजनितान्क्लेशान्नाशयेन्नात्र संशयः ॥ ४ ॥ शत लक्षं जपेत्साक्षाच्छिवो भवति मानवः ॥" इति शिवपञ्चाक्षरमन्त्रप्रयोगः॥अथ अष्टाक्षरीशिवमन्त्रप्रयोगः ॥ "शारदातिलके" तत्र मन्त्रस्वरूपम् । " ह्रीं ॐ नमः शिवाय ह्रीं " इत्यष्टाक्षरो मन्त्रः॥अस्याष्टाक्षरमन्त्रस्य वामदेव ऋषिः । पंक्तिश्छन्दः । उमापतिर्दे

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वता । सर्वेष्टसिद्धये जपे विनियोगः । अथ ऋष्यादिन्यासः । ॐ वामदेवऋषये नमः शिरसि ॥ १॥ ॐ पङ्क्तिच्छन्दसे नमः मुखे॥ ॐ उमाकांतदेवतायै नमः हृदये ॥ ३ ॥ अथ करन्यासः । ॐ ॐ अं गुष्ठाभ्यां नमः ॥ १ ॥ ॐ नं तर्जनीभ्यां नमः ॥ २ ॥ ॐ मं मध्यमाभ्यां नमः ॥ ३ ॥ ॐ शिं अनामिकाभ्यां नमः ॥ ४ ॥ ॐ वां कनिष्ठिकाभ्यां नमः ॥ ५ ॥ ॐ यं करतलकरपृष्ठाभ्यां नमः ॥ ६ ॥ अथ हृदयादिन्यासः । ॐ ॐ हृदयाय नमः ॥१॥ ॐ नं शिरसे स्वाहा ॥ २ ॥ ॐ मं शिखायै वषट् ॥ ३ ॥ ॐ शिं कवचायहुम् ॥ ४ ॥ ॐ वां नेत्रत्रयाय वौषट् ॥ ५ ॥ ॐ यं अस्त्रायफट् ॥ ६ ॥ ततो ध्यानम् ॥ बन्धूकाभं त्रिनेत्रं शशि शकलधरं स्मेरवक्त्रं वहंतं हस्तैः शूलं कपालं वरदमभयदं चारुहारं नमामि ॥ वामोरुस्तंभगायाः करतलविलसच्चारुरक्तोत्पलाया हस्तेनाश्लिष्टदेहं मणिमयविलसद्भाषणायाः प्रियायाः ॥ १ ॥ ततः प्राक् प्रोक्ते शैवे पीठे पूर्ववत् वामादिनवशक्तीः संपूज्य ॐ सकलगुणात्मशक्तियुक्तायानंताय योगपीठात्मने नमः ॥ इत्यासनं दत्वा तत्र उमापतिं पुष्पांतैरुपचारैः संपूज्य आवरणपूजां कुर्यात् तद्यथा । केसरेषु अग्न्यादि कोणेषु मध्ये दिक्षु च । आग्नेय्यां ॐ ॐ हृदयाय नमः॥१॥नैर्ऋत्यां ॐ नं शिरसे स्वाहा ॥२॥ वायव्यां ॐ मं शिखायै वषट् ॥ ३ ॥ ईशान्यां ॐ शिं कवचाय हुं ॥ ४ ॥ मध्ये ॐ वां नेत्रत्रयाय वौषट् ॥ ५ ॥ दिक्षु ॐ यं अस्त्राय फट् । इति पूजयेत् । इति प्रथमावरणम् ॥ १ ॥ तद्बाह्ये मध्ये पूर्वादिदिक्षु च ॐ हृल्लेखायै नमः ॥ १ ॥ ॐ गगनायै नमः ॥ २ ॥ ॐ रक्तायै नमः ॥ ३ ॥ ॐ करालिकायै नमः ॥ ४ ॥ ॐ महोच्छुष्मायै नमः ॥ ५ ॥ इति द्वितीयावरणम् ॥२॥ तद्बाह्ये पूर्वादिपत्रेषु ॐ वृषभाय नमः ॥ १ ॥ ॐ क्षेत्रपालाय नमः ॥ २ ॥ ॐ दुर्गायै नमः ॥ ३ ॥ ॐ कार्तिकेयाय नमः ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

॥ ४ ॥ ॐ नंदिने नमः ॥ ५ ॥ ॐ विघ्नाय नमः ॥ ६ ॥ ॐ श्यामाय नमः ॥ ७ ॥ ॐ सेनापतयेनमः ॥ ८ ॥ इति पूजयेत् । इति तृतीयावरणम् ॥ ३ ॥ ततः पत्राग्रेषु पूर्वादिक्रमेण ॐ ब्राह्म्यै नमः ॥ १ ॥ ॐ माहेश्वर्य्यै नमः ॥ २ ॥ ॐ कौमार्यै नमः ॥ ३ ॥ ॐ वैष्णव्यै नमः ॥ ४ ॥ ॐ वाराह्यै नमः ॥ ५ ॥ ॐ इंद्राण्यै नमः ॥ ६ ॥ ॐ चामुंडायै नमः ॥ ॥ ७ ॥ ॐ महालक्ष्म्यै नमः ॥ ८ ॥ इति चतुर्थावरणम् ॥ ४ ॥ तद्बाह्ये भूपुरे इन्द्रादीन् तद्बाह्ये वज्राद्यायुधानि च पजयेत् । इत्यावरणपूजां कृत्वा धूपदीपादिनमस्कारांतं कर्म्म समाप्य चतुर्दशलक्षं मंत्रं जपेत् ॥ जपान्ते चतुर्दशसहस्रं यथाविधि मधुरासिक्तैरारग्वध समिद्भिर्होमं कुर्य्यात् । ततः तद्दशांशेन तर्पणं तद्दशांशतो मार्ज्जनं तद्दशांशेन ब्राह्मणभोजनं च कुर्यात् । तथा च (शारदातिलके) " मनुलक्षं जपेन्मंत्रं तत्सहस्रं यथाविधि ॥ जुहुयान्म धुरासिक्तैरारग्वधसमिद्वरैः ॥ १ ॥ एवं यो भजते मंत्री देवेशं तमुमापतिम् ॥ स भवेत्सर्व लोकानां प्रियः सौभाग्यसंपदाम् ॥ २ ॥ इत्यष्टाक्षरीशिवमंत्रप्रयोगः ॥ अथ त्र्यक्षरीमृत्युं जयमंत्रप्रयोगः ॥ अस्य श्रीत्र्यक्षरात्मकमृत्युंजयमंत्रस्य कहोलऋषिर्गायत्रीछंदः । मृत्युंजयो महादेवो देवता । जूँ बीजम् । सः शक्तिः । सर्वेष्टसिद्ध्यर्थं जपे विनियोगः ॥ ॐ कहो

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

लऋषये नमः शिरसि ॥ १ ॥ ॐ गायत्रीछंदसे नमः मुखे ॥ २ ॥ ॐ मृत्युंजयदेवतायै नमः हृदये ॥ ३ ॥ ॐ जूबीजाय नमः गुह्ये ॥ ४ ॥ ॐ सः शक्तये नमः पादयोः ॥ ५ ॥ इति ऋष्यादिन्यासः । अथ करन्यासः । ॐ सां अंगुष्ठाभ्यां नमः ॥ १ ॥ ॐ सीं तर्जनीभ्यां नमः ॥ २ ॥ ॐ सूं मध्यमाभ्यां नमः ॥ ३ ॥ ॐ सैं अनामिकाभ्यां नमः ॥ ॥ ४ ॥ ॐ सौं कनिष्ठिकाभ्यां नमः ॥ ५ ॥ ॐ सः करतलकरपृष्ठाभ्यां नमः ॥ ६ ॥ एवं हृदयादिन्यासं कुर्यात् । अथ ध्यानम् ॥ चन्द्रार्काग्निविलोचनं स्मितमुखं पद्मद्वयांतःस्थितं मुद्रापाशमृगाक्षसूत्रविलसत्पाणिं हिमांशुप्रभम् ॥ कोटीरेन्दुग लत्सुधाप्लुततनुं हारादिभूषोज्ज्वलं कांत्या विश्वविमोहनं पशुपतिं मृत्युंजयं भावयेत् ॥ १ ॥ पूर्वोक्ते शैवे पीठे मूलेन मूर्तिं प्रकल्प्य तत्र मृत्युंजयं महादेवं पुष्पांतैरुपचारैः संपूज्य आवरणपूजां कुर्य्यात् । तद्यथा । केशरेषु आग्नेयादिकोणेषु मध्ये दिक्षु च ॐ सां हृदयाय नमः ॥ १ ॥ ॐ सीं शिरसे स्वाहा ॥२॥ ॐ सूं शिखायै वषट् ॥३॥ ॐ सैं कवचाय हुं ॥४॥ ॐ सौं नेत्रत्रयाय वौषट् ॥५॥ ॐ सः अस्त्राय फट् ॥६॥ इत्यंगानि जपेत् । इति प्रथमावरणम् । तद्बाह्ये इन्द्रादीन् वज्रादींश्च संपूजयेत् । ततो धूपा दिनमस्कारांतं समाप्य लक्षत्रयं जपं कुर्यात् । ततस्तदशांशेन दुग्धाज्यलोलितैरमृताखंडैर्होमं कृत्वा तदशांशतस्तर्पणमार्ज्जनब्राह्मण भोजनानि पूर्ववत् कृत्वा सिद्धे मंत्रे प्रयोगान् कुर्यात् । तद्यथा । "दुग्धयुक्तैः सुधाखंडैर्मंत्री मासं सहस्रकम् ॥ आराधितेग्नौ जुहुयाद्वि धिवद्विजितेन्द्रियः ॥ १ ॥ संतुष्टः शंकरस्तेन सुधाप्लावितविग्रहः ॥ आयुरारोग्यसंपत्तियशःपुत्रान्विवर्द्धयेत् ॥ २ ॥ सुधावटौ तिला दूर्वा पयः सर्पिः पयो हविः ॥ इत्युक्तैः सप्तभिर्द्रव्यैर्जुहुयात्सप्तवासरम् ॥ ३ ॥ क्रमादशांशतो नित्यमष्टोत्तरमतंद्रितः ॥ सताधि

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कान् द्विजान्नित्यं भोजयेन्मधुरान्वितम् ॥ ४ ॥ विकारानुगुणं मंत्री वर्द्धयेद्धोमवासरान् ॥ होतृभ्यो दक्षिणां दद्यादरुणा गाः पयस्विनीः ॥ ५ ॥ गुरुं संप्रीणयेत्पश्चाद्धनाद्यैर्दैवताधिया ॥ अनेन विधिना साध्यः कृत्याद्रोहज्वरादिभिः ॥ ६ ॥ विमुक्तः सुचिरं जीवेच्छरदां शतमंजसा ॥ अभिचारे ज्वरे तीव्रे घोरोन्मादे शिरोगदे ॥ ७ ॥ असाध्यरोगक्ष्वेडादौ महादाहे महाभये ॥ होमोयं शांतिदः प्रोक्तः सर्वसंपत्प्रदायकः ॥ ८ ॥ द्रव्यैरेतैः प्रजुहुयात् त्रिजन्मसु[1] यथाविधि ॥ भोजयेन्मधुरैर्भोज्यैर्ब्राह्मणान्वेदपारगान् ॥ ९ ॥ दीर्घमायुरवाप्नोति वांछितां विंदति श्रियम् ॥ एकादशाहुतीर्नित्यं दूर्वाभिर्जुहुयाद्बुधः ॥ १० ॥ अपमृत्युजिदेष स्यादायुरारोग्यवर्द्धनः ॥ त्रिजन्मसु सुधावल्लीकाश्मरीबकुलोद्भवैः ॥ ११ ॥ समिद्भिरैः कृतो होमः सर्वमृत्युगदापहः ॥ सिद्धान्नैर्विहितो होमो महाज्वरविनाशनः ॥ १२ ॥ अपामार्गसमिद्धोमः सर्वामयविषूदनः ॥ १३ ॥ प्रणवरचितनालं मंत्रमध्यार्णपत्रं भृगुविलसितमध्यं पद्मयुग्मं तदंतः ॥ कृतवसतिमुमेशं वर्णनिर्यत्सुधार्द्रं कलयतु हृदि नित्यं सर्वदुःखप्रशांत्यै ॥ १४ ॥ यंत्राढ्ये कमले सौम्ये कलशं प्रोक्तवर्त्मना ॥ नवरत्नसमायुक्तं दुकूलाभ्यामलंकृतम् ॥ १५ ॥ आपूर्य सलिलैः शुद्धैस्तस्मिन्देवं प्रपूजयेत् ॥ उपचारैः षोडशभिर्विधानेन विधानवित् ॥ १६ ॥ अभिषिंचेत्प्रियं साध्यं विनीतं दत्तदक्षिणम् ॥ आधिव्याधिमहारोगकृत्याद्रोहनिवारणः ॥ अभिषेकोयमाख्यातः कीर्तिलक्ष्मीजयप्रदः ॥ १७ ॥ मध्ये साध्याक्षराढ्यं ध्रुवमभिविलिखेन्मध्यमं दिग्दलस्थं

१ जन्मनक्षत्रादित्रिषु । २ गुडूची । ३ पायसादिभिः ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कोणेष्वंत्यं मनोस्तत् क्षितिभुवनमथो दिक्षु चंद्रान् विदिक्षु ॥ टांतं यंत्रं तदुक्तं सकलभयहरं क्ष्वेडभूतापमृत्युव्याधिव्यामोहदुःख प्रशमनमुदितं श्रीप्रदं कीर्तिदायि ॥ १८ ॥ इति त्र्यक्षरीमृत्युंजयमंत्रप्रयोगः समाप्तः ॥ ॥ अथ त्र्यंबकमंत्रप्रयोगः ॥ (शारदातिलके) अथ त्रैयंबकं मंत्रमभिधास्याम्यनुष्टुभम् ॥ यं भजंतं नरं कालः स्वयं वीक्षितुमक्षमः ॥ १ ॥ तत्रादौ पूर्वोक्तशिवपंचाक्षरमंत्रवत् श्रीकंठादिन्यासांतं कृत्वा अस्य त्र्यंबकमंत्रस्य वसिष्ठऋषिरनुष्टुप् छंदरुयंबकः पार्वतीपतिर्देवता त्र्यं बीजं बं शक्तिः कं कीलकं सर्वेष्टसिद्धयर्थे जपे विनियोगः ॥ अथ ऋष्यादिन्यासः ॥ ॐ वसिष्ठऋषये नमः शिरसि ॥ १ ॥ ॐ अनुष्टुप्छंदसे नमः मुखे ॥ २ ॥ ॐ त्र्यंबकदेवतायै नमः हृदये ॥ ३ ॥ ॐ त्र्यं बीजाय नमः गुह्ये ॥ ४ ॥ ॐ बं शक्तये नमः पादयोः ॥ ५ ॥ ॐ कं कीलकाय नमः सर्वांगे ॥६॥ अथ करन्यासः ॥ ॐ त्र्यंबकं अंगुष्ठाभ्यां नमः ॥१॥ ॐ यजामहे तर्जनीभ्यां नमः ॥२॥ ॐ सुगन्धिम्पुष्टिवर्धनं मध्यमाभ्यां नमः ॥ ३ ॥ ॐ उर्वारुकमिवबंधनात् अनामिकाभ्यां नमः ॥४ ॥ ॐ मृत्योर्मुक्षीय कनिष्टिकाभ्यां नमः ॥५॥ ॐ मामृतात् करतलकरपृष्ठाभ्यां नमः ॥ ६॥ अथ हृदयादिषडंगन्यासः ॥ ॐ त्र्यंबकं हृदयाय नमः ॥१॥ ॐ यजामहे शिरसे स्वाहा ॥२॥ ॐ सुगंधिम्पुष्टिवर्धनं शिखायै वषट् ॥३॥ ॐ उर्वारुकमिवबंधनात् कवचायहुं ॥४॥ ॐ मृत्योर्मुक्षीय नेत्रत्रयायवौषट् ॥ ५ ॥ ॐ मामृतात् अस्त्राय फट् ॥ ६ ॥ अथांगन्यासः ॥ ॐ त्र्यं नमः पूर्वमुखे ॥ १ ॥ ॐ बं नमः पश्चिममुखे ॥ २ ॥ ॐ कं नमः दक्षिणमुखे ॥ ३ ॥ ॐ यं नमः उत्तरमुखे ४ ॥ ॐ जां नमः उरसि ॥ ५ ॥ ॐ मं नमः कंठे ॥ ६ ॥ ॐ हें नमः मुखे

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

॥ ७ ॥ ॐ सुं नमः नाभौ ॥ ८ ॥ ॐ गं नमः हृदि ॥ ९ ॥ ॐ धिं नमः पृष्ठे ॥ १० ॥ ॐ पुं नमः कुक्षौ ॥ ११ ॥ ॐ ष्टिं नमः लिंगे ॥ १२ ॥ ॐ वं नमः गुदे ॥ १३ ॥ ॐ धं नमः दक्षिणोरुमूले ॥ १४ ॥ ॐ नं नमः वामोरुमूले ॥ १५ ॥ ॐ उं नमः दक्षिणोरुमध्ये ॥ १६ ॥ ॐ वां नमः वामोरुमध्ये ॥ १७ ॥ ॐ रुं नमः दक्षिणजानुनि ॥ १८ ॥ ॐ कं नमः वामजानुनि ॥ ॥ १९ ॥ ॐ मिं नमः दक्षिणजानुवृत्ते ॥ २० ॥ ॐ वं नमः वामजानुवृत्ते ॥ २१ ॥ ॐ बं नमः दक्षिणस्तने ॥ २२ ॥ ॐ धं नमः वामस्तने ॥ २३ ॥ ॐ नां नमः दक्षिणपार्श्वे ॥ २४ ॥ ॐ मूं नमः वामपार्श्वे ॥ २५ ॥ ॐ त्यों नमः दक्षिणपादे ॥ ॥ २६ ॥ ॐ मुं नमः वामपादे २७ ॐ क्षीं नमः दक्षिणकरे ॥ २८ ॥ ॐ यं नमः वामकरे ॥ २९ ॥ ॐ मां नमः दक्षिणना सायाम् ॥ ३० ॥ मृं नमो वामनासायाम् ॥ ३१ ॥ ॐ तां नमः मूर्ध्नि ॥ ३२ ॥ इत्यक्षरन्यासः ॥ अथ पदन्यासः ॥ ॐ त्र्यंब कं शिरसि ॥ १ ॥ ॐ यजामहे भ्रुवोः ॥२ ॥ ॐ सुगंधिं नेत्रयोः ॥ ३ ॥ ॐ पुष्टिवर्द्धनं मुखे ॥ ४ ॥ ॐ उर्वारुकं गंडयोः ॥ ५ ॥ ॐ इव हृदये ॥ ६ ॥ ॐ बंधनात् जठरे ॥ ७ ॥ ॐ मृत्योः लिंगे ॥ ८ ॥ ॐ मुक्षीय हृदये ॥ ९ ॥ ॐ मा जान्वोः ॥ १० ॥ ॐ अमृतात् पादयोः ॥ ११ ॥ इति पदन्यासं कृत्वा ध्यायेत् ॥ हस्ताभ्यां कलशद्वयामृतरसैराप्लावयंतं शिरो द्वाभ्यां तौ दधतं मृगाक्षवलये द्वाभ्यां वहंतं परम् ॥ अंकं न्यस्तकरद्वयामृतघटं कैलासकांतं शिवं स्वच्छांभोजगतं नवेन्दुमुकुटं देवं त्रिनेत्रं भजे ॥ ॥ १ ॥ एवं ध्यात्वा पंचाक्षरोदिते पूर्वोक्ते पीठे मूलमंत्रेण मूर्तिं प्रकल्प्य तत्र वृषभध्वजं त्र्यंबकं देवं पाद्यादिपुष्पांतैरुपचारैः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

संपूज्य आवरणपूजां कुर्यात् ॥ तत्र प्रथमावरणे आग्नेयादिषट्कोणेषु हृदयादिषडंगानि पूजयेत् ॥ १ ॥ द्वितीयावरणे ॐ अर्कमूर्तये नमः ॥ १ ॥ ॐ इन्दुमूर्तये नमः ॥ २ ॥ ॐ वसुधामूर्तये नमः ॥ ३ ॥ ॐ तोयमूर्तये नमः ॥ ४ ॥ ॐ वह्निमूर्तये नमः ॥ ५ ॥ ॐ वायुमूर्तये नमः ॥ ६ ॥ ॐ आकाशमूर्तये नमः ॥ ७ ॥ ॐ यजमानमूर्तये नमः ॥ ८ ॥ इति मूर्तीरष्टौ पूजयेत् ॥ २ ॥ तृतीयावरणे तद्बाह्ये पूर्वादिषु ॐ रमायै नमः ॥ १ ॥ ॐ राकायै नमः ॥ २ ॥ ॐ प्रभायै नमः ॥३॥ ॐ ज्योत्स्नायै नमः ॥ ४ ॥ ॐ पूर्णायै नमः ॥ ५ ॥ ॐ ऊषायै नमः ॥ ६ ॥ ॐ पूरण्यै नमः ॥ ७ ॥ ॐ सुधायै नमः ॥ ८ ॥ इत्यष्टौ शक्तयः पूज्याः ॥ ३ ॥ चतुर्थावरणे तद्बाह्ये ॐ विश्वायै नमः ॥ १ ॥ ॐ विद्यायै नमः ॥ २ ॥ ॐ सितायै नमः ॥ ३ ॥ ॐ प्रह्वायै नमः ॥ ४ ॥ ॐ सारायै नमः ॥ ५ ॥ ॐ संध्यायै नमः ॥ ६ ॥ ॐ शिवायै नमः ॥ ७ ॥ ॐ निशायै नमः ॥ ८ ॥ इति शक्तीः पूजयेत् ॥ तद्बाह्ये पंचमावरणे ॐ आर्यायै नमः ॥१॥ ॐ प्रज्ञायै नमः ॥२॥ ॐ प्रभायै नमः ॥ ३ ॥ मेधायै नमः ॥४॥ ॐ शांत्यै नमः ॥५॥ ॐ कांत्यै नमः ॥६॥ ॐ धृत्यै नमः॥७॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ॐ सत्यै नमः ॥८॥ इत्यष्टौपूज्याः ॥ तद्बाह्ये षष्ठावरणे ॐ धरायै नमः ॥१॥ ॐ मायायै नमः ॥२॥ ॐ अविन्यै नमः॥३॥ ॐ पद्मायै नमः ॥४॥ ॐ शांतायै नमः ॥५॥ ॐ मोघायै नमः ॥६॥ ॐ जयायै नमः ॥७॥ ॐ अमलायै नमः ॥८॥ इत्यष्टौ शक्तयः पूज्याः ॥ ६ ॥ तद्बाह्ये भूपुरे सप्तमावरणे इन्द्रादीन् ॥ ७ ॥ अष्टमावरणे वज्राद्यायुधानि च पूजयेत् ॥ ८ ॥ ततो धूपदीपादि विसर्जनांतं कर्म कृत्वा लक्षमंत्रात्मकं पुरश्चरणं कुर्यात् (मंत्रो यथा) ॐ त्र्यंबकंय्यजामहेसुगन्धिम्पुष्टिवर्द्धनम् ॥ उर्व्वारुकमिवबन्धनान्मृत्योर्म्मुक्षीयमामृतात् ततो ॥ जपांते दशांशेन बिल्वं १ पलाशं २ खदिरं ३ वटं ४ तिलान् ५ सर्षपान् ६ पायसं ७ दुग्धं ८ दधि ९ दूर्वा च १० एतैर्दशद्रव्यैर्घृतसंप्लुतैर्हुत्वा तदशांशेन मूलमंत्रांते ॐत्र्यंबकं देवं तर्पयामि इति तर्पणं कृत्वा तदशांशेन आत्मानमभिषिंचामीत्यभिषिंच्य तदशांशेन ब्राह्मणान् भोजयेत् ॥ (शारदातिलके) एवं कृते प्रयोगार्हो जायतेऽयं महामनुः ॥ अयुतं जुहुयाद्बिल्वसमिद्भिः संपदे सुधीः ॥ १ ॥ जुहुयाद्ब्रह्मवृक्षस्य समिद्भिर्ब्रह्मतेजसे ॥ खादिरैरयुतं हुत्वा कांतिं पुष्टिमवाप्नुयात् ॥ २ ॥ वटवृक्षस्य समिधो जुहुयादयुतावधि ॥ धनधान्यसमृद्धः स्यादचिरेणैव साधकः ॥ ३ ॥ तिलैस्तत्संख्यया हुत्वा सर्वपापैः प्रमुच्यते ॥ सिद्धार्थैरयुतं हुत्वा शत्रून्विजयते नृपः ॥ ४ ॥ अनेनैव विधानेन नश्येन्मृत्युरकालजः ॥ ५ ॥ पायसेन कृतो होमो रक्षाश्रीकीर्तिकांतिदः ॥ गोदुग्धेन च शुद्धान्नं हुत्वा कृत्यां विनाशयेत् ॥ ६ ॥ अयमेव मतो होमः शांति श्रीसंपदावहः ॥ दधिहोमेन संवादं कुर्याद्विद्वेषिणोर्मिथः ॥ ७ ॥ प्रत्यहं जुहुयान्मंत्री दूर्वामष्टोत्तरं शतम् ॥ आमयान्निखिलाञ्जित्वा

१ पालाशवृक्ष्यस्य । २ सर्षपैः । ३ रोगान् ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

दीर्घमायुरवाप्नुयात् ॥ ८ ॥ जुहुयाज्जन्मदिवसे पायसान्नैर्घृताप्लुतैः ॥ इच्छन्ननिंदितां लक्ष्मीमारोग्यमतुलं यशः ॥ ९ ॥ गव्यदुग्धघृताक्ताभिर्दूर्वाभिर्जुहुयाद्वशी ॥ सविंशतिशतं सम्यक् स्वजन्मदिवसे सुधीः ॥१०॥ आमयैः सकलैर्मुक्तो जीवेद्वर्षशतं सुधीः ॥ काश्मरी समिधस्तिस्रः पयोन्नं त्रिशतं पृथक् ॥११॥ जुहुयाद्ब्राह्मणानंते भोजयेन्मधुरान्वितम् ॥ प्रीणयेद्धनधान्याद्यैरात्मनो गुरुमादरात्॥१२॥ अनामयमवाप्नोति दीर्घमायुःश्रिया सह ॥ सघृतेन पयोन्नेन हुत्वा पर्वणिपर्वणि ॥१३॥ राज्यश्रियमवाप्नोति षण्मासान्नात्र संशयः ॥ लाजैर्विशुद्धैर्जुहुयात्कन्यास्यै सा वरायते ॥ १४ ॥ क्षीरद्रुमसमिद्धोमाद्ब्राह्मणादीन्वशं नयेत् ॥ स्नात्वा सहस्रं प्रजपेदादित्याभिमुखो मनुम् ॥ १५ ॥ आधिव्याधिविनिर्मुक्तो दीर्घमायुरवाप्नुयात् ॥ अनेन मनुना सर्वं साधयेदिष्टमात्मनः ॥ १६ ॥ इति शारदातिलकोक्तत्र्यंबकमंत्रपुरश्चरणप्रयोगः ॥ अथ महामृत्युंजयपुरश्चरणप्रयोगः ॥ तत्र तावच्छुभेह्नि चंद्रतारादिबलान्विते सुमुहूर्त्ते शिवालयादिषु जपस्थानं प्रकल्प्य तत्र गोमयोपलेपनादिभिः शुद्धिं कृत्वा आसनभूमौ कूर्मसंशोधनं दीपस्थानशोधनं च कुर्य्यात् ॥ पूर्वदिने प्रायश्चित्तम् अयुतगायत्रीजपं च कृत्वा तद्रात्रौ पूर्वोक्तपद्धतिमार्गेण स्वप्नं विचार्य आरंभदिने प्रातर्नित्यावश्यकं समाप्य स्वासने प्राङ्मुख उपविश्य आचम्य प्राणानायम्य शांतिपाठं पठित्वा लक्ष्मीनारायणादिदेवान् प्रणमेत्। ततो देशकालौ संकीर्त्य अमुकगोत्रोऽमुकशर्म्मा ममात्मनः श्रुतिस्मृतिपुराणतंत्रोक्तफलावाप्तये अस्मिन् पुण्याहे मम जन्मराशेः सकाशान्नामराशेः सकाशाद्वा जन्मलग्नाद्वर्षलग्नाद्वोचराद्वा चतुर्थाष्टमद्वादशाद्यनिष्टस्थानस्थिताऽमुकग्रहसूचितं सूचयिष्यमाणं च यत्सर्वारिष्टं तद्विनाशार्थं सर्वदा तृतीयैकादशशुभस्थानस्थितवदुत्तमफलप्राप्त्यर्थं “ अथवा” अमुकमारकग्रहदशान्तर्दशा तत्संबंधिदशा चोपदशा दिनदशा वा

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

षष्ठाष्टमद्वादशादिनिषिद्धभावाधिपतिदशा तज्जनितपीडाऽल्पायुराधिदैवाधिभौतिकाध्यात्मिकजनितक्लेशनिवृत्तिपूर्वकायुरारोग्यार्थं परमैश्वर्य्यादिप्राप्त्यर्थं श्रीमहामृत्युंजयदेवताप्रीत्यर्थं च अमुकसंख्यया श्रीमहामृत्युंजयमंत्रजपं विप्रद्वारा कारयिष्ये इति ॥ "अथवा" मम जीवच्छरीराऽविरोधेनामुकरोगस्य समूलनाशनेनापमृत्युनिवारणद्वारा क्षिप्रारोग्यार्थं (वा) विषूचिकादिजनमारोपसर्गशांत्यर्थं वा वृष्टिकामार्थम् "अमुकाभियोगनिवृत्त्यर्थं वा" अमुकदुःस्वप्ननिरासार्थं अमुकदिग्यात्रानिर्विघ्नपूर्वकसिद्ध्यर्थं वा प्रतिसन्मुखशुक्रदोषनिवारणार्थं वा काकमैथुनदर्शनादिसूचितसर्वारिष्टनिवृत्त्यर्थं वा पल्लीपतनसरठारोहणामुकदुष्टाङ्गस्फुरणजनिताऽशुभफलविनाशार्थं अथवा अमुकदुष्टनक्षत्रामुकमृत्युयोगादिदुष्टयोगदुष्टतिथिपापवारदुष्टचंद्रोत्पन्नज्वराद्यमुकव्याधेर्जीवच्छरीराविरोधेन समूलनाशार्थम् अमुकसंख्यापरिमितश्रीमहामृत्युंजयमंत्रजपं विप्रद्वाराहं करिष्ये ॥ इति ॥ " एवं कामनाभेदेन संकल्पो ज्ञेयः " तदंगत्वेन गणपतिपूजनं पुण्याहवाचनं मातृकापूजनं नांदीश्राद्धमाचार्यजापकवरणं च करिष्ये ॥ इति च संकल्प्य पूर्वोक्तपद्धतिमार्गेण जापकवरणांतं कर्म्म कुर्य्यात् ॥ "इति विप्रद्वारा कारिते पुरश्चरणे प्रकारः" ततो जपकर्ता स्वासने प्राङ्मुख उदङ्मुखो वा उपविश्य धृतरुद्राक्षभस्मत्रिपुंड्रः । आचम्य । प्राणानायम्य । देशकालौ स्मृत्वा । मम "यजमानस्य वा" शरीरे ज्वराद्यमुकरोगनिरासद्वारा सद्य आरोग्यार्थं "वा अमुककामनासिद्ध्यर्थं" श्रीमहामृत्युंजयदेवताप्रीत्यर्थम् अमुकसंख्यापरिमित श्रीमहामृत्युंजयजपं करिष्ये ॥ इति प्रत्याहिकं संकल्प्य । ॐ गुरवे नमः । ॐ गणपतये नमः । ॐ इष्टदेवतायै नमः । इति नत्वा पूर्वोक्तभूतशुद्ध्यादिश्रीकंठादिकलामातृकान्यासांतं कुर्य्यात् ॥ अथ जपप्रयोगः (मंत्रमहोदधौ) महामृत्युंजयं वक्ष्ये दुरितापन्नि

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वारणम् ॥ यं प्राप्य भार्गवः शंभोर्मृतान् दैत्यानजीवयत् ॥ १ ॥ अस्य श्रीमहामृत्युंजयमंत्रस्य वामदेवकहोलवसिष्ठा ऋषयः । पंक्तिगायत्र्यनुष्टुभश्छंदांसि । सदाशिवमहामृत्युंजयरुद्रो देवता । ह्रीं शक्तिः । श्रीं बीजम् । महामृत्युंजयप्रीतये ममाभीष्टसिद्धयर्थे जपे विनियोगः । अथ ऋष्यादिन्यासः । ॐ वामदेवकहोलवसिष्ठऋषिभ्यो नमः मूर्ध्नि ॥ १ ॥ ॐ पंक्तिगायत्र्यनुष्टुप्छंदोभ्यो नमः वक्त्रे ॥ २ ॥ ॐ सदाशिवमहामृत्युंजयरुद्रदेवतायै नमः हृदि ॥ ३ ॥ ॐ ह्रा शक्त्यै नमः लिंगे ॥ ४ ॥ ॐ श्रीं बीजाय नमः पादयोः ॥ ५ ॥ इति ऋष्यादिन्यासः । अथ करन्यासः । ॐ हौं ॐ जूं सः भूर्भुवः स्वः त्र्यंबकं ॐ नमो भगवते रुद्राय शूलपाणये स्वाहा अंगुष्ठाभ्यां नमः ॥१॥ ॐ हौं ॐ जूं सः भूर्भुवः स्वः यजामहे ॐ नमो भगवते रुद्राय अमृतमूर्तये मां जीवय तर्जनीभ्यां नमः ॥ २ ॥ ॐ हौं ॐ जूं सः भूर्भुवः स्वः सुगंधिं पुष्टिवर्धनं ॐ नमो भगवते रुद्राय चन्द्रशिरसे जटिने स्वाहा मध्यमाभ्यां नमः ॥ ३ ॥ ॐ हौं ॐ जूं सः भूर्भुवः स्वः उर्वारुकमिवबंधनात् ॐ नमो भगवते रुद्राय त्रिपुरांतकाय ह्रां ह्रीं अनामिकाभ्यां नमः ॥४॥ ॐ हौं ॐ जूं सः भूर्भुवः स्वः मृत्योर्मुक्षीय ॐ नमो भगवते रुद्राय त्रिलोचनाय ऋग्यजुःसाममंत्राय कनिष्ठिकाभ्यां नमः ॥ ५ ॥ ॐ हौं ॐ जूं सः भूर्भुवः स्वः मामृतात् ॐ नमो भगवते रुद्राय ॐ अग्नित्रयाय ज्वलज्वल मां रक्षरक्ष अघोरास्त्राय करतलकरपृष्ठाभ्यां नमः ॥ ६ ॥ इति करन्यासः । एवं हृदयादिन्यासं कुर्य्यात् । अथ वर्णन्यासः । ॐ हौं ॐ जूं सः भूर्भुवः स्वः त्र्यं नमः पूर्वमुखे ॥ १ ॥ ॐ हौं ॐ जूं सः भूर्भुवः स्वः बं नमः पश्चिममुखे ॥ २ ॥ ॐ हौं ॐ जूं सः भूर्भुवः स्वः कं नमः दक्षिणमुखे ॥ ३ ॥ ॐ हौं ॐ जूं सः भूर्भुवः स्वः यं नमः उत्तरमुखे ॥ ४ ॥ ॐ हौं ॐ जूं सः भूर्भुवः स्वः जां नमः उरसि ॥ ५ ॥ ॐ हौं ॐ जूं सः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भूर्भुवः स्वः मं नमः कंठे ॥ ६ ॥ ॐ हौं ॐ जूँ सः भूर्भुवः स्वः हें नमः मुखे ॥ ७ ॥ ॐ हौं ॐ जूँ सः भूर्भुवः स्वः सुं नमः नाभौ ॥ ८ ॥ ॐ हौं ॐ जूं सः भूर्भुवः स्वः गं नमः हृदि ॥ ९ ॥ ॐ हौं ॐ जूँ सः भूर्भुवः स्वः धिंनमः पृष्ठे ॥ १० ॥ ॐ हौं ॐ जूँ सः भूर्भुवः स्वः पुं नमः कुक्षौ ॥ ११ ॥ ॐ हौं ॐ जूं सः भूर्भुवः स्वः ष्टिं नमः लिंगे ॥ १२ ॥ ॐ हौं ॐ जूँ सः भूर्भुवः स्वः वं नमः गुदे ॥ १३ ॥ ॐ हौं ॐ जूं सः भूर्भुवः स्वः धं नमः दक्षिणोरूमूले ॥ १४ ॥ ॐ हौं ॐ जूं सः भूर्भुवः स्वः नं नमः वामोरुमूले ॥ १५ ॥ ॐ हौं ॐ जूं सः भूर्भुवः स्वः उं नमः दक्षिणोरुमध्ये ॥ १६ ॥ ॐ हौं ॐ जूं सः भूर्भुवः स्वः वां नमः वामोरुमध्ये ॥ १७ ॥ ॐ हौं ॐ जूं सः भूर्भुवः स्वः रुं नमः दक्षिणजानुनि ॥ १८ ॥ ॐ हौं ॐ जूं सः भूर्भुवः स्वः कं नमः वामजानुनि ॥ १९ ॥ ॐ हौं ॐ जूं सः भूर्भुवः स्वः मिं नमः दक्षिणजानुवृत्ते ॥ २० ॥ ॐ हौं ॐ जूं सः भूर्भुवः स्वः वं नमः वामजानुवृत्ते ॥ २१ ॥ ॐ हौं ॐ जूं सः भूर्भुवःस्वः वं नमः दक्षिणस्तने ॥ २२ ॥ ॐ हौं ॐ जूं सः भूर्भुवः स्वः धं नमः वामस्तने ॥ २३ ॥ ॐ हौं ॐ जूं सः भूर्भुवः स्वः नां नमः दक्षिणपार्श्वे ॥ २४ ॥ ॐ हौं ॐ जूं सः भूर्भुवः स्वः मृं नमः वाम पार्श्वे ॥ २५ ॥ ॐ हौं ॐ जूं सः भूर्भुवः स्वः त्यों नमः दक्षिणपादे ॥ २६ ॥ ॐ हौं ॐ जूंसः भूर्भुवः स्वः मुं नमः वामपादे ॥ २७ ॥ ॐ हौं ॐ जूं सः भूर्भुवः स्वः क्षीं नमः दक्षिणकरे ॥ २८ ॥ ॐ हौं ॐ जूंसः भूर्भुवः स्वः यं नमः वामकरे ॥ २९ ॥ ॐ हौं ॐ जूं सः भूर्भुवः स्वः मां नमः दक्षिणनासायाम् ॥ ३० ॥ ॐ हौं ॐ जूं सः भूर्भुवः स्वः मृं नमः वामनासायाम् ॥३१॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ॐ हौं ॐ जूं सः भूर्भुवः स्वः तां नमः मूर्ध्नि ॥३२॥ इत्यक्षरन्यासः॥ ॐ त्र्यंबकं शिरसि॥१॥ ॐ यजामहे भ्रुवोः ॥२॥ॐ सुगंधिं नेत्रयोः ॥३॥ ॐ पुष्टिवर्धनं मुखे ॥ ४ ॥ ॐ उर्वारुकं गंडयोः ॥ ५ ॥ ॐ इव हृदये ॥६॥ ॐ बंधनात् जठरे ॥७॥ ॐ मृत्योः लिंगे ॥ ॥ ८ ॥ ॐ मुक्षीय ऊर्वोः ॥ ९ ॥ ॐ मा जान्वोः ॥ १० ॥ ॐ अमृतात् पादयोः ॥ ११ ॥ इति पदन्यासः ॥ ततो मूलेन व्यापकं कृत्वा ध्यायेत्॥अथ ध्यानम् ॥ हस्तांभोजयुगस्थकुंभयुगलादुद्धृत्य तोयं शिरः सिंचंतं करयोर्युगेन दधतं स्वांके सकुंभौ करौ ॥ अक्षस्रङ्मृगहस्तमंबुजगतं मूर्द्धस्थचंद्रस्रवत्पीयूषोन्नतनुं? भजे सगिरिजं मृत्युंजयं त्र्यंबकम् ॥ १ ॥ इति ध्यात्वा मुष्टिमुद्रां मृगमुद्रां शक्तिमुद्रां लिंगमुद्रां पंचमुखां मुद्रां च प्रदर्श्य पीठपूजां कुर्यात् ॥ तद्यथा ॥ ॐ मंडूकादिपरतत्त्वांतपीठदेवताभ्यो नमः । इति पीठं संपूज्य। ॐ वामायै नमः ॥१॥ ॐ ज्येष्ठायै नमः ॥ २ ॥ ॐ रौद्र्यै नमः ॥३॥ ॐ काल्यै नमः ॥४॥ ॐ कलविकरिण्यै नमः ॥ ॐ बलविकरिण्यै नमः ॥ ६ ॥ ॐ बलप्रमथन्यै नमः ॥ ७ ॥ ॐ सर्वभूतदमन्यै नमः ॥ ८ ॥ मध्ये ॐ मनोन्मन्यै नमः ॥ ९ ॥ इति पीठशक्तीः पूजयेत् ॥ ततः ॐ नमो भगवते सकलगुणात्मशक्तियुक्तायाऽनंताय योगपीठात्मने नमः ॥ इति मंत्रेणा सनं दत्वा तत्र ॐ महीद्यौरित्यादिपूर्वोक्तपद्धतिमार्गेण यथाविधि पूर्णपात्रांतं ताम्रकलशं संस्थाप्य तत्वायामीति वरुणमावाह्य संपूज्य कलशस्य मुखे विष्णुरित्याद्यभिमंत्र्य " देवदानवसंवादे " इत्यादि प्रार्थयेत् । ततः कलशोपरि कौशेयवस्त्रं प्रसार्य तत्र अष्ट गंधेन मृत्युंजययंत्रं विलिख्य अथवा ताम्रमयं यंत्रं संस्थाप्य तन्मध्ये प्रधानदेवत्र्यंबकप्रतिमां पलसुवर्णरचितां अभ्युक्ता

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

रणपूर्वकं मूलेन संस्थाप्य प्राणप्रतिष्ठां कृत्वा आवाहनादिपुष्पांतै
रुपचारैर्मूलमंत्रेण संपूज्य आवरणपूजां कुर्यात् ॥ तद्यथा मध्ये ॐ
ईशानःसर्वविद्यानामीश्वरःसर्वभूतानाम्ब्रह्माधिपतिर्ब्रह्मणोधिपतिर्ब्रह्मा
शिवोमेअस्तुसदाशिवोम् ॥ इतिमंत्रेणेशानम् ॥ १ ॥ पूर्वे ॐ
तत्पुरुषाय विद्महे महादेवाय धीमहि तन्नो रुद्रः प्रचोदयात् ॥ इति
तत्पुरुषम् ॥ २ ॥ दक्षिणे ॐ अघोरेभ्योऽथघोरेभ्योघोरघोरतरेभ्यः
सर्वेभ्यःसर्वसर्वेभ्योनमस्तेअस्तुरुद्ररूपेभ्यः ॥ इति अघोरम् ॥३॥
पश्चिमे ॐ वामदेवायनमोज्येष्ठायनमःश्रेष्ठायनमोरुद्रायनमःकाला
यनमःकलविकरणायनमोबलविकरणायनमः ॥ इति वामदेवम्
॥ ४ ॥ उत्तरे ॐ सद्योजातंप्रपद्यामिसद्योजातायवैनमोनमःभवेभ
वेनातिभवेभवस्वमां भवोद्भवाय नमः इति सद्योजातं च पूजयेत्॥५॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

इति प्रथमावरणम् ॥ १ ॥ ततः ईशानादिसमीपेषु निवृत्त्याद्याः कलाः क्रमात् संस्थाप्य ॐ निवृत्त्यै नमः ॥ १ ॥ ॐ प्रतिष्ठायै नमः ॥ २ ॥ ॐ विद्यायै नमः ॥ ३ ॥ ॐ शांत्यै नमः ॥ ४ ॥ शांत्यतीतायै नमः ॥ ५ ॥ इति संपूज्य ततः षट्कोणे आग्नेयादिकोणकेसरेषु मध्ये दिक्षु च पूर्वोक्तन्यासक्रमेण हृदयादिषडंगानि संपूजयेत् इति ॥ द्वितीयावरणम् ॥२॥ तद्बहिः पूर्वादिक्रमेण ॐ सूर्यमूर्तये नमः ॥ १ ॥ ॐ इंदुमूर्तये नमः ॥ २ ॥ ॐ क्षितिमूर्तये नमः ॥ ३ ॥ ॐ तोयमूर्तये नमः ॥ ४ ॥ ॐ अग्निमूर्तये नमः ॥५॥ ॐ पवनमूर्तये नमः ॥६॥ ॐ आकाशमूर्तये नमः ॥७॥ ॐ यज्ञमूर्तये नमः ॥८॥ इति तृतीयावरणम् ॥३॥ तद्बहिः ॐ रमायै नमः ॥ १ ॥ ॐ राकायै नमः ॥ २ ॥ ॐ प्रभायै नमः ॥ ३ ॥ ॐ ज्योत्स्नायै नमः ॥ ४ ॥ ॐ पूर्णायै नमः ॥ ५ ॥ ॐ ऊषायै नमः ॥ ६ ॥ ॐ पूरण्यै नमः ॥ ७ ॥ ॐ सुधायै नमः ॥ ८ ॥ इति चतुर्थावरणम् ॥ ४ ॥ ॐ विश्वायै नमः ॥ १ ॥ ॐ वंद्यायै नमः ॥ २ ॥ सितायै नमः ॥ ३ ॥ ॐ ब्रह्मायै नमः ॥ ४ ॥ ॐ सारायै नमः ॥ ५ ॥ ॐ संध्यायै नमः ॥ ६ ॥ ॐ शिवायै नमः ॥ ७ ॥ ॐ निशायै नमः ॥ ८ ॥ इति पंचमावरणम् ॥ ५ ॥ तद्बहिः ॐ आर्यायै नमः ॥ १ ॥ ॐ प्रज्ञायै नमः ॥ २ ॥ ॐ प्रभायै नमः ॥ ३ ॥ ॐ मेधायै नमः ॥ ४ ॥ ॐ शांत्यै नमः ॥ ५ ॥ ॐ कांत्यै नमः ॥ ६ ॥ ॐ धृत्यै नमः ॥ ७ ॥ ॐ मत्यै नमः ॥ ८ ॥ इति षष्ठावरणम् ॥६॥ तद्बहिः ॐ धरायै नमः ॥ १ ॥ ॐ उमायै नमः ॥ २ ॥ ॐ पावन्यै नमः ॥ ३ ॥ ॐ पद्मायै नमः ॥ ४ ॥ ॐ शांतायै नमः ॥ ५ ॥ ॐ अमोघायै नमः ॥ ६ ॥ ॐ जयायै नमः ॥ ७ ॥ ॐ अमलायै नमः ॥८॥ इति सप्तमावरणम् ॥ ७ ॥ तद्बहिः ॐ अनंताय नमः ॥१॥ ॐ सूक्ष्माय नमः ॥ २ ॥ ॐ शिवोत्तमाय नमः ॥ ३ ॥ ॐ एकनेत्राय

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नमः ॥ ४ ॥ ॐ एकरुद्राय नमः ॥ ५ ॥ ॐ त्रिमूर्तये नमः ॥ ६ ॥ ॐ श्रीकंठाय नमः ॥ ७ ॥ ॐ शिखंडिने नमः ॥ ८ ॥ इति
अष्टमावरणम् ॥ ८ ॥ तत उत्तरदिशमारभ्य ॐ उमायै नमः ॥ १ ॥ ॐ चंडेश्वराय नमः ॥ २ ॥ ॐ नंदिने नमः ॥ ३ ॥ ॐ महा
कालाय नमः ॥ ४ ॥ ॐ गणेशाय नमः ॥ ५ ॥ ॐ वृषभायनमः ॥ ६ ॥ ॐ भृंगिरिटये नमः ॥ ७ ॥ ॐ स्कंदाय नमः ॥ ८ ॥ इति
नवमावरणम् ॥ ९ ॥ तद्बहिः ॐ ब्राह्म्यै नमः ॥ १ ॥ ॐ माहेश्वर्यै नमः ॥ २ ॥ ॐ कौमार्यै नमः ॥ ३ ॥ ॐ वैष्णव्यै नमः
॥ ४ ॥ ॐ वाराह्यै नमः ॥ ५ ॥ ॐ इंद्राण्यै नमः ॥ ६ ॥ ॐ चामुंडायै नमः ॥ ७ ॥ ॐ महालक्ष्म्यै नमः ॥ ८ ॥ इति दश
मावरणम् ॥ १० ॥ तद्बाह्ये चतुरस्रे भूपुरे पूर्वादिक्रमेण इन्द्रादिदशदिक्पालान् तद्बाह्ये तत्तत्समीपे वज्राद्यायुधानि च पूजयेत् ॥
॥ १२ ॥ इत्यावरणपूजां कृत्वा धूपदीपनैवेद्यतांबूलदक्षिणानीराजनप्रदक्षिणानमस्कारैर्मूर्तिं पूजयेत् ॥ ततः कृतांजलिः ॥ ॐ मृत्युं
जय महारुद्र त्राहि मां शरणागतम् ॥ जन्ममृत्युजरारोगैः पीडितं कर्मबंधनैः ॥ १ ॥ तावकस्त्वद्गतप्राणस्त्वच्चित्तोहं सदा मृड ॥
इति विज्ञाप्य देवेशं जपेन्मृत्युंजयं परम् ॥ २ ॥ इति प्रार्थ्य मध्यंदिनावधि जपं कुर्यात् ॥ मंत्रस्वरूपम् । " ॐ हौं ॐ जूँसः
भूर्भुवः स्वः त्र्यंबकं यजामहे सुगन्धिम्पुष्टिवर्धनम् ॥ उर्वारुकमिवबंधनान्मृत्योर्मुक्षीयमामृतात् भूर्भुवः स्वरोंजूँसः हौं ॐ ॥५०॥
ततो जपांते मालां शिरसि निधाय प्राणानायम्य पुनः षडंगन्यासं कुर्यात् ॥ तद्यथा ॐ हौं ॐ जूं सः भूर्भुवः स्वः त्र्यंबकं ॐ नमो
भगवते रुद्राय शूलपाणये स्वाहा हृदयाय नमः ॥ १ ॥ ॐ हौं ॐ जूं सः भूर्भुवः स्वः यजामहे ॐ नमो भगवते रुद्राय अमृत
मूर्तये मां जीवय शिरसे स्वाहा ॥ २ ॥ ॐ हौं ॐ जूं सः भूर्भुवः स्वः सुगन्धिम्पुष्टिवर्द्धनम् ॐ नमो भगवते रुद्राय चन्द्रशिरसे

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

जटिने स्वाहा शिखायै वषट् ॥ ३ ॥ ॐ ह्रौं ॐ जूं सः भूर्भुवः स्वः उर्वारुकमिवबंधनात् ॐ नमो भगवते रुद्राय त्रिपुरांतकाय ह्रां ह्रीं कवचायहुम् ॥ ४॥ ॐ ह्रौं ॐ जू सः भूर्भुवः स्वः मृत्योर्मुक्षीय ॐ नमो भगवते रुद्राय त्रिलोचनाय ऋग्यजुः साममंत्राय नेत्रत्रयाय वौषट् ॥ ५ ॥ ॐ ह्रौं ॐ जूं सः भूर्भुवः स्वः मामृतात् ॐ नमो भगवते रुद्राय अग्नित्रयाय ज्वलज्वल मां रक्षरक्ष अघोरास्त्राय अस्त्राय फट् ॥ ६ ॥ इति षडंगन्यासं कृत्वा महामृत्युंजयकवचं पठित्वा " गुह्यातिगुह्यगोप्ता त्वं गृहाणा स्मत्कृतं जपम् ॥ सिद्धिर्भवतु मे देव त्वत्प्रसादान्महेश्वर ॥१॥ इति प्रार्थ्य ॐ अनेन महामृत्युंजयजपाख्येन कर्मणा श्रीमहामृत्युं जयः प्रीयतामिति जपमीश्वरार्पणं कुर्यात् ॥ एवं लक्षमंत्रजपात्मकं पुरश्चरणं कृत्वा जपान्ते दशांशतो दशद्रव्यैर्होमं कुर्य्यात् दश द्रव्याणि । दशद्रव्यैः प्रजुहुयात्तानि बिल्वफलं तिलाः ॥ पायसं सर्पिषा दुग्धं दधि दूर्वा च सप्तमी ॥ वटात् पलाशात्खदिरात्समिधो मधुराप्लुताः इति ॥ ततो होमांते जले देवं मृत्युंजयं संपूज्य होमदशांशेन मंत्रान्ते ॐ मृत्युंजयं तर्पयामीत्युक्त्वा दुग्धमिश्रजलेन तर्पणं कुर्यात् ॥ ततस्तर्पणदशांशेन मंत्रांते आत्मानमभिषिंचामि नमः ॥ इति यजमानमूर्ध्न्यभिषेकः ॥ "होमतर्पणाभिषेकाणां मध्ये यदेव न संभवति तत्स्थाने तत्तद्द्विगुणो जपः कार्य्यः" ततोऽभिषेकदशांशतो वाऽष्टोत्तरशतब्राह्मणभोजनम् ॥ एवं कृते सिद्धो मंत्रो भवेत् ॥ (मंत्रमहोदधौ) "जन्मभे दशमे तस्मात्पुनश्चैकोनविंशके ॥ जुहुयाद्यः सुधावह्न्याः समिधश्चतुरंगुलाः ॥१॥ सरोगान्सकलाञ्शत्रून्पराभूयश्रियायुतः ॥ मोदते पुत्रपौत्राद्यैः शतवर्षाणि साधकः ॥२॥ समि

१ अमृतायाः ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

द्भिः श्रीफलोत्थाभिर्होमः संपत्तिसिद्धये। पलाशतरुजाभिस्तु ब्रह्मवर्चससिद्धये ॥३॥ वटोत्थाभिर्धनप्राप्त्यै खादिरीभिस्तु कांतये ॥ तिलैरधर्म्मनाशाय सर्षपैः शत्रुनष्टये ॥४॥ पायसेन कृतो होमः कांतिश्रीकीर्त्तिदायकः ॥ कृत्यामृत्युक्षयकरो दध्ना संवादसिद्धिदः ॥५॥ होमसंख्या तु सर्वत्रायुतमानेन कीर्तिता ॥ अष्टोत्तरशतं दूर्वात्रिकहोमाद्रुजां क्षयः ॥ ६ ॥ स्वजन्मदिवसे यस्तु पायसैर्मधुरान्वितैः ॥ जुहोति तस्य वर्द्धते कमलारोग्यकीर्तयः ॥७॥ गुडूचीबकुलोत्थाभिः समिद्भिर्हवनं नृणाम् ॥ जन्मतारात्रये रोगान्मृत्युं चापि विनाशयेत् ॥८॥ प्रत्यहंजुहुयाद्वा अपमृत्युविनष्टये ॥ किं बहूक्तेन सर्वेष्टं प्रयच्छति शिवो नृणाम् ॥ ९ ॥ अपामार्गसमिद्भिश्च सिद्धान्नैर्ज्वरनष्टये॥दुग्धाक्तैरमृताखंडैर्मांसं होमोखिलाप्तये ॥१०॥ इति मंत्रमहोदधिप्रोक्तो महामृत्युंजयमंत्रपुरश्चरणप्रयोगः समाप्तः॥

अथ वसिष्ठकल्पोक्तं महामृत्युंजयादिविधानं शांतिरत्ने ॥ "त्र्यंबकस्य विधानं तु कीर्त्तयिष्ये मुनीश्वराः ॥ यथोक्तविधिना युक्तं संस्मृतं ब्रह्मणा पुरा ॥ १ ॥ मृत्युंजयस्त्रिधा प्रोक्त आद्यो मृत्युंजयः स्मृतः ॥ मृतसंजीवनी चैव महामृत्युंजयस्तथा ॥२ ॥ मृत्युंजयः केवलः स्यात्पुटितो व्याहृतित्रयैः ॥ तारं त्रिबीजं व्याहृत्यः पुटितो मृतजीवनी ॥ ३ ॥ तारं त्रिबीजं व्याहृत्यः पुटितैस्तैस्त्रियंबकः महामृत्युंजयः प्रोक्तः सर्वमन्त्रविशारदैः ॥ ४ ॥ "तत्रैवविशेषः" प्रणवांते प्रसादश्च मृतिहारकमेव च ॥ भूरादिव्याहृतयश्च त्र्यं बकेति च ऋक् ततः ॥ ५ ॥ विपर्येण त्रिबीजं च तद्वच्च व्याहृतित्रयः ॥ स्वाहांतो मनुरेषोयं शुक्रेणाराधितः पुरा ॥ ६ ॥ महामृत्युं जय इति विश्रुतो भुवनत्रये ॥ ॐकारैः सहितः षड्भिश्चतुर्दशभिरेव च ॥ मृत्युंजयं तं विधिवदुपास्येप्सितमाप्नुयात् ॥ ७ ॥

१ बिल्व । २ दूर्वात्रिक । ३ रोगाणाम् । ४ प्रणवम् । ५ हौंजूंसः । ६ हौं । ७ जूँसः ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

आदौ प्रासादबीजं तदनु मृतिहरं तारकं व्याहृतीश्च प्रोच्चार्य्य त्र्यंबकं यो जपति मृतिहरं भूय एवैतदाद्यम् ॥ कृत्वा न्यासं षडंगं स्रव दमृतकरं मण्डलांतः प्रविष्टं ध्यात्वा योगीशरुद्रं स जयति मरणं शुक्रविद्याप्रसादात् ॥ ८ ॥ अथ मन्त्रस्वरूपम् ॥ ॐ भूः ॐ भुवः ॐ स्वः ॐ त्र्यंबकं यजामहे इति ऋक् ॐ स्वः ॐ भुवः ॐ भूः ॐ ४८ इत्यष्टचत्वारिंशद्वर्णात्मकः केवलमृत्युंजयः ॥१॥ ॐ हौं जूं सः ॐ भूर्भुवः स्वः ॐ त्र्यंबकं यजामह इति ऋक् । ॐ स्वः भुवः भूः ॐ सः जूं हौं ॐ ५२ इति द्विपञ्चाशद्वर्णात्मको मृतसंजीवनी मन्त्रः ॥ अथ महामृत्युंजयमन्त्रः ॐ हौं ॐ जूं ॐ सः ॐ भूः ॐ भुवः ॐ स्वः ॐ त्र्यंबकं यजामहे सुगन्धिपुष्टिवर्द्धनम् ॥ उर्वारुक मिवबंधनान्मृत्योर्मुक्षीयमामृतात् ॐ स्वः ॐ भुवः ॐ भूः ॐ सः ॐ जूं ॐ हौं ॐ स्वाहा ६२ इति द्विषष्टिवर्णात्मको महामृत्यु जयः शुक्राऽराधितो मंत्रः ॥ एतन्मन्त्रत्रयाणां न्यासध्यानादिपुरश्चरणं च पूर्वोक्तमन्त्रवत् ज्ञेयम् ॥ प्रयोगविशेषो विधानमाला याम् " ग्रहपीडासु सर्वासु महागदनिपीडने ॥ वियोगे बांधवानां च जनमार उपस्थिते ॥ १ ॥ राज्यभङ्गे धनग्लानौ क्षिप्रमृत्यु विनाशने ॥ अभियोगे समुत्पन्ने मनोधर्मविपर्यये ॥ २ ॥ मृत्युंजयस्य देवस्य विधानं क्रियते बुधैः ॥ राष्ट्रभंगे जनक्लेशे महा रोगनिपीडने ॥३॥ कोटिसंख्यो जपः प्रोक्तो मुनिभिस्तत्त्वदर्शिभिः ॥ सामान्यगदपीडायां दुष्टस्वप्नस्य दर्शने ॥ ४ ॥ मृत्युंजयस्य देवस्य जपो लक्षमितः शुभः ॥ अपमृत्युविनाशाय जपोऽयुतमितः स्मृतः ॥ ५ ॥ दुर्वार्ताश्रवणे जाप्यं सुहृदामृतृते क्षुते ॥ यात्रा यामयुतं कार्य्यं सहस्रं वा समाहितैः ॥ ६ ॥ पूर्णस्य स्वस्य जाप्यस्य दशांशहवनं मतम् ॥ पायसेन च साज्येन समिद्भिस्तिल

१ राजकीयव्याधौ ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सर्पिषा॥७॥श्रीवृक्षस्य[1] फलैः पत्रैः कमलैः शतपत्रकैः॥खर्जूरीभिश्च साज्याभिरन्यैर्यज्ञफलैस्तथा॥८॥हवनं कारयेद्विद्वान् कृत्वाचार्यार्चनक्रियाम् ॥ ब्राह्मणान् भोजयेत् सम्यग् दशांशेन यजेत्तथा ॥ ९ ॥ एवं कृते विधाने च सर्वकर्म्मफलं लभेत् ॥ चिंतितार्थस्य सिद्धिः स्यान्नात्र कार्य्या विचारणा ॥ १० ॥ शांतिरत्नेविशेषः—आयुःकामो घृतेनाग्नौ जुहुयाल्लक्षसंख्यया ॥ अयुतं वा सहस्रं वा शतमष्टोत्तरं तु वा ॥ ११ ॥ आरोग्यकामो जुहुयादर्ककाष्ठैर्घृतप्लुतैः ॥ पयसा वापि जुहुयाद्द्रव्येनाज्येन वा पुनः ॥ १२ ॥ पलाशसमिधो वापि सर्वरोगप्रशांतये ॥ अच्छिद्रैराम्रपर्णैस्तु पयोक्तैर्जुहुयाज्ज्वरे ॥ १३ ॥ गुडूचीखंडकैर्वापि खादिरैर्वा घृतप्लुतैः ॥ प्रमेहे मधुना होमः पयसा वा घृतेन वा ॥ १४ ॥ औदुंबरसमिद्भिर्वा होम आमलकेन वा ॥ गुल्मे शाल्मलिहोमः स्यात्तिलैः कृष्णैर्घृतेन वा ॥ १५ ॥ वर्धमानसमिद्धोमः सद्यः शूलहरो भवेत् ॥ करंजसमिधो वापि निर्गुंडीसमिधोपि वा ॥ १६ ॥ तैलेनाभ्यज्य जुहुयाद्वातरोगप्रशांतये ॥ शमीसमिद्भिर्जुहुयादतिसारप्रशान्तये ॥ १७ ॥ शांत्यर्थमक्षिरोगस्य पलाशसमिधः स्मृताः ॥ उन्मत्तसमिधो हुत्वा अपस्मारात्प्रमुच्यते ॥ १८॥ कुबेराक्षेंद्रवल्लीभ्यां नेत्रशूलेषु होमयेत् ॥ तैलेनाभ्यज्य जुहुयाद्द्रव्रखंडैस्तथैव च॥१९॥ मातुलुंगगुडूचीनां होमः कामलनाशनः॥ मधुरत्रयहोमेन शांतिः स्याद्राजयक्ष्मणाम्॥२०॥ होमाच्च फलमूलानां गर्भरोगः प्रशाम्यति ॥ कुष्ठे मसूरिकैर्होमो मधुरत्रयसंयुतैः ॥ २१ ॥ अथवा तैलसंयुक्तैर्जुहुयाद्धौरसर्षपैः ॥ ये चान्ये मुख

१ बिल्ववृक्षस्य । २ धत्तूरसमिधः ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

रोगाः स्युः शिरोरोगास्तथैव च ॥ २२ ॥ ते सर्वे प्रशमं यान्ति तिलैर्होमाद्घृतप्लुतैः ॥ औदराणां तु रोगाणां सर्वेषां शान्तिमिच्छता ॥ २३ ॥ बिल्ववृक्षसमिद्धोमः कर्त्तव्यो द्विजसत्तम ॥ अधःस्रावे तु जुहुयात्पद्मपत्रैर्घृतप्लुतैः ॥ २४ ॥ दूर्वाभिर्वापयोक्ताभिर्जुहुयाच्चंदनेन वा ॥ अश्वत्थस्य समिद्भिश्च रक्तस्रावे तु होमयेत् ॥ २५ ॥ अथवा गोघृतेनैव रक्तातीसारशान्तये ॥ अन्यरोगेषु सवषु कण्ठरोगमहोदरे ॥ २६ ॥ त्रिभिः फलैस्तु जुहुयान्मधुक्षीरघृतप्लुतैः ॥ मधुरत्रयहोमस्तु सर्वरोगोपशान्तये ॥ २७ ॥ आयुर्वेदेषु यत्प्रोक्तं यस्य रोगस्य भेषजम् ॥ तस्य रोगस्य शान्त्यर्थं तेनतेन च होमयेत् ॥ २८ ॥ श्रीकामो बिल्ववृक्षस्य समिद्भिरथवा फलैः ॥ पत्रैर्वाप्यस्य जुहुयान्महतीं श्रियमाप्नुयात् ॥ २९ ॥ विद्यार्थी जुहुयाद्यस्तु रुद्राक्षैर्गोघृतप्लुतैः ॥ विद्यां चायुस्ततो वित्तं लभते नात्र संशयः ॥ ३० ॥ वृष्टिकामस्तु संपूज्य देवदेवं त्रियंबकम् ॥ अर्घ्यपाद्यादिभिर्देवमर्च्लिंगैराभिषेचयेत् ॥ ३१ ॥ आपो हिष्ठेति तिसृभिर्हिरण्यवर्णादिभिस्तथा ॥ पावमानानुवाकेन त्र्यंबकेत्यनया ऋचा ॥ ३२ ॥ वैतसीभिः समिद्भिश्च जुहुयात्पयसा प्लुतैः ॥ अयुतं वा सहस्रं वा जुहुयात्पयसापिवा ॥ ३३ ॥ पुण्याहं वाचयेद्विप्रैर्ब्राह्मणान्भोजयेत्ततः ॥ दशाहाभ्यन्तरे वृष्टिर्भवत्येव न संशयः ॥ ३४ ॥ वृष्टिकामश्चार्द्रवासा वटवृक्षसमुद्भवैः ॥ समिद्भिर्जुहुयान्मन्त्रान्सद्यो वृष्टिमवाप्नुयात् ॥ ३५ ॥ नाभिमात्रे जले स्थित्वा ध्यायन् वै पुष्टिवर्धनम् ॥ जपेत्त्रियंबकं मंत्रं महतीं वृष्टिमाप्नुयात् ॥ ३६ ॥ अग्निहोत्रात्समादाय सितं भसितमुत्तमम् ॥ अनया तु ऋचा हुत्वा जले वृष्टिं निवारयेत् ॥ ३७ ॥ पुत्रकामस्तु जुहुयात्पायसं घृतसंयुतम् ॥ चरुशेषं स्वयं भुक्त्वा पुत्रमाप्नोति मानवः ॥ ३८ ॥ इति वसिष्ठकल्पोक्तं मृत्युंजयसंजीवनीमहामृत्युंजयविधानं समाप्तम् ॥ अथ मृत्युंजयकवचम् ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भैरव उवाच ॥ शृणुष्व परमेशानि कवचं मन्मुखोदितम् ॥ महामृत्युंजयस्यास्य न देयं परमाद्भुतम् ॥ १ ॥ यद्धृत्वा यत्पठित्वा च यच्छ्रुत्वा कवचोत्तमम् ॥ त्रैलोक्याधिपतिर्भूत्वा सुखितोऽस्मि महेश्वरि ॥ २ ॥ तदेव वर्णयिष्यामि तव प्रीत्या वरानने ॥ तथापि परमं तत्त्वं न दातव्यं दुरात्मने ॥ ३ ॥ ॐ अस्य श्रीमहामृत्युंजयकवचस्य श्रीभैरव ऋषिः । गायत्रीछन्दः । श्रीमृत्युंजय रुद्रो देवता । ॐ बीजम् । जूं शक्तिः । सः कीलकम् । हौमिति तत्त्वम् । श्रीचतुर्वर्गफलसाधनाय पाठे विनियोगः॥चन्द्रमण्डलमध्यस्थे रुद्रमाले विचित्रिते ॥ तत्रस्थं चिंतयेत्साध्यं मृत्यं प्राप्तोपि जीवति ॥ १ ॥ ॐ जूं सः हौं शिरः पातु देवो मृत्युंजयो मम ॥ श्रीं शिवो वै ललाटं च ॐ हौं भ्रुवौ सदा शिवः ॥ २ ॥ नीलकण्ठोऽवतान्नेत्रे कपर्दी मेवताच्छ्रुती ॥ त्रिलोचनोवताद्गण्डौ नासां मे त्रिपुरांतकः ॥ ३ ॥ मुखं पीयूषघटभृदोष्ठौ मे कृत्तिकाम्बरः ॥ हनुं मे हाटकेशानो मुखं बटुकभैरवः ॥ ४ ॥ कंधरां कालमथनो गलं गणप्रियोऽवतु ॥ स्कंधौ स्कंदपिता पातु हस्तौ मे गिरिशोवतु ॥५॥ नखान्मे गिरिजानाथः पायाद्दुलिसंयुतान् ॥ स्तनौ तारापतिः पातु वक्षः पशुपतिर्मम ॥ ६ ॥ कुक्षिं कुबेरवरदः पार्श्वौ मे मारशासनः ॥ शर्वः पातु तथा नाभिं शूली पृष्ठं ममाऽवतु ॥७॥ शिश्नं मे शंकरः पातु गुह्यं गुह्यकवल्लभः ॥ कटिं कालान्तकः पायादूरू मेंऽधकघातकः ॥८॥ जागरूकोऽवताज्जानु जंघे मे कालभैरवः ॥ गुल्फौ पायाज्जटाधारी पादौ मृत्युञ्जयोवतु ॥ ९ ॥ पादादिमूर्द्धपर्यंतं सद्योजातो ममावतु ॥ रक्षाहीनं नामहीनं वपुः पात्व मृतेश्वरः ॥ १० ॥ पूर्वं बलविकरणो दक्षिणे कालशासनः ॥ पश्चिमे पार्वतीनाथ उत्तरे मां मनोन्मनः ॥ ११ ॥ ऐशान्यामीश्वरः पायादाग्नेय्यामग्निलोचनः ॥ नैर्ऋत्यां शंभुरव्यान्मां वायव्यां वायुवाहनः ॥ १२ ॥ ऊर्ध्वं बलप्रमथनः पाताले परमेश्वरः ॥ दश

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

दिक्षु सदा पातु महामृत्युञ्जयश्च माम् ॥ १३ ॥ रणे राजकुले द्यूते विषमे प्राणसंशये ॥ पायादों जूं महारुद्रो देवदेवो दशाक्षरः ॥ १४ ॥ प्रभाते पातु मां ब्रह्मा मध्याह्ने भैरवोऽवतु ॥ सायं सर्वेश्वरः पातु निशायां नित्यचेतनः ॥ १५ ॥ अर्द्धरात्रे महादेवो निशान्ते मां महोदयः ॥ सर्वदा सर्वतः पातु ॐ जूं सः हौं मृत्युञ्जयः ॥ १६ ॥ इतीदं कवचं पुण्यं त्रिषु लोकेषु दुर्लभम् ॥ सर्वमन्त्रमयं गुह्यं सर्वतन्त्रेषु गोपितम् ॥ १७ ॥ पुण्यं पुण्यप्रदं दिव्यं देवदेवाधिदैवतम् ॥ य इदञ्च पठेन्मंत्रं कवचं वाचयेत्ततः ॥ १८ ॥ तस्य हस्ते महादेवि त्र्यंबकस्याष्टसिद्धयः ॥ रणे धृत्वाचरेद्युद्धं हत्वा शत्रूञ्जयं लभेत् ॥ १९ ॥ जयं कृत्वा गृहं देवि स प्राप्स्यति सुखं पुनः ॥ महाभये महारोगे महामारीभये तथा ॥ २० ॥ दुर्भिक्षे शत्रुसंहारे पठेत्कवचमादरात् ॥ इति श्रीमहामृत्युञ्जयकवचम् ॥ ॥

अथ रुद्रविधानानि ॥ तत्र तावत् रुद्रजपांगभूतदशाक्षरीरुद्रमंत्रपुरश्चरणप्रयोगः ॥ सुमुहूर्त्ते शिवालयादिषु जपयोग्यभूमिं प्रकल्प्य । पूर्वदिने प्रायश्चित्तं गायत्र्यायुतजपं च कृत्वा । प्रारम्भदिने प्रातर्नित्यकर्म्म समाप्य । जपस्थाने कूर्मसंशोधनं दीपस्थानशोधनं च कुर्य्यात् । ततः स्वासने प्राङ्मुख उदङ्मुखो वा उपविश्य । भस्मत्रिपुंड्रं रुद्राक्षधारणं च कृत्वा । आचम्य । प्राणानायम्य । देश कालौ संकीर्त्य । अमुकगोत्रोऽमुकशर्मा श्रुतिस्मृतिपुराणागमोक्तफलावाप्तये अस्मिन् पुण्याहे मम सर्वविधपातकनिवृत्त्यर्थं वाऽमुक कामनासिद्धये श्रीरुद्रप्रीत्यर्थं रुद्रदशार्णमंत्रपुरश्चरणं स्वयं ब्राह्मणद्वारा वा करिष्ये । इति संकल्प्य । गणपतिपूजनं पुण्याहवाचनं मातृकापूजनं नांदीश्राद्धमाचार्यजापकवरणं च पूर्ववत्कुर्य्यात् ॥ ततो भद्रंकर्णेभिरिति जपस्थानसमीपमागत्य पूर्वोक्तद्वारपूजां कृत्वा प्रविश्य । स्वासने उपविश्य । आचम्य प्राणानायम्य । आसनशुद्धिं भूतशुद्धिं स्वप्राणप्रतिष्ठामंतर्मातृकाबहिर्मातृकान्यासं च पूर्ववत्

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कृत्वा पंचाक्षरोदितं श्रीकंठादिकलान्यासं कुर्य्यात् ॥ अथ रुद्रविधानमंत्रन्यासः ॥ "ॐ नमो भगवते रुद्राय" इति दशाक्षरो मंत्रः ॥
अस्य श्रीरुद्रमंत्रस्य बौधायन ऋषिः। पंक्तिश्छन्दः। रुद्रो देवता। ममाभीष्टसिद्ध्यर्थं जपे विनियोगः॥ॐ त्र्यंबकंयजामहेसुगंधिंपुष्टिवर्द्धनम्॥उर्व्वारुकमिवबंधनान्मृत्योर्मुक्षीयमामृतात् ॥१॥ इति शिखायाम् ॥ ॐ अस्मिन्महत्यर्णवेंतरिक्षेभवाऽधिं ॥ तेषाꣳ
सहस्रयोजनेवधन्वानितन्मसि ॥२॥ इति शिरसि ॥ ॐ सहस्राणिसहस्रशोवाह्वोस्तवहेतयः॥तासामीशानोभगवत्पराचीनामुखाकृधि
॥३॥ इति ललाटे॥ ॐ हꣳसःशुचिषद्वसुरंतरिक्षसद्धोतावेदिषदतिथिर्दुरोणसत्॥नृषद्वरसदृतसद्व्योमसदब्जागोजाऽऋतजाऽअद्रिजाऽ
ऋतंबृहत् ॥४॥इति भ्रुवोर्मध्ये॥ॐ त्र्यंबकंयजामहेसुगंधिंपुष्टिवर्द्धनम्॥उर्व्वारुकमिवबंधनान्मृत्योर्मुक्षीयमामृतात् ॥५॥इति नेत्रयोः॥
ॐ नमस्सुत्र्यायचपथ्यायचनमस्काट्यायचनीप्यायच ॥ नमस्कुल्यायचसरस्यायचनमोनादेयायचवैशंतायच ॥६॥ इति कर्णयोः ॥
ॐ मानस्तोकेतनयेमानऽआयुषिमानोगोषुमानोऽअश्वेषुरीरिषः ॥ मानोवीरान् रुद्रभामिनोव्वधीर्हविष्मंतस्सदमित्त्वाहवामहे ॥ ७॥
इति नासिकायाम् ॥ ॐ अवतत्यधनुष्ट्वꣳसहस्राक्षशतेषुधे ॥ निशीर्य्यशल्यानांमुखाशिवोनः÷सुमनाभव ॥ ८ ॥ इति मुखे ॥ ॐ नी
लग्रीवाशितिकंठाश्शर्वाअध÷क्षमाचराः॥तेषाꣳसहस्रयोजनेवधन्वानितन्मसि ॥९॥ इति कंठे ॥ ॐ नीलग्रीवाशितिकंठादिवꣳ रुद्राऽउपश्रिताः॥तेषाꣳसहस्रयोजनेवधन्वानितन्मसि ॥१०॥ इत्युपकंठे ॥ ॐ नमस्तआयुधायानाततायधृष्णवे ॥ उभाभ्यांमुत

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तेनमोबाहुभ्यांतवधन्वने ॥ इति स्कंधयोः ॥११॥ ॐ यातेहेतिर्मीढुष्टमहस्तैर्बभूवतेधनुः ॥ तयास्मान्विश्वतस्त्वमयक्ष्मयापरिभुज ॥ १२ ॥ इति बाह्वोः ॥ ॐ येतीर्थानिप्रचरंतिसृकाहस्तानिषंगिणः ॥तेषाꣳसहस्रयोजनेवधन्वानितन्मसि ॥१३॥ इति हस्तयोः ॥ ॐ सद्योजातंप्रपद्यामिसद्योजातायवैनमोनमः ॥ भवेभवेनातिभवेभवस्वमांभवोद्भवायनमः ॥ १४ ॥ इत्यगुष्ठयोः ॥ ॐ वामदेवायनमोज्येष्ठायनमः श्रेष्ठायनमोरुद्रायनमःकालायनमःकलविकरणायनमो बलविकरणायनमो बलायनमोबलप्रमथायनमः सर्वभूतदमनायनमोमनोन्मनायनमः ॥ १५ ॥ इति तर्जन्योः ॥ ॐ अघोरेभ्योथघोरेभ्योघोरघोरतरेभ्यः ॥सर्वेभ्यःसर्वसर्वेभ्योनमस्तेअस्तुरुद्ररूपेभ्यः ॥ १६ ॥ इति मध्यमयोः ॥ ॐ तत्पुरुषायविद्महेमहादेवायधीमहि॥तन्नोरुद्रःप्रचोदयात् ॥ १७ ॥ इति अनामिकयोः ॥ ॐ ईशानः सर्वविद्यानामीश्वरःसर्वभूतानां ब्रह्माधिपतिर्ब्रह्मणोधिपतिर्ब्रह्मशिवोमेअस्तुसदाशिवोम् ॥ इति कनिष्ठिकयोः ॥ १८ ॥ ॐ नमोवःकिरिकेभ्योदेवानाꣳहृदयेभ्योनमोविचिन्वत्केभ्योनमोविक्षिणत्केभ्योनमऽआनिर्हतेभ्यः ॥ इति हृदि ॥१९॥ ॐ नमोगणेभ्योगणपतिभ्यश्चवोनमोनमोव्रातेभ्योव्रातपतिभ्यश्चवोनमोनमोगृत्सेभ्योगृत्सपतिभ्यश्चवोनमोनमोविरूपेभ्योविश्वरूपेभ्यश्चवोनमः ॥ २० ॥ इति पृष्ठे ॥ ॐ नमोहिरण्यबाहवेसेनान्येदिशाञ्चपतयेनमोनमोवृक्षेभ्योहरिकेशेभ्यः पशूनाम्पतयेनमोनमः ॥ शष्पिंजरायत्विषीमतेपथीनाम्पतयेनमोनमोहरिकेशायोपवीतिनेपुष्टानाम्पतयेनमोनमोबभ्लुशायं ॥ २१ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

इति पार्श्वद्वये ॥ ॐ विज्यन्धनुः÷कपर्दिनोव्विशल्योबाणवाँऽउत॥अनेशन्नस्यया ऽइषवऽआभुरस्यनिषङ्गधिः÷ ॥२२॥ इति जठरे ॥
ॐ हिरण्यगर्भः÷समवर्त्तताग्रेभूतस्यजातः पतिरेकऽआसीत् ॥ सदाधारपृथिवीद्यामुतेमांकस्मैदेवायहविषाविधेम ॥२३॥ इति नाभौ ॥
ॐ मीढुष्टमशिवतमशिवोनः÷सुमनाभव॥परमेव्वृक्षऽआयुधन्निधायकृत्तिंव्वसानऽआचरपिनाकम्बिभ्रदागहि ॥२४॥ इति कट्याम् ॥
ॐ येभूतानामधिपतयोव्विशिखासः÷कपर्दिनः÷ ॥ तेषाँ्सहस्रयोजनेवधन्वानितन्मसि ॥ २५ ॥ इति गुह्ये ॥ ॐ जातवेदसेसुनवा
मसोममरातीयतोनिदहातिवेदः ॥ सनः÷पर्षदतिदुर्गाणिविश्वानावेवसिसिंधुंदुरितात्यग्निः ॥ २६ ॥ ॐ तामग्निवर्णांतपसाज्व
लंतींवैरोचनींकर्मफलेषुजुष्टाम् ॥ दुर्गांदेवींशरणमहंप्रपद्येसुतरसितरसेनमःसुतरसितरसे नमः ॥ १ ॥ अग्नेत्वंपारया० ॥ २॥
विश्वानिनोदुर्गहा० ॥ ३ ॥ पृतनाजित० ॥ ४ ॥ इति मंत्रचतुष्टयरूपशिरसा सह ॥ इति गुदे ॥ ॐ मानोमहान्तमुतमानो
ऽअर्भकंमानऽउक्षंतमुतमानऽउक्षितम् ॥ मानोव्वधीःपितरंमोतमातरंमानःप्रियास्तन्वोरुद्ररीरिषः ॥ इति ऊर्वोः ॥ २७ ॥ ॐ
एषतेरुद्रभागःसहस्वस्राम्बिकयातंजुषस्वस्वाहैषतेरुद्रभागऽआखुस्तेपशुः ॥ इति जानुनोः ॥ २८ ॥ ॐ त्र्येषथांपथिरक्षंयएे
लबृदाऽआयुर्युधः÷ ॥ तेषाठँसहस्रयोजनेवधन्वानितन्मसि ॥ इति पादयोः ॥ २९ ॥ ॐ अद्धर्यवोचदधिवक्तापृथमो
दैव्योभिषक् ॥ अहींश्चसर्व्वाञ्जंभयन्त्सर्व्वाश्चयातुधान्योधराचीःपरासुव ॥ इति कवचे ॥ ३० ॥ ॐ नमोबिल्मिने चकवचिनेचन

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मौव्वर्म्मिणेचव्वरूथिनेचुनमः÷॥श्रुतायचश्रुतसेनायचुनमोदुन्दुभ्यायचाहनन्यायचनमोधृष्णवे ॥ इत्युपकवचम् ॥ ३१ ॥ [कव
चाद्विपरीतक्रममुपकवचम्] ॐ नमोस्तुनीलग्रीवायसहस्राक्षायमीढुषे ॥ अथोयेऽअस्यसत्त्वानोहंतेभ्योकरंनमः÷॥ इति तृतीय
नेत्रे ॥ ३२ ॥ ॐ प्रमुञ्चधन्वनस्त्वमुभयोरात्न्योर्ज्याम् ॥ याश्चतेहस्तऽइषवःपरातामगवोव्वप ॥इत्यस्त्रम् ॥ ३३ ॥ इति प्रथमो
न्यासः ॥ ॐ यऽएतावन्तश्चभूयांऽसश्चदिशोरुद्राव्वितास्तिरे ॥ तेषांऽसहस्रयोजनेवधन्वानितन्मसि ॥ इति दिग्बंधः ॥ १ ॥
अथाक्षरन्यासः ॥ ॐ नमः शिरसि ॥ १ ॥ ॐ नं नमः नासिकायाम् ॥ २ ॥ ॐ मों नमः ललाटे ॥ ३ ॥ ॐ भं नमः मुखे ॥४॥
ॐ गं नमः कण्ठे ॥ ५ ॥ ॐ वं नमः हृदि ॥ ६ ॥ ॐ तें नमः दक्षस्तने ॥ ७ ॥ ॐ रुं नमः वामस्तने ॥ ८ ॥ ॐ द्रां नमः नाभौ
॥ ९ ॥ ॐ यं नमः पादयोः ॥ १० ॥ इति दशांगन्यासो द्वितीयः ॥ २ ॥ ॐ सद्योजातंप्रपद्यामिसद्योजातायवैनमोनमः ॥ भवेभवे
नातिभवेभवस्वमांभवोद्भवायनमः १ इति पादयोर्न्यस्य ॐहंसोहंसेति ब्रूयात् ॐ वामदेवायनमोज्येष्ठायनमः÷श्रेष्ठायनमोरुद्रायनमः
कालायनमः कलविकरणायनमोबलविकरणायनमो ॥ बलायनमोबलप्रमथायनमःसर्वभूतदमनायनमोमनोन्मनायनमः २ इति
ऊर्वोर्न्यस्यहंसोहंसेति ब्रूयात् ॐ अघोरेभ्योथघोरभ्योघोरघोरतरेभ्यःसर्वेभ्यःसर्वसर्वेभ्योनमस्तेअस्तुरुद्ररूपेभ्यः ३ हृदिविन्यस्य

१–२ शांतिसारादौ । १ दक्षहस्ते । २ वामहस्ते इतिलिखितम् ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

हंसोहंसेति ब्रूयात् ॐ तत्पुरुषायविद्महेमहादेवायधीमहि ॥ तन्नोरुद्रःप्रचोदयात् ४ मुखेविन्यस्य हंसोहंसेति ब्रूयात् ॐ ईशानुः सर्वविद्यानामीश्वरःसर्वभूतानाम्॥ब्रह्माधिपतिर्ब्रह्मणोधिपतिर्ब्रह्माशिवोमेअस्तुसदाशिवोम् ॥ इति मूर्ध्नि विन्यस्य हंसोहंसेति ब्रूयात् ५ इति तृतीयो न्यासः ॥ एवंन्यासत्रयंकृत्वासम्पुटंकुर्यात् ॥ तद्यथा कृतांजलिपुटः ॐ त्रातारमिंद्रमवितारमिन्द्रुठ्हवेंहवेसुहवठ्शूर मिन्द्रम्॥ह्वयामिशक्रम्पुरुहुतमिन्द्रुठ्स्वस्तिनोमघवांधात्विन्द्रः ॥ इतिमन्त्रेण प्राच्यामिंद्रं नमस्कुर्यात् १ ॐ त्वन्नोऽअग्नेव्वरुणस्यविद्वान्देवस्यहेडोऽअवयासिसीष्ठाऽयजिंष्ठोवह्नितमः शोशुचानोविश्वाद्वेषाठ्सिप्रमुमुग्ध्यस्मत् ॥ इत्याग्नेय्यामग्निंप्रणमेत् २ सुगन्नुत्पंथाम्प्रादिशन्नऽएहिज्योतिष्मध्येह्यजरन्नआयुः ॥ अपेतुमृत्युरमृतम्मऽआगाद्वैवस्वतोनोऽअभयंकृणोतु ॥ इति दक्षिणस्यां यमं प्रणमेत् ३ ॐ असुन्वंतमयंजमानमिच्छस्तेनस्येत्यामन्विहितस्करस्य ॥ अन्यमस्मदिच्छसातऽइत्यानमोदेविनिर्ऋतेतुभ्यमस्तु ॥ इति नैर्ऋत्यांनैर्ऋतिं प्रणमेत् ॥ ४ ॥ ॐ तत्त्वायामिब्रह्मणावन्दमानस्तदाशास्तेयजमानोहविर्भिः ॥ अहेडमानोव्वरुणेहबोध्युरुशठ्समानऽआयुःप्रमोषीः ॥ इति पश्चिमायां वरुणं प्रणमेत् ॥ ५ ॥ ॐ आनोनियुद्भिः शतिनीभिरध्वरठ्सहस्त्रिणीभिरुपयाहियज्ञम् ॥ व्वायोऽअस्मिन्त्सवनेमादयस्वयूयंपातस्वास्तिभिःसदानः ॥ इति वायव्यां वायुं प्रणमेत् ॥ ६ ॥ ॐ व्वयठ्सोमव्रतेतवमनस्तनूषुविभ्रतः ॥ प्रजावंतःसचेमहि ॥ इति उदीच्यां कुबेरं प्रणमेत् ॥ ७ ॥ ॐ तमीशानंजगतस्तस्थुषस्पतिंधियंजिन्वमवसेहूमहेव्वयम् ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पूषानोयथाव्वेदसामसद्वृधेरक्षितापायुरदब्धःस्वस्तये ॥ इति ईशान्याम् ईश्वरं प्रणमेत् ॥८॥ ॐ अस्म्मेरुद्रामेहनापर्व्वतासोवृत्रहत्येभरहूतौसुजोषाः ॥ यःशर्ठःसंतेस्तुवतेधायिपज्रऽइन्द्रेज्ज्येष्ठाँऽअस्म्माँ २ऽअवंतुदेवाः ॥ इत्यूर्ध्वं ब्रह्माणं प्रणमेत् ॥ ९ ॥ ॐ स्योनापृथिविनोभवानृक्षरानिवेशनीयच्छानःशर्म्मसप्रथाः ॥ इत्यधः पृथिवीं प्रणमेत् ॥ १० ॥ "एवं यः संपुटं कुर्य्यात् स स्यात् किल्विषवर्जितः ॥ तं दीप्यमानमीक्ष्यंते प्रेतचौराद्युपद्रवाः ॥ न पराभवितुं शक्ताः पलायंते विदूरतः ॥" एवं सम्पुटं कृत्वा चतुर्थं रक्षान्यासं कुर्यात् ॥ ॐ मनोजूतिर्जुषतामाज्यस्यबृहस्पतिर्य्यज्ञमिमन्तनोत्वरिष्टंय्यज्ञं०समिमंदधातु ॥ विश्वेदेवासऽइहमादयन्तामो ३ म्प्रतिष्ठ ॥ १ ॥ इति गुह्ये ॥ ॐ अवोध्यग्निः०समिधाजनानाम्प्रतिधेनुमिवायतीमुषासम् ॥ जिह्माऽइवप्रवयामुज्जिहानाःप्रभानवः०सिस्रतेनाकमच्छ ॥ इति जठरानले ॥ २ ॥ ॐमूर्द्धानंदिवोऽअरतिंपृथिव्यावैश्वानरमृतऽआजातमग्निङ्कविं० सम्राजमतिथिंजनानामासन्नापात्रंजनयंतदेवाः० ॥ ३ ॥ इति हृदये ॥ ॐ मर्म्माणितेवर्म्मणाच्छादयामिसोमस्त्वाराजामृतेनानुवस्ताम् ॥ उरोर्व्वरीयोव्वरुणस्तेकृणोतुजयन्तन्त्वानुदेवामदन्तु ॥ इति मुखे ॥ ४ ॥ ॐ जातवेदायदिवापावकोसि वैश्वानरोयदिवा वैद्युतोसिसंप्रजाभ्योयजमानायलोकं ऊर्जंपुष्टिंददद्भ्यावावृत्स्व ॥१॥ ॐ विश्वतश्चक्षुरुताविश्वतोमुखोविश्वतोबाहुरुताविश्वतस्पात्॥संबाहुभ्यांधमतिसंपतत्रैर्द्यावाभूमीजनयन्देवऽएकः इति शिरसि ॥ ५ ॥ इति चतुर्थो न्यासः ॥ ॥ अथ षडंगन्यासः पंचमः ॥ ॐ

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यज्जाग्रत इत्यादिशिवसंकल्पांते ॐ हृदयाय नमः ॥१॥ ॐ सहस्रशीर्षा पुरुष इत्यादिपुरुषसूक्तांते ॐ शिरसे स्वाहा ॥२॥ ॐ अद्भ्यः संभृत इत्याद्युत्तरनारायणांते शिखायै वषट् ॥ ३ ॥ ॐ आशुः शिशान इत्यप्रतिरथांते कवचाय हुम् ॥ ४ ॥ ॐ विभ्राड्बृहदित्यादिसूक्तांते नेत्रत्रयाय वौषट् ॥ ५ ॥ ॐ नमस्ते रुद्रमन्यव इत्यादिशतंरुद्रियांते अस्त्राय फट् ॥ ६ ॥ इति पंचमो न्यासः ॥ ५ ॥ यज्जाग्रत इति षड्ऋचस्य शिवसंकल्प ऋषिस्त्रिष्टुप्छन्दः मनो० हृदयन्यासे विनियोगः ॥ ॐ यज्जाग्रतोदूरमुदैतिदैवंतदुसुप्तस्यतथैवैतिदूरङ्गमज्योतिषाज्योतिरेकंतन्मेमनः÷शिवसंकल्पमस्तु ॥१॥ येनकर्म्माण्यपसोमनीषिणोयज्ञेकृण्वन्तिविदथेषुधीराः॥यदपूर्वंयक्षमन्तःप्रजानान्तन्मेमनः÷शिवसंकल्पमस्तु ॥ २ ॥ यत्प्रज्ञानमुतचेतोधृतिश्चयज्ज्योतिरन्तरमृतंप्रजासु ॥ यस्मान्नऽऋतेकिञ्चनकर्म्मक्रियतेतन्मेमनः÷शिवसंकल्पमस्तु ॥ ३ ॥ येनेदम्भूतम्भुवनंभविष्यत्परिगृहीतममृतेनसर्व्वम् ॥ येनयज्ञस्तायतेसप्तहोतात न्मेमनः÷शिवसंकल्पमस्तु ॥४॥ यस्मिन्नृचः सामयजूंषियस्मिन्प्रतिष्ठितारथनाभाविवाराः ॥ यस्मिँश्चित्तठ्सर्व्वमोतंप्रजानान्तन्मेमनः÷शिवसंकल्पमस्तु ॥ ५ ॥ सुषारथिरश्वानिवयन्मनुष्यान्नेनीयतेभीशुभिर्व्वाजिनऽइव ॥ हृत्प्रतिष्ठंयदजिरञ्जविष्ठन्तन्मेमनः÷

१ शतरुद्रियसंज्ञा शिक्षायाम् ॥ षट्षष्टिर्नीलसूक्तं च पुनः षोडशमेव च ॥ एषते द्वे नमस्ते द्वे नतंव्विद्धयमेवच ॥ मीढुष्टमेति चत्वारि एतच्च शतरुद्रियमिति ॥ शान्तिकमलाकर परशुरामकारिकादौ तु नमस्तेरुद्रमित्यादि षोडशमंत्रात्मकमेव शतरुद्रियं प्रोक्तं महार्णवे तु भ्रांत्या अन्यथा चोक्तम् ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

शिवसंकल्पमस्तु ॥ ६ ॥ इति हृदयाय नमः ॥ १ ॥ सहस्रशीर्षेति षोडशर्चस्य पुरुषसूक्तस्य नारायण ऋषिः आद्यानां पंचदशानामनुष्टुप् छंदः यज्ञेनयज्ञमित्यस्य त्रिष्टुप् छंदः जगद्बीजं पुरुषो देवता शिरोन्यासे विनियोगः ॥ ॐ सहस्रशीर्षापुरुषः सहस्राक्षः सहस्रपात् ॥ सभूमिंठ्सर्वतस्पृत्वात्यतिष्ठद्दशाङ्गुलम् ॥ १ ॥ पुरुषऽएवेदठ्सर्व्वंयद्भूतंयच्च भाव्यम् ॥ उतामृतत्वस्येशानोयदन्नेनातिरोहति ॥ २ ॥ एतावानस्यमहिमातोज्यायाँश्चपूरुषः ॥ पादोस्यविश्वाभूतानित्रिपादस्यामृतन्दिवि ॥ ३ ॥ त्रिपादूर्द्ध्वऽउदैत्पुरुषःपादोस्येहाभवत्पुनः ॥ ततोव्विष्वङ्व्यक्रामत्साशनानशनेऽअभि ॥ ४ ॥ ततोव्विराडजायतव्विराजोऽअधिपूरुषः ॥ सजातोऽअत्यरिच्यतपश्चाद्भूमिमथोपुरः ॥ ५ ॥ तस्माद्यज्ञात्सर्व्वहुतःसम्भृतम्पृषदाज्यम् ॥ पशूँस्ताँश्चक्रे वायव्यानारण्याग्राम्याश्चये ॥ ६ ॥ तस्माद्यज्ञात्सर्व्वहुतऽऋचःसामानिजज्ञिरेछन्दाꣳसिजज्ञिरे ॥ तस्माद्यजुस्तस्मादजायत ॥ ७ ॥ तस्मादश्वाऽअजायन्तयेकेचोभयादतः ॥ गावोहजज्ञिरेतस्मात्तस्माज्जाताऽअजावयः ॥८॥ तंयज्ञम्बर्हिषिप्रौक्षन्पुरुषजातमग्रतः ॥ तेनदेवाऽअयजन्तसाद्ध्याऽऋषयश्चये ॥ ९ ॥ यत्पुरुषंव्यदधुःकतिधाव्यकल्पयन् मुखङ्किमस्यासीत्किम्बाहूकिमूरूपादाऽउच्येते ॥ १० ॥ ब्राह्मणोस्यमुखमासीद्बाहूराजन्न्यःकृतःऊरूतदस्ययद्वैश्यःपद्भ्याꣳशूद्रोऽअजायत ॥ ११ ॥ चन्द्रमामनसोजातश्चक्षोःसूर्य्योऽअजायत ॥ श्रोत्राद्वायुश्चप्राणश्चमुखादग्निरजायत ॥ १२ ॥ नाभ्याऽ

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

आसीदुन्तरिक्षꣳशीर्ष्णोद्यौः समवर्त्तत ॥ पद्भ्याम्भूमिर्द्दिशꣳश्रोत्रात्तथालोका ँ॥ ऽअकल्पयन् ॥ १३ ॥ यत्पुरुषेणहविषादेवायज्ञमतन्वत ॥ वसन्तोस्यासीदाज्यङ्ग्रीष्मऽइध्मः शरद्धविः ॥१४॥ सप्तास्यासन्परिधयस्त्रिः सप्तसमिधः कृताः ॥ देवायद्यज्ञन्तन्वानाऽअबध्नन्पुरुषम्पशुम् ॥ १५ ॥ यज्ञेनयज्ञमयजन्तदेवास्तानिधर्म्माणिप्रथमान्यासन् ॥ तेहनाकम्महिमानꣳसचन्तयत्रपूर्व्वे साद्ध्याः सन्ति देवाः ॥ १६ ॥ इति शिरसे स्वाहा ॥२॥ अद्भ्यः संभृत इति षड्ऋचस्योत्तरनारायणस्य नारायण ऋषिः आद्यानां तिसृणां त्रिष्टुप् छंदश्चतुर्थपंचमयोरनुष्टुप् छंदः आदित्यो देवता शिखान्यासेविनियोगः । अद्भ्यः सम्भृतःपृथिव्यैरसाच्चविश्वकर्म्मणःसमवर्त्तताग्रे ॥ तस्यत्वष्टाविदधद्रूपमेतितन्मर्त्यस्यदेवत्वमाजानमग्रे ॥ १७ ॥ वेदाहमेतम्पुरुषम्महान्तमादित्यवर्णन्तमसःपरस्तात् ॥ तमेवविदित्वातिमृत्युमेतिनान्यःपन्थाविद्यतेयनाय ॥ १८ ॥ प्रजापतिश्चरतिगर्भेऽअन्तरजायमानोबहुधाविजायते ॥ तस्ययोनिम्परिपश्यन्तिधीरास्तस्मिन्हतस्थुर्भुवनानिविश्वा ॥ १९ ॥ योदेवेभ्यऽआतपतियोदेवानाम्पुरोहितः ॥ पूर्व्योयोदेवेभ्योजातोनमोरुचायब्राह्मये ॥ २० ॥ रुचम्ब्राह्मꣳजनयन्तोदेवाऽअग्रेतदब्रुवन् ॥ यस्त्वैवम्ब्राह्मणोविद्यात्तस्यदेवाऽअसन्वशे ॥ २१ ॥ श्रीश्चतेलक्ष्मीश्चपत्न्यावहोरात्रेपार्श्वेनक्षत्राणिरूपमश्विनौव्यात्तम् ॥ इष्णन्निषाणामुम्मऽइषाणसर्व्वलोकम्मऽइषाण ॥ २२ ॥ इति शिखायै वषट् ॥ ३ ॥ आशुःशिशान इति सप्तदशानामप्रतिरथ

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ऋषिस्त्रिष्टुप् छन्दः इंद्रोदेवता कवचन्यासे विनियोगः ॥ ॐ आशुः शिशानोवृषभोनभीमोघनाघनः क्षोभणश्चर्षणी
नाम् ॥ सङ्क्रन्दनोनिमिषऽएकवीरःशतꣳसेनाऽअजत्साकामन्द्र÷ ॥ १ ॥ सङ्क्रन्दनेनानिमिषेणजिष्णुनायुत्कोरणदुश्च्यव
नेनधृष्णुना ॥ तदिन्द्रेणजयततत्सहध्वंयुधोनरऽइषुहस्तेनव्वृष्णा ॥ २ ॥ सऽइषुहस्तैःसनिषङ्गिभिर्व्वशीसꣳस्रष्टासयुधऽइन्द्रो
गणेन ॥ सꣳसृष्टजित्सोमपाबाहुशर्द्ध्युग्रधन्वाप्रतिहिताभिरस्ता ॥ ३ ॥ ब्बृहस्पतेपरिदीयारथेनरक्षोहामित्राꣳऽअपबाधमानः ॥ प्रभञ्जन्त्सेनाःप्रमृणोयुधाजयन्नस्माकमेद्ध्यवितारथानाम् ॥ ४ ॥ बलविज्ञायस्थविरःप्रवीरःसहस्वान्वाजीसहमा
नऽउग्रः ॥ अभिवीरोऽअभिसत्त्वासहोजाजैत्रमिन्द्ररथमातिष्ठगोवित् ॥ ५ ॥ गोत्रभिद्गोविदंव्वज्रबाहुजयन्तमज्मं
प्रमृणन्तमोजसा ॥ इमꣳसजाताऽअनुवीरयध्वमिन्द्रꣳसखायोऽअनुसंरभध्वम् ॥ ६ ॥ अभिगोत्राणिसहसागाहमानोदयो
व्वीरःशतमन्युरिन्द्र÷॥दुश्च्यवनःपृतनाषाडयुद्ध्योस्माकꣳसेनाऽअवतुप्रयुत्सु ॥ ७ ॥ इन्द्रऽआसान्नेताबृहस्पतिर्दक्षिणायज्ञःपुरऽ
एतुसोम÷॥देवसेनानामभिभञ्जतीनाञ्जयन्तीनाम्मरुतोयन्त्वग्रम् ॥८॥ इन्द्रस्यव्वृष्णोव्वरुणस्यराज्ञऽआदित्यानाम्मरुताꣳशर्द्धऽ
उग्रम् ॥ महामनसाम्भुवनच्यवानाङ्घोषोदेवानाञ्जयतामुदस्थात् ॥ ९ ॥ उद्धर्षयमघवन्नायुधान्युत्सत्त्वनाम्मामकानाम्मनाꣳसि ॥
उद्वृत्रहन्वाजिनांव्वाजिनान्युद्रथानाञ्जयतांयन्तुघोषाः ॥ १० ॥ अस्माकमिन्द्रःसमतेषुध्वजेष्वस्माकंयाऽइषवस्ताञ्जयन्तु ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अस्माकंव्वीराऽउत्तरेभवन्त्वस्माꣳऽउदेवाऽअवताहवेषु ॥ ११ ॥ अमीषाञ्चित्तम्प्रतिलोभयन्तीगृहाणाङ्गान्यप्वेपरेहि ॥ अभि प्रेहिनिर्दहहृत्तसुशोकैरन्धेनामित्रास्तमसासचन्ताम् ॥ १२ ॥ अवसृष्टापरापतशरव्येब्रह्मसꣳशितेगच्छामित्रान्प्रप्रपद्यस्वमामीषा ङ्कञ्चनोच्छिषः ॥ १३ ॥ प्रेताजयतानरऽइन्द्रेवृत्रꣳशर्म्मयच्छतु ॥ उग्रावः सन्तुबाहवोनाधृष्ण्यायथासथ ॥ १४ ॥ असौयासेनाम रुतःपरेषामभ्यैतिनऽओजसास्पर्द्धमाना ॥ ताङ्गूहततमसापव्रतेनयथामीऽअन्योऽअन्यन्नजानन् ॥ १५ ॥ यत्रबाणाःसम्पतन्तिकुमाराविशिखाऽइव ॥ तत्रऽइन्द्रोबृहस्पतिरदितिःशर्म्मयच्छतुविश्वाहाशर्म्मयच्छतु ॥ १६ ॥ मर्म्माणितेवर्म्मणाच्छादयामि सोमस्त्वाराजामृतेनानुवस्ताम् ॥ उरोर्व्वरीयोव्वरुणस्तेकृणोतुजयन्तन्त्वानुदेवामदंतु ॥ १७ ॥ इति कवचायहुम् ॥ ४ ॥ विभ्राडिति सप्तदशानां विभ्राट् ऋषिर्जगती छन्दः सूर्यो देवता नेत्रन्यासे विनियोगः ॥ ॐ विभ्राड्बृहत्पिबतुसोम्यम्मद्धायुर्द्दधद्यज्ञप तावविंहुतम् ॥ वातंजूतोयोऽअभिरक्षतित्मनाप्रजाःपुपोषपुरुधाविराजति ॥ १ ॥ उदुत्यञ्जातवेदसन्देवंव्वहन्तिकेतवः ॥ दृशेविश्वायसूर्य्यम् ॥ २ ॥ येनापावकचक्षसाभुरण्यन्तञ्जनाꣳअनु ॥ त्वंव्वरुणपश्यसि ॥ ३ ॥ दैव्यावद्धर्य्यूऽआगतंरथेनसूर्य्यत्वचा ॥ मद्धायज्ञꣳसमञ्जाथे ॥ तम्प्रत्नथायंवेनश्चित्रन्देवानाम् ॥ ४ ॥ तम्प्रत्नथापूर्व्वथाविश्वथेमथाज्ज्येष्ठतातिम्बर्हिषदं स्वर्व्विदम् ॥ प्रतीचीनंवृजनन्दोहसेधुनिमाशुञ्जयन्तमनुयासुवर्द्धसे ॥ ५ ॥ अयंव्वेनश्चोदयत्पृश्निगर्भाज्योतिर्जरायुरजसोव्विमाने ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

इममपा ४ संगमेसूर्य्यस्यशिशुन्नविप्रामतिभीरिहन्ति ॥६॥ चित्रन्देवानामुदगादनीकञ्चक्षुर्म्मित्रस्यव्वरुणस्याग्नेः ॥आप्राद्यावा पृथिवीऽअन्तरिक्षꣳसूर्य्यऽआत्माजगतस्तस्थुषश्च ॥ ७॥ आनऽइडाभिर्व्विदथेसुशस्तिव्विश्वानरꣳसवितादेवऽएतु ॥ अपियथा ययवानोमत्सथानोव्विश्वञ्जगदभिपित्वेमनीषा ॥८॥ यदद्यकच्चवृत्रहन्नुदगाऽअभिसूर्य्य ॥ सर्व्वन्तदिन्द्रतेव्वशे ॥९॥ तरणिर्व्विश्वदर्शतोज्ज्योतिष्कृदसिसूर्य्य ॥ व्विश्वमाभासिरोचनम् ॥१०॥ तत्सूर्य्यस्यदेवत्वन्तन्महित्वम्मध्याकर्त्तोर्व्वितन्तꣳसज्जभार ॥ यदेदयुक्तहरित÷सधस्थादाद्रात्रीव्वासस्तनुतेसिमस्मै॥११॥तन्मित्रस्यव्वरुणस्याभिचक्षेसूर्य्योरूपङ्कृणुतेद्यौरुपस्थे ॥ अनन्तमन्यद्रुशदस्यपाज÷कृष्णमन्यद्धरितꣳसम्भरन्ति॥१२॥बण्महाꣳऽअसिसूर्य्यबडादित्यमहाꣳऽअसि ॥ महस्तेसतोमहिमापनस्यतेद्धादेवमहाꣳऽअसि॥१३॥ बट्सूर्य्यश्रवसामहाꣳऽअसिसत्रादेवमहाꣳऽअसि॥मन्हादेवानामसुर्य्य÷पुरोहितोव्विभुज्योतिरदाभ्यम् ॥ १४॥ आयन्तऽइवसूर्य्यविश्वेदिन्द्रस्यभक्षत ॥ वसूनिजातेजनमानऽओजसाप्रतिभागन्नदीधिम ॥१५॥ अद्यादेवाऽउदितासूर्य्यस्यनिरꣳहस÷पिपृतानिरवद्यात् ॥ तन्नोमित्रोव्वरुणोमामहन्तामदितिꣳसिन्धुं÷पृथिवीऽउतद्यौꣳ॥ १६ ॥ आकृष्णेनरजसावर्त्तमानोनिवेशयन्नमृतम्मर्त्यञ्च ॥ हिरण्ययेनसवितारथेनादेवोयातिभुवनानिपश्यन् ॥ १७ ॥ इति नेत्रत्रयाय वौषट् ॥ ५ ॥ अस्य शतरुद्रियस्याघोर ऋषिः रुद्रो देवता नमस्तऽइति, गायत्री छन्दो, यातइति तिसृणामनुष्टुप् छन्दोऽअध्यवोचदिति तिसृणाम्पङ्क्तिश्छन्दो नमोस्त्वित्यादि

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सप्तानामनुष्टुप्छन्दो मानइति द्वयोः कुत्स ऋषिर्जगतीच्छन्द एकरुद्रोदेवता नमोहिरण्यबाहव इत्यादीनि यजूꣳषि एकरुद्रो देवता द्रापेऽअन्धसऽइत्युपरिष्टाद्बृहती छन्द इमारुद्रायेतिजगतीछन्दो यात इत्यनुष्टुप् छन्दः परिनोमीढुष्टम इति त्रिष्टुप् छन्दो व्विकिरिद्रव्विलोहितसहस्राणिसहस्रशइत्यनुष्टुप् छन्दोऽअसंख्यातेत्यादिदशानामनुष्टुप्छन्दो बहुरुद्रो देवता नमोऽस्तित्वत्यादि त्रीणि यजूꣳषि बहुरुद्रदैवत्यानि व्वयꣳसोमेति गायत्रीछन्दएषते इति यजुरवरुद्रमिति पङ्क्तिश्छंदो भेषजमितिककुप् छन्दरुयम्बकामिति द्वेअनष्टुभावेतत्तइत्यास्तारपङ्क्तिश्छन्दरुयायुषमित्युष्णिक् छन्दः ॥ शिवोनामेतियजुर्न्नतँव्विदेति द्वे त्रिष्टभौ अस्त्रन्यासे विनियोगः ॥ ॐ नमस्तेरुद्रमन्यवऽउतोतऽइषवेनमः॥ बाहुब्भ्यामुततेनमः॥१॥ यातेरुद्रशिवातनूरघोरापापकाशिनी ॥ तयानस्तन्व्वाशन्तमया गिरिशन्ताभिचाकशीहि ॥ २ ॥ यामिषुङ्गिरिशन्तहस्तेबिभर्ष्यस्तवे ॥ शिवाङ्गिरित्रतांकुरुमाहिꣳसीःपुरुषञ्जगत् ॥ ३ ॥ शिवेनव्वचसात्वागिरिशाच्छावदामसि॥यथानःसर्व्वमिज्जगदयक्ष्मꣳसुमनाऽअसत्॥४॥अद्धयवोचदधिवक्ताप्रथमोदैव्योभिषक्॥अहीꣳश्चसर्व्वाञ्जम्भयन्त्सर्व्वाश्चयातुधान्योधराचीःपरासुव॥५॥असौयस्ताम्म्रोऽअरुणऽउतबभ्रुःसुमङ्गलः॥येचैनꣳरुद्राऽअभितोदिक्षुश्रिताःसहस्रशोवैषाꣳहेडऽईमहे ॥६॥ असौयोवसर्प्पतिनीलग्रीवोव्विलोहितः॥ उतैनंगोपाऽअदृश्रन्नदृश्रन्नुदहार्य्यःसदृष्टोमृडयातिनः ॥७॥ नमोस्तुनीलग्रीवायसहस्राक्षायमीढुषे॥अथोयेऽअस्यसत्त्वानोहन्तेभ्योकरन्नमः ॥८॥ प्रमुञ्चधन्वनस्त्वमुभयोरार्त्न्योर्ज्याम् ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

याश्चतेहस्तऽइषवःपराताभगवोव्वप ॥ ९ ॥ विज्यन्धनुःकपर्दिनोव्विशल्योबाणवाँऽउत ॥ अनेशन्नस्ययाऽइषवऽआभुरस्यनिषंगधिः ॥ १० ॥ यातेहेतिर्मीढुष्टमहस्तेबभूवतेधनुः ॥ तयास्मान्विश्वतस्त्वमयक्ष्मयापरिभुज ॥ ११ ॥ परितेधन्वनोहेतिरस्मान्वृणक्तुव्विश्वतः ॥ अथोयऽइषुधिस्तवारेऽअस्मन्निधेहितम् ॥ १२ ॥ अवतत्त्यधनुष्ट्वꣳसहस्राक्षशतेषुधे ॥ निशीर्य्यशल्यानाम्मुखाशिवोनःसुमनाभव ॥ १३ ॥ नमस्तुऽआयुधायानाततायधृष्णवे ॥ उभाभ्यामुततेनमोबाहुभ्यान्तवधन्वने ॥ १४ ॥ मानोमहान्तमुतमानोऽअर्भकम्मानऽउक्षन्तमुतमानऽउक्षितम् ॥ मानोव्वधीःपितरम्मोतमातरम्मानःप्रियास्तन्वोऽरुद्ररीरिषः ॥ १५ ॥ मानस्तोकेतनयेमानऽआयुषिमानोगोषुमानोऽअश्वेषुरीरिषः ॥ मानोव्वीरान्रुद्रभामिनोव्वधीर्हविष्मन्तःसदमित्त्वाहवामहे ॥ १६ ॥ इत्यादि षट्षष्टि ६६ मंत्रान् पठित्वा ॐ वयꣳसोम० ॥ ६७ ॥ एषते रुद्र० ॥ ६८ ॥ अवरुद्रमदी० ॥ ६९ ॥ भेषजमसि० ॥ ७० ॥ त्र्यंबकं यजामहे० ॥ ७१ ॥ एतत्तेरुद्रावसन्तेन० ॥ ७२ ॥ त्र्यायुषंजमदग्ने० ॥ ७३ ॥ शिवोनामासि० ॥ ७४ ॥ नमस्तेरुद्रमन्यव इत्यादि पुनः षोडश मंत्रान् ॥ ९० ॥ (पुनः) एषतेरुद्रभाग० ॥ ९१ ॥ अवरुद्रमदी० ॥ ९२ ॥ नमस्ते रुद्र० ॥ ९३ ॥ याते रुद्र० ॥ ९४ ॥ नतंविदाथयऽइमा० ॥ ९५ ॥ विश्वकर्माह्यविष्टः० ॥ ९६ ॥ मीढुष्टमाशिवतम० ॥ ९७ ॥ विकिरिद्रविलोहित० ॥ ९८ ॥ सहस्राणिसहस्रशो० ॥ ९९ ॥ असङ्ख्याता० ॥ १०० ॥ इत्यस्त्राय फट् ॥ ६ ॥ एतच्छतरुद्रियं वदंति " अग्निदाहात्सुरापानादकृत्याचरणात्तथा ॥ सुवर्णहर

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

णाच्चैव वृषलीगमनात्तथा ॥ १ ॥ ब्रह्महत्यादिकात् पापाच्छतरुद्रियपाठतः ॥ सुनिस्तीर्यैव गच्छंति ब्राह्मणाः शिवसन्निधौ ॥२॥)
एवं पंचन्यासं कृत्वा साष्टाङ्गं प्रणम्य अष्टभिर्मंत्रैर्नमस्कारं कुर्य्यात् ॥ ॐ हिरण्यगर्भ ः समवर्तताग्रेभूतस्यजातःपतिरेकऽआसीत् ॥
सदाधारपृथिवींद्यामुतेमांकस्मैदेवायहविषाविधेम ॥ १ ॥ यःप्राणतोनिमिषतोमहित्वैकइद्राजाजगतोबभूवयईशेअस्यद्विपदश्चतुष्पदः
कस्मैदेवायहविषाविधेम ॥ २ ॥ ॐ ब्रह्मयज्ञानम्प्रथमम्पुरस्ताद्विसीमतःसुरुचोव्वेनऽआवः ॥ सबुध्न्याऽउपमाऽअस्यव्विष्ठाःसत
श्चयोनिमसतश्चव्विवः ॥ ३ ॥ महीद्यौः पृथिवीचनऽइमंयज्ञम्मिमिक्षताम् ॥ पिपृतान्नोभरीमभिः ॥४॥ उपश्वासयपृथिवीमुतद्यांपुरुत्रा
तेमरुतांविष्टितंजगत् सदुंदुभेसजूरिंद्रेणदेवैर्दूराद्वीयोअपसेवशत्रून् ॥ ५ ॥ अग्नेनय सुपथा रायेअस्मान्विश्वानिदेववयुनानिविद्वान्
युयोध्यस्मज्जुहुराणमेनोभूयिष्ठांतेनमऽउक्तिंविधेम ॥ ६ ॥ यातेअग्नेयज्ञियातनूस्तयेह्यारोहात्मानंअच्छावसूनिकृण्वन्नस्मैनर्यापूहूणि
यज्ञोभूत्वायज्ञमासीदस्वांयोनिंजातवेदोबभूवआजायमानः सक्षयराहि ॥ ७ ॥ अथावःस्वाहाग्नयेदाशेमपरीलाभिर्घृतवद्भिश्चहव्यैः
तेभिर्न्नोअग्ने अमृतैर्महोभिः श्रितंपूर्भिरायसीभिर्निपाहि ॥ ८ ॥ इत्यष्टावृचो जपित्वा ॥ अथाऽत्मानं रुद्ररूपं ध्यायेत् ॥ अथ ध्या
नम् ॥ कैलासाचलसन्निभं त्रिनयनं पंचास्यमंबायुतं नीलग्रीवमहीशभूषणधरं व्याघ्रत्वचा प्रावृतम् ॥ अक्षस्रग्वरकुंडिकाभय
करं चांद्रीं कलां बिभ्रतं गंगांभोविलसज्जटं दशभुजं वंदे महेशं परम् ॥१॥ इति ध्यात्वा मानसोपचारैर्देवं संपूज्य यथाशक्ति मूलमंत्र

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

जपेत् ॥ "जपान्ते पुनराचमनं प्राणायामं च विधाय जलं गृहीत्वा स्ववामभागे देवदक्षिणकरे ॐ गुह्यातिगुह्येति मंत्रेण जपसमर्पणं कुर्य्यात् ॥ इत्यभेदोपासनम्" "यदि तु भेदेनोपासीत तदानींतनं पूजाविधिं सांगं सोपचारं ब्रूते ॥ तत्रैवं क्रमस्तावत् यंत्रोद्धारस्तत्पूजा च ॥ "प्रणम्य जगतामीशमुमादेहार्द्धधारिणम् ॥ यंत्रोद्धारमहं वक्ष्ये रुद्रकल्पानुसारतः ॥ १ ॥ मध्ये वृत्तं समालिख्य तन्मध्ये च दशाक्षरम् ॥ बहिरष्टदलं पद्मं ततः षोडशपत्रकम् ॥ २ ॥ चतुर्विंशतिपत्राढ्यं द्वात्रिंशत्पत्रकं तथा ॥ चत्वारिंशत्पत्रकं तु वृत्तं सूर्यसमप्रभम् ॥ ३ ॥ पंचपद्मात्मकं वृत्तं चतुरस्रं च भूगृहम् ॥ सत्त्वं रजस्तमश्चेति त्रिगुणैः परितो वृतम् ॥ ४ ॥ चतुर्द्वारं द्वारदेशे बहिर्नागसमावृतम् ॥ रुद्रपीठमिति ख्यातं देवतास्तत्र विन्यसेत् ॥ ५ ॥ चत्वारिंशच्छतं चैकं देवतानामुदाहृतम् ॥ कर्णिकामध्यदेशे तु रुद्रं पंचास्यमालिखेत् ॥ ॥ अथ पीठपूजा ॥ तत्रादौ

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

स्वेस्वे स्थाने मंडूकादिपरतत्वांतपीठदेवताः पूर्ववदावाह्य ॐ मंडूकादिपरतत्वांतपीठदेवताभ्यो नमः इति गंधपुष्पैः संपूज्य । पूर्वादिषु ॐ वामायै नमः ॥ १ ॥ ॐ ज्येष्ठायै नमः ॥२॥ ॐ रौद्र्यै नमः ॥ ३ ॥ ॐ काल्यै नमः ॥ ४ ॥ ॐ कलविकरिण्यै नमः ॥ ५ ॥ ॐ बलविकरिण्यै नमः ॥ ६ ॥ ॐ बलप्रमथिन्यै नमः ॥ ७ ॥ ॐ सर्वभूतदमन्यै नमः ॥ ८ ॥ पीठमध्ये ॐ मनोन्मन्यै नमः ॥ ९ ॥ इति पीठशक्तीः पूजयेत् ॥ ततः पुष्पाण्यंजलिना गृहीत्वा । ॐ नमो भगवते सकलगुणात्मशक्तियुक्तायाऽनंताय योगपीठात्मने नमः ॥ इति मंत्रेण पीठोपरि पुष्पांजलिनासनं दद्यात् । ततः पीठमध्ये ॐ महीद्यौरित्यादिमंत्रैः पूर्ववत्ताम्रकलशं संस्थाप्य । ॐ तत्त्वायामीति वरुणमावाह्य ॐ अपांपतिवरुणाय नम इति षोडशोपचारैः संपूज्य । कलशस्य मुखेविष्णुरित्यभिमंत्र्य । देवदानवसंवादे इत्यादि प्रार्थयेत् ॥ ततः कलशोपरि पट्टवस्त्रं प्रसार्य्य तत्र गंधेन रुद्रयंत्रं विलिख्य तन्मध्ये पलस्वर्णनिर्मितां रुद्रप्रतिमां अभ्युत्तारणपूर्वकं मूलेन संस्थाप्य । प्राणप्रतिष्ठां कृत्वा । आवाहनादिपुष्पांतैरुपचारैस्तत्तत्पूर्वोक्तैर्मंत्रैः संपूज्य । आवरणपूजां कुर्य्यात् । तद्यथा । मध्ये "ॐ नमो भगवते रुद्राय" इति संपूज्य । तत्र पश्चिमादिचतुर्दिक्षुक्रमेण ॐ सद्योजाताय नमः ॥ १ ॥ ॐ वामदेवाय नमः ॥ २ ॥ ॐ अघोराय नमः ॥३॥ ॐ तत्पुरुषाय नमः ॥४ ॥ (मध्ये) ॐ ईशानाय नमः ॥५॥ इतिपूजयेत् ॥ ततः अष्टारेषु पश्चिमतआरभ्य प्रदक्षिणक्रमेण ॐ नंदिने नमः ॥ १ ॥ ॐ महाकालाय नमः ॥ २ ॥ ॐ गणेश्वराय नमः ॥ ३ ॥ ॐ वृषभाय नमः ॥ ४ ॥ ॐ भृंगिरिटये नमः ॥ ५ ॥ ॐ स्कंदाय नमः ॥ ६ ॥ ॐ उमायै नमः ॥ ७ ॥ ॐ चंडीश्वराय नमः ॥ ८ ॥ इति प्रथमावरणम् ॥ १ ॥ ततः षोडशदले तेनैवक्रमेण । ॐ अनंताय नमः ॥ १ ॥ ॐ सूक्ष्माय नमः ॥२॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ॐ शिवाय नमः ॥३॥ ॐ एकपदे नमः ॥४॥ ॐ एकरुद्राय नमः ॥५॥ ॐ त्रिमूर्तये नमः ॥६॥ ॐ श्रीकंठाय नमः ॥७॥ ॐ वाम
देवाय नमः ॥८॥ ॐ ज्येष्ठाय नमः ॥९॥ ॐ श्रेष्ठाय नमः ॥१०॥ ॐ रुद्राय नमः ॥११॥ ॐ कालाय नमः ॥१२॥ ॐ कलवि
करणाय नमः॥१३॥ॐ बलाय नमः॥१४॥ॐ बलविकरणाय नमः॥१५॥ॐ बलप्रमथनाय नमः॥१६॥इति द्वितीयावरणे पूजयेत् ॥
ततश्चतुर्विंशातिदले तेनैव क्रमेण । ॐ अणिमायै नमः ॥ १ ॥ ॐ महिमायै नमः ॥ २ ॥ ॐ लघिमायै नमः ॥ ३ ॥ ॐ गरिमायै
नमः ॥ ४ ॥ ॐ प्राप्त्यै नमः ॥ ५ ॥ ॐ प्राकाम्यायै नमः ॥ ६ ॥ ॐ ईशितायै नमः ॥ ७ ॥ ॐ वशितायै नमः ॥ ८ ॥ ॐ ब्राह्म्यै
नमः ॥ ९ ॥ ॐ माहेश्वर्य्यै नमः ॥ १० ॥ ॐ कौमार्य्यै नमः ॥ ११ ॥ ॐ वैष्णव्यै नमः ॥ १२ ॥ ॐ वाराह्यै नमः ॥ १३ ॥
ॐ इंद्राण्यै नमः ॥ १४ ॥ ॐ चामुंडायै नमः ॥ १५ ॥ ॐ चंडिकायै नमः ॥ १६ ॥ ॐ असितांगभैरवाय नमः ॥ १७ ॥
ॐ रुरुभैरवाय नमः ॥ १८ ॥ ॐ चंडभैरवाय नमः ॥ १९ ॥ ॐ क्रोधभैरवाय नमः ॥ २० ॥ ॐ उन्मत्तभैरवाय नमः ॥२१॥
ॐ कालभैरवाय नमः ॥ २२ ॥ ॐ भीषणभैरवाय नमः ॥ २३ ॥ ॐ संहारभैरवाय नमः ॥ २४ ॥ इति तृतीयावरणे पूजयेत
॥ ३ ॥ ततो द्वात्रिंशत्पत्रके तेनैव क्रमेण । ॐ भवाय नमः ॥ १ ॥ ॐ शर्वाय नमः ॥ २ ॥ ॐ ईशानाय नमः ॥ ३ ॥
ॐ पशुपतये नमः ॥ ४ ॥ ॐ रुद्राय नमः ॥५॥ ॐ उग्राय नमः ॥६॥ ॐ भीमाय नमः ॥ ७ ॥ ॐ महादेवाय नमः ॥ ८ ॥
ॐ अनंताय नमः ॥ ९ ॥ ॐ वासुकये नमः ॥ १० ॥ ॐ तक्षकाय नमः ॥ ११ ॥ ॐ कुलीरकाय नमः ॥ १२ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ॐ कर्कोटकाय नमः ॥ १३ ॥ ॐ शङ्खपालाय नमः ॥ १४ ॥ ॐ कम्बलाय नमः ॥ १५ ॥ ॐ अश्वतराय नमः ॥ १६ ॥ "इमे नागा अष्टौ" ॐ वैन्याय नमः ॥ १७ ॥ ॐ पृथवे नमः ॥ १८ ॥ ॐ हैहयाय नमः ॥ १९ ॥ ॐ अर्जुनाय नमः ॥ २० ॥ ॐ शाकुंतलेयाय नमः ॥ २१ ॥ ॐ भरताय नमः ॥ २२ ॥ ॐ नलाय नमः ॥ २३ ॥ ॐ रामाय नमः ॥२४॥ "इति नृपाष्टकम्" ॐ हिमवते नमः ॥ २५ ॥ ॐ निषधाय नमः ॥ २६ ॥ ॐ विंध्याय नमः ॥ २७ ॥ ॐ माल्यवते नमः ॥ २८ ॥ ॐ पारियात्राय नमः ॥ २९ ॥ ॐ मलयाय नमः ॥ ३० ॥ ॐ हेमकूटाय नमः ॥ ३१ ॥ ॐ गन्धमादनाय नमः ॥ ३२ ॥ "इति गिर्य्यष्टकम्" इति चतुर्थावरणम् ॥ ४ ॥ ततश्चत्वारिंशद्दले तेनैव क्रमेण ॥ ॐ इंद्राय नमः ॥ १ ॥ ॐ अग्नये नमः ॥२ ॥ ॐ यमाय नमः॥३॥ ॐ निर्ऋतये नमः ॥ ४ ॐ वरुणाय नमः ॥ ५ ॥ ॐ वायवे नमः ॥ ६ ॥ ॐ कुबेराय नमः ॥ ७ ॥ ॐ ईशानाय नमः ॥८ ॥ ॐ शच्यै नमः ॥ ९ ॥ ॐ स्वाहायै नमः ॥ १० ॥ ॐ वाराह्यै नमः ॥ ११ ॥ ॐ खड्गिण्यै नमः ॥ १२ ॥ ॐ वारुण्यै नमः ॥ ॥ १३ ॥ ॐ वायव्यै नमः ॥ १४ ॥ ॐ कौबेर्य्यै नमः ॥ १५ ॥ ॐ ईशान्यै नमः ॥१६॥ ॐ वज्राय नमः ॥ १७ ॥ ॐ शक्तये नमः ॥ १८ ॥ ॐ दण्डाय नमः ॥ १९ ॥ ॐ खड्गाय नमः ॥ २० ॥ ॐ पाशाय नमः ॥ २१ ॥ ॐ अङ्कुशाय नमः ॥ २२ ॥ ॐ गदायै नमः ॥ २३ ॥ ॐ त्रिशूलाय नमः ॥ २४ ॥ ॐ ऐरावताय नमः ॥ २५ ॥ ॐ मेषाय नमः ॥ २६ ॥ ॐ महिषाय नमः ॥ २७ ॥ ॐ प्रेताय नमः ॥ २८ ॥ ॐ मकराय नमः ॥ २९ ॥ . ॐ हरिणाय नमः ॥ ३० ॥ ॐ नराय नमः ॥ ३१ ॥ ॐ वृषभाय नमः ॥३२॥ ॐ ऐरावताय नमः ॥३३॥ ॐ पुण्डरीकाय नमः ॥३४॥ ॐ वामनाय नमः ॥३५॥ ॐ कुमुदाय नमः ॥३६॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ॐ अंजनाय नमः ॥ ३७ ॥ ॐ पुष्पदन्ताय नमः ॥ ३८ ॥ ॐ सार्वभौमाय नमः ॥ ३९ ॥ ॐ सुप्रतीकाय नमः ॥ ४० ॥ इति पंचमावरणम् ॥ ५ ॥ ततो भूपुरे पूर्वादिक्रमेण पुनः ॐ इन्द्राय नमः ॥ १ ॥ ॐ अग्नये नमः ॥ २ ॥ ॐ यमाय नमः ॥ ३ ॥ ॐ निर्ऋतये नमः ॥ ४ ॥ ॐ वरुणाय नमः ॥ ५ ॥ ॐ वायवे नमः ॥ ६ ॥ ॐ कुबेराय नमः ॥ ७ ॥ ॐ ईशानाय नमः ॥ ८ ॥ " ईशानपूर्वयोर्मध्ये " ॐ ब्रह्मणे नमः ॥ ९ ॥ " निर्ऋतिपश्चिमयोर्मध्ये " ॐ अनन्ताय नमः ॥१०॥ इति षष्ठावरणे पूजयेत् ॥ ततो भूपुरस्य बाह्ये आग्नेयादिषु " आग्नेय्याम् " ॐ विरूपाक्षाय नमः ॥ १ ॥ " नैर्ऋत्याम् " ॐ विरूपाय नमः ॥ २ ॥ " वायव्याम् " ॐ पशुपतये नमः ॥ ३ ॥ " ईशान्याम् " ॐ ऊर्ध्वलिंगाय नमः ॥ ४ ॥ पुनः भूपुराद्बहिः पूर्वादिदिक्षु क्रमेण ॥ "पूर्वे" ॐ विप्रवर्णाय श्वेतरूपाय सहस्रफणमण्डिताय शेषाय नमः ॥ १ ॥ "आग्नेय्याम्" ॐ वैश्यवर्णाय नीलरूपाय पंचाशत्फणाय उत्तुंगकायाय तक्षकाय नमः ॥ २ ॥ " दक्षिणस्याम् " ॐ विप्रवर्णाय कुंकुमरूपायं सहस्रफणमंडिताय अनन्ताय नमः ॥ ॥ ३ ॥ " नैर्ऋत्याम् " ॐ क्षत्रियवर्णाय पीतरूपाय सप्तशतफणमंडिताय उत्तुंगकायाय वासुकये नमः ॥ ४ ॥ "पश्चिमायाम्" ॐ क्षत्रियवर्णाय पीतरूपाय सप्तशतफणाय शंखपालाय नमः ॥ ५ ॥ " वायव्याम् " वैश्यवर्णाय कृष्णरूपाय पंचशतफणाय उत्तुंगाय महापद्माय नमः ॥ ६ ॥ " उत्तरस्याम् " ॐ शूद्रवर्णाय कृष्णरूपाय त्रिंशत्फणमंडिताय कम्बलाय नमः ॥ ७ ॥ "ईशान्याम्" ॐ शूद्रवर्णाय श्वेतरूपाय त्रिंशत्फणयुक्ताय कर्कोटकाय नमः ॥८ ॥ इति पूजयेत् ॥ इति सप्तमावरणम् ॥ ७ ॥ एवमावरणपूजां कृत्वा ॥ ॐ नमो भगवते रुद्राय इति मूलांते तत्तन्मंत्रेण धूपदीपनैवेद्याचमनीयतांबूलदक्षिणानी

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

राजनत्रिःप्रदक्षिणादिभिः श्रीरुद्रं संपूज्य दशाक्षरेण पुष्पांजलिं दत्वा छत्रचामरपरिमलपुष्पमाला आदर्शदर्शनं समर्पयेत् ॥ ततो रुद्रस्तवेन स्तुवीत ॥ "ॐ नमो विरिंचिविष्ण्वीशभेदेन परमात्मने ॥ सर्गसंस्थितिसंहारव्यावृतव्यक्तमूर्त्तये ॥ १ ॥ नमश्चतुर्धा प्रोद्भूतभूतभीतात्मनो भुवः ॥ भूरिभारार्तिसंहर्त्रे भूतनाथाय शूलिने ॥ २ ॥ विश्वग्रासाय विकसत्कालकूटविषाशिने ॥ तत्कलंकां कितग्रीवनीलकंठाय ते नमः ॥ ३ ॥ नमो ललाटनयनेप्रोल्लसत्कृष्णवर्त्मने ॥ ध्वस्तस्मरनिरस्ताधियोगिध्याताय शंभवे ॥ ४ ॥ नमोदेहार्द्धकांताय दग्धदक्षाध्वराय च ॥ चतुर्वर्गेष्टदिष्टार्थदायिने मायिनेऽणवे ॥ ५ ॥ स्थूलाय मूलभूताय शूलवारितविद्विषे ॥ कालहंत्रे नमश्चंद्रखंडमण्डितमौलये ॥ ६ ॥ दिग्वाससे कपर्दातभ्रीताहिशरदिंदवे ॥ देवदैत्योरगेंद्रादिमौलिघृष्टांघ्रये नमः ॥ ७ ॥ भस्माभ्यक्ताय भक्ताय भुक्तिमुक्तिप्रदायिने ॥ सकृव्यक्तस्वरूपाय शंकराय नमोनमः ॥ ८ ॥ नमोंधकांतकरिपवेऽसुरद्विषे नमोस्तुते द्विरदवरावभेदिने ॥ विषोल्लसत्फणिकुलबद्धमूर्त्तये नमः सदा वृषवरवाहनाय ते ॥ ९ ॥ वियन्मरुद्धुतवहवायुकुंभिनीमखेशरव्यमृत मयूखमूर्त्तये ॥ नमः सदा नरकायावभेदिने भवेहनोभवभयभंगकृद्विभो ॥ १० ॥ इति रुद्रस्तवेन स्तुत्वा देवं प्रदक्षिणीकृत्य तत्पद द्वंद्वे साष्टांगं प्रणम्य तत्पीठादीशानदिग्देशे तत्तोयकृते मंडले रुद्रनैवेद्यांशं किंचिदल्पं गृहीत्वा चंडेश्वराय शिवनैवेद्यभागं ददामि इत्युक्त्वा प्रक्षिपेत् । तत आचम्य । " लेह्यपेयान्नपानानि तांबूलं स्रग्विलेपनम् ॥ नैर्माल्यं भोजनं तुभ्यं दत्तमस्तु शिवाज्ञया ॥ ॥ १ ॥ यत्किंचित्क्रियते देव मया चंड तवाज्ञया ॥ न्यूनाधिकं कृतं मोहात्परिपूर्णं तदस्तु मे ॥ २ ॥ इति प्रार्थयेत् ॥ एवं चंडं संपूज्य ॥ ततो जपं कुर्य्यात् ॥ अस्य पुरश्चरणं दशलक्षमंत्रात्मकम् ॥ ततो जपांते सघृतपायसान्नेन अयुतहोमं कृत्वा तेनैव

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

द्रव्येण आवरणदेवताभ्य एकैकाहुतीर्हुत्वा होमदशांशेन तर्पणं तद्दशांशेन मार्जनं शक्त्या ब्राह्मणभोजनं च कुर्य्यात् ॥ "एवमर्चन्महादेवं पंचांगन्यासपूर्वकम् ॥ दशाक्षरजपासक्तो न सीदेत्स्वेष्टसाधने ॥ १ ॥ मनोहराणि गेहानि सुंदर्य्यो वामलोचनाः ॥ धनमिच्छापूरणांतं लभते शिवसेवनात् ॥ २ ॥ प्रयोगान्पूर्वमंत्रोक्तान्कुर्वीतात्र दशाक्षरे ॥ दशाक्षरं भजन् विप्रो रुद्रजापी भवेत्सदा ॥ ३ ॥ इति महार्णवमंत्रमहोदधिशांतिसारादिप्रोक्तं दशाक्षरीरुद्रमंत्रविधानं समाप्तम् ॥ ॥ अथ पंचरुद्रविधानानि हेमाद्रिमहार्णवशान्तिसारेषु ॥ तत्र तावद्रुद्रमाहात्म्यम् ॥ जाबालश्रुतिः—किं जप्येनामृतत्वं नो ब्रूहि शतरुद्रियेण ॥ इति ॥ कैवल्योपनिषदि—यः शतरुद्रियमधीते सोग्निपूतो भवति । स वायुपूतो भवति । स सुरापानात्पूतो भवति । स गुरुतल्पगमनात्पूतो भवति । स स्वर्णस्तेयात्पूतो भवति । स ब्रह्महत्यायाः पूतो भवति । अकृत्यात्पूतो भवति ॥ अनेन ज्ञानमाप्नोति संसारार्णवनाशनम् ॥ तस्मादेवं विदित्वैव कैवल्यफलमश्नुत इति ॥ "पराशरोपि" मद्यं पीत्वा गुरुदाराश्च गत्वा स्तेयं कृत्वा ब्रह्महत्यां च कृत्वा ॥ भस्मच्छन्नो भस्मशय्यां शयानो रुद्राध्यायी मुच्यते सर्वपापैः ॥१॥ इदमहरहः कृते मासमात्रं ज्ञेयम् ॥ तदुक्तं पाराशरेण—रुद्राध्यायी भवेद्भक्त्या मासमेकमतन्द्रितः ॥ प्रायश्चित्तं भवेदेतद्ब्रह्महत्यस्य न संशयः ॥१॥ " पाद्मे शिवगीतायाम् " यस्तु रुद्रं जपेन्नित्यं ध्यायमानो ममाकृतिम् ॥ षडक्षरं वा वाणं वा निष्कामो विजितेंद्रियः ॥ अथाथर्वशिरोमंत्रं केवलं वा रघूत्तम ॥ स तेनैव च देहेन शिवः संजायते ध्रुवम् ॥ " वायुपुराणे " सर्वेषु ग्रहदोषेषु दुःस्वप्नाद्भुतदर्शने ॥ जपन्रुद्रान्सकृद्विप्रः सर्वदोषैः प्रमुच्यते ॥ अनपत्यत्वदोषेषु शाकिन्यादिग्रहेषु च ॥ सर्वज्वरविनाशाय रुद्रजाप्यो न संशयः ॥ रोगवान् पापवांश्चैव रुद्रं जप्त्वा

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

जितेंद्रियः ॥ रोगात्पापात्प्रमुक्तोसावतुलं सुखमश्नुते ॥ " हेमाद्रौ कौशिकबौधायनौ " रुद्रैकादश नीत्वेषा सर्वकामफलप्रदा ॥ सर्वपापक्षयकरी सर्वशान्तिप्रदायिनी ॥ " विष्णुधर्मोत्तरेपि " रुद्राणां च तथा जाप्यं सर्वाघविनिषूदनम् ॥ सर्वकामकरो होम स्तथा सर्वत्र शान्तिदः ॥ अजाविकानामश्वानां कुंजराणां तथा गवाम् ॥ मनुष्याणां नरेंद्राणां बालानां योषितामपि ॥ ग्रामाणां नग राणां च देशानामपि भार्गव ॥ उपद्रुतानां धर्मज्ञ व्याधितानां तथैवच ॥ मारके समनुप्राप्ते रिपुजे च तथा भये ॥ रुद्रहोमः परा शांतिः पायसेन घृतेन वा ॥ (हेमाद्रौ कालिकापुराणे) यः पुनः सततं भक्त्या अभ्यर्च्य शाशिशेखरम् ॥ जपेद्वचायेत्सदा रुद्रात्सोपि याति परं पदम् ॥ अथैहते फलं किंचिदैहिकं पुष्कलं तथा ॥ तानेव हि जपेद्रुद्रान् शुचिर्भूत्वा समाहितः ॥ अथ वेदं जगत्सर्वं वशीकर्तुं समीहते ॥ तदा रुद्रं जपेद्भूयो ध्यायमानो महेश्वरम् ॥ इति रुद्रफलम् ॥ अथ रुद्रप्रकारः ॥ रुद्रश्च त्रिविधः । जपरुद्रो होमरुद्रोऽभिषेकरुद्रश्च । तत्र जपरुद्रः केवलजपात्मको होमांगश्चेति द्वेधा । होमरुद्रे तर्पणादि । अभिषेक रुद्रे च पूजा ब्राह्मणभोजनं सिद्धम् ॥ तत्रापि जपादिरुद्रश्च पंचधा । तद्भेदानाह " शृणुष्व भो महाप्राज्ञ रुद्रभेदान्वदामि ते ॥ रुद्राः पंचविधाः प्रोक्ता देशिकैरुत्तरोत्तरम् ॥ १ ॥ साङ्गस्त्वाद्यो रूपकाख्यः सशीर्षो रुद्र उच्यते ॥ १ ॥ एकादशगुणैस्तद्वद्रुद्रि संज्ञो द्वितीयकः ॥ २ ॥ एकादशभिरेताभिस्तृतीयो लघुरुद्रकः ॥ ३ ॥ लघ्वेकादशभिः प्रोक्तो महारुद्रश्चतुर्थकः ॥ ४ ॥ पंचमः स्यान्महारुद्रएकादशभिरंतिमः ॥ अतिरुद्रः समाख्यातः सर्वेभ्यो ह्युत्तमोत्तमः ॥ इति ॥ ५ ॥ " रुद्रपद्धतौ—साङ्गमाद्यं जपे द्रूपं केवलानि नवान्तरे ॥ सांगं सशीर्षं चांत्यं तु निरंगमिति केच न ॥ १ ॥ षडंगानि जपेत्पूर्वमध्यायं रुद्रियं ततः ॥ तदंते

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

जपतेऽष्टर्चं वयं सोममहच्छिरः ॥ २ ॥ अथ जपाद्रिरुद्रप्रयोगः ॥ तत्र तावत् कृच्छ्रचान्द्रायणं पराकं च कृत्वा । अशक्तश्चेत्तत्प्रतिनिधिरूपां धेनुं वा तन्मूल्यं च दत्वा । अयुतगायत्रीजपं च स्वयं ब्राह्मणद्वारा वा कुर्यात् ॥ एवं प्रायश्चित्तं संपाद्य चंद्रतारादिबलान्विते सुमुहूर्त्ते प्रातर्नित्यकर्म समाप्य सपत्नीको यजमानः स्वासने प्राङ् उदङ्मुखो वा उपविश्य । भस्मत्रिपुंड्रं रुद्राक्षमालां च धृत्वा पवित्रपाणिः । " ॐ नमो भगवते रुद्राय " इति मंत्रेणाचमनं प्राणायामं च कुर्यात् ॥ ततः ॐ आनो भद्रा इत्यादिशांतिपाठं पठित्वा । सुमुखश्चैकदंतश्चेति गणपतिस्मरणपूर्वकं देश कालौ संकीर्त्य । अमुकगोत्रोऽमुकशर्माहं श्रुतिस्मृतिपुराणोक्तफलप्राप्त्यर्थं मम इह जन्मनि जन्मान्तरे च कृतकायिकवाचिकमानसिकसांसर्गिकज्ञाताज्ञातमहापातकोपपातकानां व्याधिरूपेण परिपच्यमानानां विनाशार्थं वाऽमुककामनासिद्ध्यर्थं श्रीपरमेश्वरप्रीत्यर्थम् ॥ अमुकरुद्रहोमेन वा अमुकरुद्राभिषेकेण एतावंतं कालं श्रीसदाशिवं स्वयं ब्राह्मणद्वारा वा यक्ष्ये ॥ एवं तत्तत्कामनया संकल्प्य तदंगत्वेन गणपतिपूजनं पुण्याहवाचनं मातृकापूजनं नांदीश्राद्धमाचार्यादिवरणं च करिष्ये ॥ इति च संकल्प्य ॥ गणपतिपूजनादिआचार्यवरणांतं पूर्ववत्कुर्य्यात् ॥ ततो जपरुद्रे शिवालयादिषु जपस्थानं प्रकल्प्य । होमरुद्रे मण्डपकुंडादि च कुर्य्यात् ॥ ततो जापकः कृतनित्यक्रियः । धृतभस्मत्रिपुंड्ररुद्राक्षः सपवित्रकरः । आचम्य प्राणानायम्य । देशकालौ संकीर्त्य मम यजमानस्य वा अमुककामनासिद्ध्यर्थममुकरुद्रजपं करिष्ये । तदंगत्वेन भूतशुद्धिं प्राणप्रतिष्ठामन्तर्मातृकाबहिर्मातृकान्यासं श्रीकण्ठादिकलान्यासं च करिष्ये । इति च संकल्प्य । भूतशुद्ध्यादिबहिर्मातृकान्यासांतं पद्धतिकाण्डोक्तमार्गेण

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कृत्वा शिवपंचाक्षरोदितं श्रीकण्ठादिकलामातृकान्यासं च संपाद्य रुद्रन्यासान् कुर्य्यात् ॥ "ते चानादेशे सर्वेप्यङ्गुष्ठानाभिकाभ्यां कार्य्याः" ॥ तत्र तावत्प्रथमं छदःपुरुषन्यासः ॥ ॐ तिर्यक्विलायचमसायोर्ध्वबुध्न्यायच्छन्दःपुरुषायनमः शिरसि ॥ १ ॥ ॐ गौतमभरद्वाजाभ्यां नमः । नेत्रयोः ॥ २ ॥ ॐ विश्वामित्रजमदग्निभ्यां नमः । श्रोत्रयोः ॥ ३ ॥ ॐ वसिष्ठकश्यपाभ्यां नमः । नासापुटयोः ॥ ४ ॥ ॐ अत्रये नमः । वाचि ॥ ५ ॥ ॐ गायत्र्यग्निभ्यां नमः । शिरसि ॥ १ ॥ ॐ उष्णक्सवितृभ्यां नमः । ग्रीवायाम् ॥ २ ॥ ॐ बृहतीबृहस्पतिभ्यां नमः । हनौ ॥ ३ ॥ ॐ बृहद्रथन्तरद्यावापृथिवीभ्यां नमः बाह्वोः ॥ ४ ॥ ॐ त्रिष्टुबिन्द्राभ्यां नमः नाभौ ॥ ५ ॥ ॐ जगत्यादित्याभ्यां नमः । श्रोण्योः ॥ ६ ॥ ॐ अतिच्छंदाप्रजापतिभ्यां नमः । लिंगे ॥ ७ ॥ ॐ यज्ञायज्ञियवैश्वानराभ्यां नमः गुदे ॥ ८ ॥ ॐ अनुष्टब्विश्वेभ्यो देवेभ्यो नमः । ऊर्वोः ॥ ९ ॥ ॐ पङ्क्तिमरुद्भ्यो नमः । जानुनोः ॥ १० ॥ ॐ द्विपदाविष्णुभ्यां नमः । पादयोः ॥ ११ ॥ ॐ विच्छंदावायुभ्यां नमः । नासापुटस्थप्राणेषु ॥ १२ ॥ ॐ न्यूनाक्षरच्छंदोभ्यो नमः । मस्तकादिपादान्तं सर्वाङ्गेषु ॥ १३ ॥ इति छंदःपुरुषन्यासः ॥ अथ पञ्चाङ्गरुद्राणां न्यासः ॥ मनोजूति रित्यस्याङ्गिरसबृहस्पतिऋषिर्यजुश्छन्दः विश्वेदेवादेवता हृदयन्यासे विनियोगः । ॐमनोजूतिर्जुषता ० हृदयाय नमः ॥ १ ॥ अबोध्यग्निरित्यस्य बुधगविरावृषी त्रिष्टुप्छंदः अग्निर्देवता शिरोन्यासे विनियोगः । ॐ अबोध्यग्निः स० शिरसे स्वाहा ॥ २ ॥ मूर्द्धानमित्यस्य भरद्वाज ऋषिस्त्रिष्टुप्छंदः वैश्वानरोऽग्निर्देवता शिखान्यासे विनियोगः । ॐ मूर्द्धानन्दिवो० शिखायै वषट् ॥ ३ ॥ मर्माणित इत्यस्य विवस्वान् ऋषिः त्रिष्टुप्छन्दः लिंगोक्ता देवता कवचन्यासे विनियोगः । ॐ मर्माणिते वर्म्मणा० कवचा

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यहुम् ॥ ४ ॥ विश्वतश्चक्षुरित्यस्य विश्वकर्माभौवनऋषिस्त्रिष्टुप्छन्दः । विश्वकर्मादेवतानेत्रन्यासे विनियोगः । ॐ विश्वतश्चक्षुरु त० नेत्रत्रयाय वौषट् ॥५॥ मानस्तोक इत्यस्य कुत्स ऋषिर्जगती छन्दः । एको रुद्रो देवता अस्त्रन्यासे विनियोगः । ॐ मानस्तो केतनये० अस्त्राय फट् ॥ ६ ॥ इति लघुषडङ्गन्यासः प्रथमः ॥ १ ॥ अथ मंत्रन्यासः ॥ यातेरुद्र इति परमेष्ठी ऋषिः अनुष्टु प्छन्दः । एको रुद्रो देवता शिखान्यासे विनियोगः ॐ यातेरुद्रशिवातनूरघोरा० शिखायाम् ॥१॥ अस्मिन्महत्यर्णवे इत्यस्य पर मेष्ठी ऋषिः अनुष्टुप्छंदः । बहुरुद्रो देवता । शिरोन्यासे विनियोगः । ॐ अस्मिन्महत्यर्णवे० शिरसि ॥२॥ असंख्यातेति परमेष्ठी ऋषिः अनुष्टुप्छदः । बहवो रुद्रा देवता ललाटन्यासे विनियोगः ॥ ॐ असंख्याता० ललाटे ॥३॥ त्र्यम्बकमित्यनयोः क्रमेण वसिष्ठ प्रजापती० । अनुष्टुप्त्र्यंबको० । ॐ नेत्रन्यासे० । ॐ त्र्यम्बकं यजा० नेत्रयोः ॥४॥ मानस्तोक इति कुत्स ऋषिः जगती छन्दः । एको रुद्रोदेवता नासिकान्यासे० ॐ मानस्तोके० नासिकायाम् ॥ ५ ॥ अवतत्येत्यस्य परमेष्ठी ऋषिः । अनुष्टुप् छंदः । एको रुद्रो देवता मुखन्यासे विनियोगः । ॐ अवतत्यधनु० मुखे ॥ ६ ॥ नीलग्रीवा इति द्वयोः परमेष्ठी० अनुष्टुप्० बहवो रुद्रा देवता कंठन्यासे विनियोगः । ॐ नीलग्रीवाः शि० कंठे ॥ ७ ॥ नमस्तआयुधायेत्यस्य परमेष्ठी अनुष्टुप् एको रुद्रो० । प्रकोष्ठन्यासे० । ॐ नमस्तऽआयु० प्रकोष्ठे ॥८॥ [मणिबंधादूर्ध्वं कूर्पराधोभागः प्रकोष्ठः] येतीर्थानीति परमेष्ठी अनुष्टुप्० । बहवो रुद्रा० न्यासे० । ॐ येतीर्थानि० । हस्तयोः ॥९॥ नमोवःकिरिकेभ्यः इति परमेष्ठी० । सामोष्णिक्यजुरुष्णिगतिच्छन्दांसि बहुरुद्रा० । हृदयन्यासे विनियोगः । ॐ नमोवः किरिकेभ्य० हृदये ॥१०॥ नमोहिरण्यबाहव इति परमेष्ठी ऋषिः । अत्रैकादशाक्षराणां यजुस्त्रिष्टुप्छन्दः । अष्टा

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

क्षराणां यजुरनुष्टुप्० । दशाक्षरस्य यजुःपंक्तिः हिरण्यवाह्वादयो मंत्रवर्णावगता उभयतो नमस्कारा वहवो रुद्रा० नाभिन्यासे विनियोगः । ॐ नमो हिरण्यवाहवे० पुष्टानां पतये नमः । नाभौ ॥११॥ इमारुद्रायेति कुत्स० । जगती० । एको रुद्रो दे० । गुह्यन्यासे० । ॐ इमारुद्राय० गुह्ये ॥ १२ ॥ मानोमहांतमितिकुत्स० । जगती० । एकोरुद्र० । ऊरुन्यासे० । ॐ मानोमहांत० । ऊर्वोः ॥ १३ ॥ एषत इत्यस्य प्रजापति० । सामपंक्तिर्यजुर्जगतीछंदः । रुद्रो० । ऊरुन्यासे० ॐ एषते रुद्रभाग० जानुनोः ॥ १४ ॥ अवरुद्रमित्यस्य प्रजापति० । पंक्ति० । रुद्रो० । जंघान्यासे० । ॐ अवरुद्र० जंघयोः ॥ १५ ॥ [जानुगुल्फयोरंतरालं जंघा] अध्यवोचदित्यस्य परमेष्ठी० । पंक्तिच्छंदः । एको रुद्रो० । कवचन्यासे० । ॐ अध्यवोचद० । कवचमुद्रया कवचम् ॥ १६ ॥ नमोबिल्मिन इत्यस्य परमेष्ठी० । षडक्षराणां यजुर्गायत्री० । पंचाक्षरयोर्दैवीपंक्तिः । सप्ताक्षरस्य यजुरुष्णिक्बिल्मिनादयो मंत्रवर्णाविगता । अन्यतरतोनमस्कारा बहवो रुद्रा देवता उपकवचन्यासे० ॐ नमो बिल्मिने० । हनन्यायच [कवचाद्विपरीतमुपकवचम् । कवचोपरि तथैवेत्युपकचमित्यन्ये] ॥१७॥ नमोस्तुनीलग्रीवायेत्यस्य परमेष्ठी० । अनुष्टुप्० । एको रुद्रो० । तृतीयनेत्रन्यासे० ॐ नमोस्तुनीलग्री० [मुष्टितो विमुक्तया मध्यमया तृतीयनेत्रे] ॥१८॥ प्रमुंचेत्यस्य परमेष्ठी० । अनुष्टुप्० । एको रुद्रोदे० । अस्त्रन्यासे० । ॐ प्रमुंचध० । अस्त्रम् ॥ १९ ॥ यएतावंतश्चेत्यस्य परमेष्ठी० । अनुष्टुप्० । बहवो रुद्रा दिग्बंधने० । ॐ यएतावंतश्च० दिक्षुविदिक्षुच परस्परंतर्जन्यंगुष्ठाग्रस्फोटनेनदिग्बंधः ॥ २० ॥ इति शिखाद्यस्त्रांतो दिग्बंधसहित एकोनविंशतिविधो द्वितीयो न्यासः॥२॥ दशाक्षरमंत्रस्य प्रजापति० । विराट्० । रुद्रो० । न्यासे० ॥ ॐ ॐ नमो मूर्द्धनि । ॐ नं नमः शिखायाम् । ॐ मों नमो ललाटे । ॐ भं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नमो मुखे० । ॐ गं नमः कंठे । ॐ वं नमः हृदये । ॐ तें नमः दक्षिणहस्ते । ॐ रुं नमः वामहस्ते । ॐ द्रां नमः नाभौ । ॐ यं नमः । पादयोः ॥ १० ॥ इति दशाक्षरीमंत्रन्यासस्तृतीयः ॥ ३ ॥ [अथ संपुटाख्यो न्यासः] । स च मुदितांजलिना प्राच्या दिदिक्षु वक्ष्यमाणमंत्रैः कार्यः । तद्यथा । त्रातारमित्यस्य गर्ग ऋषिः । त्रिष्टुप् छन्दः । इन्द्रो देवता संपुटीकरणे विनियोगः । ॐ त्रातारमिन्द्र० ॐ इंद्राय नमः । इति प्राच्याम् ॥ १ ॥ त्वन्नोऽअग्न इत्यस्य हिरण्यस्तूपआङ्गिरस० । त्रिष्टुप् छन्दः । अग्निर्देवता संपुटीकरणे० । ॐ त्वन्नोऽअग्ने० ॐ अग्नये नमः । इत्याग्नेय्याम् ॥ २ ॥ सुगन्नुपन्था० मित्यस्य प्रजापति० त्रिष्टुप्० । यमो देवता । संपुटी० । ॐ सुगन्नुपन्थां ॐ यमाय० । इति दक्षिणस्याम् ॥ ३ ॥ असुन्वन्तमित्यस्य प्रजापति० त्रिष्टुप्० निर्ऋतिः सं० । ॐ असुन्वन्तम० ॐ निर्ऋतये नमः । इति नैर्ऋत्याम् ॥ ४ ॥ तत्वायामीत्यस्य शुनःशेप० त्रिष्टुप्० । वरुणो० । सं० । ॐ तत्वायामि० ॐ वरुणाय नमः । इति प्रतीच्याम् ॥ ५ ॥ आनोनियुद्भिरित्यस्य वसिष्ठ० त्रिष्टुप्० । वायुः । सं० । ॐ आनोनियुद्भि० ॐ वायवे नमः । इति वायव्याम् ॥ ६ ॥ वयर्ठ्सोमेत्यस्य बन्धु० । गायत्री० । सोमो० । सं० । ॐ वयर्ठ्सोम० ॐ सोमाय नमः । इत्युदीच्याम् ॥ ७ ॥ तमीशानमित्यस्य गौतम० । जगती० । ईशानो० । सं० । ॐ तमीशान० ॐ ईशानाय० । इतीशान्याम् ॥ ८ ॥ अस्मेरुद्रा इत्यस्य प्रगर्थ० । त्रिष्टुप्० । ब्रह्मा० । सं० । ॐ अस्मे रुद्रा० ॐ रुद्राय नमः । इत्यूर्ध्वम् ॥ ९ ॥ स्योनापृथिवीत्यस्य मेधातिथि० । गायत्री छन्दः । अनन्तो देवता संपुटीकरणे विनियोगः । ॐ स्योनापृथिवि० ॐ अनंताय नमः । इत्यधः ॥१०॥ एवं दिक्षु विदिक्षु च इन्द्रदीन्

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

प्रणमेत् ॥ इति संपुटाख्यश्चतुर्थो न्यासः ॥ ४ ॥ अथबृहत्षडङ्गन्यासः ॥ यज्जाग्रत इति षड्ऋचस्य शिवसंकल्प ऋषिः । त्रिष्टुप् छन्दः । मनो देवता । हृदयन्यासे विनियोगः ॥ ॐ यज्जाग्रतो० ॥ १ ॥ येन कर्माण्य० ॥ २ ॥ यत्प्रज्ञान० ॥ ३ ॥ येनेदं भूतं० ॥ ४ ॥ यस्मिन्नृच० ॥ ५ ॥ सुखारथि० ॥ ६ ॥ इति हृदयाय नमः ॥ १ ॥ "मुष्टिविनिर्गतांगुष्ठौ संयुतौ कृत्वा हृदये न्यसेत्" । सहस्रशीर्षेति षोडशर्चस्य पुरुषसूक्तस्य नारायण ऋषिः । आद्यानां पंचदशानामनुष्टुप् छन्दः । यज्ञेनयज्ञमित्यस्य त्रिष्टुप्० । जगद्बीजम् । पुरुषो देवता । शिरोन्यासे विनियोगः । ॐ सहस्रशीर्षा० ॥ १६ ॥ शिरसे स्वाहा । "इति मुष्टिनिर्गतां गुष्ठौ संयुक्तौ न्यस्ततर्ज्जनीकौ कृत्वा शिरसि न्यसेत्" ॥२॥ अद्भ्यः सम्भृत इति षड्ऋचस्योत्तरनारायणस्य नारायणपुरुष ऋषिः आद्यानां तिसृणां त्रिष्टुप् छंदः । चतुर्थपंचमयोरनुष्टुप्० । षष्ठस्य त्रिष्टुप् छंदः । आदित्यो देवता । शिखान्यासे विनियोगः । ॐ अद्भ्यः सम्भृत० ६ शिखायै वषट् "इति मुष्टिपुटौ करौ कृत्वांगुष्ठावधःप्रसक्ताग्रे कनिष्ठे चोर्ध्वतः कृत्वा शिखायां न्यसेत्" ॥ ३ ॥ आशुःशिशान इति सप्तदशानामप्रतिरथ ऋषिः । त्रिष्टुप् छन्दः । इन्द्रो देवता । कवचन्यासे विनियोगः । ॐ आशुः शिशानो० ॥ १७ ॥ कवचायहुम् ॥"इत्यङ्गुष्ठौ प्रसक्ततर्जन्यौ च त्रिकोणवत् कृत्वा मूर्द्धनि पश्चान्मुखं कृतोभयपार्श्वतः करौ हृदयान्तं नयन् हृदये न्यसेत्" ॥ ४ ॥ विभ्राडिति सप्तदशानां विभ्राड् ऋषिः । जगती छन्दः । सूर्यो देवता । नेत्रन्यासे विनियोगः ॥ ॐ विभ्राड् बृहत्पिबतु० ॥ १७ ॥ नेत्रत्रयाय वौषट् "इति नेत्रोन्मुखं हस्तं कृत्वा प्रसक्तांगुष्ठकनिष्ठिकां च कृत्वा मध्यमां किंचित्प्रसार्य इतरांगुलीर्नयन् नेत्रेषु न्यसेत्" ॥ ५ ॥ नमस्ते इत्यादिषोडशर्चस्य परमेष्ठी ऋषिः । नमस्तइत्यस्य गायत्रीयात इति तिसृणामनुष्टुप्० । अध्यवोच

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

दिति त्रयाणां पङ्क्ति० । नमोस्त्वितिसप्तानामनुष्टुप्० । मान इति द्वयोः कुत्स ऋषिः॥ जगती छन्दः । सर्वासामेको रुद्रो देवता । अस्त्र न्यासे विनियोगः । ॐ नमस्ते रुद्र० हवामहे ॥ १६ ॥ इत्यस्त्राय फट् ॥ "इति किंचित्तर्जनीम्प्रसार्य मध्यमाङ्गुष्ठयोगेन अस्त्राय फडित्यस्त्रम् ॥ ९ ॥ इति बृहत्षडङ्गन्यासः पञ्चमः ॥ ९ ॥ ततः । ॐ एषते रुद्रभाग० इति मंत्रेण योनिमुद्राप्रदर्शनम् ॥ एवं पञ्चाङ्गन्यासान् विधाय । रुद्ररूपमात्मानं ध्यायेत् ॥ अथ ध्यानम् ॥ अथात्मानं रुद्ररूपं ध्यायेत्पंचमुखं शिवम् ॥ प्रतिवक्त्रं त्रिनेत्रं च दशहस्तं दशायुधम् ॥ १ ॥ कमंडलुं साक्षसूत्रं बाणशूलधरं हरम् ॥ दंडं डमरुखट्वाङ्गाभयपात्रं पिनाकिनम् ॥ २ ॥ अष्टसिद्धि युतं सौम्यं सर्वाभरणभूषितम् ॥ नीलग्रीवं शशांकार्द्धशेखरं स्मितसुंदरम् ॥ ३ ॥ शुद्धस्फटिकसंकाशं नागयज्ञोपवीतिनम् ॥ गज चर्मपरीधानं व्याघ्रचर्मोत्तरीयकम् ॥ ४ ॥ वृषस्कंधसमारूढमुमादेहार्द्धधारिणम् ॥ दुर्दंतं कपिलजटं शिखामुद्योतकारिणम् ॥ ९ ॥ अमृतेनाप्लुतं हृष्टं दिव्यभोगसमाकुलम् ॥ दैवतैश्च समायुक्तं सुरासुरैर्नमस्कृतम् ॥ ६ ॥ शाश्वतं सच्चिदानन्दं ध्रुवमक्षरमव्ययम् ॥ अजातममृतं नित्यं सर्वव्यापिनमीश्वरम् ॥ ७ ॥ एवं रुद्रतनुं सर्वे यक्षराक्षसपन्नगाः ॥ डाकिनीशाकिनीभूतपिशाचा जृंभका ग्रहाः ॥ ८ ॥ ज्वलंतं ते प्रपश्यन्ति प्रलयानलसन्निभम् ॥ एवं ध्यात्वा द्विजः सम्यक् ततो यजनमारभेत् ॥ ९ ॥ एवं श्री रुद्रं ध्यात्वा मानसोपचारैः संपूज्य । यथाशक्ति । "ॐ नमो भगवते रुद्राय ।" इति मूलमंत्रं जपेत् ॥ यदि तु भेदेनोपासीत तदानींतनां पूजां पात्रासादनं शैवपीठपूजापूर्वकं पद्धतिकाण्डोक्तविधिना मण्डलमध्ये स्वर्णमय्यां रुद्रप्रतिमायां लिंगे वा वेदोक्त मंत्रैः पुष्पान्तां पूजां कृत्वा पूर्वोक्तरुद्रयंत्रोक्तावरणदेवताः संपूज्य । धूपदीपनैवेद्यादिनीराजनान्तैरुपचारैरर्चनं विधाय । रुद्रस्त

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वेन स्तुत्वा वेदमंत्रैर्देवमूर्द्धनि पुष्पांजलिं दत्वा । प्रदक्षिणात्रयं कृत्वा । ॐ नमस्तेस्तु भगवन् विश्वेश्वराय महादेवाय त्र्यंबकाय त्रिपुरांतकाय त्रिकाग्निकालाय कालाग्निरुद्राय नीलकंठाय सर्वेश्वराय श्रीमहादेवाय नमः । इति नत्वा । नमः सर्वहितार्थाय जगदाधार हेतवे । साष्टाङ्गोयं प्रणामस्ते दीनत्वेन मया कृतः ॥ इति साष्टांगं प्रणम्य विविधैः स्तोत्रैः स्तुत्वा पूजां निवेदयेत् ॥ ततस्तन्मना रुद्रं ध्यायन् जपं कुर्यात् । अथ जपक्रमः ॥ ॐ नमस्तेरुद्रमन्यवऽउतोतऽइषवेनमः÷॥बाहुभ्यामुततेनमः÷ ॥ १ ॥ यातेरुद्रशिवातनूरघोरापापकाशिनी ॥ तयानस्तन्वाशन्तमयागिरिशन्ताभिचाकशीहि ॥ २ ॥ यामिषुङ्गिरिशन्तहस्तेबिभर्ष्यस्तवे ॥ शिवाङ्गिरित्रताङ्कुरुमाहिंठ्सीःपुरुषञ्जगत् ॥ ३ ॥ शिवेनव्वचसात्वागिरिशाच्छाव्वदामसि ॥ यथानःसर्व्वमिज्जगदयक्ष्मठ्सुमनाऽअसत् ॥ ४ ॥ अध्यवोचदधिवक्ताप्रथमोदैव्योभिषक् ॥ अहींश्चसर्व्वाञ्जम्भयन्त्सर्वाश्चयातुधान्योधराचीःपरासुव ॥ ५ ॥ असौयस्ताम्रोऽअरुणऽउतबभ्रुः सुमङ्गलः÷ ॥ येचैनठ्रुद्राऽअभितोदिक्षुश्रिताःसहस्रशोवैषाᳬहेडईमहे ॥ ६ ॥ असौयोवसर्पतिनीलग्रीवोव्विलोहितः ॥ उतैनङ्गोपाऽअदृश्रन्नदृश्रन्नुदहार्य्यः सदृष्टोमृडयातिनः ॥ ७ ॥ नमोस्तुनीलग्रीवायसहस्राक्षायमीढुषे ॥ अथोयेऽअस्यसत्वानोहन्तेभ्योकरन्नमः÷ ॥ ८ ॥ प्रमुञ्चधन्वनस्त्वमुभयोरात्कन्योर्ज्याम् ॥ याश्चतेहस्तऽइषवःपराताभगवोव्वप ॥ ९ ॥ विज्यन्धनुः÷कपर्दिनोव्विशल्योबाणवाँऽउत ॥ अनेशन्नस्ययाऽइषवऽआभुरस्यनिषंगधिः ॥ १० ॥ यातेहेतिर्म्मीढुष्टमहस्तेबभूवतेधनुः÷ ॥ तयास्माव्विश्वतस्त्वमं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यक्ष्म्मयापरिभुज ॥ ११ ॥ परिते धन्वनो हेतिरस्म्मान्वृणक्तु विश्वतः ॥ अथो य इषुधिस्तवारे अस्म्मन्निधेहितम् ॥ १२ ॥ अवतत्य धनुष्ट्वꣳसहस्राक्ष शतेषुधे ॥ निशीर्य्य शल्यानाम्मुखा शिवो नः सुमना भव ॥ १३ ॥ नमस्तऽआयुधायानातताय धृष्णवे ॥ उभाभ्याम्मुत ते नमो बाहुभ्यान्तव धन्वने ॥ १४ ॥ मानो महान्तमुत मानो अर्भकम्मान उक्षन्तमुत मान उक्षितम् ॥ मानो वधीः पितरम्मोत मातरम्मानः प्रियास्तन्वो रुद्र रीरिषः ॥ १५ ॥ मान स्तोके तनये मान आयुषि मानो गोषु मानो अश्वेषु रीरिषः ॥ मानो वीरान्रुद्र भामिनो वधीर्हविष्मन्तः सदमित्त्वा हवामहे ॥ १६ ॥ नमो हरिकेशायोपवीतिने पुष्टानाम्पतये नमो नमो बभ्लुशाय ॥ १७ ॥ नमो बभ्लुशाय व्याधिनेन्नानाम्पतये नमो नमो भवस्य हेत्यै जगतां पतये नमो नमो रुद्रायातताविने क्षेत्राणाम्पतये नमो नमः सूताया हन्त्यै वनानाम्पतये नमो नमो रोहिताय ॥ १८ ॥ नमो रोहिताय ॥ स्थपतये वृक्षाणाम्पतये नमो नमो भुवन्तये वारिवस्कृतायौषधीनाम्पतये नमो नमो मन्त्रिणे वाणिजायकक्षाणाम्पतये नमो नमः उच्चैर्घोषायाक्रन्दयते पत्तीनाम्पतये नमो नमः कृत्स्नायतया ॥ १९ ॥ नमः कृत्स्नायतया ॥ धावते सत्वनाम्पतये नमो नमः सहमानाय निव्याधिने आव्याधिनीनाम्पतये नमो नमो निषङ्गिणे ककुभाय स्तेनानाम्पतये नमो नमो निचेरवे परि

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

चरायारण्यानाम्पतयेनमोनमोव्वश्चते ॥ २० ॥ नमोव्वश्चते ॥ परिव्वश्चतेस्तायूनाम्पतयेनमोनमोनिषङ्गिणेऽइषुधिमतेतस्कराणा
म्पतयेनमोनमः÷सृकायिभ्योजिघांसद्भ्योमुष्णताम्पतयेनमोनमोसिमद्भ्योनक्तञ्चरद्भ्योविकृन्तानाम्पतयेनमः÷ ॥ २१ ॥ नमऽउष्णी
षिणे ॥ गिरिचरायकुलुञ्चानाम्पतयेनमोनमऽइषुमद्भ्योधन्वायिभ्यश्चवोनमोनमऽआतन्वानेभ्यः÷प्रतिदधानेभ्यश्चवोनमोनमऽआ
यच्छद्भ्योस्यद्भ्यश्चवोनमोनमोव्विसृजद्भ्यः÷ ॥ २२ ॥ नमोव्विसृजद्भ्योविद्धयद्भ्यश्चवोनमोनमः÷स्वपद्भ्योजाग्रद्भ्यश्चवोनमो
नमःशयानेभ्यऽआसीनेभ्यश्चवोनमोनमस्तिष्ठद्भ्योधावद्भ्यश्चवोनमोनमः÷सभाभ्यः÷ ॥ २३ ॥ नमः÷सभाभ्यः÷ । सभापतिभ्य
श्चवोनमोनमोश्वेभ्योश्वपतिभ्यश्चवोनमोनमऽआव्याधिनीभ्योव्विविद्धयन्तीभ्यश्चवोनमोनमऽउगणाभ्यस्तृंहतीभ्यः
श्चवोनमोनमोगणेभ्यः÷ ॥ २४ ॥ नमोगणेभ्योगणपतिभ्यश्चवोनमोनमोव्रातेभ्योव्रातपतिभ्यश्चवोनमोनमोगृत्सेभ्योगृत्स
पतिभ्यश्चवोनमोनमोव्विरूपेभ्योविश्वरूपेभ्यश्चवोनमोनमःसेनाभ्यः ॥ २५ ॥ नमः÷सेनाभ्यः । सेनानिभ्यश्चवोनमोनमो
रथिभ्योऽरथेभ्यश्चवोनमोनमः÷क्षत्तृभ्यः÷संगृहीतृभ्यश्चवोनमोनमोमहद्भ्योऽअर्भकेभ्यश्चवोनमः÷ ॥ २६ ॥ नमस्तक्षभ्यः ॥
नमस्तक्षभ्योरथकारेभ्यश्चवोनमोनमःकुलालेभ्यःकर्म्मारेभ्यश्चवोनमोनमोनिषादेभ्यः÷पुञ्जिष्ठेभ्यश्चवोनमोनमः÷श्वनिभ्योमृग
युभ्यश्चवोनमोनमःश्वभ्यः÷ ॥ २७ ॥ नमःश्वभ्यः ॥ श्वपतिभ्यश्चवोनमोनमोभवायचरुद्रायचनमः÷ ॥ शर्व्वायचपशुप

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तेयेचनमोनीलग्रीवायचशितिकण्ठायचनमः÷कपर्दिनेनैः ॥२८॥ नमः÷कपर्दिनेनैचुव्युप्तकेशायचनमः÷सहस्राक्षायचशतधन्वनेचनमो गिरिशायायचशिपिविष्टायचनमोमीढुष्टमायचेषुमतेचनमोह्रस्वाय ॥ २९ ॥ नमोह्रस्वायचव्यामनायचनमोबृहतेचव्वर्षीयसेयनमो व्वृद्धायचसवृधेचनमोग्र्यायचप्रथमायचनमऽआशवे ॥ ३० ॥ नमऽआशवे ॥ चाजिरायचनमःशीघ्र्यायचशीभ्यायचनमऽऊर्म्म्यायचावस्वन्यायचनमोनादेयायचद्वीप्यायच ॥३१॥ नमोज्येष्ठाय । चकनिष्ठायचनमः÷पूर्व्वजायचापरजायचनमोमद्ध्यमायचापगल्भायचनमोजघन्यायचबुध्न्यायचनमःसोभ्यायः ॥३२॥ नमःसोभ्यायचप्रतिसर्य्यायचनमोयाम्यायचक्षेम्यायचनमःश्लोक्यायचावसान्यायचनमऽउर्व्वर्य्यायचखल्यायचनमोवन्यायः ॥३३ ॥ नमोवन्न्यायचकक्ष्यायचनमः÷श्रवायचप्रतिश्रवायचनमऽआशुषेणायचाशुरथायचनमःशूरायचावभेदिनेचनमोबिल्मिनेः ॥३४॥ नमोबिल्मिनेः । चकवचिनेचनमोवर्म्मिणेचव्वरूथिनेचनमः÷श्रुतायचश्रुतसेनायचनमोदुन्दुभ्यायचाहनन्यायचनमोधृष्णवे ॥ ३५ ॥ नमोधृष्णवे ॥ चप्रमृशायचनमोनिषङ्गिणेचेषुधिमतेचनमस्तीक्ष्णेषवेचायुधिनेचनमः÷स्वायुधायचसुधन्वनेच ॥ ३६ ॥ नमःस्रुत्यायचपथ्यायचनमःकाट्यायचनीप्यायचनमःकुल्यायचसरस्यायचनमोनादेयायचव्वैशन्तायचनमःकूप्याय ॥ ३७ ॥ नमःकूप्यायचावट्यायचनमोव्वीद्ध्यायचातप्यायचनमोमेघ्यायचविद्युत

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

त्यायचनमोव्वर्ष्यायचावर्ष्यायचनमोव्वात्यायं ॥ ३८ ॥ नमोव्वात्यायं । चेरेम्म्यायंचनमोंव्वास्तव्व्यायचव्वास्तुपायंचनमःसो
मायंचरुद्रायंचनमंस्ताम्म्रायंचारुणायंचनमं÷शङ्गवे ॥ ३९ ॥ नमं÷शङ्गवे । चपशुपतयेचनमोऽउग्रायंचभीमायंचनमोंग्रेवधायंच
दूरेवधायंचनमोंहन्त्रेचहनीयंसेचनमोंवृक्षेब्भ्योहरिकेशेब्भ्योनमंस्तारायं ॥४० ॥ नमं÷शम्भवाय । चमयोभवायंचनमं÷शंकरायंचम
यस्करायंचनम÷शिवायंचशिवतरायच॥४१॥नमःपार्य्यायं । चावार्य्यायचनमं÷प्रतरणायचोत्तरणायचनमस्तीर्त्थ्यायंचकूल्यायं
चनमःशष्प्यायंचफेन्यायंचनमं÷सिकत्यायं॥४२॥ नमं÷सिकत्यायंचप्रवाह्यायंचनमं÷किंठिंशिलायंचक्षयणायंचनमं÷कपर्द्दिनेचपु
लस्तयेंचनमंऽइरिण्यायंचप्रपत्थ्यायंचनमोव्व्रज्यायं॥४३॥ नमोव्व्रज्यायंचगोष्ठ्यायंचनमस्तल्प्यायंचगेह्यायंचनमोंह्वदुष्यायंचनि
वेष्ट्यायंचनमःकाट्यायंचगव्व्हरेष्ठायंचनमःशुष्क्यायं॥४४॥ नमःशुष्क्यायंचहरित्यायंचनमं÷पांसव्व्यायंचरजस्यायंचनमोलो
प्यायंचोलप्यायंचनमऽऊव्व्यायंचसूव्व्यायंचनमं÷पर्णाय॥४५॥नमं÷पर्णायं । चपर्णशदायंचनमंऽउद्गुरमाणायंचाभिघ्नतेचनमंऽआ
खिदतेंचप्रखिदतेंचनमंऽइषुकृद्भ्योंधनुष्कृद्भ्यश्चवोनमोनमोंवःकिरिकेब्भ्योंदेवानाठ्ंहृदयेब्भ्योनमोंव्विचिन्व्वत्केब्भ्योनमोंव्विक्षि
णत्केब्भ्योनमंऽआनिर्हतेब्भ्यं÷॥४६॥द्रापेऽअन्धंसस्पतेदरिद्रुनीलंलोहितं ॥ आसांप्रजानांमेषाम्पशूनाम्माभेर्म्मारोङ्मोचंनुःकिञ्चु

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नाममत् ॥ ४७ ॥ इमारुद्रायं । तवसेकपर्दिनेक्षयद्वीरायप्रभरामहेमती÷ ॥ यथाशमसद्द्विपदेचतुष्पदेविश्वंपुष्टंग्रामेअस्मिन्ननातुरम् ॥ ४८ ॥ यातेरुद्रशिवातनूरघोराव्विश्वाहाभेषजीशिवारुतस्यभेषजीतयानोमृडजीवसे ॥ ४९ ॥ परिनोरुद्रस्यहेतिर्व्वृणक्तुपरित्वेषस्यदुर्म्मतिरघायोः ॥ अवस्थिरामघवद्भ्यस्तनुष्वमीढ्वस्तोकायतनयायमृड ॥ ५० ॥ मीढुष्टमशिवतम । शिवोनः÷सुमनाभव ॥ परमेव्वृक्षऽआयुधन्निधायकृत्तिंव्वसानऽआचरपिनाकम्बिभ्रदागहि ॥ ५१ ॥ व्विकिरिद्रव्विलोहितनमस्तेऽअस्तुभगवः ॥ यास्तेसहस्रंहेतयोन्यमस्मन्निवपन्तुताः ॥ ५२ ॥ सहस्राणिसहस्रशोबाह्वोस्तवहेतयः÷तासामीशानोभगवःपराचीनामुखाकृधि ॥ ॥ ५३ ॥ असंङ्ख्याताःसहस्राणियेरुद्राऽअधिभूम्याम् ॥ तेषाँ÷सहस्रयोजनेवधन्वानितन्मसि ॥ ५४ ॥ अस्मिन्महत्त्यर्णवेन्तरिक्षेभवाऽअधि ॥ तेषाँ÷स० ॥ ५५ ॥ नीलग्रीवाःशितिकण्ठादिवंरुद्राऽउपश्रिताः÷तेषाँ÷स० ॥ ५६ ॥ नीलग्रीवाःशितिकण्ठाःशर्व्वाऽअधःक्षमाचराः÷॥तेषाँ÷स०॥५७॥ येव्वृक्षेषुशष्पिञ्जरानीलग्रीवाव्विलोहिताः॥तेषाँ÷स०॥५८॥ येभूतानामधिपतयोव्विशिखासः÷कपर्दिनः÷ ॥ तेषाँ÷स० ॥५९॥ येपथाम्पथिरक्षयऽऐलबृदाऽआयुर्युधः÷ ॥ तेषाँ÷स० ॥ ६० ॥ येतीर्थानिप्रचरन्तिसृकाहस्तानिषङ्गिणः÷ ॥ तेषाँ÷स० ॥ ६१ ॥ येन्नेषुव्विविध्यन्तिपात्रेषुपिबतोजनान् ॥ तेषाँ÷स० ॥ ६२ ॥ यऽएता

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.



वंन्तश्चभूर्याꣳसश्चदिशोरुद्राव्वितास्तिथरे ॥ तेषाꣳस० ॥ ६३ ॥ नमोस्तुरुद्रेभ्योयेदिवियेषांव्वर्षमिषवः ॥ तेभ्योदशप्राचीर्दश दक्षिणादशप्रतीचीर्दशोदीचीर्दशोध्वा? ॥ तेव्भ्योनमोऽअस्तुतेनोवन्तुतेनोमृडयन्तुतेयन्द्विष्मोयश्चनोद्वेष्टितमैषाञ्जम्भेदध्मः ॥ ६४ ॥ नमोस्तुरुद्रेव्भ्योयेन्तरिक्षेयेषांव्वातऽइषवः॥तेव्भ्यो०॥६५॥नमोस्तुरुद्रेव्भ्योयेपृथिव्यांऽयषामन्नेमिषवः ॥ तेव्भ्यो दशप्राचीर्दशदक्षिणादशप्रतीचीर्दशोदीचीर्दशोध्वाः ॥ तेभ्योनमोऽअस्तुतेनोवन्तुतेनोमृडयन्तुतेयंद्विष्मोयश्चनोद्वेष्टितमैषांजम्भेदध्मः॥६६॥ इति रुद्राध्यायं पठित्वा । ॐ व्वाजश्चमेप्रसवश्चमेप्रयतिश्चमेप्रासितिश्चमेधीतिश्चमेक्रतुश्चमेस्वरश्चमेश्श्लोकश्चमेश्रवश्चमेश्श्रुतिश्चमेज्योतिश्चमेस्वश्चमेयज्ञेनकल्पन्ताम्॥१॥ प्राणश्चमेपानश्चमेव्यानश्चमेसुश्चमेचित्तञ्चमऽआधीतञ्चमेव्वाक्चमेमनश्चमेचक्षुश्चमेश्श्रोत्रंचमेदक्षश्चमेबलंञ्चमेयज्ञेनकल्पन्ताम् ॥२॥ ओजश्चमेसहश्चमऽआत्म्माचमेतनूश्चमेशर्म्मचमेव्वर्म्मचमेङ्गानिचमेस्थींनिचमेपरूꣳषिचमेशरीराणिचमऽआयुश्चमेजराचमेयज्ञेनकल्पंताम्॥३॥ ज्यैष्ठ्यंचञ्चमऽआधिपत्यञ्चमेमन्युश्चमेभामश्चमेमश्चमेम्भश्चमेजेमाचमेमहिमाचमेव्वरिमाचमेप्रथिमाचमेव्वर्षिमाचमेद्राघिमाचमेव्वृद्धञ्चमेव्वृद्धिश्चमेयज्ञेनकल्पन्ताम् ॥ ४ ॥ इत्याद्यं चमकानुवाकं पठेत् ॥ १ ॥ पुनः ॐ नमस्तेरुद्र इत्यादि ॥ ६६ ॥ पठित्वा । ॐ सत्त्यञ्चमेश्रद्धाचमेजगच्चमेधनञ्चमेव्विश्वञ्चमेमहश्चमेक्रीडाचमेमोदश्चमेजातञ्चमेजनिष्यमाणञ्चमेसूक्तञ्चमेसुकृतञ्चमेयज्ञेनकल्पन्ताम् ॥ ५ ॥ ऋतञ्चमेमृतञ्चमे

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यक्षꣳमेनामयꣳमेजीवातुꣳमेदीर्घायुत्वꣳमेनामित्रꣳमेभयꣳमेसुखꣳमेशयनꣳमेसूषाꣳमेसुदिनꣳमेयज्ञेनकल्पन्ताम्॥६॥ यन्ता चंमेधर्त्ताचंमेक्षेमꣳमेधृतिꣳमेविशꣳमेमहꣳमेसंविचंमेज्ञात्रꣳमेसूꣳमेप्रसूꣳमेसीरꣳमेलयꣳमेयज्ञेनकल्पन्ताम् ॥ ७ ॥ शंचमेमयꣳमेप्रियꣳमेनुकामꣳमेकामꣳमेसौमनसꣳमेभगꣳमेद्रविणꣳमेभद्रꣳमेश्रेयꣳमेवसीयꣳमेयशꣳमेयज्ञेनकल्पन्ताम्८॥ इति द्वितीयं चमकानुवाकं पठेत् ॥२॥ पुनः ॐ नमस्ते०इत्यादि ६६पठित्वा ॥ ॐऊर्क्चमेसूनृताचमेपयꣳमेरसꣳमेघृतꣳमेमधुंच मेसग्ध्यꣳमेसपीतिꣳमेकृषिꣳमेवृष्टिꣳमेजैत्रꣳमऽऔद्भिद्यꣳमेयज्ञेनकल्पन्ताम्॥९॥रयिꣳमेरायꣳमेपुष्टꣳमेपुष्टिꣳमेविभु चंमेप्रभुचंमेपूर्णꣳमेपूर्णतरꣳमेकुयवꣳमेक्षितꣳमेन्नꣳमेक्षुचमेयज्ञेनकल्पन्ताम् ॥ १० ॥ वित्तꣳमेवेद्यꣳमेभूतꣳमेभविष्यꣳमे सुगꣳमेसुपत्थ्यꣳमऽऋद्धꣳमऽऋद्धिꣳमेकृतꣳमेकृतिꣳमेमतिꣳमेसुमतिꣳमेयज्ञेनकल्पन्ताम् ॥११॥ व्रीहयꣳमेयवाꣳमे माषाꣳमेतिलाꣳमेमुद्गाꣳमेखल्वाꣳमेप्रियङ्गवꣳमेणवꣳमेश्यामाकाꣳमेनीवाराꣳमेगोधूमाꣳमेमसूराꣳमेयज्ञेनकल्प न्ताम् ॥ १२ ॥ इति तृतीयं चमकानुवाकं पठेत् ॥ ३ ॥ पुनः ॐ नमस्तेइत्यादि ६६ पठित्वा ॥ ॐ अश्मांचमेमृत्तिकाचमे गिरयꣳमेपर्व्वताꣳमेसिकताꣳमेवनस्पतयꣳमेहिरण्यꣳमेयꣳमेश्यामꣳमेलोहꣳमेसीसꣳमेत्रपुचमेयज्ञेनकल्पन्ताम्।१३। अग्निꣳ । मऽआपꣳमेव्रीहयꣳमऽओषधयꣳमेकृष्टपच्याꣳमेग्राम्याꣳमेपशवऽआरण्याꣳमेवित्तꣳमेवित्तिꣳमेभूतꣳमे

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भूतिश्चमेयज्ञेनकल्पन्ताम् ॥ १४ ॥ व्वसुश्च । मेव्वसतिश्चमेकर्म्मचमेशक्तिश्चमेर्त्थश्चमऽएमश्चमऽइत्याचमेगतिश्चमेयज्ञेनक
ल्पन्ताम् ॥ १५ ॥ इति चतुर्थं चमकानुवाकं पठेत् ॥ ४ ॥ पुनः नमस्ते इत्यादि ६६ पठित्वा । ॐ अग्निश्च । मऽइन्द्रश्चमेसो
मश्चमऽइन्द्रश्चमेसविताचमऽइन्द्रश्चमेसरस्वतीचमऽइन्द्रश्चमेपुषाचमऽइन्द्रश्चमेबृहस्पतिश्चमऽइन्द्रश्चमेयज्ञेनकल्पन्ताम् १६॥
मित्रश्चमऽइन्द्रश्चमेव्वरुणश्चमऽइन्द्रश्चमेधाताचमऽइन्द्रश्चमेत्वष्टाचमऽइन्द्रश्चमेमरुतश्चमऽइन्द्रश्चमेव्विश्वेचमेदेवाऽइन्द्रश्च
मेयज्ञेनकल्पन्ताम् ॥ १७ ॥ पृथिवीच । मऽइन्द्रश्चमेन्तरिक्षञ्चमऽइन्द्रश्चमेद्यौश्चमऽइन्द्रश्चमेसमाश्चमऽइन्द्रश्चमेनक्षत्रा
णिचमऽइन्द्रश्चमेदिशश्चमऽइन्द्रश्चमेयज्ञेनकल्पन्ताम् ॥ १८ ॥ इति पंचमं चमकानुवाकं पठेत् ॥ ५ ॥ पुनः ॐ नमस्ते
इत्यादि ६६ पठित्वा । अर्ठ शुश्च । मेरश्मिश्चमेदाब्म्यश्चमेधिपतिश्चमऽउपा ँशुश्चमेन्तर्य्यामश्चमऽऐन्द्रवायवश्चमेमैत्रा
वरुणश्चमऽआश्विनश्चमेप्रतिप्रस्थानश्चमेशुक्रश्चमेमन्थीचमेयज्ञेनकल्पन्ताम् ॥ १९ ॥ आग्रयणश्च । मेव्वैश्वदेवश्चमेद्ध्रुव
श्चमेवैश्वानरश्चमऽऐन्द्राग्नश्चमेमहावैश्वदेवश्चमेमरुत्वतीयाश्चमेनिष्केवल्यश्चमेसावित्रश्चमेसारस्वतश्चमेपात्नीवतश्चमेहा
रियोजनश्चमेयज्ञेनकल्पन्ताम् ॥२०॥ स्रुचश्च । मेंचमसाश्चमेव्वायव्यानिचमेद्रोणकलशश्चमेग्रावाणश्चमेधिषवणेचमेपूतभृ
च्चमऽआधवनीयश्चमेव्वेदिश्चमेबार्हिश्चमेवभृथश्चमेस्वगाकारश्चमयज्ञेनकल्पन्ताम् ॥ २१ ॥ इतिषष्ठं चमकानुवाकं पठेत् ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

॥ ६ ॥ पुनः । नमस्ते इत्यादि ६ ६ पठित्वा ॐ अग्निश्च । मेघर्म्मश्चमेर्कश्चमेसूर्य्यश्चमेप्राणश्चमेश्वमेधश्चमेपृथिवीचमेदिं
तिश्चमेदितिश्चमेद्यौश्चमेंगुलंयुंश्चक्करयोदिशश्चमेयज्ञेनकल्पन्ताम् ॥२२॥ व्रतञ्चे।मऽऋतवेश्चमेतपश्चमेसंव्वत्सरश्चमेहोरात्रे
ऽऊर्व्वष्ठीवेबृहद्रथन्तरंचमेयज्ञेनकल्पन्ताम् ॥२३॥इति सप्तमं चमकानुवाकं पठेत् ॥ ७॥ पुनर्नमस्तेरु०इत्यादि ६ ६ पठित्वाएकांच
मेतिस्रश्चमेतिस्रश्चमेपञ्चमेपञ्चमेसप्तचमेसप्तचमेनवंचमेनवंचमऽएकादशचमऽएकादशचमेत्रयोदशचमेत्रयोदशचमेपञ्चदशचमे
पञ्चदशचमेसप्तदशचमेसप्तदशचमेनवदशचमेनवदशचमएकविंठ्शतिश्चमऽएकविंठ्शतिश्चमेत्रयोविंठ्शतिश्चमेत्रयोविंठ्शति
श्चमेपञ्चविंठ्शतिश्चमेपञ्चविंठ्शतिश्चमेसप्तविंठ्शतिश्चमेसप्तविंठ्शतिश्चमेनवविंठ्शतिश्चमेनवविंठ्शतिश्चमऽएकत्रिंठ्श
च्चमऽएकत्रिंठ्शच्चमेत्रयस्त्रिंठ्शच्चमेयज्ञेनकल्प्यन्ताम्॥२४॥इत्यष्टमं चमकानुवाकंपठेत्॥८॥पुनर्नमस्तेरुद्रइत्यादि६६पठित्वा।चतस्र
श्चमेष्टौचमेष्टौचमेद्वादशचमेद्वादशचमेषोडशचमेषोडशचमेविंठ्शतिश्चमेविंठ्शतिश्चमेचतुर्विंठ्शतिश्चमेचतुर्विंठ्शतिश्चमे
ष्टाविंठ्शतिश्चमेष्टाविंठ्शतिश्चमेद्वात्रिंठ्शच्चमेद्वात्रिंठ्शच्चमेषट्त्रिंठ्शच्चमेषट्त्रिंठ्शच्चमेचत्वारिंठ्शच्चमेचत्वारिंठ्शच्चमेचतुश्च
त्वारिंठ्शच्चमेचतुश्चत्वारिंठ्शच्चमेष्टाचत्वारिंठ्शच्चमेयज्ञेनकल्पन्ताम् ॥ २५ ॥ नवमानुवाकं पठेत् पुनर्नमस्तेरुद्रइत्यादि६६पठि
त्वा । त्र्यविंश्चमेत्र्यवीचमेदित्यवाट्चमेदित्यौहीचमेपञ्चाविंश्चमेपञ्चावीचमेत्रिवत्सश्चमेत्रिवत्साचमेतुरुष्यवाट्चमेतुरुष्यौहीचमयज्ञे

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नंकल्पन्ताम् ॥२६॥ पुष्टुवाट्चंमेपष्ठौहीचंमऽउक्षाचंमेव्वशाचंमऽऋषभश्चंमेव्वेहच्चंमेनड्वाँश्चंमेधेनुश्चंमेयज्ञेनंकल्पन्ताम् ॥ २७॥
इति दशमानुवाकंपठेत् । इति केवलानिनवपठित्वापुनर्नमस्ते६६इत्यादिपठित्वाॐव्वाजायुस्वाहाप्प्रसुवायुस्वाहापिजायुस्वाहाक्रतंवे
स्वाहाव्वसवेस्वाहाहर्प्पतयेस्वाहान्हेमुग्ग्धायुस्वाहामुग्ग्धायव्वैनर्ठ्शिनायुस्वाहाव्विनर्ठ्शिनऽआन्त्यायुनायुस्वाहान्त्यायभौवनायु
स्वाहाभुवनस्यपतयेस्वाहाधिपतयेस्वाहाप्प्रजापतयेस्वाहाइयन्तेराण्मित्रायुन्तासियमनऽऊर्ज्जेत्वाव्वृष्टयेत्वाप्प्रजानान्त्वाधिपत्या
य ॥२८॥ आयुर्य्यज्ञेनंकल्पताम्प्राणोयज्ञेनंकल्पताञ्चक्षुर्य्यज्ञेनंकल्पताꣳश्रोत्रंयज्ञेनंकल्पतांव्वाग्य्यज्ञेनंकल्पताम्मनोयज्ञे
नंकल्पतामात्म्मायज्ञेनंकल्पताम्ब्रह्मायज्ञेनंकल्पताज्योतिर्य्यज्ञेनंकल्पताꣳस्वर्य्यज्ञेनंकल्पताम्पृष्ठंय्यज्ञेनंकल्पतांयज्ञोयज्ञे
नंकल्पताम्॥स्तोमश्चयजुश्चऽऋक्चसामंचबृहच्चरथन्तरञ्चस्वर्देवाऽअगन्नमामृताऽअभूमप्प्रजापतेऽप्रजाऽअभूमव्वेट्स्वाहा॥२९॥
इत्येकादशमनुवाकंपठेत्॥१०॥एवमाद्यं रूपं सांगं हृदयादिषडंगसहितं पठित्वा ततो नव केवलानि च जप्त्वा अंत्यमेकादशं वयर्ठ्सोम
इत्यादि सशीर्षकं सांगं निरंगं वा पठेत् ॥ अथ शीर्षकमनुवाकम् ॥ ॐ वय ठ्सोमव्व्रतेतवमनस्तनूषुविभ्रतं ॥ प्रजा

१ एवमेकादशावर्तनेन रूपं भवति ॥ १ ॥ एतद्रूपस्यैकादशावर्तनेन रुद्रो भवति ॥ २ ॥ रुद्रस्यैकादशावर्तनेन रुद्री (लघुरुद्रो) भवति ॥ ३॥ लघुरुद्रस्यैकादशावर्तनेन महारुद्रो भवति ॥ ४ ॥ महारुद्रस्यैकादशावर्तनेनातिरुद्रो भवति ॥ ५ ॥ इति रुद्रपंचकम् ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वन्तत्सचेमहि ॥ १ एषतेरुद्रभागस्सहस्राम्बिकयातज्जुषस्वस्वाहैषतेरुद्रभागऽआखुस्तेपशुः ॥२॥ अवरुद्रमदीमह्यवदेवꣳत्र्यम्बकम्॥ यथानोव्वस्यसस्करद्यथानश्श्रेयसस्करद्यथानोव्यवसाययात्॥३॥भेषजमसि । भेषजङ्गवेश्वायपुरुषायभेषजम् ॥ सुखम्मेषायमेष्यै ॥ ४ ॥ त्र्यंबकꣳयजामहेसुगन्धिम्पुष्टिवर्द्धनम्॥ उर्व्वारुकमिवबन्धनान्मृत्योर्म्मुक्षीयमामृतात्॥त्र्यंबकꣳयजामहेसुगन्धिम्पतिवेदनम् ॥ उर्व्वारुकमिवबन्धनादितोमुक्षीयमामुतः ॥ ५ ॥ एततेरुद्रावसन्तेनपरोमूजवतोतीहि ॥ अवततधन्वापिनाकावसꣳ॥ कृत्तिवासाऽअहिꣳसन्नꣳशिवोतीहि ॥ ६ ॥ त्र्यायुषञ्जमदग्नेःकश्यपस्यत्र्यायुषम् ॥ यद्देवेषुत्र्यायुषन्तन्नोऽअस्तुत्र्यायुषम् ॥७॥ शिवोनामासिस्वधितिस्तेपितानमस्तेऽअस्तुमामाहिꣳसीः ॥ निवर्तयाम्यायुषेन्नाद्यायप्रजननायरायस्पोषायसुप्रजास्त्वायसुवीर्य्याय ॥८॥इति पठेत्॥एवं सांगादिसशिरोन्तंजपं कृत्वा तदंते ॐऋचंवाचम् इत्यादिशांतिपाठं पठेत्॥हरिः ॐ ऋचंव्वाचम्प्रपद्येमनोयजुꣳप्रपद्येसामप्राणम्प्रपद्येचक्षुश्श्रोत्रंप्रपद्येव्वागोजसहौजोमयिप्राणापानौ ॥ १ ॥ यन्मेछिद्रञ्चक्षुषोहृदयस्यमनसोव्वार्तितृण्णम्बृहस्पतिर्म्मेतद्दधातु ॥ शन्नोभवतुभवनस्यस्पतिः॥२॥भूर्भुवस्स्वः तत्सवितुर्व्वरेण्यम्भर्गोदेवस्यधीमहि॥ धियोयोनः प्रचोदयात् ॥३॥ कयान । श्चित्रऽआभुवदूतीसदावृधस्सखाकया ॥ शचिष्ठयाव्वृता ॥४॥ कस्त्वा । सत्योमदानांमꣳहिष्ठोमत्सदन्धसश्दृघाचिदारुजेव्वसु ॥५॥ अभीषुणः सखीनामविताजरितॄणाम् ॥ शतम्भवास्यूतिभिः ॥६॥ कयात्वन्नऽऊत्याभिप्रमन्दसेव्वृषन् ॥ कयास्तो

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तृभ्युऽआभर ॥७॥ इन्द्रोव्विश्वस्यराजतिशन्नोऽअस्तुद्विपदेशञ्चतुष्पदे ॥८॥शन्नोमित्रःशंवरुणःशन्नोभव्वत्वर्य्यमा ॥ शन्नऽइन्द्रो बृहस्पतिःशन्नोविष्णुरुरुक्रमः ॥ ९ ॥ शन्नोव्वातःपवताःशन्नस्तपतुसूर्य्यः शन्नःकनिक्रदद्देवःपर्ज्जन्योऽअभिवर्षतु॥१०॥ अहानिशम्भवन्तुनःशर्ठरात्रीःप्रतिधीयताम्॥ शन्नऽइन्द्राग्नीभवतामवोभिःशन्नऽइन्द्रावरुणारातहव्याशन्नऽइन्द्रापूषणावाजसातौशमिंद्रासोमासुवितायशंय्योः ॥११॥ शन्नोदेवीरभिष्टयऽआपोभवंतुपीतये॥ शंय्योरभिस्रवन्तुनः॥१२॥स्योनापृथिविनोभवानृक्षरानिवेशनीयच्छानःशर्म्मसुप्रथाः ॥ १३ ॥ आपोहि । ष्ठामयोभुवस्तानऽऊर्जेदधातन ॥ महेरणायचक्षसे ॥ १४ ॥ योवः शिवतमोरसस्तस्यभाजयतेहनः ॥ उशतीरिवमातरः ॥ १५ ॥ तस्माऽअरङ्गमामवोयस्यक्षयायजिन्वथ॥ आपोजनयथाचनः॥१६॥द्यौःशान्तिरन्तरिक्षठ्ँशान्तिःपृथिवीशांतिरापःशान्तिरोषधयःशान्तिःवनस्पतयःशान्तिर्विश्वेदेवाःशान्तिर्ब्रह्मशान्तिःसर्वठ्ँशान्तिःशान्तिरेवशान्तिःसामाशान्तिरेधि ॥ १७ ॥ दृतेदृठ०हमामित्रस्यमाचक्षुषासर्व्वाणिभूतानिसमीक्षन्ताम् ॥ मित्रस्याहञ्चक्षुषासर्व्वाणिभूतानिसमीक्षे ॥ मित्रस्यचक्षुषासमीक्षामहे ॥१८॥ दृतेदृठ०हमा । ज्योक्तेसुन्दृशिंजीव्यासुञ्ज्योक्तेसुन्दृशिंजीव्यासम् ॥ १९ ॥ नमस्तेहरसेशोचिषेनमस्तेऽअस्त्वर्च्चिषेअन्याँस्तेऽअस्म्मत्तपन्तुहेतयः पावकोअस्म्मभ्यंठ्ँशिवोभव ॥ २० ॥ नमस्तेऽअस्तुव्विद्युतेनमस्तेस्तनयित्नवे ॥ नमस्तेभगवन्नस्तुयतःस्वः समीहसे ॥ २१ ॥ यतोयतःसमीहसेततोनोऽअभयंकुरु ॥ शन्नः कुरुप्रजाभ्योभय

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

न्नंपशुभ्य÷ ॥ २२ ॥ सुमित्रियानऽआपऽओषधयःसन्तु ॥ दुर्म्मित्रियास्तस्मैसन्तुयोस्मान्द्वेष्टियञ्चवयंद्विष्मः ॥ २३ ॥ तच्च क्षुर्देवहितम्पुरस्ताच्छुक्रमुच्चरत् ॥ पश्येमशरदः÷शतञ्जीवेमशरदः÷शतंठ्शृणुयामशरद÷शतंप्रब्रवामशरदः÷शतमदीनाःस्यामशरद÷शतम्भूयश्चशरदः÷शतात् ॥२४॥ ॐ शान्तिः शान्तिः शांतिः इति शांतिपाठं पठेत् ॥ एवं कर्तुमशक्तश्चेत्तदा दशाक्षरं यथाशक्ति जपेत् । ततः । ॐ इमारुद्रायतवसेकपर्दिनेक्षयद्वीरायप्रभरामहेमतीः॥ यथाशमसद्द्विपदेचतुष्पदेविश्वंपुष्टंग्रामेऽअस्मिन्ननातुरम्॥ ॥ १ ॥ इति मंत्रेण अर्घपात्रोदकं गृहीत्वा देवदक्षिणे । धर्मार्थकाममोक्षादिष्वीप्सितफलप्राप्त्यर्थं यथाशक्ति यत्कृतरूपा दिजपेन स्वयं वा ऋत्विग्द्वारा कारितेन प्रणतजनानुकंपी सच्चिदानंदरूपपरमात्मा श्रीसदाशिवमहारुद्रः प्रीयतामिति पठित्वो त्सृजेत् ॥ ततो देवाभिमुखः कृतांजलिपुटः सन् । ॐ जपन्यासार्चनं देव यत्कृतं तु मयाद्य वै ॥ न्यूनातिदोषरहितं कृतं कर्म्म मया प्रभो ॥ १ ॥ भवत्वेतत्कृपासिंधो क्षमस्व च नमोस्तु ते ॥ पूजान्यासादिकं देव कृतं यत्त्वदनुग्रहात् ॥ २ ॥ तेन मत्कर्म्मणा रुद्र प्रीतो भव वरप्रदः । नमः शिवाय शांताय सगणायादिहेतवे ॥ ३ ॥ निवेदयामि चात्मानं त्वं गतिः परमेश्वर ॥ न्यूनातिरिक्तं तत्पूर्णं प्रसादात्तव शंकर ॥ ४ ॥ एतत्कृतेन देवेश सदा मे वरदो भव ॥ एवं देवं क्षमाप्य आत्मानं निवेद्य पुष्पांजलिं दत्त्वा पुनः स्तुत्वा । मंत्रहीनं० ॥ १ ॥ आवाहनं न जानामि० ॥ २ ॥ इति साष्टांगं प्रणमेत् ॥ एवं प्रत्यहं कृत्वा पंचरुद्राणां मध्ये यस्य रुद्रस्य यावद्भिर्ब्राह्मणैर्यावद्भिर्दिनैः पूर्वं संकल्पः कृतस्तावत्पर्य्यंतमुक्तप्रकारेण अक्षारलवणाशनाधः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

शयनादिनियमैर्जपं कुर्य्यात् । ततः समाप्ते जपे जपोक्तप्रकारेणसमग्रं दशांशेन वा शतांशेन तिलादिद्रव्यैर्होमादिकं कुर्य्यात् । "अभिषेके तु शिवमूर्ध्नि हिरण्यादिकलशेन संततधारां मधुना सर्पिषा पयसा वेक्षुरसेन नारिकेलोदकेन वाऽऽम्ररसेन वा कदली भवेन रसेन शुद्धोदकेन वा निषिंचेत्। पूर्वोक्तपूजादिकं कृत्वा अभिषेकः कर्तव्यः" ॥ अथ रुद्रहोमविधिः ॥ तत्र तावत् जपान्ते मंडपं छाया मंडपं वा यथावत्कृत्वा तन्मध्ये होमानुसारेण चतुरस्रं कुंडं सलक्षणं विधाय तदीशान्यां रुद्रवेदीं नवग्रहमखपक्षे तत्रैव ग्रहवेदीं च कुर्य्यात् । ततः सुमुहूर्त्ते ॐ भद्रंकर्णेभिरित्यादिवेदघोषेण पश्चिमद्वारतो मण्डपं प्रविश्य रुद्रवेदीपश्चिमतः स्वासने प्राङ्मुख उपविश्य । स्वदक्षिणस्थपत्न्या समारब्धः सपवित्रकरो मूलेनाचम्य प्राणानायम्य । आनोभद्रा इत्यादिशान्तिपाठं पठित्वा सुमुखश्चेत्यादि गणपतिस्मरणपूर्वकं देशकालौ संकीर्त्य । अमुकगोत्रोऽमुकशर्माहममुकफलावाप्त्यै श्रीपरमेश्वरप्रीत्यर्थं स्वयं ब्राह्मण द्वारा वा कृतस्यामुकरुद्रजपस्य सांगतासिद्धयर्थं समग्रं वा जपदशांशेन वा शतांशतस्तिलादिद्रव्यैर्होमं करिष्ये इति संकल्प्य । गणेशपूजनं पुण्याह वाचनं मातृकापूजनं नांदीश्राद्धमाचार्यादिवरणं दिग्रक्षणं च पूर्वोक्तपद्धतिकांडमार्गेण सर्वं कुर्यात् । ततः कुंडे अग्निं प्रतिष्ठाप्य ग्रहपीठे ग्रहान्संपूज्य तदीशान्यां कलशं संस्थापयेत् । ततो रुद्रपीठे वस्त्रं प्रसार्य्य तत्र द्वादशलिंगतोभद्रं तन्मध्ये रुद्रयंत्रं च विलिख्य तन्मध्ये ताम्रकलशोपरि पलसुवर्णेन तदर्द्धेन वा रचितां रुद्रप्रतिमां सावयवां संस्थाप्य प्राणप्रतिष्ठां कृत्वा मूलमन्त्रेणपुष्पान्तैरुपचारैः संपूज्य पूर्वोक्तयंत्रावरणदेवतापूजां कृत्वा रुद्रं धूपदीपनैवेद्यतांबूलदक्षिणानीराजनैरभ्यर्च्य साष्टांगं प्रणम्य स्तुतिपाठैः स्तुत्वा होमं कुर्य्यात् । तत्राघारावाज्यभागांते ग्रहादिहोमं कृत्वा तिलपायसाज्यैः प्रधानदेवरुद्रहोमं कुर्य्यात् ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

" तत्र होमक्रमः । होमस्तु त्रेधा । समग्रहोमः । जपदशांशहोमः । शतांशहोमश्च । तत्राद्यः प्रधानभूतो जपांगभूतश्च उत्तरौ त्वंग भूतावेवेति महार्णवः"॥अथ प्रधानरुद्रहोमः॥तत्रादौ ऋत्विजः प्राङ्मुखा उदङ्मुखाश्च कुंडसमीपे स्थित्वा।भूतशुद्ध्यादिमातृकान्या सांतं कृत्वा । पूर्वोक्तरुद्रपंचागन्यासान् कुर्युः ततो पंचांगमंत्रैः पंचभिः पंचाहुतीर्हुत्वा रुद्रहोमः कार्यः । तद्यथा—यज्जाग्रत इतिषडर्चेनएकाहुतिम् । सहस्रशीर्षेतिषोडशर्चेन सूक्तेनैकाहुतिम् ॥ अद्भ्यः संभृत इति षडर्चेन एकाहुतिम् । आशुः शिशान इति द्वादशर्चेन एकाहुतिम् । विभ्राड् इति सप्तदशर्चेन एकाहुतिं च हुत्वा ततः प्रधानभूतेन रुद्राध्यायेन होमः ॥ अथ प्रधानरुद्रहोमक्रमः । स च एकधा १ त्रेधा २ षोढा ३ षोडशधा ४ चतुश्चत्वारिंशद्धा ५ अष्टाचत्वारिंशद्धा ६ एकषष्ट्युत्तरशतधा ७ पंचविंशत्युत्तरचतुःशतधा चेति ८ अष्टविभागानामन्यतमं पक्षमंगीकृत्य होमं कुर्य्यात् ॥ अत्र एकषष्ट्युत्तरशतधामंत्रविभागपक्षेण होमः ।

---

१ अत्र एकषष्ट्युत्तरशतधामंत्रीविभागपक्षे रुद्राहुतिसंख्या "हवनात्मकरुद्रपद्धतौ"तत्र रुद्रे प्रधानं महारुद्रं शिरोमंत्राहुतिपक्षे एकनवत्यधिकशतसंख्याकाभिः १९१ घृताक्ततिलाहुतिभिः [चमकपक्षे] एकाधिकशतद्वय.२०१ संख्याकाभिर्घृताक्तीतिलाहुतिभिः ॥ अथ रुद्रचां शिरोमंत्राहुतिपक्षे षडुत्तरशताष्टोपेतसहस्र १८०६ संख्याकाभिर्घृताक्तिलाहुतिभिः । [चमकाहुतिपक्षे] षोडशाधिकशताष्टोपेतसहस्र १८१६ संख्याकाभिर्घृताक्तीतिलाहुतिभिः ॥ अथ लघुरुद्रे प्रधानं महारुद्रं शिरोमंत्राहुतिपक्षे षट्षष्ट्यधिकशताष्टोपेतैकोनविंशतिसहस्र १९८६५संख्याकाभिर्घृताक्तिलाहुतिभिः [चमकाहुतिपक्षे] षट्सप्तत्यधिकशतनवकोपेतैकोनविंशतिसहस्र १९९७६ संख्याकाभिर्घृताक्ततिलाहुतिभिः ॥ अथ महारुद्रे प्रधानम् ॥ महारुद्रे शिरोमंत्राहुतिपक्षे षड्विंशत्यधिकशतपंचकोपेताष्टादशसहस्राधिकलक्षद्वय २१८५२६ संख्याकाभिर्घृताक्तीतिलाहुतिभिः [चमकपक्षे] षट्त्रिंशदधिकशतसप्तकोपेतैकोनविंशतिसहस्राधिकलक्षद्वय २१९७३६ संख्याकाभिर्घृताक्तिलाहुतिभिः ॥ अथातिरुद्रे प्रधानम् ॥ महारुद्रं शिरोमंत्राहुतिपक्षे द्विचत्वारिंशदधिकशताष्टोपेतत्रिसहस्राधिकचतुर्विंशतिलक्ष २४०३८४२ संख्याकाभिर्घृताक्ततिलाहुतिभिः [चमकाहुतिपक्षे] अशीत्यधिकशतचतुष्टयोपेतचतुःसहस्राधिकचतुर्विंशतिलक्ष २४०४४८३ संख्याकाभिर्घृताक्ततिलाहुतिभिर्होमः ॥ इति रुद्रहोमाहुतिसंख्या ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तत्र मंत्राः ॥ ॐ नमस्ते रुद्र० स्वाहा ॥ १ ॥ ॐ याते रुद्र शिवा० स्वाहा ॥ २ ॥ ॐ यामिषुङ्गिरि० स्वाहा ॥ ३ ॥ ॐ शिवे नवचसा० स्वाहा ॥ ४ ॥ ॐ अध्यवोच० स्वाहा ॥ ५ ॥ ॐ असौयस्ताम्रो० स्वाहा ॥ ६ ॥ "मन्त्रान्ते स्वाहापदं सर्वत्र ज्ञेयम्" ॐ असौयोव० ॥ ७ ॥ ॐ नमोस्तुनीलग्रीवाय० ॥ ८ ॥ ॐ प्रमुञ्चधन्व० ॥ ९ ॥ ॐ विज्यंधनु० ॥ १० ॥ ॐ यातेहेति० ॥ ११ ॥ ॐ परिते धन्वनो० ॥ १२ ॥ ॐ अवतत्य० ॥ १३ ॥ ॐ नमस्तऽआयुधाय० ॥ १४ ॥ ॐ मानो महान्त० ॥ १५ ॥ ॐ मानस्तोके० ॥ १६ ॥ ॐ नमो हिरण्यबाहवे सेनान्येदिशांच पतयेनमः स्वाहा ॥ १७ ॥ ॐ नमो वृक्षेभ्योहरि केशेभ्यः पशूनाम्पतयेनमः स्वाहा ॥ १८ ॥ ॐ नमः .शष्पिञ्जरायत्त्विषीमतेपथीनाम्पतये नमः स्वाहा ॥ १९ ॥ ॐ नमो हरि केशायोपवीतिने पुष्टानाम्पतये नमः स्वाहा ॥ २० ॥ ॐ नमो बभ्लुशाय व्याधिनेन्नानाम्पतयेनमः स्वाहा ॥ २१ ॥ ॐ नमोभवस्यहेत्यैजगताम्पतये नमः स्वाहा ॥ २२ ॥ ॐ नमो रुद्रायाततायिनेक्षेत्राणाम्पतये नमः स्वाहा ॥ २३ ॥ ॐ नमः सूतायाहंत्यैवनानाम्पतये नमः स्वाहा ॥ २४ ॥ ॐ नमो रोहितायस्थपतये वृक्षाणाम्पतयेन मः स्वाहा ॥ २५ ॥ ॐनमोभुवन्तयेवारिवस्कृतायौषधीनाम्पतयेनमः स्वाहा ॥ २६ ॥ ॐनमोमंत्रिणेव्वाणिजायकक्षाणाम्पतये नमः स्वाहा ॥ २७ ॥ ॐनमऽउच्चैर्घोषायाक्रंदयतेपत्तीनाम्पतये नमः स्वाहा ॥ २८ ॥ ॐ नमः कृत्स्नायतयाधावतेसत्त्वनाम्प तये नमः स्वाहा ॥ २९ ॥ ॐ नमः सहमानायनिव्याधिनऽआव्याधिनीनाम्पतये नमः स्वाहा ॥ ३० ॥ ॐ नमोनिषङ्गिणेककु भायस्तेनानाम्पतये नमः स्वाहा ॥ ३१ ॥ ॐ नमोनिचेरवेपरिचरायारण्यानाम्पतये नमः स्वाहा ॥ ३२ ॥ ॐ नमो व्वञ्चतेपरिव

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ऋतेस्तायूनाम्पतये नमः स्वाहा ॥ ३३ ॥ ॐ नमोनिषङ्गिणऽइषुधिमतेतस्कराणाम्पतये नमः स्वाहा ॥ ३४ ॥ ॐ नमः सृकायि
भ्योजिघाꣳसद्भ्योमुष्णताम्पतये नमः स्वाहा ॥ ३५ ॥ ॐनमःसिमद्भ्योनक्तंचरद्भ्योविकृंतानाम्पतये नमः स्वाहा ॥ ३६ ॥ ॐ न
मऽउष्णीषिणेगिरिचरायकुलुंचानाम्पतयेनमः स्वाहा ॥ ३७ ॥ ॐनमऽइषुमद्भ्योधन्वायिभ्यश्चवोनमः स्वाहा ॥ ३८ ॥ ॐ नम
आतन्वानेभ्यः प्रतिदधानेभ्यश्च वो नमः स्वाहा ॥ ३९ ॥ ॐ नमः आयच्छद्भ्योस्यद्भ्यश्च वो नमः स्वाहा ॥४०॥ ॐनमो विसृजद्भ्यो
विध्यद्भ्यश्चवो नमः स्वाहा ॥ ४१ ॥ ॐनमः स्वपद्भ्यो जाग्रद्भ्यश्च वो नमः स्वाहा ॥ ४२ ॥ ॐनमः शयानेभ्य आसीनेभ्यश्च वो न
मः स्वाहा ॥ ४३ ॥ ॐनमस्तिष्ठद्भ्योधावद्भ्यश्चवोनमः स्वाहा ॥ ४४ ॥ॐनमः सभाभ्यः सभापतिभ्यश्चवोनमः स्वाहा ॥ ४५ ॥
ॐ नमोश्वेभ्योश्वपतिभ्यश्चवोनमः ॥ ४६ ॥ ॐ नमऽआव्याधिनीभ्योव्विविध्यंतीभ्यश्चवोनमः स्वाहा ॥ ४७ ॥ ॐ नम उंगणा
भ्यस्तृꣳहतीभ्यश्चवोनमः स्वाहा ॥ ४८ ॥ ॐ नमोगणेभ्यो गणपतिभ्यश्चवोनमः स्वाहा ॥ ४९ ॥ ॐ नमो व्व्रातेभ्यो व्व्रात
पतिभ्यश्चवोनमः स्वाहा ॥ ५० ॥ ॐ नमो गृत्सेभ्यो गृत्सपतिभ्यश्चवोनमः स्वाहा ॥ ५१ ॥ ॐ नमोव्विरूपेभ्योविश्वरूपेभ्य
श्चवोनमः स्वाहा ॥ ५२ ॥ ॐ नमः सेनाभ्यः सेनानिभ्यश्चवोनमः स्वाहा ॥ ५३ ॥ ॐ नमोरथिभ्योऽअरथेभ्यश्चवोनमः स्वा
हा ॥ ५४ ॥ ॐ नमः क्षत्रिभ्यः संग्रहीतृभ्यश्चवो नमः स्वाहा ॥ ५५ ॥ ॐ नमो महद्भ्योअर्भकेभ्यश्चवोनमः स्वाहा ॥ ५६ ॥
ॐ नमस्तक्षभ्योरथकारेभ्यश्चवोनमः स्वाहा ॥ ५७ ॥ ॐ नमः कुलालेभ्यः कर्म्मारेभ्यश्चवो नमः स्वाहा ॥ ५८ ॥ ॐ नमो
निषादेभ्यः पुञ्जिष्ठेभ्यश्चवो नमः स्वाहा ॥ ५९ ॥ ॐ नमः श्वनिभ्यो मृगयुभ्यश्चवोनमः स्वाहा ॥ ६० ॥ ॐ नमः श्वभ्यः श्वपति

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भ्यश्चवो नमः स्वाहा ॥ ६१ ॥ ॐ नमो भवायचरुद्रायच स्वाहा ॥ ६२ ॥ ॐ नमः शर्वायचपशुपतये च स्वाहा ॥ ६३ ॥
ॐ नमोनीलग्रीवायचशितिकंठायच स्वाहा ॥ ६४ ॥ ॐ नमः कपर्दिनेचव्युप्तकेशायच स्वाहा ॥ ६५ ॥ ॐ नमः सहस्राक्षाय
चशतधन्वनेच स्वाहा ॥ ६६ ॥ ॐ नमो गिरिशयाय च शिपिविष्टायच स्वाहा ॥ ६७ ॥ ॐ नमोमीढुष्टमायचेषुमतेचस्वाहा ॥
॥ ६८ ॥ ॐ नमोह्रस्वायच वामनायच स्वाहा ॥ ६९ ॥ ॐ नमो बृहतेचवर्षीयसे च स्वाहा ॥ ७० ॥ ॐ नमोव्वृद्धा
च सवृधे च स्वाहा ॥ ७१ ॥ ॐ नमोग्र्यायच प्रथमायच स्वाहा ॥ ७२ ॥ ॐ नम आशवेचाजिराय च स्वाहा ॥
॥ ७३ ॥ ॐ नमः शीग्र्यायचशीभ्यायच स्वाहा ॥ ७४ ॥ ॐ नमः ऊर्म्यायचावस्वन्यायच स्वाहा ॥ ७५ ॥ ॐ नमोना
देयायचद्वीप्यायच स्वाहा ॥ ७६ ॥ ॐ नमोज्येष्ठायचकनिष्ठायच स्वाहा ॥ ७७ ॥ ॐ नमः पूर्वजायचापरजायच स्वाहा ॥७८॥
ॐ नमोमध्यमायचापगल्भायच स्वाहा ॥ ७९ ॥ ॐ नमोजघन्यायचबुध्न्यायच स्वाहा ॥ ८० ॥ ॐ नमः सोभ्यायचप्रतिसर्य्या
यच स्वाहा ॥ ८१ ॥ ॐ नमोयाम्यायचक्षेम्यायच स्वाहा ॥ ८२ ॥ ॐ नमः श्लोक्यायचावसान्यायच स्वाहा ॥ ८३ ॥ ॐ
नम उर्व्वर्य्यायचखल्यायच स्वाहा ॥ ८४ ॥ ॐ नमोव्वन्यायचकक्ष्यायच स्वाहा ॥ ८५ ॥ ॐ नमः श्रवायचप्रतिश्रवायच
स्वाहा ॥ ८६ ॥ ॐ नम आशुषेणायचाशुरथायच स्वाहा ॥ ८७ ॥ ॐ नमः शूरायचावभेदिनेच स्वाहा ॥ ८८ ॥ ॐ नमोबि
ल्मिनेचकवचिनेच स्वाहा ॥ ८९ ॥ ॐ नमोव्वर्म्मिणेचव्वरूथिनेच स्वाहा ॥ ९० ॥ ॐ नमःश्रुतायचश्रुतसेनायचस्वाहा ॥९१॥
ॐ नमोदुन्दुभ्यायचाहनन्यायचस्वाहा ॥ ९२ ॥ ॐ नमोधृष्णवेचप्रमृशायचस्वाहा ॥ ९३ ॥ ॐ नमोनिषंगिणेचेषुधिमतेच

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

स्वाहा ॥ ९४ ॥ ॐनमस्तीक्ष्णेषवेचायुधिनेच स्वाहा ॥ ९५ ॥ ॐ नमः स्वायुधायचसुधन्वनेचस्वाहा ॥ ९६ ॥ ॐ नमः सु त्यायचपत्थ्यायचस्वाहा ॥ ९७ ॥ ॐ नमः काट्यायचनीप्यायचस्वाहा ॥ ९८ ॥ ॐ नमः कुल्यायचसरस्यायचस्वाहा ॥ ९९ ॥ ॐ नमोनादेयायचव्वैशन्तायच स्वाहा ॥ १०० ॥ ॐ नमः कूप्यायचावट्यायच स्वाहा ॥ १०१ ॥ ॐ नमोव्वीध्र्यायचतप्याच स्वाहा ॥ १०२ ॥ ॐ नमोमेघ्यायचव्विद्युत्यायच स्वाहा ॥ १०३ ॥ ॐ नमोव्वर्ष्यायचावर्ष्यायच स्वाहा ॥ १०४ ॥ ॐ व्वात्यायचरेष्म्यायचस्वाहा ॥ १०५ ॥ ॐ नमोव्वास्तव्व्यायचव्वास्तुपायचस्वाहा ॥ १०६ ॥ ॐ नमः सोमायचरुद्रायच स्वाहा ॥ १०७ ॥ ॐ नमस्ताम्रायचारुणायचस्वाहा ॥ १०८ ॥ ॐ नमः शङ्गवेचपशुपतयेचस्वाहा ॥ १०९ ॥ ॐ नम उग्रा यचभीमायचस्वाहा ॥ ११० ॥ ॐ नमोग्रेवधायचदूरेवधायचस्वाहा ॥ १११ ॥ ॐ नमोहन्त्रेचहनीयसेचस्वाहा ॥ ११२ ॥ ॐ नमोव्वृक्षेभ्योहरिकेशेभ्यः स्वाहा ॥ ११३ ॥ ॐ नमस्तारायस्वाहा ॥ ११४ ॥ ॐ नमः शम्भवायचमयोभवायचस्वाहा ॥ ११५ ॥ ॐ नमःशंकरायचमयस्करायचस्वाहा ॥ ११६ ॥ ॐ नमः शिवायचशिवतरायचस्वाहा ॥ ११७ ॥ ॐ नमःपार्य्या यचावार्य्यायचस्वाहा ॥ ११८ ॥ ॐ नमः प्रतरणायचोत्तरणायचस्वाहा ॥ ११९ ॥ ॐ नमस्तीर्थ्यायचकूल्यायचस्वाहा ॥ १२० ॥ ॐ नमःशष्प्यायचफेन्यायचस्वाहा ॥ १२१ ॥ ॐ नमः सिकत्यायचप्रवाह्यायचस्वाहा ॥ १२२ ॥ ॐ नमः किंठशिलायचक्षय णायचस्वाहा ॥ १२३ ॥ ॐ नमःकपर्दिनेचपुलस्तयेचस्वाहा ॥ १२४ ॥ ॐ नम इरिण्यायचप्रपथ्यायचस्वाहा ॥ १२५ ॥ ॐ नमोव्रज्यायचगोष्ठ्यायचस्वाहा ॥ १२६ ॥ ॐ नमस्तल्प्यायचगेह्यायचस्वाहा ॥ १२७ ॥ ॐ नमोहृदय्यायचनिवेष्यायच

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

स्वाहा ॥१२८॥ ॐ नमः काट्यायचगह्वरेष्ठायचस्वाहा ॥१२९॥ ॐ नमःशुष्क्यायचहरित्यायचस्वाहा ॥१३०॥ ॐ नमःपाꣳ
सव्यायचरजस्याचस्वाहा ॥ १३१ ॥ ॐ नमोलोप्यायचोलप्यायचस्वाहा ॥ १३२ ॥ ॐ नम ऊर्य्यायचसूर्य्यायचस्वाहा
॥ १३३ ॥ ॐ नमः पर्णायचपर्णशदायचस्वाहा ॥ १३४ ॥ ॐ नम उद्गुरमाणायचाभिघ्नतेचस्वाहा ॥ १३५ ॥
ॐ नम आखिदतेचप्रखिदतेचस्वाहा ॥ १३६ ॥ ॐ नम इषुकृद्भ्योधनुष्कृद्भ्यश्चवोनमः स्वाहा ॥ १३७ ॥ ॐ नमोवः किरि
केभ्योदेवानाꣳहृदयेभ्यः स्वाहा ॥ १३८ ॥ ॐ नमोव्विचिन्वत्केभ्यः स्वाहा ॥१३९॥ॐ नमोव्विक्षिणत्केभ्यः स्वाहा ॥ १४० ॥
ॐ नमःआनिर्हतेभ्यः स्वाहा ॥ १४१ ॥ ॐ द्रापेऽअन्धस० स्वाहा ॥ १४२ ॥ ॐ इमारुद्राय० स्वाहा ॥ १४३ ॥ ॐ याते
रुद्र० स्वाहा ॥ १४४ ॥ ॐ परिनोरुद्रस्य० स्वाहा ॥ १४५ ॥ ॐ मीढुष्टमशिवतम० स्वाहा ॥ १४६ ॥ ॐ विकिरिद्रविलोहि
त० स्वाहा ॥ १४७ ॥ ॐ सहस्राणिसहस्रशो० स्वाहा ॥ १४८ ॥ ॐ असंख्यातासहस्राणि० स्वाहा ॥ १४९ ॥ ॐ अस्मिन्म
हत्यर्णवे० स्वाहा ॥ १५०॥ ॐ नीलग्रीवाः शितिकण्ठा०स्वाहा ॥ १५१ ॥ ॐ नीलग्रीवाः शितिकण्ठाः शर्वा० स्वाहा॥१५२॥
ॐ ये वृक्षेषु० स्वाहा ॥१५३॥ ॐ येभूतानामधिपतयो० स्वाहा ॥ १५४ ॥ ॐ येपथाम्पथि० स्वाहा ॥ १५५ ॥ ॐ येतीर्था
नि० स्वाहा ॥ १५६ ॥ ॐ येन्नेषुव्विविद्ध्यन्ति० स्वाहा ॥१५७॥ ॐ यऽएतावन्तश्च० स्वाहा ॥ १५८ ॥ ॐ नमोस्तुरुद्रेभ्योये
दिवि० स्वाहा ॥ १५९ ॥ ॐ नमोस्तुरुद्रेभ्योयेन्तारिक्षे० स्वाहा ॥१६०॥ ॐ नमोस्तुरुद्रेभ्योयेपृथिव्यां० स्वाहा ॥ १६१ ॥ एव
मेकषष्ठ्युत्तरशतधामंत्रविभागपक्षहोमं घृताक्ततिलाहुतिभिः कृत्वा । ॐ वाजश्चमे० ॥ १ ॥ ॐ प्राणश्चमे० ॥ २ ॥ ॐ ओजश्च

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मे० ॥ ३ ॥ ॐ ज्यैष्ठ्यञ्चमऽआधिपत्त्यञ्चमे० स्वाहा ॥ ४ ॥ इत्याद्यचमाकानुवाकहोमं कुर्य्यात् ॥ १ ॥ पुनः । ॐ नम
स्तेरुद्र० इत्याद्येकषष्टयुत्तरशतधा होमं कृत्वा । ॐ सत्यंचमे० ॥ ५ ॥ ॐ ऋतञ्चमे० ॥ ६ ॥ ॐ यंताचमे ॥ ७ ॥
ॐ शञ्चमेमयञ्चमे० स्वाहा ॥ ८ ॥ इति द्वितीयचमकानुवाकहोमं कुर्यात् ॥ २ ॥ ततः पुनः ॐ नमस्ते रुद्र० इत्यादि १६१
होमं कृत्वा । ॐ ऊक्चर्चमेसूनृताचमे० ॥ ९ ॥ ॐ रयिञ्चमे० ॥ १० ॥ ॐ वित्तञ्चमे० ॥ ११ ॥ ॐ व्रीहयश्चमे० स्वाहा
॥ १२ ॥ इति तृतीयचमकानुवाकहोमं कुर्यात् ॥ ३ ॥ पुनः ॐ नमस्ते रुद्र० इत्यादि १६१ होमं कृत्वा । ॐ अश्माचमे०
॥ १३ ॥ ॐ अग्निश्चमऽआपश्चमे० ॥ १४ ॥ ॐ व्वसुचमे० स्वाहा ॥ १५ ॥ इति चतुर्थानुवाकहोमं कुर्यात् ॥ ४ ॥ पुनः
ॐ नमस्तेरुद्र० इत्यादि ॥ १६१ ॥ होमं कृत्वा । ॐ अग्निश्चमऽइन्द्रश्चमे० ॥ १६ ॥ ॐ मित्रश्चमऽइन्द्रश्चमे० ॥ १७ ॥
ॐ पृथिवीचम० स्वाहा ॥ १८ ॥ इति पंचमानुवाकहोमं कुर्यात् ॥ ५ ॥ पुनः ॐ नमस्ते० इत्यादि १६१ होमं कृत्वा । ॐअर्द्ध
शुश्चमे० ॥ १९ ॥ ॐ आग्रयणश्चमे० ॥ २० ॥ ॐ स्रुचश्चमे० स्वाहा ॥ २१ ॥ इति षष्ठानुवाकहोमः ॥ ६ ॥ पुनः ॐ नमस्ते०
इत्यादि १६१ होमं कृत्वा । ॐ अग्निश्चमे० ॥ २२ ॥ ॐ व्व्रतञ्चम० स्वाहा ॥ २३ ॥ इति सप्तमानुवाकहोमः ॥ ७ ॥ पुनः ॐ
नमस्ते० इत्यादि१६१होमं कृत्वा । ॐ एकाचमे० स्वाहा॥२४॥ इत्यष्टमानुवाकहोमः ॥८॥ पुनर्नमस्ते इत्यादि १६१ हुत्वा । ॐ
चतस्रश्चमे० स्वाहा ॥२५॥इति नवमानुवाकहोमः ॥९॥ पुनर्नमस्ते इत्यादि१६१हुत्वा । ॐत्र्यविश्चमे० ॥ २६ ॥ॐ पष्ठवाट्चमे०
स्वाहा॥२७॥इति दशमानुवाकहोमः॥१०॥पुनर्नमस्ते० इत्यादि१६१हुत्वा । ॐ व्वाजायस्वाहा०॥२८॥ ॐ आयुर्य्यज्ञेन० स्वाहा

॥१५६॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

॥२९॥इत्येकादशानुवाकहोमं कुर्य्यात् ॥११॥ "एवमेकादशावर्तनेन रूपकाख्यो रुद्रो भवति" एकादशावृत्तौ होमान्ते। यज्जाग्रत० इत्यादि ६ सहस्रशीर्षा० १६ अभ्यः संभृत० ६ आशुः शिशान० १७ विभ्राड्बृहत् १६ इत्यादिपंचसूक्तैः पंचाहुतीर्हुत्वा ॥ ततो नमस्तेरुद्र० इति रुद्राध्यायेन पूर्वोक्तप्रकारेण हुत्वा होमान्ते एकैकेन चमकविभागेन हुत्वा ॥ ॐ ऋतंवाचं० स्वाहा ॥ १ ॥ ॐ यन्मेछिद्रञ्चक्षुषो०स्वाहा ॥ २ ॥ ॐ भूर्भुवः स्वः तत्सवितु० स्वाहा ॥ ३ ॥ ॐ कयानश्चित्र० स्वाहा ॥ ४ ॥ ॐ कस्त्वासत्यो० स्वाहा ॥ ५ ॥ ॐ अभीषुण० स्वाहा ॥ ६ ॥ ॐ कयात्वन्न० स्वाहा ॥ ७ ॥ ॐ इन्द्रोव्विश्वस्य० स्वाहा ॥ ८ ॥ ॐ शन्नोमित्र० स्वाहा ॥ ९ ॥ ॐ शन्नोव्वात० स्वाहा ॥ १०॥ ॐ अहानिश० स्वाहा ॥ ११ ॥ ॐ शन्नोदेवी० स्वाहा ॥ १२ ॥ ॐ स्योनापृथिवि० स्वाहा ॥ १३ ॥ ॐ आपोहिष्ठा० स्वाहा ॥ १४ ॥ ॐ योवःशिवतमो०स्वाहा ॥ १५॥ ॐ तस्माऽअरङ्ग० स्वाहा ॥१६॥ ॐ द्यौःशान्तिरन्तरिक्ष० स्वाहा ॥ १७ ॥ ॐ दृतेदृꣳहमा० स्वाहा ॥ १८ ॥ दृतेदृꣳहमाज्योक्ते० स्वाहा ॥१९॥ ॐ नमस्ते हरसे० स्वाहा ॥ २० ॥ ॐ नमस्तेऽअस्तु० स्वाहा ॥ २१ ॥ ॐ यतोयतः स्वाहा ॥ २२ ॥ सुमित्रियान० स्वाहा ॥ २३ ॥ ॐ तच्चक्षुर्देवहितं० स्वाहा ॥ २४ ॥ इति शांत्यध्यायमंत्रैश्चतुर्विंशतिराहुतीर्जुहुयात् ॥ एवं प्रधानहोमं विधाय सर्वे ऋत्विजः प्रागुक्त पंचांगन्यासान् कुर्युः। एवं क्रमेण लघुरुद्रहोमं महारुद्रमतिरुद्रहोमं वा कुर्यात्। इति रुद्रहोमः। अथ पीठदेवताहोमः ॥ तत्र पीठ देवताभ्यो लिंगतोभद्रदेवताभ्यो रुद्रयंत्रदेवताभ्यश्चैकैकामाज्याहुतिं जुहुयुः। तद्यथा। ॐ मंडकाय स्वाहा ॥ १ ॥ ॐ कालाग्निरुद्राय० ॥ २ ॥ ॐ आधारशक्त्यै० ॥ ३ ॥ कूर्माय० ॥ ४ ॥ धरायै० ॥ ५ ॥ सुधासिंधवे० ॥ ६ ॥ श्वेतद्वीपाय० ॥ ७ ॥ सुरांभि

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पाय० ॥ ८ ॥ मणिहर्म्याय० ॥ ९ ॥ हेमपीठाय० ॥ १० धर्माय० ॥ ११ ॥ ज्ञानाय० ॥ १२ ॥ वैराग्याय० ॥१३॥ ऐश्वर्य्याय० ॥ १४ ॥ अधर्माय० ॥ १५ ॥ अज्ञानाय० ॥ १६ ॥ अवैराग्याय० ॥ १७ ॥ अनैश्वर्य्याय० ॥ १८ ॥ अनंताय स्वाहा ॥ १९ ॥ तत्वपद्माय० ॥ २० ॥ आनंदमयकंदाय० ॥ २१ ॥ संविन्नालाय० ॥२२॥ विकारमेयकेसरेभ्य० ॥ २३ ॥ प्रकृत्यात्मकपत्रेभ्य० ॥२४॥सूर्यमंडलाय० ॥२५॥ चंद्रमंडलाय० ॥ २६ ॥ अग्निमंडलाय० ॥ २७ ॥ सत्वाय० ॥२८॥ रजसे० ॥ २९ ॥ तमसे० ३० आत्मने० ॥ ३१ ॥ अंतरात्मने० ॥ ३२ ॥ परमात्मने० ॥ ३३ ॥ ज्ञानात्मने० ॥ ३४ ॥ मायातत्वाय० ॥ ३५ ॥ कलातत्वाय० ॥ ३६ ॥ विद्यातत्वाय० ॥ ३७ ॥ परतत्वायस्वाहा ॥ ३८ ॥ इति पीठदेवताहोमः । ॐ वामायै स्वाहा ॥ १ ॥ ज्येष्ठायै० ॥ २ ॥ रौद्र्यै० ॥ ३ ॥ काल्यै० ॥ ४ ॥ कलविकरिण्यै० ॥ ५ ॥ बलविकरिण्यै० ॥ ६ ॥ बलप्रमथन्यै० ॥ ७ ॥ सर्वभूत दमन्यै० ॥ ८ ॥ मनोन्मन्यै० ॥ ९ ॥ इति नवपीठशक्तिहोमः ॥ ॐ नमो भगवते सकलगुणात्मशक्तियुक्ताय अनंतयोगपीठा त्मने स्वाहा ॥ १ ॥ अथ यंत्रावरणदेवताहोमः ॥ ॐ नमो भगवते रुद्राय स्वाहा ॥ १ ॥ सद्योजाताय० ॥ १ ॥ वामदेवाय० ॥ २ ॥ अघोराय० ॥ ३ ॥ तत्पुरुषाय० ॥ ४ ॥ ईशानाय० ॥ ५ ॥ नंदिने० ॥ ६ ॥ महाकालाय० ॥ ७ ॥ गणे श्वराय० ॥ ८ ॥ वृषभाय० ॥ ९ ॥ भृंगिरिटये० ॥ १० ॥ स्कंदाय० ॥ ११ ॥ उमायै० ॥ १२ ॥ चंडीश्वराय० ॥ ॥ १३ ॥ इति प्रथमावरणम् । अनंताय० ॥ १४ ॥ सूक्ष्माय० ॥ १५ ॥ शिवाय० ॥ १६ ॥ एकपदे० ॥ १७ ॥ एकरुद्राय० ॥ १८ ॥ त्रिमूर्तये० ॥ १९ ॥ श्रीकंठाय० ॥ २० ॥ वामदेवाय० ॥ २१ ॥ ज्येष्ठाय० ॥ २२ ॥ श्रेष्ठाय० ॥ २३ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

रुद्राय० ॥ २४ ॥ कालाय० ॥ २५ ॥ कलविकरणाय० ॥ २६ ॥ बलाय० ॥ २७ ॥ बलविकरणाय० ॥ २८ ॥ बल
प्रमथनाय० ॥ २९ ॥ इति द्वितीयावरणम् ॥ अणिम्ने ॥ ३० ॥ महिम्ने० ॥ ३१ ॥ लघिम्ने० ॥ ३२ ॥ गरिम्णे० ॥ ३३ ॥
प्राप्त्यै० ॥ ३४ ॥ प्राकाम्यै० ॥ ३५ ॥ ईशितायै० ॥ ३६ ॥ वशितायै० ॥ ३७ ॥ ब्राह्म्यै० ॥ ३८ ॥ माहेश्वर्य्यै० ॥ ३९ ॥ कौ
मार्य्यै० ॥ ४० ॥ वैष्णव्यै० ॥ ४१ ॥ वाराह्यै० ॥ ४२ ॥ इंद्राण्यै० ॥ ४३ ॥ चामुंडायै० ॥ ४४ ॥ चंडिकायै० ॥ ४५ ॥ अ
सितांगभैरवाय० ॥ ४६ ॥ रुरुभैरवाय० ॥ ४७ ॥ चंडभैरवाय० ॥ ४८ ॥ क्रोधभैरवाय० ॥ ४९ ॥ उन्मत्तभैरवाय० ॥ ५० ॥ का
लभैरवाय० ॥ ५१ ॥ भीषणभैरवाय० ॥ ५२ ॥ संहारभैरवाय० ॥ ५३ ॥ इति तृतीयावरणम् ॥ भवाय० ॥ ५४ ॥ शर्वाय०
॥ ५५ ॥ ईशानाय० ॥ ५६ ॥ पशुपतये० ॥ ५७ ॥ रुद्राय० ॥ ५८ ॥ उग्राय० ॥ ५९ ॥ भीमाय० ॥ ६० ॥ महादेवाय० ॥
॥ ६१ ॥ इति शिवाष्टकहोमः ॥ अनंताय० ॥ ६२ ॥ वासुकये० ॥ ६३ ॥ तक्षकाय० ॥ ६४ ॥ कुलीरकाय० ॥ ६५ ॥ कर्कोट
काय० ॥ ६६ ॥ शंखपालाय० ॥६७ ॥ कंबलाय० ॥ ६८ ॥ अश्वतराय० ॥ ६९ ॥ इत्यष्टनागहोमः ॥ वैन्याय० ॥ ७० ॥
पृथवे० ॥ ७१ ॥ हैहयाय० ॥ ७२ ॥ अर्जुनाय० ॥ ७३ ॥ शाकुंतलेयाय० ॥ ७४ ॥ भरताय० ॥ ७५ ॥ नलाय० ॥ ७६ ॥
रामाय० ॥ ७७ ॥ "इति नृपाष्टकहोमः" हिमवते० ॥ ७८ ॥ निषधाय० ॥ ७९ ॥ विंध्याय० ॥ ८० ॥ माल्यवते० ॥ ८१ ॥
पारियात्राय० ॥ ८२ ॥ मलयाय० ॥ ८३ ॥ हेमकूटाय० ॥ ८४ ॥ गंधमादनाय० ॥ ८५ ॥ " इति गिर्य्यष्टकहोमः" इति चतु
र्थावरणम् ॥ इंद्राय० ॥ ८६ ॥ अग्नये० ॥ ८७ ॥ यमाय० ॥ ८८ ॥ निर्ऋतये० ॥ ८९ ॥ वरुणाय० ॥ ९० ॥ वायवे० ॥ ९१ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कुबेराय० ॥ ९२॥ ईशानाय० ॥९३॥ "इतीन्द्रादिदेवहोमः" शच्य० ॥ ९४ ॥ स्वाहायै० ॥ ९५ ॥ वाराह्यै० ॥ ९६ ॥ खड्गिन्यै० ॥ ९७ ॥ वारुण्यै० ॥ ९८ ॥ वायव्यै० ॥ ९९ ॥ कौबेर्य्यै० ॥ १०० ॥ ईशान्यै० ॥ १०१ ॥ "इत्यष्टशक्तिहोमः" वज्राय० ॥ १०२ ॥ शक्त्यै० ॥ १०३ ॥ दंडाय० ॥ १०४ ॥ खड्गाय० ॥ १०५ ॥ पाशाय० ॥ १०६ ॥ अंकुशाय० ॥ १०७ ॥ गदायै० ॥ १०८ ॥ त्रिशूलाय० ॥ १०९ ॥ "इत्यायुधहोमः" ऐरावताय० ॥ ११० ॥ मेषाय० ॥ १११ ॥ महिषाय० ॥ ११२ ॥ प्रेताय० ॥ ११३ ॥ मकराय० ॥ ११४ ॥ हरिणाय० ॥ ११५ ॥ नराय० ॥ ११६ ॥ वृषभाय० ॥ ११७ ॥ इति वाहनहोमः ऐरावताय० ॥ ११८ ॥ पुंडरीकाय० ॥ ११९ ॥ वामनाय० ॥ १२० ॥ कुमुदाय० ॥ १२१ ॥ अंजनाय० ॥ २२२ ॥ पुष्पदंतायः ॥ १२३ ॥ सार्वभौमाय० ॥ १२४ ॥ सुप्रतीकाय० ॥ १२५ ॥ इतिगजहोमः ॥ इति पंचमावरणम् ॥ इंद्राय० ॥ १२६ ॥ अग्नये० ॥ १२७ ॥ यमाय० ॥ १२८ ॥ निर्ऋतये० ॥ १२९ ॥ वरुणाय० ॥ १३० ॥ वायवे० ॥ १३१ ॥ कुबेराय० ॥ ॥ १३२ ॥ ईशानाय० ॥ १३३ ॥ ब्रह्मणे० ॥ १३४ ॥ अनंताय० ॥ १३५ ॥ "इति दिक्पालहोमः" इति षष्ठावरणम् । विरूपाक्षाय० ॥ १३६ ॥ विश्वरूपाय० ॥ १३७ ॥ पशुपतये० ॥ १३८ ॥ ऊर्ध्वलिंगाय० ॥ १३९ ॥ शेषाय० ॥ १४० ॥ तक्षकाय० ॥ १४१ ॥ अनंताय० ॥ १४२ ॥ वासुकये० ॥ १४३ ॥ शंखपालाय० ॥ १४४ ॥ महापद्माय० ॥ १४५ ॥ कंबलाय० ॥ १४६ ॥ कर्कोटकाय ॥ १४७ ॥ "इत्यष्टनागहोमः ॥ इति सप्तमावरणम् ॥ इति रुद्रयंत्रदेवताहोमः ॥ एवं होमं कृत्वा स्विष्टकृदादिप्रायश्चित्तहोमांतं समाप्य । इंद्रादिदिक्पालेभ्यो नवग्रहेभ्यः क्षेत्रपालादिभ्यश्च माषभक्तबलींस्तत्तन्मं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

त्रैर्दद्यात् । ततः पूर्णाहुतिहोमः ॥ घृतकुंभवसोर्धारांपातयेदनलोपरि । औदुंबरीमथार्द्रां च ऋज्वीं कोटरवर्जिताम् ॥ बाहुमात्रां स्रुचं कृत्वा ततः स्तंभद्वयोपरि ॥ घृतधारां तया चाज्यमग्नेरुपरि पातयेत् ॥ श्रावयेत्सूक्तमाग्नेयं वैष्णवं रौद्रमैंदवम् ॥ महावैश्वानरं साम ज्येष्ठसाम च पाठयेत् ॥ इति मात्स्योक्तः पूर्णाहुतिहोमः ॥ अत्र चतुर्गृहीताज्येन समुद्रादूर्मीत्यादिमंत्रैर्मूलमंत्रेण च वाजश्चमेइत्यनुवाकैश्च सततांवसोर्द्धारांजुहुयात् ॥ एवं पूर्णाहुतिं वसोर्धारां च हुत्वा नमस्ते रुद्र इत्यादिभिः रुद्रं स्तुत्वा प्रणीताविमोकांतं कर्म्मशेषं समाप्य । आचार्यादिभ्यो दक्षिणां दत्वा जपहोमश्रेयो गृह्णीयात् । तत आचार्यादयो रुद्रग्रहकलशोदकेन यजमानस्याभिषेकं कुर्युः । ततो यजमानो ग्रहाणां रुद्रस्य चोत्तरपूजां महानीराजनं च कृत्वा त्रिःपरिक्रम्य साष्टांगं प्रणम्य । ॐ कृतेनानेन ब्राह्मणद्वारा अमुकरुद्रजपेन श्रीसदाशिवमहारुद्रः प्रीयतामिति पठित्वा देवदक्षिणभागे जलमुत्सृजेत् । ततो देवाभिमुखः कृतांजलिपुटः सन् ॥ "जपन्यासार्चनं होमं यत्कृतं तु मयाद्य वै ॥ न्यूनातिदोषरहितं कृतं कर्म मया प्रभो ॥ १ ॥ भवत्वेतत्कृपासिंधो क्षमस्व च नमोस्तुते ॥ पूजान्यासादिकं देव कृतं यत्त्वदनुग्रहात् ॥ २ ॥ तेन मत्कर्मणा रुद्र प्रीतो भव वरप्रदः ॥ नमः शिवाय शांताय सगणायादिहेतवे ॥ निवेदयामि चात्मानं त्वं गतिः परमेश्वर ॥३॥ न्यूनातिरिक्तं तत्पूर्णं प्रसादादस्तु शंकर ॥ एतत्कृतेन देवेश सदा मे वरदो भव ॥४॥" इति देवं क्षमाप्य विसृज्य प्रतिमादिकमाचार्यादिभ्यो दत्वाग्निं संपूज्य गच्छगच्छेति विसृजेत् । ततो यथाशक्ति ब्राह्मणान्संभोजयित्वा यस्यस्मृत्या० इत्यादि जपित्वा कर्म्मसंपूर्णतां वाचयित्वा कर्मेश्वरार्पणं कृत्वा सुहृद्युक्तो भुंजीत ॥ इति रुद्रहोमपद्धतिः ॥ अथ कामनाभेदेन रुद्रहोमद्रव्याणि

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(लिंगपुराणे ।) रुद्राध्यायेन विधिना घृतेन नियतः क्रमात् । सघृतेन तिलेनैव कमलेन विशेषतः ॥ दूर्वया घृतगोक्षीरमिश्रया मधुना तथा । चरुणा सघृतेनैव केवलं पयसाथ वा ॥ यस्तु जुहुयात्कालमृत्योः प्रतीकारः प्रकीर्तितः ॥ (हेमाद्रौ) पापक्षयेभिचारे च तथा व्याधिविमोचने ॥ पलाशसमिधः कार्या नान्यत्रोत्पातदर्शनात् ॥ १ ॥ औदुंबर्याश्च समिधो मध्वक्ताश्च तथाक्षताः ॥ ग्राह्याश्चान्नाद्यकामेन श्रियै शांत्यै च पायसम् ॥ २ ॥ सर्वकामेन वा ग्राह्या आयुर्वृद्ध्यै तिलाः स्मृताः ॥ घृताक्ता अथवा दूर्वास्तेजस्कामेन वै घृतम् ॥ ३ ॥ व्रीहयः पशुकामेन राष्ट्रकामेन वै यवाः ॥ उपविश्य शुचौ देशे दूर्वास्तंबे जपेद्यदि ॥ ४ ॥ जुहुयाच्छेत पुष्पैर्वा स विश्वं कुरुते वशम् ॥ स्पृष्ट्वाश्वत्थं जपेद्यस्तु रुद्रैकादशिनीं नरः ॥ ५ ॥ रोगाञ्ज्वरातिसारादीन्नाशयेदुल्बणानपि ॥ होमः पलाशसमिधा कर्तव्यो मधुसंयुतः ॥ ६॥ एकादशमहारुद्रान् परचक्रागमे पुनः ॥ जपेदेकादशगुणान्होमस्तु विधिवत्स्मृतः ॥७॥ तिलैराज्येनसंसिक्तैर्विधिवदभिवर्तयेत् ॥ रुद्रैकादशिनी जाप्ये शतमेकोनमिष्यते ॥ ८ ॥ सहस्राश्च तथा रौद्रे नवत्येकोनया युतः॥ एवं त्रिगुणिता कार्या महारुद्रातिरुद्रयोः ॥ ९ ॥ वृष्टिकामेन वा योज्या हस्त्यश्वामयशांतये ॥ उद्भवेत्यद्भुतानां च ग्रहाणां तु विपर्यये ॥ १० ॥ गृहग्रामादिशांत्यै च तिलाश्चाज्येन संयुताः ॥ होमांते सर्वकामानां कूष्मांडैश्चापि वा जपः ॥ ११ ॥ होतव्यमाज्यं विधिवन्महाव्याहृतिभिस्तथा ॥ परिषिच्य ततो वह्निं तत्त्वायामेति चार्च्य च ॥ १२ ॥ अभिषेकं ततः कुर्यान्मंत्रैस्त्वब्लिंगकैः शुचिः ॥ आदावंते च संपूज्य पार्वतीसहितं शिवम् ॥ १३ ॥ लोकपालांश्च संपूज्य विधिवच्छिवसन्निधौ ॥ गंगां दुर्गां च मंत्रेण विधिवद्विरदाननम् ॥ १४ ॥ स्नपनोक्तविधानेन त्वरितेन नमस्कृतिः ॥ तर्पयेद्विविधैरत्नैः पयसा पायसेन वा ॥ १५ ॥ प्रीयतां

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

शंभुरित्युक्त्वा भूमिदेवाच्छुचिः शुचीन् ॥ दत्वा तु दक्षिणां तेभ्यः प्रणिपत्य विसर्जयेत् ॥ १६ ॥ एवं कृते स भगवान्प्रीतः कामान्प्रयच्छति ॥ अकामस्य फलं मुक्तिर्नात्र कार्या विचारणा ॥१७॥ बौधायनोक्तमंत्रोयं सर्वकामसमृद्धये ॥ इति रुद्रहोमद्रव्याणि ॥ अथ रुद्राभिषेकविधानं (हेमाद्रौ महार्णवे च । सुमुहूर्ते कृतनित्यक्रियः धृतभस्मत्रिपुंड्ररुद्राक्षः पवित्रपाणिः शिवसमीपे तद्दक्षिणतः पश्चिमतो वा सन्मुखः स्वासने उदङ्मुख उपविश्य मूलेनाचम्य प्राणानायम्य देशकालौ संकीर्त्य ममात्मनः श्रुतिस्मृतिपुराणोक्तफलावाप्तये धर्मार्थकाममोक्षसिद्धिद्वारा सर्वपातकनिरासार्थं सर्वव्याधिनिवृत्तिपूर्वकसर्वाभीष्टसिद्ध्यर्थं वा अमुककामनासिद्ध्यर्थं श्रीभवानीशंकरमृत्युंजयग्रहारुद्रदेवताप्रीत्यर्थं च स्वयं [ब्राह्मणद्वारा वा] अमुकद्रव्येण नमस्तेरुद्र इत्यादि शतरुद्रियेण [वा षडंगरुद्रेण वा अमुकरूपादिरुद्रजपेन] संततधारयाभिषेकं करिष्ये । इति संकल्प्य । तत्रादौ निर्विघ्नतासिद्धये 'ॐ सुमुखश्चैकदंतश्च०' इत्यादिस्मरणपूर्वकं गणपतिं संपूज्य स्मरणं वा कृत्वा पूर्वोक्तभूतशुद्ध्यादिश्रीकंठादिकलान्यासांतं कुर्यात् । ततः यातेरुद्रइत्यादि ३१ मंत्रैः शिखाद्यस्त्रान्तमेकत्रिंशदंगन्यासं प्रथमम् ॥ १ ॥ ततः ॐ नमो भगवते रुद्रायेति मंत्राक्षरैर्मूर्द्धादिपादांतं दशांगन्यासंद्वितीयम् ॥२॥ततः सद्योजातादिभिः पादादिमूर्द्धान्तं पंचांगन्यासं तृतीयम् ३ मनोजूतिरित्यादिमंत्रैर्गुह्यादिमस्तकांतं पंचांगन्यासं चतुर्थम्४ न्यासंच कृत्वा यज्जाग्रत इत्यादिषड्मंत्रैर्हृदयं १ सहस्रशीर्षाइत्यादिषोडशभिः शिरः २ अभ्यः संभृत इत्यादिषड्भिः शिखां३आशुः शिशानइत्यादिसप्तदशभिः कवचम् ॥४॥ विभ्राडितिषोडशभिर्नेत्रं ॥५॥ नमस्तेरुद्रइत्यादिषोडशभिरस्त्रं च विन्यसेत् ॥ ६ ॥ इति पंचमं न्यासं कुर्यात् ॥ ५ ॥ एवं पंचन्यासं पूर्ववत् कृत्वा शातातपोक्तंषष्ठं षडंगन्यासं कुर्यात् । तद्यथा ॐ प्रजनने ब्रह्मातिष्ठ

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तु ॥ १ ॥ पादयोर्विष्णुस्तिष्ठतु ॥ २ ॥ हस्तयोर्हरस्तिष्ठतु ॥ ३ ॥ बाह्वोरिंद्रस्तिष्ठतु ॥ ४ ॥ जठरे अग्निस्तिष्ठतु ॥ ५ ॥ हृदये शिवस्तिष्ठतु ॥ ६ ॥ कंठे वसवस्तिष्ठंतु ॥ ७ ॥ वक्त्रे सरस्वती तिष्ठतु ॥ ८ ॥ नासिकयोर्वायुस्तिष्ठतु ॥ ९ ॥ नयनयोः सूर्याचन्द्रमसौ तिष्ठताम् ॥ १० ॥ कर्णयोरश्विनौ देवौ तिष्ठताम् ॥ ११ ॥ ललाटे रुद्रास्तिष्ठन्तु ॥ १२ ॥ मूर्ध्न्यादित्यास्तिष्ठंतु ॥ ॥ १३ ॥ पृष्ठे पिनाकी तिष्ठतु ॥ १४ ॥ पुरतः शूली तिष्ठतु ॥ १५ ॥ पार्श्वयोः शिवाशंकरौ तिष्ठताम् ॥ १६ ॥ सर्वतो वायुस्तिष्ठतु ॥ १७ ॥ ततो बहिः सर्वतोग्निर्ज्वालामालापरिवृतस्तिष्ठतु ॥ १८ ॥ सर्वेष्वंगेषु सर्वा देवतास्तिष्ठंतु ॥ १९ ॥ मांरक्षंतुअग्निर्वायुः सूर्यश्चंद्रमादिशआपः पृथिव्यौषधिवनस्पतयइन्द्रः पर्जन्यईशानआत्मापुनर्नमअग्निर्मैवाचिश्रित इति यथालिंगमंगानि संस्पृशेत् ॥ इति न्यासषट्कं कृत्वा मानसोपचारैः संपूज्य 'ॐ ध्यायेन्नित्यं महेशं०' इति ध्यात्वा लिंगपूजां कुर्यात् ॥ तद्यथा आराधितो मनुष्यैस्त्वं सिद्धैर्देवासुरादिभिः ॥ आराधयामि भक्त्या त्वां मां गृहाण महेश्वर ॥ ॥ १ ॥ ॐ त्र्यंबकंयजामहे० इत्याराध्य ॥ ॐ आत्वावहंतुहरयःसचेतसःश्वेतैरश्वैः सहकेतुमद्भिः ॥ वाताजवैर्बलवद्भिर्मनोजवैराया हि शीघ्रं मम हव्याय शर्वोम् ॐ सद्योजातंप्रपद्यामीत्यावाह्य ॥ १ ॥ ॐ त्र्यंबकं०सद्योजातायवैनमोनमः इत्यासनम् ॥ २ ॥ त्र्यंबकं०भवेभवेनातिभवेभवस्वमामितिपाद्यम् ॥ ३ ॥ ॐ त्र्यंबकं० भवोद्भवायनम इत्यर्घ्यम् ॥ ४ ॥ ॐ त्र्यंबकं० आपोहिष्ठामयोभुव इत्यादिमंत्रत्रयेण स्नानम् ॥ ५ ॥ देवैस्तु वंदिता धेनुः सर्वपापप्रणाशिनी ॥ तत्क्षीरस्नापितो देव नित्यं मे वरदो भव ॥ ॐ त्र्यंबकं० पयःस्नानम् ॥६॥ कामतोकामतोवापि यन्मयादुष्कृतं कृतम् ॥ तत्सर्वं विलयं यातु दधिस्नानेन भो शिव ॥१॥ त्र्यंबकं०

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

इति दधिस्नानम् ॥ ७ ॥ रसानामुत्तमं त्वाज्यं देवानां च सदा प्रियम् ॥ तेन त्वं स्नापितो देव निधिकांतिप्रदो भव ॥ ८ ॥ त्र्यंबकं० इतिघृतस्नानम् ॥ ८ ॥ यस्य धारणमात्रेण तृप्तिं याति पितामहः ॥ मधुना स्नापितो देव नित्यं शोकहरो भव ॥ १ ॥ त्र्यंबकं० मधुस्नानम् ॥ ९ ॥ यमलोकभयत्रस्तः शरणं त्वां गतः शिव ॥ खंडस्नानेन देवेश मां कुरुष्व सुखान्वितम् ॥ ॐ त्र्यंबकं० इति शर्करोदकस्नानम् ॥ १० ॥ यस्य दर्शनमात्रेण शुद्धिः प्राणाश्च जीवितम् ॥ तेन चोत्तमतोयेन स्नातो देहि प्रियं ध्रुवम् ॥ १ ॥ ॐ त्र्यंबकं० इति शुद्धोदकस्नानम् ॥ ११ ॥ अथाद्भिर्देवं तर्पयेत् ॥ ॐ भवं देवं तर्पयामि । ॐ शर्वं देवं तर्पयामि । ॐ ईशानं देवं तर्पयामि । ॐ पशुपतिं देवं तर्पयामि । ॐ रुद्रं देवं तर्पयामि । ॐ भीमं देवं तर्पयामि । ॐ महांतं देवं तर्पयामीति तर्पयित्वा तत ॐ त्र्यंबकं० ज्येष्ठाय नमः । इत्याचमनीयम् ॥ १२ ॥ त्र्यंबकं० श्रेष्ठाय नमः इतिमधुपर्कमाचमनं च ॥ १३ ॥ सुगंधं चंदनं देव कुंकुमेन समन्वितम् ॥ अर्चितोसि मया भक्त्या शिवलोकप्रदो भव ॥ ॐ त्र्यंबकं० इति गंधम् ॥ १४ ॥ अक्षय्यान्बंधुपुत्रार्थान् कायं चैवाक्षिवाङ्मनः ॥ अंते चैवाक्षयं लोकमक्षतैरर्चितः कुरु । ॐ त्र्यंबकं० इत्यक्षतान् ॥ १५ ॥ संतानः पारिजातश्च ये चान्ये सुरपादपाः ॥ तेषांपुष्पैर्मया देव पूजितः सुखदोभव । १ । ॐ त्र्यंबकं० कलविकरणाय नमः इति पुष्पाणि ॥ १६ ॥ धूपोयं गृह्यतां देव सुंदरो गंधवाञ्छुचिः ॥ ईप्सितं मे वरं देहि परत्र च शुभां गतिम् ॥ १ ॥ ॐ त्र्यंबकं० सर्वभूतदमनाय नमः इति धूपम् ॥ १७ ॥ शुद्धा शुक्लांबरा वर्तिराज्येन च समन्विता ॥ दीपवर्तिप्रदानेनप्रीतः स्यादीश्वरो भव ॥ १ ॥ ॐ त्र्यंबकं० मनोन्मनाय नमः । इति दीपम् ॥ १८ ॥ सर्वमन्नप्रदानं च देवानां

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तुसदाप्रियम् ॥ तेन चान्नप्रदानेन सुप्रीतो वरदो भव ॥ ॐ त्र्यंबकं० भवोद्भवाय नमः । इति नैवेद्यम् ॥ आचमनं च ॥ १९ ॥
अथाष्टभिर्मंत्रैरष्टौ पुष्पाणि० । ॐ भवाय देवाय नमः पुष्पं समर्पयामि ॥ १ ॥ ॐ शर्वाय देवाय० ॥ २ ॥ ॐ ईशानाय
देवाय० ॥ ३ ॥ ॐ पशुपतये देवाय० ॥ ४ ॥ ॐ रुद्राय देवाय० ॥ ५ ॥ ॐ उग्राय देवाय० ॥ ६ ॥ ॐ भीमाय देवाय० ॥७ ॥
ॐ महते देवाय० ॥ ८ ॥ इति पुष्पाणि समर्प्य । ॐ अघोरेभ्यो० १ तत्पुरुषाय० २ ईशानः सर्व० ३ इति मंत्रत्रयेणोपस्थाय
नीराजनं कृत्वा । पुष्पांजलिं समर्प्यप्रदक्षिणात्रयं कृत्वा साष्टांगं प्रणमेत् । ततः शिवस्य मूर्ध्नि हिरण्यादिकलशेन संततां धारां
मधुना सर्पिषा पयसा वेक्षुरसेन नारीकेलोदकेन चाम्ररसेन वा तदभावे उदकेन । ॐ नमस्तेरुद्रमन्यव । इत्येकादशानामनुवाका
नामेकमेकं जपेत्सर्वेषां पारेपुनराराधयेत् । उत्तमाराधनेन तदेतद्विधानमुक्तम् ॥ ततः अभिषेकान्ते ॥ ॐ अनेन रुद्राभिषेककर्म
णा श्रीभवानीशंकरमृत्युञ्जयमहारुद्रः प्रीयतामिति देवदक्षिणपार्श्वे जलमुत्सृजेत् ॥ ॐ तत्सद्ब्रह्म०॥ ततस्तेनाभिषिक्तोदकेन [अक्षि
भ्यामित्यनुवाकेन] ॐ अक्षीभ्यांतेनासिकाभ्यांकर्णाभ्यांछुबुकादधि । यक्ष्मशीर्ष्ण्यंमस्तिष्काज्जिह्वायाविवृहामिते १ ग्रीवाभ्यस्त
उष्णिहाभ्यःकीकसाभ्योअनूक्यादयक्ष्मंदोषण्य । मंसाभ्यांवाहुभ्यांविवृहामिते २ आंत्रेभ्यस्तेगुदाभ्योवनिष्ठोर्हृदयादधि । यक्ष्मंमत
स्नाभ्यांयकृः प्लाशिभ्योविवृहामिते ३ हुरुभ्यांतेअष्ठीवद्भ्यांपार्ष्णिभ्यांप्रपदाभ्यांयक्ष्मंश्रोणिभ्यांभासदाद्भंससोविवृहामिते ४ मेहनाद्व
नंकुरणाच्छोमभ्यस्तेनखेभ्यः ॥ यक्ष्मंसर्वस्मादात्मनस्तामिदंविवृहामिते ५ अंगादंगाल्लोम्नोलोम्नोजातंपर्वणिपर्वणि । यक्ष्मंसर्वस्मादात्म

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नुस्तमिदंविवृंहामितु ॥ ६ ॥ इतिऋग्वेदीयानुवाकम् ॥ वारुणैवामंत्रैः मस्तकाद्यपादांतं संमृज्यात् । पापक्षयार्थी व्याधिविमोचनार्थी श्रीकामः पुष्टिकामो मोक्षार्थी च कुर्यादेवं कुर्वन् सिद्धिमाप्नोति । तत आचार्याय दक्षिणां ददाति दश गाः सवत्साः सुवर्णभूषिताः ॥ वृषभैकादशस्तदलाभे एकां गां दद्यादित्याह भगवान् बौधायनः ॥ इति रुद्राभिषेकविधानम् ॥ अथ चंडेश्वरमंत्रपुरश्चरणं शारदायाम् । मूलमंत्रो यथा ॐ ध्वँ फट् । इति त्र्यक्षरो मंत्रः । अस्य चंडेश्वरमंत्रस्य त्रिकऋषिरनुष्टुप् छंदश्चंडेश्वरो देवता सर्वेष्टसिद्धयर्थे विनियोगः ॥ ॐ त्रिकऋषये नमः शिरसि ॥ १ ॥ ॐ अनुष्टुप्छंदसे नमः मुखे ॥ २ ॥ ॐ चंडेश्वरदेवतायै नमः हृदये ॥ इति ऋष्यादिन्यासः ॥ ॐ दीतफट्हृदयाय नमः ॥ १ ॥ ॐ ज्वलफट् शिरसे स्वाहा ॥ २ ॥ ॐ ज्वालामालिनीफट् शिखायै वषट् ॥ ३ ॥ ॐ फट् कवचाय हुं ॥ ४ ॥ ॐ हनफट् नेत्रत्रयाय वौषट् ॥ ५ ॥ ॐ सर्वज्वालिनीफट् इत्यस्त्राय फट् ॥ ६ ॥ इति षडंगन्यासं कृत्वा ध्यायेत ॥ चंडेश्वरं रक्ततनुं त्रिनेत्रं रक्तांशुकाढ्यं हृदि भावयामि ॥ ढक्कां त्रिशूलं स्फटिकाक्षमालां कमंडलुं बिभ्रतमिंदुचूडम् ॥ १ ॥ एवं ध्वात्वा शिवपंचाक्षरोदिते पीठे मूलेन मूर्तिं प्रकल्प्य ॐ ध्वं चंडेश्वराय नमः इति मंत्रेण आवाहनादिपुष्पांतैरुपचारैः संपूज्य आवरणपूजां कुर्यात् ॥ षट्कोणे हृदयादिषडांनि संपूज्य अष्टदले ब्राह्म्याद्यष्टमातृकाः संपूजयेत् । ततो भूपुरे इन्द्रादिदशादिक्पालान् तद्बाह्ये वज्राद्यायुधानि च पूजयेत् । एवं चतुरावरणपूजां कृत्वा धूपादिनीराजनांतैश्चंडेशं संपूज्य त्रिलक्षं मंत्रं जपेत् । "वर्णलक्षं जपेन्मंत्रं होमं कुर्याद्दशांशतः ॥ मधुरत्रयसंयुक्तैर्विशुद्धैस्तिलतंडुलैः॥ १॥इति सिद्धे मनौ मंत्री धनवाञ्जायतेऽचिरात् ॥ तर्पयेन्मनुनानेन नित्यमष्टोत्तरं शतम् ॥२॥ श्रियं प्राप्नोति

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

महतीं पुत्रमित्रसमन्वितः ॥ प्रियंगुकुसुमैः फुल्लैस्तत्काष्ठज्वलितेनले ॥ ३ ॥ जुहुयादयुतं मंत्री पुरक्षोभः प्रजायते ॥ साध्यवृक्षत्व
चो लोणं पिष्ट्वा पिष्टसमन्वितम् ॥४॥ पुत्तलीं रुचिरां कृत्वा प्रतिष्ठाप्य समीरणम् ॥ छित्त्वाछित्त्वा प्रजुहुयादष्टोत्तरशतं निशि॥५॥
सप्ताहमेवं कुर्वीत साध्यो दासो भवेत्स्वयम् ॥ शैवमंत्रेषु निष्णातश्चंडेश्वरमनुं भजेत् ॥ ६ ॥ सर्वान्कामानवाप्नोति परत्रेह च नंदति ॥
इति चंडेश्वरमंत्रप्रयोगः ॥ अथ त्वरितरुद्रमंत्रपुरश्चरणप्रयोगः । (हेमाद्रिशांतिसारशांतिरत्नेषु) देवालयादिषु जपस्थानं प्रकल्प्य
तत्र नित्यकर्मानंतरं जपासने प्राङ्मुख उदङ्मुखो वा उपविश्य भस्मत्रिपुंड्रं रुद्राक्षमालां च धारयित्वा मूलेनाचम्य तेनैव प्राणा
नायम्य देशकालौ संकीर्त्य अमुककामनासिद्ध्यर्थं त्वरितरुद्रजपमहं करिष्ये । इति संकल्प्य पूर्वोक्तक्रमेण भूतशुद्धिं प्राणप्रतिष्ठा
मंतर्मातृकाबहिर्मातृकान्यासं श्रीकंठादिकलान्यासं च कृत्वा षोडशोपचारैः शिवपूजां विधाय रुद्रस्तवेन स्तुत्वा त्वरितरुद्रविधान
न्यासादिकं कुर्यात् । तत्र मूलमंत्रो यथा ॐ यो रुद्रोऽग्नौ योऽप्सु य औषधीषु यो रुद्रो विश्वा भुवना विवेश तस्मै रुद्राय नमोस्तु
॥ १ ॥ इत्येकत्रिंशद्वर्णो ३१ मंत्रः । अस्य त्वरितरुद्रमंत्रस्य अथर्वणऋषिः अनुष्टुप् छंदः त्वरितरुद्रसंज्ञको देवता नमः इति
बीजम् अस्तु इति शक्तिः त्वरितरुद्रप्रीत्यर्थं जपे विनियोगः । [तत्रादौ मूलेन करशुद्धिं कृत्वा प्रणवं करतलयोर्विन्यसेत्]
ॐ अथर्वषये नमः शिरसि ॥ १ ॥ ॐ अनुष्टुप्छंदसे नमः मुखे ॥ २ ॥ ॐ त्वरितरुद्रदेवतायै नमः हृदये ॥ ३ ॥ ॐ नमः
इति बीजाय नमः गुह्ये ॥ ४ ॥ ॐ अस्तु शक्तये नमः पादयोः ॥५॥ इति ऋष्यादिन्यासः ॥ ॐ यो रुद्र अंगुष्ठाभ्यां नमः ॥ १ ॥
ॐ अग्नौ तर्जनीभ्यां नमः ॥ २ ॥ ॐ योऽप्सु मध्यमाभ्यां नमः ॥ ३ ॥ ॐ य औषधीषु अनामिकाभ्यां नमः ॥ ४ ॥ ॐ यो

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

रुद्रो विश्वाभुवनाविवेश कनिष्ठिकाभ्यां नमः ॥५॥ ॐ तस्मै रुद्रायनमोऽस्तु करतलकरपृष्ठाभ्यां नमः ॥ ६ ॥ इति करन्यासः । एवं हृदयादिन्यासः । अथ पदन्यासः । ॐ यः नमः पादयोः ॥ १ ॥ रुद्रः नमः जंघयोः ॥ २ ॥ अग्नौ नमः जानुनोः ॥ ३ ॥ यः नमः ऊर्वोः ॥ ४ ॥ अप्सु नमः गुल्फयोः ॥ ५ ॥ यः नमः मेढ्रे ॥ ६ ॥ औषधीषु नमः नाभौ ॥ ७ ॥ यः नमः उदरे ॥८॥ रुद्रः नमः हृदये ॥ ९ ॥ विश्वा नमः कंठे ॥ १० ॥ भुवना नमः मुखे ॥ ११ ॥ विवेश नमः नासिकायाम् ॥ १२ ॥ तस्मै नमः नेत्रयोः ॥ १३ ॥ रुद्राय नमः भ्रुवोः ॥ १४ ॥ नमः नमः ललाटे ॥ १५ ॥ अस्तु नमः शिरसि ॥ १६ ॥ अथ वर्णन्यासः । ॐ यः शिरसि ॥ १ ॥ रुद्रः ललाटे ॥ २ ॥ अग्नौ नेत्रयोः ॥ ३ ॥ यः कर्णयोः ॥ ४ ॥ अप्सु नासिकायाम् ॥ ५ ॥ यः मुखे ॥ ६ ॥ औषधीषु बाह्वोः ॥ ७ ॥ यः हृदये ॥ ८ ॥ रुद्रः नाभौ ॥ ९ ॥ विश्वा गुह्ये ॥ १० ॥ भुवना अपाने ॥ ११ ॥ विवेश ऊर्वोः ॥ १२ ॥ तस्मै जान्वोः ॥ १३ ॥ रुद्राय जंघयोः ॥ १४ ॥ नमः गुल्फयोः ॥ १५ ॥ अस्तु चरणयोः ॥ १६ ॥ एवं पंच न्यासं कृत्वा शुभदामुद्रां प्रदर्शयेत् । [अंगुल्यग्राणि मूले तु कृत्वांगुष्ठेन पीडयेत् ॥ सा मुद्रा शुभदा प्रोक्ता सैव शांतिप्रदायिनी ॥ १ ॥] मुद्रादर्शनमंत्रः । ॐ एषतेरुद्रभागःसहस्वस्वसांविकयातंजुषस्वस्वाहा । इति मंत्रेण मुद्रां दर्शयित्वा ध्यानं कुर्यात् । "रुद्रं

---

१ कामनाभेदेन मुद्रास्थानानि (हेमाद्रौ) " श्रीकामः शीर्ष्णि कुर्वीत तेजस्कामस्तु नेत्रयोः । मुखे त्वन्नाद्यकामस्तु ग्रीवायां रोगनाशनम् ॥ हृदये सुखकामस्तु नाभौ ज्ञानप्रदं भवेत्। प्रजाकामस्तु गुह्ये वै पशुकामस्तु जंघयोः ॥ जानुभ्यां ग्रामकामस्तु सर्वकामस्तु गुह्ययोः । वशीकरणकामस्तु वामबाहुं प्रदर्शयेत् ॥ पापक्षयेभिचारे वा व्याधेरपगमे तथा । बहिः शरीरा त्कुर्वीत शिवस्याग्रे तु संस्मरेत्" इति ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

चतुर्भुजं देवं त्रिनेत्रं वरदाभयम् ॥ दधानमूर्ध्वहस्ताभ्यां शूलं डमरुमेवच ॥ १ ॥ अंकसंस्थामुभां पद्मे दधानां च करद्वये ॥ आद्ये करद्वये कुंभं मातुलुंगं च बिभ्रतीम् ॥ २ ॥ [अथवा] चतुर्बाहुं त्रिनेत्रं च शुद्धस्फटिकसन्निभम् ॥ उग्रे कर्मणि चैवोग्रं मूर्तिं ध्याये दुमापतिम् ॥ द्विभुजं नागपाशं च शूलपाणिं जटाधरम् ॥ ध्यात्वैवं शंकरं पापान्मुच्यते मानसोद्भवात् ॥ २ ॥ [अथवा] चतुर्भुजं त्रिनेत्रं च शुद्धस्फटिकसन्निभम् ॥ अमृतेन च पूर्णौ द्वौ कलशौ हस्तयोर्द्वयोः ॥ १ ॥ हस्तद्वयेन योगस्य कृतमुद्रं स्थिरासनम् ॥ सर्वकामप्रदं शांतं शंकरं करुणाकरम् ॥ २ ॥ उग्रकर्मणि चैवोग्रमूर्तिं ध्यायेदुमापतिम् ॥ द्विभुजं नागपाशं च शूलपाणिं जटाधरम् ॥ ३ ॥ इति ध्यात्वा मानसोपचारैः संपूज्य भेदपक्षे गंधादिपूजनं कुर्यात् । एवं पूजनं कृत्वा मूलमंत्रं जपेत् । अस्य पुरश्चरणमयुतद्वयजपात्मकं कुर्यात् । प्रत्यहं शिवं पूजयेत् । अधःशाय्येकभक्ताशी ब्रह्मचारी हविष्यभुक् ॥ अयुते द्वे जपेत्पूर्वं प्रत्यहं पूजयेच्छिवम् ॥ १ ॥ जुहुयात्तदशांशेन तदशांशेन तर्पणम् ॥ मार्जनं तदशांशेन दशांशेन तु भोजयेत् ॥ २ ॥ एवं कृते तु सिद्धिः स्यात्फलार्थं तु ततो जपेत् ॥ पुरश्चरणमेवं तु कृत्वा संपूज्य शंकरम् ॥ ३ ॥ जपेत्त्वारितरुद्रं तु सर्वकामसमृद्धये ॥ श्रीकामः शान्तिकामो वा जपेल्लक्षमतंद्रितः ॥ ४ ॥ विल्वसमिद्भिः श्रीकामः शांतिकामः शमीमयैः ॥ जुहुयादाज्यसंमिश्रैस्तर्पणं मार्जनं तथा ॥ ५ ॥ जत्वा लक्षं तु पुत्रार्थी पायसं जुहुयात्ततः ॥ वित्तार्थी श्रीफलैर्होममायुष्कामस्तु दूर्वया ॥ ६ ॥ तिलैराज्येन संमिश्रैस्तेजस्कामो घृतेन वै ॥ व्रीहिभिः पशुकामस्तु राष्ट्रकामस्तु वै यवैः ॥ ७ ॥ पायसं सर्वकामेन होतव्यं शर्करान्वितम् ॥ मध्वाक्तान्याम्रपत्राणि तीव्रज्वरविनाशिने ॥ ८ ॥ हिमभूतज्वरेणैव गुडूचीभिर्हुनेद्ध्रुवम् ॥ सर्वरोगविनाशाय सूर्यस्याभि

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मुखो जपेत् ॥ ९ ॥ अयुते द्वे जपे होमः कार्य्योऽर्कसमिधा शुभः ॥ औदुंबरैरन्नकामस्तेजस्कामस्तु खादिरैः ॥ १० ॥ अपामार्ग समिद्धोमाद्भूतबाधा विनश्यति ॥ ग्रहबाधाविनाशाय जपेदश्वत्थसन्निधौ ॥ ११ ॥ लवणान्वितदध्यक्तास्तीक्ष्णाग्राश्वत्थसंभवाः । हूयंते समिधः शुष्काः स्वाहांतं मंत्रमुच्चरेत् ॥ १२ ॥ दशपंचाहुतीर्हुत्वा गच्छगच्छेत्युदीरयेत् ॥ यावद्धोमो बलिर्देयः पुरुषाहार संमितः ॥ १३ ॥ एवं कृते प्रमुच्येत पुमान् स्त्री वा महाग्रहात् ॥ यं जेतुमिच्छेत्पुरुषस्तत्स्थानाभिमुखो जपेत् ॥ जुहुयाच्छतपत्राणि सदुष्टक्षयमाप्नुयात् ॥ १४ ॥ लाजाहोमेन कन्यार्थी कन्यामाप्नोति रूपिणीम् ॥ लाजाश्च मधुसंमिश्राः श्वेतपुष्पाणि वा पुनः ॥ १५ ॥ हूयंते हरिते देशे तस्य विश्ववशो भवेत् ॥ वामांगमुन्नतं कार्य्यं स्त्रीवशित्वे विचक्षणैः ॥ १६ ॥ हस्त्यश्वामात्यशांत्यर्थं तिलैश्चाज्येन संयुतैः ॥ होमस्थाने तु संस्थाप्य कुंभमेकं जलान्वितम् ॥ १७ ॥ मंत्रं जप्त्वाष्टसाहस्रं कुंभं स्पृश्य प्रयत्नतः ॥ अभिषेकं तु तेषां वै शालां प्रोक्ष्य प्रदक्षिणम् ॥ १८ ॥ ग्रहग्रामादिशांतिस्तु सर्वैः कार्या तु पूर्ववत् ॥ वास्तुपूजा प्रकर्तव्या प्राच्यां दिशि पदे शुभे ॥ १९ ॥ ईशानाय बलिः कार्यः पशूनां पतये तथा ॥ एवं कृते पशूनां तु प्रजानां शांतिमाप्नुयात् ॥ २० ॥ अद्भुतेषु च सर्वेषु निशायां ग्रामबाह्यतः ॥ उपविश्य जपेद्रुद्रं त्वरितं बलिभिः सह ॥ २१ ॥ होमः पलाशसमिधैः कर्तव्यो घृतसंयुतैः ॥ ईशानाय बलिः कार्य्यो यस्यां दिशि तदद्भुतम् ॥ २२ ॥ तदाशापतये चैव पशूनां पतये तथा ॥ वृष्टिकामो जपेल्लक्षं खिलैर्होमो घृतान्वितैः ॥ २३ ॥ बलिपूजा प्रकर्तव्या शिवस्य वरुणस्य च ॥ सर्वस्मिन्नपि चैवार्थे त्वरितस्य जपो भवेत् ॥ २४ ॥ अयुतद्वयजाप्यं तु यावल्लक्षं ततोधिकम् ॥ एवं कृते तु सिद्धिः स्यान्निष्कामः प्राप्नुयाच्छिवम् ॥ २५ ॥ ऐहि

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कामुष्मिकान् भोगान् भुक्त्वा सायुज्यमाप्नुयात् ॥ इति श्रीत्वरितरुद्रमंत्रपुरश्चरणं समाप्तम् ॥ अथ पार्थिवलिंगपूजन विधानम् (मंत्र महोदध्यादिषु) तत्रादौ प्रातर्नित्यकर्म्म समाप्य सुमुहूर्त्ते शिवालये पुण्यस्थाने वा गत्वा तत्र स्थानशुद्धिं संपाद्य स्वासने उदङ्मुख उपविश्य भस्मत्रिपुंड्ररुद्राक्षधारणं च कुर्यात् । ततः ॐ नमः शिवाय इत्यनेनाचम्य प्राणानायम्य गणपति स्मरणं कृत्वा देशकालौ संकीर्त्य अमुकगोत्रोऽमुकशर्मा मम श्रुतिस्मृतिपुराणोक्तफलावाप्तये अमुककामनासिद्ध्यर्थं श्रीभवानीशंकरप्रसन्नतार्थं पार्थिवलिंगपूजां करिष्ये अथवा अमुककामोऽमुकसंख्यया एतावंतं कालं पार्थिवलिंगानि स्वयं ब्राह्मणद्वारा वा पूजयिष्ये तदंगतया भूतशुद्धिं प्राणप्रतिष्ठां मातृकान्यासादिकर्म्म च करिष्ये ॥ इति संकल्प्य । पृथिवित्वयेति मंत्रस्य मेरुपृष्ठऋषिः । सुतलं छंदः । कूर्म्मोदेवता । आसनोपवेशने विनियोगः । "ॐ पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता ॥ त्वं च धारय मां देवि पवित्रं कुरु चासनम् ॥ १ ॥" इति भूमिं प्रार्थ्य । ॐ पृथिव्यै नमः ॥ ॐ आधारशक्तयै नमः ॥ ॐ विश्वशक्त्यै नमः ॥ ॐ चिच्छक्त्यै नमः । ॐ मायाशक्त्यै नमः ॥ इति गंधपुष्पैः पूजयेत् । ततो मूलेन शिखांबद्ध्वा आचम्य । स्वात्मदृष्ट्यावलोकनेन दिव्यान् विघ्नान् । अस्त्राय फट् । इत्यभिमंत्रितजलप्रक्षेपेणांतरिक्षस्थान् ॥ "ॐ अपसर्पंतु ये भूता ये भूता भूमिसंस्थिताः ॥ ये भूता विघ्नकर्तारस्ते नश्यंतु शिवाज्ञया॥१॥अपक्रामंतु भूतानि पिशाचाः सर्वतो दिशम् ॥ सर्वेषामविरोधेन ब्रह्मकर्म्म समारभे ॥२॥ इति मंत्राभ्यां वामपार्ष्णिघातत्रयेण भौमान्तरिक्षगान् विघ्नानुत्सारये । ततः ॐ सर्वभूतनिवारकाय शार्ङ्गाय सशरास्त्रराजाय सुदर्शनाय हुं फट् । इति छोटिकाभिस्तालत्रयेण च दिग्बंधं विधाय ॐ

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अस्त्राय फट् इति करशुद्धिं कृत्वा । ॐ गुरुभ्यो नमः ॐ परमगुरुभ्योनमः ॐ परात्परगुरुभ्यो नमः ॐ परमेष्ठिगुरुभ्योनमः ॥ ॐ आचार्यगुरवे नमः ॐ नमो महभ्यः इति नत्वा भूतशुद्धिं कुर्य्यात् । अथ भूतशुद्धिः ॥ हृदयस्थं प्रदीपकलिकाकारं जीवं ॐ हंसः सोहमिति मंत्रेण ब्रह्माण्डस्थितसहस्रदलपद्मान्तर्गतशिवेन संयोज्य । ॐ लँहाँ सद्योजाताय निवृत्तिकलात्मने हुं फट् इति पादादिजानुपर्य्यंतं न्यसेत् ॥ १ ॥ ॐ वँहाँ वामदेवाय प्रतिष्ठाकलात्मने हुं फट् इति जान्वादिनाभिपर्य्यंतं० ॥ २ ॥ ॐ रँ हूँ अघोराय विद्याकलात्मने हुं फट् इति नाभ्यादिहृदयांतं०॥३॥ॐ यँहैं तत्पुरुषाय शांतिकलात्मने हुं फट् इति हृदयादि भ्रूमध्यांतं० ॥ ४ ॥ ॐ हँ हौं ईशानाय शांत्यतीताय कलात्मने हुं फट् इति भ्रूमध्यादि ब्रह्मरंध्रांतं च विन्यसेत् । एवं भूतानि संचिंत्य जन्मांतरे दुःखप्रदं पापपुरुषमसद्वासनात्मकं वामकुक्षिस्थितं ॐ यँ इति वायुबीजं पूरके षोडशवारं जपित्वा विशोष्य ॐ रं इति वह्निबीजं कुंभके चतुःषष्टिवारं जप्त्वा तं दहेत् । ततः ॐ यँ इति वायुबीजं रेचके द्वात्रिंशद्वारं जप्तेन तद्भस्मशरीराद्बहिर्निष्कास्य पुनः वँ इति षोडशधा सुधाबीजजप्तेन तद्भस्मसंप्लाव्य लँ इति षोडशधा जप्तेन भूबीजेन घनीकृत्य कनकाण्डवत् विभाव्य नित्यशुद्धबुद्धमुक्तस्वभावं ब्रह्मैवाहमिति भावयेत् । ततः ॐ होंईशानाय नमः मूर्द्धि ॥ १ ॥ ॐ हें तत्पुरुषाय नमः मुखे ॥ २ ॥ ॐ हुं अघोराय नमः हृदि ॥ ३ ॥ ॐ हिं वामदेवाय नमः गुह्ये ॥ ४ ॥ ॐ हं सद्योजाताय नमः पादयोः ॥ ५ ॥ इति न्यसेत् । एवमुत्पन्ने देवात्मके देहे ब्रह्मांडस्थितपरमात्मनः सकाशाज्जीवं हंसः सोहमिति हृदयमानीय स्वप्राणप्रतिष्ठां कुर्य्यात् ॥ इति भूतशुद्धिः ॥ ॥ अस्य प्राणप्रतिष्ठामंत्रस्य ब्रह्मविष्णुरुद्रा ऋषयः ऋग्यजुःसामानि च्छंदांसि । प्राणशक्तिर्देवता । आँ बीज

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

म् । ह्रीं शक्तिः । क्रौंकीलकम् स्वशरीरप्राणप्रतिष्ठापने विनियोगः ॐ ब्रह्मविष्णुरुद्रऋषिभ्यो नमः शिरसि । ॐ ऋग्यजुःसामच्छंदो भ्यो नमः मुखे । ॐ प्राणशक्त्यै देवतायै नमः हृदये । ॐ आँ बीजाय नमः गुह्ये । ॐ ह्रीं शक्त्यै नमः पादयोः । ॐ क्रौं कीलकाय नमः सर्वाङ्गे ॥ इति ऋष्यादिन्यासः ॥ ॐ ह्रांआँअँकँखँगँघङँआँआकाशवायुतेजोजलपृथिव्यात्मने आँअङुष्टाभ्यां नमः ॥ ॐ ह्रींइँचँछँजँझँञँ ईंशब्दस्पर्शरूपरसगंधात्मने ईं तर्जनीभ्यां नमः ॥ ॐ ह्रूंऊँटँठँडँढँणँ ऊँ श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणात्मने ऊँ मध्यमाभ्यां नमः॥ॐ ह्रैंऐंतँथँदँधँनँऐंवाँक्पाणिपादपायूपस्थात्मने ऐं अनामिकाभ्यां नमः ॥ॐ ह्रौंओंपँफँबँभँमँऔं वचनादानगतिविसर्गानन्दात्मने औं कनिष्ठिकाभ्यां नमः ॥ ॐ ह्रः अँयँरँलँवँशँषँसँहँळँक्षँअंमनोबुद्ध्यहंकारचित्तज्ञानात्मने अः करतलकरपृष्ठाभ्यां नमः ॥ इति करन्यासः॥तत एवं हृदयादिन्यासं कुर्य्यात् ॥ ॐ ह्रांअँकँ० १९॥आँ हृदयाय नमः ॥१॥ ॐ ह्रीं इँचँ० १७ ईं शिरसे स्वाहा॥२॥ ॐ ह्रूंऊँटँ० १७ ॐ शिखायै वषट् ॥ ३ ॥ ॐ ह्रैंऐंतँ० १७ ऐं कवचायहुम् ॥ ४ ॥ ॐ ह्रौंओंपं० १९ औं नेत्रत्रयाय वौषट् ॥ ५ ॥ ॐ ह्रः अँयँ० २४ अं अस्त्राय फट् ॥६॥इति हृदयादिन्यासः ॥ अथ ध्यानम् । रक्तांभोधिस्थपोतोल्लसदरुणसरोजाधिरूढाकराब्जैः पाशं कोदण्डमिक्षूद्भवमणिगुणमप्यङ्कुशं पंचबाणान् ॥ बिभ्राणासृक्कपालं त्रिनयनलसिता पीनवक्षोरुहाढ्या देवी बालार्कवर्णा भवतु सुखकरी प्राणशक्तिः परा नः ॥ १ ॥ इति ध्यात्वा स्वहृदि करं निधाय ॐ आँह्रींक्रौंयँरँलँवँशँषँसँहौंहंसः मम प्राणा इह प्राणाः ॥ १ ॥ ॐ आँह्रींक्रौंयँरँ० मम जीव इह स्थितः ॥ २ ॥ ॐ आँह्रींक्रौंयं० मम सर्वेन्द्रियाणि वाङ्मनश्चक्षुःश्रोत्र

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

जिह्वाघ्राणप्राणा इहागत्य सुखं चिरं तिष्ठंतु स्वाहा ॥ ३ ॥ इति वारत्रयं पठित्वा पंचदशप्रणवावृत्तीः कृत्वा क्रमेण मम संस्कारा जाता इति भावयेत् । इति प्राणप्रतिष्ठां कृत्वा ततः पूर्वोक्तपद्धतिकांडोक्तमंतर्मातृकाबहिर्मातृकान्यासं च कृत्वा पंचाक्षरोदितं श्रीकंठादिकलान्यासं च कुर्य्यात् । एवं न्यासं कृत्वा सूर्य्यायार्घ्यं दत्त्वा । ॐ सर्वाधारधरे देवि त्वद्रूपां मृत्तिकामिमाम् ॥ ग्रहीष्यामि प्रसन्ना त्वं लिंगार्थं भव सुप्रभे ॥ १ ॥ इति भूमिं प्रार्थ्य ॐ ह्रां पृथिव्यै नमः । इति षडर्णेनाभिमंत्र्य । उद्धतासि वराहेण कृष्णेन शतबाहुना ॥ मृत्तिके त्वां च गृह्णामि प्रजया च धनेन च ॥ १ ॥ ॐ हराय नमः । इति शुचिस्थानात् (पाषाणवेणुकीटकेशास्थिवालुकादिदोषरहितामीशानकोणगताम्) मृदं शस्त्रेणोत्कीर्य सुस्निग्धां शुभ्रां मृदमादाय निःशर्करां कृत्वा प्रत्यहं पूजनाय संशुद्धे ताम्रादिपात्रे निदध्यात् ततस्तां दृष्ट्यावलोकनेन संशोध्य । ॐ (वँ) इति अमृतबीजेनाभिमंत्रितजलप्रक्षेपेण संपीड्य । तेन पिंडं कृत्वा तस्मात्पिंडादल्पां मृदमादाय ॐ ह्रीं ग्लौं गंगणपतये ग्लौं गं ह्रीं इत्येकादशा ११ क्षरमंत्रेण बालगणेश्वरं वरा भयलसत्पाणिपद्मं निर्माय ततः ॐ महेश्वराय नमः । इति मनोहरं लिंगमंगुष्ठादिदशांगुलांतं संघट्टनं विधाय एवमन्यान्यपि लिंगानि यथा संकल्पितानि कृत्वा अवशिष्टमृदा ॐ ऐं हुं क्षं क्लीं कुमाराय नमः । इति दशाक्षरमंत्रेण षण्मुखं कुमारं च कृत्वा पङ्क्तयन्ते स्थापयेत् तावत् पीठपूजा । पीठं जलेन प्रोक्ष्य तत्र पूर्वादिदिक्षु ॐ वामायै नमः ॥ १ ॥ ॐ ज्येष्ठायैनमः ॥ २ ॥ ॐ रौद्र्यै नमः ॥ ३ ॥ ॐ काल्यै नमः ॥४॥ॐ कलविकरिण्यै नमः ॥५॥ ॐ बलविकरिण्यै नमः ॥६॥ ॐ बलप्रमथिन्यै नमः॥७॥ ॐ सर्वभूतदमन्यै नमः ॥ ८ ॥ (मध्ये) मनोन्मन्यै नमः ॥ ९ ॥ इति पीठशक्तीः संपूज्य । ॐ नमो भगवते सकलगुणा

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

त्मशक्तियुक्तायानंताय योगपीठात्मने नमः । इति पुष्पांजलिना आसनं दत्त्वा तत्र स्वपुरतः ॐ शूलपाणये नमः इति पीठमध्ये संस्थापयेत् ततः आचम्य प्राणानायम्य ॐ अस्य श्रीसदाशिवमंत्रस्य वामदेव ऋषिः । पंक्तिश्छंदः श्रीसदाशिवो देवता । ॐ बीजम् नमः शक्तिः । शिवाय कीलकं मम सांबसदाशिवप्रीत्यर्थे पार्थिवलिंगपूजने विनियोगः । ॐ वामदेवऋषये नमः शिरसि ॥ १ ॥ ॐ पंक्तिच्छंदसे नमः मुखे ॥ २ ॥ ॐ श्रीसदाशिवदेवतायै नमः हृदये ॥ ३ ॥ ॐ बीजाय नमः गुह्ये ॐ ॥ ४ ॥ नमः शक्तये नमः पादयोः ॥ ५ ॥ ॐ शिवाय कीलकाय नमः सर्वांगे ॥६॥ इति ऋष्यादिन्यासः ॐ अंगुष्ठाभ्यां नमः ॥ १ ॥ ॐ नं तर्जनीभ्यां नमः ॥ २ ॥ ॐ मं मध्यमाभ्यां नमः ॥ ३ ॥ ॐ शिं अनामिकाभ्यां नमः ॥ ४ ॥ ॐ वां कनिष्ठिकाभ्यां नमः ॥ ५ ॥ ॐ यं करतलकरपृष्ठाभ्यां नमः ॥ ६ ॥ इति करन्यासः ॥ एवं हृदयादिषडङ्गन्यासं कुर्यात् ॐ नं तत्पुरुषाय नमो हृदये ॥ १ ॥ ॐ मं अघोराय नमः पादयोः ॥ २ ॥ ॐ शिं सद्योजाताय नमो गुह्ये ॥ ३ ॥ ॐ वां वामदेवाय नमो मूर्ध्नि ॥ ४ ॥ ॐ यं ईशानाय नमो मुखे ॥ ५ ॥ एवं न्यासविधिं कृत्वा ध्यायेत् । अथ ध्यानम् ॐध्याये नित्यं महेशं रजतगिरिनिभं चारु चंद्रावतंसं रत्नाकल्पोज्वलांगं परशुमृगवराभीतिहस्तं प्रसन्नम् ॥ पद्मासीनं समंता त्स्तुतममरगणैर्व्याघ्रकृत्तिं वसानं विश्वाद्यं विश्ववंद्यं निखिलभयहरं पंचवक्त्रं त्रिनेत्रम् ॥ १ ॥ इति ध्यात्वा मानसोपचारैः संपूज्य प्राणप्रतिष्ठां कुर्यात् अस्य श्रीप्राणप्रतिष्ठामंत्रस्य ब्रह्मविष्णुमहेश्वरा ऋषयः ऋग्यजुःसामानिच्छंदांसि क्रियामयवपुःप्राणाख्या देवता । आं बीजम् । ह्रीं शक्तिः । क्रौं कीलकं देवे प्राणप्रतिष्ठापने विनियोगः ॐ ब्रह्मविष्णुरुद्रऋषिभ्यो नमः शिरसि ॥ १ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ऋग्यजुःसामच्छंदोभ्यो नमो मुखे ॥ २ ॥ प्राणाख्यदेवतायै नमः हृदि ॥ ३ ॥ ॐ आं बीजाय नमो गुह्ये ॥ ४ ॥ ॐ ह्रीं शक्तये नमः पादयोः ॥ ५ ॥ ॐ क्रौं कीलकाय नमः सर्वाङ्गे इति कृत्वा । ॐ आँह्रीक्रौंयँरँलँवँशँषँसँहँसः सोहं शिवस्य प्राणा इह प्राणाः ॥ १ ॥ ॐ आँ ह्रीक्रौंयँरँलँवँशँषँसँहँसः सोहं शिवस्य जीव इह स्थितः ॥ २ ॥ ॐ आँह्रीक्रौंयँरँलँवँशँषँसँहँसः सोहँ शिवस्य सर्वेंद्रियाणि वाङ्मनस्त्वक्चक्षुश्श्रोत्रघ्राणजिह्वापाणिपादपायूपस्थानि इहागत्य सुखं चिरं तिष्ठंतु स्वाहा ॥ ३ ॥ एवं प्राणप्रतिष्ठां कृत्वा ध्यायेत्—बिभ्रद्दोर्भिः कुठारं मृगमभयवरौ सुप्रसन्नो महेशः सर्वालंकारदीप्तः सरसिजनिलयो व्याघ्रचर्म्मोत्तवासाः ॥ ध्येयो मुक्तांगरागामृतरसकणिकाद्रिप्रभः पंचवक्त्रस्त्र्यक्षः कोटीरकोट्युच्चटितहिमरुचिः सर्वदा चन्द्रमौलिः ॥ इति ध्यात्वा नमस्कारं कुर्यात् । तद्यथा नमोस्तु स्थाणुरूपाय ज्योतिर्लिंगामृतात्मने ॥ चतुर्मूर्तेश्च पुंछायाभासितांगाय शंभवे ॥ १ ॥ सर्वज्ञज्ञान विज्ञानप्रदानैकमहात्मने ॥ नमस्ते देवदेवेश सर्वभूतहितेरत ॥ २ ॥ अनंतकांतिसंपन्न अनंतासनसंस्थित ॥ अनंतकांतिसंभोगपरकांत नमोस्तु ते ॥ ३ ॥ वज्ररूप महारूप सर्वरूपोत्तमोत्तम ॥ पशुपाशार्णवासीन दृढव्रत नमोस्तुते ॥ ४ ॥ स्वभावनिर्मलाकार सर्वोपाधिविनाशन ॥ योगियोगिन्महायोग योगीश्वर नमोस्तु ते ॥ ५ ॥ इति नत्वा स्थापितं लिंगं स्पृशन् ॐ भूः पुरुषं साम्बसदाशिवमावाहयामि ॥ १ ॥ ॐ भुवः पुरुषं सांबसदाशिवमावाहयामि ॥ २ ॥ ॐ स्वः पुरुषं सांबसदाशिवमावाहयामि ॥ ३ ॥ इत्यावाह्य । ॐ स्वामिन्सर्वजगन्नाथ यावत्पूजावसानकम् ॥ तावत्त्वं प्रीतिभावेन लिंगेस्मिन्सन्निधो भव ॥ १ ॥ इति पुष्पांजलिंदत्त्वा ॐ ह्रीं ग्लौं गं गणपतये ग्लौं गं ह्रीं ॥ ११ ॥ इत्येकादशार्णमंत्रेण गणपतिं संपूज्य

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ॐ ऐँ हुँ क्ष्रौं क्ष्रीँ कुमाराय नमः ॥ १० ॥ इति दशाक्षरमंत्रेण स्कंदं पूजयेत् ॥ ३ ॥ अथ शिवपूजनम् ॥ तत्रादौ ध्यानम् दक्षां कस्थं गणयतिमुखं प्रामृशन्दक्षदोष्णा वामोरुस्थां नगपतनयांके गुहं चापरेण ॥ इष्टाभीती परकरयुगे धारयन्निंदुकांतिरव्याद स्मांस्त्रिभुवननतो नीलकंठस्त्रिनेत्रः ॥ १ ॥ एवं ध्यात्वा ॐ नमोस्तुनीलग्रीवायसहस्राक्षायमीढुषेंअथोयेऽअस्यसत्वानोहंतेभ्योंक रन्नमः÷ ॥ १ ॥ श्रीसांबसदाशिवाय नमः पाद्यंसमर्पयामि इति पाद्यं दद्यात् ॥ १ ॥ ॐ गायत्रीत्रिष्टुब्जगत्यनुष्टुप्पंक्त्यासह ॥ बृहत्युष्णिहाकुकुप्सूचीभिः÷शम्यन्तु त्वा ॥ ॐ सांबसदाशिवायनमः । अर्घ्यं समर्पयामि इत्यर्घ्यम् ॥ २ ॥ ॐ त्र्यंबकंयजा महेसुगंधिम्पुष्टिवर्धनम् ॥ उर्व्वारुकमिंववंधनान्मृत्योर्मुक्षीयमामृतात् ॥ ॐ सांबसदाशिवाय नमः आचमनं स० इत्याचमनम् ॥ ३ ॥ ॐ मधुवाताऋतायते० इति मधुपर्कम् ॥४॥ ॐ सांबसदाशिवाय नमः इत्याचमनीयम् ॥५॥ ॐ व्वरुणस्योत्तंभनमसि व्वरुणस्यस्कंभसर्ज्जनीस्थोव्वरुणस्यऋतसदन्यसिव्वरुणस्यऽऋतसदनमसिव्वरुणस्यऋतसदनमासीद ॥ ६ ॥ ॐ सांबसदाशिवाय नमः जलस्नानं स० इति जलस्नानम्॥६॥ॐ पर्य÷पृथिव्यांपयऽओषधीषुपयोदिव्यंतरिक्षेपयोधाःपयस्वतीः ॥प्रदिशः÷संतुमह्यम् ॥ ॐ सांबसदाशिवाय नमः पयः स्नानं स० । इति पयःस्नानम् ॥ ७ ॥ ॐ दधिक्राव्णोऽअकारिषंजिष्णोरश्वस्यव्वाजिनः ॥ सुरभिनोमुखाकरत्प्राणुआयूंषि तारिषत् ॥ ॐ सांबसदाशिवाय नमः।दधिस्नानं स०। इति दधिस्नानं पुनर्जलस्नानम्॥८॥ॐ घृतं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

घृ॑तपावानꣳपिव त॒व्वसां॑व्वसापावानꣳपिवतां॒तरि॑क्षस्य॒हविर॑सि॒स्वाहा॑दिश॑ः प्र॒दिशऽआ॒दिशो॑व्वि॒दिश॑ऽउ॒द्दिशो॑दि॒ग्भ्यꣳस्वाहा ॐ सांब
सदाशिवाय नमः घृतस्नानं समर्पयामि । इति घृतस्नानपुनर्जलस्नानम्॥९॥ॐ मधु॒ब्वाता॑ऽऋता॒यतेम॑धुक्षरंति॒सिंधवꣳमाध्वी॑र्न्नꣳसं॒त्वोष॑
धीꣳम॒धुनक्त॑मु॒तोषसो॒मधु॑म॒त्पार्थि॑व॒ꣳरज॑ः मधु॒द्यौरस्तुनꣳपि॒तामधु॑मान्नो॒व्व॒न॑स्पति॒र्म्मधु॑माँऽ२अस्तु॒सूर्य॑ः माध्वी॒र्गावो॑भवंतुनꣳ ॥ ॐ
सांबसदाशिवाय नमः मधुस्नानं स० । इति मधुस्नानं पुनर्जलस्नानम् ॥ १० ॥ ॐ अपा॒ꣳरसमुद्व॑यस॒ꣳसूर्य्ये॒सन्तꣳसमा॒
हि॑तम् ॥आ॒ꣳरस॑स्य॒योरसस्तंवो॑गृह्णाम्युत्तममु॑पया॒मगृहीतो॒सीन्द्रायत्वा॒जुष्टंगृह्णाम्येषते॒योनि॒रिन्द्रा॑यत्वा॒जुष्ट॑तमम् ॥ ॐ सांबसदा
शिवायनमः शर्करोदकस्नानं स० । इति शर्करोदकस्नानं पुनर्जलस्नानम् ॥ ११ ॥ ॐ पंच॑नद्यः॒ꣳसर॑स्वती॒मपि॑यन्ति॒सस्रो॑
तसꣳ॥ सर॑स्वती॒तुपंच॒धासोदे॒शेभ॑वत्सरित् ॥ ॐ सांबसदाशिवाय नमः पंचामृतस्नानं स० इति पंचामृतस्नानम् ॥ १२ ॥
ॐशुद्धवा॑लꣳस॒र्व्वशुद्ध॑वालोमणि॒वाल॒स्तऽआ॑श्वि॒नाः श्येत॑ः श्येता॒क्षोरुणस्तेरुद्राय॑पशु॒पतयेकर्णाषा॒माऽअ॑वलि॒प्तारौ॒द्रानभो॑रूपाꣳपार्ज्ज॒
न्याꣳ॥ ॐ सांबसदाशिवाय नमः शुद्धोदकस्नानं स० । इति शुद्धोदकस्नानम् ॥ १३ ॥ ततः स्नानांते ॐनमो॑रुद्र०
इति षोडशभिर्ऋग्भिꣳअभिषेकं कुर्यात् । ततः ॐ प्रमु॑ञ्च॒धन्व॑न॒स्त्वमु॒भयो॒रात्न्यो॒र्ज्याम् ॥ याश्व॑ते॒हस्त॒ऽइष॑वꣳपरा॒ताभ॑गवो
व्वप ॥ ॐ सांबसदाशिवायनमः वस्त्रं कौपीनं स० । इति वस्त्रकौपीनम् ॥ १४ ॥ ॐ विज्यं॒धनुः॒क॒र्पिदनो॒व्विश॑ल्यो॒

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वाणंवाऱ्उत ॥ अनेशन्नस्युवाऽइषंवआभुर्रस्यानिषंगाधिः ॥ सांबसदाशिवाय नमः आभरणंस० इत्याभरणम् ॥ १५ ॥ ॐ ब्रह्मजज्ञानंप्रथमंपुरस्ताद्विसीमतःसुरुचोव्वेनऽआवःसबुध्न्या उपमाऽअस्यव्विष्ठाःसतश्चयोनिमसतश्चव्विवः÷ ॥ ॐ सांबसदाशिवाय नमः यज्ञोपवीतं समर्पयामि इति यज्ञोपवीतम् ॥ १६ ॥ आचमनं च दद्यात् ॥ ॐ नमःश्वभ्यःश्वपतिभ्यश्चवोनमोनमोभवायच रुद्रायचनम÷शर्वायचपशुपतयेचनमोनीलग्रीवायचशितिकंठायचनम÷कपर्द्दिने ॥ ॐ सांबसदाशिवाय नमः गंधं स० । इति गंधम् ॥ १७ ॥ नमः शंभवायचमयोभवायचनम÷शंकरायचमयस्करायचनमः÷शिवायचशिवतरायच ॥ ॐ सांबसदाशिवाय नमः अक्षतान् स० । इत्यक्षताः ॥१८॥ नमःपार्य्यायचावार्य्यायचनमः÷प्रतरणायचोत्तरणायचनमस्तीर्थ्यायचकूल्यायचनमः शष्प्यायचफेन्यायचनमः÷ ॥ ॐ सांबसदाशिवाय नमः पुष्पं समर्पयामि। इति पुष्पाणि॥१९॥ॐ ॐनमोविल्मिनेचकवचिनेचनमो वर्म्मिणेचवरूथिनेचनमः÷ ॥ श्रुतायचश्रुतसेनायचनमोदुंदुभ्यायचाहनन्यायचनमोधृष्णवे ॥ ॐ साम्बसदाशिवाय नमः विल्वपत्रं स०। इति विल्वपत्राणि ॥२०॥ ॐ काण्डात्काण्डात्प्ररोहन्तीपरुषःपरुषस्परि ॥ एवानोदूर्वेप्रतनुसहस्रेणशतेन च ॥ ॐ सांबसदा शिवाय नमः दूर्वां स० । इति दूर्वाम् ॥ २१ ॥ एंव पुष्पांतपूजां कृत्वा आवरणार्चनं कुर्यात् ॥ तद्यथा । ॐ अघोराय नमः ॥ १ ॥ ॐ पशुपतये नमः॥२॥ॐ शिवाय नमः ॥३॥ ॐ विरूपाय नमः ॥ ४ ॥ ॐ विश्वरूपाय नमः ॥ ५ ॥ ॐ भैरवाय नमः ॥ ६ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ॐ त्र्यंबकाय नमः ॥ ७ ॥ ॐ शूलपाणये नमः ॥ ८ ॥ ॐ कपार्दिने नमः ॥ ९ ॥ ॐ ईशानाय नमः ॥ १० ॥ ॐ महेशाय नमः ॥ ११ ॥ इत्येकादश रुद्रान् संपूज्य ततः ॐ भगवत्यै नमः॥१॥ॐ उमादेव्यै नमः॥२॥ॐ शंकरप्रियायै नमः॥३॥ॐ पार्वत्यै नमः ॥ ४ ॥ ॐ गौर्यै नमः ॥ ५ ॥ ॐ कालिंद्यै नमः ॥ ६ ॥ ॐ काटिव्यै नमः ॥७॥ ॐ विश्वधारिण्यै नमः ॥ ८ ॥ ॐ विश्वेश्वर्यै नमः ॥ ९ ॥ ॐ विश्वमात्रे नमः ॥ १० ॥ ॐ शिवायै नमः ॥ ११ ॥ इति शक्तीः पूजयेत् । एवं सगणं रुद्रं संपूज्य वेद्यामष्टमूर्तीः अक्षतादिना पूजयेत् । तद्यथा । प्राच्याम् ॐ शर्वाय क्षितिमूर्तये नमः॥ १ ॥ईशान्याम् ॐ भवाय जलमूर्तये नमः॥ २ ॥ उदीच्याम् रुद्रायाग्निमूर्तये नमः ॥ ३ ॥ वायव्याम् ॐ उग्राय वायुमूर्तये नमः ॥ ४ ॥ प्रतीच्याम् ॐ भीमायाकाशमूर्तये नमः ॥ ५ ॥ ॐ नैर्ऋत्याम् ॐ पशुपतये यजमानमूर्तये नमः॥ ६ ॥ दक्षिणस्याम् ॐ महादेवाय सोममूर्तये नमः॥ ७ ॥ आग्नेय्याम् ॐ ईशानाय सूर्यमूर्तये नमः ॥ ८ ॥ इति संपूज्य प्रणालिकायां ह्रीं उमायै नमः इति पूजयेत् । तद्बहिः पूर्वादिषु इंद्रादिदशदिक्पालान् संपूजयेत् ॥ इत्यावरणपूजा ॥ ततः ॐ नमः÷ कपर्दिने चुव्युतकेशायचुनमः÷सहस्राक्षायचशुतधन्वनेचुनमोगिरिशुयायं चाशिपिविष्टायंचुनमोमीढुष्टमायुचेषुमतेचुनमोह्रस्वायं ॥ ॐ सांगाय सांबसदाशिवाय नमः धूपं स० इति धूपम् ॥ २२ ॥ ॐ नमऽआशवेचाजिरायचनमः शीघ्र्यायचशीभ्यायचनमऽऊर्म्याय चावस्वन्याचनमोनादेयायचद्वीप्यायच ॥ ॐ सांगाय सांबसदाशिवाय नमः दीपं स० इति दीपम् ॥ २३ ॥ ॐ नमोज्येष्ठायचुकनिष्ठायंचुनमः÷पूर्वजायंचापरजायंचुनमोमध्यमायंचापग लभायंचुनमोजघन्यायचबुध्न्यायचुनमःसोभ्यायं ॥ ॐ सांगाय सांबसदाशिवाय नमः नैवेद्यं समर्पयामि। इति नैवेद्यम् ॥ २४ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ॐ त्र्यंबकं यजामहेसुगंधिम्पुंष्टिवर्द्धनम् ॥ उर्वारुकमिवबंधनान्मृत्योर्मुक्षीयमामृतात् ॥ ॐ सांगाय सांबसदाशिवाय नमः आचमनीयं समर्पयामि ॥ इत्याचमनम् ॥ २५ ॥ ॐ इमारुद्रायतवसेकपर्दिनेक्षयद्वीरायप्रभरामहेमतीः ॥ यथाशमसद्द्विपदेचतुष्पदेविश्वम्पुष्टंग्रामेऽअस्मिन्ननातुरम् ॥ ॐ सांगाय सांबसदाशिवाय तांबूलं स० । इति तांबूलम् ॥२६॥ ॐ श्रीश्चते लक्ष्मीश्च० ॐ सांगाय सांबसदाशिवाय नमः ऋतुफलं स० । इति ऋतुफलम् ॥ २७ ॥ ॐ हिरण्यगर्भःसमवर्तताग्रेभूतस्यजातःपतिरेकोऽआसीत् ॥ सदाधारपृथिवींद्यामुतेमांकस्मै देवाय हविषाविधेम ॥ ॐ सांगाय सांबसदाशिवाय नमः दक्षिणां समर्पयामि ॥ इति दक्षिणा ॥२८॥एवं संपूज्य साक्षतजलेन तर्पणं कार्य्यम् ॥ ॐ भवं देवं तर्पयामि ॥ १ ॥ ॐ शर्वं देवं तर्पयामि ॥ २ ॥ ॐ ईशानं देवं तर्पयामि ॥३॥ ॐ पशुपतिं देवं तर्पयामि ॥ ४ ॥ ॐ उग्रं देवं तर्पयामि ॥ ५ ॥ ॐ रुद्रं देवं तर्पयामि ॥ ६ ॥ ॐ भीमं देवं तर्पयामि ॥ ७ ॥ ॐ महांतं देवं तर्पयामि ॥ ८ ॥ ॐ भवस्य देवस्य पत्नीं तर्पयामि ॥ १ ॥ ॐ शर्वस्य देवस्य पत्नीं तर्पयामि ॥ २ ॥ ॐ ईशानस्य देवस्य पत्नीं तर्पयामि ॥ ३ ॥ ॐ पशुपतेर्देवस्य पत्नीं तर्पयामि ॥ ४ ॥ ॐ उग्रस्य देवस्य पत्नीं तर्पयामि ॥ ५ ॥ ॐ रुद्रस्य देवस्य पत्नीं तर्पयामि ॥ ६ ॥ ॐ भीमस्यदेवस्य पत्नीं तर्पयामि ॥ ७ ॥ ॐ महतो देवस्य पत्नीं तर्पयामि ॥ ८ ॥ एवं तर्पणं कृत्वा कर्पूरगर्भिताभिरेकादशवार्तिकाभिः कर्पूरेण वा आरार्तिकं कुर्य्यात् ॥ तत्र नीराजनम्—ॐ कर्पूरगौरं करुणावतारं संसारसारं भुजगेन्द्रहारम् ॥ सदा वसंतं हृदयारविंदे भवं भवानीसहितं नमामि ॥ १ ॥ वंदे देवमुमापतिं सुरगुरुं वंदे जगत्कारणं वंदे पन्नगभू

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

षणं मृगधरं वंदे पशूनां पतिम् ॥ वंदे सूर्यशशांकवह्निनयनं वंदे मुकुंदप्रियं वंदे भक्तजनाश्रयं च वरदं वंदे शिवं शंकरम् ॥ २ ॥ शांतं पद्मासनस्थं शशधरमुकुटं पंचवक्त्रं त्रिनेत्रं शूलं वज्रं च खड्गं परशुमभयदं दक्षभागे वहंतम्॥नागं पाशं च घंटां डमरुकसहितं सांकुशं वामभागे नानालंकारयुक्तं स्फटिकमणिनिभं पार्वतीशं नमामि॥३॥अथ शिवनीराजनम् ॥ जय गंगाधर हर जय गिरिजाधीशा ॥ त्वं मां पालय नित्यं कृपया जगदीशा । हर हर हर महादेव ॥१॥ कैलासे गिरिशिखरे कल्पद्रुमविपिने गुञ्जति मधुकरपुंजे कुंजवने सुघने ॥ कोकिलकुंजतखेलतहंसावनललिता । रचयति कलाकलापं नृत्यति मुदसहिता। हर हर हर महादेव ॥२॥ तस्मिन् ललितसुदेशे शाला मणिरचिता । तन्मध्ये हरनिकटे गौरी मुदसहिता ॥ क्रीडा रचयति भूषारंजितनिजमीशम् । इंद्रादिकसुरसेवित नामयते शीशम् ॥ हर हर हर महादेव॥३॥विबुधवधू बहु नृत्यति हृदये मुदसहिता। किन्नर गायन कुरुते सप्तस्वरसहिता ॥ धिनकत थैथै धिनकत मृदङ्ग वादयते। क्वणक्वण ललिता वेणुं मधुरं नादयते।हर हर हर महादेव ॥४॥रुणरुण चरणे रचयति नूपुरमुज्वलिता। चक्रावर्तं भ्रमयति कुरुते तां धिकताम् ॥ तांतांलुपचुपतांतांवादयते । अङ्गुष्ठाङ्गुलिनादं लासक्तां कुरुते ॥ हर हर हर महादेव ॥५॥ कर्पूरद्युतिगौरं पंचाननसहितम् । त्रिनयनशशिधरमौलिं विषधरकंठयुतम् । सुंदरजटाकलापं पावकयुतभालम् । डमरुत्रिशूलपिनाकं करधृतनृकपालम् ॥ हर हर हर महादेव ॥ ६ ॥ मुण्डै रचयति माला पन्नगमुपवीतम् । वामविभागे गिरिजारूपं अति ललितम् । सुंदरसकलशरीरे कृतभस्माभरणम् । इति वृषभध्वजरूपं तापत्रयहरणम् । हर हर हर महादेव ॥ ७ ॥ शंखनिनादं कृत्वा झल्लरि नादयते नीराजयते ब्रह्मा वेदऋचां पठते । अतिमृदुचरणसरोजं हृदिकमले धृत्वा । अवलोकयति महेशं ईशं अभिनत्वा ॥ हर

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

हर हर महादेव ॥ ८ ॥ ध्यानं आरतिसमये हृदये अति कृत्वा ॥ रामस्त्रिजटानाथं ईशं अभिनत्वा ॥ सङ्क्षितमेवं प्रतिदिनपठनं यः कुरुते । शिवसायुज्यं गच्छति भक्त्या यः शृणुते ॥ हर हर हर महादेव ॥ ९ ॥ इति नीराजनम् ॥ प्रदक्षिणा ॐ येतीर्थानिप्रचरंतिसृकाहस्तानिषङ्गिणः÷ । तेषाꣳसहस्रयोजनेवधन्वानि तन्मसि ॥ १ ॥ यानि कानि च पापानि जन्मांतरकृतानि च ॥ तानि सर्वाणि नश्यंतु प्रदक्षिणपदे पदे ॥ ॐ सांबसदाशिवाय नमः प्रदक्षिणं समर्पयामीति प्रदक्षिणत्रयं कुर्यात् (शिवरहस्ये) प्रदक्षिणत्रयं कुर्य्यात्तथा पंच दशाथवा ॥ प्रदक्षिणत्रयान्यूनं नैव कार्य्यं महेश्वरे ॥ १ ॥ पूजां कृत्वा तु यः शंभोर्न करोति प्रदक्षिणम् ॥ सा पूजा निष्फला ज्ञेया पूजकः स च दांभिकः ॥ २ ॥ भक्त्या करोति यः सम्यक् केवलं तु प्रदक्षिणम् ॥ पूजा सर्वा कृता तेन स सम्यक् शिवपूजकः ॥ ३ ॥ अथ पुष्पांजलिमंत्राः ॥ ॐ यज्ञेनयज्ञमयजन्तदेवास्तानिधर्म्माणिप्रथमान्यासन् ॥ तेहनाकंम्महिमानः÷सचन्तयत्रपूर्व्वेसाध्याःसन्तिदेवाः÷ ॥ १ ॥ ॐ सांगाय सांबसदाशिवाय नमः मंत्रपुष्पाञ्जलिं समर्पयामि । इति पुष्पांजलिं दत्वा । "ॐ प्रपन्नं पाहि मामीश भीतं मृत्युग्रहार्णवात् । इति साष्टांगं प्रणामं कुर्य्यात् । ततो यथाशक्ति पंचाक्षरमंत्रं जपित्वा । गुह्यातिगुह्य० इति मंत्रेण जपं समर्प्य । क्षमापराधमहिमप्रभृतिपुराणैः प्राकृतैश्च स्तवैः स्तुत्वा देवं प्रार्थयेत् ॥ ॐ अंगहीनं क्रियाहीनं विधिहीनं महेश्वर ॥ पूजितोसि मया देव तत् क्षमस्व भ्रमात्कृतम् ॥ १ ॥ यद्यप्युपहृतैः पुष्पैरपास्तैर्भावदूषितैः ॥ केशकीटापविद्धैश्च पूजितोसि मया प्रभो ॥ २ ॥ अन्यत्रासक्तचित्तेन क्रियाहीनेन वा प्रभो ॥ मनोवाक्कायदुष्टेन पूजितोसि त्रिलोचन ॥ ३ ॥ यच्चो

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पहतपात्रेण कृतमर्घ्यादिकं मया ॥ तामसेन च भावेन तत्क्षमस्व मम प्रभो ॥ ४ ॥ मंत्रेणाक्षरहीनेन पुष्पेण विफलेन च ॥ पूजितो सि महादेव तत्सर्वं क्षम्यतां मम ॥ ५ ॥ व्रतं संपूर्णतां यातु फलं चाक्षयमश्नुते ॥ अज्ञानयोगादुपचारकर्म यत्पूर्वमस्माभिरनुष्ठितं ते ॥ तदेव सोद्वासनकं दयालो पितेव पुत्रान्प्रतनो जुषस्व ॥ ६ ॥ अयं दानकालस्त्वहं दानपात्रं भवानेव दाता त्वदन्यं न याचे ॥ भवद्भक्तिमंतः स्थिरां देहि मह्यं कृपाशील शंभो कृतार्थोस्मि यस्मात् ॥७॥ ॐ नमओंकाररूपाय नमोक्षरवपुर्धृते ॥ नमो नादात्मने तुभ्यं नमो बिंदुकलात्मने ॥ ८ ॥ अलिंगलिंगरूपाय रूपातीताय ते नमः ॥ त्वं माता सर्वलोकानां त्वमेव जगतः पिता ॥ ९ ॥ त्वं भ्राता त्वं सुहृन्मित्रं त्वं प्रियः प्रियरूपधृक् ॥ त्वं गुरुस्त्वं गतिः साक्षात्त्वं पिता त्वं पितामहः ॥ १० ॥ नमस्ते भगवन् रुद्र भास्करामिततेजसे ॥ नमो भवाय रुद्राय रसायांबुमयाय च ॥ ११ ॥ शर्वाय क्षितिरूपाय सदासुरभिणे नमः ॥ पशूनां पतये तुभ्यं पावकामिततेजसे ॥ १२ ॥ भीमाय व्योमरूपाय शब्दमात्राय ते नमः ॥ महादेवाय सोमाय अमृताय नमोस्तु ते ॥ १३ ॥ उग्राय यजमानाय नमस्ते कर्मयोगिने ॥ पार्थिवस्य च लिंगस्य यन्मया पूजनं कृतम् ॥ १४ ॥ तेन मे भगवान् रुद्रो वांछितार्थं प्रयच्छतु ॥ इति प्रार्थ्य ॥ अर्घ्योदकमादाय ॐ इतः पूर्वं प्राणबुद्धिदेहधर्माधिकारतो जाग्रत्स्वप्नसुषुप्त्यवस्थासु मनसा वाचा कर्म्मणा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना यत्कृतं यदुक्तं तत्सर्वं ब्रह्मार्पणं भवतु इति पठित्वा देवस्य चरणयोः क्षिपेत् ॥ ततः ॥ ॐ साधु वाऽसाधु वा कर्म्म यद्यदाचरितं मया ॥ तत्सर्वं कृपया देव गृहाणाराधनं मम ॥ १ ॥ इत्यर्घजलं किंचिद्देवोपरि निक्षिप्य । पुष्पांजलिमादाय "ॐ रश्मिरूपा महादेवा अत्र पूजितदेवताः ॥ सदा

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

शिवांगलीनास्ताः संतु सर्वाः सुखावहाः" ॥ १ ॥ इति देवोपरि निक्षिप्य। तेजोरूपं ध्यात्वा। ॐ गच्छगच्छ परं स्थानं स्वस्थानं परमेश्वर ॥ यत्र ब्रह्मादयो देवा न विदुः परमं पदम् ॥ १ ॥ ॐ नमो महादेवाय इति पठित्वा संहारमुद्रया विसृजेत् ॥ ततो गणपतिस्कंदौ विसृज्य ईशान्यां जलेन मंडलं कृत्वा ॐ व्यापकमंडलाय नमः । इति संपूज्य। ॐ चंडेश्वराय नमः इति निर्माल्यनैवेद्यादिकं संस्थाप्य ध्यायेत्। चंडेश्वरं रक्ततनुं त्रिनेत्रं रक्तांशुकाढ्यं हृदि भावयामि ॥ टंकं त्रिशूलं स्फटिकाक्षमालांकमंडलुं बिभ्रतमिंदुचूडम् ॥ इति ध्यात्वा। ॐ चंडेश्वराय नमः। इति निर्माल्येन संपूज्य ॐ घ्रूं फट् चंडेश्वर इमं बलिं गृह्ण स्वाहा इति तत्त्वमुद्रया चरणोदकधारादानेन समर्प्य ॐ बलिदानेन संतुष्टश्चंडेशः सर्वसिद्धिदः ॥ शांतिं करोतु मे नित्यं शिवभक्तिं ददातु च ॥ १ ॥ लेह्यचोष्यान्नपानादि तांबूलं स्रग्विलेपनम् ॥ निर्माल्यभोजनं तुभ्यं ददामि श्रीशिवाज्ञया ॥ २ ॥ इति निर्माल्यपुष्पांजलिं समर्प्य नाराचमुद्रां प्रदर्श्य गच्छगच्छेति विसृजेत् । " ॐ बाणरावणचंडीशनंदिभृंगिरिटचादयः ॥ शंकरस्य प्रसादोयं सर्वे गृह्णंतु शांभवाः ॥ १ ॥ निर्माल्यसलिलं पीत्वा देवदेवस्य शूलिनः ॥ क्षयापस्मारकुष्ठाद्यैस्सद्यो मुच्येत पातकैः ॥ २ ॥ अकालमृत्युहरं पुण्यं ब्रह्महत्याविनाशनम् ॥ व्याधिघ्नं भक्तकायस्य शिवनिर्णेजनोदकम् ॥ ३ ॥ इति निर्माल्यजलं पीत्वा प्रणमेत्। पुनर्निर्माल्यपुष्पादिकं लिंगं च नद्यादौ जलमध्ये क्षिपेत् ॥ अथ पार्थिवपूजनमहिमा (मंत्रमहोदधौ) "यो लिंगं पूजयेन्नित्यं शिवभक्तिपरायणः ॥ मेरुतुल्योपि तस्याशु पापराशिर्लयं व्रजेत् ॥ १ ॥ दोग्ध्रीणां तु गवां लक्षं यो दद्याद्वेदपाठिने ॥ पार्थिवं योर्चयेल्लिंगं तयोर्लिंगार्चको वरः ॥ २ ॥ चतुर्दश्यां तथाष्टम्यां पौर्णमास्यां विधुक्षये ॥ पयसा स्नाप

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

येल्लिंगं धरादानफलं व्रजेत् ॥ ३ ॥ लिंगपूजां विधायाग्रे स्तोत्रं वा शतरुद्रियम् ॥ प्रजपेत्तन्मना भूत्वा शिवलोके महीयते ॥ ४ ॥ यत्संख्याकं यजेल्लिंगं तन्मितं होममाचरेत् ॥ आज्यान्वितैस्तिलैरग्नौ घृतैर्वा पायसेन वा ॥ ५ ॥ शिवमंत्रेण तस्यांते ब्राह्मणान्भोजयेच्छतम् ॥ एवं कृते समस्तेष्टसिद्धिर्भवति निश्चितम्" ॥ ६ ॥ अथ कामनाभेदेन संख्याभेदः (शांतिसारे "दैशिकात्सकलं ज्ञात्वा कुर्य्याल्लिंगं फलप्रदम् ॥ विद्यार्थी लिंगसाहस्रं धनार्थी च तदर्द्धकम् ॥ १ ॥ पुत्रार्थी सप्तसाहस्रं कन्यार्थी तु शतत्रयम् ॥ वंध्यालिंगायुतं कुर्यात्सर्वपापहरं शुभम् ॥ २ ॥ राज्यार्थी शतसाहस्रं कांतार्थी शतपंचकम् ॥ मोक्षार्थी कोटिगुणितं भूकामश्च सहस्रकम् ॥ ३ ॥ रूपार्थी तु त्रिसाहस्रं तीर्थार्थी द्विसहस्रकम् ॥ सुहृत्कामः सहस्रं स्याद्वस्त्रार्थी शतमष्टकम् ॥४ ॥ मारणार्थी सप्त शतं मोहनार्थी शतांष्टकम् ॥ उच्चाटनपरश्चैव सहस्रं तु यथोक्तवत् ॥ ५ ॥ स्तंभनं तु सहस्रेण जारणं च तदर्द्धवत् ॥ निगडान्मुक्तिकामस्तु सहस्रं सार्द्धमीरितम् ॥ ६ ॥ महाराजभये पंचशतं चौरादिसंकटे ॥ शतद्वयं च डाकिन्या भये पंचशतं परम् ॥ दरिद्रः पंचसाहस्रमयुतं सर्वकामदम् ॥ ७ ॥ मंत्रमहोदधौ ॥ लक्षपार्थिवलिंगानां पूजनाद्भुवि मुक्तिभाक् ॥ लक्षं तु गुडलिंगानां पूजनात्पार्थिवो भवेत् ॥ ८ ॥ या नारी गुडलिंगानि सहस्रं पूजयेत्सती ॥ भर्तुः सुखमखंडं सा प्राप्यते पार्वती भवेत् ॥ ९ ॥ नवनीतस्य लिंगानि संपूज्येष्टमवाप्नुयात् ॥ भस्मना गोमयस्यापि वालुकायास्तथा फलम् ॥ १० ॥ क्रीडंति पृथुका भूमौ कृत्वा लिंगं रजोमयम् ॥ पूजयंति विनोदेन तेपि स्युः क्षितिनायकाः ॥ ११ ॥ प्रातर्गोमयलिंगानि नित्यं यस्त्रीणि पूजयेत् ॥ बृहतीबिल्वयोः पत्रैर्नैवेद्यं गुडमर्पयेत् ॥ १२ ॥ एवं मासत्रयं कुर्वन्नानल्पं लभते धनम् ॥ एकादशैव लिंगानि गोमयोत्थानि यो यजेत् ॥ १३ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

प्रातर्मध्याह्नयोः सायं निशीथे प्रतिवासरम् ॥ स सर्वाः संपदः पायात् षण्मासादेवमाचरन् ॥ १४ ॥ एकादश यजेन्नित्यं शालिपिष्टमयानि यः ॥ लिंगानि मासमात्रेण स कल्मषचयं दहेत् ॥ १५ ॥ स्फाटिकं पूजितं लिंगमेनोनिकरनाशनम् ॥ सर्वकामप्रदं पुंसामुदुंबरसमुद्भवम् ॥ १६ ॥ रेवाश्मजं सर्वसिद्धिप्रदं दुःखविनाशनम् ॥ यथाकथंचिल्लिंगस्य पूजा नित्यकृतेष्टदा ॥ १७ ॥ यो यजेत्पिचुमंदोत्थैः पत्रैः गोमयजं शिवम् ॥ क्रुद्धं महेश्वरं ध्यायन्स पराजयते रिपून् ॥ १८ ॥" (शांतिसारे) नित्यपूजने संख्या ॥ "एकं पापहरं प्रोक्तं द्विलिंगं चाथ सिद्धिदम् ॥ त्रिलिंगं सर्वकामानां कारणं परमाद्भुतम् ॥ १९ ॥ यत्फलं पाकयज्ञेषु हविर्यज्ञेषु यत्फलम् ॥ एकाहात्तदवाप्नोति लिंगार्चनरतः सदा ॥ २० ॥ गवां शतसहस्रस्य सम्यग्दत्तस्य यत्फलम् ॥ दशाहात्तदवाप्नोति सम्यग्लिंगार्चने रतः ॥ २१ ॥ वाजपेयशतैरिष्ट्वा यल्लभंते द्विजोत्तमाः ॥ विप्रो विंशतिरात्रेण रुद्रभक्त्या तदाप्नुयात् ॥ २२ ॥ अश्वमेधसहस्रस्य सम्यगिष्टस्य यत्फलम् ॥ मासेन तदवाप्नोति रुद्रलिंगार्चने रतः ॥ २३ ॥ राजसूयसहस्रस्य सम्यगिष्टस्य यत्फलम् ॥ मासेन तदवाप्नोति शिवलिंगार्चने रतः ॥ २४ ॥ सर्वतीर्थाभिषेकस्य सर्वदानफलानि च ॥ सर्वयज्ञफलं चैव उपवासफलानि च ॥ २५ ॥ सम्यगिष्टफलः सर्वक्षेमाचारः समाधिना ॥ नवमासात्समासाद्यब्राह्मणो विजितेंद्रियः ॥ सर्वमेतदवाप्नोति लिंगे योऽर्चयते शिवम् ॥ २६ ॥ यस्तु संवत्सरं पूर्णं पूजयेदेकलिंगकम् ॥ तस्य तुष्टः प्रयच्छामि गाणपत्यं न संशयः ॥ २७ ॥ माघे मासि समुद्युक्तस्त्रिसंध्यं योर्चयेच्छिवम् ॥ लभेत्षाण्मासिकं पुण्यं मासेनैव न संशयः ॥ २८ ॥ यथा माघे तथाऽऽषाढे कार्तिके तु विशेषतः ॥ त्रिषु पुण्यं समं ज्ञेयं मासेष्वेतेषु यत्फलम् ॥ २९ ॥ यस्तु पूजयते नित्यं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

लिंगे त्रिभुवनेश्वरम् ॥ स स्वर्गराज्यमोक्षाणां क्षिप्रं भवति भाजनम् ॥ ३० ॥ (शिवनारदसंवादे) " तत्रापि पार्थिवं लिंगं क्षिप्रं सिद्धिप्रदं भवेत् ॥ पार्थिवेन तु लिंगेन बहवः सिद्धिमागताः ॥ ३१ ॥ कृते रत्नमयं लिंगं त्रेतायां हेमसंभवम् ॥ द्वापरे पारदं श्रेष्ठं पार्थिवं तु कलौ युगे ॥ ३२ ॥ " (लिंगमानं मंत्रमहोदधौ) " अंगुष्ठमानादधिकं वितस्त्यवधि सुंदरम् ॥ पार्थिवं रचयेल्लिंगं न न्यूनं नाधिकं च तत् ॥ ३३ ॥ " लिंगमाहात्म्यम् (नंदिभविष्ययोः) " आयुष्मान्बलवाञ्छ्रीमान्पुत्रवान्धनवान्सुखी ॥ वरमिष्टं लभेल्लिंगं पार्थिवं यः समाचरेत् ॥ ३४ ॥ मृद्भस्मगोशकृत्पिंण्डताम्रकांस्यमयं तथा ॥ कृत्वा लिंगं सकृत्पूज्य वसेत्कल्पायुतं दिवि ॥ ३५ ॥ इति पार्थिवलिंगपूजनप्रयोगः समाप्तः ॥ ॥ अथ दक्षिणामूर्तिशिवमंत्रपुरश्चरणम् ॥ (शारदातिलके) ॥ " मूलमंत्रो यथा ॥ ॐ ह्रीं दक्षिणामूर्त्तये तुभ्यं वटमूलनिवासिने ॥ ध्यानैकनिरतांगाय नमो रुद्राय शंभवे ह्रीं ॐ " ॥ ' षट्त्रिंशदक्षरो मंत्रः सर्वकामफलप्रदः ' अस्य श्रीदक्षिणामूर्तिशंभुमंत्रस्य शुक ऋषिः अनुष्टुप्छंदः दक्षिणामूर्तिशंभुर्देवता सर्वेष्टसिद्ध्यर्थे जपे विनियोगः ॥ ॐ शुकऋषये नमः शिरसि ॥ १ ॥ ॐ अनुष्टुप्छंदसे नमः मुखे ॥ २ ॥ ॐ दक्षिणामूर्तिशंभुदेवतायै नमः हृदये ॥ ३ ॥ इति ऋष्यादिन्यासः ॥ ॐ ह्रीं दक्षिणामूर्तये ह्रीं अंगुष्ठाभ्यां नमः ॥ १ ॥ ॐ ह्रीं तुभ्यं ह्रीं तर्जनीभ्यां नमः ॥ २ ॥ ॐ ह्रीं वटमूलनिवासिने ह्रीं मध्यमाभ्यां नमः ॥ ३ ॥ ॐ ह्रीं ध्यानैकनिरतांगाय ह्रीं अनामिकाभ्यां नमः ॥ ४ ॥ ॐ ह्रीं नमो रुद्राय ह्रीं कनिष्ठिकाभ्यां नमः ॥ ५ ॥ ॐ ह्रीं शंभवे ह्रीं करतलकरपृष्टाभ्यां नमः ॥ ६ ॥ इति करन्यासः । एवं हृदयादिन्यासं कृत्वा अंगन्यासं कुर्य्यात् । ॐ ह्रीं नमः मूर्द्धि ॥ १ ॥ ॐ दं नमः भाले

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

॥ २ ॥ ॐ क्षिं नमः नेत्रयोः ॥ ३ ॥ ॐ णां नमः श्रोत्रयोः ॥ ४ ॥ ॐ मूं नमः गंडयोः ॥ ५ ॥ ॐ तैंनमः नासिकयोः ॥ ६ ॥ ॐ यें नमः मुखे ॥ ७ ॥ ॐ तुं नमः दक्षिणबाहुमूले ॥ ८ ॥ ॐ भ्यं नमः दक्षिणकूर्परे ॥ ९ ॥ ॐ वं नमः दक्षिणमणिबंधे ॥ १० ॥ ॐ टं नमः दक्षिणहस्तांगुलीमूले ॥ ११ ॥ ॐ मूं नमः दक्षहस्तांगुल्यग्रे ॥ १२ ॥ ॐ लं नमः वामबाहुमूले ॥ १३ ॥ ॐ निं नमः वामकूर्परे ॥ १४ ॥ ॐ वां नमः वाममणिबंधे ॥ १५ ॥ ॐ सिं नमः वामहस्तांगुलीमूले ॥ १६ ॥ ॐ नें नमः वामहस्तांगुल्यग्रे ॥ १७ ॥ ॐ ध्यां नमः गले ॥ १८ ॥ ॐ नैं नमः स्तनयोः ॥ १९ ॥ ॐ कं नमः हृदये ॥ २० ॥ ॐ निं नमः नाभिमंडले ॥ २१ ॥ ॐ रं नमः कट्योः ॥ २२ ॥ ॐ तां नमः गुह्ये ॥ २३ ॥ ॐ गां नमः दक्षिणपादमूले ॥ २४ ॥ ॐ यं नमः दक्षिणजानुनि ॥ २५ ॥ ॐ नं नमः दक्षिणगुल्फे ॥ २६ ॥ ॐ मं नमः दक्षपादांगुलीमूले ॥ २७ ॥ ॐ रुं नमः दक्षपादांगुल्यग्रे ॥ २८ ॥ ॐ द्रां नमः वामपादमूले ॥ २९ ॥ ॐ यं नमः वामजानुनि ॥ ३० ॥ ॐ शं नमः वाम गुल्फे ॥ ३१ ॥ ॐ भं नमः वामपादांगुलीमूले ॥ ३२ ॥ ॐ वें नमः वामपादांगुल्यग्रे ॥ ३३ ॥ ॐ ह्रीं नमः इति व्यापकेन सर्वाङ्गे न्यसेत् ॥ ३४ ॥ एवमंगन्यासं कृत्वा ध्यायेत् ॥ " हेमाचलतटे रम्ये सिद्धकिन्नरसेविते ॥ विविधद्रुमशाखाभिः सर्वतो वारितातपे ॥ १ ॥ सुपुष्पितैर्लताजालैराश्लिष्टकुसुमद्रुमैः ॥ शिलाविवरनिर्गच्छन्निर्झरानिलसेविते ॥ २ ॥ गायद्भृंगांगनासंघे नृत्यद्बर्हिकदंबके ॥ कूजत्कोकिलसंघेनमुखरीकृतदिङ्मुखे ॥ ३ ॥ परस्परविनिर्मुक्तमात्सर्यमृगसेविते ॥ आद्यैः शुकाद्यैर्मुनिभिर जस्रं समुपस्थितम् ॥ ४ ॥ पुरंदरमुखैर्देवैः सेवायातैर्विलोकितम् ॥ वटवृक्षं महोच्छ्रायं पद्मरागफलोज्वलम् ॥ ५ ॥

॥१७३॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

गारुत्मतमयैः पत्रैर्नीबिडैरुपशोभितम् ॥ नवरत्नमयाकल्पैर्लंबमानैरलंकृतम् ॥ ६ ॥ स्थलजैर्जलजैःपुष्पैरामोदितमलंकृतम् ॥ शृण्वद्भिर्वेदशास्त्राणि शुकवृंदैर्निषेवितम् ॥ ७ ॥ संसारतापविच्छेदकुशलच्छायमद्भुतम् ॥ विचिंत्य तस्य मूलस्थे रत्नसिंहासने शुभे ॥ ८ ॥ आसीनममिताकल्पं शरच्चंद्रनिभाननम् ॥ स्तूयमानं मुनिगणैर्दिव्यज्ञानाभिलाषिभिः ॥ ९ ॥ संस्मरेज्जगतामाद्यं दक्षिणामूर्तिमव्ययम् " ॥ इति विचिंत्य । कैलासाद्रिनिभं शशांकशकलस्फूर्जज्जटामंडितं नासालोकनतत्परं त्रिनयनं वीरासनाध्यासितम् ॥ मुद्राटंककुरंगजानुविलसत्पार्णिं प्रसन्नाननं कक्षाबद्धभुजंगमं मुनिवृतं वंदे महेशं परम् ॥ १ ॥ इति ध्यायेत् ॥ एवं ध्यात्वा पूर्वोक्ते शिवपंचाक्षरोदिते पीठे पाद्याद्यैः षोडशोपचारैर्यथाविधि दक्षिणामूर्त्याख्यं शिवं संपूज्य जपं कुर्य्यात् ॥ अस्य मंत्रस्य सिद्धचर्थं विंशतिसहस्राधिकं लक्षत्रयात्मकं जपपुरश्चरणं कार्यम् ॥ ततो जपान्ते दशांशेन क्षीरसंयुतैः शुद्धैस्तिलैर्होमं कृत्वा तत्तद्दशांशेन तर्पणमार्जनब्राह्मणभोजनानि कुर्यात् ॥ तथा च (शारदातिलके) " अयुतद्वयसंयुक्तं गुणलक्षं जपेन्मनुम् ॥ तद्दशांशं तिलैः शुद्धैर्जुहुयात्क्षीरसंयुतैः ॥ १ ॥ एवं कृतपुरश्चर्यः सिद्धमंत्रो भवेत्सुधीः ॥ भिक्षाहारो जपेन्मासं मनुमेनं जितेन्द्रियः ॥ २ ॥ नित्यं सहस्रमष्टार्द्धं परं विंदति वाङ्मयम् ॥ त्रिवारं जप्तमेतेन मनुना सलिलं पिबेत् ॥ ३ ॥ नित्यशो दक्षिणामूर्तिं ध्यायन्साधकसत्तमः ॥ शास्त्रव्याख्यानसामर्थ्यं लभते वत्सरांतरे ॥ ४ ॥ ब्राह्मीसैंधवसिद्धार्थवचाकुष्ठकणोत्पलैः ॥ सुगंधिसंयुतैः कल्कैः शृतं ब्राह्मीरसे घृतम् ॥ ५ ॥ मनुनानेन संजप्तमयुतं साधुसाधितम् ॥ निषीतं कवितांतिरक्षायुःश्रीधृतिप्रदम् ॥ ६ ॥ इतिदक्षिणामूर्तिशिवमंत्रपुरश्चरणं समाप्तम् ॥ अथ द्वितीयो दक्षिणामूर्तिमंत्रः ॥ तत्रैव मूलं यथा ॥ ॐ नमो

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भगवते दक्षिणामूर्तयेमह्यं मेधां प्रयच्छ स्वाहा॥ द्वाविंश२२त्यक्षरो मनुः॥भूतशुद्ध्यादिश्रीकंठादिकलान्तन्यासं शिवपंचाक्षरवत् ॥ कृत्वा । अस्य श्री दक्षिणामूर्तिमंत्रस्य चतुर्मुखऋषिः गायत्री छंदः दक्षिणामूर्तिः वेदव्याख्यानतत्परो देवता सर्वेष्टसिद्धये विनियोगः ॥ ॐ चतुर्मुखऋषये नमः शिरसि। ॐ गायत्री छंदसे नमः मुखे। ॐ दक्षिणामूर्तिदेवतायै नमः हृदये।इति ऋष्यादिन्यासः ॐ आँ ॐ नमो भगवते अंगुष्ठाभ्यां नमः ॥ १ ॥ ॐ ईँ ॐ दक्षिणामूर्तये तर्जनीभ्यां नमः ॥ २ ॥ ॐ ऊँ ॐ मह्यं मध्यमाभ्यां नमः ॥ ३ ॥ ॐ ऐं ॐ मेधां अनामिकाभ्यां नमः ॥ ४ ॥ ॐ औँ ॐ प्रयच्छ कनिष्ठिकाभ्यां नमः ॥५॥ ॐ अः ॐ स्वाहा करतलकरपृष्ठाभ्यां नमः ॥६॥ इति करन्यासः ॥२॥ एवमेव हृदयादिन्यासं कृत्वा । पूर्वोक्तं 'हेमाचलतटे रम्ये' इत्यादि विचिंत्य ध्यायेत् । स्फटिकरजतवर्णं मौक्तिकीमक्षमालाममृतकलशविद्याज्ञानमुद्राः कराग्रैः ॥ दधतमुरगकक्षं चंद्रचूडं त्रिनेत्रं विधृतविविधभूषं दक्षिणामूर्तिमीडे॥१॥ इति ध्यात्वा पंचाक्षरोदिते पीठे यजेत् ॥ अथ यंत्रपूजा ॥ शैवोक्तपीठपूजां विधाय मध्ये मूर्तिं संस्थाप्य पाद्यादिपुष्पांतैरुपचारैः संपूज्य ॥ आवरणपूजां कुर्य्यात् ॥ तद्यथा ॥ षट्कोणकेसरेष्वङ्ग्यादिकोणेषु मध्ये दिक्षु च ॥ ॐ आँ ॐ हृदयाय नमः ॥ १ ॥ ॐ ईँ ॐ शिरसे स्वाहा ॥ २ ॥ ॐ ऊँ ॐ शिखायै वषट् ॥ ३ ॥ ॐ ऐं ॐ कवचाय हुम् ॥ ४ ॥ ॐ औँ ॐ नेत्रत्रयाय वौषट् ॥ ५ ॥ ॐ अः ॐ अस्त्राय फट् ॥ ६ ॥ इत्यंगानि संपूज्य ॥ १ ॥ ततो बाह्ये पत्रेष्वष्टसु पूर्वादिक्रमेण । ॐ सरस्वत्यै नमः ॥ १ ॥ ॐ ब्रह्मणे नमः ॥ २ ॥ ॐ सनकाय नमः ॥ ३ ॥ ॐ सनंदनाय नमः ॥ ४ ॥ ॐ सनातनाय नमः ॥ ५ ॥ ॐ शुकाय नमः ॥ ६ ॥ ॐ व्यासाय नमः ॥ ७ ॥ ॐ गणेश्वराय नमः ॥ ८ ॥ इति पूजयेत् ॥ २ ॥

॥१७४॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तत स्तद्बहिः पूर्वादिचतुर्दिक्षु । ॐ सिद्धेभ्यो नमः ॥ १॥ ॐ गंधर्वे
भ्यो नमः ॥ २ ॥ ॐ योगीन्द्रेभ्यो नमः ॥ ३ ॥ ॐ विद्याधरेभ्यो
नमः ॥ ४ ॥ इति पूजयेत् ॥ ३ ॥ तद्बहिः भूगृहे पूर्वादिषु इंद्रादिलो
कपालान् तद्बहिः वज्राद्यायुधानि च संपूजयेत् ॥ ५ ॥ एवं पंचा
वरणपूजां कृत्वा । प्रधानदेवं धूपदीपनैवेद्यतांबूलदक्षिणानीराजनैः
संपूज्य स्तवेन स्तुत्वा लक्षमंत्रं जपेत् ॥ तथा च (शारदातिलके)
"लक्षमेकं जपेन्मत्रं ब्रह्मचारिव्रते स्थितः ॥ जुहुयात्सघृतैः पद्मैर्दशांशं
संस्कृतेऽनले ॥ १ ॥ इत्थं पूजादिभिः सिद्धे मंत्रेस्मिन्साधकोत्तमः॥
वल्लभो जायते वाचां बृहस्पतिरिवापरः ॥ २ ॥ मंत्रेणानेन संजप्तै
र्विशुद्धैः सलिलैः सुधीः ॥ अभिषिंचेत्स्वशिरसि श्रियमारोग्यमाप्नु
यात् ॥ ३ ॥ कंठमात्रे जले स्थित्वा जपेन्मंत्रसहस्रकम् ॥ प्रत्यहं
मंडलादर्वाक्कवीनामग्रणीर्भवेत्॥४॥गौर्या पार्श्वस्थया सार्द्धं श्रीकामी
चिंतयन्विभुम् ॥ अयुतं प्रजपेन्मंत्रं भूयसीं श्रियमाप्नुयात् ॥५॥भुंजा

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नः प्रयतो मंत्री गोमूत्रे शृतमोदनम् ॥ भिक्षान्नमथवा मंत्रमयुतद्वितयं जपेत् ॥ ६ ॥ अश्रुतान्वेदशास्त्रादीन् व्याचष्टे नात्र संशयः॥ सिद्धगंधर्वमुनिभिर्योगीन्द्रैरपि सेविते ॥७॥ ज्ञानवागर्थिनां प्रीत्यै कथितौ मंत्र नायकौ" ॥८॥ इति दक्षिणामूर्तिशिवमंत्रानुष्ठानम् ॥ अथ आपदुद्धारबटुकभैरवमंत्रानुष्ठानविधानं (रुद्रयामले ।) कदाचित्गिरिजा शंभुं पप्रच्छोपासनाविधिम् ॥ येनेदं सर्वलोकानां मनोप्सितफलं भवेत् ॥ १ ॥ श्रीपार्वत्युवाच ॥ प्राणनाथ जगन्नाथ जगदादिजगन्मय ॥ शंभो शंकर देवेश बटुकाराधनं वद ॥२॥ एकादशसहस्रं तु भजनं हि त्वयोदितम् ॥ विधितस्य विशेषेण ब्रूहि त्वं शंकराधुना ॥ ३ ॥ शिव उवाच ॥ सम्यक् पृष्टं त्वया देवि लोकदुःखविमोचनम् ॥ मया बटुकरूपं हि धृतं सर्वसुखावहम् ॥ ४ ॥ अन्ये देवास्तु कालेन प्रसन्नाः संभवंति हि ॥ बटुकः सेवितः सद्यः प्रसीदति ध्रुवं शिवे ॥ ५ ॥ दुःखे च सेवितः शीघ्रं दुःखं नाशयते क्षणात् ॥ सुखे च सेवितो नित्यं सुखं वर्द्धयते बहु ॥ ६ ॥ तस्मात्सेव्यो नरैश्चायं सर्वकामफलाय वै ॥ सेवोपायं प्रवक्ष्यामि यथा सिद्धिर्भवेद्ध्रुवम् ॥ ७ ॥ शृणु देवि प्रवक्ष्यामि बटुकस्य महात्मनः॥विधानं परमं गोप्यं ब्रह्मादीनां सुदुर्लभम् ॥ ८ ॥ मंत्रं वै वसुसंक्षेपात्कथयिष्यामि वल्लभे ॥ येन विज्ञानमात्रेण त्रैलोक्यं साधयेत्सुधीः ॥ ९ ॥ एकदा देवदेवेशि तपसे मंदराचलम् ॥ गतोहं परमानंदान्मूलप्रकृतिमीश्वरीम् ॥ १० ॥ चक्रे परमसंतुष्टां तपसा भावितात्मना ॥ साकाशरूपिणी देवी प्रोवाच वचनं मुदा ॥ ११ ॥ तुष्टाहं शंकर प्रीता वरं वरय दुर्लभम् ॥ शिव उवाच ॥ बटुकस्य विधानं मे परमं भक्तितो वरम् ॥ १२ ॥ परमाशयान्मंत्रस्य येन सिध्यति सर्वथा ॥ मनोरमाणि मंत्रस्य

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सर्वकार्याणिसांप्रतम् ॥ १३॥ इति वाक्यं च मे श्रुत्वा मूलभूता सनातनी ॥ उवाच यादृशं देवी विधानं शृणु वल्लभे ॥ १४ ॥ वटुकाख्यस्य देवस्य भैरवस्य महात्मनः ॥ ब्रह्मविष्णुमहेशाद्यैर्वंदितस्य दयानिधेः ॥ १५ ॥ तत्र प्रयोगः (शारदातिलके) सुमुहूर्ते शिवालयादिषु कृतनित्यक्रियो धृतभस्मत्रिपुंड्ररुद्राक्षः कूर्मसंशोधिते स्वासने उदङ्मुख उपविश्य मूलेनाचम्य प्राणानायम्य देशकालौ संकीर्त्य मम मंत्रसिद्धिपूर्वकश्रीआपदुद्धारप्रीत्यर्थमेकविंशतिलक्षात्मकं जपादिरूपपुरश्चरणमहं करिष्ये । इति संकल्प्य तदंगत्वेन भूतशुद्धिं प्राणप्रतिष्ठामन्तर्मातृकाबहिर्मातृकान्यासं च कृत्वा पूर्वोक्तशिवपंचाक्षरोदितं श्रीकंठादिकलान्तन्यासं च कृत्वा मूलमंत्रन्यासादिकं च कुर्यात् ॥ मलमंत्रो यथा ॥ "ह्रीं वटुकाय आपदुद्धारणाय कुरुकुरु वटुकाय ह्रीं इत्येकविंशतिवर्णो मंत्रः ॥ अस्य मंत्रस्य बृहदारण्यक ऋषिः अनुष्टुप्छंदः आपदुद्धारणभैरवो देवता ह्रीं बीजं वँशक्तिः आँ कीलकम् । श्रीवटुकभैरवप्रीतये जपे विनियोगः ॥ ॐ बृहदारण्यकऋषये नमः शिरसि ॥१॥ ॐ अनुष्टुप्छंदसे नमः मुखे॥२॥ ॐ श्रीवटुकभैरवदेवतायै नमः हृदि ॥३॥ ॐ ह्रीं बीजाय नमः गुह्ये ॥४॥ ॐ वं शक्तये नमः पादयोः ॥५॥ ॐ आं कीलकाय नमः नाभौ ॥ ६॥ चतुर्विधपुर्षार्थसिद्धयर्थे विनियोगाय नमः सर्वांगे ॥ ७ ॥ इति ऋष्यादिन्यासः ॥ ॐ ह्रोंवों ईशानाय नमः अङ्गुष्ठयोः ॥ १ ॥ ॐ ह्रें वें तत्पुरुषाय नमः तर्ज्जन्योः ॥ २ ॥ ॐ ह्रुँ वुं अघोराय नमः मध्यमयोः ॥३ ॥ ॐ ह्रिं विं वामदेवाय नमः अनामिकयोः ॥४॥ ॐ ह्रं वं सद्योजाताय नमः कनिष्ठिकयोः इति करन्यासः ॥ ॐ ह्रों वों ईशानाय नमः शिरसि ॥१॥ ॐ ह्रें वें तत्पुरु

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

षाय नमः वक्त्रे॥२॥ॐ हुं वुं अघोराय नमः हृदि॥३॥ॐ ह्रिं विं वामदेवाय नमः गुह्ये ॥ ४ ॥ ॐ ह्रं वं सद्योजाताय नमः पादयोः ॥ ५ ॥ इति देहन्यासः ॥ ॐ ह्रों वों ईशानाय नमः ऊर्ध्ववक्त्रे ॥ १ ॥ ॐ ह्रें वें तत्पुरुषाय नमः पूर्ववक्त्रे ॥ २ ॥ ॐ हुं वुं अघोराय नमः दक्षिणवक्त्रे ॥ ३ ॥ ॐ ह्रिं विं वामदेवाय नमः उत्तरवक्त्रे ॥ ४ ॥ ॐ ह्रं वं सद्योजाताय नमः पश्चिमवक्त्रे ॥ ५ ॥ इति वक्त्र न्यासः ॥ एवं ह्रस्वशक्तिबीजवकाराढ्यं न्यासत्रयं कृत्वा एवमेव दीर्घशक्तिबीजवकारपुरःसरं अंगुल्यादिन्यासत्रयं पूर्ववत् कुर्यात् ॥ अथ हृदयादिन्यासः ॥ ॐ ह्रां वां हृदयाय नमः ॥ १ ॥ ॐ ह्रीं वीं शिरसे स्वाहा ॥२ ॥ ह्रूं वूं शिखायै वषट् ॥ ३ ॥ ॐ ह्रैं वैं कवचायहुम् ॥ ४ ॥ ॐ ह्रौं वौं नेत्रत्रयाय वौषट् ॥ ५ ॥ ॐ ह्रः वः अस्त्राय फट् । एवं षडंगन्यासं कृत्वा यथाकामनया ध्यायेत् ॥ अथ सात्त्विकध्यानम्॥"वंदे बालं स्फटिकसदृशं कुंतलोल्लासिवक्त्रं दिव्याकल्पैर्नवमणिमयैः किंकिणीनूपुराद्यैः॥दीप्ताकारं विशदव सनं सुप्रसन्नं त्रिनेत्रं हस्ताब्जाभ्यां वटुकमनिशं शूलदंडौ दधानम् " ॥ १ ॥ अथ राजसध्यानम् । "उद्यद्भास्करसन्निभं त्रिनय नं रक्तांगरागस्रजं स्मेरास्यं वरदं कपालमभयं शूलं दधानं करैः ॥ नीलग्रीवमुदारभूषणशतं शीतांशुचूडोज्ज्वलं बंधूकारुणवाससं भयहरं वंदे सदा भावये" ॥ २ ॥ अथ तामसध्यानम् ॥ "ध्यायेन्नीलाद्रिकांतं शशिशकलधरं मुंडमालं महेशं दिग्वस्त्रं पिंगकेशं डमरुमथ सृणिं खड्गपाशाभयानि ॥ नागं घंटां कपालं करसरसिरुहैर्बिभ्रतं भीमदंष्ट्रं सर्पाकल्पं त्रिनेत्रं मणिमयविलसत्किंकिणीनू पुराढ्यम् ॥ ३ ॥" "सात्त्विकं ध्यानमाख्यातमपमृत्युनिवारणम् ॥ आयुरारोग्यजननमपवर्गफलप्रदम् ॥ १ ॥ राजसं ध्यानमा

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ख्यातं धर्मकामार्थसिद्धिदम् ॥ तामसं शत्रुशमनं कृत्याभूतग्रहापहम् ॥ २ ॥" एवं ध्यात्वा पीठपूजापूर्वकं यंत्रादिपूजां कुर्य्यात् । तद्यथा । ॐ धं धर्म्माय नमः ॥ १ ॥ ॐ ज्ञां ज्ञानाय नमः ॥ २ ॥ ॐ वैं वैराग्याय० ॥ ३ ॥ ॐ ऐं ऐश्वर्य्याय० ॥ ४ ॥ ॐ अं अधर्माय० ॥ ५ ॥ ॐ अं अज्ञानाय० ॥ ६ ॥ ॐ अं अवैराग्याय० ॥ ७ ॥ ॐ अं अनैश्वर्याय नमः ॥ ८ ॥ इति पीठदेवताः गंधपुष्पैः संपूज्य । ॐ वामायै नमः ॥१॥ ॐ ज्येष्ठायै नमः ॥२॥ ॐ रौद्र्यै नमः ॥३॥ ॐ काल्यै नमः ॥ ४ ॥ ॐ कलविकरण्यै नमः ॥ ५ ॥ ॐ बलविकरण्यै नमः ॥६॥ ॐ बलप्रमथिन्यै नमः ॥७॥ ॐ सर्वभूतदमन्यै नमः ॥ ८ ॥ ॐ मनोन्मन्यै नमः ॥ ९॥ इति पीठशक्तीः संपूज्य । ॐ नमो भगवते सकलगुणात्मशक्तियुक्ताय अनंताय योगपीठात्मने नमः । इति पुष्पांजलिना । आसनं दद्यात् । ततस्तत्र यथाविधि ताम्रकलशं संस्थाप्य तत्र वरुणमावाह्य संपूज्य तदुपरि पट्टवस्त्रं प्रसार्य्य तत्र शक्तिगंधाष्टकेन भैरवयंत्रं लिखेत् । शक्तिगंधाष्टकं यथा–"चंदनागरुकर्पूरचौरकुंकुमरोचनाः ॥ जटामांसी कपियुता शक्तेर्गंधाष्टकं विदुः॥" अथ यंत्रोद्धारः (रुद्रयामले) "यंत्रोद्धारमिमं देवि त्रैलोक्ये चातिदुर्लभम् ॥ तद्यंत्रं च प्रवक्ष्यामि यत्र देवं च पूजयेत् ॥ १ ॥ मध्ये चाष्टदलं पद्मं कर्णिकाकेसरोज्ज्वलम् ॥ त्रिकोणं च ततः कृत्वा षट्कोणं च ततो न्यसेत् ॥ २ ॥ वर्तुलं चाष्टपत्रं च चतुरस्रं त्रयात्मकम् ॥ एवं यंत्रं च संपूज्य स्वस्थो भूत्वा जपेन्नरः ॥ ३ ॥" एवं यंत्रं संलिख्य । अथवा यथाशक्ति सुवर्णनिर्मितं यंत्रं वा । सावयवां स्वर्णनिर्मितां भैरवप्रतिमां सात्त्विकादिध्यानप्रतिपादितां स्थापयेत् । ततः प्राणप्रतिष्ठां

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कृत्वा यथाविधि पूजयेत् । तद्यथा–" देवेश भक्तिसुलभ परि
वारसमन्वित ॥ यावत्त्वां पूजयिष्यामि तावदेव इहावह ॥ १ ॥"
ॐ सुद्यो जुातं प्रपद्यामिसुद्योजुातायुवैनमोनमः भुवेभवेनातिभवेभु
वस्वुमांभुवोद्भवायु नमः । इति मंत्रेणावाहनमुद्रां प्रदर्श्य । मलांते
ॐ भगवन् भैरव इहागच्छ आवाहनी भव इत्यावाहयेत् ॥ १ ॥
ततः । ॐ वामुदेवायुनमोज्येष्ठायुनमः श्रेष्ठायुनमोरुद्रायुनमुःका
लायुनमुः कलविकरणायुनमोबलविकरणायुनमुः ॥ १ ॥ मूलं
पठित्वा स्थापनीमुद्रां प्रदर्श्य स्थापनी भव इति संस्थापयेत् ॥२॥
ततो मूलं पठित्वा सन्निधापनमुद्रया इह सन्निधेहि सन्निधानी भवेति
सन्निधाय ॥ ३ ॥ ॐ अघोरेभ्योथघोरेभ्योघोरघोरतरेभ्यः सर्व्वे
भ्यः सर्व्वसर्व्वभ्योनेमस्तेऽस्तुरुद्ररूपेभ्यः १ मूलं पठित्वा । सन्निरो

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

धनमुद्रया इह सन्निरुद्ध सन्निरोधिनीभव इति सन्निरोध्य ॥ ४ ॥ ततो मूलं पठित्वा "ॐ तत्पुरुषायविद्महेमहादेवायधीमहि ॥ तन्नोरुद्रः प्रचोदयात्" इति मंत्रेण योनिमुद्रां प्रदर्श्य सम्मुखो भव । इति संमुखीकृत्य ॥ ५ ॥ मूलांते ॐ ईशानः सर्व्वविद्याना मीश्वरः सर्व्वभूतानाम् ॥ ब्रह्माधिपतिर्ब्रह्मणोधिपतिर्ब्रह्माशिवोमेअस्तुसदाशिवोम् ॥ १ ॥ इति वंदनं कुर्य्यात् ॥ ६ ॥ ततो मूलमं त्रांते तत्तन्मंत्रैः । पाद्यादिपुष्पांतैरुपचारैः "ॐ श्रीमद्बटुकभैरवाय नमः" इति मंत्रेण संपूज्य आवरणपूजांते धूपदीपादि निवेद येत् ॥ अथावरणपूजा ॥ पुष्पांजलिमादाय । "ॐ संविन्मयः परो देवः परामृतरसप्रियः ॥ अनुज्ञां देहि बटुक परिवारार्चनाय मे ॥ १ ॥ इति पुष्पांजलिं भैरवोपरि दत्त्वा आज्ञां गृहीत्वा पूज्यपूजकयोर्मध्ये प्राचीं प्रकल्प्य तदनुसारेण अन्यादिशश्च कृत्वा यंत्रं पूजयेत् ॥ मध्ये त्रिकोणे देवस्याग्रे ॐ ह्रौं वौं ईशानाय नमः ॥ १ ॥ ॐ ह्रैं वैं तत्पुरुषाय नमः ॥ २ ॥ ॐ ह्रूं वूं अघोराय नमः ॥ ३ ॥ ॐ ह्रीं वीं वामदेवाय नमः ॥ ४ ॥ ॐ ह्रां वां सद्योजाताय नमः ॥ ५ ॥ इति पूजयेत् ॥ १ ॥ "अभीष्टसिद्धिं मे देहि शरणागतवत्सल ॥ भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम् ॥" इति पुष्पांजलिं दद्यात् ॥१॥ एवं सर्वत्र । इति प्रथमावरणम् ॥१॥ ततः कर्णिकाद्बहिः । अष्टदलेषु पूर्वादिक्रमेण । ॐ असितांगभैरवाय नमः ॥ १ ॥ ॐ रुरुभैरवाय० ॥ २ ॥ ॐ चंडभैरवाय० ॥ ३ ॥ ॐ क्रोधभैरवाय० ॥ ४ ॥ ॐ उन्मत्तभैरवाय० ॥ ५ ॥ ॐ कपालभैरवाय० ॥ ६ ॥ ॐ भीषणभैरवाय० ॥ ७ ॥ ॐ संहारभैरवाय नमः ॥ ८ ॥ इति भैरवाष्टकं संपूज्य मूलेन । 'अभीष्टसिद्धिं०' इति पुष्पांजलिं दद्यात् । इति द्वितीयावरणम् ॥२॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ततस्त्रिकोणाद्बहिः आग्नेयादिषट्कोणेषु ॐ ह्रीं भूतनाथाय नमः ॥ १ ॥ ॐ ह्रीं आदिनाथाय० ॥ २ ॥ ॐ ह्रीं आनंदनाथाय० ॥ ३ ॥ ॐ ह्रीं सिद्धशावरनाथाय० ॥ ४ ॥ ॐ ह्रीं सहजानंदनाथाय० ॥ ५ ॥ ॐ ह्रीं निःसीमानंदनाथाय नमः ॥ ६ ॥ इति रुद्रयामलोक्तान्संपूज्य तत्रैव ॐ ह्रां वां हृदयाय नमः ॥ १ ॥ ॐ ह्रीं वीं शिरसे स्वाहा नमः ॥ २ ॥ ॐ ह्रूं वूं शिखायै वषट् नमः ॥ ३ ॥ ॐ ह्र वैं कवचायहुं नमः ॥ ४ ॥ ॐ ह्रौं वौं नेत्रत्रयाय वौषट् नमः ॥ ५ ॥ ॐ ह्रः वः अस्त्राय फट् नमः ॥ ६ ॥ इत्यंगानि च संपूज्य मूलमंत्रेण पूर्ववत्पुष्पांजलिं दद्यात् ॥ इति तृतीयावरणम् ॥ ३ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ततस्तद्बहिर्वर्तुले पूर्वादीशानपर्यंतं क्रमेण । ॐ ह्रीं डाकिनीपुत्रेभ्यो नमः ॥ १॥ ॐ ह्रीं राकिनीपुत्रेभ्यो नमः ॥२॥ ॐ ह्रीं लाकिनी पुत्रेभ्यो नमः ॥३॥ ॐ ह्रीं काकिनीपुत्रेभ्यो नमः ॥४॥ ॐ ह्रीं शाकिनीपुत्रेभ्यो नमः ॥५॥ ॐ ह्रीं हाकिनीपुत्रेभ्यो नमः॥६॥ ॐ ह्रीं मालिनीपुत्रेभ्यो नमः ॥७॥ ॐ ह्रीं देवीपुत्रेभ्यो नमः॥८॥ इत्यष्टदिक्षु संपूज्य । ततो 'देवस्य दक्षभागे' ॐ ह्रीं उमापुत्रेभ्यो नमः ॥९॥ ॐ ह्रीं रुद्रपुत्रेभ्यो नमः ॥ १०॥ ॐ ह्रीं मातृपुत्रेभ्यो नमः ॥११॥ 'पर्वेशानयोर्मध्ये ऊर्ध्वम्' ॐ ह्रीं ऊर्ध्वमुखीपुत्रेभ्यो नमः ॥ १२ ॥ 'पश्चिमनैर्ऋतयोर्मध्ये अधः' ॐ ह्रीं अधोमुखीपुत्रेभ्यो नमः ॥ १३ ॥ इति त्रयोदशपुत्रान्संपूज्य । मूलेन पुष्पाजलिं दद्यात् ॥ इति चतुर्थावरणम् ॥ 'तद्बहिरष्टदलेषु पर्वादश्यंतं वामक्रमेण' 'पूर्वे' ॐ ह्रीं ब्रह्माणीपुत्रवटुकाय नमः ॥१॥ 'ईशान्याम्' ॐ ह्रीं माहेश्वरीपुत्रवटुकाय नमः॥२॥ 'उत्तरे' ॐ ह्रीं वैष्णवीपुत्रवटुकाय नमः॥३॥'वायव्याम्' ॐ ह्रीं कौमारीपुत्रवटुकाय नमः ॥ ४ ॥ 'पश्चिमे' ॐ ह्रीं इंद्राणीपुत्रवटुकाय नमः ॥ ५ ॥ ' नैर्ऋत्याम् ' ॐ ह्रीं महालक्ष्मीपुत्रवटुकाय नमः ॥ ६ ॥ 'दक्षिणे' ॐ ह्रीं वाराहीपुत्रवटुकाय नमः ॥ ७ ॥ 'आग्नेय्याम्' ॐ ह्रीं चामुंडापुत्रवटुकाय नमः ॥ ८ ॥ इति संपूज्य मूलेन पूर्ववत्पुष्पांजलिं दद्यात । इति पंचमावरणम् ॥ ५ ॥ अष्टदलाद्बहिः चतुरस्राभ्यंन्तरे पूर्वादिप्राग्दक्षिणेन दशादिक्षु ॐ ह्रीं हेतुकाय नमः ॥ १ ॥ ॐ ह्रीं त्रिपुरांतकाय नमः ॥ २ ॥ ॐ ह्रीं वेतालाय नमः ॥ ३ ॥ ॐ ह्रीं अग्निजिह्वाय नमः ॥ ४ ॥ ॐ ह्रीं कालांतकाय नमः ॥ ५॥ ॐ ह्रीं करालाय नमः ॥ ६ ॥ ॐ ह्रीं एकपादाय नमः ॥ ७ ॥ ॐ ह्रीं भीमरूपाय नमः ॥ ८ ॥ 'इन्द्रेशानयोर्मध्ये' ॐ ह्रीं अचलाय नमः ॥ ९ ॥ 'नैर्ऋतवरुणयोर्मध्ये' ॐ ह्रीं हाटकेशाय नमः ॥ इति संपूज्य मूलेन पूर्ववत्पुष्पांज

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

लिं दद्यात् । इति षष्ठावरणम् । ततः त्रिरेखात्मकभूपुरस्यप्रथमरेखायां दिग्विदिगंतरालेषु षोडशस्थानेषु श्रीकंठादिमहासेनांतान्य
जेत् । 'पूर्वे' ॐ ह्रीं श्रीकंठेशपूर्णोदरीभ्यां नमः ॥१॥ 'दक्षिणे' ॐ ह्रीं अनंतेशविरजाभ्यां नमः ॥२॥ 'पश्चिमे' ॐ ह्रीं सूक्ष्मेश
शाल्मलीभ्यां नमः ॥ ३ ॥ 'उत्तरे' ॐ ह्रीं त्रिमूर्तीशलोलाक्षीभ्यां नमः ॥ ४ ॥ 'आग्नेये' ॐ ह्रीं अमरेशवर्त्तुलाक्षीभ्यां नमः ॥५॥
'नैर्ऋते' ॐ ह्रीं अर्घीशदीर्घघोणाभ्यां नमः ॥ ६ ॥ 'वायव्याम्' ॐ ह्रीं भारभूतीशदीर्घमुखीभ्यां नमः ॥ ७ ॥ 'ईशान्याम्'
ॐ ह्रीं अतिथीशगोमुखीभ्यां नमः ॥ ८ ॥ 'पूर्वाग्निमध्ये' ॐ ह्रीं स्थाण्वीशदीर्घजिह्वाभ्यां नमः ॥ ९ ॥ 'दक्षिणनैर्ऋतयोर्मध्ये'
ॐ ह्रीं हरेशकुंडोदरीभ्यां नमः॥१०॥ 'पश्चिमवायुमध्ये' ॐ ह्रीं झिंटीशोर्ध्वकेशीभ्यां नमः ॥११॥ 'उत्तरेशानमध्ये' ॐ ह्रीं भौति
केशविकृतमुखीभ्यां नमः ॥ १२ ॥ 'अग्निदक्षिणमध्ये' ॐ ह्रीं सद्योजातेशज्वालामुखीभ्यां नमः ॥ १३ ॥ 'निर्ऋतिवरुणमध्ये'
ॐ ह्रीं अनुग्रहेशोल्कामुखीभ्यां नमः ॥ १४ ॥ 'वायुसोममध्ये' ॐ ह्रीं अक्रूरेशश्रीमुखीभ्यां नमः ॥ १५ ॥ 'ईशानपूर्वमध्ये ॐ
ह्रीं महासेनेशविद्यामुखीभ्यां नमः ॥ १६ ॥ इति संपूज्य मूलेन पूर्ववत्पुष्पांजलिं दद्यात् ॥ इति सप्तमावरणम् ॥ ७ ॥
भूपुरस्य द्वितीयरेखायां दिग्विदिगंतरालेषु षोडशस्थानेषु क्रोधीश्वराद्याषाढांतान् यजेत् । 'पूर्वे' ॐ ह्रीं क्रोधीशमहाकाली
भ्यां नमः ॥ १ ॥ 'दक्षिणे' चंडीशसरस्वतीभ्यां नमः ॥ २ ॥ 'पश्चिमे' ॐ ह्रीं पंचांतकेशसर्वसिद्धिगीरीभ्यां
नमः ॥ ३ ॥ 'उत्तरे' ॐ ह्रीं शिवोत्तमेशत्रैलोक्यविजयाभ्यां नमः ॥४॥ 'आग्नेय्याम्' ॐ ह्रीं एकरुद्रेशमंत्रशक्तिभ्यां नमः ॥ ५ ॥
'नैर्ऋत्याम्, ॥ ॐ ह्रीं कूर्मेशात्मकशक्तिभ्यां नमः ॥६॥ 'वायव्याम्' ॐ ह्रीं एकनेत्रेशभूतमातृकाभ्यां नमः ॥७॥ 'ऐशान्याम्'

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ॐ ह्रीं चतुराननेशलंबोदरभ्यां नमः ॥ ८ ॥ 'पूर्वाग्निमध्ये' ॐ ह्रीं अजेशद्राविणीभ्यां नमः ॥ ९ ॥ 'दक्षिणनैर्ऋतमध्ये' ॐ ह्रीं सर्वेशनागरीभ्यां नमः ॥१०॥ 'पश्चिमवायुमध्ये' सोमेशखेचरीभ्यां नमः ॥११॥ 'उत्तरेशानमध्ये' ॐ ह्रीं लांगलीशमंजरीभ्यां नमः ॥१२॥ 'अग्नियाम्यमध्ये' ॐ ह्रीं दारुकेशरूपिणीभ्यां नमः ॥१३॥ 'नैर्ऋतपश्चिममध्ये' अर्धनारीशवीरणीभ्यां नमः॥ ॥१४॥ 'वायुसोममध्ये' ॐ ह्रीं उमाकांतेशकाकोदरीभ्यां नमः ॥१५॥ 'ईशानपूर्वमध्ये' ॐ ह्रीं आषाढेशपूतनाभ्यां नमः ॥१६॥ इति पूजयेत् ॥ मूलमंत्रेण पुष्पांजलिं दद्यात् ॥ इति अष्टमावरणम् ॥ ८ ॥ भूपुरस्य तृतीयरेखायां दिग्विदिगंतरालेषु षोडश स्थानेषु दंडीश्वरादिभृग्वीशांतान् पूजयेत् ॥ तत्र 'पूर्वे' ॐ ह्रीं दंडीशभद्रकालीभ्यां नमः ॥ १ ॥ 'दक्षिणे' ॐ ह्रीं अत्रीशयोगिनीभ्यां नमः ॥२॥ 'पश्चिमे' ॐ ह्रीं मीनेशशंखिनीभ्यां नमः ॥३॥ 'उत्तरे' ॐ ह्रीं मेषेशसर्जनीभ्यां नमः ॥४॥ 'आग्नेय्याम्' ॐ ह्रीं लोहितेशकालरात्रीभ्यां नमः॥५॥'नैर्ऋत्याम्' ॐ ह्रीं शिखीशकुब्जिकाभ्यां नमः॥६॥'वायव्याम्' ॐ ह्रीं छागलेशकपर्दिनीभ्यां नमः॥७॥ 'ऐशान्याम्' ॐ ह्रीं द्विरंडेशवज्रिणीभ्यां नमः॥८॥'पूर्वाग्निमध्ये'महाकालेशजयाभ्यां नमः॥९॥'दक्षिणनैर्ऋतमध्ये'ॐ ह्रीं त्वगात्मभ्यांवालेशमुमुखेश्वरीभ्यां नमः ॥१०॥ 'पश्चिमवायव्यमध्ये' ॐ ह्रीं असृगात्मभ्यां भुजंगेशरवेतीभ्यां नमः ॥११॥ 'उत्तरेशानयोर्मध्ये' ॐ ह्रीं मांसात्मभ्यां पिनाकीशमाधवीभ्यां नमः॥१२॥ 'आग्नेयदक्षिणमध्ये' ॐ ह्रीं मेदात्मभ्यां खड्गीशवारुणीभ्यां नमः॥१३॥ 'नैर्ऋतपश्चिममध्ये' ॐ ह्रीं अस्थ्यात्मभ्यां वकेशवायवीभ्यां नमः॥१४॥'वायुसोममध्ये' ॐ ह्रीं मज्जात्मभ्यां श्वेतेशरक्षोवधारिणीभ्यां नमः ॥ १५ ॥ 'ईशानपूर्वमध्ये' ॐ ह्रीं शुक्रात्मभ्यां भृग्वीशसहजाभ्यां नमः ॥ १६ ॥ ततो भूपुराद्बहिः दक्षिणभागे

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

लकुलेशादित्रयं पूजयेत् । ॐ ह्रीं प्राणात्मभ्यां लकुलीशलक्ष्मीभ्यां नमः ॥ १ ॥ ॐ ह्रीं शक्त्यात्मभ्यां शिवेशव्यापिनीभ्यां नमः ॥ २ ॥ ॐ ह्रीं क्रोधात्मभ्यां संवर्तकेशमहामायाभ्यां नमः ॥ ३ ॥ 'ईशानभागे' ॐ ह्रीं योगिनीसहितेभ्यो दिव्ययोगीश्वरेभ्यो नमः ॥ ४ ॥ 'अग्नेयकोणे' ॐ ह्रीं योगिनीसहितेभ्योन्तरिक्षयोगीश्वरेभ्यो नमः ॥ ५ ॥ 'नैर्ऋतकोणे' ॐ ह्रीं योगिनीसहितभूमिस्थयोगीश्वरेभ्यो नमः ॥ ६ ॥ 'पूर्वे' गं गणपतये नमः ॥ ७ ॥ 'दक्षिणे' भैं भैरवाय नमः ॥ ८ ॥ 'पश्चिमे' क्षं क्षेत्रपालाय नमः ॥ ९ ॥ 'उत्तरे' दुं दुर्गायै नमः ॥ १० ॥ इति संपूज्य मूलमंत्रेण पुष्पांजलिं दत्त्वा ॥ इति नवमावरणम् ॥९॥ भूपुराद्बहिः पूर्वादिदशादिक्षु इन्द्रादीन् पूजयेत् ॥ ॐ ह्रीं लं इन्द्राय नमः ॥ १ ॥ ॐ ह्रीं रं अग्नयेनमः ॥ २ ॥ ॐ ह्रीं मं यमाय नमः ॥३॥ ॐ ह्रीं क्षं निर्ऋतये नमः ॥ ४ ॥ ॐ ह्रीं वं वरुणाय नमः ॥ ५॥ ॐ ह्रीं यं वायवे नमः ॥ ६ ॥ ॐ ह्रीं सं सोमाय नमः ॥७॥ ॐ ह्री हं ईशानाय नमः ॥८॥ ॐ ह्रीं आं ब्रह्मणे नमः ॥९॥ ॐ अं अनंताय नमः ॥१०॥ इति संपूज्य मूलमंत्रेण पुष्पांजलिं दद्यात् इति दशमावरणम् ॥१०॥ ततः पूर्वादिक्रमेण इन्द्रादीदिक्पालसमीपे स्वस्वायुधान्पूजयेत् तद्यथा—ॐ वज्राय नमः ॥१॥ॐ शक्तये नमः ॥ २ ॥ ॐ दंडाय नमः ॥ ३ ॥ ॐ खड्गाय नमः ॥ ४ ॥ ॐ पाशाय नमः ॥ ५ ॥ ॐ अंकुशाय नमः ॥ ६ ॥ ॐ गदायै नमः ॥ ७ ॥ ॐ त्रिशूलाय नमः ॥ ८ ॥ ॐ पद्माय नमः ॥ ९ ॥ ॐ चक्रायनमः ॥१०॥ इति संपूज्य मूलेन पुष्पांजलिं दद्यात्॥ इति एकादशमावरणम् ॥ ११ ॥ एवमावरणपूजां कृत्वा मूलमंत्रेण धूपदीपनैवेद्यतांबूलदक्षिणानीराजनादिभिर्भैरवं संपूज्य स्तवराजेन स्तुत्वा साष्टांगं प्रणम्य यथाविधि जपं कुर्यात् । अस्य पुरश्चरणमेकविंशतिलक्षात्मकम् ॥ ततो जपांते मधुरसंयुतैस्तिलै

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

र्दशांशं होमं कृत्वा तत्तद्दशांशेन तर्पणमार्जनब्राह्मणभोजनानि कुर्य्यात् । होमांते वा चतुर्दश्यां वाष्टम्यां मध्यरात्रे महाबलिदानं कार्य्यम् । एवं सिद्धे मंत्रे स्वकार्यार्थं प्रयोगान्साधयेत् । तथा च (शारदातिलके) " वर्णलक्षं जपेन्मंत्रं हविष्याशी जितेंद्रियः ॥ तद्दशांशं प्रजुहुयात्तिलैर्मधुरसंयुतैः॥१॥इति संपूजयेद्देवं वटुकं प्रोक्तवर्त्मना ॥ धर्मार्थकाममोक्षाणां पतिर्भवति मानवः॥२॥विघ्नदुर्गां समाराध्य बलिं दत्त्वा विधानतः॥काम्यानि साधयेन्मंत्री यथोक्तां सिद्धिमाप्नुयात् ॥३॥ शाल्यन्नं पललं सर्पिर्लाजाचूर्णानि शर्करा॥ गुडमिक्षुरसापूपैर्मध्वक्तैः परिमिश्रितैः ॥ ४ ॥ कृत्वा कवलमाराध्य देवं प्रागुक्तवर्त्मना ॥ रक्तचंदनपुष्पाद्यैर्निशि तस्मै बलिं हरेत ॥ ५ ॥ ततः सिध्यंति कार्याणि बलिनानेन मंत्रिणः ॥ जुहुयात्सर्पिषा मंत्री यथोक्तां सिद्धिमाप्नुयात् ॥६॥ वश्याय जुहुया दिक्षु शकलैर्वशयेज्जनान् ॥ जुहुयात्पुत्रलाभाय प्रफुल्लैः कैरवैः सुधीः ॥ ७ ॥ धनधान्यादिसंपत्त्यै जुहुयात्तिलतंडुलैः ॥ बिल्वप्रसू नैर्जुहुयान्महतीं विंदति श्रियम् ॥८॥ लाजैर्मधुरसंमिश्रैर्वशयेद्वनिताजनान् ॥ वृष्टिकामेन होतव्यं वेतसानां समिद्वरैः ॥९॥ अन्नेन जुहुयान्नित्यं धनधान्यादिसंपदे ॥ वश्याय जुहुयान्मंत्री मधुना दिवसत्रयम् ॥१०॥ रोगोक्तौषधहोमेन रोगा नश्यंति तत्क्षणात् ॥ कृत्याद्रोहे ग्रहद्रोहे भूतापस्मारसंभवे ॥ ११ ॥ व्याघ्राजिने समासीनो जुहुयादयुतं तिलैः ॥ भूतादयः पलायंते नेक्षंते तां दिशं भयात् ॥१२॥ कृष्णाष्टमीं समारभ्य यावत्स्यात्तच्चतुर्दशी ॥ तिलैस्तंडुलसंमिश्रैर्मधुरत्रयलोलितैः ॥१३॥ त्रिसहस्रं प्रतिदिनं जुहु यात्संस्कृतेऽनले ॥ वटुकेश्वरमभ्यर्च्य भक्षभोज्यफलान्वितम् ॥१४॥ नित्यं निवेद्य नैवेद्यं मध्यरात्रे बलिं हरेत् ॥ एवं जपित्वा प्रयतः सहस्राण्येकविंशतिम् ॥१५॥ समाप्तिदिवसे रात्रावजं हुत्वा बलिं हरेत् ॥ ततः कारयिता राजा तोषयेत्साधकं धनैः ॥ १६ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

विधिनानेन संतुष्टो वटुकेशः प्रयच्छति ॥ तेजो बलं यशः पुत्रान्कांतिं लक्ष्मीमरोगताम् ॥ १७ ॥ नश्यंति शत्रवः सर्वे वर्द्धते बंधुबांधवाः ॥ अवग्रहो न जायेत विषये तस्य भूपतेः ॥ १८ ॥ जुहुयात्केवलैर्लोणैरयुतं स्तंभनेच्छया ॥ निविडादिविमोक्षाय प्रयोगोयमुदाहृतः ॥ १९ ॥ वचाचूर्णपलं जप्तं गव्येनाज्येन लोलितम् ॥ विभज्य भक्षयेद्ध्या मंडलात्पुत्रकांक्षिणी ॥२० ॥ विन्नीतं पुत्रमाप्नोति मेधारोग्यबलान्वितम् ॥ आदावंते प्रयोगस्य वटुकाय बलिं हरेत् ॥ २१ ॥ द्विविधो बलिराख्यातो राजसः सात्त्विको बुधैः ॥ राजसो मांसरक्ताढ्यः पलत्रयसमन्वितः ॥ २२ ॥ मुद्गपायससंयुक्तो मधुरत्रयलोलितः ॥ सात्त्विको मांसरहितः शेषमन्यत्पुरोक्तवत् ॥ २३॥ ब्राह्मणो विनयः शुद्धः सात्त्विकं बलिमाहरेत् ॥ साधयेन्मनुनानेन भस्मसर्वार्थसिद्धिदम् ॥२४॥ उशीरं चंदनं कोष्ठं घनसारं सकुंकुमम्॥श्वेतार्कमूलं वाराही लक्ष्मीक्षीरमहीरुहम् ॥२५॥ त्वचो विल्वतरोर्मूलं शोषयित्वा सुचूर्णयेत् ॥ चूर्णं व्योम्नि गृहे तेन गोमयेन विमिश्रितम् ॥२६॥ कृत्वा पिंडानि संशोष्य संस्कृते हव्यवाहने ॥ मूलेन दग्ध्वा तद्भस्म शुद्धपात्रे विनिक्षिपेत् ॥२७॥ केतकीमालतीपुष्पैर्वासयेद्भस्म शोधितम् ॥ अयुतं प्रजपेन्मंत्रं स्पृष्ट्वा भस्म सुपूजितम्॥२८॥एतदादाय दिनशः प्रातः पुंड्रं करोति यः॥तस्य रोगाः प्रणश्यंति कृत्याद्रोहमहाग्रहाः ॥२९॥ रिपुचौरमृगादिभ्यो भयमस्य न जायते ॥ वर्द्धते संपदः सर्वाः पूज्यते सकलैर्जनैः॥३०॥राजा वश्यो भवेत्तस्य सामात्यः सपरिच्छदः॥ अभिषेकं प्रकुर्वीत राज्ञो विजयकांक्षिणः॥३१॥पूर्वोक्तमंडले कृते वितानध्वजशोभिते ॥ सर्वतोभद्रमालिख्य कर्णिकां तस्य पूरयेत् ॥३२॥ अष्टद्रोणप्रमाणेन शालिभिः शोधितैः शुभैः॥ तदर्द्धास्तण्डुलांस्तस्मिन्न्यस्य दूर्वाकृतान्वितान् ॥ ३३ ॥ हेमादिविहितं कुंभं नवरत्नसमन्वितम् ॥ संस्थाप्य विमलैस्तोयैरापूर्या

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

स्मिन्विनिःक्षिपेत् ॥ ३४ ॥ क्षीरद्रुमप्रवालानि लक्ष्मीदूर्वा सहां पुनः ॥ कर्पूरं चंदनं विल्वमुशीरं कुंकुमं पुनः ॥ ३५ ॥ कंकोल मगुरुं जातिं मल्लिकां चंपकोत्पलैः ॥ गोमेदं दाडिमं पश्चात्पट्टयुग्मेन वेष्टयेत् ॥३६॥ तस्मिन्नावाह्य वटुकं राजसं संप्रपूजयेत् ॥ बहिरष्टसु कुंभेषु भैरवानष्ट पूजयेत् ॥ ३७ ॥ त्रयोदशसु कुंभेषु त्रयोदश गणान्यजेत् ॥ बाह्ये दशसु कुंभेषु लोकेशानर्चयेत्सुधीः ॥ ३८ ॥ तद्बहिर्द्वयष्टकुंभेषु श्रीकंठादीन्सुरेश्वरान् ॥ पंचत्रिंशद्घटेष्वेवं चैत्कादिवर्णेश्वरान्क्रमात् ॥ ३९ ॥ इति गंधादिभिः सम्यक् पंचावरणमर्चयेत् ॥ अयुतं प्रजपेत्स्पृष्ट्वा तान्घटान्देशिकोत्तमः ॥ ४० ॥ पायसैः सर्पिषा शुद्धैः । तिलैर्दशशतं पृथक् ॥ जुहुयात्तान्घटान्स्पृष्ट्वा प्रत्यहं बलिमाहरेत् ॥ ४१ ॥ राजसोक्तप्रकारेण रात्रौ देशिकसत्तमः ॥ सुदिने शोभने लग्ने वाचयित्वा द्विजन्मभिः ॥ ४२ ॥ स्वस्तिमंगलवाक्यानि विशुद्धैर्वेदपारगैः ॥ नदत्सु पंचवाद्येषु प्रणम्य बटुकेश्वरम् ॥ ४३ ॥ जितेंद्रियं शुद्धकायं राजानं ब्राह्मणप्रियम् ॥ आस्तिकं सत्यवचनमभिषिंचेत्प्रसन्नधीः ॥ ४४ ॥ अभिषिक्तो नरपतिः प्रणिपत्य गुरुं परम् ॥ भूयसीं दक्षिणां दद्यात्प्रसीदति तथा गुरुः ॥ ४५ ॥ राजाभिषिक्तो भवति साक्षाद्भूमिपुरंदरः ॥ परान् विजयते भूपान्स्तूयते सकलैर्नरैः ॥ ४६ ॥ कृताभिषेकः षण्मासं प्रतिमासं महीपतिः ॥ चतुरंभोधिवलयां शास्ति सर्वां वसुंधराम् ॥ ४७ ॥ गजाश्वशान्तिविधये तेषां शालासु साधकः ॥ कुंडं कृत्वा विधानेन होमं कुर्य्याद्यथाविधि ॥ ४८ ॥ पायसाज्यैस्तिलैर्विद्वानयुतत्रितयावधि ॥ ब्राह्मणान्भोजयेन्नित्यं भक्ष्यभोज्यफलादिभिः ॥ ४९ ॥ प्राक्प्रोक्तविधिना कुंभान्स्थापयित्वा त्र देशिकः ॥ अभ्यर्च्य गंधपुष्पाद्यैस्तज्जलैः प्रोक्षयेद्द्विजान् ॥ ५० ॥ अश्वशालामनेनैव वर्द्धते ते दिनेदिने ॥ युद्धेषु

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

महती शक्तिर्जायते पूर्वतोधिका ॥ ५१ ॥ सर्वरोगाः प्रणश्यन्ति कृत्याद्रोहाः परैः कृताः ॥ अस्मात्परतरा रक्षा नास्ति तेषां महीतले ॥ ५२ ॥ अभिषिच्य महीपालं परेषां विजयोद्यतम् ॥ उक्तेन विधिना मंत्री यामिन्यां बलिमाहरेत् ॥ ५३ ॥ अन्यूनांगमजं हत्वा राजसं प्राणुदाहृतम् ॥ बलिप्रदानसमये रिपूणां सर्वसैन्यकम् ॥ ५४ ॥ निवेदयेद्बलित्वेन वटुकाय विशिष्ट धीः ॥ विदर्भयेच्छत्रुनाम्ना बलिमंत्रं तथा सुधीः ॥ ५५ ॥ शत्रुपक्षस्य रुधिरं पिशितं च दिने दिने ॥ भक्षयस्व गणैः सार्द्धं सारमेयसमन्वित ॥ ५६ ॥ बलिमंत्रोयमाख्यातः सर्वेषां विजयप्रदः ॥ अनेन बलिना हृष्टो वटुकः परसैन्यकम् ॥ ५७ ॥ सर्वं गणेभ्यो विभजेदामिषं क्रुद्धमानसः ॥ एवं कृते परबलं क्षीयते नात्र संशयः ॥ विजयश्रियमेतेन राजा प्राप्नोत्ययत्नतः ॥ ५८ ॥ श्रीमायास्मरकूटमत्र विलिखेन्मध्ये दलेष्वष्टसु द्विः प्रोक्तं वटुकाय शब्दमपरान्मंत्रस्य वर्णान् बहिः ॥ अष्टद्वंद्वदलेषु तद्बहिरधस्तत्संख्यपत्रेष्वथ द्वात्रिंशद्दलकादिसांतसहितं यंत्रं लिखेद्भूपुरे ॥ ५९ ॥ आपदुद्धारणं यंत्रमपमृत्युभयापहम् ॥ सर्वसंपत्प्रदं नित्यं सर्व सौभाग्यदायकम् ॥ ६० ॥ रक्षाकरं ग्रहार्तानां राज्ञां विजयवर्द्धनम् ॥ आपदुद्धारणादस्मादापदुद्धारणक्षमः ॥ ६१ ॥ तंत्रेषु नास्ति मंत्रोन्य इत्याहुर्मंत्रवेदिनः॥इति रुद्रयामलशारदातिलकोक्तमापदुद्धारणवटुकभैरवविधानम् ॥ अथ वटुकभैरवब्रह्मकवचं (रुद्रयामले) श्रीदेव्युवाच ॥ " भगवन् सर्ववेत्ता त्वं देवानां प्रीतिदायकम् ॥ भैरवं कवचं ब्रूहि यदि चास्ति कृपा मयि ॥ १ ॥ प्राणत्यागं करिष्यामि यदि नो कथयिष्यति ॥ सत्यं सत्यं पुनः सत्यं सत्यमेव न संशयः ॥ २ ॥ इत्थं देव्या वचः श्रुत्वा प्रहस्याति स्वयं प्रभुः ॥ उवाच वचनं तत्र देवदेवो महेश्वरः ॥ ३ ॥ ईश्वर उवाच ॥ वटुकस्यकवचं दिव्यं शृणु यत्प्राणवल्लभे ॥ चंडिकातंत्रसर्वस्वं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वटुकस्य विशेषतः ॥ ४ ॥ तत्र मंत्राद्यक्षरं तु वासुदेवस्वरूपकम् ॥ शंखवर्णद्वयो ब्रह्मा वटुकं चंद्रशेखरः ॥ ५ ॥ आपदु
द्धारणो देवः भैरवः परिकीर्तितः ॥ प्रवक्ष्यामि समासेन चतुर्वर्गप्रसिद्धये ॥ ६ ॥ प्रणवं कामदं विद्याल्लज्जाबीजं च सिद्धिदम् ॥
वटुकायेति विज्ञेयं महापातकनाशनम् ॥ ७ ॥ आपदुद्धारणायेति त्वापदुद्धारणं नृणाम् ॥ कुरुद्वयं महेशानि मोहने परिकीर्तितम्
॥ ८ ॥ वटुकाय महेशानि स्तम्भने परिकीर्तितम् ॥ लज्जाबीजं तथा विद्यान्मुक्तिदं परिकीर्तितम् ॥ ९ ॥ द्वाविंशत्यक्षरो मंत्रः
क्रमेण जगदीश्वरि ॥ " ॐ अस्य श्रीवटुकभैरवब्रह्मकवचस्य भैरवऋषिः । अनुष्टुप् छंदः । श्रीवटुकभैरवो देवता । मम वटुकभैरव
प्रसादसिद्ध्यर्थं जपे विनियोगः । ॐ पातु शिरसि नित्यं पातु ह्रीं कंठदेशके ॥ १० ॥ वटुकाय पातु नाभौ चापदुद्धारणाय
च ॥ कुरुद्वयं लिंगमूले त्वाधारे वटुकाय च ॥ ११ ॥ सर्वदा पातु ह्रीं बीजं बाह्वोर्युगलमेवच ॥ षडंगसहितो देवो नित्यं
रक्षतु भैरवः ॥ १२ ॥ ॐ ह्रीं वटुकाय सततं सर्वांगं मम सर्वदा ॥ ॐ ह्रीं पादौ महाकालः पातु वीरासनो हृदि ॥
॥ १३ ॥ ॐ ह्रीं कालः शिरः पातु कंठदेशे तु भैरवः ॥ गणराट् पातु जिह्वायामष्टभिः शक्तिभिः सह ॥ १४ ॥ ॐ ह्रीं दंडपाणि
र्गुह्यमूले भैरवीसहितस्तथा ॥ ॐ ह्रीं विश्वनाथः सदा पातु सर्वांगं मम सर्वदा ॥ १५ ॥ ॐ ह्रीं अन्नपूर्णा सदा पातु चांसौ रक्षतु
चंडिका ॥ असितांगः शिरः पातु ललाटं रुरुभैरवः ॥ १६ ॥ चंडभैरवः पातु वक्त्रं कंठं श्रीक्रोधभैरवः ॥ उन्मत्तभैरवः पातु हृद
यं मम सर्वदा ॥ १७ ॥ नाभिदेशे कपाली च लिंगे भीषणभैरवः ॥ संहारभैरवः पातु मूलाधारं च सर्वदा ॥ १८ ॥ बाहुयुग्मं सदा
पातु भैरवो मम केवलम् ॥ हंसबीजं पातु हृदि सोहं पाणी च रक्षतु ॥ १९ ॥ प्राणापानौ समानं च उदानं व्यानमेव च ॥ रक्षंतु

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

हारमूले च दशदिक्षु समंततः ॥२०॥ प्रणवः पातु सर्वांगं लज्जाबीजं महाभये ॥ इति श्रीब्रह्मकवचं भैरवस्य प्रकीर्तितम् ॥२१॥ चतुर्वर्गप्रदं नित्यं स्वयं देवप्रकाशितम् ॥ यः पठेच्छृणुयान्नित्यं धार्य्यते कवचोत्तमम् ॥ २२ ॥ सदानंदमयो भूत्वा लभते परमं पदम् ॥ य इदं कवचं देवि चिंतयेन्मन्मुखोदितम् ॥ २३॥ कोटिजन्मार्जितं पापं विनश्यति च तत्क्षणात् ॥ जलमध्येऽग्निमध्ये वा दुर्ग्रहे शत्रुसंकटे ॥ २४ ॥ कवचस्मरणाद्देवि सर्वत्र विजयी भवेत् ॥ भक्तियुक्तेन मनसा कवचं पूजयेद्यदि ॥ २५ ॥ कामतुल्यस्तु नारीणां रिपूणां च यमोपमः ॥ तस्य पादांबुजद्वंद्वं राज्ञां मुकुटभूषणम् ॥ २६॥ तस्य भूतिं विलोक्यैव कुबेरोपि तिरस्कृतः ॥ अस्य विज्ञानमात्रेण मंत्रासिद्धिर्न संशयः ॥ २७ ॥ इदं कवचमज्ञात्वा यो जपेद्भटुकं नरः ॥ न चाप्नोति फलं तस्य परं नरकमाप्नुयात्॥२८॥ मन्वंतरत्रयं स्थित्वा तिर्यग्योनिषु जायते॥इह लोके महारोगी दारिद्र्येणातिपीडितः॥२९॥ शत्रूणां वशगो भूत्वा करपात्री भवेज्जडः॥ देयं पुत्राय शिष्याय शांताय प्रियवादिने॥३०॥कार्पण्यरहितायालं वटुभक्तिरताय च॥योपराग्ये प्रदाता वै तस्य तस्याति सत्वरम् ॥३१॥आयुर्विद्या यशो धर्मं बलं चैव न संशयः॥इति ते कथितं देवि गोपनीयं स्वयोनिवत्॥३२॥इति श्रीरुद्रयामले श्रीवटुकभैरव ब्रह्मकवचं सम्पूर्णम्॥शुभमस्तु॥" "अथ वटुकभैरवस्तवराजो लिख्यते॥ (रुद्रयामले) मेरुपृष्ठे सुखासीनं देवदेवं त्रिलोचनम्॥शंकरं परिपप्रच्छ पार्वती परमेश्वरम्॥१॥श्रीपार्वत्युवाच॥य एष भैरवो नाम आपदुद्धारको मतः॥त्वया च कथितो देव भैरवः कल्प उत्तमः ॥२॥तस्य नामसहस्राणि प्रयुतान्यर्बुदानि च॥सारमुद्धृत्य तेषां वै नामाष्टशतकं वद॥३॥यानि संकीर्तयन्मर्त्यः सर्वदुःखविवर्जितः॥ सर्वान्कामानवाप्नोति साधकः सिद्धिमेवच्च ॥ ४ ॥ ईश्वरउवाच ॥ शृणु देवि प्रवक्ष्यामि भैरवस्य महात्मनः ॥ आपदुद्धारणस्येह

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नामाष्टशतमुत्तमम् ॥ ५ ॥ सर्वपापहरं पुण्यं सर्वापद्विनिवारणम् ॥ सर्वकामार्थदं देवि साधकानां सुखावहम् ॥ ६ ॥ सर्वमंगल मांगल्यं सर्वोपद्रवनाशनम् ॥ आयुःकरं पुष्टिकरं श्रीकरं च यशस्करम् ॥ ७ ॥" तत्र प्रयोगः ॥ ॐ अस्य श्रीवटुकभैरवनामाष्टश तस्तोत्रमंत्रस्य बृहदारण्यक ऋषिः । अनुष्टुप् छंदः । श्रीवटुकभैरवो देवता अष्टबाहुमितिबीजम् । त्रिनयनमिति शक्तिः । प्रणवः कीलकम् । ममाभीष्टसिद्ध्यर्थं जपे विनियोगः ॥ ॐ बृहदारण्यकऋषये नमः । शिरसि ॥१॥ ॐ अनुष्टुप्छंदसे नमः । मुखे॥२॥ ॐ श्रीवटुकभैरवदेवतायै नमः । हृदये ॥ ३ ॥ ॐ अष्टबाहुमिति बीजाय नमः । गुह्ये ॥४॥ ॐ त्रिनयनेति शक्तये नमः । पादयोः ॥५॥ ॐ कीलकाय नमः । नाभौ ॥ ६ ॥ ॐ विनियोगाय नमः । सर्वांगे ॥ ७ ॥ इति ऋष्यादिन्यासः ॥ ॐ ह्रां वां ईशानः सर्व विद्यानामीश्वरः सर्वभूतानां ब्रह्माधिपतिर्ब्रह्मणोधिपतिर्ब्रह्मा शिवो मे अस्तु सदाशिवोम् । अंगुष्ठाभ्यां नमः ॥ १ ॥ ॐ ह्रीं वीं तत्पु रुषाय विद्महे महादेवाय धीमहि ॥ तन्नो रुद्रः प्रचोदयात् ॥ तर्जनीभ्यां नमः ॥ २ ॥ ॐ ह्रूं वूं अघोरेभ्योथघोरेभ्यो घोरघोरतरेभ्यः सर्वेभ्यः सर्वशर्वेभ्यो नमस्तेअस्तु रुद्ररूपेभ्यः ॥ मध्यमाभ्यां नमः॥३॥ ॐ ह्रैं वैं वामदेवाय नमो ज्येष्ठाय नमः श्रेष्ठाय नमो रुद्राय नमः कालाय नमः कलविकरणाय नमो बलविकरणाय नमः बलाय नमो बलप्रमथनाय नमः सर्वभूतदमनाय नमो मनोन्मनाय नमः अनामिकाभ्यां नमः ॥४॥ ॐ ह्रौं वौं सद्योजातं प्रपद्यामि सद्योजाताय वै नमो नमः ॥ भवेभवेनातिभवेभवस्वमांभवोद्भवाय नमः कनिष्ठिकाभ्यां नमः ॥ ५ ॥ ॐ ह्रः वः पंचवक्त्राय महादेवाय नमः । करतलकरपृष्ठाभ्यां नमः ॥६॥ इति करन्यासः । एवं हृदयादिन्यासं कृत्वा देहन्यासं कुर्यात् ॥ ॐ ह्रीं भैरवाय नमः । मूर्ध्नि ॥ १ ॥ ॐ ह्रीं भीमदर्शनाय नमः । ललाटे ॥२॥ ॐ ह्रीं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भूताश्रयाय नमः । नेत्रयोः ॥३॥ ॐ ह्रीं भूतनायकाय नमः । कर्णयोः ॥ ४ ॥ ॐ ह्रीं त्रिशूलाय नमः । नासिकायाम् ॥ ५ ॥
ॐ ह्रीं रक्तपाय नमः । जिह्वायाम् ॥ ६ ॥ ॐ ह्रीं नागहारनागयज्ञोपवीतिकाय नमः । कंठमध्ये ॥७॥ ॐ ह्रीं क्षेत्रज्ञाय नमः ।
करयोः ॥८॥ ॐ ह्रीं क्षेत्रपालाय नमः । हृदये ॥ ९ ॥ ॐ ह्रीं क्षेत्रदाय नमः । नाभौ ॥ १० ॥ ॐ ह्रीं सर्वौघनाशनाय नमः ।
कट्याम् ॥ ११ ॥ ॐ ह्रीं त्रिनेत्राय नमः । ऊर्वोः ॥ १२॥ ॐ ह्रीं रक्तपायिने नमः । जंघयोः ॥ १३ ॥ ॐ ह्रीं देवदेवेशाय नमः
पादयोः ॥ १४ ॥ ॐ ह्रीं वटुकाय नमः । सर्वांगे ॥ १५ ॥ इति देहन्यासः । ॐ ह्रीं भैरवाय नमः । अंगुष्ठाभ्यां नमः ॥१॥
ॐ ह्रीं भीमदर्शनाय० तर्जनीभ्यां नमः ॥ २ ॥ ॐ ह्रीं भूतश्रेष्ठाय० मध्यमा० ॥ ३ ॥ ॐ ह्रीं भूतनायकाय० अनामिका०
॥ ४ ॥ ॐ ह्रीं क्षत्रियाय० कनि० ॥ ५ ॥ ॐ ह्रीं क्षेत्रपालाय० करत० ॥ ६ ॥ ॐ ह्रीं क्षेत्रज्ञाय० दिग्दिशायाम् ॥ ७ ॥
ॐ भैरवाय नमः । सर्वांगे ॥८॥ इति करन्यासः । ॐ ह्रीं भैरवाय नमः शिरसि ॥ १ ॥ ॐ ह्रीं भीमदर्शनाय० ललाटे ॥ २ ॥
ॐ ह्रीं भूतहननाय नमः । नेत्रयोः ॥ ३ ॥ ॐ ह्रीं सारमेयानुगाय० भ्रुवोः ॥ ४ ॥ ॐ ह्रीं भूतनाथाय० कर्णयोः ॥ ५ ॥
ॐ ह्रीं प्रेतवाहकाय नमः कपोलयोः ॥ ६ ॥ ॐ ह्रीं भस्मांगाय नमः । नासापुटे ॥ ७ ॥ ॐ ह्रीं सर्पभूषणाय० ओष्ठयोः ॥८॥
ॐ ह्रीं आदिनाथाय० मुखे ॥ ९ ॥ ॐ ह्रीं शक्तिहस्ताय० । गले ॥ १० ॥ ॐ ह्रीं दैत्यशमनाय० स्कंधयोः ॥ ११ ॥ ॐ ह्रीं
अतुलतेजसे नमः । बाह्वोः ॥१२॥ ॐ ह्रीं कपालिने नमः । करयोः ॥ १३ ॥ ॐ ह्रीं मुंडमालिने नमः । हृदये ॥१४॥ ॐ ह्रीं
शांताय० वक्षःस्थले ॥ १५ ॥ ॐ ह्रीं कामचारिणे नमः । स्तनयोः ॥ १६ ॥ ॐ ह्रीं सदातुष्टाय० उदरे ॥ १७ ॥ ॐ ह्रीं क्षेत्रे

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

शाय० पार्श्वयोः ॥ १८ ॥ ॐ ह्रीं क्षेत्रपालाय० पृष्ठे ॥ १९ ॥ ॐ ह्रीं क्षेत्रज्ञाय० नाभौ ॥ २० ॥ ॐ ह्रीं पापौघनाशनाय० कट्याम् ॥ २१ ॥ ॐ ह्रीं वटुकाय० लिंगे ॥ २२ ॥ ॐ ह्रीं रक्षाकराय० गुदे ॥ २३ ॥ ॐ ह्रीं रक्तलोचनाय० ऊर्वोः ॥ २४ ॥ ॐ ह्रीं घुर्घुराय नमः । जानुनोः ॥ २५॥ ॐ ह्रीं रक्तपायिने नमः । जंघयोः ॥ २६ ॥ ॐ ह्रीं सिद्धपादुकाय० गुल्फयोः ॥२७॥ ॐ ह्रीं सुरेश्वराय० पादपृष्ठे ॥ २८ ॥ ॐ ह्रीं आपदुद्धारकाय० आपादतलमस्तकपर्यंतम् ॥२९॥ ॐ ह्री क्ष्म्रौं ब्लौं ह्रीं ॐ स्वाहा आपदुद्धारणभैरवाय नमः सर्वांगे ॥ इति व्यापकं कुर्यात् ॥ इत्यंगन्यासः ॥ अथ दिङ्न्यासः । ॐ ह्रीं डमरुहस्ताय नमः । पूर्वे ॥ १ ॥ॐ ह्रीं दंडधारिणे नमः। दक्षिणे ॥ २ ॥ ह्रीं खड्गहस्ताय नमः । पश्चिमे ॥ ३ ॥ ॐ ह्रीं घंटावादिने नमः । उत्तरे ॥ ४ ॥ ॐ ह्रीं अग्निवर्णाय० आग्नेय्याम् ॥ ५ ॥ ॐ ह्रीं दिगंबराय नमः । नैर्ऋत्याम् ॥ ६ ॥ ॐ ह्रीं सर्वभूतस्थाय० वायव्याम् ॥ ७ ॥ ॐ ह्रीं अष्टसिद्धिदाय० ऐशान्याम्॥८॥ ॐ ह्रीं खेचारिणे नमः । ऊर्ध्वम् ॥९॥ ॐ ह्रीं रौद्ररूपिणे० पाताले॥१०॥ इति दिग्न्यासः ॥ ॐ ह्रीं रुद्राय नमः । अंगुष्ठाभ्यां नमः ॥ १ ॥ ॐ ह्रीं शिखीसखाय० तर्ज्जं० ॥२॥ ॐ ह्रीं शिवाय० म० ॥ ३ ॥ ॐ ह्रीं त्रिशूलिने० अना० ॥ ४ ॥ ॐ ह्रीं ब्रह्मणे० कनि० ॥ ५ ॥ ॐ ह्रीं त्रिपुरांतकाय नमः । करतलयोः ॥ ६ ॥ ॐ ह्रीं मांसाशिने० करा ग्रेषु ॥७॥ ॐ ह्रीं दिगंबराय नमः । करपृष्ठयोः ॥ ८ ॥ इति करन्यासः ॥ ॐ ह्रीं भूतनाथाय नमः । हृदये ॥ १ ॥ ॐ ह्रीं आदिनाथाय नमः । मूर्ध्नि ॥२॥ ॐ ह्रीं आनंदनाथाय० शिखायाम्॥३॥ ॐ ह्रीं सिद्धशावरनाथाय० कवचायहुं ॥४॥ॐ ह्रीं सहजानंदनाथाय० नेत्रयोः ॥ ५ ॥ ॐ ह्रीं श्रीआनंदनाथाय० अस्त्राय० इति षडंगन्यासः ॥ ॐ अस्य श्रीवटुकभैरवमंत्रस्य

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

बृहदारण्यक ऋषिः । अनुष्टुप् छंदः । श्रीवटुकभैरवो देवता वं बीजम् । ह्रीं शक्तिः । ॐ कीलकम् । श्रीवटुकभैरवप्रसादसिद्धयर्थे स्तोत्रादौ अष्टोत्तरशतमूलमंत्रजपे विनियोगः ॥ अथ मंत्रन्यासः । ॐ ह्रीं अंगु० ॥ १ ॥ ॐ वटुकाय० तर्ज० ॥ २ ॥ ॐ आप दुद्धारणाय मध्य० ॥ ३ ॥ ॐ कुरुकुरु अना० ॥ ४ ॥ ॐ ह्रीं कनिष्ठिकाभ्यां नमः ॥ ५ ॥ एवं न्यासविधिं कृत्वा ध्यायेत् । अथ ध्यानम्–शुद्धस्फटिकसंकाशं सहस्रादित्यवर्चसम् ॥ नलिजीमूतसंकाशं नीलांजनसमप्रभम् ॥ अष्टबाहुं त्रिनयनं चतुर्वाहुं द्विबाहुकम् ॥ १ ॥ दंष्ट्राकरालवदनं नूपुरारावसंकुलम् ॥ भुजंगमखिलं देवमग्निवर्णशिरोरुहम् ॥ २ ॥ दिगंबरं कुमारेशं वटुकाख्यं महाबलम् ॥ खट्वांगमसिपाशं च शूलं दक्षिणभागतः ॥ ३ ॥ डमरुं च कपालं च वरदं भुजगं तथा ॥ आत्मवर्णसमोपेतं सारमेयसमन्वितम् ॥ ४ ॥ एवं ध्यात्वा "ॐ ह्रीं भैरवभैरवभयकरहरमारक्षरक्षहुंफट्स्वाहा" इति मंत्रेण प्रार्थयित्वा पूर्वोक्तयंत्रपीठे आवाहनादिमुद्रां प्रदर्शयेत् । षोडशोपचारैरभ्यर्च्यबलिदानं कुर्यात् तद्यथा–श्रीवटुकप्रीतये बलिदानमहं करिष्ये । इति संकल्प्य गणपतिं दुर्गां रक्तैश्चंदनाक्षतपुष्पैरभ्यर्च्य देवस्याग्रे त्रिकोणं चतुरस्रं मंडलं कृत्वा तत्र गंधाद्यैरभ्यर्च्य बलिपात्रे माषभक्तं पायसान्नं मोदकं चणकादीनि च कवलाकारं संपादितं सदीपकं निधाय गंधपुष्पाभ्यां मूलांते बलिरूपाय नमः इति बलिं संपूज्य देवं तत्र संचिंत्य हस्ते जलमादाय मूलमंत्रमुच्चार्य भूमौ निक्षिप्य स्वहस्ते बलिमादाय देवाय समर्पयेत्॥ इति बलिदानम् ॥ अथ पाठप्रकारः । ततः आचम्य प्राणानायम्य देशकालौ संकीर्त्य मम सकलकामनासिद्धयर्थं श्रीवटुकभैरवस्तोत्रस्यैकादशसहस्रपुरश्चरणांगत्वेन प्रतिस्तोत्रं मूलमंत्रस्याष्टोत्तरशतसंख्यजपसंपुटितपंचाशत्संख्यपाठमहं करिष्ये । वा यथाशक्त्येकप्रभृतिपाठमहं करिष्ये ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

इति संकल्प्य ततः मूलमंत्रमष्टोत्तरशतं जपेत् । मूलमंत्रः । "ॐ ह्रीं बटुकाय आपदुद्धारणाय कुरुकुरु वटुकाय ह्रीं ॐ" एवमष्टोत्तर १०८ शतमूलमंत्रजपं कृत्वा जपांते अनेन कृतजपेन श्रीवटुकभैरवः प्रीयतामिति जपं निवेद्य वटुकाय नमस्कृत्य पंचोपचारैः संपूज्य स्तोत्रं पठेत् । तद्यथा—ॐ ह्रीं भैरवो भूतनाथश्च भूतात्मा भूतभावनः ॥ क्षेत्रदः क्षेत्रपालश्च क्षेत्रज्ञः क्षत्रियो विराट् ॥ १ ॥ श्मशानवासी मांसाशी खर्पराशी स्मरांतकृत् ॥ रक्तपः पानपः सिद्धः सिद्धिदः सिद्धसेवितः ॥ २ ॥ कंकालः कालशमनः कला काष्ठातनुः कविः ॥ त्रिनेत्रो बहुनेत्रश्च तथा पिंगललोचनः ॥ ३ ॥ शूलपाणिः खड्गपाणिः कंकाली धूम्रलोचनः ॥ अभीरुर्भैरवीनाथो भूतपो योगिनीपतिः ॥ ४ ॥ धनदो धनहारी च धनवान्प्रीतिभावनः ॥ नागहारो नागपाशो व्योमकेशः कपालभृत् ॥ ५ ॥ कालः कपालमाली च कमनीयः कलानिधिः ॥ त्रिलोचनोज्वलन्नेत्रस्त्रिशिखी च त्रिलोकपः ॥ ६ ॥ त्रिनेत्रतनयो डिंभः शांतः शांतजनप्रियः ॥ वटुको वटुवेशश्च खट्वांगवरधारकः ॥ ७ ॥ भूताध्यक्षः पशुपतिः भिक्षुकः परिचारिकः ॥ धूर्तो दिगम्बरः शूरो हरिणः पांडुलोचनः ॥ ८ ॥ प्रशांतः शांतिदः सिद्धः शंकरः प्रियबांधवः ॥ अष्टमूर्तिर्निधीशश्च ज्ञानचक्षुस्तपोमयः ॥ ९ ॥ अष्टाधारः षडाधारः सर्पयुक्तः शिखीसखः ॥ भूधरो भूधराधीशो भूपतिर्भूधरात्मजः ॥ १० ॥ कंकालधारी मुंडी च नागयज्ञोपवीतवान् ॥ जृंभणो मोहनस्तंभी मारणः क्षोभणस्तथा ॥ ११ ॥ शुद्धनीलांजनप्रख्यो दैत्यहा मुंडभूषितः ॥ ॥ बलिभुग्बलिभुङ्नाथो बालो बालपराक्रमः ॥१२॥ सर्वापत्तारणो दुर्गो दुष्टभूतनिषेवितः ॥ कामी कलानिधिः कांतः कामिनीवशकृद्वशी ॥ १३ ॥ सर्वसिद्धिप्रदो वैद्यः प्रभुर्विष्णुरितीव हि ॥ अष्टोत्तरशतं नाम्नां भैरवस्य महात्मनः ॥ १४ ॥ मया ते कथितं देवि

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

रहस्यं सर्वकामदम् ॥ य इदं पठति स्तोत्रं नामाष्टशतमुत्तमम् ॥ १५ ॥ न तस्य दुरितं किंचिन्न च भूतभयं तथा ॥ न च मारीभयं तस्य ग्रहराजभयं तथा ॥ १६ ॥ न शत्रुभ्यो भयं क्वापि प्राप्नुयान्मानवः क्वचित् ॥ पातकानां भयं चैव पठेत्स्तोत्रमनुत्तमम्॥१७॥ मारीभये राजभये तथा चौराग्निजे भये ॥ औत्पातिके महाघोरे तथा दुःस्वप्नदर्शने ॥ १८॥ बंधने च तथा घोरे पठेत्स्तोत्रमनन्य धीः ॥ सर्वं प्रशमनं याति भयं भैरवकीर्तनात् ॥ १९ ॥ एकादशसहस्रं तु पुरश्चरणमुच्यते ॥ यस्त्रिसंध्यं पठेद्देवि संवत्सरमतंद्रितः ॥ २० ॥ स सिद्धिं प्राप्नुयादिष्टांदुर्लभामपि मानवः ॥ षण्मासं भूमिकामस्तु जपित्वा प्राप्नुयान्महीम् ॥ २१ ॥ राजशत्रुविनाशार्थं जपेन्मासाष्टकं पुनः ॥ रात्रौ वारत्रयं चैव नाशयत्येव शात्रवान् ॥ २२ ॥ जपेन्मासत्रयं मर्त्यो राजानं वशमानयेत् ॥ धनार्थी च सुतार्थी च दारार्थी यस्तु मानवः ॥ २३ ॥ जपेन्मासत्रयं देवि वारमेकं तथा निशि ॥ धनं पुत्रं तथा दारान्प्राप्नुयान्नात्र संशयः ॥ २४ ॥ रोगी रोगात्प्रमुच्येत बद्धो मुच्येत बंधनात् ॥ भीतो भयात्प्रमुच्येत देवि सत्यं न संशयः ॥ २५ ॥ निगडैश्चापि बद्धो यः कारागृहे निपातितः ॥ शृंखलाबंधनं प्राप्तः पठेच्चैव दिवा निशि ॥ २६ ॥ यंयं चिंतयते कामं तंतं प्राप्नोति निश्चितम् ॥ अप्रकाशं परं गुह्यं न देयं यस्य कस्य चित्॥२७॥ सुकुलीनाय शांताय ऋजवे दंभवर्जिते ॥ दद्यात्स्तोत्रमिमं पुण्यं सर्वकामफलप्रदम्॥२८॥ इति श्रुत्वा ततो देवी नामाष्टशतमुत्तमम् ॥ जजाप परया भक्त्या सदा सर्वेश्वरेश्वरी ॥ २९ ॥ भैरवोपि प्रहृष्टोभूत्सर्वलोकमहेश्वरः॥ वरं ददाति भक्तेभ्यः पठेत्स्तोत्रमनन्यधीः ॥ ३० ॥ संतोषं परमं प्राप्य भैरवस्य महात्मनः ॥ ३१ ॥ वारंवारं भुवनजननी प्रोच्य ते साधुवादः सत्यंसत्यं जगति सकले भैरवो देव एकः ॥ यांयां सिद्धिं भुवनजठरे कामयेन्मानवो यस्तास्तां सिद्धिं वितरति

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सदा भैरवः सुप्रसन्नः ॥ ३२ ॥ पाणिभ्यां परितः प्रपीड्य सुदृढं निश्चोत्यनिश्चोत्य च ब्रह्मांडं सकलं प्रचालितरसालोच्चैः फलाभं मुहुः ॥ पायंपायमपाययत्रिजगति मुन्मुत्तवत्तैरसैर्नृत्यंस्तांडवमंबरेण शिरसा पायान्महाभैरवः ॥३३॥ विभ्राणः शुभ्रवर्णं द्विगुणनव भुजं पंचवक्त्रं त्रिनेत्रं ज्ञानमुद्रेंद्रशस्त्रं सविशममृतकं शंखभैषज्यचापं शूलं खट्वांगवाणान् डमरुमसिगदावह्निमारोग्यमालामि ष्टाभीतिं च दोर्भिर्जयति खलु महाभैरवः सर्वसिद्धये ॥ ३४ ॥ क्काकाशः क्क समीरणः क्क दहनः क्कापश्च विश्वंभरः क्क ब्रह्मा क्क जनार्दनः क्क तरणिः क्केंदुश्च देवासुराः ॥ कल्पांतारभटीनटप्रमुदितः श्रीसिद्धयोगीश्वरो क्रीडानाटकनायको विजयते देवो महाभैरवः ॥ ३५ ॥ लिखित्वा परया भक्त्या भैरवस्तोत्रमुत्तमम् ॥ अष्टानां ब्राह्मणानां च देयं पुस्तक मादरात् ॥ ३६ ॥ यान्यान् समीहते कामांस्तांस्तान्प्राप्नोत्यसंशयम् ॥ ३७ ॥ इह लोके सुखं प्राप्य पुस्तकस्य प्रसादतः ॥ शिवलोकमनुप्राप्य शिवेन सह मोदते ॥ ३८ ॥ लिखित्वा भूर्जपत्रे तु त्रिलोहपरिवेष्टितम् ॥ सौम्ये च वस्तुवसने कर्पटे च सुशोभने ॥ ३९ ॥ करे बाहौ गले कट्यां मूर्ध्नि त्रिलोहगोपितम् ॥ यस्तु धारयते स्तोत्रं सर्वत्र जयमा प्नुयात् ॥ ४० ॥ इति श्रीरुद्रयामले तंत्रे पार्वतीश्वरसंवादे आपदुद्धारकश्रीवटुकभैरवाष्टोत्तरशतनामस्तवराजः समाप्तः ॥ ॥ अथ कुबेरमंत्रप्रयोगः ॥ " ॐ यक्षाय कुबेराय वैश्रवणाय धनधान्याधिपतये धनधान्यसमृद्धिं मे देहि दापय स्वाहा " इति पंच त्रिंशद्वर्णात्मको मंत्रः ॥ अस्य मंत्रस्य विश्रवा ऋषिः । बृहती छंदः । कुबेरो देवता सर्वेष्टसिद्धये जपे विनियोगः ॥ ॐ विश्रव ऋषये नमः । शिरसि ॥ १ ॥ ॐ बृहतीछंदसे नमः । मुखे ॥२॥ ॐ कुबेरदेवतायै नमः । हृदि ॥ ३ ॥ इति ऋष्यादिन्यासः ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ॐ यक्षाय अंगुष्ठाभ्यां नमः ॥ १ ॥ ॐ कुबेराय तर्जनीभ्यां नमः ॥ २ ॥ ॐ वैश्रवणाय मंध्यमाभ्यां नमः ॥ ३ ॥ ॐ धन धान्यादिपतये अनामिकाभ्यां नमः ॥४॥ ॐ धनधान्यसमृद्धिं मे कनिष्ठिकाभ्यां नमः ॥५॥ ॐ देहि दापय स्वाहा करतलकर पृष्ठाभ्यां नमः । इति करन्यासः ॥ एवं हृदयादि षडंगन्यासं कुर्यात् ॥ एवं न्यासविधिं कृत्वा ध्यायेत् । " मनुजवाह्यविमानवर स्थितं गरुडरत्ननिभं निधिनायकम् ॥ शिवसखं मुकुटादिविभूषितं वरगदे दधतं भज तुंदिलम् ॥ इति ध्यात्वा पीठधर्मादिपरतत्त्वांत पीठदेवताः संपूज्य तद्देशे मूलेन मूर्तिं प्रकल्प्य पाद्यादिपुष्पांतैरुपचारैः संपूज्य आवरणपूजां कुर्यात् । तद्यथा–षट्कोणे आग्नेया दिकोणकेसरेषु मध्ये दिक्षु च ॐ यक्षाय हृदयाय नमः ॥ १ ॥ ॐ कुबेराय शिरसे स्वाहा ॥ २ ॥ ॐ वैश्रवणाय शिखायै वषट् ॥ ३ ॥ धनधान्याधिपतये कवचाय हुं ॥ ४ ॥ ॐधनधान्यसमृद्धिं मे नेत्रत्रयाय वौषट् ॥ ५ ॥ ॐ देहि दापय स्वाहा अस्त्राय फट् ॥ ६ ॥ इति षडंगानि पूजयेत् ॥ ततो भूपुरे इन्द्रादिदशदिक्पालान् तद्बाह्ये वज्राद्यायुधानि च पूजयेत् ॥ इत्यावरणपूजां कृत्वा धूपादिनीराजनांतं संपूज्य जपं कुर्यात् ॥ अस्य पुरश्चरणं लक्षजपः । तथा च–"लक्षमेकं जपेन्मंत्रं दशांशं जुहुयात्तिलैः ॥ शिवालये जपेन्मंत्रमयुतं धनवृद्धये ॥१॥ बिल्वमूलोपविष्टेन जपतो लक्षं धनर्द्धिदम् । इति पंचत्रिंशदर्णात्मककुबेरमंत्रप्रयोगः ॥ अथ षोडशाक्षरकुबेरमंत्रप्रयोगः मंत्रो यथा–" ॐ श्रीँ ॐ ह्रीं श्रीं ह्रीं क्लीँ श्रीँ क्लीँ वित्तेश्वराय नमः" अस्य मंत्रस्य विश्रवा ऋषिः । बृहती छंदः । कुबेरो देवता । ममाभीष्टसिद्ध्यर्थं जपे विनियोगः ॐ विश्रवऋषये नमः । शिरसि ॥ १ ॥ ॐ बृहतीछंदसे नमः मुखे ॥ २ ॥ ॐ कुबेरदेवतायै नमः हृदि ॥ ३ ॥ इति ऋष्यादिन्यासः ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ॐ श्रीं अंगुष्ठाभ्यां नमः ॥ १ ॥ ह्रीं श्रीं तर्जनीभ्यां नमः ॥ २ ॥ ह्रौं क्लीँ मध्यमाभ्यां नमः ॥ ३ ॥ श्रौं क्लीँ अनामिकाभ्यां नमः ॥ ४ ॥ वित्तेश्वराय कनिष्ठिकाभ्यां नमः ॥ ५ ॥ नमोनमः करतलकरपृष्ठाभ्यां नमः इति करन्यासः ॥ एवं हृदया दिषडंगन्यासं कुर्यात् । ध्यानार्चनादिकं सर्वमस्य पूर्ववदाचरेत्॥ इति षोडशाक्षरकुबेरमंत्रप्रयोगः॥अथ शिवाथर्वशीर्षम्॥ शिरउपनि षदि "ॐ देवाहवैस्वर्गलोकमायंस्तेरुद्रमपृच्छन् कोभवानिति । सोऽब्रवीदहमेकः प्रथममासोद्वर्तामि च भविष्यामि च नान्यः कश्चि न्मत्तोव्यतिरिक्त इति । सोऽन्तरादन्तरं प्राविशदिशश्चान्तरं प्राविशत्सोहं नित्यानित्योव्यक्ताव्यक्तो ब्रह्माब्रह्माहं प्राञ्चः प्रत्यञ्चोऽ हंदक्षिणाञ्चउदञ्चोहमधश्चोर्ध्वश्चाहंदिशश्चप्रतिदिशश्चाहंपुमानपुमान्स्त्रियश्चाहं सावित्र्यहं गायत्र्यहं त्रिष्टुब्जगत्यनुष्टुप्चा हं छंदोऽहं सत्योहं गार्हपत्यो दक्षिणाग्निराहवनीयोऽहंगौरहंगौर्यहमृगहं यजुरहंसामाहमथर्वाङ्गिरसोऽहं ज्येष्ठोहंश्रेष्ठोहंवरिष्ठोहमापोहं तेजो हं गुह्योहमरण्योहमक्षरमहंक्षरमहं पुष्करमहं पवित्रमहमुग्रश्चबलिश्चपुरस्ताज्ज्योतिरित्यहमेवसर्वेभ्योमामेव स सर्वः समायोमां वेदस देवान् वेद सर्वांश्चवेदान् साङ्गानपि ब्रह्मब्रह्माणैश्चगांगोभिर्ब्राह्मान्ब्राह्मणेनहविर्हविषा आयुरायुषासत्यंसत्येनधर्मेणधर्मंतर्पयामिस्वेनते जसा । ततोहवैतेदेवारुद्रमपृच्छन् । तेदेवारुद्रमपश्यन् तेदेवा रुद्रमध्यायन् तेदेवाऊर्ध्वबाहवोरुद्रंस्तुवन्ति । ॐ योवै रुद्रः सभगवान् यश्च ब्रह्मा तस्मैवै नमोनमः ॥१॥ योवैरुद्रः सभगवान् यश्चविष्णुस्तस्मैवैनमो नमः ॥२॥ योवैरुद्रः सभगवान् यश्चस्कंदस्तस्मै० ॥३॥योवैरुद्रः सभगवान्यश्चेन्द्रस्तस्मै० ॥४॥ योवैरुद्रः सभगवान्यश्चाग्निस्तस्मै० ॥५॥ योवैरुद्रः स भगवान् यश्चवायुस्त० ॥६॥ ॐ योवैरुद्रः सभगवान यश्चसूर्यस्तस्मै० ॥ ७ ॥ योवैरुद्रः सभगवान् यश्चसोमस्तस्मै० ॥ ८ ॥ योवैरुद्रः सभगवान् येऽष्टौग्रहा

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

स्तस्मै० ॥ ९ ॥ योवैरुद्रः सभगवान् येचाष्टौप्रातिग्रहास्तस्मै० ॥ १० ॥ योवैरुद्रः सभगवान् यच्चभूस्तस्मै० ॥ ११ ॥ योवैरुद्रः सभगवान् यच्चभुवस्तस्मै० ॥ १२ ॥ योवैरुद्रः सभगवान् यच्चस्वस्तस्मै० ॥ १३ ॥ योवैरुद्रः सभगवान् यच्चमहस्तस्मै० ॥ १४ ॥ योवैरुद्रः सभगवान्याचपृथिवीतस्मै० ॥ १५ ॥ योवैरुद्रः सभगवान् यच्चान्तरिक्षंतस्मै० ॥ ॥ १६ ॥ योवैरुद्रः सभगवान् याचद्यौस्तस्मै० ॥ १७ ॥ योवैरुद्रः सभगवान् याश्चापस्तस्मै० ॥ १८ ॥ योवैरुद्रः सभगवान् यच्चतेजस्तस्मै० ॥ १९ ॥ योवैरुद्रः सभगवान्यश्चकालस्तस्मै० ॥ २० ॥ योवैरुद्रः सभगवान् यमस्तस्मै० ॥ २१ ॥ योवैरुद्रःसभगवान् यश्चमृत्युस्तस्मै० ॥ २२ ॥ योवैरुद्रः सभगवान् यच्चामृतंतस्मै० ॥ २३ ॥ योवैरुद्रः सभगवान् यच्चाकाशं तस्मै ॥ २४ ॥ योवैरुद्रः सभगवान् यच्चविश्वंतस्मै० ॥ २५ ॥ योवैरुद्रः सभगवान् यच्चस्थूलंतस्मै० ॥ २५ ॥ योवैरुद्रः सभगवान् यच्चसूक्ष्मंतस्मै ॥ २७ ॥ योवैरुद्रः सभगवान् यच्चशुक्लं तस्मै० ॥ २८ ॥ योवैरुद्रः सभगवान् यच्चकृष्णस्त स्मै० ॥ २९ ॥ योवैरुद्रः सभगवान् यच्चकृत्स्नंतस्मै० ॥ ३० ॥ योवैरुद्रः सभगवान् यच्चसत्यंतस्मै० ॥ ३१ ॥ योवैरुद्रः सभगवा न् यच्चसर्वंतस्मै० ॥ ३२ ॥ भूस्तेआदिर्मध्यंभुवस्तेस्वस्तेशीर्षं विश्वरूपोसिब्रह्मैकस्त्वांद्विधात्रिधावृद्धिस्त्वंशांतिस्त्वं पुष्टिस्त्वंहुतमहु तंदत्तमदत्तंसर्वमसर्वं विश्वमविश्वं कृतमकृतंपरमपरं परायणञ्चत्वं अपामसोममृता अभूमागन्मे ज्योतिरविदामदेवान् । किंनूनम स्मान् कृणवदरातिः । किमुधूर्त्तिरमृतं मर्त्यस्यसोमसूर्यपुरस्तात्सूक्ष्मः । पुरुषः । सर्वञ्जगद्धितंवाएतदक्षरंप्राजापत्यं सौम्यं सूक्ष्मं पुरुषं ग्राह्यमग्राह्येण भावंभावेनसौम्यंसौम्येनसूक्ष्मंसूक्ष्मेण वायव्यंवायव्येन ग्रसतितस्मै महाग्रासायवैनमोनमः । हृदिस्था देवताः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सर्वा ह्यदि प्राणाः प्रतिष्ठिताः। ह्यदि त्वमसि योनित्यं तिस्रो मात्राः परस्तुसः । तस्योत्तरतः शिरोदक्षिणतः पादौयउत्तरतः सओङ्कारः य ओङ्कारः सप्रणवः यः प्रणवः ससर्वव्यापीयः सर्वव्यापी सोऽनन्तःयोऽनन्तस्तत्तारंयत्तारंतच्छुक्रंयच्छुक्रं तत्सूक्ष्मं यत्सूक्ष्मं तद्वैद्युतं तत्परं ब्रह्म । यत्परंब्रह्मसएकः यएकः सरुद्रः योरुद्रः सईशानः यईशानः सभगवान् महेश्वरः॥३॥अथकस्मादुच्यते ओंकारः यस्मादुच्चार्यमाण एव प्राणानूर्ध्वमुत्क्रामयतितस्मादुच्यतेओङ्कारः । अथकस्मादुच्यतेप्रणवः यस्मादुच्चार्यमाणएवऋग्यजुःसामाथर्वाङ्गिरसं ब्रह्मब्राह्मणेभ्यः प्रणामंयति नामयतिचतस्मादुच्यतेप्रणवः । अथकस्मादुच्यते सर्वव्यापीयस्मादुच्चार्यमाण एवयथास्नेहेनपललपिण्डमिव शान्तरूपमोतप्रोतमनुप्राप्तोव्यतिषक्तश्चतस्मादुच्यतेसर्वव्यापी । अथकस्मादुच्यतेऽनन्तः यस्मादुच्चार्यमाणएव तिर्यगूर्ध्वमधस्ताच्चास्यान्तोनोपलभ्यते तस्मादुच्यतेऽनन्तः । अथकस्मादुच्यते तारं यस्मादुच्चार्यमाणएव गर्भजन्मव्याधिजरामरणसंसारमहाभयात्तारयतित्रायतेच तस्मादुच्यतेतारम् । अथकस्मादुच्यतेशुक्रं यस्मादुच्चार्यमाणएवक्रंदते क्क्रामयतिचतस्मादुच्यतेशुक्रम् । अथकस्मादुच्यतेसूक्ष्मं यस्मादुच्चार्यमाणएवसूक्ष्मोभूत्वा शरीराण्यधितिष्ठति सर्वाणि चाङ्गान्यभिमृश्यतितस्मादुच्यतेसूक्ष्मम् । अथकस्मादुच्यतेवैद्युतं यस्मादुच्चार्यमाणएवव्यक्तेमहति तपसिद्योतयति तस्मादुच्यतेवैद्युतम् । अथकस्मादुच्यते परंब्रह्म यस्मात्परमपरं परायणञ्च बृहद्बृहत्याबृंहयति तस्मादुच्यतेपरंब्रह्म । अथकस्मादुच्यतेएकः यः सर्वान्प्राणान्संभक्ष्य संभक्षणेनाजः संसृजतिविसृजतितीर्थमेकेव्रजन्ति तीर्थमेके दक्षिणः प्रत्यञ्च उदञ्चप्राच्योऽभिव्रजन्त्येके तेषांसर्वेषामिहसङ्गतिः साकं सएकोऽभूदन्तश्चरतिप्रजानां तस्मादुच्यतेएकः । अथकस्मादुच्यतेरुद्रः यस्मादृषिभिर्नान्यैर्भक्तैर्द्रुतमस्यरूपमुपलभ्यते तस्मादुच्य

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तेरुद्रः । अथकस्मादुच्यतेईशानः यः सर्वान्देवानीशते ईशानीभिर्जननीभिश्च शक्तिभिः । अभित्वाशूरणोनुमोदुग्धाइवधेनवः । ईशानमस्यजगतः स्वदर्शमीशानमिन्द्रतस्थुष इति तस्मादुच्यते ईशानः । अथकस्मादुच्यते भगवान् महेश्वरः यस्माद्भक्तान् ज्ञानेन भजत्यनुगृह्णाति च वाचं संसृजतिच सर्वान् भावान् परित्यज्यात्मज्ञानेनयोगैश्वर्येण महति महीयते तस्मादुच्यते सभगवान् महेश्वरः तदेतद्रुद्रचरितम्॥४॥एषोहदेवः प्रदिषोऽनुसर्वाः पूर्वोहजातः सउगर्भेअन्तः।सएवजातः सजनिष्यमाणः प्रत्यङ् जनांस्तिष्ठति सर्वतोमुखः।एकोरुद्रोनद्वितीयायतस्थेय इमाँल्लोकानीशत ईशानीभिः।प्रत्यङ् जनास्तिष्ठति चान्तकाले संसृज्यविश्वाभुवनानि गोपा॥ योयोनिं योनिमधितिष्ठत्येकोयेनेदंसर्वं विचरति सर्वम् ।तमीशानं वरदं देवमीड्यं निचाय्येमांशा न्तिमत्यन्तमेति । क्षमांहित्वाहेतुजाल स्यमूलं बुद्ध्यासंचितं स्थापयित्वातुरुद्रे।रुद्रमेकत्वमाहुः शाश्वतं वैपुराणमिषमूर्जेण पशवोना नुमायन्तम्मृत्युपाशान्। तदेतेनात्मन्नेते नार्धचतुर्थेन मात्रेणशान्तिं संसृजति । पशुपाशविमोक्षणं यासाप्रथमामात्राब्रह्मदेवत्या रक्ता वर्णेनयस्तांध्यायते नित्यं सगच्छेत् ब्रह्मप दम् । यासाद्वितीयामात्राविष्णुदेवत्या कृष्णावर्णेन यस्तांध्यायते नित्यं गच्छेद्वैष्णवंपदम् । यासातृतीयामात्राईशानदेवत्या कपिला वर्णेन यस्तांध्यायते नित्यं सगच्छेदीशानं पदम् । या सार्धचतुर्थी मात्रा सर्वदेवत्याऽव्यक्तीभूताखंविचरतिशुद्धास्फटिकसन्निभावर्णेन यस्तांध्यायते नित्यंसगच्छेत्पदमनामयम् । तदेतदुपासीतमुनयो वाग्वदन्तिनतस्यग्रहणमयं पंथाविहित उत्तरेणमेनदेवायान्तिये नपितरो येनऋषयः परमपरंपरायणंचेति वालाग्रमात्रं हृदयस्य मध्ये विश्वंदेवं जातरूपं वरेण्यम् । तमात्मस्थं येतुपश्यन्तिधीरा स्तेषांशान्तिर्भवतिनोत्तरेषाम् । यस्मिन्क्रोधंयाश्चतृष्णां क्षमाञ्चाक्षमां हित्वाहेतुजालस्य मूलंबुद्ध्यासञ्चितं स्थापयित्वातुरुद्रे रुद्रमे

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कत्वमाहुः रुद्रोहिशाश्वते नवै पुराणे नेषमूर्जेणतपसानियन्ताग्निरिति भस्म वायुरितिभस्मजलमिति भस्म सर्वहवा इदंभस्म मनएतानि चक्षूंषि यस्मादव्रतमिदं पाशुपतंयद्भस्मनाङ्गानि संस्पृशेत् तस्मादब्रह्म तदेतत्पाशुपतं पशुपाशविमोक्षणाय॥५॥योऽग्नौरुद्रोयोऽश्वन्तर्य ओषधीर्वीरुधऱ्याविवेशा यइमाविश्वाभुवनानिचक्लृपेतस्मैरुद्रायनमोऽस्त्वग्नये। योरुद्रोऽप्सुयोरुद्रोऽग्नौयोरुद्रोऽश्वन्तर्यो रुद्रओषधीर्वि रुधआविवेश। योरुद्रइमाविश्वाभुवनानिचक्लृपे तस्मै रुद्रायवैनमोनमः। योरुद्रोप्सुयोरुद्रो ओषधीषुयोरुद्रोवनस्पतिषु येनरुद्रेणजग दूर्ध्वं धारितं पृथिवी द्विधात्रिधाधर्त्ताधारिता नागायेन्तरिक्षे तस्मैरुद्रायवैनमोनमः । मूर्धानमस्यसंसेव्याप्यथर्वा हृदयञ्चयत् ॥ मस्तिष्कादूर्ध्वंप्रेरयत्यवमानोऽधिशीर्षतः ॥ तद्वाअथर्वणः शिरोदेवकोशः समुज्झितः तत् प्राणोऽभिरक्षतिशिरोऽन्तमथोमनः। नचदिवोदेव जनेनगुह्यानचान्तरिक्षाणि नचभूम इमाः । यास्मिन्निदं सर्वमोतप्रोतं तस्मादन्यन्नपरं किञ्चनास्ति । नतस्मात्पूर्वंनपरं तदस्तिन्नभूतंनोतभव्यं यदासीत्। सहस्रपादेकमूर्ध्न्याव्याप्तं स एवेदमावरीवर्तिभूतम्। अक्षरात् सञ्जायते कालः कालाद्व्यापकउच्यते। व्यापकोहि भगवान् रुद्रो भोगायमानो यदाशेते रुद्रस्तदा संहार्यते प्रजाः ॥ उच्छ्वसिते तमो भवति तमस आपोऽश्वङ्कुल्यामथिते मथितंशिशिरेशिशिरं मथ्यमानं फेनं भवति फेनादण्डं भवत्यण्डाद्ब्रह्माभवति ब्रह्मणोवायुः वायोरोङ्कारओङ्कारात् सावित्री सावित्र्या गायत्री गायत्र्यालोकाभवन्ति अर्चयति तपः सत्यं मधुरक्षन्तियद्ध्रुवम् । एतद्धिपरमंतपः । आपोज्योतीरसोमृतं ब्रह्मभूर्भुवः स्वरोन्नम इति ॥ ६ ॥ यइदमथर्वशिरो ब्राह्मणोऽधीते । अश्रोत्रियः श्रोत्रियोभवति । अनुपनीत उपनीतो भवति । सोऽग्निपूतो भवति । सवायुपूतो भवति । ससूर्यपूतो भवति । ससोमपूतो भवति । ससत्यपूतो भवति । ससर्वैर्देवैर्ज्ञातो भवति । स सर्वैर्वेदैरनु

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ध्यातो भवति स सर्वैषुतीर्थेषुस्नातो भवति । तेनसर्वैः क्रतुभिरिष्टं भवति । गायत्र्याः षष्टिसहस्राणिजप्तानि भवंति । प्रणवानामयुतं जप्तं भवति । सचक्षुषः पङ्क्तिं पुनाति । आसप्तमात् पुरुषयुगान्पुनातीत्याह भगवानथर्वशिरः सकृज्जप्त्वैवशुचिः स पूतः कर्मण्यो भवति । द्वितीयं जप्त्वा गणाधिपत्यमाप्नोति । तृतीयं जप्त्वैवमेवानूप्रविशन्त्यो सत्यमों सत्यमों सत्यम् । इत्यथर्ववेदेशिवाथर्वशीर्षम् । इति शिरउपनिषत् ॥ इति श्रीबीकानेरराज्यान्तर्गतश्रीरत्नगढनगरनिवासिना श्रीवसिष्ठगोत्रोद्भवेन पण्डितश्रीरामकृष्णपौत्रेण श्रीकस्तूरीचंद्रसूनुना गौडवंशावतंसश्रीमहादेवभक्तमाध्यंदिनवाजसनेयिशाखानुयायिना पंडितवैद्य श्रीचतुर्थीलालशर्मणा विरचिते अनुष्ठानप्रकाशे महानिबंधे पुरश्चरणकाण्डे शिवमंत्रानुष्ठानप्रकरणं समाप्तम् ॥ २ ॥ ॥

श्रीगणेशाय नमः ॥ अथ देवीमंत्रानुष्ठानप्रकरणम् ॥ ३ ॥ सिंहस्था शशिशेखरा मरकतप्रख्यैश्चतुर्भिर्भुजैः शंखं चक्रधनुः शरांश्च दधती नेत्रैस्त्रिभिः शोभिता ॥ आमुक्तांगदहारकंकणरणत्कांचीरणन्नूपुरा दुर्गा दुर्गतिहारिणी भवतु नो रत्नोल्लसत्कुण्डला॥१॥

तत्र तावदेव्याः सर्वमंत्रारंभप्रयोगः । प्रातः कृतनित्यक्रियश्चंद्रतारादिबलान्विते सुमुहूर्ते । यथाकामनया प्रतिज्ञासंकल्पं कृत्वा गणपतिपूजनादि नांदीश्राद्धांतं विधाय ब्राह्मणद्वारा कारिते जापकवरणं च कुर्य्यात् । ततो जपस्थानमागत्य । कूर्म्मसंशोधिते स्वासने प्राङ्मुख उपविश्य । मूलेनाचम्य प्राणानायम्य । देशकालौ संकीर्त्य । अमुककामनया मंत्रसिद्धिद्वारा श्रीभगवतीप्रसन्नार्थं देव्या अमुकमंत्रजपं करिष्ये । तदंगत्वेन भूतशुद्धिमन्तर्मातृकाबहिर्मातृकान्यासं निवृत्त्यादिकलामातृकान्यासं च करिष्ये । इति संकल्प्य पूर्ववत् भूतशुद्ध्यादिबाहिर्मातृकान्यासांतं कृत्वा कलामातृकान्यासं कुर्य्यात् तद्यथा—अस्य कलामातृकान्यासस्य प्रजा

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पतिर्ऋषिर्गायत्री छंदः श्रीमातृका शारदा देवता हलो बीजानि । स्वराःशक्तयः अमुकमंत्राङ्गत्वेन मातृकान्यासे विनियोगः । ॐ प्रजापतिऋषये नमः शिरसि ॥१॥ ॐ गायत्रीछंदसे नमः मुखे॥२॥शारदादेवतायै नमः ॥ हृदये ॥ ३॥ ॐ हल्भ्यो बीजेभ्यो नमो गुह्ये ॥ ४ ॥ ॐ स्वरेभ्यः शक्तिभ्यो नमः पादयोः ॥ इति ऋष्यादिन्यासः ॥ ॐ अँ ॐआँ हृदयाय नमः ॥१॥ ॐ इँ ॐईं शिरसे स्वाहा ॥ २ ॥ ॐउँ ॐ ऊँ शिखायै वषट् ॥ ३ ॥ ॐ एँ ॐ ऐं कवचाय हुं ॥ ४ ॥ ॐ ओं ॐ औं नेत्रत्रयाय वौषट् ॥ ५ ॥ ॐ अँ ॐ अः अस्त्राय फट् ॥ ६ ॥ इति हृदयादिन्यासः ॥ अथ ध्यानम् ॥ शंखचक्राब्जपरशुकपालानक्षमालिकाः ॥ पुस्तका मृतकुंभौ च त्रिशूलं दधतीं करैः ॥ १ ॥ सितपीतासितश्वेतरक्तवर्णैस्त्रिलोचनैः ॥ पंचास्यसंयुतां चंद्रसकांतिं शारदां भजे ॥ २ ॥ इति ध्यात्वा मातृका न्यसेत् । तद्यथा–ॐ अं निवृत्त्यै नमः ललाटे ॥ १ ॥ ॐ आं प्रतिष्ठायै नमः मुखवृत्ते ॥ २ ॥ ॐ इं विद्यायै नमः दक्षनेत्रे ॥ ३ ॥ ॐ ईं शांत्यै नमः वामनेत्रे ॥ ४ ॥ ॐ उं इंधिकायै नमः दक्षकर्णे ॥ ५ ॥ ॐ ऊँ दीपिकायै नमः वामकर्णे ॥ ६ ॥ ॐ ऋं रेचिकायै नमः दक्षिणनासापुटे ॥ ७ ॥ ॐ ॠं मोचिकायै नमः वामनासापुटे ॥ ८ ॥ ॐ ऌं परायै नमः दक्षकपोले ॥ ९ ॥ ॐ ॡं सूक्ष्मायै नमः वामकपोले ॥ १० ॥ ॐ एं सूक्ष्मामृतायैनमः ऊर्ध्वोष्ठे ॥ ११ ॥ ॐ ऐं ज्ञाना मृतायै नमः अधरोष्ठे ॥ १२ ॥ ॐ ओं आप्यायन्यै नमः ऊर्ध्वदंतपङ्क्तौ ॥१३॥ ॐ औं व्यापिन्यै नमः अधोदंतपंक्तौ ॥१४॥ ॐ अं व्योमरूपायै नमः जिह्वायाम् ॥ १५ ॥ ॐ अः अनंतायै नमः कंठे ॥ १६ ॥ ॐ कं सृष्ट्यै नमः दक्षंबाहुमूले ॥ १७ ॥ ॐ खं नद्यैनमः दक्षकूर्परे ॥ १८ ॥ ॐ गं स्मृत्यै नमः मणिबंधे ॥ १९ ॥ ॐ घं मेधायै नमः दक्षहस्तांगुलिमूले ॥ २० ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ॐ ङं कान्त्यै नमः दक्षहस्तांगुल्यग्रे ॥ २१ ॥ ॐ चं लक्ष्म्यै नमः वामबाहुमूले ॥ २२ ॥ ॐ छं द्युत्यै नमः वामकूर्परे ॥ २३ ॥ ॐ जं स्थिरायै नमः वाममणिबंधे ॥ २४ ॥ ॐ झं स्थित्यै नमः वामहस्तांगुलिमूले ॥ २५ ॥ ॐ ञं सिद्ध्यैनमः वामहस्तांगुल्यग्रे॥२६॥ॐ टं जरायै नमः दक्षिणहस्तांगुल्यग्रे ॥२७॥ ॐ ठं पालिन्यै नमः दक्षजानुनि ॥२८॥ॐ डं क्षांत्यै नमः दक्षगुल्फे ॥ २९ ॥ ॐ ढं ईश्वर्य्यै नमः दक्षपादांगुलिमूले ॥ ३० ॥ ॐ णं रत्यै नमः दक्षपादांगुल्यग्रे ॥ ३१ ॥ ॐ तं कामिकायै नमः वाम पादमूले ॥ ३२ ॥ ॐ थं वरदायै नमः वामजानुनि ॥ ३३ ॥ ॐ दं आह्लादिन्यै नमः वामगुल्फे ॥ ३४ ॥ धं प्रीत्यै नमः वाम पादांगुलिमूले ॥ ३५ ॥ ॐ नं दीर्घायै नमः वामपादांगुल्यग्रे ॥ ३६ ॥ ॐ पं तीक्ष्णायै नमः ॥ दक्षपार्श्वे ॥ ३७ ॥ ॐ फं रौद्र्यै नमः वामपार्श्वे ॥ ३८ ॥ ॐ वं भयायै नमः पृष्ठे ॥ ३९ ॥ ॐ भं निद्रायै नमः नाभौ ॥४०॥ ॐ मं तंद्रिकायै नमः जठरे ॥४१॥ ॐ यं क्षुधायै नमः हृदये ॥ ४२ ॥ ॐ रं क्रोधिन्यै नमः दक्षांसे ॥४३ ॥ ॐ लं क्रियायै नमः ककुदि ॥ ४४ ॥ ॐ वं उत्कायै नमः वामांसे ॥ ४५ ॥ ॐ शं मृत्युकायै नमः हृदयादिदक्षहस्तांतम् ॥ ४६ ॥ ॐ षं पीतायै नमः हृदयादिवामहस्तांतम्॥४७॥ ॐ सं श्वेतायै नमः हृदयादिदक्षपादांतम् ॥ ४८ ॥ ॐ हं अरुणायै नमः हृदयादिवामपादांतम् ॥ ४९ ॥ ॐ ळं असितायै नमः मूर्द्धादिपादांतम् ॥ ५० ॥ ॐ क्षं अनंतायै नमः पादादिमूर्द्धांतम् ॥ ५१ ॥ इति देवीकलामातृकान्यासः ॥ ' अयं न्यासः देव्याः सर्वमंत्रेष्वादौ कार्यः' ॥ अथ चण्डीविधानम् ॥ तत्रादौ सप्तशतीपाठाङ्गभूतनवार्णमंत्रप्रयोगः ॥मंत्रो यथा--"ॐ ऐं ह्रीं क्लीं चामुंडायै विच्चे " ॥ इति नवाक्षरो मंत्रः ॥ अस्य नवार्णमंत्रस्य ब्रह्मविष्णुमहेश्वरा ऋषयः गायत्र्युष्णिगनुष्टुभश्छंदांसि महाकालीमहालक्ष्मी

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

महासरस्वत्यो देवताः । नंदाशाकंभरीभीमाः शक्तयः । रक्तदंतिकादुर्गाभ्रामर्यो बीजानि । अग्निवायुसूर्यास्तत्त्वानि । वेदत्रयोद्भवफल
प्राप्त्यर्थं सर्वाभीष्टप्रसिद्धर्थं च नवार्णमंत्रजपे विनियोगः ॥ ॐ ब्रह्मविष्णुमहेश्वरऋषिभ्यो नमः । शिरसि ॥१॥ ॐ गायत्र्युष्णिगनु
ष्टुप्छंदोभ्यो नमः । मुखे ॥ २ ॥ ॐ महाकालीमहालक्ष्मीमहासरस्वतीदेवताभ्यो नमः । हृदि ॥ ३ ॥ ॐ नंदाशाकंभरीभीमा
शक्तिभ्यो नमः । दक्षस्तने ॥ ४ ॥ ॐ रक्तदंतिकादुर्गाभ्रामरीबीजेभ्यो नमः । वामस्तने ॥५॥ अग्निवायुसूर्यतत्त्वेभ्यो नमः । हृदये
॥ ६ ॥ इति ऋष्यादिन्यासं कृत्वा एकादशन्यासान्कुर्यात् । तद्यथा—ॐ अं नमः ललाटे ॥ १ ॥ प्रणवमादौ । सर्वत्र आं नमः
मुखवृत्ते ॥ २ ॥ इं नमः दक्षिणनेत्रे॥३॥ईं नमः वामनेत्रे॥ ४ ॥ उं नमः दक्षिणकर्णे ॥ ५ ॥ ऊं नमः वामकर्णे ॥ ६ ॥ ऋं नमः द
क्षिणनासिकायाम् ॥ ७ ॥ ॠं नमः वामनासिकायाम् ॥ ८ ॥ ऌं नमः दक्षिणगंडे ॥ ९ ॥ ॡं नमः वामगंडे ॥ १० ॥ एं नमः
ऊर्ध्वौष्ठे ॥ ११ ॥ ऐं नमः अधरोष्ठे ॥ १२ ॥ ओं नमः ऊर्ध्वदंतपंक्तौ ॥ १३ ॥ औं नमः अधोदंतपंक्तौ ॥ १४ ॥ अं नमः
शिरसि ॥ १५ ॥ अः नमः मुखे ॥ १६ ॥ कं नमः दक्षिणबाहुमूले ॥ १७ ॥ खं नमः दक्षिणकूर्परे ॥ १८ ॥ गं नमः दक्षिण
मणिबंधे ॥ १९ ॥ घं नमः दक्षांगुलिमूले ॥ २० ॥ ङं नमः दक्षांगुल्यग्रे ॥ २१ ॥ चं नमः वामबाहुमूले ॥ २२ ॥ छं नमः
वामकूर्परे ॥ २३ ॥ जं नमः वाममणिबंधे ॥ २४ ॥ झं नमः वामांगुलिमूले ॥२५॥ ञं नमः वामहस्तांगुल्यग्रे ॥२६॥ टं नमः
दक्षिणपादमूले ॥ २७ ॥ ठं नमः दक्षजानुनि ॥ २८॥ डं नमः दक्षगुल्फे ॥ २९ ॥ ढं नमः दक्षपादांगुलिमूले ॥ ३० ॥ णं नमः
दक्षपादांगुल्यग्रे ॥ ३१ ॥ तं नमः वामपादमूले ॥ ३२ ॥ थं नमः वामजानुनि ॥ ३३ ॥ दं नमः वामगुल्फे ॥ ३४ ॥ धं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नमः वामपादांगुलिमूले ॥ ३५ ॥ नं नमः वामपादांगुल्यग्रे ॥ ३६ ॥ पं नमः दक्षिणपार्श्वे ॥ ३७ ॥ फं नमः वामपार्श्व ॥ ३८ ॥ बं नमः पृष्ठे ॥ ३९ ॥ भं नमः नाभौ ॥ ४० ॥ मं नमः जठरे ॥ ४१ ॥ यं नमः हृदि ॥ ४२ ॥ रं नमः दक्षांसे ॥ ॥ ४३ ॥ लं नमः ककुदि ॥ ४४ ॥ वं नमः वामांसे ॥ ४५ ॥ शं नमः हृदयादिदक्षिणहस्तान्तम् ॥ ४६ ॥ षं नमः हृदया दिवामहस्तांतम् ॥ ४७ ॥ सं नमः हृदयादिदक्षपादांतम् ॥ ४८ ॥ हं नमः हृदयादिवामपादांतम् ॥ ४९ ॥ लं नमः जठरे ॥ ५० ॥ क्षं नमः मुखे ॥५१॥ एवं प्रणवादिनमोंतं सर्वत्र तत्त्वमुद्रया मातृकान्यासं कुर्यात् ॥ इति मातृकान्यासः प्रथमः ॥१॥ कृतेन येन देवस्य सारूप्यं याति मानवः ॥ ततः सारस्वताभिधं द्वितीयं न्यासं कुर्यात् ॥ तद्यथा—ॐ ऐं ह्रीं क्लींनमः कनिष्ठयोः ॥ ॐ ऐं ह्रीं क्लीं नमोऽनामिकयोः ॥ ॐ ऐं ह्रीं क्लीं नमः मध्यमयोः ॥ ॐ ऐं ह्रीं क्लीं नमः तर्जन्योः ॥ ॐ ऐं ह्रीं क्लीं नमः अंगुष्ठयोः ॐ ऐं ह्रीं क्लीं नमः करयोर्मध्ये॥ ॐ ऐं ह्रीं क्लीं नमः करयोः पृष्ठे॥ॐ ऐं ह्रीं क्लीं नमः मणिबंधयोः॥ॐ ऐं ह्रीं क्लीं नमः कूर्परयोः॥ ॐ ऐं ह्रीं क्लीं नमः हृदयाय नमः॥ॐ ऐं ह्रीं क्लीं नमः शिरसे स्वाहा॥ ॐ ऐं ह्रीं क्लीं नमः शिखायै वषट् ॥ ॐ ऐं ह्रीं क्लीं नमः । कवचाय हुं॥ॐ ऐं ह्रीं क्लीं नमः नेत्रत्रयाय वौषट्॥ॐ ऐं ह्रीं क्लीं नमः अस्त्रायफट्॥अस्मिन्सारस्वते न्यासे कृते जाडयं विनश्यति॥ इति द्वितीयो न्यासः ॥२॥ ॐ ह्रीं ब्राह्मी पूर्वतो मां पातु ॥ ॐ ह्रीं माहेश्वरी आग्नेय्यां मां पातु॥ॐ ह्रीं कौमारी दक्षिणे मां पातु॥ ॐ ह्रीं वैष्णवी नैर्ऋत्यां मां पातु॥ॐ ह्रीं वाराही पश्चिमे मां पातु॥ॐ ह्रीं इन्द्राणी वायव्ये मां पातु॥ॐ ह्रीं चामुंडा चोत्तरे मां पातु॥ ॐ ह्रीं महालक्ष्मीः ऐशान्यां मां पातु॥ॐ ह्रीं व्योमेश्वरी चोर्ध्वं मां पातु॥ॐ ह्रीं सप्तद्वीपेश्वरी भूमौ मां पातु॥ॐ ह्रीं कामेश्वरी पाताले

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मां पातु ॥ तृतीयेस्मिन्कृते न्यासे त्रैलोक्यविजयी भवेत् ॥ इति तृतीयो न्यासः ॥ ३ ॥ ॐ कमलांकुशमंडिता नंदजा पूर्वांगं पातु ॥ ॐ खड्गपात्रधरा रक्तदंतिका दक्षिणांगं पातु ॥ ॐ पुष्पपल्लवसंयुता शाकंभरी पश्चिमांगं पातु ॥ ॐ धनुर्बाणकरा दुर्गा वामांगं पातु ॥ ॐ शिरःपात्रकरा भीमा मस्तकाच्चरणावधि पातु ॥ ॐ चित्रकांतिभृत् भ्रामरी पादादिमस्तकांतं पातु ॥ इति चतुर्थः ॥ तुर्य्ये न्यासं नरः कुर्य्याज्जरामृत्युं व्यपोहति ॥ ४ ॥ ॐ पादादिनाभिपर्य्यंतं ब्रह्मा मां पातु ॥ ॐ नाभेर्विशुद्धिपर्यंतं जनार्दनो मां पातु ॥ ॐ विशुद्धेर्ब्रह्मरंध्रांतं रुद्रो मां पातु ॥ ॐ हंसो मे पदद्वंद्वं पातु ॥ ॐ वैनतेयः करद्वयं मे पातु ॥ ॐ वृषभः चक्षुषी मे पातु ॥ ॐ गजाननः सर्वांगं मे पातु ॥ ॐ आनंदमयो हरिः परापरौ देहभागौ मे पातु ॥ इति पंचमः ॥ कृतेस्मिन्पंच मे न्यासे सर्वान्कामानवाप्नुयात् ॥ ५ ॥ ॐ अष्टादशभुजा महालक्ष्मीर्मध्यमांगं मां पातु ॥ ॐ अष्टभुजा सरस्वती ऊर्ध्वं मां पातु ॥ ॐ दशभुजा महाकाली अधो मां पातु ॥ ॐ सिंहो हस्तद्वयं मां पातु ॥ ॐ परमहंसोक्षियुग्मकं मां पातु ॥ ॐ महिषा रूढो यमः पदद्वयं मां पातु ॥ ॐ महेशश्चंडिकायुक्तः सर्वांगं मां पातु ॥ इति षष्ठः ॥ षष्ठेस्मिन्विहिते न्यासे सद्गतिं प्राप्नुयान्नरः ॥ ६ ॥ ॐ ऐं नमः ब्रह्मरंध्रे ॥ ॐ ह्रीं नमः दक्षिण नेत्रे ॥ ॐ क्लीं नमः वामनेत्रे ॥ ॐ चां नमः दक्षिणकर्णे ॥ ॐ मुं नमः वामकर्णे ॥ ॐ डां नमः दक्षिणनासापुटे ॥ ॐ यैं नमः वामनासापुटे ॥ ॐ विं नमः मुखे ॥ ॐ च्चैं नमः गुह्ये ॥ इति सप्तमः ॥ विन्यसेत्सप्तमे न्यासे कृते रोगक्षयो भवेत् ॥ ७ ॥ ॐ च्चैं नमः गुह्ये ॥ ॐ विं नमः मुखे ॥ ॐ यैं नमः वामनासायाम् ॥ ॐ डां नमः दक्षिणनासायाम् ॥ ॐ मुं नमः वामकर्णे ॥ ॐ चां नमः दक्षिणकर्णे ॥ ॐ क्लीं नमः वामनेत्रे ॥ ॐ ह्रीं नमः दक्षिण

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नेत्रे ॥ ॐ ऐं नमः ब्रह्मरंध्रे ॥ इत्यष्टमः ॥ कृतेस्मिन्नष्टमे न्यासे सर्वदुःखं विनश्यति ॥ ८ ॥ मूलमुच्चार्य मस्तकाच्चरणांतं चरणान्मस्तकांतमष्टवारं व्यापकं कुर्यात् ॥ मूलम्–" ॐ ऐं ह्रीं क्लीं चामुंडायै विच्चे " इति नवाक्षरो मंत्रो ज्ञेयः । एवं पुरो दक्षिणे पृष्ठे वामभागेप्येवं प्रत्यहमष्टवारं मूलं न्यसेत् ॥ इति नवमः ॥ मूलमंत्रकृतो न्यासो नवमो देवतातिकृत् ॥ ९ ॥ ॐ ऐं ह्रीं क्लीं चामुंडायै विच्चे इति हृदयानमः ॥ एवं सर्वत्र मूलमंत्रेण । शिरसेस्वाहा । शिखायै वषट् । कवचायहुं ॥ नेत्रत्रयाय वौषट् ॥ अस्त्राय फट् ॥ इति हृदयादिषु विन्यसेत् ॥ इति दशमः ॥ कृतेस्मिन्दशमे न्यासे त्रैलोक्यं वशगं भवेत् ॥ १० ॥ ॐ खड्गिनी शूलिनी घोरा गदिनी चक्रिणी तथा ॥ शंखिनी चापिनी बाणभुशुंडीपरिघायुधा ॥ १ ॥ सौम्या सौम्यतराशेषसौम्येभ्य स्त्वतिसुंदरी ॥ परापराणां परमा त्वमेव परमेश्वरी ॥ २ ॥ यच्च किंचित्क्वचिद्वस्तु सदसद्वाखिलात्मिके ॥ तस्य सर्वस्य या शक्तिः सा त्वं किं स्तूयसे मया ॥ ३ ॥ यया त्वया जगत्स्रष्टा जगत्पात्यत्ति यो जगत् ॥ सोपि निद्रावशं नीतः कस्त्वां स्तोतुमिहेश्वरः ॥ ४ ॥ विष्णुः शरीरग्रहणमहमीशान एव च ॥ कारितास्ते यतोतस्त्वां कः स्तोतुं शक्तिमान्भवेत् ॥ ५ ॥ इति पंचश्लोकं पठित्वा आद्यं बीजम् ' ऐं ' कृष्णतरं ध्यात्वा सर्वांगं विन्यसामि ॥ इति सर्वांङ्गे न्यसेत् ॥ ॐ शूलेन पाहि नो देवि पाहि खड्गेन चांबिके ॥ घंटास्वनेन नः पाहि चापज्यानिःस्वनेन च ॥ १ ॥ प्राच्यां रक्ष प्रतीच्यां च चंडिके रक्ष दक्षिणे ॥ भ्रामणेनात्मशूलस्य उत्तरस्यां तथेश्वरि ॥ २ ॥ सौम्यानि यानि रूपाणि त्रैलोक्ये विचरंति ते ॥ यानि चात्यंतघोराणि तैरक्षास्मांस्तथा भुवम् ॥ ३ ॥ खड्गशूल गदादीनि यानि चास्त्राणि तेंबिके ॥ करपल्लवसंगीनि तैरस्मान्रक्ष सर्वतः ॥ ४ ॥ इति श्लोकचतुष्टयं पठित्वा सूर्यसदृशं द्वितीयं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मायाबीजं ह्रीं ध्यात्वा सर्वांगं न्यसेत् ॥ सर्वस्वरूपे सर्वेशे सर्वशक्तिसमन्विते ॥ भयेभ्यस्त्राहि नो देवि दुर्गे देवि नमोस्तुते ॥ १ ॥
एतत्ते वदनं सौम्यं लोचनत्रयभूषितम् ॥ पातु नः सर्वभूतेभ्यः कात्यायनि नमोस्तु ते ॥ २ ॥ ज्वालाकरालमत्युग्रमशेषासुरसूद
नम् ॥ त्रिशूलं पातु नो भीतेर्भद्रकालि नमोस्तु ते ॥ ३ ॥ हिनस्ति दैत्यतेजांसि स्वनेनापूर्य या जगत् ॥ सा घंटा पातु नो देवि
पापेभ्योऽनः सुतानिव ॥ ४ ॥ असुरासृग्वसापंकचर्चितस्ते करोज्वलः ॥ शुभाय खड्गो भवतु चंडिके त्वां नता वयम् ॥ ५ ॥
इति श्लोकपंचकं पठित्वा स्फटिकाभासं तृतीयं कामबीजम् ' क्रीं ' ध्यात्वा सर्वांगं न्यसेत् ॥ इत्येकादशः ॥ ११ ॥ एवमेकादश
न्यासान्कृत्वा पुनः षडंगन्यासं कुर्यात् ॥ तद्यथा– ॐ ऐं अंगुष्ठाभ्यां नमः ॥ ॐ ह्रीं तर्जनीभ्यां नमः ॥ ॐ क्लीं मध्यमाभ्यां
नमः ॥ ॐ चामुंडायै अनामिकाभ्यां नमः ॥ ॐ विच्चे कनिष्ठिकाभ्यां नमः ॥ ॐ ऐंह्रींक्लींचामुंडायै विच्चे करतलकरपृष्ठाभ्यां नमः।
इति मूलषडंगकरन्यासः ॥ ॐ ऐं हृदयाय नमः ॥ ॐ ह्रीं शिरसे स्वाहा ॥ ॐ क्लीं शिखायै वषट् ॥ ॐ चामुंडायै कवचायहुम् ॥
ॐ विच्चे नेत्रत्रयाय वौषट् ॥ ॐ ऐंह्रींक्लींचामुंडायै विच्चे अस्त्राय फट् ॥ इति हृदयादिन्यासः ॥ ॐ ऐं नमः शिखायाम् । ॐ ह्रीं
नमः दक्षिणनेत्रे ॥ ॐ क्लीं नमः वामनेत्रे ॥ ॐ चां नमः दक्षिणकर्णे ॥ ॐ मुं नमः वामकर्णे ॥ ॐ डां नमः दक्षिणनासायाम् ॥
ॐ यैं नमः वामनासायाम् ॥ ॐ विं नमः मुखे ॥ ॐ च्चें नमः गुह्ये ॥ इत्यक्षरन्यासं कृत्वा समस्तं मूलमंत्रमुच्चार्याष्टशः व्यापकं
चरेत् ॥ एवं न्यासं कृत्वा देवीं ध्यायेत् ॥ अथ ध्यानम् ॥ खड्गं चक्रगदेषुचापपरिघाञ्शूलं भुशुंडीं शिरः शंखं संदधतीं करैस्त्रि

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नयनां सर्वांगभूषावृताम् ॥ यामस्तौत्स्वापिते हरौ कमलजो हंतुं मधुं कैटभं नीलाश्मद्युतिमास्यपाददशकां सेवे महाकालिकाम् ॥ १ ॥ इति महाकालीध्यानम् ॥ अक्षस्रक्परशू गदेषुकुलिशं पद्मं धनुः कुंडिकां दंडं शक्तिमसिं च चर्म जलजं घंटां सुरा भाजनम् ॥ शूलं पाशसुदर्शने च दधतीं हस्तैः प्रवालप्रभां सेवे सैरिभमर्दिनीमिह महालक्ष्मीं सरोजस्थिताम् ॥ २ ॥ इति महा लक्ष्मीध्यानम् ॥ घंटाशूलहलानि शंखमुसले चक्रं धनुः सायकं हस्ताब्जैर्दधतीं घनांतविलसच्छीतांशुतुल्यप्रभाम् ॥ गौरीदेहसमु द्भवां त्रिजगतामाधारभूतां महापूर्वामत्रसरस्वतीमनुभजे शुम्भादिदैत्यार्दिनीम् ॥ ३ ॥ इति महासरस्वतीध्यानम् ॥ एवं ध्यात्वा । मानसोपचारैः संपूज्य । पीठपूजां कुर्यात् । पीठे । ॐ मंडूकादिपरतत्त्वांतपीठदेवताभ्यो नमः । इति पूर्वोक्तपीठदेवताः संपूज्य । पूर्वाद्यष्टदिक्षु मध्ये च 'पूज्यपूजकयोर्मध्ये प्राचीं प्रकल्प्य' जयादिनवपीठशक्तीः स्थापयेत् ॥ तद्यथा– ॐ जयायै नमः ॥ १ ॥ ॐ विजयायै नमः ॥ २ ॥ ॐ अजितायै नमः ॥ ३ ॥ ॐ अपराजितायै नमः ॥ ४ ॥ ॐ नित्यायै नमः ॥ ५ ॥ ॐ विला सिन्यै नमः ॥ ६ ॥ ॐ दोग्ध्र्यै नमः ॥ ७ ॥ ॐ अघोरायै नमः ॥ ८ ॥ 'मध्ये' ॐ मंगलायै नमः ॥ ९ ॥ इति संपूज्य । ॐ नमो भगवते सकलगुणात्मशक्तियुक्ताय अनंताय योगपीठात्मने नमः । इति पीठे पुष्पांजलिं दत्त्वा यंत्रं पूजयेत् । अथ यंत्रो द्धारः । मध्ये त्रिकोणं तद्बहिः षडस्रं तद्बहिरष्टदलं तद्बहिश्चतुर्विंशतिपत्रात्मकं तद्बाह्ये चतुरस्रं चतुर्द्वारयुतं भूपुरं चेति देवीयंत्रमष्ट गंधेन विलिख्य तत्र त्रिकोणमध्ये मूलमंत्रेण देवीं मूलेन पाद्यादिपुष्पांतोपचारैः संपूज्य यंत्रदेवान्पूजयेत् ॥ तद्यथा– त्रिकोणस्य

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

'पूर्वकोणे' ॐ ब्रह्मणे नमः । ॐ सरस्वत्यै नमः ॥ १ ॥ 'नैर्ऋत्ये' । ॐ विष्णवे नमः । ॐ श्रियै नमः ॥ २ ॥ 'वायव्ये' ॐ शिवाय नमः । ॐ उमायै नमः ॥३॥ 'उत्तरे' ॐ सिंहाय नमः । 'दक्षिणे' माहिषाय नमः । इति पूजयेत् ॥ 'षट्कोणमंडले' पूर्वादिषट्कोणेषु क्रमेण । ॐ नं नंदजायै नमः ॥ १ ॥ ॐ रं रक्तदंतिकायै नमः ॥ २ ॥ ॐ शां शाकंभर्यै नमः ॥ ३ ॥ ॐ दुं दुर्गायै नमः ॥ ४ ॥ ॐ भीं भीमायै नमः ॥ ५ ॥ ॐ भ्रां भ्रामर्य्यै नमः इति पूजयेत् ॥ ६ ॥ 'अष्टपत्रेषु पूर्वादिक्रमेण' ॐ ब्रां ब्राह्म्यै नमः ॥ १ ॥ ॐ मां माहेश्वर्य्यै नमः ॥ २ ॥ ॐ कौं कौमार्यै नमः ॥ ३ ॥ ॐ वैं वैष्णव्यै नमः ॥ ४ ॥ ॐ वां वाराह्यै नमः ॥ ५ ॥ ॐ नां नारसिंह्यै नमः ॥ ६ ॥ ॐ ऐं ऐन्द्र्यै नमः ॥ ७॥ ॐ चां चामुंडायै नमः ॥ ८ ॥ इति च पूजयेत् 'चतुर्विंशतिदलेष्वपि पूर्वादिक्रमेण एव ॐ विष्णुमायायै नमः ॥ १ ॥ ॐ चेतनायै नमः॥२॥ ॐ बुद्ध्यै नमः ॥३॥ ॐ निद्रायै नमः ॥ ॥ ४ ॥ ॐ क्षुधायै नमः ॥ ५ ॥ ॐ छायायै नमः ॥ ६ ॥ ॐ शक्त्यै नमः ॥ ७ ॥ ॐ तृष्णायै नमः ॥ ८ ॥ ॐ क्षांत्यै नमः ॥ ॥ ९ ॥ ॐ जात्यै नमः ॥ १० ॥ ॐ लज्जायै नमः ॥ ११ ॥ ॐ शांत्यै नमः ॥ १२ ॥ ॐ श्रद्धायै नमः ॥ १३ ॥ ॐ कांत्यै नमः ॥ १४ ॥ ॐ लक्ष्म्यै नमः ॥ १५ ॥ ॐ धृत्यै नमः ॥ १६ ॥ ॐ वृत्यै नमः ॥ १७ ॥ ॐ श्रुत्यै नमः ॥ १८ ॥ ॐ स्मृत्यै नमः ॥ १९ ॥ ॐ तुष्ट्यै नमः ॥ २० ॥ ॐ पुष्ट्यै नमः ॥ २१ ॥ ॐ दयायै नमः ॥ २२ ॥ ॐ मात्रे नमः ॥ २३ ॥ ॐ भ्रांत्यै नमः ॥२४॥ इति पूजयेत् ॥ 'तद्बाह्ये भूगृहचतुष्कोणेषु' 'ईशान्याम्' गं गणपतये नमः ॥१॥ 'आग्नेय्याम्' क्षं क्षेत्रपालाय नमः॥२॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

'नैर्ऋत्याम्' वं वटुकाय नमः ॥ ३ ॥ 'वायव्याम्' यों योगिनीभ्यो नमः इति पूजयेत् ॥ 'ततो भूपुरबाह्ये पूर्वादिक्रमेण' ॐ लं इंद्राय नमः ॥ १ ॥ रं अग्नये नमः ॥ २ ॥ मं यमाय नमः ॥ ३ ॥ क्षं निर्ऋतये नमः ॥ ४ ॥ वं वरुणाय नमः ॥ ५ ॥ यं वायवे नमः ॥ ६ ॥ सों सोमाय नमः ॥ ७ ॥ हं रुद्राय नमः ॥ ८ ॥ 'उर्ध्वम्' ब्रं ब्रह्मणे नमः ॥ ९ ॥ 'अधः' अं अनंताय नमः ॥ १० ॥ इति दिक्पालान् पूजयेत् ॥ 'तद्बहिः पूर्वादिषु' ॐ वज्राय नमः ॥ १ ॥ शक्तये नमः ॥ २ ॥ दंडाय नमः ॥ ३ ॥ खड्गाय नमः ॥ ४ ॥ पाशाय नमः ॥ ५ ॥ अंकुशाय नमः ॥ ६ ॥ गदायै नमः ॥ ७ ॥ त्रिशूलाय नमः ॥ ८ ॥ पद्माय नमः ॥ ९ ॥ चक्राय नमः ॥ १० ॥ इत्यायुधानि पूजयेत् ॥ एवमावरणपूजां कृत्वा मूलेन धूपदीपनैवेद्यतांबूलदक्षिणादीनि भगवत्यै निवेद्य कर्पूरादिभिर्नीराजनं कृत्वा प्रदक्षिणामेकां विधाय मंत्रपुष्पांजलिं च दत्त्वा साष्टांगं प्रणम्य स्तवैः स्तुत्वा

प्र. ३ चि. पृ. नं. १९५.

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यथाविधि भगवतीं ध्यायन् वाग्यतो जपं कुर्यात्॥अस्य पुरश्चरणं लक्षचतुष्कम् ॥४॥ जपान्ते साज्येन पायसेन दशांशहोमः॥अन्य त्सर्वं पूर्ववत् ॥ तथा च– (मंत्रमहोदधौ) "एवं ध्यात्वा जपेल्लक्षचतुष्कं तद्दशांशतः ॥ पायसान्नेन जुहुयात्पूजिते हेमरेतसि ॥१॥ एवं सिद्धे मनौ मंत्री भवेत्सौभाग्यभाजनम् ॥ मार्कंडेयपुराणोक्तं नित्यं चंडीस्तवं पठेत् ॥ २ ॥ पुटितं मूलमंत्रेण जपन्नाप्नोति वांछितम् ॥ आश्विनस्य सिते पक्षे आरभ्याग्नितिथिं सुधीः ॥ ३ ॥ अष्टम्यंतं जपेल्लक्षं दशांशं होममाचरेत् ॥ प्रत्यहं पूजयेद्देवीं पठेत्सप्तशतीमपि ॥ ४ ॥ विप्रानाराध्य मंत्री स्वमिष्टार्थं लभतेऽचिरात् ॥ " (डामरतंत्रे) ऐं बीजमादीन्दुसमानदीप्तं ह्रीं सूर्यतेजोद्युतिमद्द्वितीयम् ॥ क्लीं मूर्तिं वैश्वानरतुल्यरूपं तृतीयमानंत्यसुखाय चिंत्यम् ॥ १ ॥ चां शुद्धजांबूनदकांति तुर्यं मुं पंचमं रक्ततरं प्रकल्प्य॥ डां षड्भमुग्रार्तिहरं सुनीलं यै सप्तमं कृष्णतरं रिपुघ्नम् ॥ २ ॥ वि पांडुरं चाष्टममादिसिद्धं चै धूम्रवर्णं नवमं विशालम् ॥ एतानि बीजानि नवात्मकस्य जगुः प्रदद्युः सकलार्थसिद्धिम् ॥ ३ ॥ नवबीजविशुद्धोयं मंत्रस्त्रैलोक्यपावनः ॥ एनं जपति यो मंत्री फलं तस्य वदाम्यहम् ॥४॥ वश्या भवंति कामिन्यो राजानोऽनुचरा इव ॥ न हस्तिसर्पदावाग्निचोरक्षत्रभयं भवेत् ॥ ५ ॥ सर्वाः समृद्धयस्तस्य जायंते चंडिकाज्ञया ॥ नश्यंति दारुणा रोगाः सत्यं सत्यं न संशयः ॥ ६ ॥ सहस्रमस्य मंत्रस्य नवबीजस्य यो जले ॥ नाभिमात्रे जपेत्सम्यक्कवित्वं लभते ध्रुवम् ॥ ७ ॥ अयुतं नवतत्त्वस्य राजबंधनसंकटैः ॥ जपेत्तदाशु मुच्येत यो मंत्री चंडिकाज्ञया ॥ ८ ॥ अस्मिन्नवाक्षरे मंत्रे महालक्ष्मीव्यवस्थिता ॥ तस्मात्सुसिद्धः सर्वेषां सर्वदिक्षु प्रदीपकः ॥ ९ ॥ इति नवार्ण मंत्रप्रयोगः समाप्तः ॥

॥ अथ अष्टाक्षरदुर्गामंत्रपुरश्चरणम् ॥ भूतशुद्ध्यादिकलान्यासांतं पूर्ववत् ज्ञातव्यम् (शारदातिलके)

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मंत्रो यथा। ॐ ह्रीं हुं दुर्गायै नमः इत्यष्टाक्षरो मंत्रः ॥ अस्य मंत्रस्य नारद ऋषिर्गायत्रीच्छंदः। दुरितापनिवारिणी दुर्गा देवता स
वैष्टसिद्ध्यर्थे जपे विनियोगः ॥ ॐ नारदऋषये नमः शिरसि ॥ १ ॥ ॐ गायत्रीछंदसे नमः। मुखे ॥ २ ॥ ॐ दुर्गादेवतायै नमः
हृदये ॥ ३ ॥ इति ऋष्यादिन्यासः ॥ ह्रां ॐ ह्रीं दुं दुर्गायै नमः। अंगुष्ठाभ्यां नमः ॥ १ ॥ ह्रां ॐ ह्रा दुं दुर्गायै नमः। तर्जनी
भ्यां नमः ॥ २ ॥ ह्रां ॐ ह्रीं दुं दुर्गायै नमः। मध्यमाभ्यां नमः ॥ ३ ॥ ह्रां ॐ ह्रीं दुं दुर्गायै नमः। अनामिकाभ्यां नमः ॥४॥
ह्रां ॐ ह्रीं दुं दुर्गायै नमः। कनिष्ठिकाभ्यां नमः ॥ ५ ॥ ह्रां ॐ ह्रीं दुं दुर्गायै नमः करतलकरपृष्ठाभ्यां नमः ॥ ६ ॥ इति कर
न्यासः ॥ एवमेव हृदयादिन्यासं कृत्वा ध्यायेत्। अथ ध्यानम् ॥ "सिंहस्था शशिशेखरा मकरतप्रख्या चतुर्भिर्भुजैः शंखं चक्र
धनुःशरांश्च दधती नेत्रैस्त्रिभिः शोभिता। आमुक्तांगदहारकंकणरणत्कांची क्वणन्नूपुरा दुर्गा दुर्गतिहारिणी भवतु नो रत्नोल्लस
त्कुंडिका ॥१॥ एवं ध्यात्वा मानसोपचारैः संपूज्य पीठपूजां कुर्यात्। तद्यथा पीठेपूर्वोक्तमंडूकादिपरतत्त्वांतपीठदेवताः संपूज्य
केसरेषु। ॐ आं प्रभायै नमः ॥१॥ ॐ ईं मायायै नमः ॥२॥ ॐ ऊं जयायै नमः ॥३॥ ॐ एं सूक्ष्मायै नमः ॥ ४ ॥ ऐं ॐ विशु
द्धायै नमः ॥ ५ ॥ ॐ ओं नंदिन्यै नमः ॥ ६ ॥ ॐ औं सुप्रभायै नमः ॥ ७ ॥ ॐ अं विजयायै नमः ॥ ८ ॥ 'मध्ये' ॐ अः
सर्वसिद्धिदायै नमः ॥ ९ ॥ इति पीठशक्तीः संपूज्य तदुपरि "ॐ वज्रनखदंष्ट्रायुधाय महासिंहाय हुं फट्" इत्यासनं दत्त्वा तत्र
मूलेन मूर्तिं प्रकल्प्य आवाहनादिपुष्पांतैरुपचारैः संपूज्य आवरणपूजां कुर्यात्॥ 'षट्कोणे' आग्नेयादिकोणकेसरेषु मध्ये दिक्षु
च प्राचीक्रमेण॥ ह्रां ॐ ह्रीं दुर्गायै नमः हृदयाय नमः ॥ १ ॥ ह्रां ॐ ह्रीं दुं दुर्गायै नमः शिरसे स्वाहा ॥ २ ॥ ह्रां ॐ ह्रीं दुं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

दुर्गायै नमः । शिखायै वषट् ॥ ३ ॥ ह्रां ॐ ह्रीं दुं दुर्गायै नमः । कवचायहुं ॥४॥ ह्रौं ॐ ह्रीं दुं दुर्गायै नमः । नेत्रत्रयाय वौषट् ॥ ५ ॥ ह्रौं ॐ ह्रीं दुं दुर्गायै नमः अस्त्राय फट् ॥ इति षडंगानि पूजयेत् ॥ तद्बाह्ये अष्टदले प्राचीक्रमेण ॐ जं जयायै नमः ॥१॥ विं विजयायै नमः॥२॥ॐ कीं कीर्त्यै नमः॥३॥ॐ प्रीं प्रीत्यै नमः॥४॥ॐ प्रं प्रभायै नमः॥५॥ ॐ शुं शुद्धायै नमः॥६॥ॐ मं मेधायै नमः॥७॥ॐ श्रुं श्रुत्यै नमः ॥८॥ इति पूजयेत्॥"पत्राग्रेषु"ॐ चक्राय नमः ॥१॥ ॐ शंखाय नमः ॥२॥ गदायै नमः॥३॥ ॐ खड्गाय नमः ॥४॥ ॐ पाशाय नमः॥५॥ ॐ अंकुशाय नमः॥६॥ॐ शराय नमः॥७॥ॐ चापाय नमः॥८॥इत्यस्त्राणि पूजयेत् 'तद्बाह्ये भूपुरे' पूर्वादिक्रमेण इन्द्रादिदशदिक्पालान् तद्बाह्ये वज्राद्यायुधानि च पूजयेत् ॥ इत्यावरणपूजां कृत्वा धूपादिनमस्कारांतं संपूज्य जपं कुर्यात् ॥अस्य पुरश्चरणमष्टलक्षजपः । तथा च–" वसुलक्षं जपेन्मंत्रं तिलैर्मधुरलोलितैः ॥ पयोंधसा वा जुहुयात्तत्सहस्रं जितेंद्रियः॥१॥ इत्थं जपादिभिर्मंत्री मंत्रे सिद्धे विधानवित् ॥कुर्यात्प्रयोगानेतेन मनुना स्वमनीषितान्॥२॥प्रतिष्ठाप्य विधानेन कलशान्न वशोभनान् ॥ रत्नहेमादिसंयुक्तान्पदेषु नवसु स्थितान् ॥ ३ ॥ मध्यस्थे पूजयेद्देवीमितरेषु जयादिकाः ॥ संपूज्य गंधपुष्पाद्यैराभिषिंचेन्नराधिपम् ॥ ४ ॥ राजा विजयते शत्रून्साधको विजयं श्रियम् ॥ प्राप्नोति रोगी दीर्घायुः सर्वव्याधिविवर्जितः ॥ ५ ॥ वंध्याभिषिक्ता विधिना लभते तनयं वरम् ॥ मंत्रेणानेन संजप्तमाज्यं क्षुद्रज्वरापहम् ॥ ६ ॥ गर्भिणीनां विशेषेण जप्तं भस्मादिकं तथा॥ इत्यष्टाक्षरदुर्गामंत्रप्रयोगः समाप्तः ॥ ॥ अथ श्रीदुर्गाकवचप्रारंभः ॥ भैरव उवाच ॥ अधुना देवि वक्ष्येहं कवचं मंत्रगर्भकम् ॥ दुर्गायाः सारसर्वस्वं कवचेश्वरसंज्ञकम् ॥ १ ॥ परमार्थप्रदं नित्यं महापातकनाशनम् ॥ योगिप्रियं योगगम्यं देवानामपि

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

दुर्लभम् ॥ २ ॥ विना दानेन मंत्रस्य सिद्धिर्देवि कलौ भवेत् ॥ धारणादस्य देवेशि शिवस्त्रैलोक्यनायकः ॥ ३ ॥ भैरवो भैरवे शानि विष्णुर्नारायणो बली ॥ ब्रह्मा पार्वति लोकेशो विघ्नध्वंसी गजाननः ॥४॥ सेनानीश्च महासेनो जिष्णुर्लैंखर्षभः प्रिये ॥ सूर्य स्तमोपहो लोके चंद्रोमृतनिधिस्तथा॥५॥बहुनोक्तेन किं देवि दुर्गाकवचधारणात् ॥ मर्त्योप्यमरतां याति साधको मंत्रसाधकः॥६॥कव चस्यास्य देवेशि ऋषिः प्रोक्तो महेश्वरः॥ छंदोऽनुष्टुप्प्रियो दुर्गा देवताष्टाक्षरा स्मृता ॥ ७॥ चक्रबीजं च बीजं स्यान्मायाशक्तिरितीरि ता ॐ मे पातु शिरो दुर्गा ह्रीँ मे पातु ललाटकम् ॥ ८ ॥ दुं नेत्रेऽष्टाक्षरा पातु चक्री पातु श्रुती मम ॥९॥ कंठं गंडौ च मे पातु देवेशी रक्तकुंडला ॥ वायुर्नासां सदा पातु रक्तबीजनिषूदिनी ॥ १० ॥ लवणं पातु मे चोष्ठौ चामुंडा चंडघातिनी ॥ भेकी बीजं सदा पातु दन्तान्मे रक्तदंतिका ॥ ११ ॥ ॐ ह्रीँ श्रीँ पातु मे कंठं नीलकंठांकवासिनी ॥ ॐ ऐं क्लीं पातु मे स्कंधौ स्कंदमाता महे श्वरी ॥ १२ ॥ ॐ सौं क्लीं मे पातु बाहू देवेशी बगलामुखी ॥ ऐं श्रीं ह्रीं पातु मे हस्तौ शिवाशतनिनादिनी ॥ १३ ॥ सौं ऐं ह्रीं पातु मे बक्षो देवता विंध्यवासिनी ॥ ॐ ह्रीं श्रीं क्लीं पातु कुक्षिं मम मातंगिनी परा ॥ १४ ॥ श्रीं ह्रीं ऐं पातु मे पार्श्वौ हि माचलनिवासिनी ॥ ॐ स्त्रीं हूं ऐं पातु पृष्ठं मम दुर्गतिनाशिनी ॥ १५ ॥ ॐ क्रीं ह्रुं पातु मे नाभिं देवी नारायणी सदा ॥ ॐ ऐं क्लीं सौं सदा पातु कटिं कात्यायनी मम ॥ १६॥ ॐ ह्रीं श्रीं पातु शिश्नं मे देवी श्रीबगलामुखी ॥ ऐं सौः क्लीं सौः पातु गुह्यं गुह्यकेश्वरपूजिता ॥ १७ ॥ ॐ ह्रीं ऐं श्रीं हसौः पायादूरू मम मनोन्मना ॥ ॐ जूं सः सौः पातु जानु जगदीश्वरपूजिता ॥ १८ ॥ ॐ ऐं क्लीं पातु मे जंघे मेरुपर्वतवासिनी॥ ॐ ह्रीं श्रीं गीं सदा पातु गुल्फौ मम गणेश्वरी ॥ १९॥ ॐ ह्रीं दुं पातु मे पादौ पार्वती षोड

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

शाक्षरी॥पूर्वे मां पातु ब्रह्माणी वह्नौ च वैष्णवी तथा ॥२०॥ दक्षिणे चंडिका पातु नैर्ऋते नारसिंहिका ॥ पश्चिमे पातु वाराही वायव्ये मापराजिता ॥ २१ ॥ उत्तरे पातु कौमारी चैशान्यां शांभवी तथा ॥ ऊर्ध्वं दुर्गा सदा पातु पात्वधस्ताच्छिवा सदा ॥ २२ ॥ प्रभाते त्रिपुरा पातु निशीथे छिन्नमस्तका ॥ निशांते भैरवी पातु सर्वदा भद्रकालिका ॥ २३ ॥ अग्नेरम्बा च मां पातु जलान्मां जगदंबिका ॥ वायोर्मां पातु वाग्देवी वनाद्वनजलोचना ॥ २४ ॥ सिंहात्सिंहानना पातु सर्पात्सर्पांतकासना ॥ रोगान्मां राजमातंगी भूताद्भूतेशवल्लभा ॥ २५ ॥ यक्षेभ्यो यक्षिणी पातु रक्षोभ्यो राक्षसांतका ॥ भूतप्रेतपिशाचेभ्यः सुमुखी पातु मां सदा ॥ २६ ॥ सर्वत्र सर्वदा पातु ॐ ह्रीं दुर्गानवाक्षरा ॥ इत्येवं कवचं गुह्यं दुर्गासर्वस्वमुत्तमम् ॥ २७ ॥ मंत्रगर्भं महेशानि कवचेश्वरसंज्ञकम् ॥ वित्तदं पुण्यदं पुण्यं वर्म सिद्धिप्रदं कलौ ॥ २८ ॥ वर्म सिद्धिप्रदं गोप्यं परापररहस्यकम् ॥ श्रेयस्करं मनुमयं रोगनाशकरं परम् ॥ २९ ॥ महापातककोटिघ्नं मानदं च यशस्करम् ॥ अश्वमेध सहस्रस्य फलदं परमार्थदम् ॥ ३० ॥ अत्यंतगोप्यं देवेशि कवचं मंत्रसिद्धिदम् ॥ पठनात्सिद्धिदं लोके धारणन्मुक्तिदं शिवे ॥३१॥ रवौ भूर्जे लिखेद्धीमान्कृत्वा कर्माह्निकं प्रिये ॥ श्रीचक्राग्रेष्टगंधेन साधको मंत्रसिद्धये ॥ ३२ ॥ लिखित्वा धारयेद्बाहौ गुटिकां पुण्यवर्द्धिनीम् ॥ किंकिं न साधयेल्लोके गुटिका वर्मणो चिरात् ॥ ३३ ॥ गुटिकां धारयेन्मूर्ध्नि राजानं वशमानयेत् ॥ धनार्थी धारयेत्कंठे पुत्रार्थी कुक्षिमंडले ॥ ३४ ॥ तामेवं धारयेन्मूर्ध्नि लिखित्वा भूर्जपत्रके ॥ श्वेतसूत्रेण संवेष्टच लाक्षया परिवेष्टयेत् ॥ ३५ ॥ सुवर्णेनाथ संवेष्टच धारयेद्रक्तरज्जुना ॥ गुटिका कामदा देवी देवानामपि दुर्लभा ॥ ३६ ॥ कवचस्यास्य गुटिकां

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

धृत्वा मुक्तिप्रदायिनीम् ॥ कवचस्यास्य देवेशि वर्णितुं नैव शक्यते ॥ ३७ ॥ महिमानं महादेवि जिह्वाकोटिशतैरपि ॥ अदातव्य मिदं वर्म्म मंत्रगर्भं रहस्यकम् ॥ ३८ ॥ अवक्तव्यं महापुण्यं सर्वसारस्वतप्रदम् ॥ अदीक्षिताय नो दद्यात्कुटिलाय दुरात्मने ॥ ॥ ३९ ॥ अन्यशिष्याय दुष्टाय निंदकाय कुलार्थिनाम् ॥ दीक्षिताय कुलीनाय गुरुभक्तिरताय च ॥ ४० ॥ शांताय कुलशक्ताय शांताय कुलवासिने ॥ इदं वर्म्म शिवे दद्यात्कुलभागी भवेन्नरः ॥ ४१ ॥ इदं रहस्यं परमं दुर्गाकवचमुत्तमम् ॥ गुह्यं गोप्यतमं गोप्यं गोपनीयं स्वयोनिवत् ॥ ४१ ॥ इति देवीरहस्यतंत्रोक्तं श्रीदुर्गाकवचं समाप्तम् ॥ शम् ॥ ॥ अथ नवरात्रदुर्गापूजा प्रयोगः ॥ प्रतिपदि प्रातः कृताभ्यंगस्नानः नवे वाससी परिधाय चंदनमृगमदकुंकुमैस्त्रिपुंड्रं कृत्वा धृतपवित्रो नित्यक्रियां समाप्य दशघटिकामध्येऽभिजिन्मुहूर्ते वा कलशस्थापनार्थं शुद्धमृदा वेदिकां कृत्वा स्वासने प्राङ्मुखो देवीसंमुखो वा उपविश्य आचम्य प्राणानायम्य । ॐ सुमुखश्चैकदंतश्च कपिलो गजकर्णकः ॥ लंबोदरश्च विकटो विघ्ननाशो विनायकः ॥ १ ॥ धूम्रके तुर्गणाध्यक्षो भालचंद्रो गजाननः ॥ द्वादशैतानि नामानि यः पठेच्छृणुयादपि ॥ २ ॥ विद्यारंभे विवाहे च प्रवेशे निर्गमे तथा ॥ संग्रामे संकटे चैव विघ्नस्तस्य न जायते ॥ ३ ॥ इत्यादिगणपतिस्मरणं कृत्वा । आनोभद्रा इत्यादि पूर्वोक्तं शान्तिसूक्तं पठित्वा लक्ष्मीनारायणादिदेवान् प्रणमेत् । ततो देशकालौ संकीर्त्य । अमुकगोत्रोऽमुकशर्मा ममेह जन्मनि दुर्गाप्रीतिद्वारा सर्वपापक्षयपूर्वकदीर्घायुर्विपुलधनपुत्रपौत्राद्यविच्छिन्नसंततिवृद्धिस्थिरलक्ष्मीकीर्तिलाभशत्रुपराजयसदभीष्टप्रमुखचतुर्विधपुरुषार्थसिद्ध्यर्थं संवत्सरसुखप्राप्तिकामः शारदीयनवरात्रे प्रतिपदि विहितं कलशस्थापनं दुर्गापूजां कुमारीपूजादिकर्म करिष्ये

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तदंगत्वेन निर्विघ्नतार्थं गणपतिपूजनं स्वस्तिपुण्याहवाचनं चंडीसप्तशतीजपाद्यर्थं ब्राह्मणवरणं च करिष्ये । इति संकल्प्य । गणपतिं ध्यायेत् । श्वेताङ्गं श्वेतवस्त्रं सितकुसुमगणैः पूजितं श्वेतगंधैः क्षीराब्धौ रत्नदीपैः सुरतरुविमले रत्नसिंहासनस्थम् ॥ दोर्भिः पाशाङ्कुशेष्टाभयधृतिविशदं चंद्रमौलिं त्रिनेत्रं ध्यायेच्छांत्यर्थमीशं गणपतिममलं श्रीसमेतं प्रसन्नम् ॥ १ ॥ इति गणपतिं ध्यात्वा। पुष्पाण्यादाय । " हे हेरंब त्वमेह्येहि अंबिकाऽयंबकात्मज ॥ सिद्धिऋद्धिपते त्र्यक्ष लक्षसूर्यसमप्रभ ॥ १ ॥ नागास्य नागहार त्वं गणराज चतुर्भुज ॥ भूषितः स्वायुधैर्दिव्यैः पाशांकुशपरश्वधैः ॥ २ ॥ आवाहयामि पूजार्थं रक्षार्थं च मम क्रतोः ॥ इहागत्य गृहाण त्वं पूजां क्रतुं च रक्ष मे ॥ ३ ॥ ॐ गुणानां त्वागुणपतिꣳहवामहेप्रियाणान्त्वाप्रियपतिꣳहवामहे निधीनान्त्वानिधिपतिꣳहवामहेवसोमम ॥ आहमजानिगर्भ्युधमात्त्वमजासिगर्भ्युधम् ॥ १ ॥ ॐ भूर्भुवःस्वः सिद्धिऋद्धिस हितमहागणपतये नमः गणपतिमावाहयामि स्थापयामि । इति प्रतिमायामावाह्य ॐ सिद्धिऋद्धिसहितमहागणाधिपतये नमः इति नाममंत्रेण षोडशोपचारैः संपूजयेत् । ततोऽर्घ्यपात्रे गंधादिकं गृहीत्वा " ॐ रक्षरक्ष गणाध्यक्ष रक्ष त्रैलोक्य रक्षक ॥ भक्तानामभयंकर्ता त्राता भव भवार्णवात् ॥ १ ॥ द्वैमातुर कृपासिंधो षाण्मातुराग्रज प्रभो ॥ वरद त्वं वरं देहि वांछितं वांछितार्थद ॥ २ ॥ गृहाणार्घ्यमिदं देव सर्वदेवनमस्कृत ॥ अनेन सफलार्घ्येण फलदोस्तु सदा मम ॥ ३ ॥ इत्यर्घ्यं दद्यात् ॥ अथ प्रार्थना–विघ्नेश्वराय वरदाय सुरप्रियाय लंबोदराय सकलाय जगद्धिताय ॥ नागाननाय श्रुतियज्ञ विभूषिताय गौरीसुताय गणनाथ नमोनमस्ते ॥ १ ॥ भक्तार्तिनाशनपराय गणेश्वराय सर्वेश्वराय सुखदाय सुरेश्वराय ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

विद्याधराय विकटाय च वामनाय भक्तप्रसन्नवरदाय नमोनमस्ते ॥ २ ॥ लंबोदर नमस्तेस्तु सततं मोदकप्रिय ॥ अविघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ॥३॥ इति प्रार्थयेत् ॥ अथ पुण्याहवाचनम् ॥ ब्राह्मं पुण्यं महद्यच्च सृष्टयुत्पादनकारकम्॥ वेदवृक्षोद्भवं नित्यं तत्पुण्याहं ब्रुवंतु नः ॥ १ ॥ भो ब्राह्मणाः ममास्य कर्मणः पुण्याहं भवंतो ब्रुवंतु इति पठेत् ॐ पुण्याहं ३ त्रिर्विप्रा ब्रूयुः । ॐ पुनंतु मा देवजनाः पुनंतु मनसा धियः॥ पुनंतु विश्वा भूतानि जातवेदः पुनीहि मा ॥ १ ॥ पृथिव्यामुद्धृतायां तु यत्कल्याणं पुरा कृतम् ॥ ऋषिभिः सिद्धगंधर्वैस्तत्कल्याणं ब्रुवंतु नः ॥ भो ब्राह्मणाः ममास्य कर्मणः कल्याणं भवंतो ब्रुवंतु ॥ ॐ कल्याणम् ३। ॐ यथेमां वाचं कल्याणीमावदानि जनेभ्यः ब्रह्मराजन्याभ्यां शूद्रायचार्याय चस्वायचारणायच ॥ प्रियोदेवानां दक्षिणायै दातुरिहभूयासमयम्मेकामः समृद्धयतामुपमादो नमतु ॥ २ ॥ सागरस्य यथा वृद्धिर्महालक्ष्म्यादिभिः कृता ॥ संपूर्णा सुप्रभावा च तांच ऋद्धिं ब्रुवंतु नः ॥१॥ भो ब्राह्मणा ममास्य कर्मणः ऋद्धिं भवंतो ब्रुवंतु । ॐ ऋद्धयताम् ३। ॐ सुत्रस्युऽऋद्धिं रस्यगन्मज्योतिरमृताऽअभूम ॥ दिवंपृथिव्याऽअध्यारुहामाविदामदेवान्त्स्वर्ज्योतिः ॥ ३ ॥ स्वस्तिस्तु याऽविनाशाख्या पुण्य कल्याणवृद्धिदा ॥ विनायकप्रिया नित्यं तां च स्वस्तिं ब्रुवंनः ॥ भो ब्राह्मणाः ममास्य कर्मणः स्वस्तिं भवन्तो ब्रुवंतु । ॐ स्वस्ति ३ ॐ स्वस्तिनऽइन्द्रोवृद्धश्रवाः स्वस्तिनः पूषाविश्ववेदाः ॥ स्वस्तिनस्तार्क्ष्योऽअरिष्टनेमिः स्वस्तिनोबृहस्पतिर्दधातु॥४॥ समुद्रमथनाज्जाता जगदानंदकारिका ॥ हरिप्रिया च मांगल्या तां श्रियंच ब्रुवंतु नः॥भो ब्राह्मणाः ममास्य कर्मणः श्रीरस्त्विति भवन्तो

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ब्रुवंतु ॥ अस्तु श्रीः ३ ॥ ॐ श्रीश्चतेलक्ष्मीश्चपत्न्यावहोरात्रेपार्श्वेनक्षत्राणिरूपमश्विनौव्यात्तम् ॥ इष्णन्निषाणामुम्मऽइषाणसर्व्वलो कम्मऽइषाण ॥५॥ अस्मिन्पुण्याहवाचने न्यूनातिरिक्तो यो विधिः स उपविष्टब्राह्मणानां वचनात् श्रीमहागणपतिप्रसादाच्च सर्वः परि पूर्णोऽस्तु । ॐ अस्तु परिपूर्ण इति विप्रा ब्रूयुः॥इति पुण्याहवाचनम्॥ततो ब्राह्मणवरणपक्षे।स्वदक्षिणहस्ते गंधपुष्पतांबूलकमंडलुमुद्रि कासनमालावासांस्यादाय देशकालौ संकीर्त्य अद्यामुकगोत्रोऽमुकशर्माहं चतुर्विधपुरुषार्थसिद्ध्यर्थं संवत्सरसुखप्राप्तिकामो दुर्गाप्री तिकामो वा अद्यप्रभृतिमहानवमीपर्यंतं प्रत्यहं वार्षिकशरत्कालीन (वा वासंतीयकालीन) दुर्गामहापूजापूर्वकनवार्णमंत्रजपसहित चंडीसप्तशतीपाठकरणार्थमेभिर्गंधपुष्पतांबूलकमंडलुमुद्रिकासनमालावासोभिरमुकगोत्रममुकशर्माणं ब्राह्मणं भवंतं वृणे।इति ब्राह्मणं वृणुयात्।वृतोस्मीति प्रतिवचनम्।ॐ यथाविहितं कर्म्म कुरु इति प्रार्थ्य । ॐ यथाज्ञानं करवाणीति प्रतिवचनानंतरं ब्राह्मणं गन्धादि भिः सम्पूजयेत् । ततो गौरसर्षपान् गृहीत्वा।"ॐ अपसर्पंतु ये भूता ये भूता भूमिसंस्थिताः॥ये भूता विघ्नकर्तारस्ते नश्यंतु शिवाज्ञया ॥१॥इति सर्वदिक्षु विकीर्य "सूर्यः सोमो यमः कालः संध्ये भूतान्यहः क्षपाः॥पवनो दिक्पतिर्भूमिराकाशं खेचरामराः॥ब्रह्मशासनमा स्थाय कुरुध्वमिह सन्निधिम् ॥" इति भूमिं स्पृष्ट्वा दिग्बंधं कुर्यात् । ततः आचम्य पंचगव्येन भूमिं प्रोक्ष्य ततःपूर्वोक्तमार्गेण भूतशु द्धिं प्राणप्रतिष्ठामंतर्मातृकाबहिर्मातृकान्यासं च कृत्वा नवार्णोक्तैकादशन्यासान्कुर्य्यात् । एवं न्यासविधिं विधाय कलशं स्थापयेत तत्र प्रयोगः ॥ महीद्यौरिति भूमिंस्पृष्ट्वा । ॐ महीद्यौः पृथिवीचनऽइमंयज्ञम्मिमिक्षिताम् ॥ पिपृतान्नोभरीमभिः ॥ १ ॥ इति भूमिं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

प्रार्थ्य तस्यां भुव्यंकुररोपणार्थं शुद्धमृदं प्रक्षिप्य । ॐ धान्यमसिधिनुहिदेवान्प्राणायत्वोदानायत्त्वाव्यानायत्त्वादीर्घामनुप्रसितिमायुषेधांदेवोवः सविताहिरण्यपाणिःप्रतिगृभ्णात्वच्छिद्रेणपाणिनाचक्षुषेत्वामहीनांपयोसि ॥ २ ॥ इति तस्यां मृदि यवादीन्प्रक्षिप्य ॐ आजिघ्रकलशंम्मह्यात्वाव्विशन्त्विन्दवः ॥ पुनरूर्जानिवर्तस्वसानः सहस्रंधुक्ष्वोरुधारापयस्वतीपुनर्म्मावि्वशताद्रयिः ॥ ३ ॥ इति ताम्रकलशं मृन्मयं वा कलशं निधाय । वरुणस्योत्तम्भनमसिव्वरुणस्यस्कंभसर्ज्जनीस्थोव्वरुणस्यऋतसदन्यसि॥व्वरुणस्यऽऋतसदनमसिव्वरुणस्यऽऋतसदनमासीद ॥४॥ इतिजलेनापूर्य । गंधद्वारेतिगंधं प्रक्षिपेत् । ॐ गंधद्वारांदुराधर्षांनित्यपुष्टांकरीषिणीम् ॥ ईश्वरींसर्वभूतानांतामिहोपह्वयेश्रियम् ॥५॥ याऽओषधीरिति सर्वौषधीः॥ॐ याऽओषधीःपूर्वाजातादेवेभ्यस्त्रियुगम्पुरा॥ मनैनुवब्भूणामहर्ठ्शतंधामानिसप्तच॥६॥काण्डात्काण्डादिति दूर्वाः । ॐ काण्डात्काण्डात्प्ररोहन्तीपरुषःपरुषस्परि॥एवानोदूर्वेप्रतनुसहस्रेणशतेनच॥७॥अश्वत्थेवेति पंचपल्लवान् । ॐ अश्वत्थेवोनिषदनम्पर्णेवोव्वसतिष्कृतागोभाजऽइत्किलासथयत्सनवथपूरुषम्॥८॥ स्योनापृथिवीति सप्तमृदः । ॐ स्योनापृथिविनोभवानृक्षरानिवेशनी॥यच्छानःशर्म्मसप्रथाः॥९॥याः फलिनीरिति फलम्॥ॐ याः फलिनीर्याऽअफलाऽअपुष्पायाश्चपुष्पिणीः॥ बृहस्पतिप्रसूतास्तानोमुञ्चन्त्वठ्हसः ॥ १० ॥ परिवाजेति पंचरत्नानि । ॐ परिवाजपतिःकविरग्निर्हव्यान्यक्रमीत् ॥ दधद्रत्नानिदाशुषे ॥ ११ ॥ हिरण्यगर्भेति हिरण्यम् । ॐ हिरण्यगर्भःसमवर्तत

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ताग्रेभूतस्यजातः पतिरेकऽआसीत् ॥ सदाधारपृथिवींद्यामुतेमां कस्मैं देवायं हविषां विधेम ॥ १२ ॥ युवासुवासा इति रक्तवस्त्रेण सूत्रेण वा वेष्टयेत् ॥ ॐ युवासुवासाः परिवीतऽ आगात्सऽउश्रेयान्भवति जायमानः ॥ तं धीरासः कवयऽउन्नयन्तिसाध्योमनसादेवयन्तः ॥ १३ ॥ पूर्णादर्वीति तंडुलपूर्णं ताम्रपात्रमुपरि न्यसेत् ॥ ॐ पूर्णादर्व्विपरापतसुपूर्णापुनरापत ॥ व्वस्नेवव्विक्रीणावहाऽइषमूर्ज्जंठ्शतक्रतोः ॥ १४ ॥ तत्वायामीति वरुणमावाह्य । तत्वायामीति शुनःशेफऋषिः त्रिष्टुप् छंदः वरुणो देवता वरुणावाहने विनियोगः । ॐतत्वांयामिब्रह्मणावंदमानुस्तदाशांस्तेयजमानोहविर्भिः÷ ॥ अहेंडमानोव्वरुणे हवोध्युरुशठ्सुमानुऽआयुंप्रमोषीं ॥ १ ॥ ॐ भूर्भुवः स्वः वरुण इहागच्छ इहतिष्ठ । इत्यावाह्य ॐ अपांपतिवरुणाय नमः । इति नाममंत्रेण षोडशोपचारैः संपूज्य पुष्पांजलिं दत्वा । सर्वे समुद्राः सरितस्तीर्थानि जलदा नदाः ॥ आयांतु यजमानस्य दुरितक्षयकारकाः ॥ १ ॥ इति तीर्थान्यावाहयेत्पूजयेच्च ॥ ततः कलशस्य मुखे विष्णुरित्यादि कलशाभिमंत्रणं कृत्वा । ' देवदानवसंवादे ' इत्यादि प्रार्थ्य वरुणं प्रणमेत् ॥ इति कलशस्थापनम् ॥ ततः कलशोपरि सिंहासनं निधाय तत्र सावयवां स्वर्णमयीं दुर्गाप्रतिमामभ्युत्तारणपूर्वकं संस्थाप्य पट्टवस्त्रैराच्छाद्य पूजयेत् । अभ्युत्तारणमूलस्तु पूर्वमुक्त एव । लेख्यमूर्तिश्चेत्तदानाभिषेकः । अभिषेकादिकं तत्र न कर्त्तव्यं किं तु तदग्रे पात्रं स्थापयित्वा तस्मिन्नेव कर्तव्यम् ॥ अथ पूजा ॥ "ॐ आगच्छ वरदे देवि दैत्यदर्पनिषूदनि ॥ पूजां गृहाण सुमुखि नमस्ते शंकरप्रिये ॥ १ ॥ सर्वतीर्थमयं वारि

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सर्वदेवसमन्वितम् ॥ इमं घटं समागच्छ तिष्ठ देवि गणैः सह ॥ २ ॥ दुर्गे देवि समागच्छ सान्निध्यमिह कल्पय ॥ बलिं पूजां गृहाण त्वमष्टाभिः शक्तिभिः सह ॥ ३ ॥ शंखचक्रगदाहस्ते शुभ्रवर्णे शुभासने ॥ मम देवि वरं देहि सर्वैश्वर्यप्रदायिनि ॥ ४ ॥ एहि दुर्गे महाभागे रक्षार्थं मम सर्वदा ॥ आवाहयाम्यहं देवि सर्वकामार्थसिद्धये ॥ ५ ॥ अस्यां मूर्तौ समागच्छ स्थितिं मत्कृ-पया कुरु ॥ रक्षां कुरु सदा भद्रे विश्वेश्वरि नमोस्तु ते ॥६ ॥ ॐ हिरण्यवर्णांहरिणीं सुवर्णरजतस्रजाम् ॥ चंद्रांहिरण्मयींलक्ष्मींजातं वेदोमुमावह ॥ १ ॥ ॐ भूर्भुवः स्वः भगवति दुर्गे इहागच्छ इह तिष्ठ ॥ इत्यावाहनम् ॥ नानाप्रभासमाकीर्णं नानावर्णविचित्रित म् ॥ आसनं कल्पितं देवि प्रीत्यर्थं तव गृह्यताम् ॥ ॐ तांमुआवहजातवेदोलक्ष्मीमनपगामिनीम् ॥ यस्यांहिरण्यंविंदेयंगामश्वं पुरुषानहम् ॥ २ ॥ ॐ दुर्गायै नमः आसनम् ॥ गंगादिसर्वतीर्थेभ्य आनीतं तोयमुत्तमम् ॥ पाद्यं तेहं प्रदास्यामि गृहाण परमे श्वरि ॥ ॐ अश्वपूर्वांरथमध्यांहस्तिनादप्रबोधिनीम् ॥ श्रियं देवीमुपह्वयेश्रीर्मादेवीर्जुषताम् ॥ ३ ॥ इति पाद्यम् ॥ गंधाक्षतैश्च संयु क्तं फलपुष्पयुतं तव ॥ अर्घ्यं गृहाण दत्तं मे प्रसीद परमेश्वरि ॥ ॐ कांसोस्मितांहिरण्यप्राकारामार्द्रांज्वलंतींतृप्तांतर्पयंतीम् ॥ पद्मे स्थितांपद्मवर्णांतामिहोपह्वयेश्रियम् ॥ ४ ॥ इत्यर्घ्यम् ॥ गंगा गोदावरी चैव यमुना च सरस्वती ॥ ताभ्य आचमनीयार्थमानीतं तोयमुत्तमम् ॥ ॐ चंद्रांप्रभासांयशसाज्वलंतींश्रियंलोकेदेवजुष्टामुदाराम्॥ तांपद्मनींमिंशरणंप्रपद्येऽअलक्ष्मीर्मेनश्यतांत्वांवृणे ॥५॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

इत्याचमनीयम्॥ ज्ञानमूर्तेभद्रकालि दिव्यमूर्ते सुरेश्वरि॥स्नानं गृहाण देवि त्वं नारायणि नमोस्तु ते॥ॐ आदित्यवर्णेतपसोधि जातोव नस्पतिस्तव वृक्षोथबिल्वः॥तस्यफलानितपसानुदन्तुमान्तरायाश्चबाह्याअलक्ष्मीः॥६॥इति स्नानम्॥पंचामृतं मयानीतं पयोदधिस मन्वितम्॥घृतं मधु शर्करया प्रीत्यर्थं प्रतिगृह्यताम्॥ॐ पंचनद्यःसरस्वतीमपियन्तिसस्रोतसः॥सरस्वतीतुपंचधासोदेशेभवत्सरित्॥ इति पंचामृतस्नानम् ॥७॥ पुनः शुद्धोदकस्नानम् ॥ कामधेनुसमुत्पन्नं सर्वेषां जीवनं परम् ॥ पावनं यज्ञहेतुश्च पयः स्नानार्थमर्पितम् ॥ ॐ पयः÷पृथिव्याम्पयऽओषधीषुपयोदिव्यन्तरिक्षेपयोधाः÷पयस्वतीःप्रदिशः÷सन्तुमह्यम् ॥ ८ ॥ इति पयःस्नानम् ॥ पयस्तु समुद्भूतं मधुराम्लं शशिप्रभम् ॥ दध्यानीतं मया देवि स्नानार्थं प्रतिगृह्यताम् ॥ ॐ दधिक्राव्णोऽअकारिषञ्जिष्णोरश्वस्यवाजिनः÷ ॥ सुरभिनोमुखाकरत्प्रणऽआयूꣳषितारिषत् ॥ ९ ॥ इति दधिस्नानम् ॥ नवनीतसमुत्पन्नं सर्वसंतोषकारकम् ॥ घृतं तुभ्यं प्रदास्यामि स्नानार्थं प्रतिगृह्यताम् ॥ ॐ घृतंघृतपावानःपिवतवसांवसापावानःपिबतान्तरिक्षस्यहविरसिस्वाहादिशः÷प्रदिशऽआदिशोविदिशऽउद्दिशोदिग्भ्यःस्वाहा॥१०॥इति घृतस्नानम् ॥ तरुपुष्पसमुद्भूतं सुस्वादु मधुरं मधु ॥ तेजःपुष्टिकरं दिव्यं स्नानार्थं प्रतिगृह्यताम् ॥ ॐ मधुव्वाताऽऋतायतेमधुक्षरन्तिसिंधवः॥माध्वीर्नःसन्त्वोषधीः ॐमधुनक्तमुतोषसोमधुमत्पार्थिवꣳरजः÷ । मधुद्यौरस्तुनःपिता॥२॥ॐ मधुमान्नोव्वनस्पतिर्म्मधुमाꣳ॥ऽअस्तुसूर्यः÷ ॥ माध्वीर्गावोभवन्तुनः॥३॥११॥इति मधुस्नानम् ॥इक्षुसारस

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मुद्भूता शर्करा पुष्टिकारिका ॥ मलापहारिका दिव्या स्नानार्थं प्रतिगृह्यताम्॥ॐ अपाꣳरसमुद्वयꣳसूर्येसन्तꣳसमाहितम्॥अपाꣳ रसस्यय्योरसस्तंव्वोगृह्णाम्युत्तममुपयामगृहीतोसीन्द्रायत्वाजुष्टं गृह्णाम्येषतेयोनिरिन्द्रायत्वाजुष्टतमम् ॥१२॥इति शर्करोदकस्नानम्॥ मलयाचलसंभूतं चंदनागरुसंभवम्॥चंदनं देवदेवि त्वं स्नानार्थं प्रतिगृह्यताम् ॥ॐ गंधद्वारां दुराधर्षांनित्यपुष्टांकरीषिणीम्॥ईश्वरींसर्व भूतानांतामिहोपह्वयेश्रियम्॥१३॥इति गंधोकस्नानम्॥नानासुगंधिद्रव्यं च चंदनं रजनीयुतम्॥उद्वर्त्तनं मयादत्तंस्नानार्थं प्रतिगृह्यताम्॥ ॐ अहिरिवभोगैः पर्य्येतिबाहुंज्याया हेतिम्परिबाधमानःक्षुहस्तग्नोव्विश्वाव्वयुनानिव्विद्वान्पुमान्पुमाꣳसम्परिपातुव्विश्वतः ॥ १३ ॥ इत्युद्वर्तनस्नानम्॥ ज्ञानमूर्ते भद्रकालि दिव्यमूर्ते सुरेश्वरि॥स्नानं गृहाण देवि त्वं नारायणि नमोस्तु ते॥ॐ व्वरुणस्योत्तंभनमसिव्वरुण स्यस्कंभसर्जनीस्थोव्वरुणस्यऽऋतुसदन्यासिव्वरुणस्यऽऋतुसदनमसिव्वरुणस्यऽऋतुसदनमासीद॥१४॥इति शुद्धस्नानम् ॥ स्नाना न्तेआचमनीयम् ॥ निर्मितं तंतुभिः सूक्ष्मैर्नानावर्णविचित्रितम् ॥ वस्त्रं गृहाण मे देवि प्रीत्यर्थं प्रतिगृह्यताम् ॥ ॐ उपैतुमां देवसुखः कीर्तिश्चमणिनासह ॥॥ प्रादुर्भूतोसुराष्ट्रेस्मिन्कीर्त्तिमृद्धिंददातुमे ॥ १५ ॥ इति वस्त्रम् ॥ आचमनम् ॥ कंचुकीमुपवस्त्रं च नानारत्नैः समन्वितम् ॥ गृहाण त्वं मया दत्तं शंकरप्राणवल्लभे ॥ अलंकारान् महादिव्यान्नानारत्नविनिर्मितान् ॥ गृहाण देवमातस्त्वं प्रसीद परमेश्वरि ॥ ॐ क्षुत्पिपासामलाज्येष्ठामलक्ष्मीर्नाशयाम्यहम् ॥ अभूतिमसमृद्धिंचसर्वान्निर्णुद मेगृहात् ॥ १६ ॥ इति कंचुकीमाभूष

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

णं च ॥ मलयाद्रिसमुद्भूतं कर्पूरागुरुवासितम् ॥ मया निवेदितं भक्त्या चंदनं प्रतिगृह्यताम् ॥ केशरागरुसंयुक्तंचंदनादिसमन्वितम्॥
कस्तूरिकासमायुक्तं कुंकुमं प्रतिगृह्यताम् ॥ ॐ गंधद्वारांदुराधर्षांनित्यपुष्टांकरीषिणीम् ॥ ईश्वरींसर्वभूतानां तामिहोपह्वये श्रियम्
॥ १७ ॥ इति गंधं कुंकुमं च ॥ अक्षताश्च सुरश्रेष्ठ कुंकुमाक्ताः सुशोभिताः ॥ मया निवेदिता भक्त्या प्रीत्यर्थं प्रतिगृह्यताम् ॥
ॐ अक्षन्नमीमदन्तह्यवप्रियाऽअधूषत ॥ अस्तोषतस्वभानवोविप्रानविष्टयामतीयोजान्विन्द्रतेहरी ॥ १८ ॥ इत्यक्षतान् ॥ मंदा
रपारिजातानि पाटलीपंकजान्यपि ॥ मया हृतानि पूजार्थं पुष्पाणि प्रतिगृह्यताम् ॥ ॐमनसुकामुमाकूतिंवाचं सत्यमशीमहि॥
पशूनांरूपमन्नस्यमयिश्रीःश्रयतां यशः ॥ १९ ॥ इति पुष्पाणि ॥ सौभाग्यद्रव्यम् ॥ हरिद्रां कुंकुमं चैव सिंदूरादिसमन्वितम् ॥
सौभाग्यद्रव्यसंयुक्तं गृहाण परमेश्वरि ॥ (ॐ अहिं रि वभ्रोगैःरितिसौभाग्यद्रव्यम् ॥२०॥) एवं पुष्पांतपूजां कृत्वा पूर्वोक्तनवार्ण
मंत्रोक्तावरणदेवताः संपूज्यांगपूजां कुर्यात् ॥ अथांगपूजा ॥ ॐ दुर्गायै नमः । पादौ पूजयामि ॥ ॐ महाकाल्यै नमः । गुल्फौ
पूजयामि ॥ ॐ मंगलायै नमः । जानुनी पूजयामि ॥ ॐ कात्यायन्यै नमः । ऊरू पू० ॥ ॐ भद्रकाल्यै नमः । कटिं पू० ॥
ॐ कमलायै० नाभिं पूज० ॥ ॐ शिवायै० । उदरं पूज० ॥ ॐ क्षमायै नमः । हृदयं पूज० ॥ ॐ स्कंदायै नमः । कंठं पूज० ॥
ॐ महिषासुरमर्दिन्यै० । नेत्रे पूज० ॥ ॐ उमायै० । शिरः पूज० ॥ ॐ विंध्यवासिन्यै नमः । सर्वांगं पूजयामि नमः ॥
देव्या दक्षिणे सिंहं पूजयामि॥वामे महिषं पूजयामि ॥ इत्यंगपूजां कृत्वा ॥ दशाङ्गं गुग्गुलुं धूपं चंदनागुरुसंयुतम् ॥ मया निवेदितं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भक्त्या गृहाण परमेश्वरि ॥ ॐ कर्दमेन प्रजा भूता मयि संभवकर्दम ॥ श्रियं वासय मे कुले मातरं पद्ममालिनीम् ॥ २० ॥ इति धूपम् ॥ आज्यं च वर्तिसंयुक्तं वह्निना योजितं मया ॥ दीपं गृहाण देवि त्वं त्रैलोक्यतिमिरापहम् ॥ ॐ आपः सृजन्तु स्निग्धानि चिक्लीतवस मे गृहे ॥ निचदेवीं मातरं श्रियं वासय मे कुले ॥२१॥ इति दीपम् ॥ अन्नं चतुर्विधं स्वादु रसैः षड्भिः समन्वितम् । भक्ष्यभोज्यसमायुक्तं प्रीत्यर्थं प्रतिगृह्यताम् ॥ ॐ आर्द्रां पुष्करिणीं पुष्टिं पिंगलां पद्ममालिनीम् ॥ चंद्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥ २२ ॥ इति नैवेद्यम् ॥ (नैवेद्यमध्येपानीयम् उत्तरापोशनं हस्तप्रक्षालनं मुखप्रक्षालनं आचमनीयं च समर्पयामि) ॥ मलयाचलसंभूतं कस्तूर्य्या च समन्वितम् ॥ करोद्वर्तनकं देवि गृहाण परमेश्वरि ॥ इति करोद्वर्तनम् ॥ इदं फलं मया देवि स्थापितं पुरतस्तव ॥ तेन मे सफलावाप्तिर्भवेज्जन्मनि जन्मनि ॥ ॐ आर्द्रायुःकरिणीं यष्टींसुवर्णां हेममालिनीम् ॥ सूर्यां हिरण्मयीं लक्ष्मीं जातवेदो म आवह॥२३॥ इति ऋतुफलम् ॥ पूगीफलं महद्दिव्यं नागवल्ल्या दलैर्युतम् ॥ कर्पूरैलासमायुक्तं तांबूलं प्रतिगृह्यताम् ॥ ॐ याःफुलिनीरुर्याऽअफुलाऽअपुष्पायाश्चपुष्पिणीः ॥ बृहस्पतिं प्रसूतास्तानोमुञ्चन्त्वठंहसः ॥ २४ ॥ इति तांबूलम् ॥ हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः ॥ अनन्तपुण्यफलदमतः शान्तिं प्रयच्छमे ॥ ॐ तांमऽआवहजातवेदोलक्ष्मीमनपगामिनीम् ॥ यस्यां हिरण्यंप्रभूतंगावोदास्योश्वान्विंदेयंपुरुषानहम् ॥ २५ ॥ इति दक्षिणाम् ॥ कर्पूरार्तिक्यम् ॥ कदलीगर्भसंभूतं कर्पूरं च प्रदीपितम् ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

आरार्तिक्यमहं कुर्वे पश्य मे वरदा भव ॥ ॐ इ॒दꣳह॒विः प्र॒जन॑नम्मेऽअस्तु॒दश॑वीर॒ꣳसर्व्व॑गणꣳस्व॒स्तये॑ ॥ आ॒त्मा॒सनि॑प्रजा॒सनि॑ पशु॒सनि॑लोक॒सन्न्य॑भय॒सनि॑ ॥ अ॒ग्निः प्र॒जाम्ब॑हु॒लाम्मे॑करो॒त्त्वन्न॒म्पयो॒रेतो॑ऽअ॒स्म्मासु॑धत्त ॥ २६ ॥ इति कर्पूरार्तिक्यम् ॥ यानि कानि च पापानि जन्मान्तरकृतानि च । तानि सर्वाणि नश्यन्तु प्रदक्षिणपदेपदे ॥ ॐयः शु॒चिः॒ प्रय॑तो भू॒त्वा जु॒हुया॑दाज्य॒ मन्व॑हम् ॥ सूक्तं॑ पं॒चद॑शर्चं च श्री॒काम॑ः सत॒तं ज॑पेत् ॥ २७ ॥ इति प्रदक्षिणा ॥ नानासुगंधपुष्पाणि यथा कालोद्भवानि च ॥ पुष्पांजलिं मया दत्तं गृहाण परमेश्वरि ॥ १ ॥ ततः श्रीसूक्तं संपूर्णं प्राकृतनीराजनार्तिं च यथाचारं पठित्वा पुष्पांजलिं निवेदयेत् ॥ २८ ॥ ततः साष्टांगं प्रणामं कृत्वा प्रार्थयेत् ॥ ॐ मंत्रहीनं क्रियाहीनं भक्तिहीनं सुरेश्वरि ॥ यत्पूजितं मया देवि परिपूर्णं तदस्तु मे ॥ १ ॥ महिषघ्नि महामाये चामुंडे मुंडमालिनि ॥ यशो देहि धनं देहि सर्वान्कामांश्च देहि मे ॥ २ ॥ जयंती मंगला काली भद्रकाली कपालिनी ॥ दुर्गा क्षमा शिवा धात्री स्वाहा स्वधा नमोस्तु ते ॥ ३ ॥ दुर्गमे दुस्तरे कार्ये भवदुःखविनाशिनी ॥ पूजयामि सदा भक्त्या दुर्गां दुर्गार्तिनाशिनीम् ॥ ४ ॥ भूतप्रेतपिशाचेभ्यो रक्षोभ्यश्च महेश्वरि ॥ देवेभ्यो मानुषेभ्यश्च भयेभ्यो रक्ष मां सदा ॥ ५ ॥ सर्वमंगलमांगल्ये शिवे सर्वार्थसाधिके ॥ शरण्ये त्र्यंबके गौरि नारायणि नमोस्तु ते ॥ ६ ॥ रूपं देहि यशो देहि भगं भवति देहि मे ॥ पुत्रान् देहि धनं देहि सर्वान्कामांश्च देहिमे ॥ ७ ॥ इति संप्रार्थ्य कुमारीपूजां कुर्यात् ॥ ततः (प्रत्यहं बलिदानपक्षे माषभक्तेन कूष्मांडेन वा इक्षुदंडेन बलिदानं कार्यम् ॥ ततः अखंडदीपकं प्रतिष्ठापयेत्) ॥ " अखंडदीपकं देव्याः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

प्रीतये नवरात्रकम् ॥ उज्ज्वालयेदहोरात्रमेकचित्तो धृतव्रतः" ॥ एवं देवीं संपूज्य चंडीपाठं कुर्यात् ॥ अथ चंडीपाठप्रकारः ॥ आचम्य प्राणानायम्य देशकालौ संकीर्त्य अमुकगोत्रोऽमुकशर्मा अमुकयजमानेन वृतोहं वा (धनकामः पुत्रकामः अमुकरोगनाशकामो वा इत्यादिविशिष्टफलोद्देशमुच्चार्य) श्रीदुर्गाप्रीतिकामो वा मार्कण्डेयपुराणीयम् ॐ सावर्णिः सूर्यतनय इत्यारभ्य सावर्णि र्भविता मनुरित्यंतं चंडीसप्तशतीपाठं कवचार्गलाकीलकनवार्णमंत्रजपसहितं करिष्ये इति संकल्प्य आसनं विधाय आधारे अन्यहस्तालिखितं पुस्तकं स्थाप्य पूजयेत् ॥ ततोऽष्टोत्तरशतं नवार्णमंत्रजपं कृत्वा ॐ नारायणाय नमः ॥ १ ॥ ॐ नराय नमः ॥ २ ॥ ॐ नरोत्तमाय नमः ॥ ३ ॥ ॐ देव्यै नमः ॥ ४ ॥ ॐ सरस्वत्यै नमः ॥ ५ ॥ ॐ व्यासाय नमः ॥ ६ ॥ इति नमस्कृत्य प्रणवमुच्चार्य कवचार्गलाकीलकानि पठित्वा मार्कण्डेयपुराणोक्तचंडीसप्तशतीस्तवपाठं कुर्यात् ॥ " तत्र तावत्पुस्तकवाचने नियमाःहस्ते पुस्तकं न धार्यम् । स्वयं ब्राह्मणभिन्नेन च लिखितं विफलम् । अध्यायं समाप्य विरमेन्न तु मध्ये कदाचन ॥ कृते विरामे मध्ये तु अध्यायादि पठेत्पुनः॥ग्रंथार्थं बुध्यमानः स्पष्टाक्षरं नातिशीघ्रं नातिमंदं रसभावस्वरयुतं वाचयेत् ॥ अथ पाठविधानम् ॥ एषां श्रीचंडीसप्तशत्याः प्रथममध्यमोत्तमचरित्राणां ब्रह्मविष्णुरुद्रा ऋषयः । गायत्र्युष्णिगनुष्टुभश्छंदांसि महाकालीमहालक्ष्मीमहासरस्वत्यो देवताः । ऐंह्रींक्लीं बीजानि । अग्निवायुसूर्यास्तत्त्वानि । धर्मार्थकामसिद्ध्यर्थं सप्तशतीपाठे विनि योगः॥ॐ ब्रह्मविष्णुरुद्रऋषिभ्यो नमः शिरसि । ॐगायत्र्युष्णिगनुष्टुप्छंदोभ्यो नमः मुखे। ॐमहाकालीमहालक्ष्मीमहासरस्वतीभ्यो नमः हृदये । ॐ ऐंह्रींक्लींबीजेभ्यो नमः गुह्ये । ॐ अग्निवायुसूर्यतत्त्वेभ्यो नमः हृदये। इति ऋष्यादिन्यासः ॥ ॐ ह्रींहृदयाय नमः ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ॐ चं शिरसे स्वाहा । ॐ डिं शिखायै वषट् । ॐ कां कवचाय हुम् । ॐ यैं नेत्रत्रयाय वौषट् । ॐ चंडिकायै अस्त्राय फट् । इति हृदयादि० ॥ अथ चक्रन्यासः ॥ ॐ शंभुतेजोज्ज्वलज्वालामालिनि पावके ह्रां नंदायै अङ्गुष्ठाभ्यां नमः ॥ ॐ शंभुतेजोज्ज्वलज्वालामालिनि पावके ह्रीं रक्तदंतिकायै तर्जनीभ्यां नमः ॥ ॐ शंभुतेजोज्ज्वलज्वालामालिनि पावके ह्रूं शाकंभर्यै मध्यमाभ्यां नमः ॥ ॐ शंभुतेजोज्ज्वलज्वालामालिनि पावके ह्रैं दुर्गायै अनामिकाभ्यां नमः ॥ ॐ शंभुतेजोज्वलज्वालामालिनि पावके ह्रौं भीमायै कनिष्ठिकाभ्यां नम ॐ शंभुतेजोज्ज्वलज्वालामालिनि पावके ह्रः भ्रामर्यै करतलकरपृष्ठाभ्यां नमः ॥ अथ हृदयादिन्यासः ॥ ॐ शंभुतेजोज्ज्वलज्वालामालिनि पावके ह्रां नंदायै हृदयाय नमः ॥ ॐ शंभुतेजो० ह्रीं रक्तदंतिकायै शिरसे स्वाहा ॥ ॐ शंभुतेजो० ह्रूं शाकंभर्य्यै शिखायै वषट् ॥ ॐ शंभुतेजो० ह्रैं दुर्गायै कवचायम् ॥ ॐ शंभुतेजो० ह्रौं भीमायै नेत्रत्रयाय वौषट्॥ ॐ शंभुतेजो० ह्रः भ्रामर्यै अस्त्राय फट् ॥ अथांगन्यासः॥ ॐ वाराह्यै नमः पादयोः। ॐ नारसिंह्यै नमः नितंबे । ॐ चामुंडायै नमः नाभौ । ॐ माहेन्द्र्यै नमः कंठे । ॐ ब्राह्म्यै नमः पृष्ठे । ॐ वैष्णव्यै नमः दक्षिणभुजे । ॐ माहेश्वर्यै नमः वामभुजे । ॐ कौमार्यै नमः स्कंधयोः । ॐ कात्यायन्यै नमः मुखे । ॐ शिवदूत्यै नमः शिरसि । ॐ शिवायै नमः हृदि । ॐ काल्यैनमः दक्षकुक्षौ । ॐ रक्तदंतिकायै नमः वामकुक्षौ । ॐ शताक्ष्यै नमः पृष्ठवंशे । ॐ शाकंभर्यै नमः भ्रुवोः । इत्यंगन्यासः ॥ अथखड्गिन्यादिन्यासः ॥ ॐ खड्गिनी शूलिनी घोरा गदिनी चक्रिणी तथा ॥ शंखिनी चापिनी बाणा भुशुंडी परिघायुधेति शिरसि ॥ १ ॥ ॐ शूलेन पाहि नो देवि पाहि खड्गेन चांबिके ॥ घंटास्वनेन नः पाहि चापज्यानिःस्वनेन चेति मुखे ॥२॥ ॐ प्राच्यां रक्ष

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

प्रतीच्यां च चंडिके रक्ष दक्षिणे ॥ भ्रामणेनात्मशूलस्य उत्तरस्यां तथेश्वरीति कंठे ॥ ३ ॥ ॐ सौम्यानि यानि रूपाणि त्रैलोक्ये विचरन्ति ते ॥ यानि चात्यर्थघोराणि तैरक्षास्मांस्तथा भुवमिति बाह्वोः ॥ ४ ॥ ॐ खड्गशूलगदादीनि यानि चास्त्राणि तेंबिके ॥ करपल्लवसंगीनि तैरस्मान्रक्ष सर्वतः इति हृदये ॥ ५ ॥ ॐ सर्वस्वरूपे सर्वेशे सर्वशक्तिसमन्विते ॥ भयेभ्यस्त्राहि नो देवि दुर्गे देवि नमोस्तु त इत्युदरे ॥ ६ ॥ ॐ एतत्ते वदनं सौम्यं लोचनत्रयभूषितम् ॥ पातु नः सर्वभूतेभ्यः कात्यायनि नमोस्तु त इति नाभौ॥७॥ ॐ ज्वालाकरालमत्युग्रमशेषासुरसूदनम् ॥ त्रिशूलं पातु नो भीतेर्भद्रकालि नमोस्तु त इत्यूर्वोः ॥ ८ ॥ ॐ हिनस्ति दैत्यतेजांसि स्वनेनापूर्य या जगत् ॥ सा घंटा पातु नो देवि पापेभ्योनः सुतानिवेति जानुनोः ॥ ९ ॥ ॐ असुरासृग्वसापंकच र्चितस्ते करोज्वलः ॥ शुभाय खड्गो भवतु चंडिके त्वां नता वयमिति पादयोः ॥ १० ॥ एवं न्यस्तशरीरः साधकः सच्चिदानंदरूपिणीं महालक्ष्मीं ध्यायेत् ॥ अथ ध्यानम् ॥ अक्षस्रक्परशू गदेषुकुलिशं पद्मं धनुः कुंडिकां दंडं शक्तिमसिं च चर्म जलजं घंटां सुराभाजनम् ॥ शूलं पाशसुदर्शने च दधतीं हस्तैः प्रवालप्रभां सेवे सैरिभमर्दिनीमिह महालक्ष्मीं सरोजस्थिताम् ॥ १ ॥ इति ध्यात्वा मानसोपचारैः संपूज्य कृतांजलिः सन् गुरुदेवात्मैक्यं विभाव्य स्तवस्यार्थानुसंधानपूर्वकं नातिशीघ्रं नातिमंदं मध्यम स्वरेण स्पष्टपदाक्षरं चंडीस्तवं पठेत् ॥ ततः स्तवपाठोत्तरम्। ॐ ह्रीं हृदयाय नमः। ॐ चं शिरसे स्वाहा। ॐ डिं शिखायै वषट्। ॐ कां कवचाय हुं। ॐ यैं नेत्रत्रयाय वौषट्। ॐ ह्रीं चंडिकायै अस्त्राय फट् ॥ इति षडंगन्यासं कृत्वा। नवार्णमंत्रमष्टोत्तर शतं जप्त्वा। अहंरुद्रेभिरिति वैदिकं देवीसूक्तं नमो देव्यै महादेव्यै इति देवीसूक्तं च पठित्वा रहस्यत्रयं पठेत्॥तत्र प्राधानिकं रहस्यं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सार्द्धत्रिंशच्छ्लोकात्मकम् । वैकृतिरहस्यमेकोनचत्वारिंशच्छ्लोकात्मकम् । मूर्तिरहस्यं पंचविंशतिश्लोकात्मकं गुरुचरणैः संशोधितं ग्राह्यमिति॥ततः पूर्वोक्तं षडंगन्यासं कृत्वा ध्यात्वा भगवतीं प्रार्थयेत् ॥ अपराधशतं कृत्वा जगदंबेति चोच्चरेत् ॥ यां गतिं समवाप्नोति न तां ब्रह्मादयः सुराः ॥ १ ॥ सापराधोस्मि शरणं प्राप्तस्त्वां जगदंबिके ॥ इदानीमनुकंप्योहं यथेच्छसि तथा कुरु ॥२॥ अज्ञानाद्विस्मृतेर्भ्रांत्यायन्न्यूनमधिकं कृतम् ॥ तत्सर्वं क्षम्यतां देवि प्रसीद परमेश्वरि ॥ ३ ॥ कामेश्वरि जगन्मातः सच्चिदानंदविग्रहे गृहाणार्चामिमां प्रीत्या प्रसीद परमेश्वरि ॥ ४ गुह्यातिगुह्यगोप्त्री त्वं गृहाणास्मत्कृतं जपम् ॥ सिद्धिर्भवतु मे देवि त्वत्प्रसादान्महेश्वरि ॥ ५ ॥ इति मंत्रेण देव्या दक्षिणकरे जपं समर्प्य यथासुखं विहरेत् ॥ (मंत्रमहोदधौ) मार्कण्डेयपुराणोक्तं नित्यं चंडीस्तवं पठन् ॥ पुटितं मूलमंत्रेण जपन्नाप्नोति वांछितम् ॥ १ ॥ आश्विनस्य सिते पक्षे आरभ्याग्नितिथिं सुधीः ॥ अष्टम्यंतं जपेल्लक्षं दशांशं होममाचरेत् ॥ २ ॥ प्रत्यहं पूजयेद्देवीं पठेत्सप्तशतीमपि ॥ विप्रानाराध्य मंत्री स्वमिष्टार्थं लभतेचिरात् ॥ ३ ॥ एवं यः कुरुते स्तोत्रं नावसीदति जातुचित् ॥ चंडिकां प्रभजन्मर्त्यो धनैर्धान्यैर्यशश्चयैः ॥ ४ ॥ पुत्रैः पौत्रैरुचारोग्यैर्युक्तो जीवेद्बहूः समाः ॥ इति संक्षेपतो नवरात्रदुर्गाविधानं समाप्तम् ॥ ॥ अथ कुमारीपूजनम् ॥ तच्च प्रत्यहं यथाशक्ति एकद्व्यादिक्रमेण कार्यम् ॥ तत्र प्रयोगः ॥ मंडपाभ्यंतरे कुंकुमादिभिरष्टदलं विरच्य तदुपरि स्थापितपीठे कन्यामुपवेश्य । स्वयं तत्संमुखः स्वासने उपविश्य । आचम्य । देशकालौ संकीर्त्य । भगवतीदुर्गाप्रसन्नतार्थं कुमारीपूजां करिष्ये ।इति संकल्प्य । कुमारीणां पादौ प्रक्षाल्य तैलाभ्यंगव स्त्रगंधपुष्पस्रग्भिः संपूज्य । खंडलड्डुगुडसर्पिर्दधिक्षीरनारिकेलखंडादियाचितं भोजनं पानीयं च दत्वा तासु तृप्तासु स्वयमाचमनं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ताभ्यो दद्यात् । ततः आचम्य क्षंतव्यमिति प्रार्थ्य कन्यादत्ताक्षतान्स्वशिरसि धृत्वा दक्षिणादानपूर्वकं विसृजेत् इति संक्षेपतः कुमारी पूजा ॥ अथ प्रत्येककुमार्यादिपूजनप्रकारः ॥ ॐ मंत्राक्षरमयीं लक्ष्मीं मातृकारूपधारिणीम् ॥ नवदुर्गात्मिकां साक्षात्कन्यामावाहयाम्यहम् ॥ १ ॥ इत्यावाह्य । आसनं पाद्यं चोष्णोदकेन पादौ प्रक्षाल्यार्घ्याचमनीयस्नानवस्त्रकंचुकालंकारादि यथाशक्ति दत्वा सुगंधतैलेनानुलिप्य हरिद्राकुंकुमसिंदूरालक्तकांजनपुष्पमालाधूपदीपादिभिरभ्यर्च्य । पायसलड्डुगुडदधिक्षीरादिभिर्भोजयेत् ॥ भोजनकाले नवार्णं सप्तशतीं वा पठेत् । ततो भोजनांते पानीयनानाफलतांबूलदक्षिणानीराजनपुष्पांजलीन्निवेदयेत् ॥ एवमन्यामपि पूजयेत् । आवाहने मंत्रभेदाः । जगत्पूज्ये जगद्वंद्ये सर्वशक्तिस्वरूपिणि॥पूजां गृहाण कौमारि जगन्मातर्नमोस्तु ते॥१॥ इति प्रथमां द्विवर्षां पूजयेत् ॥ त्रिपुरां त्रिगुणाधारां त्रिवर्गज्ञानरूपिणीम् ॥ त्रैलोक्यवंदितां देवीं त्रिमूर्तिं पूजयाम्यहम् ॥ २ ॥ इति त्रिवर्षाम् ॥ कलात्मिकां कलातीतां कारुण्यहृदयां शिवाम् ॥ कल्याणजननीं नित्यं कल्याणीं पूजयाम्यहम् ॥ ३ ॥ इति चतुर्वर्षाम् ॥ अणिमादिगुणाधारामकाराद्यक्षरात्मिकाम् ॥ अनंतभेदां तां तारां रोहिणीं पूजयाम्यहम् ॥ इति पंचवर्षाम् ॥ ४ ॥ कामचारीं शुभां कांतां कालचक्रस्वरूपिणीम् ॥ कामदां करुणोदारां कालीं संपूजयाम्यहम् ॥ ५ ॥ इति षड्वर्षाम् ॥ चंडवीर्यां चंडमयीं चंडमुंडप्रभंजनीम् ॥ ब्रह्मेशविष्णुनमितां चंडिकां पूजयाम्यहम् ॥ ६ ॥ इति सप्तवर्षाम् ॥ सुखानंदकरीं शांतां सर्वदेवनमस्कृताम् ॥ सर्वभूतात्मिकां देवीं शांभवीं पूजयाम्यहम् ॥ ७ ॥ इत्यष्टवर्षाम् ॥ दुर्गमे दुस्तरे युद्धे भयदुःखविनाशिनीम् ॥ पूजयामि सदा भक्त्या दुर्गां दुर्गार्तिनाशिनीम् ॥ ८ ॥ इति नववर्षाम् ॥ सुंदरीं स्वर्णवर्णाभां सुखसौभाग्यदायिनीम् ॥ सुभद्रजननीं देवीं सुभद्रां

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पूजयाम्यहम् ॥ ९ ॥ इति दशवर्षां नवमीं पूजयेत् ॥ (यथोक्तवर्षालाभे द्विवर्षाद्यामपि पूजयेत्) एतैर्मंत्रैर्द्विवर्षकन्यामारभ्य दश वर्षावधिकुमारीं क्रमेण स्वस्वमंत्रेण संपूज्य नमस्कारं कुर्यात् ॥ एवं कन्यादक्षिणभागे बटुमेकं वामेचैकं तथैकं पुरतः एवं बटुत्रय मपि पूजयेत् ॥ कन्यापूजामाहात्म्यं (देवीपुराणे) न तथा तुष्यते शक्र होमदानजपेन तु । कुमारीभोजनेनात्र यथा देवी प्रसीदति ॥ १ ॥ पितरो वसवो रुद्रा आदित्या गणलोकपाः ॥ सर्वे ते पूजितास्तेन कुमारी येन पूजिता ॥ २ ॥ इति कुमारीपूजाविधानम् ॥ अथ कामनापरत्वेन चंडीपाठसंख्या (वाराहीतंत्रे) " शिव उवाच ॥ चंडीपाठफलं देवि शृणुष्व गदतो मम ॥ एकावृत्त्यादिपाठा नां यथावत्कथयामि ते ॥ १ ॥ उपसर्गोपशांत्यर्थं त्रिरावृत्तिं पठेन्नरः ॥ ग्रहोपशांतौ कर्तव्या पंचावृत्तिर्वरानने ॥ २ ॥ महाभये समुत्पन्ने सप्तावृत्तिमुदीरयेत् ॥ नवावृत्तौ भवेच्छांतिर्वाजपेयफलं लभेत् ॥ ३ ॥ राजवश्याय भूत्यै च रुद्रावृत्तिमुदीरयेत् ॥ अर्कावृत्त्या कामसिद्धिर्वैरिहानिश्च जायते ॥ ४ ॥ मन्वावृत्त्या रिपुर्वश्यस्तथा स्त्री वशतामियात् ॥ सौख्यं पंचदशावृत्त्या श्रियमाप्नोति मानवः ॥ ५ ॥ कलावृत्त्या पुत्रपौत्रधनधान्यागमं विदुः ॥ राजभीतिविनाशाय विपक्षोच्चाटनाय च ॥ ६ ॥ कुर्यात्सप्तदशावृत्तीं स्तथाष्टादशकं प्रिये ॥ महाऋणविमोक्षाय विंशावृत्तिं पठेन्नरः ॥ ७ ॥ पंचविंशावर्तनाद्धिभवेद्वंधविमोक्षणम् ॥ संकटे समनुप्राप्ते दुश्चिकित्स्यागमे सदा॥८॥जातिध्वंसे कुलोच्छेदे आयुषो नाशमागते॥वैरिवृद्धौ व्याधिवृद्धौ धननाशे तथा क्षये ॥९॥ तथैव त्रिविधोत्पाते तथा चैवातिपातके॥कुर्याद्यत्नाच्छतावृत्तिं ततः संपद्यते शुभम् ॥१०॥ विपदस्तस्य नश्यंति अंते याति परां गतिम् ॥जयवृद्धौ शतावृत्त्या राज्यवृद्धौ सदा पठेत् ॥११॥ मनसा चिंतितं देवि सिद्धिरष्टोत्तराच्छतात् ॥ शताश्वमेधयज्ञानां फलमाप्नोति सुव्रते ॥१२॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सहस्रावर्तनाल्लक्ष्मीरावृणोति स्वयं स्थिरा ॥ भुक्त्वा कामान्यथाकामं नरो मोक्षमवाप्नुयात् ॥ १३ ॥ यथाश्वमेधः क्रतुषु देवानां च यथा हरिः ॥ स्तवानामपि सर्वेषां तथा सप्तशतीस्तवः ॥ १४ ॥ नातः परतरं स्तोत्रं किंचिदस्ति वरानने ॥ भुक्तिमुक्तिप्रदं पुण्यं पावनानां च पावनम् ॥ १५ ॥ " (हरगौरीतंत्रे) " श्रीकामः पुत्रकामो वा सृष्टिमार्गक्रमेण तु ॥ सावर्णिः सूर्यतनयः सावर्णिर्भविता मनुः ॥ १ ॥ जपेच्छक्रादिमारभ्य शुम्भदैत्यवधावधि ॥ आद्यमारभ्य प्रजपेत्पश्चाच्छेषं समापयेत् ॥ २ ॥ शांत्यादिकामः सर्वत्र स्थितिमार्गक्रमेण तु ॥ स्थितिपाठः सर्वकामे मुक्तिकामे च संहृतिः ॥ ३ ॥ संहारे चांत्यमारभ्य पश्चादादि समापयेत् ॥ " आवृत्तिभेदेन दक्षिणापि तत्रैव"–पंचस्वर्णाः शतावृत्तौ पक्षावृत्तौ तु तत्त्रयम् ॥ पंचावृत्तौ स्वर्णमेकं विरावृत्तौ तदर्धकम् ॥ एकावृत्तौ पादमेकं दद्याद्वा शक्तितो बुधः ॥ " अथ संपुटितहोमे मंत्रसंख्या " मंत्रपुटं बीजपुटं दुर्गास्तोत्रं पठेत्सदा ॥ मंत्रबीजपुटा दुर्गा कामनासिद्धिदा सदा ॥ होमकाले सदा मंत्रं दुर्गामंत्रं पृथक् हुनेत् ॥ कामनाबीजसंयोगो दुर्गामंत्रेण संहुनेत् ॥ दुर्गास्तवनमंत्राणां संख्या सप्तशतं भवेत् ॥ कामनामंत्रसंख्या च शतं चैव चतुर्दश ॥ मध्ये मंत्रान् सप्तशतं होमकाले तु योजयेत् ॥ पाठे मंत्रपुटं वाच्यं होममंत्राः पृथक्पृथक् ॥ होमसंख्या च मंत्राणां शतं वै चैकविंशतिः ॥ पाठे बीजपुटं वाच्यं होमे बीजपुटं हुनेत् ॥ " अथ कवचाहुतिनिषेधः (तंत्रांतरे) " चंडीस्तवे प्रतिश्लोकमेकाहुतिरिहेष्यते ॥ रक्षाकवचगैर्मंत्रैर्होमं तत्र न कारयेत् ॥ मौर्ख्यात्कवचगैर्मंत्रैः प्रतिश्लोकं जुहोति यः ॥ स्यादेहपतनं तस्य नरकं प्रतिपद्यते ॥ अंधकाख्यो महादैत्यो दुर्गाहोमपरायणः ॥ कवचाहुतिजात्पापान्महेशेन निपातितः ॥ "अत्र रक्षाकवचगैर्मंत्रैरित्यनेन शूलेन

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पाहिनो देवीत्यादिचतुर्मंत्रैर्होमं न कारयेदिति ज्ञातव्यम् । केचित्कवचादित्रयस्य रहस्यत्रयस्य चापि होमंवर्जयन्ति" ॥ अथ कामनाभेदेन दुर्गापाठे संपुटितमंत्रप्रयोगः । (कात्यायनीतंत्रे) प्रतिश्लोकमाद्यंतयोः प्रणवेन जपेन्मंत्रसिद्धिः ॥ १ ॥ प्रणवं व्याहृतित्रयं च श्लोकादौ पठित्वा जपेन्मंत्रसिद्धिः ॥ २ ॥ सप्रणवां सव्याहृतिकां गायत्रीमादावंते वा कृत्वा श्लोकं जपेत्तदा महाफलम् ॥ ३ ॥ प्रतिश्लोकमादावन्ते 'जातवेदसे' इति ऋचं जपेत् सर्वकामसिद्धिः ॥ ४ ॥ अपमृत्युवारणाय रोगारिक्षयमृत्यून्मूलनमभीप्सितो सर्वापद्विनिवारणाय च शताक्षरत्र्यंबकमंत्रेण संपुटीकृत्य श्लोकं पठेत् । (गायत्री० जातवेदसे० त्र्यंबकेतिमंत्रत्रयमिलितः शताक्षरः) ॥ ५ ॥ प्रतिश्लोकं 'शरणागतदीनार्त्त–' इति श्लोकं पठेत्सर्वकार्यसिद्धिः ॥ ६ ॥ प्रतिश्लोकम् 'करोतु सा नः शुभ, इत्यर्धं पठेत्सर्वकामाप्तिः ॥ ७ ॥ स्वाभीष्टवरप्राप्त्यै 'एवं देव्या वरं लब्ध्वा' इति श्लोकं पठेत् ॥ ८ ॥ सर्वापत्तिवारणय प्रतिश्लोकम् 'दुर्गे स्मृता' इति पठेत् । अस्य केवलस्यापि श्लोकस्य कार्यानुसारेण लक्षमयुतं सहस्रं शतं वा जपः ॥ ९ ॥ 'सर्वा बाधा' इत्यस्य लक्षजपेपि पूर्वोक्तं फलम् ॥ १० ॥ 'इत्थं यदायदा बाधा' इति श्लोकस्य लक्षजपे महामारीशान्तिः ॥ ११ ॥ 'कांसोस्मि' इत्यृचं प्रतिश्लोकं पठेल्लक्ष्मीप्राप्तिः ॥ १२ ॥ 'रोगानशेषान्' इति श्लोकस्य प्रतिश्लोकं पाठे सकलरोगनाशः तन्मंत्रजपेपि सः ॥ १३ ॥ 'इत्युक्ता सा तदा देवी गंभीरा' इति प्रतिश्लोकं पाठे पृथग्जपे वा विद्याप्राप्तिर्वाग्वैकृतनाशश्च ॥ १४ ॥ 'भगवत्या कृतं सर्वम्०' इत्यादिद्वादशोत्तरशताक्षरो मंत्रः सर्वकामदः सर्वापन्निवारणश्च ॥ १५ ॥ 'देवि प्रपन्नार्तिहरे' इति श्लोकस्य यथाकार्यं लक्षायुतसहस्रशतान्यतमे जपे प्रतिश्लोकं पाठे वा सर्वापन्निवृत्तिः सर्वकार्यसिद्धिः ॥ १६ ॥ एषु प्रयो

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

गेषु प्रतिश्लोकं दीपाग्रे केवलमेव वा नमस्कारकरणे अतिशीघ्रं सिद्धिः ॥ १७ ॥ प्रतिश्लोकं क्लीं कामबीजसंपुटितस्यैकचत्वारिं शद्दिनं त्रिरावृत्तौ पुत्रप्राप्तिः ॥ १८ ॥ ह्रीं मायाबीजपुटितस्य फट्कल्पवसहितस्य सप्तदिनपर्यंतं त्रयोदशावृत्तौ उच्चाटनसिद्धिः सर्वोपद्रवनाशश्च ॥ १९ ॥ श्रींलक्ष्मीबीजपुटितस्य एकोनपंचाशद्दिनपर्यंतं पंचदशावृत्तौ लक्ष्मीप्राप्तिः ॥ २० ॥ ऐं बीजसंपुटितस्य शतावृत्त्या विद्याप्राप्तिः ॥ २१ ॥ इति कामनापरत्वे संपुटितमंत्रप्रयोगः ॥ ॐ ह्रीं ऐं क्लीं श्रीं जगदंबिकायै नमः ॥ अथ शतचंडीविधानं (शांतिसारेरुद्रयामलेच) ॥ "शतचंडीविधानं च प्रोच्यमानं शृणुष्व तत् । सर्वोपद्रवनाशार्थं शतचंडीं समारभेत् ॥ षोडशस्तंभसंयुक्तं मण्डपं पल्लवोज्ज्वलम् । वसुकोणयुतां वेदीं मध्ये कुर्यात्त्रिभागतः ॥ पक्केष्टरचितां रम्यामुच्छ्राय हस्तसंमिताम् । पंचवर्णरजोभिश्च कुर्यान्मंडलकं शुभम् ॥ पंचवर्णवितानं च किंकिणीजालमंडितम् । आचार्येण समं विप्रान् वरयेद्दशसुव्रतान् ॥ ऐशान्यां स्थापयेत्कुंभं पूर्वोक्तविधिना हरे । वारुण्यां च प्रकर्त्तव्यं कुंडं लक्षणलक्षितम् ॥ मूर्तिं देव्याः प्रकुर्वीत सुवर्णस्य पलेन वै । तदर्द्धेन तदर्द्धेन तदर्द्धेन महामते ॥ अष्टादशभुजां देवीं कुर्याद्वाष्टकरामपि । पट्टकूलयुगच्छन्नां वेदीमध्ये निधापयेत् ॥ देवीं संपूज्य विधिवज्जपं कुर्युर्दश द्विजाः ॥ शतमादौ शतं चांते जपेन्मंत्रं नवार्णकम् ॥ चंडीसप्तशतीमध्ये संपुटोयमुदाहृतः ॥ एकं द्वे त्रीणि चत्वारि जपेद्दिनचतुष्टयम् । रूपाणि क्रमशस्तद्वत्पूजनादिकमाचरेत् ॥ पंचमे दिवसे प्रातर्होमं कुर्याद्विधानतः । गुडूचीपायसंदूर्वातिलाश्छुक्कान्यवानपि ॥ चंडीपाठस्य होमे तु प्रतिश्लोकं दशांशतः ॥ होमं कुर्याद्ग्रहादिभ्यश्चर्वाज्यसमिधैः क्रमात् ॥ हुत्वा पूर्णाहुतिं दद्याद्विजेभ्यो दक्षिणां क्रमात् । कपिलां गां नीलमणिं श्वेताश्वं छत्रचामरम् ॥ अभिषेकं ततः कुर्युर्यज

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मानस्य ऋत्विजः ॥ एवं कृते महेशान सर्वसिद्धिः प्रजायते ॥ इति॥ " (मंत्रमहोदधौ विशेषः) "शतचंडीविधानं तु प्रवक्ष्ये प्रीतये नृणाम् ॥ नृपोपद्रव आपन्ने दुर्भिक्षे भूमिकंपने ॥ अतिवृष्ट्यामनावृष्टौ परचक्रभये क्षये ॥ सर्वे विघ्ना विनश्यंति शतचंडीविधौ कृते ॥ रोगाणां वैरिणां नाशो धनपुत्रसमृद्धयः ॥ शंकरस्य भवान्या वा प्रासादनिकटे शुभम् ॥ मण्डपं द्वारवेद्याढ्यं कुर्य्यात्सध्वजतो रणम् ॥ तत्र कुंडं प्रकुर्वीत प्रतीच्यां मध्यतोपि वा॥ स्नात्वा नित्यकृतिं कृत्वा वृणुयाद्दश वाडवान् ॥ जितेंद्रियान्सदाचारान्कुली नान्सत्यवादिनः । व्युत्पन्नाञ्चण्डिकापाठरताञ्छुँच्यादयावतः ॥ मधुपर्कविधानेन वस्त्रस्वर्णादिदानतः ॥ जपार्थमासनं मालां दद्या त्तेभ्योपि भोजनम् ॥ ते हविष्यान्नमश्नन्तो मंत्रार्थगतमानसाः ॥ भूमौ शयानाः प्रत्येकं जपेयुश्चंडिकास्तवम् ॥ मार्कंडेयपुराणोक्तं दशकृत्वः सुचेतसः ॥ नवार्णं चंडिकामंत्रं जपेयुश्चायुतं पृथक् ॥ यजमानः पूजयेच्च कन्यानां दशकं शुभम् ॥ द्विवर्षाद्या दशाब्दां ताः कुमारीः परिपूजयेत् ॥ वेद्यां विरचिते रम्ये सर्वतोभद्रमंडले ॥ घटं संस्थाप्य विधिवत्तत्रावाह्यार्चयेच्छिवाम् ॥ तदग्रे कन्य काश्चापि पूजयेद्ब्राह्मणानपि ॥ उपचारैस्तु विविधैः पूर्वोक्तावरणान्यपि ॥ एवं चतुर्दिनं कृत्वा पंचमे होममाचरेत् ॥ पायसान्नैस्त्रि मध्वक्तैर्द्राक्षारंभाफलैरपि ॥ मातुलिंगैरिक्षुखंडैर्नारिकेलैः पुरैस्तिलैः॥ जातीफलैराम्रफलैरन्यैर्मधुरवस्तुभिः ॥ सप्तशत्या दशावृत्त्या प्रतिश्लोकं हुतं चरेत्॥ अयुतं च नवार्णेन स्थापिताग्नौ विधानतः ॥ कृत्वावरणदेवानां होमं तन्नाममंत्रतः ॥ कृत्वा पूर्णाहुतिं सम्य ग्देवमग्निं विसर्ज्य च ॥ अभिषिंचेच्च यष्टारं विप्रौघः कलशोदकैः ॥ निष्कं सुवर्णमथ वा प्रत्येकं दक्षिणां दिशेत् ॥ भोजयेच्च शतं विप्रान्भक्ष्यभोज्यैः पृथग्विधैः॥तेभ्योपि दक्षिणां दत्त्वा गृह्णीयादाशिषस्ततः॥एवं कृते जगद्वश्यं सर्वे नश्यंत्युपद्रवाः॥राज्यं धनं यशः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पुत्रानिष्टमन्यल्लभेतसः ॥ एतद्दशगुणं कुर्याच्चंडीसाहस्रजं विधिः ॥ " (क्रोडतंत्रे तु विशेषः) "यदायदा सतां हानिरात्मनो ग्लानिरेव च ॥ तदा कार्या शतावृत्ती रिपुघ्ना भूतिबर्धना ॥ १॥ दुःस्वप्नदर्शने घोरे महामारीसमुद्भवे ॥ पुष्टिप्रदा शतावृत्तिः कार्या चायुःक्षये तथा ॥ २ ॥ महाभये छेदयोगे दुर्भिक्षे मरणेपि च ॥ कुर्यात्तत्र शतावृत्तिं देवीमहात्म्यमुत्तम् ॥ ३ ॥ अद्भुते च समुत्पन्ने बांधवानां महोत्सवे ॥ कर्याच्चंडीशतावृत्तिं सर्वसंपत्तिकारणम् ॥ ४ ॥ शतावृत्त्या भवेदायुः शतावृत्त्या समागमः ॥ वश्या भवंति राजानः श्रियमाप्नोति संपदा ॥ ५ ॥ धनार्थी प्राप्नुयादर्थं पुत्रकामो लभेत्सुतम् ॥ विद्यार्थी प्राप्नुयाद्विद्यां रोगी रोगात्प्रमुच्यते ॥ ६ ॥ चतुर्वर्गफलावाप्तिकारणं रिपुनाशनम् ॥ चंडीशतावृत्तिफलं नास्ति यज्ञे वरानने ॥ ७ ॥ विधिमत्र प्रवक्ष्यामि शृणुष्व वरवर्णिनि ॥ निमंत्रयेत पूर्वेद्युर्विप्रान्विद्यासमन्वितान् ॥ ८ ॥ अलोलुपानृजून्शांतान्देव्या भक्तिसमन्वितान् ॥ मंत्रोपतंत्रतंत्रज्ञान्शतावृत्तौ नियोजयेत् ॥ ९ ॥ उत्तराशास्थिते हंसे शुक्लपक्षे तथा शुभे ॥ ज्ञार्केंदुभृगुजीवेषु सुयोगे सुतिथौ तथा ॥ १० ॥ पातक्रकचघंटादिदोषहीने स्थिरोदये ॥ न विदध्याद्धरौ सुप्ते भूकंपाकालवर्षणे ॥ ११ ॥ वज्रपाते महोत्पाते गुर्वादित्यादिके तथा ॥ महागुरौ विपन्ने च संवेशे कार्यवस्तुनः ॥ १२ ॥ शतावृत्त्यादियागं तु न विदध्यात्कदाचन ॥ त्रिपंचसप्तभिर्वापि नवैकादशभिस्तथा ॥ १३ ॥ अदीर्घादिवसैः क्षिप्रं विदध्याच्चंडिकामखम् ॥ अयुग्मब्राह्मणैः कार्या शतावृत्तिः सुसिद्धये ॥ १४ ॥ त्रिपंचसप्तभिर्वापि विप्रैः पंचदशैरपि ॥ देवीमाहात्म्यपठनं युग्मैर्विप्रैः कृतं तु यत् ॥ १५ ॥ निष्फलं च भवेत्सर्वं भूतिनाशः प्रजायते ॥ अष्टमी नवमी वापि यदि स्याद्वा चतुर्दशी ॥ १६ ॥ शतावृत्तिर्नवावृत्तिः पक्षावृत्तिः क्रमे

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ण च ॥ शताश्वमेधगोमेधवाजपेयफलप्रदा ॥ १७ ॥ अतः किं बहुनोक्तेन चंडीपाठफलं प्रिये ॥ प्रत्येकावर्तनं देवि हयमेधेन संमितम् ॥ १८ ॥ इति शतचंडीविधानम् ॥ अथ सहस्रचंडीविधानमपि (रुद्रयामले) "सहस्रचंडीं विधिवच्छृणु विष्णो महामते ॥ राज्यभ्रंशो ह्यकस्माच्चेज्जनमारे महाभये ॥ गजमारेश्वमारे च परचक्रभये तथा ॥ इत्यादिविविधे दुःखे क्षयरोगादिजे भये ॥ सहस्रं चंडिकापाठान्कुर्याद्वा कारयेत्तथा ॥ जापकास्तु शतं प्रोक्ताः विंशद्धस्तश्च मंडपः ॥ भोज्याः सहस्रं विप्रेंद्रा गोशतं दक्षिणां दिशेत् ॥ गुरवे द्विगुणं देयं शय्यादानं तथैव च ॥ सप्तधान्यं च भूदानं श्वेताश्वं च मनोहरम् ॥ पंचनिष्कमिता मूर्तिः कर्तव्या वर्धमानतः ॥ अष्टादशभुजा देवीं सर्वायुधविभूषिता ॥ अन्नं वारि च दातव्यं सहस्रं प्रत्यहं विभो ॥ शतं वा नियताहारः प्रायो मानेन वर्तयेत् । एवं यश्चंडिकापाठं सहस्रं तु समाचरेत् ॥ तस्य स्यात्कार्यसिद्धिस्तु नात्र कार्या विचारणा ॥ इति सहस्रचंडीविधानम् ॥ अथ शतचण्डीसहस्रचंडीप्रयोगः ॥ तत्र यजमानः पूर्वोक्तचंद्रतारादिबलान्विते सुमुहूर्ते शंकरस्य भवान्या वा प्रासादसमीपे सुसमे भूप्रदेशे स्वाभीष्टमामानां भूमिं स्वीकृत्य खननसंप्लावनमार्जनसंलेपनादिभिः संशोध्य । तत्र मण्डपं चिकीर्षुः गणेशकूर्मानंतवसुधाद्विजान् संपूज्य पंचगव्येन संप्रोक्ष्य श्वेतसर्षपान् विकीर्य भूम्यै अर्घ्यं दद्यात् । ततः शतचंड्यां षोडशहस्तम् (सहस्रचंडयां विंशतिहस्तात्मकम्) चतुर्द्वारतोरणपताकादियुतं निर्वातं मंडपं विधाय तन्मध्ये मण्डपतृतीयांशेन चतुर्हस्तां वा अष्टकोणयुतां वा चतुरस्रां पक्वेष्टकरचितां रम्यां हस्तोच्छ्रितां वेदिं कृत्वा । तत्पश्चिमे शतचंड्यां द्विहस्तं सहस्रचंडयां चतुर्हस्तं कुंडं पद्माकृतिं चतुरस्रं वा मेखलायोनीकण्ठनाभिनालयुतं कुर्यात् (ग्रहमखपक्षे तदीशान्यां हस्तमात्रां द्व्यंगुलवप्रां

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ग्रहवेदिमपि कुर्यात्) एवं कुण्डग्रंथोक्तविधिना मण्डपादि रचयित्वा शतचंडयां पलसुवर्णेन सहस्रचंडयां पलपंचकेन मूर्त्यध्यायप्रतिपादितां महिषमर्दिनीप्रतिमां सावयवां कुर्यात् । एतत्सर्वमधिवासनदिनात्पूर्वं विधेयम् ॥ अथानुष्ठानारंभदिनकृत्यम् ॥ प्रारंभदिने सुमुहूर्त्ते सपत्नीको यजमानः प्रातस्तिलतैलाभ्यंगपूर्वकमुष्णोदकेन मङ्गलस्नानं कृत्वा शुक्लधौतवासांसि परिधाय यथायोग्यालंकृतो धृतकुंकुमकेशरान्यतममङ्गलत्रिपुंड्रतिलकः संपूर्णकलशहस्तः ॥ 'ॐ भद्रंकर्णेभिरि'ति मण्डपं प्रदक्षिणीकृत्य पश्चिमद्वारेण प्रविश्य । स्वासने प्राङ्मुख उपविश्य । दक्षिणपार्श्वे संभारान् संस्थाप्य । पत्न्या समारब्धः । आचम्य । प्राणानायम्य । ॐ आनोभद्रा । इति शांतिपाठं पठित्वा लक्ष्मीनारायणादिस्मरणं च कुर्यात् ॥ ततस्ताम्रपात्रे कुशजलगंधपुष्पाणि कृत्वा । देशकालौ संकीर्त्य । अमुकगोत्रोऽमुकशर्माहं ममामुककामनासिद्ध्यर्थं सनवग्रहमखां शतचंडीं (सहस्रचंडीं वा) ब्राह्मणद्वारा कारयिष्ये ॥ तदंगतया विहितं गणेशपूजनं पुण्याहवाचनं मातृकापूजनं नांदीश्राद्धमाचार्यादिवरणं च करिष्ये । इति संकल्प्य । सुमुखश्चैकदंतश्चेत्यादिस्मरणपूर्वकं गणपतिपूजनपुण्याहवाचननांदीश्राद्धानि पूर्ववत्कृत्वाचार्यादिव

---

१ कामनाभेदेन पृथक्पृथक् संकल्पाः ॥ ममेह जन्मनि दुर्गाप्रीतिद्वारा सर्वापच्छांतिपूर्वकदीर्घायुर्विपुलधनधान्यपुत्रपौत्राद्यनवच्छिन्नसंततिस्थिरलक्ष्मीकीर्त्तिलाभशत्रुपराजयसदभीष्टसिद्ध्यर्थं दुर्गाप्रीतिकामो वा अनावृष्ट्यादिदुरितशांत्यर्थं वा नृपोपद्रवशांत्यर्थं वा दुर्भिक्षनिवारणार्थं वा भूमिकंपदोषनिवृत्यर्थं वा परचक्रभयराज्यभ्रंशादिभयविनाशार्थं वा विषूचिकाकालस्फोटकालज्वराद्यमुकजनमारमहारोगोपशांत्यर्थं वा नानाकेतूदयोल्कापातादिदोषनिवृत्यर्थं वा । मम जीवच्छरीराऽविरोधेनामुकरोगस्य समूलनाशनेनापमृत्युनिवारणद्वारा क्षिप्रारोग्यार्थं वा । अमुकराजकीयाभियोगनिवृत्यर्थं वा. ममजन्मराशेः सकाशान्नामराशेः सकाशाद्वा जन्मलग्नाद्वर्षलग्नाद्गोचराद्वा चतुर्थाष्टमद्वादशाद्यनिष्टस्थानस्थिताऽमुकग्रहसूचितं सूच-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

रणं कुर्यात् ॥ अथाचार्यादिवरणप्रयोगः ॥ तत्र तावत् । आचार्यादीनुदङ्मुखानासनेषूपवेश्य स्वयं प्राङ्मुख उपविश्य । आचम्य । प्राणानायम्य । आचार्यस्य पादप्रक्षालनं कृत्वा । देशकालौ संकीर्त्य । अमुककार्यसिद्ध्यर्थं करिष्यमाणशतचंडीविधानयज्ञकर्मणि अमुकगोत्रोत्पन्नममुकवेदशाखाध्यायिनममुकशर्माणं ब्राह्मणमेभिर्गंधाक्षतपुष्पतांबूलस्वर्णांगुलीयकासनमालाकमंडलुवासोभिराचार्यत्वेन त्वामहं वृणे । इति वृत्वा ॐ वृतोस्मीति प्रतिवचनानन्तरमाचार्यहस्ते यज्ञकंकणं बद्ध्वा गंधादिभिः संपूज्य ॐ आचार्यस्तु यथा स्वर्गे शक्रादीनां बृहस्पतिः ॥ तथा त्वं मम यज्ञेस्मिन्नाचार्यो भव सुव्रत ॥ १ ॥ इति प्रार्थयेत् । ततो नवऋत्विग्वरणमेकतंत्रेण पृथग् वा कुर्यात् । तद्यथा । सर्वेषां पादप्रक्षालनं कृत्वा । देशकालौ संकीर्त्य । अद्यकरिष्यमाणशतचंडीविधानकर्मणि अमुकामुकगोत्रोत्पन्नानमुकामुकशर्मणो नव विप्रानेभिर्गंधाक्षतपुष्पतांबूलस्वर्णांगुलीयकासनमालाकमंडलुवासोभिराचार्येण सह नवार्णमंत्रजपपूर्वकं मार्कंडेयपुराणोक्तचंडीसप्तशतीस्तवशतसंख्यापरिमितपाठकरणार्थम् ऋत्विक्त्वेन युष्मानहं वृणे । इति वृत्वा । वृताःस्म इति तैरुक्ते प्रत्येकहस्ते वरणद्रव्याणि समर्प्य यज्ञकंकणं बद्ध्वा गंधादिभिः संपूज्य । " ॐ ऋत्विजश्च यथापूर्वं शक्रादीनां मखेऽभवन् ॥ यूयं तथा मे भवितुमृत्विजोऽर्हथ सत्तमाः ॥ १ ॥ अस्य यागस्य निष्पत्तौ भवन्तोऽभ्यर्थिता मया ॥ सुप्रसन्नैः प्रकर्त्तव्यं

-यिष्यमाणं च यत्सर्वारिष्टं तद्विनाशार्थं सर्वदा तृतीयैकादशशुभस्थानस्थितबहुतमफलप्राप्त्यर्थमथ वा अमुकमारकग्रहदशान्तर्दशातत्संबंधिदशाचोपदशादिनदशावाषष्ठाष्टमद्वादशादिनिषिद्धभावाधिपतिदशाजनितपीडाल्पायुराधिदैवाधिभौतिकाध्यात्मजनितक्लेशनिवृत्त्यर्थम् आयुरारोग्यप्राप्त्यर्थं मदपुत्रत्वभार्याबंध्यत्वदोषनिवृत्तिपूर्वकसत्पुत्रप्राप्त्यर्थं शतचंडीविधानं ब्राह्मणद्वारा करिष्ये । इति संकल्पः कार्य्यः ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

शांतिकं विधिपूर्वकम् ॥ २ ॥ पावनाः सर्ववर्णानां ब्राह्मणा ब्रह्मरूपिणः ॥ अनुगृह्णंतु मामद्य शतचंड्याख्यकर्मणि ॥ ३ ॥ शत चंडीजपे पूज्याः संतु मे नियमान्विताः ॥ अक्रोधनाः शौचपराः सततं ब्रह्मचारिणः ॥ ४ ॥ चंडीध्यानरता नित्यं प्रसन्नमनसः सदा ॥ मालीकभाषिणः सन्तु मा सन्तु परनिंदकाः ॥ ५ ॥ ममापि नियमा ह्येते भवंतु भवतामपि ॥ इति प्रार्थ्यार्घ्यं निवेदयेत् ॥ (एवं शतचंडीजपे ऋत्विजो नव ९ आचार्यो दशमः १०) (सहस्रचंड्यां शतमृत्विजः अष्टौ द्वारपालाश्च) तत आचार्यादीनां सर्वेषां मधुपर्कपूजां कृत्वा प्रत्येकं वस्त्रद्वयम् । आसनम् अर्घ्यपात्रम् आचमनपात्रं जलपात्रं सुवर्णांगुलीयककर्णभूषणरुद्राक्षमालादि च यथाशक्ति दद्यात् । आचार्याय द्विगुणं देयम् ॥ तत आचार्यो देशकालौ संकीर्त्य–यजमानेन वृतोहमाचार्यकर्म करिष्ये । इति संकल्प्य । ॐ यदत्र संस्थितं भूतं स्थानमाश्रित्य सर्वतः॥ स्थानं त्यक्त्वा तु तत्सर्वं यत्रस्थं तत्र गच्छतु ॥ १ ॥ भूतप्रेतपिशाचाद्याः ह्यपक्रामन्तु राक्षसाः ॥स्थानादस्माद्व्रजंत्वन्यत्स्वीकरोमि भुवं त्विमाम्॥ इत्युक्त्वा ईशानादिसर्वदिक्षु गौरसर्षपान् विकीर्य आचमनं कृत्वा पंचगव्येन कुशैः । पावमानसूक्तेन ।'आपोहिष्ठामयोभुव'इतिऋचेन च मण्डपं सर्वत्र प्रोक्ष्य कृतांजलिः 'स्वस्तिनऽइन्द्र'इति मंत्रं वारत्रयं पठेत् (ततो मण्डपपक्षे मंडपदेवतापूजां ध्वजपताकोच्छ्रयणं च कुर्यात्) ततो मध्यवेद्याः पश्चिमतः सुखासने प्राङ्मुख उपविश्य । ॐ पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता ॥ त्वं च धारय मां देवि पवित्रं कुरु चासनम् ॥ १ ॥ इति भूमिं प्रार्थ्य । ॐ पृथ्वीकूर्मानंतदेवताभ्यो नमः । इति संपूज्य । भूमौ वामपादघातत्रयं कृत्वा यथोपदेशं विस्तरतः संक्षेपेण वा भूतशुद्ध्यादि कलामातृकान्यासांतं पूर्ववत् कृत्वा नवार्णविध्युक्तैकादश न्यासान् कुर्यात् अथवा एकादशमेवैकं न्यासं कुर्यात (ते

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

च न्यासाः पत्रे (१९२) द्रष्टव्याः) ततो योनिमुद्रां प्रदर्श्य श्रीमहालक्ष्मीं ध्यायेत् । " श्वेतानना नीलभुजा सुश्वेतस्तनमण्डला ॥ रक्तमध्या रक्तपादा नीलजंघोरुरुन्मदा ॥ १ ॥ सुचित्रजघना चित्रमाल्यांबरविभूषणा ॥ चित्रानुलेपना कांतिरूपसौभाग्यशालिनी ॥ २ ॥ अष्टादशभुजा पूज्या सा सहस्रभुजा सती ॥ आयुधान्यत्र वक्ष्यंते दक्षिणाधःकरक्रमात् ॥ ३ ॥ अक्षमाला च कमलं बाणोसिः कुलिशं गदा ॥ चक्रं त्रिशूलं परशुः शंखो घंटा च पाशकः ॥ ४ ॥ शक्तिर्दंडश्चर्म चापं पानपात्रं कमण्डलुः ॥ " इति ध्यानं कृत्वा मानसोपचारैः संपूज्य पात्रासादनं कुर्यात् । ततो मध्यवेद्यां सर्वतोभद्रं तन्मध्यकोष्ठेषु अष्टदलं च लिखित्वा तत्र ब्रह्मादिमण्डलदेवताः स्वस्वमंत्रेण संस्थाप्य षोडशोपचारैः संपूज्य । तन्मध्ये पीठपूजां कुर्यात् । तद्यथा । ॐ मंडूकादिपरतत्त्वां तपीठदेवताभ्यो नमः इति पीठदेवताः संपूज्य । पूर्वादिषु । ॐ जयायै नमः ॥ १ ॥ विजयायै नमः ॥ २ ॥ अजितायै० ॥ ३ ॥ अपराजितायै० ॥ ४ ॥ नित्यायै० ॥ ५ ॥ विलासिन्यै० ॥ ६ ॥ दोग्ध्र्यै नमः ॥ ७ ॥ घोरायै नमः ॥ ८ ॥ मध्ये मंगलायै नमः ॥ ९ ॥ इति पीठशक्तीः पूजयेत् । ॐ ह्रीं सर्वशक्तिकमलासनाय सर्वात्मसंसर्गयोगपीठात्मने नमः । इति पुष्पांजलिनासनं दत्त्वा तत्रः महीद्यौइत्यादिपूर्वोक्तैर्मंत्रैर्बृहत्ताम्रकलशं संस्थाप्य । तस्मिन् गंधपुष्पफलसर्वौषधीदूर्वापंचपल्लव पंचरत्नसुवर्णसप्तमृत्तिकादीनि तत्तन्मंत्रेण निक्षिप्य कौशेयवस्त्रद्वयेन संवेष्टच तदुपरि ताम्रपूर्णपात्रं निधाय कलशे । 'तत्त्वायामीति' वरुणमावाह्य संपूज्य । कलशदेवताः स्मृत्वा । ' कलशस्य मुखे विष्णुः ' इत्यभिमंत्र्य । ' देवदानवसंवादे ' इत्यादिप्रार्थयेत् । ततः कलशोपरिष्टपूर्णपात्रे रक्तवस्त्रेऽष्टगंधेन यंत्रं लिखेत् (अथवा) ताम्रपत्रे लिखितं यंत्रं स्थापयेत् ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

॥ अथ चंडिकायंत्रमिदम् ॥

(यंत्रप्रकारः) मध्ये त्रिकोणं तद्बहिः षट्कोणं तद्बाह्ये वृत्तं तद्बाह्येऽष्टौ दलानि तद्बाह्ये चतुर्विंशतिदलानि तद्बाह्ये चतुर्द्वारं चतुरस्रत्रयमिति यंत्रं विलिख्य तत्र सिंहासने शतचंड्यां पलसुवर्णेन (सहस्रचंड्यां पंचपलेन) तदर्धेन तदर्धार्धेन वाष्टादशभुजाम् अष्टभुजां वा सिंहारुढां पूर्वोक्तध्यानयुतां देवीमूर्तिं कारयित्वा अभ्युत्तारणपूर्वकं संस्थाप्य प्राणप्रतिष्ठां कृत्वा पूजयेत् ॥ (प्राणप्रतिष्ठामंत्राः पूर्वमुक्ता एव) अथ पूजनप्रकारः ॥ स्ववामे कर्पूरादियुतगंगाजलपूर्णं कलशं निधाय संपूज्य । 'कलशस्य मुखे विष्णुः' इत्यादि पठित्वा कलश मुद्रां प्रदर्श्य दक्षिणतः शंखं संपूज्य शंखमुद्रां प्रदर्श्य शंखोदकेनात्मानं पूजाद्रव्याणि च प्रोक्ष्य नवरात्रोक्तविधानवत् मूलेन श्रीसूक्तेन वा आवाहनादिपुष्पांतैरुपचारैः भगवतीं संपूज्य आवरणपूजां कुर्य्यात् अथावरणपूजा ॥ पूज्यपूजकयोर्मध्ये प्राचीं प्रकल्प्य प्रदक्षिणक्रमेण पूजयेत् तद्यथा—त्रिकोणमध्ये मूलमंत्रेण देवीं गंधादिभिः संपूज्य त्रि

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कोणस्य (पूर्वकोणे) ॐ सरस्वतीसहिताय ब्रह्मणे नमः ॥ १ ॥ (नैर्ऋत्याम्) ॐ श्रीसहिताय विष्णवे नमः ॥ २ ॥ (वाय व्याम्) ॐ उमासहिताय शिवाय नमः ॥ ३ ॥ (उत्तरे) ॐ सिंहाय नमः ॥ ४ ॥ (दक्षिणे) ॐ महिषाय नमः ॥ ५ ॥ (इति त्रिकोणदेवताः पूजयेत्) (षट्कोणमण्डले) पूर्वादिषट्कोणे वामक्रमेण ॐ नं नंदजायै नमः ॥ १ ॥ ॐ रं रक्तदंतिकायै नमः ॥२॥ ॐ शां शाकंभर्यै नमः ॥ ३ ॥ ॐ दुं दुर्गायै नमः ॥ ४ ॥ ॐ भीं भीमायै नमः ॥ ५ ॥ ॐ भ्रां भ्रामर्य्यै नमः ॥ ६ ॥ (अष्टदले वाममार्गक्रमेण) ॐ ब्रां ब्राह्म्यै नमः ॥ १ ॥ ॐ मां माहेश्वर्य्यै नमः ॥ २ ॥ ॐ कौं कौमार्यै नमः ॥ ३ ॥ ॐ वैं वैष्णव्यै नमः ॥ ४ ॥ ॐ वां वाराह्यै नमः ॥ ५ ॥ ॐ नां नारसिंह्यै नमः ॥ ६ ॥ ॐ ऐं ऐंद्र्यै नमः ॥ ७ ॥ ॐ चां चामुंडायै नमः ॥८॥ (ततश्चतुर्विंशतिदलेष्वपि तेनैव क्रमेण) ॐ विं विष्णुमायायै नमः ॥ १ ॥ ॐ चें चेतनायै नमः ॥ २ ॥ ॐ बुं बुध्यै नमः ॥ ३ ॥ ॐ निं निद्रायै नमः ॥ ४ ॥ ॐ क्षुं क्षुधायै नमः ॥ ५ ॥ ॐ छां छायायै नमः ॥ ६ ॥ ॐ शं शक्त्यै नमः ॥ ७ ॥ ॐ तृं तृष्णा यै नमः ॥ ८ ॥ ॐ क्षां क्षांत्यै नमः ॥ ९ ॥ ॐ जां जात्यै नमः ॥ १० ॥ ॐ लं लज्जायै नमः ॥ ११ ॥ ॐ शां शांत्यै नमः ॥ ॥१२॥ ॐ श्रं श्रद्धायै नमः ॥ १३ ॥ ॐ कां कांत्यै नमः ॥ १४ ॥ ॐ लं लक्ष्म्यै नमः ॥ १५ ॥ ॐ धृं धृत्यै नमः ॥१६॥ ॐ वृं वृत्त्यै नमः ॥ १७ ॥ ॐ श्रुं श्रुत्यै नमः ॥ १८ ॥ ॐ स्मृं स्मृत्यै नमः ॥ १९ ॥ ॐ तुं तुष्ट्यै नमः ॥ २० ॥ ॐ पुं पुष्ट्यै नमः ॥ २१ ॥ ॐ दं दयायै नमः ॥ २२ ॥ ॐ मां मात्रे नमः ॥ २३ ॥ ॐ भ्रां भ्रांत्यै नमः ॥ २४ ॥ ततो बहिर्भूगृहचतुःकोणेषु । (ईशान्याम्) ॐ गं गणपतये नमः ॥ १ ॥ (आग्नेय्याम्) ॐ क्षं क्षेत्रपालाय नमः ॥ २ ॥ (नैर्ऋत्याम्) ॐ वं वटुकाय

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नमः ॥ ३ ॥ (वायव्याम्) ॐ यों योगिनीभ्यो नमः ॥ ४ ॥ पुनः (पूर्वादिषु) प्रदक्षिणक्रमेण ॥ ॐ लं इंद्राय नमः ॥ १ ॥ ॐ रं अग्नये नमः ॥ २ ॥ ॐ मं यमाय नमः ॥ ३ ॥ ॐ क्षं निर्ऋतये नमः ॥ ४ ॥ ॐ वं वरुणाय नमः ॥ ५ ॥ ॐ यं वायवे नमः ॥६॥ ॐ सों सोमाय नमः ॥७॥ ॐ हं रुद्राय नमः ॥८॥ ॐ ब्रं ब्रह्मणे नमः ॥९॥(अधः) ॐ अं अनंताय नमः इति पूजयेत् । तद्बाह्ये ॐ वज्राय नमः ॥ १ ॥ शक्तये नमः ॥ २ ॥ दंडाय नमः ॥ ३ ॥ खड्गाय नमः ॥ ४ ॥ पाशाय नमः ॥ ५ ॥ अंकुशाय नमः ॥ ६ ॥ गदायै नमः ॥ ७ ॥ त्रिशूलाय नमः ॥ ८ ॥ पद्माय नमः ॥ ९ ॥ चक्राय नमः इत्यायुधानि च पूजयेत् । एवमावरणपूजां कृत्वा देव्यै हरिद्राकुंकुमसिंदूररक्तचंदनालक्तकपरिमलद्रव्याणि समर्पयेत् ॥ अथांगपूजा ॐ दुर्गायै नमः पादौ पूजयामि ॥ ॐ गिरिजायै नमः गुल्फौ पूजयामि ॥ ॐ अपर्णायै नमः जानुनी पूजयामि ॥ ॐ हरिप्रियायै नमः ऊरू० ॥ ॐ पार्वत्यै० कटिं पू० । ॐ आर्यायै नमः नाभिं० । ॐ जगन्मात्रे० उदरं० । ॐ मंगलायै० कुक्षिं० ॐ शिवायै० हृदयं० । ॐ माहेश्वर्यै० कंठं० । ॐ विश्ववंद्यायै० स्कंधौ० । ॐ कात्यै० बाहू० ॐ । आद्यायै० हस्तौ० । ॐ वरदायै० मुखं० । ॐ सुवाण्यै० नासिकां० । ॐ कमलाक्ष्यै०नेत्रे० । ॐ अंबिकायै०शिरः० । ॐदेव्यै० सर्वांग पूजयामि । इत्यंगपूजां कृत्वा ततः पूर्वोक्तमंत्रैर्धूपदीपनानाविधनैवेद्यतांबूलपूगीफलदक्षिणादिमंत्रपुष्पांतपूजां कृत्वा राजोपचारान्निवेद्य शतवर्तिकाभिर्दशभिर्वा कर्पूरगर्भिताभिर्महानीराजनं प्रदक्षिणामेकां नमस्कारांश्च कृत्वा।'नमो देव्यै महादेव्यै' इत्यादिमंत्रैः स्तुतिं कृत्वा यथासंभवं छत्रचामरव्यजनघंटागीतनृत्यवाद्यादि समर्प्य कूष्मांडनारीकेलकदलीफलेक्षुदंडादिबलिं दत्त्वा अखण्डदीपकं प्रतिष्ठापयेत् । ततो योगिनीक्षेत्रपा

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

लपूजां कुर्यात् ॥ अथ चतुःषष्टियोगिनीपूजा ॥ देव्यग्रे रक्तवस्त्रोपरि तंडुलान्नेन गोधूमैर्वा अष्टौ पङ्क्तिरूपेण चतुःषष्टिकोष्ठानि कृत्वा तत्र क्रमेण । ॐ जये इहागच्छ इहतिष्ठ इत्यावाहयेत् ॥१॥ एवं ॐ विजये इहागच्छ इहतिष्ठ ॥२॥ ॐ जयंति इहा० ॥ ३ ॥ ॐ अपराजिते इहा० ॥ ४ ॥ ॐ दिव्ययोगिनि० ॥ ५ ॥ ॐ महायोगिनि० ॥ ६ ॥ ॐ सिद्धयोगिनि० ॥ ७ ॥ ॐ गणेश्वरि० ॥ ॥ ८ ॥ (इति प्रथमाष्टकम्) ॐ प्रेतासनि इहा० ॥ ९ ॥ ॐ डाकिनि इहा० ॥ १० ॥ ॐ कालि इहा० ॥ ११ ॥ ॐ कालरात्रि इहा० ॥ १२ ॥ ॐ निशाचरि इहा० ॥ १३ ॥ ॐ टंकारिणि इहा० ॥ १४ ॥ ॐ रुद्रवेतालिनि इहा० ॥ १५ ॥ ॐ हुंकारिणि इहा० ॥ १६ ॥ (इति द्वितीयाष्टकम्) ॐ ऊर्ध्वकेशि इहा० ॥१७॥ ॐ विरूपाक्षि इहा० ॥ १८ ॥ ॐ शुक्लांगि इहा० ॥ ॥ १९ ॥ ॐ नरभोजिनि इहा० ॥ २० ॥ ॐ फट्कारिणि इहा० ॥ २१ ॥ ॐ वीरभद्रे इहा० ॥ २२ ॥ ॐ धूमांगि इहा० ॥२३॥ ॐ कलहप्रिये इहा० ॥ २४ ॥ (इति तृतीयाष्टकम्) ॐ राक्षसि इहा० ॥ २५ ॥ ॐ रक्ताक्षि इहा० ॥ २६ ॥ ॐ विश्वरूपे इहा० ॥ २७ ॥ ॐ भयंकरि इहा० ॥ २८ ॥ ॐ वीरकौमारि इहा० ॥ २९ ॥ ॐ चंडिके इहा० ॥ ३० ॥ ॐ वाराहि इहा० ॥ ॥ ३१ ॥ ॐ मुंडधारिणि इहा० ॥ ३२ ॥ (इति चतुर्थाष्टकम्) ॐ भैरवि इहा० ॥ ३३ ॥ ॐ ध्वांक्षिणि इहा० ॥ ३४ ॥ ॐ धूम्रांगि हहा० ॥ ३५ ॥ ॐ प्रेतवाराहि इहा० ॥ ३६ ॥ ॐ खड्गिनि इहा० ॥ ३७ ॥ ॐ दीर्घलंबोष्ठि इहा० ॥ ३८ ॥ ॐ मालिनि इहा० ॥ ३९ ॥ ॐ मंत्रयोगिनि इहा० ॥ ४० ॥ (इति पंचमाष्टकम्) ॐ कालिनि इहा० ॥ ४१ ॥ ॐ चक्रिणि इहा० ॥४२॥ ॐ कंकालि इहा० ॥४३॥ ॐ भुवनेश्वरि इहा० ॥४४॥ ॐ शटकि इहा० ॥ ४५ ॥ ॐ महामारि इहा० ॥४६॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ॐ यमदूति इहा० ॥ ४७ ॥ ॐ करालिनि इहा० ॥ ४८ ॥ (इति षष्ठाष्टकम्) ॐ केशिनि इहा० ॥ ४९ ॥ ॐ मर्दिनि इहा० ॥ ५० ॥ ॐ रोमजंघे इहा० ॥ ५१ ॥ ॐ निवारिणि इहा० ॥ ५२ ॥ ॐ विशालिनि इहा० ॥ ५३ ॥ ॐ कार्मुकि इहा० ॥ ५४ ॥ ॐ लोलि० इहा० ॥ ५५ ॥ ॐ अधोमुखि इहा० ॥ ५६ ॥ (इति सप्तमाष्टकम्) ॐ मुंडाग्रधारिणि इहा० ॥ ५७ ॥ ॐ व्याघ्रि इहा० ॥ ५८ ॥ ॐ कांक्षिणि इहा० ॥ ५९ ॥ ॐ प्रेतरूपिणि इहा० ॥ ६० ॥ ॐ धूर्जटि इहा० ॥ ६१ ॥ ॐ घोरि इहा० ॥ ६२ ॥ ॐ कराले इहा० ॥ ६३ ॥ ॐ विषलंबिनि इहागच्छ इहतिष्ठ ॥ ६४ ॥ (इत्यष्टमाष्टकम्) एवमावाह्य । ॐ मनोजूतिरिति प्रतिष्ठाप्य ॐ चतुःषष्टियोगिनीभ्यो नमः । इति नाममंत्रेण षोडशोपचारैः संपूज्य पायसबलिं दद्यात् ॥ ततस्तत्रैव एकदेशे ॐ वं वटुकाय नमः । ॐ क्षं क्षेत्रपालाय नमः । इति संपूज्य ॥ ॐ वं वटुकाय पिंगलभासुरनेत्राय बलिं गृहाण गृहाण भक्ष भक्ष कंदन कंदन ह्रीं ह्रूं स्वाहा । इति मंत्रेण वटुकाय क्षेत्रपालाय पायसादिनानाद्रव्यबलिं दत्त्वा । हस्तौ प्रक्षाल्याचामेत् ॥ ततः अनेन पूजनेन श्रीमहाकालीमहालक्ष्मीमहासरस्वत्यः प्रीयंतामिति देवीदक्षिणतो जलमुत्सृज्य देव्यग्रे कुमारीपूजां कुर्यात् । तद्यथा । देशकालौ संकीर्त्य । शतचंडीजपांगत्वेन कुमारीपूजां करिष्ये इति संकल्प्य । नवार्णमंत्रेण पूर्वोक्तं षडंगन्यासं कृत्वा । "ॐ मंत्राक्षरमयीं देवीं मातृणां रूपधारिणीम् ॥ नवदुर्गात्मिकां साक्षात्कन्यामावाहयाम्यहम् ॥ १ ॥ इत्यावाह्य पूर्वोक्तनवरात्रविधिना यथासंभवं पूजयेत् । कुमार्यश्च प्रत्यहं शतं नव वा यथाशक्ति वा पूज्याः प्रत्यहमेकवृद्ध्या वा पूजयेत् । ततो ब्राह्मणसुवासिनीपूजा । एवं देवीकुमार्यादिपूजा प्रत्यहं कार्या । द्वितीयदिने द्विगुणा २ तृतीये त्रिगुणा ३ चतुर्थे च चतुर्गुणा ४ विधे

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

या । इति पूजाप्रयोगः । अथ पाठक्रमः । तावत् दुर्गापुरतो मृद्वासनेषूपविष्टाः सर्वे विप्राः पूर्वोक्तनवार्णमंत्रकृतांगन्यासाः समाहितमनसो वाग्यताः भगवतीं स्मरंतो मंत्रार्थगतमानसाः कवचार्गलाकीलकानि सकृज्जप्त्वा प्रत्येकं शतं नवार्णमंत्रं च जप्त्वा । ग्रंथार्थं बुध्यमानाः स्पष्टाक्षरं नातिशीघ्रं नातिमंदं रसभावस्वरयुतं मार्कंडेयपुराणोक्तं सप्तशतीस्तवं जपेयुः । ततो जपान्ते रहस्यत्रयं पुनर्नवार्णमंत्रशतं रहस्यत्रयं च जपेयुः एकस्मिन्दिने अनेकावृत्तौ तु कवचादीनां प्रत्यावृत्तौ नावृत्तिः । एवं प्रथमदिने एकावृत्तिः ॥ द्वितीये द्वे तृतीये तिस्रः३चतुर्थे चतस्रः४रूपाणीत्येवं जपं कुर्युः।यजमानसहिताः सर्वे भूमौ शयानाः नित्यं क्षीरान्नभोजनाः अशक्तौ हविष्यमश्नंतः संतुष्टास्त्यक्तमत्सरा ब्रह्मचर्यास्पृश्यास्पर्शादिनियमांश्चरेयुः । एवं शतसहस्रावृत्तयः संपद्यंते । (क्रोडतंत्रे त्रिपंचसप्तनवभिर्दिनैः पक्षेण वा पुनः ॥ अदीर्घदिवसैः क्षिप्रं विदध्याच्चंडिकामखमित्यपि लिखितम्) प्रत्यहं सहस्रं शतं दश वा ब्राह्मणान् भोजयेत् । प्रत्यहं रात्रौ जागरणं कार्यम् । ततः पंचमेह्नि होमः । नवरात्रे तु नवम्यामेव होमः । चतुर्दश्यष्टमीनवम्यन्यतमदिने समाप्तिः कार्या । अथ होमप्रयोगः । देशकालौ संकीर्त्य मया ब्राह्मणद्वारा कृतस्य शतचंडीजपस्य तत्संपूर्णतासिद्ध्यर्थं जपदशांशेन तिलादिमिश्रपायसद्रव्येण होमं करिष्ये । तदंगत्वेन कुंडसंस्कारपूर्वकमग्निप्रतिष्ठापनं च करिष्ये । इति संकल्प्य। सामान्यतो गणपतिपूजनं विधाय कुंडे स्थंडिले वा पंचभूसंस्कारान् कृत्वा तत्र शतनामानमग्निं प्रतिष्ठाप्य सुसमिध्य ध्यायेत् [अत्र केचित्तु पुण्याहवाचनं तथा नांदीश्राद्धं सर्वतोभद्रादिमंडलपूजनं च कुर्वन्ति] तत ईशान्यां दिशि ग्रहवेद्यां तत्तन्मंत्रेण सूर्यादिग्रहान्संस्थाप्य संपूज्य तदीशान्यां पूर्ववत्कलशं स्थापयेत् । ततः पूर्ववत् यंत्रावरणदेवतापूजां देवीपूजां च कृत्वा ततोऽग्निस

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मीपमागत्य कुशकंडिकां कृत्वा आघारावाज्यभागौ हुत्वा देशकालौ संकीर्त्य क्रियमाणे शतचंडीजपांगहोमे इदं हवनीय द्रव्यं यथादैवतमस्तु न मम इति त्यागं कृत्वा । सूर्यादिग्रहेभ्योऽर्कादिसमिच्चरुतिलाज्यद्रव्यैरष्टाविंशतिसंख्याकाभिराहुतिभि स्तैरेव द्रव्यैरधिप्रत्यधिदेवताभ्यश्चतुश्चतुःसंख्याकाभिः । विनायकादिदिक्पालांतक्रतुसंरक्षकदेवताभ्यश्च द्विद्विसंख्याका भिश्च जुहुयात् । ततः सर्वतोभद्रमंडलस्थदेवताहोमं कृत्वा प्रधानदेवतामहाकालीमहालक्ष्मीमहासरस्वतीभ्यो गुडूची पायसदूर्वातिलपलाशपुष्पसर्षपपूगीफललाजायवविल्वफलरक्तचंदनगुग्गुलुद्राक्षारंभाफलद्रव्यैस्त्रिमध्वक्तैरिक्षुखंडैर्नारिकेलशकलैर्जा तीफलैर्मातुलुंगैरन्यैर्मधुरवस्तुभिश्च तिलमिश्रघृताक्तपायसेन वा (शूलेन पाहि नो देवीत्यादिचतुर्मंत्रवर्जसप्तशत्या दशावृत्त्या प्रतिश्लोकं जुहुयुः) तैरेवद्रव्यैर्नवार्णमंत्रजपदशांशेनापि जुहुयुः । अध्यायसमाप्तौ उवाचस्थले च पत्र पुष्पैर्होमः कार्यः । एवं प्रधानदेवहोमं कृत्वा पूर्वोक्तजयादिपीठशक्तिभ्यो यंत्रावरणदेवताभ्यश्च योगिनीभ्यश्च एकैकया हुत्या साज्यं पायसं च जुहुयात् । ततः स्विष्टकृदादिप्रायश्चित्तहोमांतं कृत्वा इंद्रादिलोकपालेभ्यः सूर्यादिग्रहेभ्यः क्षेत्रपालादिभ्यश्च माषभक्तबलींस्तत्तन्मंत्रैर्दद्यात् । ततो हस्तौ पादौ प्रक्षाल्याचम्य । 'समुद्रादूर्मिः' इत्यादिमंत्रैः । नवार्णमंत्रेण 'नमो देव्यै महादेव्यै' इत्यादिमंत्रैश्च पूर्णाहुतिं दत्त्वा प्रणीताविमोकादिकर्म्मशेषं समाप्य होमांते जले चंडिकां संपूज्य मूलमंत्रेण होमदशांशेन दुग्धमिश्र जलेन । ॐ देवीं चंडिकां तर्पयामीत्युक्त्वा तर्पणं कार्यम् ॥ ततस्तर्पणदशांशेन मूलमंत्रांते । आत्मानमभिषिंचामि नमः । इति

१ मधुरत्रयमाह कात्यायनः । 'आज्यं क्षीरं मधु तथा मधुरत्रयमुच्यते ।'

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यजमानमूर्ध्न्यभिषेकः कार्यः। ततो यजमानः आचार्यादीन् वस्त्राद्यैः संपूज्य तेभ्यो निष्कं सुवर्णं वा गोमिथुनानि च प्रत्येकं दक्षिणां दद्यात्। आचार्याय द्विगुणं देयम्। सति संभवे कपिलगोनीलमणिश्वेताश्वच्छत्रचामरभूमिशय्यासप्तधान्यानि यथासंभवं दद्यात् तत आचार्यादयः कलशोदकेन सपत्नीकं सकुटुंबं यजमानं वेदमंत्रैः 'सुरास्त्वा० ' इत्यादिपौराणिकैर्ग्रहमंत्रैश्चाभिषिंचेयुः। ततो यजमानो ग्रहाणामुत्तरपूजां कृत्वा ग्रहाग्निं विसृज्य। देवीं पंचोपचारैः संपूज्य॥ महाबलिं दद्यात्॥ (तत्र क्षत्रियादिनाऽश्वमेषच्छाग महिषाणामन्यतरो देयः) विप्रेण तु कूष्मांडविल्वफलमिक्षवश्च देयाः। तद्यथा। देवीं द्रोणपुष्पबिल्वपत्राम्रदलजातीचंपकैः संपूज्य कर्ता उदङ्मुखः पूर्वमुखं देव्यभिमुखं वा बलिं गंधादिनाभ्यर्च्य। "पशुस्त्वं बलिरूपेण मम भाग्यादुपस्थितः॥ प्रणमामि ततः सर्वरूपिणं बलिरूपिणम्॥ १॥ चंडिकाप्रीतिदानेन दातुरापद्विनाशनम्॥ चामुंडाबलिरूपाय बले तुभ्यं नमोस्तु मे॥ २॥ यज्ञार्थं बलयः सृष्टाः स्वयमेव स्वयंभुवा॥ अतस्त्वां घातयाम्यद्य तस्माद्यज्ञे वधोऽवधः॥ ३॥ " इति बलिमभिमंत्र्य ॐ ह्रीं श्रीं इति मंत्रपुष्पं क्षिप्त्वा। "रसना त्वं चंडिकायाः सुरलोकप्रसाधकः॥ १॥ " ॐ ह्रां ह्रीं खड्ग आं हुं फट्। इति खड्ग मन्यद्वा शस्त्रं संपूज्य। ॐ कालिकालि यज्ञेश्वरि लोहदंडायै नमः। इति बलिं छेदयित्वा। ॐ ऐं ह्रीं कौशिकि रुधि रेणाप्यायताम्। इति देव्यै निवेद्य। ततो माषपिष्टमयं शत्रुं कृत्वा खड्गेन च्छेदयित्वा स्कंदाय विशिखाय च दत्त्वा बलिशेषं रक्षो भ्यो हरेत्। मंत्रस्तु। ॐ ह्रीं स्फुरस्फुर कुंभ २ सूनु २ गुलु २ धुनु २ मारय २ विद्रावय २ विदारय २ कंपय २ कंपातय २ पूरय २ ॐ ह्रीं ॐ हुं फट् हुंमर्दय २ हुम्। ततः शेषबलिं बहिर्दद्यात्। "बलिं गृह्णंत्विमं देवा आदित्या वसवस्तथा॥ मरुतश्चा

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

श्विनौ रुद्राः सुपर्णाः पन्नगाः खगाः ॥ असुरा यातुधानाश्च पिशाचोरगराक्षसाः ॥ डाकिन्यो यक्षवेताला योगिन्यः पूतनाः शिवाः॥ जृंभकाः सिद्धगंधर्वा नागा विद्याधरा नगाः ॥ दिक्पाला लोकपालाश्च ये च विघ्नविनायकाः ॥ जगतां शांतिकर्तारो ब्रह्माद्याश्च महर्षयः । मा विघ्नं मा च मे पापं मा संतु परिपंथिनः ॥ सौम्या भवंतु तृप्ताश्च भूतप्रेताः सुखावहाः ॥" इति मंत्रान् पठेत् । अयं बलिः शूद्रेण दुर्ब्राह्मणेन वा नेयः । ततः स्नात्वा तिलकं धृत्वा देवीं प्रार्थयेत् ॥ तत्र मंत्राः । "खड्गिनी शूलिनी घोरा० ॥ १ ॥ शूलेन पाहि नो देवि० ॥ ४ ॥ नमो देव्यै महादेव्यै० ॥ ५ ॥ रूपं देहि यशो देहि भगं भगवति देहि मे ॥ पुत्रान् देहि धनं देहि सर्वान्कामांश्च देहि मे ॥ १॥ महिषघ्नि महामाये चामुंडे मुंडमालिनि ॥ आयुरारोग्यमैश्वर्यं देहि देवि नमोस्तु ते ॥ २ ॥ इति देवीं संप्रार्थ्य । गुह्यातिगुह्यगोप्त्री त्वं गृहाणास्मत्कृतं जपम् ॥ सिद्धिर्भवतु मे देवि प्रसादात्तव सुंदरि ॥१॥ इति देव्यै जपं निवेद्य । देशकालौ संकीर्त्य कृतस्य कर्मणः सांगतासिद्ध्यर्थं कुमारीब्राह्मणसुवासिनीभोजयिष्ये । इति संकल्प्य पूजापूर्वकं ब्राह्मणशतं नानाभक्ष्यभोज्यैः संभोज्य तेभ्यो भूयसीं दक्षिणां दत्त्वा प्रदक्षिणां कृत्वा आशिषो गृह्णीयात् । ततो मूल मंत्रेण पुष्पेण देवीमुद्रास्य तेनैव षंडंगं कृत्वा । "उत्तिष्ठ ब्रह्मण० ॥१ ॥ उत्तिष्ठ देवि चंडेशि शुभां पूजां प्रगृह्य च ॥ कुरुष्व मम कल्याणमष्टाभिः शक्तिभिः सह ॥ २ ॥" इति विसृज्य प्रतिमामाचार्याय दत्त्वा मंत्रं पठेत् ॥ "त्रैलोक्यमातर्देवि त्वं सर्वभूतदयान्विते ॥ दानेनानेन संतुष्टा सुप्रीता वरदा भव ॥ १ ॥ ततः यस्यस्मृत्या० ॥१॥ प्रमादात्कुर्वतां० ॥ २ ॥" इत्यादि पठित्वा कर्मेश्वरार्पणं कृत्वा सुहृद्युक्तो भुंजीत । एतद्दशगुणो विधिः सहस्रचंड्यां तद्दशगुणोविधिरयुतचंड्यां च ज्ञेयः शेषं शतचंडीवत् ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

एवं कृते जगद्भश्यं सर्वे नश्यंत्युपद्रवाः ॥ राज्यं धनं यशः पुत्रानिष्टमन्यल्लभेत सः ॥१॥ इति पण्डितश्रीचतुर्थीलालगौडविरचिते
ऽनुष्ठानप्रकाशे शतचंडीविधानप्रयोगः ॥ श्रीचंडिकार्पणमस्तु ॥ ॥ अथ देव्यथर्वशीर्षम् ॥ ॐ सर्वेवैदेवादेवीमुपतस्थुःकासि
त्वंमहादेवीसाब्रवीदहंब्रह्मस्वरूपिणीमत्तःप्रकृतिपुरुषात्मकंजगच्छून्यंचाशून्यंचअहमानन्दानानन्दौअहंविज्ञानाविज्ञानेअहंब्रह्माब्रह्म
णीद्वेब्रह्मणीवेदितव्ये ॥ इति वाथर्वणीश्रुतिः ॥ अहंपञ्चभूतानिअहंपञ्चतन्मात्राणिअहमखिलंजगत्वेदोहमवेदोहंविद्याहमविद्याहम्
अजाहमनजाहमधश्चोर्ध्वंचतिर्यञ्चाहमअह ७ रुद्रेभिर्वसुभिश्चरामिअहमादित्येरुतविश्वेदेवैःअहंमित्रावरुणावुभौबिभर्मिअहमिन्द्रा
ग्नीअहमश्विनावुभौअह १५सोमंत्वष्टारंपूषणंभगंदधामिअहंविष्णुमुरुक्रमंब्रह्माणमुत्प्रजापतिंदधामिअहंदधामिद्रविण ँ हविष्मतेसु
प्राव्येयजमानायसुन्वतेअह ँ राज्ञीसङ्गमनीववसूनाचिकितुषीप्रथमायज्ञियानाम् अह ँ सुवेपितरमस्यमूर्द्धन्ममयोनिरस्वात्
समुद्रेयएवंवेदसदैवी ँ संपदमाप्नोतितेदेवाअब्रुवन् "नमो देव्यै महादेव्यै शिवायै सततं नमः ॥ नमः प्रकृत्यै भद्रायै
नियताः प्रणताः स्म ताम् ॥ तामग्निवर्णां तपसा ज्वलन्तीं वैरोचनीं कर्मफलेषुजुष्टां दुर्गां देवीं शरणं प्रपद्यामहेऽसुरान्नाशयित्र्यै तेनमः॥
देवीवाचमजनयन्त देवास्तां विश्वरूपाः पशवो वदन्ति । सानोमन्देषमूर्जदुहानाधेनुर्वागस्मानुपसुष्टुतैतु । कालरात्रीं ब्रह्मस्तुतां वै
ष्णवीं स्कन्दमातरम् । सरस्वतीमदितिंदक्षदुहितरं नमामः । पावनां शिवाम् ।महालक्ष्म्यैचविद्महेसर्वशक्त्यैचधीमहि । तन्नोदेवीप्रचो
दयात् । अदितिर्ह्यजनिष्टदक्षयादुहितातव । तांदेवाअन्वजायन्ते भद्राअमृतबंधवः कामेयोनिः कमलावज्रपाणिर्गुहाहंसामातालिश्चा
भ्रमिन्द्रः पुनर्गुहा सकलामायया चापृथक् क्लेशाविश्वमाताादिविद्याः । एषात्मशक्तिः एषाविश्वमोहिनीपाशाङ्कुशधनुर्बाणधरा ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

एषाश्रीमहाविद्या । यएवंवेदसशोकंतरति । नमस्तेभगवतिमातरस्मान्पाहिसर्वतः । सैषावैष्णवावसवः सैवैकादशरुद्राः सैषाद्वादशादित्याः सैषाविश्वेदेवाः सोमपाअसोमपाश्चसैषायातुधानाअसुरारक्षांसिपिशाचयक्षसिद्धाः सैषासत्त्वरजस्तमांसिसैषाब्रह्मविष्णुरुद्ररूपिणी सैषाप्रजापतीन्द्रमनवः सैषाग्रहनक्षत्रज्योतिष्कलाकाष्ठादिविश्वरूपिणीतामहं प्रणौमिनित्यम् । पापापहारिणीदेवीभुक्तिमुक्तिप्रदायिनी । अनंतांविजयांशुद्धांशरण्यांसर्वदाशिवाम् ॥ वियदाकारसंयुक्तंवीतिहोत्रसमन्वितम् ॥ अर्द्धेन्दुलसितं देव्याबीजंसर्वार्थसाधकम् । एवमेकाक्षरंमंत्रं यतयः शुद्धचेतसः ध्यायंतिपरमानंदमयाज्ञानाम्बुराशयः ॥ वाङ्मयाब्रह्मभूस्तस्मात्षष्ठवक्त्रसमन्वितम् ॥ सूर्यो वामश्रोत्रबिंदुसंयुक्ताष्टतृतीयकम् । नारायणेनसंमिश्रोवायुश्चाधारयुक्तयः । विच्चेनवार्णकोणस्यमहानानंददायकः । हृत्पुंडरीकमध्यस्थांप्रातःसूर्यसमप्रभाम् ॥ पाशाङ्कुशधरांसौम्यांवरदाभयहस्तिकाम् ॥ त्रिनेत्रांरक्तवसनां भक्तकामदुहंभजे । भजामित्वांमहादेवि महाभयविनाशिनि महादारिद्र्यशमनीमहाकारुण्यरूपिणी ॥ यस्याः स्वरूपंब्रह्मादयोनजानन्तितस्मादुच्यते अज्ञेया । यस्याअन्तोनलभ्यतेतस्मादुच्यतेऽनंता । यस्यालक्षंनोपलक्ष्यतेतस्मादुच्यतेअलक्ष्या । यस्याजननंनोपलक्ष्यते तस्मादुच्यते अजा । एकैवसर्वत्रवर्ततेतस्मादुच्यते एका । एकैवविश्वरूपिणीतस्मादुच्यतेऽनेका । अतएवोच्यतेऽज्ञेयानन्तालक्ष्याजैकानेकामंत्राणांमातृका देवीशब्दानांज्ञानरूपिणी ज्ञानानांचिन्मयातीताशून्यानांशून्यसाक्षिणी । यस्याः परतरंनास्तिसैषादुर्गाप्रकीर्तिता । तांदुर्गांदुर्गमांदेवीं दुराचारविघातिनीम् ॥ नमामिभवभीतोहंसंसारार्णवतारिणीम् ॥ इदमथर्वशीर्षंयोऽधीते सपञ्चाथर्वशीर्षफलमाप्नोति । इदमथर्वशीर्षमज्ञात्वायोऽर्चांꣳ स्थापयति । शतलक्षंप्रजप्त्वापि नार्चाशुद्धिं च विन्दति । शतमष्टोत्तरंचास्यपुरश्चर्याविधिः स्मृतः ॥ दशवारंपठेद्यस्तु

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सद्यः पापात्प्रमुच्यते । महादुर्गाणि तरति महादेव्याः प्रसादतः । सायमधीयानोदिवसकृतंपापंनाशयति । प्रातरधीयानोरात्रिकृतं
पापं नाशयति । सायंप्रातः प्रयुंजानोऽपापोभवति । निशीथेतुरीयसंध्यायांजप्तुर्वाक्सिद्धिर्भवति । नूतनायांप्रतिमायांजप्त्वादेवतासान्नि
ध्यंभवति । भौमाश्विन्यांमहादेवीसन्निधौजप्त्वामहामृत्युंतरति । समहामृत्युंतराति । यएवंवेदइत्युपनिषत् ॥ इतिदेव्यर्थशीर्षं समाप्तम् ॥
श्रीगणेशाय नमः ॥ अथ लक्ष्मीमंत्रानुष्ठानविधानम् ॥ (शारदातिलके) अथ वक्ष्ये श्रियो मंत्रान् श्रीसौभाग्यफलप्रदान् ॥ यस्याः
कटाक्षमात्रेण त्रैलोक्यमपि वर्द्धते ॥ १ ॥ तत्र तावल्लक्ष्म्या एकाक्षरमंत्रपुरश्चरणप्रयोगः । मंत्रस्वरूपं यथा ॥ श्रीँ ॥ इत्येकाक्षरो
बीजमंत्रः ॥ १ ॥ ऐश्रींह्रींक्लींँ इति चतुर्बीजात्मको मंत्रः ॥ २ ॥ अस्य लक्ष्मीबीजमंत्रस्य भृगुऋषिः निवृच्छंदः श्रीलक्ष्मीः देवता
शं बीजम् ईं शक्तिः रं कीलकम् ॥ सर्वेष्टसिद्धर्थे जपेविनियोगः ॥ ॐ भृगुऋषये नमः शिरसि ॥ १ ॥ ॐ निवृच्छंदसे नमः मुखे
॥ २॥ ॐ श्रीदेवतायै नमःहृदये ॥ ३ ॥ ॐ शं बीजाय नमः गुह्ये ॥ ४॥ ईं शक्तये नमः पादयोः ॥ ५ ॥ रं कीलकाय नमः
सर्वाङ्गे ॥ इति ऋष्यादिन्यासः ॥ ॐ श्राँ अंगुष्ठाभ्यां नमः ॥ १ ॥ ॐ श्रीँ तर्जनीभ्यां नमः ॥ २ ॥ ॐ श्रूँ मध्यमाभ्यां नमः
॥३ ॥ॐ श्रैँ अनामिकाभ्यां नमः ॥ ४ ॥ ॐ श्रौँ कनिष्ठिकाभ्यां नमः ॥ ५ ॥ ॐ श्रः करतलकरपृष्ठाभ्यां नमः ॥ ६ ॥ इति
करन्यासः ॥ एवमेव हृदयादिन्यासं कृत्वा ध्यायेत् ॥ (एकाक्षरमंत्रध्यानम्) कांत्या कांचनसन्निभां हिमगिरिप्रख्यैश्चतुर्भिर्गजै
र्हस्तोत्क्षिप्तहिरण्मयामृतघटैरासिच्यमानां श्रियम् ॥ बिभ्राणां वरमब्जयुग्ममभयं हस्तैः किरीटोज्वलां क्षौमाबद्धनितंबबिंबलसितां
वंदेरविंदास्थिताम् ॥ १ ॥ (अथ चतुरक्षरमंत्रध्यानम्) माणिक्यप्रतिमप्रभाहिमनिभैस्तुंगैश्चतुर्भिर्गजैर्हस्ताग्राहितरत्नकुंभसलिलैरा

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सिच्यमानां मुदा ॥ हस्ताब्जैर्वरदानमंबुजयुगाभीतीर्दधानां हरेः कांतां कांक्षितपारिजातलतिकां वंदे सरोजासनाम् ॥ २ ॥ इति ध्यात्वा मानसोपचारैः संपूज्य पीठपूजां कुर्यात् ॥ ॐ मंडूकादिपरतत्त्वांतपीठदेवताभ्यो नमः इति पीठदेवताः संपूज्य पूर्वादिषु ॐ विभूत्यै नमः ॥ १ ॥ ॐ उन्नत्यै नमः ॥ २ ॥ ॐ कांत्यै नमः ॥ ३ ॥ ॐ सृष्ट्यै नमः ॥ ४ ॥ ॐ कीर्त्यै नमः ॥ ५ ॥ ॐ सन्नत्यै नमः ॥ ६ ॥ ॐ पुष्ट्यै नमः ॥ ७ ॥ ॐ उत्कृष्णायै नमः ॥ ८ ॥ (मध्ये) ॐ ऋद्ध्यै नमः ॥ ९ ॥ इति पीठशक्तीः पूजयेत् ॥ तदुपरि श्रीकमलासनाय नमः इत्यासनं दत्त्वा मूलेन मूर्तिं प्रकल्प्य पाद्यादिपुष्पांतैरुपचारैः संपूज्य आवरणपूजां कुर्यात् ॥ (षट्कोणे) आग्नेयादिकोणकेसरेषु मध्ये दिक्षु च ॐ श्रीं हृदयाय नमः ॥ १ ॥ ॐ श्रीं शिरसे स्वाहा ॥ २ ॥ ॐ श्रूं शिखायै वषट् ॥ ३ ॥ ॐ श्रैं कवचाय हुँ ॥ ४ ॥ ॐ श्रौं नेत्रत्रयाय वौषट् ॥ ५ ॥ ॐ श्रः अस्त्राय फट् ॥ ६ ॥ इति षडंगानि पूजयेत् । तद्बहिरष्टदले पूर्वादिचतुर्दिक्षु क्रमेण ॐ वासुदेवाय नमः ॥ १ ॥ ॐ संकर्षणाय नमः ॥ २ ॥ ॐ प्रद्युम्नाय नमः ॥ ३ ॥ ॐ अनिरुद्धाय नमः ॥ ४ ॥ (कोणदलेषु) ॐ दमकाय नमः ॥ ५ ॥ ॐ सलिलाय नमः ॥ ६ ॥ ॐ गुग्गुलाय नमः ॥ ७ ॥ ॐ कुरुंडकाय नमः ॥ ८ ॥ इति पूजयेत् (ततो देवीदक्षिणभागे) ॐ शंखनिधये नमः ॥ १ ॥ ॐ वसुधायै नमः ॥ २ ॥ (देवीवामे) ॐ पद्मनिधये नमः ॥ १ ॥ ॐ वसुमत्यै नमः ॥ २ ॥ इति पूजयेत् (ततोऽष्टदलाग्रेषु पूर्वादिक्रमेण । ॐ बलाक्यै नमः ॥ १ ॥ ॐ विमलायै नमः ॥ २ ॥ ॐ कमलायै नमः ॥ ३ ॥ ॐ नवमालिकायै नमः ॥ ४ ॥ ॐ विभीषिकायै नमः ॥ ५ ॥ ॐ भालिकायै नमः ॥ ६ ॥ ॐ शांकर्य्यै० ॥ ७ ॥ ॐ वसुमालिकायै नमः ॥ इति पूजयेत् ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तद्बाह्ये इन्द्रादीन् दशादिक्पालान् पूजयेत् ॥ तद्बाह्ये वज्राद्यायुधानि च पूजयेत् ॥ इत्यावरणपूजां कृत्वा धूपादिनमस्कारांतं संपूज्य स्तवेन स्तुत्वा जपं कुर्यात् ॥ अस्य पुरश्चरणं द्वादशलक्षजपः अन्यत्सर्वं पूर्ववत् ॥ तथा च "भानुलक्षं जपेन्मंत्रं दीक्षितो विजितेंद्रियः ॥ श्रियमभ्यर्चयेन्नित्यं सुगंधिकुसुमादिभिः ॥ १ ॥ तत्सहस्रं प्रजुहुयात्कमलैर्मधुरोक्षितैः ॥ जपांते जुहुयान्मंत्री तिलैर्वा मधुराप्लुतैः ॥ २ ॥ बैल्वैः फलैर्वा जुहुयात्त्रिभिर्वा साधकोत्तमः ॥ इत्थं यो भजते देवीं विधिना साधकोत्तमः ॥ ३ ॥ धनधान्यसमृद्धिः स्याच्छ्रियमाप्नोत्यनिंदिताम् ॥४॥ वक्षःप्रमाणे सलिले स्थित्वा मंत्रमिमं जपेत् ॥ त्रिलक्षं संयतो मंत्री देवीं ध्यात्वार्कमंडले ॥ ५ ॥ स भवेदल्पकालेन रमाया वसतिः स्थिरा ॥ विष्णुगेहस्थबिल्वस्य मूलमास्थाय मंत्रवित् ॥ ६ ॥ त्रिलक्षं प्रजपेन्मंत्रं वांछितं लभते धनम् ॥ अशोकवह्नौ जुहुयात्तंडुलैराज्यलोलितैः ॥७॥ वशयत्यचिरादेव त्रैलोक्यमपि मंत्रवित् ॥ जुहुयात्तंडुलैः शुद्धैरर्काग्नौ नियुतं वशी ॥८॥ राज्यश्रियमवाप्नोति राजपुत्रो महीयसीम् ॥ जुहुयात्खादिरे वह्नौ तंडुलैर्मधुरोक्षितैः ॥९॥ राजा वश्यो भवेच्छीघ्रं महालक्ष्मीश्च वर्द्धते ॥ विल्वछायामधिवसन्विल्वामिश्रहविष्यभुक् ॥ १० ॥ संवत्सरद्वयं हुत्वा तत्फलैरथवांबुजैः ॥ साधकेंद्रो महालक्ष्मीं चक्षुषा पश्यति ध्रुवम् ॥ ११ ॥ हविषा घृतसिक्तेन पायसेन ससर्पिषा ॥ हुत्वा श्रियमवाप्नोति नियुतं मंत्रवित्तमः ॥ १२ ॥ मधुराक्तारुणांभोजैर्जुहुयाल्लक्षमादरात् ॥ न मुंचति रमा तस्य वंशमाभूतसंप्लवम् ॥ इत्येकाक्षरचतुरक्षरलक्ष्मीमंत्रपुरश्चरणप्रयोगः ॥ ॥ अथ दशाक्षरलक्ष्मीमंत्रप्रयोगः ॥ (मंत्रो यथा) "नमः कमलवासिन्यै स्वाहा" इति दशाक्षरो मंत्रः । अस्य मंत्रस्य दक्षऋषिः विराट् छंदः लक्ष्मीर्देवता इष्टसिद्ध्यर्थे जपे विनियोगः ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ॐ दक्षऋषये नमः शिरसि ॥ १ ॥ ॐ विराट्छंदसे नमः मुखे ॥ २ ॥ ॐ लक्ष्मीदेवतायै नमः हृदि ॥ ३ ॥ इति ऋष्यादिन्यासः ॥ ॐ देव्यै नमः अंगुष्ठाभ्यां नमः ॥ १ ॥ ॐ पद्मिन्यै नमः तर्जनीभ्यां नमः ॥ २ ॥ ॐ विष्णु पत्न्यै नमः मध्यमाभ्यां नमः ॥ ३ ॥ ॐ वरदायै नमः अनामिकाभ्यां नमः ॥ ४ ॥ ॐ कमलरूपायै नमः कनिष्ठिकाभ्यां नमः ॥ ५ ॥ इति करन्यासः ॥ एवं नेत्रहीनं हृदयादिपंचांगन्यासं कृत्वा ध्यायेत् (ध्यानम्) आसीना सरसीरुहे स्मितमुखी हस्तांबुजैर्बिभ्रती दानं पद्मयुगाभये च वपुषा सौदामिनीसंनिभा ॥ मुक्तादामविराजमानपृथुलोत्तुंगस्तनोद्भासिनी पायान्नः कमला कटाक्षविभवैरानंदयंती हरिम् ॥ १ ॥ इति ध्यात्वा । पूर्वोक्तावरणपूजां कृत्वा जपं कुर्यात् । अस्य पुरश्चरणं दशलक्षजपः । तथा च । "दशलक्षं जपेन्मंत्रं मंत्रविद्विजितेंद्रियः ॥ दशांशं जुहुयान्मंत्री मधुराक्तैः सरोरुहैः ॥ १ ॥ समुद्रगायां सरिति कंठमात्रे जले स्थितः ॥ त्रिलक्षं प्रजपेन्मंत्री साक्षाद्वैश्रवणो भवेत् ॥ २ ॥ आराध्योत्तरनक्षत्रे देवीं स्रक्चंदनादिभिः ॥ नंद्यावर्तभवैः पुष्पैः सहस्रं जुहुयात्ततः ॥ ३ ॥ पौर्णमास्यां फलैर्बैल्वैर्जुहुयान्मधुराप्लुतैः ॥ पंचम्यां विशदांभोजैः शुक्रवारे सुगंधिभिः ॥४॥अन्यैर्वा विशदैः पुष्पैः प्रतिमासं विशालधीः॥स भवेदब्दमात्रेण सर्वदा संपदां निधिः॥५॥इतिदशाक्षरलक्ष्मीमंत्रप्रयोगःसमाप्तः ॥

अथ महालक्ष्मीमंत्रपुरश्चरणम् ॥ मंत्रो यथा "ॐ ऐंह्रीँश्रीँक्लींसौं जगत्प्रसूत्यै नमः" इति द्वादशाक्षरो मंत्रः । अस्य मंत्रस्य ब्रह्मा ऋषिः । गायत्री छंदः । महालक्ष्मीर्देवता सर्वेष्टसिद्ध्यर्थं विनियोगः ॐ ब्रह्मऋषये नमः शिरसि॥१॥ॐ गायत्रीछंदसे नमः मुखे ॥२॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ॐ महालक्ष्मीदेवतायै नमः हृदि ॥ ३ ॥ इति ऋष्यादिन्यासः ॥ ततो मूलेन हस्तौ संशोध्य ॐ ऐं नमः अंगुष्ठाभ्यां नमः ॥१॥
ॐ ह्रीं नमः तर्जनीभ्यां नमः ॥ २ ॥ ॐ श्रीँ नमः मध्यमाभ्यां नमः ॥ ३ ॥ ॐ क्लीँ नमः अनामिकाभ्यां नमः ॥ ४ ॥ ॐ सौं
नमः कनिष्ठिकाभ्यां नमः ॥ ५ ॥ ॐ जगत्प्रसूत्यै नमः ॥ करतलकरपृष्ठाभ्यां नमः ॥ ६ ॥ ॐ ऐंह्रीँश्रीँक्लीँसौंजगत्प्रसूत्यै नमः
इति मूर्द्धादिचरणांतं व्यापकं न्यसेत् ॥ ७ ॥ इति करन्यासः ॥ ॐ ऐं नमः मूर्ध्नि ॥ १ ॥ ॐ ह्रीं नमः मुखे ॥ २ ॥ ॐ श्रीं
नमः वक्षसि ॥ ३ ॥ ॐ क्लीं नमः गुह्ये ॥ ४ ॥ ॐ सौं नमः पादयोः ॥ इति पंचबीजानि विन्यसेत् ॥ ॐ जं नमः त्वचि ॥१॥
ॐ गं नमः रक्ते ॥ २ ॥ ॐ त्पं नमः मांसे ॥३॥ ॐ सूं नमः मेदसि ॥ ४ ॥ॐ त्यैं नमः अस्थि ॥ ५ ॥ ॐ नं नमः मज्जा
याम् ॥ ६ ॥ ॐ मं नमः शुक्रे ॥७॥ इति सप्तवर्णान् सप्तधातुषु हृदये न्यसेत् । ॐ ऐं ज्ञानाय अंगुष्ठाभ्यां नमः ॥ १ ॥ ॐ ह्रीँ
ऐश्वर्य्याय तर्जनीभ्यां नमः ॥ २ ॥ ॐ श्रीँ शक्तये मध्यमाभ्यां नमः ॥ ३ ॥ ॐ क्लीं बलाय अनामिकाभ्यां नमः ॥ ४ ॥ ॐ
सौं वीर्याय कनिष्ठिकाभ्यां नमः ॥ ५ ॥ ॐ जगत्प्रसूत्यै तेजसे नमः करतलकरपृष्ठाभ्यां नमः ॥ इति करन्यासः ॥ एवमेव हृदया
दिन्यासं कृत्वा ध्यायेत् ॥ तत्रादावुद्यानस्मरणम् ॥ "चंपकाशोकपुंनागपाटलैरुपशोभितम् । लवंगमालतीबिल्वदेवदारुनमेरुभिः
॥ १ ॥ मंदारपारिजाताद्यैः कल्पवृक्षैः सुपुष्पितैः ॥ चंदनैः कर्णिकारैश्च मातुलुंगैश्च वंजुलैः ॥ २ ॥ दाडिमीलकुचांकोलैः पूगैः
कुरवकैरपि ॥ कदलीकुंदमंदारनारिकेरैरलंकृतैः ॥ ३ ॥ अन्यैः सुगंधिपुष्पाद्यैर्वृक्षसंघैश्च मण्डितम् ॥ मालतीमल्लिकाजातीकेतकी

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

शतपत्रकैः ॥ ४ ॥ पारंतीतुलसीनंद्यावर्तैर्दमनकैरपि ॥ सर्वर्तुकुसुमोपेतैर्नमद्भिरुपशोभितम् ॥ ५ ॥ मंदमारुतसंभिन्नकुसुमामोदि दिङ्मुखम् ॥ तस्य मध्ये सदोत्फुल्लैः कुमुदोत्पलपंकजैः ॥६॥ सौगंधिकैश्च कह्लारैर्नवैः कुवलयैरपि ॥ हंससारसकारंडभ्रमरैश्चक्र नामाभिः ॥ ७ ॥ अन्यैः कलकलारावैर्विहंगैरुपशोभितम् ॥ महासरसि तन्मध्ये पुलिनेतिमनोहरे ॥ ८ ॥ परितः पारिजाताद्यं मंडपं मणिकुट्टिमम् ॥ उद्यदादित्यसंकाशं भास्वरं शशिशीतलम् ॥ ९ ॥ चतुर्द्वारसमायुक्तं हैमप्राकारशोभितम् ॥ रत्नोपकृप्ति संशोभि कपाटाष्टकसंयुतम् ॥ १० ॥ नवरत्नसमाकृतं तुंगगोपुरतोरणम् ॥ हेमदंडि समालंबि ध्वजावलिपरिष्कृतम् ॥ ११ ॥ नवरत्नसमाबद्धस्तंभराजिविराजितम् ॥ सहस्रदीपसंयुक्तदीपं दंडविराजितम् ॥ १२ ॥ तप्तहाटकसंकृत्तवातायनमनोहरम् ॥ नाना वर्णांशुकोद्बद्धसुवर्णशतकोटिभिः ॥ १३ ॥ किंकिणीमल्लिकायुक्तपताकाभिरलंकृतम् ॥ जातरूपमयैरत्नविचित्रैरतिविस्तृतैः ॥१४॥ माणिक्यरत्नैर्वैडूर्य्यस्वर्णमालावलीयुतैः ॥ अंतरांतरसंबद्धरत्नैर्दृष्टिमनोहरैः ॥ १५ ॥ विचित्रैश्चित्रवर्णैश्च वितानैरुपशोभितम् ॥ सर्व रत्नसमायुक्तं हेमकुट्टिममुज्वलम् ॥ १६ ॥ केतकीमालतीजातीचंपकोत्पलकेसरैः ॥ मल्लिकातुलसीजातीनंद्यावर्तकदंबकैः ॥ १७॥ एतैरन्यैश्च कुसुमैरलंकृतमहीतलम् ॥ अंबुकाश्मीरकस्तूरीमृगनाभितमालकैः ॥ १८ ॥ चंदनागरुकर्पूरैरामोदितदिगंतरम् ॥ एवं संचिंत्य मनसा मंडपं सुमनोहरम् ॥ १९ ॥ तन्मध्ये भावयेन्मंत्री पारिजातं मनोहरम् ॥ तस्याधस्तात्स्मरेन्मंत्री रत्नसिंहासनं शुभम् ॥ २० ॥ "तस्मिन्संचिंतयेद्देवीं महालक्ष्मीं मनोरमाम् " ॥ (अथ ध्यानम्) बालार्कद्युतिमिंदुखंडविलसत्कोटीरहारोज्व लां रत्नाकल्पविभूषितां कुचनतां शालैः करैर्मंजरीम् ॥ पद्मं कौस्तुभरत्नमप्यविरतं संबिभ्रतीं सस्मितां फुल्लांभोजविलोचनत्रययुतां

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ध्यायेत्परां देवताम् ॥ १ ॥ सिंजन्मंजीरसंशोभिपदांभोजविराजिताम् ॥ नवरत्नगणाकीर्णां कांचीदामविभूषिताम् ॥ २ ॥ मुक्ता
माणिक्यवैदूर्यसंवद्धोदरबंधनाम् ॥ विभ्राजमानां मध्येन बलित्रितयशोभिताम् ॥ ३ ॥ जाह्नवीसरिदावर्तशोभिनाभिविभूषिताम् ॥
पाटीरपंककर्पूरकुंकुमालंकृतस्तनीम् ॥ ४ ॥ वारिवाहविनिर्मुक्तमुक्तादामगरीयसीम् ॥ वहंतीमुत्तरासंगं दुकूलपरिकल्पिताम् ॥५॥
तप्तकांचनसन्नद्धवैदूर्यांगदभूषणाम् ॥ पद्मरागस्फुरद्वर्णकंकणाढ्यकरांबुजाम् ॥ ६ ॥ माणिक्यशकलाबद्धमुद्रिकाभिरलंकृताम् ॥
तप्तहाटकसंकृतमालयैवेयशोभिताम् ॥ ७ ॥ विचित्रविविधाकल्पकंबुसंकाशकंधराम् ॥ उद्यद्दिनकराकारमणिताटंकमंडिताम् ॥८॥
रत्नांकितलसत्स्वर्णकर्णपूरोपशोभिताम् ॥ जपाविद्रुमलावण्यललिताधरपल्लवाम् ॥ ९ ॥ दाडिमीफलबीजाभदंतपंक्तिविभूषिता
म् ॥ कलंककार्श्यनिर्मुक्तशरच्चंद्रनिभाननाम् ॥ १० ॥ पुंडरीकदलाकारनयनत्रयसुंदरीम् ॥ भ्रूलताजितकंदर्पकरकार्मुकविभ्र
माम् ॥ ११ ॥ विलसत्तिलपुष्पश्रीविजयोद्यतनासिकाम् । ललाटकांतिविभवविजिताद्धेसुधाकराम् ॥ १२ ॥ सांद्रसौरभसंपन्न
कस्तूरीतिलकांकिताम् ॥ मत्तालिमालाविलसदलकाढ्यमुखांबुजाम् ॥ १३ ॥ पारिजातप्रसूनश्रीवाहिधम्मिल्लबंधनाम् ॥ अनर्घ्यरत्न
घटितमुकुटांकितमस्तकाम् ॥ १४ ॥ सर्वलावण्यवसतिं भवनं विभ्रमश्रियः ॥ तेजसां जन्मभूमिं तां महालक्ष्मीं मनोहराम् ॥१५॥"
एवं ध्यात्वा मानसोपचारैः संपूज्य पूर्वोक्ते श्रीबीजोदिते पीठे मूलेन मूर्तिं प्रकल्प्य। पाद्यादिपुष्पांतैरुपचारैः संपूज्यावरणपूजां कुर्यात ॥
तद्यथा (लक्ष्म्या दक्षभागे) ॐ शंकरनंदनाय नमः ॥ १ ॥ (वामभागे) ॐ पुष्पधन्वने नमः ॥ २ ॥ ततः षट्दले (पूज्य
पूजकयोर्मध्ये प्राचीं प्रकल्प्य) आग्नेयादिकोणकेसरेषु मध्ये दिक्षु च। ॐ ऐं ज्ञानाय नमः हृदयाय नमः ॥ १ ॥ ॐ ह्रीं ऐंश्व

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

र्याय नमः शिरसे स्वाहा ॥ २ ॥ ॐ श्रीं शक्त्यै नमः शिखायै वषट् ॥ ३ ॥ ॐ क्लीं बलाय नमः कवचाय हुं ॥ ४ ॥ ॐ सौं वीर्याय नेत्रत्रयाय वौषट् ॥ ५ ॥ ॐ जगत्प्रसूत्यै नमः अस्त्राय फट् ॥ ॥ ६ ॥ इति षडंगानि पूजयेत् ॥ ततोऽष्टदलेषु पूर्वादिक्रमेण । ॐ उमायै नमः ॥ १ ॥ ॐ श्रियै नमः ॥ २ ॥ ॐ सरस्वत्यै नमः ॥३॥ ॐ दुर्गायै नमः ॥ ४ ॥ ॐ धरिण्यै नमः ॥ ५ ॥ ॐ गायत्र्यै नमः ॥ ६ ॥ ॐ देव्यै नमः ॥ ७ ॥ ॐ उषायै नमः ॥ ८ ॥ इति पूजयेत् ॥ (दक्षिणे) ॐ जाह्नव्यै नमः ॥ १ ॥ (वामे) ॐ यमुनायै नमः ॥ २ ॥ इति संपूज्य । (पुनर्दक्षिणपार्श्वे) ॐ शंखनिधये नमः ॥ १ ॥ (वामपार्श्वे) ॐ पद्मनिधये नमः ॥ २ ॥ (पश्चिमे) ॐ वरुणाय नमः ॥३॥ इति पूजयेत् । (तद्बहिर्द्वादशदलेषु पूर्वादिक्रमेण) ॐ मेषाय नमः ॥ १ ॥ ॐ वृषाय नमः ॥ २ ॥ ॐ मिथुनाय नमः ॥ ३ ॥ ॐ कर्काय नमः ॥ ४ ॥ ॐ सिंहाय नमः ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

॥ ५ ॥ ॐ कन्यायै नमः ॥ ६ ॥ ॐ तुलायै नमः ॥ ७ वृश्चिकाय नमः ॥ ८ ॥ ॐ धनुषे नमः ॥ ९ ॥ ॐ मकराय नमः ॥
॥ १० ॥ ॐ कुंभाय नमः ॥ ११ ॥ ॐ मीनाय नमः ॥ १२ ॥ इति राशीन् पूजयेत् ॥ (तद्बहिः) ॐ सूर्याय नमः ॥ १ ॥
ॐ चंद्रमसे नमः ॥ २ ॥ ॐ मंगलाय नमः ॥ ३ ॥ ॐ बुधाय नमः ॥ ४ ॥ ॐ बृहस्पतये नमः ॥ ५ ॥ ॐ शुक्राय नमः ॥
॥ ६ ॥ ॐ शनैश्चराय नमः ॥ ७ ॥ ॐ राहवे नमः ॥ ८ ॥ ॐ केतवे नमः ॥ ९ ॥ इति ग्रहान् पूजयेत् ॥ (तद्बाह्ये) ॐ ऐरा
वताय नमः ॥ १ ॥ ॐ पुंडरीकाय नमः ॥ २ ॥ ॐ वामनाय नमः ॥ ३ ॥ ॐ कुमुदाय नमः ॥ ४ ॥ ॐ अंजनाय नमः ॥५॥
ॐ पुष्पदंताय नमः ॥ ६ ॥ ॐ सार्वभौमाय नमः ॥ ७ ॥ ॐ सुप्रतीकाय नमः ॥८॥ इत्यष्टौ दिग्गजान्पूजयेत् ॥ (तद्बहिः)
भूपुरे पूर्वादिदिक्षु । ॐ इंद्राय नमः ॥ १ ॥ ॐ अग्नये नमः ॥ २ ॥ ॐ यमाय नमः ॥ ३ ॥ ॐ निर्ऋतये नमः ॥ ४ ॥ ॐ
वरुणाय नमः ॥ ५ ॥ ॐ वायवे नमः ॥ ६ ॥ ॐ कुबेराय नमः ॥ ७ ॥ ॐ ईशानाय नमः ॥ ८ ॥ (ऊर्ध्वम्) ॐ ब्रह्मणे
नमः ॥ ९ ॥ (अधः) ॐ अनंताय नमः ॥ १० ॥ इति दशदिक्पालान् पूजयेत् ॥ (तद्बाह्ये) ॐ वज्राय नमः ॥ १ ॥ ॐ
शक्तये नमः ॥ २ ॥ ॐ दंडाय नमः ॥ ३ ॥ ॐ खड्गाय नमः ॥ ४ ॥ ॐ पाशाय नमः ॥५॥ ॐ अंकुशाय नमः ॥६॥ ॐ गदायै
नमः ॥ ७ ॥ ॐ त्रिशूलाय नमः ॥ ८ ॥ ॐ पद्माय नमः ॥ ९ ॥ ॐ चक्राय नमः ॥ १० ॥ इत्यायुधानि पूजयेत् ॥ एवं सप्ता
वरणपूजां कृत्वा धूपदीपनैवेद्यतांबूलदक्षिणादिभिर्भगवतीं संपूज्य नीराजनं कृत्वा साष्टांगं प्रणम्य स्तोत्रैः स्तुत्वा जपं कुर्यात् ॥
अस्य पुरश्चरणं द्वादशलक्षजपः ॥ जपांते दशांशेन घृतपद्मबिल्वफलैर्होमं कृत्वा तत्तद्दशांशेन तर्पणमार्जनब्राह्मणभोजनानि

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कुर्यात् ॥ तथा च (शारदातिलके) "एवं संचिंत्य यो देवीं हविष्याशी जितेंद्रियः ॥ भानुलक्षं जपेन्मंत्रं दशांशं जुहुयाद्घृतैः ॥१॥ जुहुयाच्छ्रीफलैः पद्मैः प्रत्येकमयुतं ततः ॥ तर्पयेत्सलिलैः शुद्धैः सुगंधिरयुतद्वयम् ॥ २ ॥ आगमोक्तेन विधिना सुगंधैः सुमनोहरैः ॥ पूजयेद्गंधपुष्पाद्यैर्देवीमन्वहमादरात् ॥ ३ ॥ दूर्वाभिराज्यसिक्ताभिर्जुहुयादायुषे नरः ॥ दशरात्रे समिद्धेशौ अष्टोत्तरसहस्रकम् ॥ ४ ॥ गुडूचीमाज्यसंसिक्तां जुहुयात्सप्तवासरम् ॥ अष्टोत्तरसहस्रं यः स जीवेच्छरदां शतम् ॥ ५ ॥ हुत्वा तिलान्घृताभ्यक्तान्दीर्घमायुरवाप्नुयात् ॥ आरभ्यार्कदिनं मंत्री दशरात्रं दिनेदिने ॥ ६ ॥ आज्याक्तार्कसमिद्धोमादारोग्यं लभते ध्रुवम् ॥ कंठमात्रोदके स्थित्वा ध्यात्वा देवीं दिवाकरे ॥ ७ ॥ ऊर्ध्वबाहुर्दशशतमष्टोत्तरमिमं हुनेत् ॥ आरोग्यं लभते सद्यो वांछितान्यपि मंत्रवित् ॥ ८ ॥ शालिभिर्जुह्वतो नित्यमष्टोत्तरसहस्रकम् ॥ अचिरादेव महती लक्ष्मीः संजायते ध्रुवम् ॥ ९ ॥ प्रसूनैर्जुहुयान्मंत्री लक्ष्मीवल्लीसमुद्भवैः ॥ नंद्यावर्तसमुत्थैश्च सिद्धार्थैश्च घृतप्लुतैः ॥ १० ॥ महतीं श्रियमाप्नोति मान्यते सर्वजंतुभिः ॥ मरीचजीरकोन्मिश्रैर्नारिकेलरजःप्लुतैः ॥११ ॥ सगुडैराज्यसंपक्वैरपूपैराज्यलोलितैः ॥ जुहुयात्पयआहारो मंत्रविद्विजितेंद्रियः ॥ १२ ॥ अष्टोत्तरशतं नित्यं मंडलाद्धनदो भवेत् ॥ हविषा गुडमिश्रेण जुहुयादर्थवान्भवेत् ॥ १३ ॥ जपापुष्पाणि जुहुयादष्टोत्तरसहस्रकम् ॥ गृहीत्वा प्रजपेद्धस्म नागवल्लीसमन्वितम् ॥ १४ ॥ तिलकं तनुयात्तेन सर्ववश्यकरं भवेत् ॥ ब्रह्मवृक्षसमित्पुष्पैर्ब्राह्मणान्वशयेद्वशी ॥ १५ ॥ जातीपुष्पैश्च राजानं वैश्यान् रक्तोत्पलैः शुभैः ॥ शूद्रान्नीलोत्पलैर्हुत्वा वशयेन्मंत्रविन्नरः ॥ १६ ॥ पुष्पैर्मधूकजैर्हुत्वा वशमानयति स्त्रियः ॥ कृत्वा नवपदात्मानं मंडलं यंत्रभूषितम् ॥ १७ ॥ अभिषेकं प्रकुर्वीत विधिना सर्वसिद्धये ॥ क

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

लशान्स्थापयेत्तेषु पदेषु शुभलक्षणान् ॥ १८ ॥ चंदनालिप्तसर्वांगान्दूर्वांशतसमन्वितान् ॥ दुकूलवेष्टितानेतान्पूरयेत्तीर्थवारि
णा ॥ १९ ॥ नवरत्नसमाबद्धं कर्षकांचनकल्पितम् ॥ मध्यकुंभे क्षिपेत्पद्मं यंत्राढ्यं देशकोत्तमः ॥ २० ॥ चंदनोशीरकर्पूरजातीकं
कोलकुंकुमम् ॥ कुष्ठागरुतमालैलायुतं संपिष्य भागतः ॥ २१ ॥ विलोडय सर्वकुंभेषु रत्नान्यपि विनिक्षिपेत् ॥ लक्ष्मीदूर्वा
सहाभद्रासहदेवीमधुव्रताः ॥ २२ ॥ मुशलीं शक्रवल्लीं च क्रांतापामार्गपत्रकान् ॥ प्रियंगुमुद्गगोधूमव्रीहींश्च सतिला
न्यवान् ॥ २३ ॥ शालितंडुलमाषांश्च प्रक्षाल्यैतेषु निक्षिपेत् ॥ धात्रीलकुचबिल्वानां कदलीनारिकेलयोः ॥ २४ ॥ फलान्यपि
विनिक्षिप्य पुष्पाण्येतानि निक्षिपेत् ॥ पद्मसौगंधिकं जातिं मल्लिकां बकुलं तथा ॥ २५ ॥ चंपकाशोकपुन्नागतुलसीकेतकोद्भवम् ।
पल्लवानिवटाश्वत्थप्लक्षोदुंबरशाखिनाम् ॥ २६ ॥ ब्रह्मकूर्चं विनिक्षिप्य चषकैः सुफलान्वितैः ॥ पिधाय कुंभवक्त्राणि क्षौमैराच्छा
दयेत्ततः ॥ २७ ॥ आवाह्य कलशमध्ये महालक्ष्मीं प्रपूजयेत् ॥ यजेदुमाद्याः शिष्टेषु कलशेष्वष्टसु क्रमात् ॥ २८ ॥ गंधैर्मनोहरैः
पुष्पैर्धूपदीपसमन्वितैः ॥ निवेद्य भक्ष्यभोज्यानि तान्स्पृष्ट्वा प्रजपेन्मनुम् ॥ २९ ॥ त्रिसहस्रं जपस्यांते साध्यमानीय संयुतम् ॥
संस्थाप्य स्थंडिले पीठं तस्मिंस्तं विनिवेशयेत् ॥ ३० ॥ रम्यैरावरणैर्वस्त्रैरलंकृत्य तमादरात् ॥ सुमंगलाभिर्नारीभिः क्षिप्तपुष्पाक्षता
न्वितम् ॥ ३१ ॥ अर्चितानां द्विजातीनामाशीर्वादपुरःसरम् ॥ नदत्सु पंचवाद्येषु मुहूर्ते शोभने सुधीः ॥ ३२ ॥ मध्यस्थं कुंभमु
त्सृज्य महालक्ष्मीमनुस्मरन् ॥ अभिषिंचेक्रमादन्यैः कलशैरपि देशिकः ॥ ३३ ॥ करेणास्य शिरः स्पृष्ट्वा प्रयुंजीताशिषं गुरुः ॥
भद्रमस्तु शिवं चास्तु महालक्ष्मीः प्रसीदतु ॥ ३४ ॥ रक्षंतु त्वां सदा देवाः संपदः संतु सर्वदा ॥ अथोत्थायाभिषिक्तः सन् वाससी

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

परिधाय च ॥ ३५ ॥ यथाविधि समाचम्य दंडवत्प्रणमेद्गुरुम् ॥ वस्त्रैराभरणैर्धान्यैर्धनैर्गोमहिषादिभिः ॥ ३६ ॥ दासीदासैश्च विधिवत्तोषयेद्देवताधिया ॥ ब्राह्मणान्भोजयेत्पश्चाद्दीनांधकृपणैः सह ॥ ३७ ॥ महांतमुत्सवं कुर्याद्भवने बंधुभिः सह ॥ तदा कृतार्थमात्मानं मन्यते मनुजोत्तमः ॥ ३८ ॥ अभिषिक्तो नरपतिः परान्विजयतेऽचिरात् ॥ पदेच्छुः पदमाप्नोति राजपुत्रो न संशयः ॥ ३९ ॥ अभिषिक्ता सती वंध्या सूते पुत्रं महामतिम् ॥ महारोगेषु जातेषु कृत्याद्रोहेषु देशिकः ॥ ३९ ॥ भूतेषु दुर्निमित्तादौ विदध्यादभिषेचनम् ॥ सर्वसंपत्करं पुंसां सर्वसौभाग्यसिद्धिदम् ॥ ४१ ॥ सर्वरोगप्रशमनं सर्वापद्विनिवारणम् ॥ गर्भरक्षाकरं स्त्रीणां दीर्घायुर्जनकं परम् ॥ ४२ ॥ प्रसूतानामपि स्त्रीणां सूतिकागाररक्षकम् ॥ प्रनष्टपुष्पगर्भाणां पुष्पगर्भाभिरक्षणम् ॥ ४३ ॥ आसन्नशत्रुभीतीनां नाशनं च महीभृताम् ॥ अभिषेकामिमं प्राहुरागमार्थविशारदाः ॥४४॥ सर्वदुःखप्रशमनं सर्वापद्विनिवारणम् ॥ बहुना किमिहोक्तेन परमस्मान्नविद्यते॥४५॥इति श्रीशारदातिलके महा लक्ष्मीमंत्रपुरश्चरणं समाप्तम् ॥ ॥ अथ सप्तविंशतिवर्णात्मकमहालक्ष्मीमंत्रप्रयोगः । मंत्रो यथा । "ॐ श्रीं ह्रीं श्रीं कमले कमलालये प्रसीदप्रसीदश्रींह्रींश्रींमहालक्ष्म्यैनमः" इति सप्तविंशत्यक्षरो मंत्रः ॥ अस्य मंत्रस्य दक्षऋषिः । विराट् छंदः । महालक्ष्मीर्देवता । सर्वेष्टसिद्धये विनियोगः ॥ ॐ दक्षऋषये नमः शिरसि ॥ १ ॥ ॐ विराट्छंदसे नमः मुखे ॥२॥ ॐ महालक्ष्मीदेवतायै नमः हृदि ॥ इति ऋष्यादिन्यासः ॥ श्रींह्रींश्रींप्रसीदकमलेश्रींह्रींश्रीं अंगुष्ठाभ्यां नमः ॥ १ ॥ श्रींह्रींश्रींप्रसीदकमलेश्रींह्रींश्रीं तर्जनीभ्यां नमः ॥२॥ श्रींह्रींश्रींप्रसीदकमले श्रींह्रींश्रींमध्यमाभ्यां नमः ॥ ३ ॥ श्रींह्रींश्रींप्रसीदकमलेश्रींह्रींश्रीं अनामिकाभ्यां नमः ॥ ४ ॥ श्रींह्रीं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

श्रीँप्रसीदकमले श्रींह्रींश्रीँ कनिष्ठिकाभ्यां नमः ॥ ५ ॥ इति करन्यासः ॥ एवं नेत्रहीनं पंचांगहृदयादिन्यासं कुर्यात् ॥ एवं न्यासविधिं कृत्वा ध्यायेत् । "सिंदूरारुणकांतिमब्जवसतिं सौंदर्यवारां निधिं कोटीरांगदहारकुंडलकटीसूत्रादिभिर्भूषिताम् ॥ हस्ताब्जैर्वसुपत्रमब्जयुगलादर्शौ वहंतीं परामावीतांपरिचारिकाभिरनिशं ध्यायेत्प्रियां शार्ङ्गिणः ॥ १ ॥" इति ध्यात्वा मानसोपचारैः संपूज्य पूर्वोक्ते श्रीबीजपीठे पुष्पादितैरुपचारैः महालक्ष्मीं संपूज्य आवरणपूजां कुर्यात् ॥ षट्कोणकेसरेषु दिक्षु च ॥ श्रींह्रींश्रीँप्रसीद कमलेश्रींह्रींश्रीँ हृदयाय नमः ॥ १ ॥ श्रींह्रींश्रीँप्रसीदकमलेश्रींह्रींश्रीँ शिरसे स्वाहा ॥ २ ॥ श्रींह्रींश्रीँप्रसीदकमले श्रींह्रींश्रीँ शिखायै वषट् ॥ ३ ॥ श्रींह्रींश्रीँप्रसीदकमले श्रींह्रींश्रीँ कवचाय हुं ॥ ४ ॥ श्रींह्रींश्रीँप्रसीदकमले श्रींह्रींश्रीँ अस्त्राय फट् । इति पंचांगानि पूजयेत् ॥ तद्बहिरष्टदलमूले पूर्वादिक्रमेण ॐ श्रीधराय नमः ॥ १ ॥ ॐ हृषीकेशाय नमः ॥ २ ॥ ॐ वैकुंठाय नमः ॥ ३ ॥ ॐ विश्वरूपाय नमः ॥ ४ ॥ ॐ वासुदेवाय नमः ॥ ५ ॥ ॐ संकर्षणाय नमः ॥ ६ ॥ ॐ प्रद्युम्नाय नमः ॥ ७ ॥ ॐ अनिरुद्धाय नमः ॥ ८ ॥ इति पूजयेत् ॥ ततः पूर्वादिदिग्दलमध्येषु ॐ भारत्यै नमः ॥ १ ॥ ॐ पार्वत्यै नमः ॥ २ ॥ ॐ चांद्र्यै नमः ॥ ३ ॥ ॐ शच्यै नमः ॥ ४ ॥ (विदिग्दलमध्ये) ॐ दमकाय नमः ॥ ५ ॥ ॐ सलिलाय नमः ॥ ६ ॥ ॐ गुग्गुलवे नमः ॥७॥ ॐ कुरुंटकाय नमः ॥ ८ ॥ इति पूजयेत् ॥ ततो दलाग्रेषु पूर्वादिक्रमेण । ॐ अनुरागाय नमः ॥ १ ॥ ॐ संवादाय नमः ॥ २ ॥ ॐ विजयाय नमः ॥ ३ ॥ ॐ वल्लभाय नमः ॥ ४ ॥ ॐ मदाय नमः ॥ ५ ॥ ॐ हर्षाय नमः॥६॥ ॐ बलाय नमः ॥ ७ ॥ ॐ तेजसे नमः ॥८॥ इति महालक्ष्मीबाणान् पूजयेत् ॥ ततो भूपुरे इन्द्रादीन् दशदिक्पालान् तद्बाह्ये व

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

न्याद्यायुधानि च पूजयेत्। इत्यावरणपूजां कृत्वा धूपादिनीराजनांतं संपूज्य जपं कुर्यात्। अस्य पुरश्चरणं लक्षजपः॥ तथा च (शारदायाम्) लक्षं जपेत्फलैर्बैल्वैर्जुहुयान्मधुरोक्षितैः॥ दशांशं संस्कृते वह्नौ प्राक्प्रोक्तेनैव वर्त्मना॥१॥ अनेन विधिना देवीं महालक्ष्मीमुपासते॥ ये तेषु निवसेल्लक्ष्मीरस्मरंती निजालयम्॥२॥ उत्पलैर्जुहुयाल्लक्षं चंदनांभसि लोलितैः॥ शत्रूणां लभते राज्यं विना युद्धेन पार्थिवः॥ ३॥ जपन् राजसभां गच्छेत्संभाव्येत तया नरः॥ दूर्वा देवी महालक्ष्मीर्विष्णुक्रांता मधुव्रता॥ ४॥ मुसली शक्रवल्ली च सदा भद्रांजलिप्रिया॥ हरिचंदनकर्पूरचंदनाकोलरोचनाः॥ ५॥ मालूरकेसरौ कुष्ठं सर्वं पिष्ट्वा निशारसैः॥ अष्टोत्तरसहस्रं तु जपित्वा तिलकक्रियाम्॥ ६॥ कुर्वतो मंत्रिणः सर्वे वशे तिष्ठन्त्यहर्निशम्॥ श्रियो मंत्रं भजेन्मंत्री श्रीसूक्तान्यपि संयजेत्॥ ७॥ भूयसीं श्रियमाकांक्षन्सत्यवादी भवेत्सदा॥ प्रत्यगाशामुखोऽश्रीयात्स्थितपूर्वंप्रियं वदेत्॥ ८॥ पूजयेद्गंधपुष्पाद्यैरात्मानं नियतः शुचिः॥ शयीत शुद्धशय्यायां तरुण्या सह नान्यथा॥ ९॥ नग्नो नावतरेदंभस्तैलाभ्यक्तो न भक्षयेत्॥ हरिद्रां न मुखे लिंपेन्न स्वपेदशुचिः क्वचित्॥ १०॥ न वृथा विलिखेद्भूमिं न बिल्वं द्रोणमंबुजम्॥ धारयेन्मूर्ध्नि नैवाद्याल्लोणतैलं च केवलम्॥ ११॥ मलिनो न भवेज्जातु कुत्सितान्नं न भक्षयेत्॥ द्रोणपंकजबिल्वानि पद्भ्यां जातु न लंघयेत्॥ १२॥ सहदेवीमिंद्रवल्लीं श्रीवल्लीं विष्णुवल्लभाम्॥ कन्यांबुजप्रवालं च धारयेन्मूर्ध्नि सर्वदा॥ १३॥ इत्याचारपरो नित्यं विष्णुभक्तो दृढव्रतः॥ श्रियमाप्नोति महतीं देवानामपि दुर्लभाम्॥ इति सप्तविंशत्यक्षरलक्ष्मीमंत्रप्रयोगः॥

अथ लक्ष्मीस्तोत्रप्रारंभः॥ सिंहासनगतः शक्रः संप्राप्य त्रिदिवं पुनः॥ देवराज्ये स्थितो देवीं तुष्टावाब्जकरां ततः॥ १॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

इन्द्र उवाच ॥ नमस्ये सर्वभूतानां जननीमब्जसंभवाम् ॥ श्रियमुन्निद्रपद्माक्षीं विष्णुवक्षःस्थलस्थिताम् ॥ २ ॥ पद्मालयां पद्मकरां पद्मपत्रनिभेक्षणाम् ॥ वंदे पद्ममुखीं देवीं पद्मनाभप्रियामहम् ॥ ३ ॥ त्वं सिद्धिस्त्वं स्वधा स्वाहा सुधा त्वं लोकपावनी ॥ संध्या रात्रिः प्रभा भूतिर्मेधा श्रद्धा सरस्वती ॥४॥ यज्ञविद्या महाविद्या गुह्यविद्या च शोभने ॥ आत्मविद्या च देवि त्वं विमुक्तिफलदायिनी ॥५॥आन्वीक्षिकी त्रयी वार्ता दंडनीतिस्त्वमेव च ॥ सौम्या सौम्यैर्जगद्रूपैस्त्वयैतद्देवि पूरितम् ॥६ ॥ का त्वन्या त्वामृते देवि सर्व यज्ञमयं वपुः ॥ अध्यास्ते देवदेवस्य योगचिंत्यं गदाभृतः ॥ ७ ॥ त्वया देवि परित्यक्तं सकलं भुवनत्रयम् ॥ विनष्टप्रायमभवत्त्वयेदानीं समेधितम् ॥ ८ ॥ दाराः पुत्रास्तथाऽऽगारं सुहृद्धान्यं धनादिकम् ॥ भवत्येतन्महाभागे नित्यं त्वद्वीक्षणान्नृणाम् ॥ ९ ॥ शरीरारोग्यमैश्वर्यमरिपक्षक्षयः सुखम् ॥ देवि त्वद्दृष्टिदृष्टानां पुरुषाणां न दुर्लभम् ॥१० ॥ त्वमंबा सर्वभूतानां देवदेवी हरिः पिता ॥ त्वयैतद्विष्णुनाचांब जगद्व्याप्तं चराचरम् ॥ ११ ॥ मा नः कोशं तथा कोष्ठं मा गृहं मा परिच्छदम् ॥ मा शरीरं कलत्रं च त्यजेथाः सर्वपावनि ॥ १२ ॥ मा पुत्रान्मा सुहृद्वर्गान्मा पशून्मा विभूषणम् ॥ त्यजेथा मम देवस्य विष्णोर्वक्षःस्थलाश्रये ॥ १३ ॥ सत्त्वेन सत्यशौचाभ्यां तथा शांत्यादिभिर्गुणैः ॥ त्यज्यंते ते नराः सद्यः संत्यक्ता ये त्वयाऽमले ॥ १४ ॥ त्वयावलोकिताः सद्यः शीलाद्यैरखिलैर्गुणैः ॥ कुलैश्वर्यैश्च युज्यंते पुरुषा निर्गुणा अपि ॥ १५ ॥ स श्लाघ्यः स गुणी धन्यः स कुलीनः स बुद्धिमान् ॥ स शूरः स च विक्रांतो यस्त्वया देवि वीक्षितः ॥ १६ ॥ सद्यो वैगुण्यमायांति शीलाद्याः सकला गुणाः ॥ पराङ्मुखी जगद्धात्री यस्य त्वं विष्णुवल्लभे ॥ १७ ॥ न ते वर्णयितुं शक्ता गुणाञ्जिह्वाऽपि वेधसः ॥ प्रसीद देवि पद्माक्षि माऽस्मांस्त्याक्षीः कदाचन ॥ १८ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पराशर उवाच ॥ एवं श्रीः संस्तुता सम्यक्प्राह हृष्टा शतक्रतुम् ॥ शृण्वतां सर्वदेवानां सर्वभूतस्थिता द्विज ॥ १९ ॥ श्रीरुवाच ॥ परितुष्टास्मि देवेश स्तोत्रेणानेन ते हरे ॥ वरं वृणीष्व यस्त्विष्टो वरदाऽहं तवागता ॥ २० ॥ इन्द्र उवाच ॥ वरदा यदि मे देवि वराहों यदि वाऽप्यहम् ॥ त्रैलोक्यं न त्वया त्याज्यमेष मेऽस्तु वरः परः ॥ २१ ॥ स्तोत्रेण यस्तवैतेन त्वां स्तोष्यत्यब्धिसंभवे ॥ स त्वया न परित्याज्यो द्वितीयोऽस्तु वरो मम ॥ २२॥ श्रीरुवाच ॥ त्रैलोक्यं त्रिदशश्रेष्ठ न संत्यक्ष्यामि वासव ॥ दत्तो वरो मयाऽयं ते स्तोत्राराधानतुष्टया ॥ २३ ॥ यश्च सायं तथा प्रातः स्तोत्रेणानेन मानवः ॥ मां स्तोष्यति न तस्याहं भविष्यामि पराङ्मुखी ॥ २४ ॥ पराशर उवाच ॥ एवं वरं ददौ देवी देवराजाय वै पुरा ॥ मैत्रेय श्रीर्महाभागा स्तोत्राराधनतोषिता ॥ २५ ॥ भृगोः ख्यात्यां समुत्पन्ना श्रीः पूर्वमुदधेः पुनः ॥ देवदानवयत्नेन प्रसूताऽमृतमंथने ॥ २६ ॥ एवं यथा जगत्स्वामी देवराजो जनार्दनः॥ अवतारं करोत्येषा तथा श्रीस्तत्सहायिनी ॥ २७ ॥ पुनश्च पद्मा संभूता यदाऽऽदित्योऽभवद्धरिः ॥ यदा च भार्गवो रामस्तदाऽभूद्धरणी त्वियम् ॥ २८ ॥ राघवत्वेऽभवत्सीता रुक्मिणी कृष्णजन्मनि ॥ अन्येषु चावतारेषु विष्णोरेषाऽनपायिनी ॥ २९ ॥ देवत्वे देवदेहेयं मानुषत्वे च मानुषी ॥ विष्णोर्देहानुरूपं वै करोत्येषाऽऽत्मनस्तनुम् ॥ ३०॥ यश्चैवं शृणुयाज्जन्म लक्ष्म्या यश्च पठेन्नरः ॥ श्रियो न विच्युतिस्तस्य गृहे यावत्कुलत्रयम् ॥ ३१ ॥ पठ्यते येषु चैवैष गृहेषु श्रीस्तवो मुने ॥ अलक्ष्मीः कलहाधारा न तेष्वास्ते कदाचन ॥ ३२ ॥ एतत्ते कथितं ब्रह्मन् यन्मां त्वं परिपृच्छसि ॥ क्षीराब्धौ श्रीर्यथा जाता पूर्वं भृगुसुता सती ॥ ३३ ॥ इति सकलविभूत्यवाप्तिहेतुः स्तुतिरियमिंद्रमुखोद्गता हि लक्ष्म्याः ॥ अनुदिनमिह पठ्यते नृभिर्यैर्वसति न तेषु कदाचिदप्यलक्ष्मीः ॥३४॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

इति श्रीविष्णुपुराणे लक्ष्मीस्तोत्रं समाप्तम् ॥ अथान्यदपि लक्ष्मीस्तोत्रम् ॥ त्रैलोक्यपूजिते देवि कमले विष्णुवल्लभे ॥ यथात्वम
चला कृष्णे तथा भव मयि स्थिरा ॥ १ ॥ कमला चंचला लक्ष्मीश्चला भूतिर्हरिप्रिया ॥ पद्मा पद्मालया संपदुच्चैः श्रीः पद्मधारिणी
॥ २ ॥ द्वादशैतानि नामानि लक्ष्मीं संपूज्य यः पठेत् ॥ स्थिरा लक्ष्मीर्भवेत्तस्य पुत्रदारादिभिः सह ॥ इति लक्ष्मीस्तोत्रं
द्वितीयम् ॥ अथ लक्ष्मीकवचप्रारंभः ॥ अथ वक्ष्ये महेशानि कवचं सर्वकामदम् ॥ यस्य विज्ञानमात्रेण भवेत्साक्षात्सदाशिवः
॥ १ ॥ नार्चनं तस्य देवेशि मंत्रमात्रं जपेन्नरः ॥ स भवेत्पार्वतीपुत्रः सर्वशास्त्रपुरस्कृतः ॥ २ ॥ विद्यार्थिना सदा सेव्या
विशेषे विष्णुवल्लभा ॥ ॐ अस्याश्चतुरक्षरविष्णुवनितायाः कवचस्य श्रीभगवान् शिव ऋषिः । अनुष्टुप् छंदः । वाग्भवा
देवता । वाग्भवं बीजम् ॥ लज्जा शक्तिः । रमा कीलकम् ॥ कामबीजात्मकं कवचं मम सुकवित्वपांडित्यसमृद्धिसिद्धये
विनियोगः ॥ ऐंकारो मस्तके पातु वाग्भवा सर्वसिद्धिदा ॥ ३ ॥ ह्रीं पातु चक्षुषोर्मध्ये चक्षुर्युग्मे च शांकरी ॥ जिह्वायां
मुखवृत्ते च कर्णयोर्दंतयोर्नसि ॥ ४ ॥ ओष्ठाधारे दंतपंक्तौ तालुमूले हनौ पुनः ॥ पातु मां विष्णुवनिता लक्ष्मीः श्रीवर्णरूपिणी
॥ ५ ॥ कर्णयुग्मे भुजद्वंद्वे स्तनद्वंद्वे च पार्वती ॥ हृदये मणिबंधे च ग्रीवायां पार्श्वयोर्द्वयोः ॥ ६ ॥ पृष्ठदेशे तथा गुह्ये वामे
च दक्षिणे तथा ॥ उपस्थे च नितंबे च नाभौ जंघाद्वये पुनः ॥ ७ ॥ जानुचक्रे पदद्वंद्वे घुटिकेंगुलिमूलके ॥ सधातुप्राण
शक्त्या वा सीमन्यां मस्तके तथा ॥ ८ ॥ सर्वांगे पातु कामेशी महादेवी समुन्नतिः ॥ पुष्टिः पातु महामाया उत्कृष्टिः
सर्वदावतु ॥ ९ ॥ ऋद्धिः पातु सदा देवी सर्वत्र शंभुवल्लभा ॥ वाग्भवी सर्वदा पातु पातु मां हरगेहिनी ॥ १० ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

रमा पातु महादेवी पातु माया स्वराट् स्वयम् ॥ सर्वांगे पातु मां लक्ष्मीः विष्णुमाया सरस्वती ॥ ११ ॥ विजया पातु भवने जया पातु सदा मम ॥ शिवदूती सदा पातु सुंदरी पातु सर्वदा ॥ १२ ॥ भैरवी पातु सर्वत्र भेरुंडा सर्वदावतु ॥ त्वरिता मां पातु नित्यमुग्रतारा सदावतु ॥ १३ ॥ पातु मां कालिका नित्यं कालरात्रिः सदावतु ॥ नव दुर्गाः सदा पान्तु कामाख्या सर्वदा वतु ॥ १४ ॥ योगिन्यः सर्वदा पान्तु मुद्राः पान्तु सदा मम ॥ मात्राः पान्तु सदा देव्यश्चक्रस्था योगिनीगणः ॥ १५ ॥ सर्वत्र सर्वकार्येषु सर्वकर्मसु सर्वदा ॥ पातु मां देवदेवी च लक्ष्मीः सर्वसमृद्धिदा ॥ १६ ॥ इति ते कथितं दिव्यं कवचं सर्वसिद्धये ॥ यत्र तत्र न वक्तव्यं यदीच्छेदात्मनो हितम् ॥ १७ ॥ शठाय भक्तिहीनाय निंदकाय महेश्वरि ॥ न्यूनांगे ह्यतिरिक्तांगे दर्शयेन्न कदाचन ॥ १८ ॥ न स्तवं दर्शयेद्दिव्यं संदर्श्य शिवहा भवेत् ॥ कुलीनाय महेशाय दुर्गाभक्तिरताय च ॥ १९ ॥ वैष्णवाय विशुद्धाय दद्यात्कवचमुत्तमम् ॥ निजशिष्याय शांताय धनिने कुलिने तथा ॥ २० ॥ दद्यात्कवचमित्युक्तं सर्वतंत्रसम न्वितम् ॥ शनौ मंगलवारे च रक्तचंदनकैस्तथा ॥ २१ ॥ सुतिथौ शुभयोगे च श्रवणायां रवेर्दिने ॥ विलिखेत्प्रप ठेत्स्तोत्रं शून्यागारे सुरालये ॥ २२ ॥ कुमारीं पूजयित्वा च यजेद्देवीं सनातनीम् ॥ घृताद्यैः सोपकरणैः पुष्प धूपैर्विशेषतः ॥ २३ ॥ ब्राह्मणान्भोजयित्वा च पूजयेत्परमेश्वरीम् ॥ आखेटकमुपाख्यानं तत्र कुर्याद्दिनत्रयम् ॥ २४ ॥ तदा धरेन्महारक्षां शंकरेण प्रभाषिताम् ॥ मारणद्वेषणादीनि लभते नात्र संशयः ॥ २५ ॥ स भवेत्पार्वतीपुत्रः सर्वशा स्त्रपुरस्कृतः ॥ गुरुर्देवो हरः साक्षात्पत्नी तस्य हरिप्रिया ॥ २६ ॥ अभेदेन यजेद्यस्तु तस्य सिद्धिरदूरतः ॥ पठति य इह मर्त्यो

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नित्यमान्द्रातरात्मा जपफलमनुवेलं लप्स्यते यद्विशेषम् ॥ स भवति पदमुच्चैः संपदां पादनम्रक्षितिपमुकुटलक्ष्मीर्लक्षणानां चिराय ॥ २७॥ इति विश्वसारे श्रीलक्ष्मीकवचं समाप्तम् ॥ श्रीमहालक्ष्म्यै नमः ॥ शम् ॥ ॥ अथ श्रीसूक्तविधानम् ॥ ऋग्विधाने । य इच्छेद्भूरदां देवीं श्रियं नित्यं कुले स्थिताम् ॥ सशुचिः प्रयतो भूत्वा जुहुयादाज्यमन्वहम् ॥ १ ॥ श्रियः पंचदशर्चं च श्रीकामः सततं जपेत् ॥ आवाहयेच्छ्रियं पद्मे पंचभिः कनकेन वा॥२॥ उपहारानुपहरेच्छुक्लान्भक्ष्यान्पयो दधि ॥ स्थाली पाकं च शालीनां पयसा संप्रकल्पयेत् ॥ ३ ॥ चांद्रायणकृतात्मा तु प्रपद्येत्प्रयतः श्रियै ॥ सर्वौषधीभिः पाठाभिः स्नात्वाऽद्भिः पावनैरपि ॥ ४ ॥ श्रीसूक्तं यो जपेद्भक्त्या तस्याऽलक्ष्मीर्विनश्यति ॥ जुहुयाद्यश्च धर्म्मज्ञो हविष्येण विशेषतः ॥ ५ ॥ ॥ अथ प्रयोगः ॥ तत्रादौ चांद्रायणादिद्वारा प्रायश्चित्तं संपाद्य पूर्वदिने अयुतगायत्रीजपं कृत्वा प्रारंभदिने प्रातर्नद्यादौ स्नात्वा संध्यादिनित्यकर्म्म समाप्य सर्वौषधियुक्तैरुष्णोदकैर्मङ्गलस्नानं कृत्वा नवे शुक्लवाससी परिधाय यथायोग्यालंकृतो देवालयादिषु विविक्ते देशे जपस्थानं प्रकल्पयेत् ॥ ततः स्वासने प्राङ्मुख उपविश्य सपवित्रकरः । आचम्य प्राणानायम्य । ॐ 'सुमुखश्च'इत्यादिगणपतिस्मरणं कुर्य्यात् । ततो देशकालौ संकीर्त्य । मम अनंताव्यवच्छिन्नशाश्वतलक्ष्मीप्राप्तिद्वारा सुखसंपदायुरारोग्यप्राप्त्यर्थं श्रीमहालक्ष्मीदेवताप्रीत्यर्थं च अमुकसंख्यया श्रीसूक्तजपं करिष्ये । तदंगत्वेन न्यासध्यानादिकर्म्म करिष्ये । इति च संकल्प्य न्यासं कुर्य्यात् । तद्यथा । अस्य हिरण्यवर्णमित्यादिपंचदशर्चस्य श्रीसूक्तस्य आनंदकर्दमचिक्लीतेंदिरासुता ऋषयः आद्यानां तिसृणामनुष्टुप्छंदः चतुर्थ्याः प्रस्तारपङ्क्तिश्छंदः । पंचमीषष्ठचोस्त्रिष्टुप्छंदः ततोष्टानामनुष्टुप्छंदः । अन्त्यायाः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

प्रस्तारपंक्तिश्छंदः । श्रीविश्वावसुर्देवता स्थिरलक्ष्मीप्राप्तये न्यासे जपे विनियोगः । ॐ आनंदकर्दमचिक्लीतेंदिरासु तऋषिभ्यो नमः शिरसि ॥ १ ॥ ॐ अनुष्टुप्प्रस्तारपंक्तित्रिष्टुबनुष्टुप्प्रस्तारपंक्तिच्छंदोभ्यो नमः मुखे ॥ २ ॥ ॐ श्रीविश्वावसुदेवताभ्यां नमः हृदये ॥ ३ ॥ इति ऋष्यादिन्यासः ॥ अथ सूक्तन्यासः । ॐ हिरण्यवर्णां हरिणीम् । इति शिरसि ॥ १ ॥ ॐ तांमआव ह० नेत्रयोः ॥ २ ॥ ॐ अश्वपूर्वामिति कर्णयोः ॥ ३ ॥ ॐ कांसोस्मितामिति नासिकयोः ॥ ४ ॥ ॐ चंद्रांप्रभासामिति मुखे ॥ ५ ॥ ॐ आदित्यवर्णे इति गले ॥ ६ ॥ उपैतुमामितिबाह्वोः ॥ ७ ॥ ॐ क्षुत्पिपासेति० हृदि ॥ ८ ॥ ॐ गन्धद्वारामिति नाभौ ॥ ९ ॥ ॐ मनसःकाममिति गुह्ये ॥ १० ॥ ॐ कर्दमेनेति गुदे ॥ ११ ॥ ॐ आपःसृजंत्विति ऊर्वोः ॥ १२॥ ॐ आर्द्रां पुष्करिणीमिति जानुनोः ॥ १३ ॥ ॐ आर्द्रां यस्करिणीमिति जंघयोः ॥ १४ ॥ ॐ तांमआवह इति पादयोः ॥ १५ ॥ एवमेताः प्रणवादिनमोंता विन्यस्य ध्यायेत् " या सा पद्मासनस्था विपुलकटितटी पद्मपत्रायताक्षी गंभीरावर्तनाभिस्तनभरनमिता शुभ्रवस्त्रोत्तरीया ॥ या लक्ष्मीर्दिव्यरूपैर्मणिगणखचितैः स्नापिता हेमकुंभैः सा नित्यं पद्महस्ता मम वसतु गृहे सर्वमांगल्ययुक्ता ॥ १ ॥" एवं ध्यात्वा मानसोपचारैः संपूजयेत् ॥ ततः स्वपुरतः पीठे चतुर्द्वारंचतुरस्रत्रयावृतमष्टदलं कमलं विधाय ॐ मंडूकादिपरतत्त्वांतपीठदेवताभ्यो नमः ॥ इति पीठदेवताः संपूज्य । ॐ विभूत्यै नमः॥१॥ॐ उन्नत्यै नमः॥२॥ ॐ कांत्यै नमः॥३॥ ॐ सृष्टयै नमः॥४॥ॐ कीर्त्यै नमः॥५॥ ॐ संनत्यै नमः॥६॥ ॐ पुष्टयै नमः॥७॥ ॐ उत्कृष्टयै नमः॥८॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(मध्ये) ॐ ऋद्ध्यै नमः ॥९॥ इति पीठशक्तीः संपूजयेत् ॥ तत्र ॐ श्रीँ कमलासनाय नमः इत्यासनं दत्त्वा तत्र स्वर्णमयीं महा लक्ष्मीप्रतिमां सावयवां संस्थाप्य प्राणप्रतिष्ठां कृत्वा ॐ हिरण्यवर्णामित्यादिश्रीसूक्तेनावाहनादिश्वेतपुष्पांतैरुपचारैः संपूज्य पूर्वोक्तैकाक्षरप्रयोगवदावरणपूजां कृत्वा धूपदीपशुक्लभक्ष्यान् पयो दधि शुक्लानुपहारांश्च निवेद्य नीराजनांतं कृत्वा पूर्वोक्तस्तवेन स्तुत्वा सूक्तं पठेत् ॥ ॐ हिरण्यवर्णां हरिणींसुवर्णरजतस्रजाम् ॥ चन्द्रांहिरण्मयींलक्ष्मींजातवेदोमआवह ॥ १ ॥ तांमआवहजातवेदोल क्ष्मीमनपगामिनीम्॥यस्यांहिरण्यंविंदेयंगामश्वंपुरुषानहम् ॥२॥ अश्वपूर्वांरथमध्यांहस्तिनादप्रबोधिनीम्॥श्रियंदेवीमुपह्वयेश्रीर्मादेवी जुषताम्॥३॥कांसोस्मितांहिरण्यप्राकारामार्द्रांज्वलंतींतृप्तांतर्पयंतींपद्मेस्थितांपद्मवर्णांतामिहोपह्वयेश्रियम् ॥४॥ चंद्रांप्रभासांयशसा ज्वलंतींश्रियंलोकेदेवजुष्टामुदाराम् ॥ तांपद्मिनींमीशरणंप्रपद्येऽअलक्ष्मीर्मेनश्यतांत्वांवृणे ॥ ५॥आदित्यवर्णेतपसोधिजातोवनस्पति स्तवववृक्षोथबिल्वः ॥ तस्यफलानितपसानुदंतुममांतरायाश्चबाह्याअलक्ष्मीः॥६॥ उपैतुमांदेवसखःकीर्तिश्चमणिनासह ॥ प्रादुर्भूतोसुराष्ट्रेस्मिन्कीर्तिमृद्धिंददातुमे॥७॥क्षुत्पिपासामलाज्येष्ठामलक्ष्मीनाशयाम्यहम् ॥ अभूतिमसमृद्धिंचसर्वान्निर्णुदमेगृहात्॥८॥ गंधद्वारां दुराधर्षांनित्यपुष्टांकरीषिणीम्॥ईश्वरींसर्वभूतानांतामिहोपह्वयेश्रियम् ॥ ९ ॥ मनसःकाममाकूतंवाचःसत्यमशीमहि ॥ पशूनांरूपमन्न स्यमयिश्रीःश्रयतांयशः ॥१०॥ कर्दमेनप्रजाभूतामयिसंभवकर्दम ॥ श्रियंवासयमेकुलेमातरंपद्ममालिनीम् ॥११॥ आपःस्रजंतुस्निग्धा

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

निचिक्लीतवसमेगृहेनिचदेवीमातरंश्रियंवासयमेकुले ॥१२॥ आर्द्रांपुष्करिणींपुष्टींपिंगलांपद्ममालिनीम् । चंद्रांहिरण्मयींलक्ष्मींजातवेदोमआवह ॥ १३ ॥ आर्द्रांयष्करिणीयष्टींसुवर्णांहेममालिनीम् ॥ सूर्यांहिरण्मयींलक्ष्मींजातवेदोमआवह ॥ १४ ॥ तांमऽआवह जातवेदोलक्ष्मीमनपगामिनीम् ॥ यस्यांहिरण्यंप्रभूतंगावोदास्योश्वान्विन्देयंपुरुषानहम् ॥ १५ ॥ यःशुचिःप्रयतोभूत्वाजुहुयादाज्यमन्वहम् ॥ श्रियः पंचदशर्चञ्चश्रीकामः सततं जपेत् ॥ १६ ॥ इतिश्रीसूक्तम् ॥ एवं यथासंकल्पितसंख्यया सूक्तं पठित्वा प्रत्यहं तत्संख्यया वा समिद्धेऽग्नौ घृतहोमं कृत्वा । भगवतीं प्रार्थयेत् । "सरसिजनिलये सरोजहस्ते धवलतरोशुकगंधमाल्यशुभ्रे ॥ भगवति हरिवल्लभे मनोज्ञे त्रिभुवनभूतिकरि प्रसीद मह्यम् ॥ १ ॥ धनमग्निर्धनंवायुर्धनंसूर्योधनंवसुः ॥ धनमिंद्रोबृहस्पतिर्वरुणंधनमश्विनौ ॥ २ ॥ वैनतेयसोमंपिबसोमंपिबतुवृत्रहा ॥ सोमंधनस्यसोमिनोमह्यंददातुसोमिनः ॥ ३ ॥ नक्रोधोनचमात्सर्यंनलोभोनाशुभामतिः ॥ भवन्तिकृतपुण्यानांभक्तानांश्रीसूक्तंजपेत् ॥ ४ ॥ पद्माननेपद्मऊरूपद्माक्षीपद्मसंभवे ॥ तन्मेभजसिपद्माक्षियेनसौख्यं लभाम्यहम् ॥ ५ ॥ विष्णुपत्नींक्षमांदेवींमाधवींमाधवप्रियाम् । विष्णुप्रियसखीं देवीं नमाम्यच्युतवल्लभाम् ॥ ६ ॥ महालक्ष्यै चविद्महेविष्णुपत्न्यैचधीमहि ॥ तन्नोलक्ष्मीः प्रचोदयात् ॥ ७ ॥ पद्मानने पद्मिनि पद्मपत्रे पद्मप्रिये पद्मदलायताक्षि ॥ विश्वप्रिये विश्वमनोनुकूले त्वत्पादपद्मं मयि सन्निधत्स्व ॥ ८ ॥ आनंदः कर्दमः श्रीदश्चिक्लीतइतिविश्रुताः ॥ ऋषयः श्रियपुत्राश्चमयिश्रीर्देवीदेवता ॥ ९ ॥ ऋणरोगादिदारिद्र्यं पापञ्च अपमृत्यवः ॥ भयशोकमनस्तापानश्यंतुममसर्वदा ॥ १० ॥ श्रीवर्चस्यमायुष्यमारो

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ग्यमाविधात्पवमानंमहीयते ॥ धनधान्यंपशुंबहुपुत्रलाभंशतसंवत्सरं दीर्घमायुः ॥ ११ ॥ इति प्रार्थना ॥ ऋग्विधाने । चंद्रामिति तु पद्मानि जुहुयात्सर्पिषा द्विजः ॥ आदित्यवर्णइत्यनया बिल्वहोमो विधीयते ॥ बिल्वेध्यएववाग्निः स्यात्स्थालीपाकं हुनेद्विजः ॥ दशसाहस्रिको होमः श्रीकामः प्रथमो विधिः ॥ हुत्वा तु प्रयुतं सम्यगनंतं विंदते श्रियम् ॥ अयुतं शतकृत्वस्तु हुत्वा शुक्लानि स र्पिषा ॥ अनंतामव्यवच्छिन्नां शाश्वतीं विंदते श्रियम् ॥ अशक्तौ जप एवोक्तो दशसाहस्रिको वरः ॥ जप्त्वा तु प्रयुतं सम्यगनंतां विंदते श्रियम्॥अयुतं शतकृत्वस्तु जप्त्वा श्रियमुपाश्नुते ॥ अप्स्वेव जुहुयान्नित्यं पद्मान्ययुतशो निशि ॥ दृष्ट्वा श्रियं तूपरमेत्किलासत्त्वाद्विभे तवे॥बिल्वाशी बिल्वनिलये जुहुद्बिल्वानि सर्पिषा॥एकविंशतिरात्रेण परां सिद्धिं नियच्छति॥येनयेन च कामेन जुहोति प्रयतः श्रियै॥ पद्मान्यथापि बिल्वानि स स कामः समृध्यति॥न जातु कृपणोर्थाय श्रियमावाहयेत्क्वचित्॥न च किंचनकामेन होमः कार्यः कथंचन॥ महद्वा प्रार्थ्यमानेन राज्यकामेन वा पुनः॥वाचः परं प्रार्थयिता यन्नाद्युक्तः श्रियं जपेत् ॥ (विष्णुधर्मोत्तरेपि) "श्रीसूक्तं यो जपेद्भक्त्या तस्याऽलक्ष्मीर्विनश्यति । जुहुयाद्यश्च धर्मज्ञो हविष्येण विशेषतः ॥ श्रीसूक्तेन तु पद्मानां घृताक्तानां भृगूत्तम । अयुतं होमये द्यस्तु वह्नौ भक्तियुतो नरः ॥ पद्महस्तद्वयालाभं भजंतमुपतिष्ठति । दशायुतं तु पद्मानां जुहुयाद्यस्तथा जले॥नापैति तत्कुलाल्ल क्ष्मीर्विष्णोर्वक्षोगता यथा ॥ घृताक्तानां तु बिल्वानां हुत्वा रामायुतं तथा । बहुवित्तमवाप्नोति स यावन्मनसेच्छति॥ बिल्वानां लक्ष होमेन कुले लक्ष्मीमुपाश्नुते॥पद्मानामथ बिल्वानां कोटिहोमं समाचरेत्॥सत्यलोकमवाप्नोति देवेंद्रत्वमपि ध्रुवम्॥संपूज्य देवीं वरदां यथावत्पद्मैः सितैर्वा कुसुमैस्तथान्यैः ॥ क्षीरेण धूपैः परमान्नभक्षैर्लक्ष्मीमवाप्नोति विधानतश्च ॥ इति लक्ष्मीसूक्तविधानं समाप्तम् ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अथ सरस्वतीमंत्रानुष्ठानम्॥ तत्र तावद्दशाक्षरात्मकवागीश्वरीमंत्रप्रयोगः । भूतशुद्ध्यादिनिवृत्त्यादिकलामातृकान्यासांतं पूर्ववत्कर्त्तव्यम् । मंत्रो यथा ("ॐ वदवदवाग्वादिनि स्वाहा" इति दशाक्षरो मंत्रः॥अस्य मंत्रस्य कण्वः ऋषिः । विराट् छंदः । वाग्देवता । विद्याप्राप्त्यर्थं जपे विनियोगः ॥ ॐ कण्वऋषये नमः शिरसि ॥ १ ॥ ॐ विराट्छंदसे नमः मुखे ॥२॥ ॐ वागीश्वरीसरस्वतीदेवतायै नमः हृदि ॥ ३ ॥ इति ऋष्यादिन्यासः॥ ॐ वं नमः शिरसि ॥१॥ ॐ दं नमःदक्षश्रवणे ॥ २ ॥ ॐ वं नमः वामश्रवणे ॥३॥ ॐ दं नमः दक्षिणनेत्रे ॥ ४ ॥ ॐ वां नमः वामनेत्रे॥५॥ॐ ग्वां नमः दक्षिणनासायाम् ॥६॥ ॐ दिं नमः वामनासायाम्॥७॥ ॐ नीं नमः मुखे ॥ ८ ॥ ॐ स्वां नमः लिंगे ॥ ९॥ ॐ हां नमो गुदे ॥ १०॥ इति मंत्रवर्णन्यासः ॥ ॐअंकंखंगंघंङंआं अंगुष्ठाभ्यां नमः ॥ १ ॥ ॐ इंचंछंजंझंञंईं तर्जनीभ्यां नमः ॥ २ ॥ ॐ उंटंठंडंढंणंऊं मध्यमाभ्यां नमः ॥ ३ ॥ ॐ एंतंथंदंधंनंऐं अनामिकाभ्यां नमः ॥ ४ ॥ ॐ ओंपंफंवंभंमंऔं कनिष्ठिकाभ्यां नमः ॥ ५ ॥ ॐ अंयंरंलंवंअः करतलकरपृष्ठाभ्यां नमः इति करन्यासः ॥ ॐ एवं हृदयादिषडंगन्यासं कुर्यात् ॥ अथ ध्यानम् ॥तरुणशकलमिंदोर्बिभ्रती शुभ्रकांतिः कुचभरनमितांगी सन्निषण्णा सिताब्जे ॥ निजकरकमलोद्यल्लेखनीपुस्तकश्रीः सकलविभवसिद्ध्यै पातु वाग्देवता नः ॥१॥ इति ध्यात्वा मानसोपचारैः संपूज्य पीठे आधारशक्त्यादिपरतत्त्वान्तपीठदेवताः पूर्ववत् संपूज्य पीठशक्तीः पूजयेत् ॥ तद्यथा-प्राचीक्रमेण । ॐ मेधायै नमः ॥ १ ॥ ॐ प्रज्ञायै नमः॥२॥ॐ प्रभायै नमः॥३॥ॐ विद्यायै नमः॥४॥ॐ श्रियै नमः ॥५॥ॐ धृत्यै नमः॥६॥ॐ स्मृत्यै नमः॥७॥बुद्ध्यै नमः ॥८॥ (मध्ये) ॐ विद्येश्वर्यै नमः ॥ ९ ॥ इति पीठशक्तीः संपूज्य । वर्णाब्जेनासनं दत्त्वा मूलेन मूर्तिं प्रकल्प्य आवाहनादिपुष्पांतैरुपचारैः संपूज्यावरणपूजां कुर्यात् । तत्र षट्कोणे आग्नेयादिकेसरेषु मध्ये दिक्षु च । ॐ अंकंखंगंघंङंआं हृदयाय नमः ॥ १ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ॐ इंचंछंजंझंईं शिरसे स्वाहा ॥ २ ॥ ॐ उंटंठंडंढंणंऊं शिखायै वषट् ॥ ३ ॥ ॐ एंतंथंदंधंनंऐं कवचायहुं ॥४॥ ॐ ओंपंफंबंभंमं औं नेत्रत्रयाय वौषट् ॥ ५ ॥ ॐ अंयंरंलंवंअः अस्त्राय फट् ॥ ६ ॥ इत्यंगानि पूजयेत् । तद्बहिरष्टदलेषु पूर्वादिक्रमेण । ॐ यो गायै नमः ॥ १ ॥ ॐ सत्यायै नमः ॥ २ ॥ ॐ विमलायै नमः ॥ ३ ॥ ॐ ज्ञानायै नमः ॥ ४ ॥ ॐ बुद्धयै नमः ॥ ५ ॥ ॐ स्मृत्यै नमः ॥ ६ ॥ ॐ मेधायै नमः ॥ ७ ॥ ॐ प्रज्ञायै नमः ॥ ८ ॥ इति पूजयेत् ॥ ततो दलाग्रेषु ॐ ब्राह्म्यै नमः ॥ १ ॥ ॐ माहेश्वर्य्यै नमः ॥ २ ॥ ॐ कौमार्य्यै नमः ॥ ३ ॥ ॐ वैष्णव्यै नमः ॥ ४ ॥ ॐ वाराह्यै नमः ॥ ॥ ५ ॥ ॐ इंद्राण्यै नमः ॥ ६ ॥ ॐ चामुंडायै नमः ॥ ७ ॥ ॐ महालक्ष्म्यै नमः ॥ ८ ॥ इति पूजयेत् ॥ तद्बाह्ये चतुरस्रे भूपुरे पूर्वादिषु । इंद्रादिदशदिक्पालान् संपूज्य तद्बाह्ये वज्राद्यायुधानि च पूजयेत् ॥ एवमावरणपूजां कृत्वा धूपादिनीराजनां तपूजां समाप्य ॥ स्तवेन स्तुत्वा जपं कुर्यात् । अस्य पुरश्चरणं दशलक्षजपः ॥ तथा च (शारदायाम्) " दशलक्षं जपेन्मंत्रं दशांशं जुहुयात्ततः ॥ पुंडरीकैः पयोभ्यक्तैस्तिलैर्वा मधुराप्लुतैः ॥ १ ॥ एवं संपूजयेन्मंत्री जपहोमादितत्परः ॥ ब्रह्म चर्यरतः शुद्धः शुद्धदंतनखादिकः ॥ २ ॥ संस्मरन्सर्ववनिताः सततं देवताधिया ॥ कवित्वं लभते धीमान् मासैर्द्वादशभिर्ध्रुवम् ॥ ३ ॥ कृत्वा तन्मंत्रितं तोयं सहस्रं प्रत्यहं पिबेत् ॥ महाकविर्भवेन्मंत्री वत्सरेण न संशयः ॥ ४ ॥ उरोमात्रे जले स्थित्वा ध्याये न्मार्तण्डमंडले ॥ स्थितां देवीं प्रतिदिनं त्रिसहस्रं जपेन्मनुम् ॥ ५ ॥ लभते मंडलात्सिद्धिं वाचामप्रतिमां भुवि ॥ पलाशबिल्वकु सुमैर्जुहुयान्मधुरोक्षितैः ॥ ६ ॥ समिद्भिर्वा तदुत्थाभिर्यशः प्राप्नोति वाक्पतेः ॥ होमोयं सर्वसौभाग्यलक्ष्मीवश्यप्रदो भवेत् ॥ ७ ॥ राजवृक्षसमद्भूतैः प्रसूनैर्मधुराप्लुतैः ॥ तत्समिद्भिश्च जुहुयात्कवित्वमतुलं भवेत् ॥ ८ ॥ इत्थं दशाक्षरः प्रोक्तः सिद्धये वाचमिच्छता

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

म् ॥ इति दशाक्षरसरस्वतीमंत्रप्रयोगः ॥ ॥ अथ षोडशवर्णात्मकसरस्वतीमंत्रप्रयोगः ॥ (मंत्रो यथा) "ऐं नमो भगवति वदवदवाग्देविस्वाहा" इति षोडशाक्षरो मंत्रः ॥ अस्य मंत्रस्य कण्व ऋषिः । विराट् छंदः । सरस्वती देवता । ऐंबीजम् । स्वाहा शक्तिः । सर्वेष्टसिद्ध्यर्थे जपे विनियोगः ॥ ॐ कण्वऋषये नमः शिरसि ॥१॥ ॐ विराट्छंदसे नमः मुखे॥२॥ॐ सरस्वतीदेवतायै नमः हृदये ॥३॥ ॐ ऐ बीजाय नमः गुह्ये ॥ ४ ॥ ॐ स्वाहा शक्तये नमः पादयोः॥५॥ इति ऋष्यादिन्यासः ॥ ॐ ऐं अंगुष्ठाभ्यां नमः ॥ १ ॥ ॐ नमस्तर्जनीभ्यां नमः ॥ २ ॥ ॐ भगवति मध्यमाभ्यां नमः ॥ ३ ॥ ॐ वदवद अनामिकाभ्यां नमः ॥ ४ ॥ ॐ वाग्देवि कनिष्ठिकाभ्यां नमः ॥ ५ ॥ ॐ स्वाहा करतलकरपृष्ठाभ्यां नमः ॥ ६ ॥ इति करन्यासः ॥ एवमेव हृदयादिन्यासं कृत्वा ध्यायेत् ॥ शुभ्रां स्वच्छविलेपमाल्यवसनां शीतांशुखंडोज्वलां व्याख्यामक्षगुणं सुधाढ्यकलशं विद्यां च हस्तांबुजैः ॥ विभ्राणां कमलासनां कुचनतां वाग्देवतां सुस्मितां वंदे वाग्विभवप्रदां त्रिनयनां सौभाग्यसंपत्करीम् ॥ १ ॥ इति ध्यात्वा मानसोपचारैः संपूज्य पूर्वोक्ते पीठे पाद्यादिपुष्पांतैरुपचारैः संपूज्य आवरणपूजां कुर्यात् ॥ (षट्कोणे) आग्नेयादिकोणेषु मध्ये दिक्षु च ॐ हृदयाय नमः ॥ १ ॥ ॐ नमः शिरसे स्वाहा ॥ २ ॥ ॐ भगवति शिखायै वषट् ॥ ३ ॥ ॐ वदवद कवचाय हुं ॥ ४ ॥ ॐ वाग्देवि नेत्रत्रयाय वौषट् ॥ ५ ॥ ॐ स्वाहा अस्त्राय फट् इति षडंगानि पूजयेत् अन्यत्सर्वं पूर्ववत् ॥ अस्य पुरश्चरणमष्टलक्षं जपः ॥ तथा च "हविष्याशी जपेत्सम्यग्वसुलक्षमनन्यधीः ॥ दशांशं जुहुयादंते तिलैराज्यपरिप्लुतैः ॥ १ ॥ पिबेत्तन्मंत्रितं तोयं प्रातः काले दिनेदिने ॥ विद्वान्वत्सरतो मंत्री भवेन्नास्ति विचारणा ॥ २ ॥ अभिषिंचेज्जलैर्जप्तैरात्मानं स्नानकर्मणि ॥ तर्पयेत्तां जलैः शुद्धैरतिमेधामवाप्नुयात् ॥ ३ ॥ पुष्पगंधादिकं जप्तं सर्वं तद्धारयेत्सुधीः ॥ सभायां पूज्यते सद्भिर्वादे च विजयी भवेत् ॥४॥ इति

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

षोडशाक्षरात्मकमंत्रप्रयोगः ॥ अथैकादशाक्षरमंत्रप्रयोगः ॥ मंत्रो यथा-"ॐ ह्रौंऐंह्रौंॐ सरस्वत्यै नमः" इत्येकादशाक्षरो मंत्रः ॥ अस्य मंत्रस्य कण्व ऋषिः । विराट् छंदः । सरस्वती देवता । ऐं बीजम् । नमः शक्तिः । सर्वेष्टसिद्ध्यर्थं जपे विनियोगः ॥ ॐ कण्वऋषये नमः शिरसि ॥ १ ॥ ॐ विराट् छंदसे नमः मुखे ॥ २ ॥ ॐ सरस्वतीदेवतायै नमः हृदि ॥ ३ ॥ ॐ ऐं बीजाय नमः गुह्ये ॥ ४ ॥ ॐ नमः शक्तये नमः पादयोः ॥ ५ ॥ इति ऋष्यादिन्यासः ॥ ॐ नमो ब्रह्मरंध्रे ॥ १ ॥ ॐ ह्रीं नमो भ्रूमध्ये ॥ २ ॥ ॐ ऐं नमः दक्षिणनेत्रे ॥ ३ ॥ ॐ ह्रीं नमः वामनेत्रे ॥ ४ ॥ ॐ नमः दक्षिणनासिकायाम् ॥ ५ ॥ ॐ सं नमः वामनासायाम् ॥ ६ ॥ ॐ रं नमः दक्षिणकर्णे ॥ ७ ॥ ॐ स्वं नमः वामकर्णे ॥ ८ ॥ ॐ त्यैं नमः मुखे ॥ ९ ॥ ॐ नं नमः लिंगे ॥ १० ॥ ॐ मं नमः गुदे ॥ ११ ॥ इति मंत्रवर्णन्यासः । ऐं अंगुष्ठाभ्यां नमः ॥ १ ॥ ऐं तर्जनीभ्यां नमः ॥ २ ॥ ऐं मध्यमाभ्यां नमः ॥ ३ ॥ ऐं अनामिकाभ्यां नमः ॥ ४ ॥ ऐं कनिष्ठिकाभ्यां नमः ॥ ५ ॥ ऐं करतलकरपृष्ठाभ्यां नमः ॥ इति करन्यासः ॥ एवमेव हृदयादिषडंगन्यासं कृत्वा ध्यायेत् ॥ "वाणीं पूर्णनिशाकरोज्वलमुखीं कर्पूरकुंदप्रभां चन्द्रार्धांकितमस्तकां निजकरैः संबिभ्रतीमादरात् ॥ वीणामक्षगुणां सुधाढ्यकलशं विद्यां च तुंगस्तनीं दिव्यैराभरणैर्विभूषिततनुं हंसाधिरूढां भजे ॥ १ ॥ इति ध्यात्वा मानसोपचारैः संपूज्य पूर्वोक्ते पीठे मूलेन मूर्तिं प्रकल्प्य आवाहनादिपुष्पांतैरुपचारैः संपूज्य आवरणपूजां कुर्यात् ॥ तद्यथा--देव्याः (दक्षिणपार्श्वे) ॐ संस्कृतायै वाङ्मय्यै नमः ॥ १ ॥ (वामपार्श्वे) ॐ प्राकृतायै वाङ्मय्यै नमः ॥ २ ॥ इति संपूज्य षट्कोणे आग्नेयादिकोणकेसरेषु मध्ये दिक्षु च ऐं हृदयाय नमः ॥ १ ॥ ऐं शिरसे स्वाहा ॥ २ ॥ ऐं शिखायै वषट् ॥ ३ ॥ ऐं कवचायहुम् ॥ ४ ॥ ऐं नेत्रत्रयाय वोषट् ॥ ५ ॥ ऐं अस्त्राय फट् ॥ इति षडंगानि पूजयेत् ॥ तद्बहिरष्टदले पूर्वादिक्र

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मेण । ॐ प्रज्ञायै नमः ॥ १ ॥ ॐ मेधायै नमः ॥ २ ॥ ॐ श्रुत्यै
नमः ॥ ३ ॥ ॐ शक्त्यै नमः ॥ ४ ॥ ॐ स्मृत्यै नमः ॥ ५ ॥
ॐ वागीश्वर्यै नमः ॥ ६ ॥ ॐ मत्यै नमः ॥ ७ ॥ ॐ स्वस्त्यै
नमः ॥ ८ ॥ इति पूजयेत् ॥ ततो दलाग्रेषु ॐ ब्राह्म्यै नमः ॥ १ ॥
ॐ माहेश्वर्यै नमः ॥ २ ॥ ॐ कौमार्यै नमः ॥ ३ ॥ ॐ वैष्णव्यै
नमः ॥ ४ ॥ ॐ वाराह्यै नमः ॥ ५ ॥ ॐ इन्द्राण्यै नमः ॥ ६ ॥
ॐ चामुंडायै नमः ॥ ७ ॥ ॐ महालक्ष्म्यै नमः ॥ ८ ॥ इति पूज
येत् ॥ तद्बाह्ये भूपुरे पूर्वादिक्रमेण इंद्रादिदशदिक्पालान् तद्बाह्ये
वज्राद्यायुधानि च पूजयेत् । एवम् । आवरणपूजां कृत्वा धपादिनीराज
नांतं संपूज्य जपं कुर्य्यात् ॥ अस्य पुरश्चरणं द्वादशलक्षजपः ॥
तथा च । जपेद्वा दशलक्षाणि तत्सहस्रं सितांबुजैः ॥ नागचंपकपु
ष्पैर्वा जुहुयात्साधकोत्तमः ॥ १ ॥ इति संपूजयेद्देवीं साक्षाद्वाग्वल्ल
भो भवेत् ॥ दशाक्षरसमुक्तानि कर्म्माण्यत्रापि साधकः ॥ २ ॥

॥ श्रीसरस्वतीयंत्रमिदम् ॥

प्र. ३ चि. पृ. नं. २३१.

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

एवमुक्तेषु मंत्रेषु दीक्षितो यतमानसः ॥ एवं यो भजते भक्त्या स भवेद्भुक्तिमुक्तिभाक् ॥ ३ ॥ सुसितैर्गंधकुसुमैः पूजा सारस्वते विधौ ॥ दर्वा बीजांकुरं पुष्पं राजवृक्षसमुद्भवम् ॥ ४ ॥ उत्पलानि प्रशस्तानि सिंदुवारांकुराणि च ॥ भजन्सारस्वतीं नित्यमेतानि परिवर्जयेत् ॥ ५ ॥ आम्रातं गृञ्जनं बिल्वं कलंजं लशुनं तथा ॥ तैलं पलांडुं पिण्याकं शार्ङ्गेष्टमपि भोजने ॥ ६ ॥ सर्वं पर्युषितं त्याज्यं सदा सारस्वतार्थिनाम् ॥ नाचरेन्निशि तांबूलं स्त्रियं गच्छेद्दिवा न च ॥ ७ ॥ न संध्ययोः स्वपेज्जातु नाशुचिः किंचिदुच्चरेत् ॥ प्रदोषेषु भवेन्मौनी दिग्वस्त्रां न विलोकयेत् ॥ ८ ॥ न पुष्पितां स्त्रियं गच्छेन्न निंदेद्रामलोचनाम् । न मृषावचनं ब्रूया न्नाक्रमेत्पुस्तकं सुधीः ॥ ९ ॥ अक्षराढ्याणि पत्राणि नोपेक्षेत न लंघयेत् ॥ चतुर्दश्यष्टमीपर्वप्रतिपद्ग्रहणेषु च ॥ १० ॥ संक्रमेषु च सर्वेषु विद्यां नैव पठेद्द्विजः ॥ व्याख्याने संत्यजेन्निद्रामालस्यं जृंभणं बुधः ॥ ११ ॥ क्रोधं निष्ठीवनं तद्वन्नीचांग स्पर्शनं तथा ॥ मनुष्यसर्पमार्जारमंडूकनकुलादयः ॥ १२ ॥ अंतरा यदि गच्छेयुस्तदा व्याख्यां परित्यजेत् ॥ निशासु दीपध्वंसेषु पाठं सद्यः परित्यजेत् ॥ १३ ॥ ज्ञात्वा दोषानिमान्सम्यग्भक्त्या यो भारतीं यजेत् ॥ वाचां सिद्धिमवाप्नोति वाचस्पतिरिवापरः ॥ १४ ॥ इति शारदातिलके सरस्वतीमंत्रानुष्ठानप्रयोगः समाप्तः ॥ अथ सरस्वतीस्तोत्रम् ॥ अस्य श्रीवाग्वादिनीशारदामंत्रस्य मार्कंडेय आश्वलायन ऋषिः स्रग्धरानुष्टुप्छंदांसि श्रीसरस्वती देवता श्रीसरस्वतीप्रसादसिद्ध्यर्थं जपे विनियोगः॥अथ ध्यानम्॥ "शुक्लां ब्रह्मविचारसारपरमामाद्यां जगद्व्यापिनीं वीणापुस्तकधारिणीमभयदां जाड्यांधकारापहाम् ॥ हस्ते

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

स्फाटिकमालिकां विदधतीं पद्मासने संस्थितां वंदे तां परमेश्वरीं भगवतीं बुद्धिप्रदां शारदाम् ॥ १ ॥ ब्रह्मोवाच ॥ ह्रींह्रींह्रींहृद्यैक विद्ये शशिरुचिकमलाकल्पविस्पष्टशोभे । भव्ये भावानुकूले कुमतिवनदहे विश्ववंद्यांघ्रिपद्मे ॥ पद्मे पद्मोपविष्टे प्रणतजनमनोमोदसं पादयित्रि प्रोत्फुल्लपद्मज्ञानकूटे हरिनिजदयिते देवि संसारसारे ॥ १ ॥ ऐंऐंऐं इष्टमंत्रे कमलभवमुखांभोजरूपे स्वरूपे रूपारूपप्रकाशे सकलगुणमये निर्गुणे निर्विकारे ॥ न स्थूले नैव सूक्ष्मेप्यविदितविषये नापि विज्ञाततत्त्वे विश्वे विश्वांतराले सुरवरनमिते निष्कले नित्यशुद्धे ॥ २ ॥ ह्रींह्रींह्रीं जापतुष्टे हिमरुचिमुकुटे वल्लकीव्यग्रहस्ते मातर्मातर्नमस्ते दहदह जडतां देहि बुद्धिं प्रशस्ताम् ॥ विद्ये वेदांतगीते श्रुतिपरिपठिते मोक्षदे मुक्तिमार्गे मार्गातीतप्रभावे भव मम वरदा शारदे शुभ्रहारे ॥३॥ श्रींश्रींश्रीं धारणाख्ये धृति मतिनुतिभिर्नामभिः कीर्त्तनीये नित्येनित्ये निमित्ते मुनिगण नमिते नूतने वै पुराणे॥पुण्ये पुण्यप्रभावे हरिहरनमिते वर्णशुद्धे सुवर्णे मात्रे मात्रार्थतत्त्वे मतिमति मतिदे माधवप्रीतिनादे॥४॥ ह्रीं क्षीं धीं ह्रीं स्वरूपे दहदह दुरितं पुस्तकव्यग्रहस्ते संतुष्टाकारचित्ते स्मि तमुखि सुभगे जृंभणिस्तंभविद्ये ॥ मोहे मुग्धप्रबोधे मम कुरु सुमतिं ध्वांतविध्वंसिनित्ये गीर्वाग्गौर्भारती त्वं कविवृषरसनासिद्धि दासिद्धिसाध्या॥५॥सौंसौंसौं शक्तिबीजे कमलभवमुखांभोजभूतस्वरूपे रूपारूपप्रकाशे सकलगुणमये निर्गुणे निर्विकारे ॥न स्थूले नैव सूक्ष्मेप्यविदितविभवे जाप्यविज्ञानतत्त्वे विश्वे विश्वांतराले सुरगणनमिते निष्कले नित्यशुद्धे ॥ ६ ॥ स्तौमि त्वां त्वां च वंदे भज मम रसनां मा कदाचित्त्यजेथाः मा मे बुद्धिर्विरुद्धा भवतु न मनो देवि मे यातु पापम् ॥ मा मे दुःखं कदाचिद्विपदि च

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

समयेऽप्यस्तु मे नाकुलत्वं शास्त्रे वादे कवित्वे प्रसरतु मम धीर्मास्तु कुण्ठा कदाचित् ॥ ७ ॥ इत्येतैः श्लोकमुख्यैः प्रतिदिनमुषसि स्तौति यो भक्तिनम्रो वाण्या वाचस्पतेरप्यतिमतिविभवो वाक्पटुर्नष्टपंकः ॥ स स्यादिष्टार्थलाभः सुतमिव सततं पाति तं सा च देवी सौभाग्यं तस्य लोके प्रसरति कविता विघ्नमस्तं प्रयाति ॥ ८ ॥ ब्रह्मचारी व्रती मौनी त्रयोदश्यां निरामिषः ॥ सारस्वतो नरः पाठात्स स्यादिष्टार्थलाभवान् ॥ ९ ॥ पक्षद्वयेपि यो भक्त्या त्रयोदश्येकविंशतिः ॥ अविच्छेदं पठेद्धी मान्ध्यात्वा देवीं सरस्वतीम् ॥ १० ॥ शुक्लांबरधरां देवीं शुक्लाभरणभूषिताम् ॥ बांछितं फलमाप्नोति स लोके नात्र संशयः ॥ ११ ॥ इति ब्रह्मा स्वयं प्राह सरस्वत्याः स्तवं शुभम् ॥ प्रयत्नेन पठेन्नित्यं सोऽमृतत्वं प्रयच्छति ॥ १२ ॥ इति ब्रह्मपुराणे ब्रह्मणा कृतं सरस्वत्याः स्तोत्रम् ॥

॥ अथ अन्नपूर्णामंत्रप्रयोगः ॥ (मंत्रमहोदधौ) " अन्नपूर्णेश्वरीमंत्रं वक्ष्येऽभीष्टप्रदायकम् ॥ कुबेरो यामुपास्याशु लब्धवान्निधिनाथताम् ॥ १ ॥ शंभोः सख्यं दिगीशत्वं कैलासाधीशतामपि ॥ अथ प्रयोगः ॥ मंत्रो यथा—"ॐह्रींश्रींक्लीं नमः भगवति माहेश्वरि अन्नपूर्णे स्वाहा" इति विंशतिवर्णो मंत्रः । अस्य अन्नपूर्णामंत्रस्य द्रुहिणः ऋषिः । कृतिः छंदः । अन्नपूर्णेशी देवता । ह्रीं बीजम् । स्वाहा शक्तिः । ममाखिलसिद्धयर्थे जपे विनियोगः ॥ ॐ द्रुहिणऋषये नमः शिरसि ॥ १ ॥ ॐ कृतिच्छंदसे नमः मुखे ॥ २ ॥ अन्नपूर्णादेवतायै नमः हृदि ॥ ३ ॥ ॐ ह्रीं बीजाय नमः गुह्ये ॥ ४ ॥ ॐ स्वाहाशक्तये नमः पादयोः ॥ ५ ॥ इति ऋष्यादिन्यासः ॥ ॐ ह्रां अंगुष्ठाभ्यां नमः ॥ १ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ॐ ह्रीँ तर्जनीभ्यां नमः ॥ २ ॥ ॐ ह्रूँ मध्यमाभ्यां नमः ॥ ३ ॥ ॐ ह्रैं अनामिकाभ्यां नमः ॥ ४ ॥ ॐ ह्रौं कनिष्ठिकाभ्यां नमः ॥ ५ ॥ ॐ ह्रः करतलकरपृष्ठाभ्यां नमः ॥ इति करन्यासः ॥ एवमेव हृदयादिषडंगन्यासं कुर्यात् । ॐ नमः मुखे ॥ १ ॥ ॐ ह्रीं नमः दक्षिणनासिकायाम् ॥ २ ॥ ॐ श्रीं नमः वामनासिकायाम् ॥ ३ ॥ ॐ क्रीं नमः दक्षिणनेत्रे ॥ ४ ॥ ॐ नमो नमः वामनेत्रे ॥ ५ ॥ ॐ भगवति नमः दक्षिणकर्णे ॥ ६ ॥ ॐ माहेश्वरि नमः वामकर्णे ॥ ७ ॥ ॐ अन्नपूर्णे नमः लिंगे ॥ ८ ॥ ॐ स्वाहा नमः गुदे ॥ ९ ॥ इति मंत्रन्यासः ॥ एवं न्यासविधिं कृत्वा ध्यायेत् ॥ "तप्तस्वर्णनिभा शशांकमुकुटा रत्नप्रभाभासुरा नानावस्त्रविराजिता त्रिनयना भूमीरमाभ्यां युता ॥ दर्वीहाटकभाजनं च दधती रम्योच्चपीनस्तनी नृत्यंतं शिवमाकलय्य मुदिता ध्येयान्नपूर्णेश्वरी ॥ १ ॥ इति ध्यात्वा मानसोपचारैः संपूज्य पीठपूजां कुर्यात् ॥ तद्यथा–मंडूकादि परतत्त्वांतपीठदेवताः संपूज्य पूर्वादिक्रमेण । ॐ जयायै नमः ॥ १ ॥ ॐ विजयायै नमः ॥ २ ॥ ॐ अजितायै नमः ॥ ३ ॥ ॐ अपराजितायै नमः ॥ ४ ॥ ॐ नित्यायै नमः ॥ ५ ॥ ॐ विलासिन्यै नमः ॥ ६ ॥ ॐ दोग्ध्र्यै नमः ॥ ७ ॥ ॐ अघोरायै नमः ॥ ८ ॥ (मध्ये) ॐ मंगलायै नमः ॥ ९ ॥ इति पीठशक्तीः पूजयेत् ॥ ह्रीं अन्नपूर्णात्मने नमः ॥ इत्यासनं दत्त्वा मूलेन मूर्तिं प्रकल्प्य पाद्यादिपुष्पांतैरुपचारैः संपूज्य आवरणपूजां कुर्यात् ॥ तद्यथा– "त्रिकोणवेदपत्राष्टपत्रषोडशपत्रके ॥ भूपुरेण युते यंत्रे

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

॥ अथ अन्नपूर्णापूजायंत्रमिदम् ॥

प्रदद्यान्मायायासनम्" आग्नेयादिकोणत्रितये क्रमेण । ॐ ह्रौं नमः शिवाय ॥१॥ इति मंत्रेण शिवं पूजयेत् ॥ १ ॥ ततो द्वितीयकोणे "ॐ नमो भगवते वराहरूपाय भूर्भुवःस्वःपतये भूपतित्वं मे देहि दापय स्वाहा" इति त्रयस्त्रिंशद्वर्णात्मकमंत्रेण वराहं पूजयेत् ॥ २ ॥ तृतीयकोणे ॐ 'नमो नारायणाय' इति माधवं पूजयेत् ॥ ३ ॥ तद्बाह्ये ॐ ह्रां हृदयाय नमः ॥ १ ॥ ॐ ह्रीं शिरसे स्वाहा ॥ २ ॥ ॐ ह्रूं शिखायै वषट् ॥ ३ ॥ ॐ ह्रैं कवचाय हुं ॥ ४ ॥ ॐ ह्रौं नेत्रत्रयाय वौषट् ॥ ५ ॥ ॐ ह्रः अस्त्रायफट् ॥ ६ ॥ इति षडंगानि पूजयेत् ॥ (ततो देव्या वामे) ग्लौं अन्नंमह्यन्नंमेदेह्यन्नाधिपतयेममान्नं प्रदापयस्वाहाग्लौं इति धरां पूजयेत् (ततो दक्षभागे) श्रीं अन्नंमह्यन्नंमेदेह्यन्नाधिपतयेममान्नंप्रदापयस्वाहाश्रीं इति लक्ष्मीं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पूजयेत् ॥ २ ॥ ततश्चतुर्दले (पूज्यपूजकयोर्मध्ये प्राचीं प्रकल्प्य) प्राच्यादिक्रमेण ॐ परायै नमः ॥ १ ॥ ह्रींभुवनेश्वर्य्यै नमः ॥ २ ॥ श्रीं कमलायै नमः ॥ ३ ॥ क्लीं सुभगायै नमः ॥ ४ ॥ इति पूजयेत् ॥ तद्बहिरष्टदले प्राच्यादिक्रमेण । ॐ ब्राह्म्यै नमः ॥ १ ॥ ॐ माहेश्वर्य्यै नमः ॥ २ ॥ ॐ कौमार्य्यै नमः ॥ ३ ॥ ॐ वैष्णव्यै नमः ॥ ४ ॥ ॐ वाराह्यै नमः ॥ ५ ॥ ॐ इंद्राण्यै नमः ॥ ६ ॥ ॐ चामुंडायै नमः ॥ ७ ॥ ॐ महालक्ष्म्यै नमः ॥ ८ ॥ इति पूजयेत् ॥ तद्बाह्ये षोडशदले तेनैव क्रमेण नं अमृतायै नमः ॥१॥मं मानदायै नमः ॥२॥ भं तुष्टयैनमः॥३॥गं पुष्टयै नमः ॥४॥वं प्रीत्यै नमः ॥५॥तीं रत्यै नमः ॥६॥मां ह्रियै नमः ॥ ७ ॥ हें श्रियै नमः ॥ ८ ॥ श्वं स्वधायै नमः ॥ ९ ॥ रिं स्वाहायै नमः ॥ १० ॥ अं ज्योत्स्नायै नमः ॥ ११ ॥ भं हैमवत्यै नमः ॥ १२ ॥ पूं छायायै नमः ॥ १३ ॥ णें पूर्णिमायै नमः ॥ १४ ॥ स्वां नित्यायै नमः ॥ १५ ॥ हां अमावास्यायै नमः ॥ १६ ॥ इति पूजयेत् । तद्बहिः पूर्वादिदशदिक्षु । इंद्रादिदशदिक्पालान् तद्बाह्ये वज्राद्यायुधानि च पूजयेत् । इत्यावरणार्चनं कृत्वा धूपदीपनैवेद्याचमनीयतांबूलदक्षिणानीराजनैर्भगवतीं मूलेन संपूज्य स्तवेन स्तुत्वा जपं कुर्य्यात् ॥ अस्यपुरश्चरणं लक्षजपः । घृतसहितेन चरुणा दशांशहोमः । तद्दशांशिन तर्पणं तद्दशांशेन मार्ज्जनं तद्दशांशेन ब्राह्मणभोजनं च कार्य्यम् ॥ इत्थं जपादिभिः सिद्धे मंत्रेस्मिन्धनसंचयैः ॥ कुबेरसदृशो मंत्री जायते जनवंदितः ॥ इत्यन्नपूर्णामंत्रपुरश्चरणं समाप्तम् ॥ ॥

अथान्नपूर्णाकवचम् ॥ देव्युवाच ॥ कथिताअन्नपूर्णाया याया विद्याः सुदुर्ल्लभाः ॥ कृपया कथिताः सर्वाः श्रुताश्चाधिगता मया ॥ १ ॥ सांप्रतं श्रोतुमिच्छामि कवचं मंत्रविग्रहम् ॥ ईश्वर उवाच ॥ शृणु पार्वति वक्ष्यामि सावधानावधारय ॥ २ ॥ ब्रह्मविद्या स्वरूपं च महदैश्वर्यदायकम् ॥ पठनाद्धारणान्मर्त्यस्त्रैलोक्यैश्वर्यभाग्भवेत् ॥ ३ ॥ त्रैलोक्यरक्षणस्यास्य कवचस्य ऋषिः शिवः ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

छंदो विराट् देवता च अन्नपूर्णासमृद्धिदा ॥ ४ ॥ धर्मार्थकाममोक्षेषु विनियोगः प्रकीर्तितः ॥ ह्रीं नमो भगवत्यंते माहेश्वरिपदं ततः ॥ ५ ॥ अन्नपूर्णे ततः स्वाहा चैषा सप्तदशाक्षरी ॥ पातु मामन्नपूर्णा सा या ख्याता भुवनत्रये ॥ ६ ॥ विमायाप्रणवाद्येषा तथा सप्तदशाक्षरी ॥ या त्वन्नपूर्णा सर्वांगे रत्नकुंभान्नपात्रदा ॥ ७ ॥ श्रीबीजाद्या तथैवैषा द्विरंभ्राणां तथा मुखम् ॥ प्रणवाद्या भ्रुवौ पातु कंठं वाग्बीजपूर्विका ॥ ८ ॥ कामबीजादिका चैषा हृदयं तु महेश्वरी ॥ ऐंश्रींह्रीं च नमोंते च भगवतिपदं ततः ॥ ९ ॥ माहेश्वरिपदं चान्नपूर्णे स्वाहेति पातु मे ॥ नाभिमेकोनविंशार्णा पायान्माहेश्वरी सदा ॥ १० ॥ तारं मायारमाकामः षोड शार्णा ततः परम् ॥ शिरःस्था सर्वदा पातु विंशत्यर्णात्मिका परा ॥ ११ ॥ अन्नपूर्णा महाविद्या ह्रीं पातु भुवनेश्वरी ॥ शिरः श्रीं ह्रीं तथा क्रीं च त्रिपुटा पातु मे गुदम् ॥ १२ ॥ षड्दीर्घभाजा बीजेन षडंगानि पुनंतु माम् ॥ इंद्रो मां पातु पूर्वे च वह्निकोणे नलोवतु ॥१३॥यमो मां दक्षिणे पातु नैर्ऋत्यां निर्ऋतिश्च माम् ॥ पश्चिमे वरुणः पातु वायव्यां पवनोऽवतु ॥१४॥ कुबेरश्चोत्तरे पातु ऐशान्यां शंकरोऽवतु ॥ ऊर्द्धाधः पातु सततं ब्रह्मानंतो यथाक्रमात् ॥ १५ ॥ वज्राद्याश्चायुधाः पांतु दशदिक्षु यथाक्रमात् ॥ इति ते कथितं पुण्यं त्रैलोक्यरक्षणं परम् ॥ १६ ॥ यद्धृत्वा पठनादेवाः सर्वैश्वर्यमवाप्नुयुः ॥ ब्रह्मा विष्णुश्च रुद्रश्च धारणात्पठनाद्यतः ॥ १७ ॥ सृजत्यवति हंत्येव कल्पेकल्पे पृथक्पृथक् ॥ पुष्पांजल्यष्टकं देव्यै मूलेनैव पठेत्ततः ॥ १८ ॥ युगायुतकृतायास्तु पूजा यां फलमाप्नुयात् ॥ वाणी वक्त्रे वसेत्तस्य सत्यंसत्यं न संशयः ॥ १९ ॥ अष्टोत्तरशतं चास्य पुरश्चर्याविधिः स्मृतः ॥ भूर्जे विलिख्य गुटिकां स्वर्णस्थां धारयेद्यदि ॥ २० ॥ कंठे वा दक्षिणे बाहौ सोपि पुण्यवतां वरः ॥ ब्रह्मास्त्रादीनि शस्त्राणि सद्यस्त्रं प्राप्य पार्वति ॥ माल्यानि कुसुमान्येव सुखदानि भवंति हि ॥ २१ ॥ इति भैरवतंत्रेऽन्नपूर्णाकवचं समाप्तम् ॥ ॥ अथान्नपू

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

र्णास्तोत्रम् ॥ ॐ नमः कल्याणदे देवि नमः शंकरवल्लभे ॥ नमो भुक्तिप्रदे देवि अन्नपूर्णे नमोस्तु ते ॥ १ ॥ नमो मायागृहीतांङ्घि नमः शंकरवल्लभे ॥ माहेश्वरि नमस्तुभ्यमन्नपूर्णे नमोस्तु ते ॥ २ ॥ अन्नपूर्णे हव्यवाहपत्नीरूपे हरप्रिये ॥ कलाकाष्ठास्वरूपे च अन्नपू० ॥ ३ ॥ उद्यद्भानुसहस्राभे नयनत्रयभूषिते चन्द्रचूडे महादेवि अन्नपूर्णे० ॥ ४ ॥ विचित्रवसने देवि अन्नदानरतेनघे ॥ शिवनृत्यकृतामोदे अन्नपू० ॥ ५ ॥ षट्कोणपद्ममध्यस्थे षडंगयुवतीमये ॥ ब्रह्मण्यादिस्वरूपे च अन्नपू० ॥ ६ ॥ देवि चन्द्रकृता पीठे सर्वसाम्राज्यदायिनि ॥ सर्वानंदकरे देवि अन्नपू० ॥ ७ ॥ साधकाभीष्टदे देवि भवदुःखविनाशिनि ॥ कुचभारनते देवि अन्न पू० ॥ ८ ॥ इंद्राद्यर्चितपादाब्जे रुद्रादिरूपधारिणि ॥ सर्वसंपत्प्रदे देवि अन्नपू० ॥ ९ ॥ पूजाकाले पठेद्यस्तु स्तोत्रमेतत्समा हितः ॥ तस्य गेहे स्थिरा लक्ष्मीर्जायते नात्र संशयः ॥ १० ॥ प्रातःकाले पठेद्यस्तु मंत्रजापपुरःसरम् ॥ तस्यैवान्नसमृद्धिः स्याद्वर्द्धमाना दिनेदिने ॥ ११ ॥ यस्मै कस्मै न दातव्यं न प्रकाश्यं कदाचन ॥ प्रकाशात्सिद्धिहानिः स्यात्तस्माद्यत्नेन गोपयेत् ॥ इत्यन्नपूर्णास्तोत्रं समाप्तम् ॥

॥ अथ गंगामंत्रपुरश्चरणप्रयोगः ॥ (मंत्रमहोदधौ ।) मंत्रो यथा—"ॐ नमः शिवायै नारा यण्यै दशहरायै गंगायै स्वाहा" इति विंशतिवर्णात्मको मंत्रः । अस्य श्रीगंगामंत्रस्य वेदव्यास ऋषिः । कृतिश्छंदः । गंगा देवता । ममाभीष्टसिद्धयर्थं जपे विनियोगः । ॐ वेदव्यासऋषये नमः शिरसि ॥ १ ॥ ॐ कृतिच्छंदसे नमो मुखे ॥ २॥ ॐ गंगादेवतायै नमः हृदये ॥३॥ इति ऋष्यादिन्यासः ॥ ॐ नमः अंगुष्ठाभ्यां नमः ॥१॥ ॐ शिवायै तर्जनीभ्यां नमः ॥२॥ ॐ नारायण्यै मध्य माभ्यां नमः ॥ ३ ॥ ॐ दशहरायै अनामिकाभ्यां नमः ॥४॥ ॐ गंगायै कनिष्ठिकाभ्यां नमः ॥५॥ ॐ स्वाहा करतलकर पृष्ठाभ्यां

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नमः ॥ ६ ॥ इति करन्यासः ॥ एवमेव हृदयादिषडंगन्यासं कृत्वा ध्यायेत् । "उत्फुल्लामलपुंडरीकरुचिरा कृष्णेशविंध्यात्मिका कुंभेष्टाभयतोयजानि दधती श्वेतांबरालंकृता ॥ हृष्टास्या शशिशेखराखिलनदीशोणादिभिः सेविता ध्येया पापविनाशिनी मकरगा भागीरथी साधकैः ॥ १ ॥ इति ध्यात्वा मानसोचारैः संपूज्य पीठपूजां कुर्यात् ॥ ॐ मंडूकादिपरतत्त्वांतदेवताभ्यो नमः इति पूर्ववत् पीठदेवताः संपूज्य । पूर्वादिषु ॐ जयायै नमः ॥ १ ॥ ॐ विजयायै नमः ॥ २ ॥ ॐ अजितायै० ॥ ३ ॥ ॐ अपराजितायै० ॥ ४ ॥ ॐ नित्यायै० ॥ ५ ॥ ॐ विलासिन्यै० ॥ ६ ॥ ॐ दोग्ध्र्यै नमः ॥ ७ ॥ ॐ अघोरायै० ॥ ८ ॥ (मध्ये) ॐ मंगलायै नमः ॥ ९ ॥ इति पीठशक्तीः पूजयेत् ॥ ततो मूलेन मूर्तिं प्रकल्प्य । आवाहनादिपुष्पांतैरुपचारैर्गंगां संपूज्य । आवरणपूजां कुर्यात् ॥ षट्कोणे आग्नेयादिकेसरेषु । ॐ नमः हृदयाय नमः ॥ १ ॥ ॐ शिवायै शिरसे स्वाहा ॥ २ ॥ ॐ नारायण्यै शिखायै वषट् ॥ ३ ॥ ॐ दशहरायै कवचायहुं ॥ ४ ॥ ॐ गंगायै नेत्रत्रयाय वौषट् ॥ ५ ॥ ॐ स्वाहा अस्त्राय फट् ॥ ६ ॥ इति षडंगानि पूजयेत् ॥ तद्बहिरष्टदलेषु प्राचीक्रमेण । ॐ रुद्राय नमः ॥ १ ॥ ॐ हरये नमः ॥ २ ॥ ॐ विधये नमः ॥ ३ ॥ ॐ सूर्य्याय नमः ॥ ४ ॥ ॐ हिमाचलाय नमः ॥ ५ ॥ ॐ मेनायै नमः ॥ ६ ॥ ॐ भगीरथाय नमः ॥ ७ ॥ ॐ अपां पतये नमः ॥ ८ ॥ इति पूजयेत् ॥ ततो दलाग्रेषु । ॐ मीनाय नमः ॥ १ ॥ ॐ कूर्माय नमः ॥ २ ॥ ॐ मंडूकाय नमः ॥ ३ ॥ ॐ मकराय नमः ॥ ४ ॥ ॐ हंसेभ्यो नमः ॥ ५ ॥ ॐ कारंडवेभ्यो नमः ॥ ६ ॥ वकेभ्यो नमः ॥ ७ ॥ ॐ सारसेकेभ्यो नमः ॥ ८ ॥" इति पूजयेत् ॥ तद्बाह्ये चतुरस्रे भूपुरे पूर्वादिदशदिक्षु इंद्रादिदशदिक्पालान् तद्बहिर्वज्राद्यायुधानि च पूजयेत् ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

एवमावरणपूजां कृत्वा धूपदीपादिनमस्कारांतैरुपचारैः संपूज्य स्तवेन स्तुत्वा जपं कुर्यात् । अस्य पुरश्चरणं लक्षजपः । तथा च । लक्षं जपेद्दशांशेन जुहुयात्सघृतैस्तिलैः ॥ एवं संसाधितो मंत्रोऽभीष्टं यच्छति मंत्रिणाम् ॥ १ ॥ ज्येष्ठशुक्लदशम्यां तां विशेषेण भजेद्बुधः॥ दद्याद्दशभ्यो विप्रेभ्यो दशप्रस्थमितांस्तिलान् ॥ २ ॥ जप्त्वा सहस्रं हुत्वा चोपोष्य तत्र विकल्मषः ॥ सर्वभोगसमायुक्तो जायते मानवो भुवि ॥ ३ ॥ इति विंशतिवर्णात्मकश्रीगंगामंत्रप्रयोगः ॥ अथ दशहरागंगास्तोत्रम् ॥ (स्कांदे काशीखंडे च) तत्रादौ स्नानार्चनविधिं विधाय पश्चाज्जलांतरे स्थित्वा । देशकालौ संकीर्त्य मम दशविधपापप्रणाशनार्थं श्रीभगवतीगंगाप्रीत्यर्थं च ज्येष्ठे मासि सिते पक्षे प्रतिपदमारभ्य दशमीपर्यंतं प्रतिदिनमुत्तरोत्तरवृद्ध्या दशहरास्तोत्रजपमहं करिष्ये । इति संकल्प्य पठेत् । ब्रह्मोवाच ॥ नमः शिवायै गंगायै शिवदायै नमोनमः ॥ नमस्ते विष्णुरूपिण्यै ब्रह्ममूर्त्यै नमो

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नमः ॥ १ ॥ नमस्ते रुद्ररूपिण्यै शांकर्य्यै ते नमोनमः ॥ सर्वदेवस्वरूपिण्यै नमो भेषजमूर्तये ॥ २ ॥ सर्वस्य सर्वव्याधीनां भिष
क्श्रेष्ठयै नमोनमः ॥ स्थाणुजंगमसंभूते विषहंत्र्यै नमोनमः ॥ ३ ॥ भोगोपभोगदायिन्यै भोगवत्यै नमोनमः ॥ मंदाकिन्यै नमस्तेऽ
स्तु स्वर्गदायै नमोनमः ॥ ४ ॥ नमस्त्रैलोक्यभूषायै जगद्धात्र्यै नमोनमः ॥ नमस्त्रिशुक्लसंस्थायै तेजोवत्यै नमोनमः ॥ ५ ॥ नंदा
यै लिंगधारिण्यै नारायण्यै नमोनमः ॥ नमस्ते विश्वमुख्यायै रेवत्यै ते नमोनमः ॥ ६ ॥ बृहत्यै ते नमस्तुभ्यं लोकधात्र्यै नमो
नमः ॥ नमस्ते विश्वमित्रायै नंदिन्यै ते नमोनमः ॥ ७ ॥ पृथ्व्यै शिवामृतायै च सुवृषायै नमोनमः ॥ शांतायै च वशिष्ठायै वरदायै
नमोनमः ॥ ८ ॥ उस्रायै सुखदोग्ध्र्यै च संजीविन्यै नमोनमः ॥ ब्रह्मिष्ठायै ब्रह्मदायै दुरितघ्न्यै नमोनमः ॥ ९ ॥ प्रणतार्तिप्रभं
जिन्यै जगन्मात्रे नमोस्तु ते ॥ सर्वापत्प्रतिपक्षायै मंगलायै नमोनमः ॥ १० ॥ शरणागतदीनार्तपरित्राणपरायणे ॥ सर्वस्यार्तिहरे
देवि नारायणि नमोस्तु ते ॥ ११ ॥ निर्लेपायै दुर्गहंत्र्यै दक्षायै ते नमोनमः ॥ परात्परतरे तुभ्यं नमस्ते मोक्षदे सदा ॥ १२ ॥ गंगे
ममाग्रतो भूया गंगे मे देवि पृष्ठतः ॥ गंगे मे पार्श्वयोरेहि त्वयि गंगेस्तु मे स्थितिः ॥ १३ ॥ आदौ त्वमंते मध्ये च सर्वं त्वं गां
गते शिवे ॥ त्वमेव मलप्रकृतिस्त्वं हि नारायणः परः ॥ १४ ॥ गंगे त्वं परमात्मा च शिवस्तुभ्यं नमः शिवे ॥ य इदं पठति
स्तोत्रं भक्त्या नित्यं नरोपि यः ॥ १५ ॥ शृणुयाच्छ्रद्धया युक्तः कायवाक्चित्तसंभवैः ॥ दशधा संस्थितैर्दोषैः सर्वैरेव प्रमुच्यते
॥ १६ ॥ सर्वान्कामानवाप्नोति प्रेत्य ब्रह्मणि लीयते ॥ ज्येष्ठमासि सिते पक्षे दशमी हस्तसंयुता ॥ १७ ॥ तस्यां दशम्यामेतच्च
स्तोत्रं गंगाजले स्थितः ॥ यः पठेद्दशकृत्वस्तु दरिद्रो वापि चाक्षमः ॥ सोपि तत्फलमाप्नोति गंगां संपूज्य यत्नतः ॥ १८ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अदत्तानामुपादानं हिंसा चैवाविधानतः ॥ परदारोपसेवा च कायिकं त्रिविधं स्मृतम् ॥ १९ ॥ पारुष्यमनृतं चैव पैशून्यं चापि सर्वशः ॥ असंबद्धप्रलापश्च वाङ्मयं स्याच्चतुर्विधम् ॥२०॥ परद्रव्येष्वभिध्यानं मनसानिष्टचिंतनम् ॥ वितथाभिनिवेशश्च मानसं त्रिविधं स्मृतम् ॥२१॥ एतानि दश पापानि हर त्वं मम जाह्नवि ॥ दशपापहरा यस्मात्तस्माद्दशहरा स्मृता २२ त्रयस्त्रिंशच्छतं पूर्वान्पितॄनथ पिता महान् ॥ उद्धरत्येव संसारान्मंत्रेणानेन पूजिता ॥२३॥ ॐ नमो भगवत्यै दशपापहरायै गंगायै नारायण्यै रेवत्यै शिवायै दक्षायै अमृतायै विश्वरूपिण्यै नंदिन्यै ते नमोनमः ॥२४॥ सितमकरनिषण्णां शुभ्रवर्णां त्रिनेत्रां कलधृतकलशोद्यत्सोत्फलामत्यभीष्टाम् ॥ विधि हरिहररूपां सेन्दुकोकीरजुष्टां कलितासितदुकूलां जाह्नवीं तां नमामि ॥ २५ ॥ आदावादिपितामहस्य निगमव्यापारपात्रे जलं पश्चात्पन्नगशायिनो भगवतः पादोदकं पावनम् ॥ भूयः शंभुजटाविभूषणमणिर्जह्नोर्महर्षेरियं कन्या कल्मषनाशिनी भगवती भागीरथी दृश्यते ॥ २६ ॥ गंगागंगेति यो ब्रूयाद्योजनानां शतैरपि ॥ मुच्यते सर्वपापेभ्यो विष्णुलोकं स गच्छति ॥ २७ ॥ इति गंगा स्तोत्रं समाप्तम् ॥ अथ शीतलामंत्रप्रयोगः (मंत्रमहोदधौ) मंत्रो यथा । "ॐ ह्रीं श्रीं शीतलायै नमः " इति नवाक्षरो मंत्रः ॥ अस्य मंत्रस्य उपमन्युर्ऋषिः । बृहती छंदः । शीतला देवता । ममाभीष्टसिद्ध्यर्थे जपे विनियोगः ॥ ॐ उपमन्युऋषये नमः शिरसि ॥१॥ ॐ बृहतीछंदसे नमः मुखे ॥ २ ॥ ॐ शीतलादेवतायै नमः हृदि ॥ ३ ॥ इति ऋष्यादिन्यासः ॥ ह्रां श्रां अंगुष्ठाभ्यां नमः ॥ १ ॥ ह्रीं श्रीं तर्जनीभ्यां नमः ॥ २ ॥ ह्रूं श्रूं मध्यमाभ्यां नमः ॥ ३ ॥ ह्रैं श्रैं अनामिकाभ्यां नमः ॥ ४ ॥ ह्रौं श्रौं कनिष्ठिकाभ्यां नमः ॥ ५ ॥ ह्रः श्रः करतलकरपृष्ठाभ्यां नमः ॥ ६ ॥ इति करन्यासः ॥ ६ ॥ एवं हृदयादिन्यासं कृत्वा ध्यायेत्

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

" दिग्वाससं मार्जनिकां च शूर्पं करद्वये संदधतीं घनाभाम् ॥ श्रीशीतलां सर्वरुजार्तिनष्टौ रक्तांगरागस्रजमर्चयामि ॥ ॥ १ ॥ एवं ध्यात्वा मानसोपचारैः संपूज्य अथवा स्वपुरतः प्रतिमायां भगवतीं शीतलां शीतजलेन पाद्यादिषोडशोपचारैः संपूज्य स्तवेन स्तुत्वा जपं कुर्यात् । अस्य पुरश्चरणमयुतजपः । तथा च–अयुतं प्रजपेन्मंत्रं पायसेन सहस्रकम् ॥ जुहुयात्पूर्ववत्पीठे स्फोटानां नाशिनी त्वियम् ॥ १ ॥ नाभिमात्रे जले स्थित्वा यः सहस्रं जपेन्मनुम् ॥ तेन संमार्जितास्तीव्राः स्फोटा नश्यंति तत्क्षणात् ॥ २ ॥ इति शीतलामंत्रप्रयोगः ॥ ॥ अथ शीतलास्तोत्रम् ॥ ॐ अस्य श्रीशीतलास्तोत्रस्य महादेव ऋषिः । अनुष्टुप् छंदः । शीतला देवता । लक्ष्मीर्बीजम् । भवानी शक्तिः । सर्वविस्फोटकनिवृत्तये जपे विनियोगः ॥ ईश्वर उवाच ॥ वंदेहं शीतलां देवीं रासभस्थां दिगंबराम् ॥ मार्जनीकलशोपेतां शूर्पालंकृतमस्तकाम् ॥ १ वंदेहं शीतलां देवीं सर्वरोगभयापहाम् ॥ यामासाद्य निवर्तेत विस्फोटकभयं महत् ॥ २ ॥ शीतले शीतले चेति यो ब्रूयाद्दाहपीडितः ॥ विस्फोटकभयं घोरं क्षिप्रं तस्य प्रणश्यति ॥ ३ ॥ यस्त्वामुदकमध्ये तु धृत्वा पूजयते नरः ॥ विस्फोटकभयं घोरं गृहे तस्य न जायते ॥ ४ ॥ शीतले ज्वरदग्धस्य पूतिगंधयुतस्य च ॥ प्रनष्टचक्षुषः पुंसस्त्वामाहुर्जीवनौषधम् ॥ ५ ॥ शीतले तनुजान्रोगान्नृणां हरसि दुस्त्यजान् ॥ विस्फोटकविजीर्णानां त्वमेकामृतवर्षिणी ॥ ६ ॥ गलगंडग्रहा रोगा ये चान्ये दारुणा नृणाम् ॥ त्वदनुध्यानमात्रेण शीतले यांति संक्षयम् ॥ ७ ॥ न मंत्रो नौषधं तस्य पापरोगस्य विद्यते ॥ त्वामेकां शीतले धात्रीं नान्यां पश्यामि देवताम् ॥ ८ ॥ मृणालतंतुसदृशीं नाभिहृन्मध्यसंस्थिताम् ॥ यस्त्वां संचिंतयेद्देवि तस्य मृत्युर्न जायते ॥ ९ ॥ अष्टकं शीतलादेव्य

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यो नरः प्रपठेत्सदा ॥ विस्फोटभयं घोरं गृहे तस्य न जायते॥१०॥श्रोतव्यं पठितव्यं च श्रद्धाभक्तिसमन्वितैः ॥ उपसर्गविनाशा
य परं स्वस्त्ययनं महत् ॥ ११ ॥ शीतले त्वं जगन्माता शीतले त्वं जगत्पिता ॥ शीतले त्वं जगद्धात्री शीतलायै नमोनमः
॥ १२ ॥ रासभो गर्दभश्चैव खरो वैशाखनंदनः ॥ शीतलावाहनश्चैव दूर्वाकंदनिकृंतनः ॥ १३ ॥ एतानि खरनामानि शीतलाग्रे तु
यः पठेत् ॥ तस्य गेहे शिशूनां च शीतलारुङ् न जायते ॥ शीतलाष्टकमेवेदं न देयं यस्य कस्यचित्॥१४॥दातव्यं च सदा तस्मै
श्रद्धाभक्तियुताय वै ॥१५॥ इति श्रीस्कंदपुराणे शीतलास्तोत्रं संपूर्णम् ॥ श्रीशीतलाभगवत्यै नमः ॥ ॥ अथ पृथ्वीमंत्रपुर
श्चरणप्रयोगः ॥ (शारदातिलके) मंत्रो यथा । " ॐ नमो भगवत्यै धरिण्यै धरणिधरे धरे स्वाहा " इत्येकोनविंशतिवर्णा
त्मको मंत्रः ॥ अस्य मंत्रस्य वराह ऋषि । निवृच्छंदः । पृथ्वी देवता । सर्वेष्टसिद्ध्यर्थे जपे विनियोगः । ॐ वराहऋषये नमः
शिरसि ॥ १ ॥ ॐ निवृच्छंदसे नमः मुखे ॥ २ ॥ ॐ पृथ्वी देवतायै नमः हृदये ॥ ३ ॥ ॐ बीजाय नमः गुह्ये ॥
॥ ४ ॥ ॐ स्वाहाशक्तये नमः पादयोः ॥ ५ ॥ इति ऋष्यादिन्यासः ॥ ॐ नमः हृदयाय नमः ॥ १ ॥ ॐ भगवत्यै
शिरसे स्वाहा ॥ २ ॥ ॐ धरिण्यै शिखायै वषट् ॥ ३ ॥ ॐ धरणिधरे कवचाय हुं ॥ ४ ॥ ॐ धरे नेत्रत्रयाय वौषट् ॥ ५ ॥ ॐ
स्वाहा अस्त्राय फट् ॥ ६ ॥ एवं षडंगन्यासं कृत्वा ध्यायेत् ॥ " श्यामां विचित्रांशुकरत्नभूषणां पद्मासनां तुंगपयोधरानताम् ॥
इंदीवरे द्वे नवशालिमंजरीं शुकं दधानां वसुधां यजामहे ॥ १ ॥" इति ध्यात्वा पूर्वोक्ते विष्णोः पीठे भगवतीं पृथ्वीं पुष्पादिरुप
चारैः संपूज्य आवरणापूजां कुर्य्यात् तद्यथा—षट्कोणे आग्नेयादिकोणकेसरेषु मध्ये दिक्षु च पूर्ववत् षडंगानि पूजयेत् ॥ तद्वहि

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

रष्टदले प्राचीक्रमेण चतुर्दिग्दलेषु ॐ भूम्यै नमः ॥ १ ॥ ॐ अग्नये नमः ॥ २ ॥ ॐ अद्भ्यो नमः ॥ ३ ॥ वायवे नमः ॥ ४ ॥ इति पूजयेत् ॥ तत आग्नेयादिकोणदलेषु तत्तत्कलां यजेत् तद्यथा–ॐ निवृत्त्यै नमः ॥ १ ॥ प्रतिष्ठायै नमः ॥ २ ॥ विद्यायै नमः ॥ ३ ॥ शांत्यै नमः ॥ ४ ॥ शांत्यतीतायै नमः ॥ ५ ॥ इति भूम्यादिकलां पूजयेत् ॥ तद्बाह्ये भूपुरे पूर्वादिक्रमेण इन्द्रादिदशदिक्पालान् तद्बाह्ये वज्राद्यायुधानि च पूजयेत् ॥ इत्यावरणपूजां कृत्वा धूपादिनीराजनांतं संपूज्य जपं कुर्यात् ॥ अस्य पुरश्चरणं लक्षजपः ॥ तथा च– "लक्षमेनं जपेन्मंत्री धराहृदयमादरात् ॥ ससर्पिषा पायसेन जुहुयात्तद्दशांशतः ॥ १ ॥ एवं सिद्धे मनौ मंत्री साधयेत्स्वमनोरथान् ॥ मधुत्रितयसंयुक्तैर्जुहुयादरुणोत्पलैः ॥ २ ॥ सहस्रं भूसमृद्धिः स्यात्तथा नीलोत्पलै र्भवेत् ॥ प्रियंगुपुष्पैर्मध्वक्तैर्धनधान्यमहाश्रियः ॥ ३ ॥ मंजरीशालिसंभूतां मधुरत्रयलोलिताम् ॥ जुहुयात्साधिते वह्नौमंडला त्स्याद्धरापतिः ॥ ४ ॥ शुक्रवारे दिनमुखे गृहीत्वा साध्यभूमृदम् ॥ तामंभसि विनिःक्षिप्य शोधितेत्र चरुं पचेत् ॥ ५ ॥ पयोघृ ताभ्यां सहितं जुहुयात्तं हुताशने ॥ षण्मासं शुक्रवारेषु हुत्वैवं प्राप्नुयाद्धराम् ॥ ६ ॥ धरामेवं जपेन्मंत्री पशुरत्नधरा दिभिः ॥ धराया वल्लभः स स्यान्नात्र कार्या विचारणा ॥ ७ ॥ इति पृथ्वीमंत्रपुरश्चरणं समाप्तम् ॥ ॥ अथपृथ्वीस्तो त्रम् ॥ देवीभागते । श्रीनारायण उवाच । जयेजये जलाधारे जलशीले जयप्रदे ॥ यज्ञसूकरजाये च जयं देहि जयावहे ॥ १ ॥ मंगले मंगलाधारे मांगल्ये मंगलप्रदे ॥ मंगलार्थं मंगलेशे मंगलं देहि मे भवे ॥ २ ॥ सर्वाधारे च सर्वज्ञे सर्वशक्ति समन्विते ॥ सर्वकामप्रदे देवि सर्वेष्टं देहि मे भवे ॥ ३ ॥ पुण्यस्वरूपे पुण्यानां बीजरूपे सनातनि ॥ पुण्याश्रये पुण्यवतामालये

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पुण्यदे भवे ॥ ४ ॥ सर्वसस्यालये सर्वसस्याढ्ये सर्वसस्यदे ॥ सर्वसस्यहरे काले सर्वसस्यात्मिके भवे ॥ ५ ॥ भूमे भूमिपसर्वस्वे भूमिपालपरायणे ॥ भूमिपानां सुखकरे भूमिं देहि च भूमिदे ॥ ६ ॥ इदं स्तोत्रं महापुण्यं प्रातरुत्थाय यः पठेत् ॥ कोटिजन्मसु स भवेद्बलवान्भूमिपेश्वरः ॥ ७ ॥ भूमिदानकृतं पुण्यं लभ्यते पठनाज्जनैः ॥ भूमिदानहरात्पापान्मुच्यते नात्र संशयः ॥ ८ ॥ अंबू वाचीभूकरणपापात्समुच्यतेध्रुवम् ॥ अन्यकूपे कूपखननपापात्स मुच्यते ध्रुवम् ॥ ९ ॥ परभूमिहरात्पापान्मुच्यते नात्र संशयः ॥ भूमौ वीर्यत्यागपापाद्भूमौ दीपादिस्थापनात् ॥ १० ॥ पापेन मुच्यते सोपि स्तोत्रस्य पठनान्मुने ॥ अश्वमेधशतं पुण्यं लभते नात्र संशयः ॥ ११ ॥ भूमिदेव्या महास्तोत्रं सर्वकल्याणकारकम् ॥ इति भूमिस्तोत्रम् ॥ अथ भूमौ शंखादिस्थापने दोषाः । देवीभागवते । स्कं० ९ अ० ९ श्लो० ३९ वसुधोवाच । मुक्तां शुक्तिं हरेरर्चां शिवलिंगं शिवां तथा ॥ शंखं प्रदीपं यंत्रं च मा णिक्यं हीरकं तथा ॥ १ ॥ यज्ञसूत्रं च पुष्पं च पुस्तकं तुलसीदलम् ॥ जपमालां पुष्पमालां कर्पूरं च सुवर्णकम् ॥ २ ॥ गो रोचनं चंदनं च शालग्रामजलं तथा ॥ एतान् वोढुमशक्ताहं क्लिष्टा च भगवञ्छृणु ॥ ३ ॥ श्रीभगवानुवाच ॥ द्रव्याण्येतानि ये मूढा अर्पयिष्यंति सुंदरि ॥ यास्यंति कालसूत्रं ते दिव्यं वर्षशतं त्वयि ॥ ४ ॥ (तत्रैव अ० १० श्लो० १३) कामी भूमौ च रहसि वीर्यत्यागं करोति यः । भूमिरेणुप्रमाणं च वर्षं तिष्ठति रौरवे ॥ १ ॥ भूमौ दीपं योर्पयति सचांधः सप्तजन्मसु ॥ भूमौ शंखं च संस्थाप्य कुष्ठं जन्मांतरे लभेत् ॥ २ ॥ मुक्तं माणिक्यहीरे। च सुवर्णं च मणिं तथा ॥ पंच संस्थापयेद्भूमौ स चांधः सप्तजन्मसु ॥ ३ ॥ शिवलिंगं शिवामर्चां यश्चार्पयति भूतले ॥ शतमन्वंतरं यावत् कृमिभक्षः स तिष्ठति ॥ ४ ॥ शंखं यंत्रं शिलातोयं पुष्पं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

च तुलसीदलम् ॥ यश्चार्पयति भूमौ च स तिष्ठेन्नरके ध्रुवम् ॥ ५ ॥ जपमालां पुष्पमालां कर्पूरं रोचनं तथा ॥
यो मूढश्चार्पयेद्भूमौ स याति नरकं ध्रुवम् ॥ ६ ॥ भूमौ चंदनकाष्ठं च रुद्राक्षं कुशमूलकम् ॥ संस्थाप्य भूमौ नरके
वसेन्मन्वंतरावधि ॥ ७ ॥ पुस्तकं यज्ञसूत्रं च भूमौ संस्थापयेन्नरः ॥ न भवेद्विप्रयोनौ च तस्य जन्मान्तरे जनिः ॥ ८ ॥
अथ गायत्रीपुरश्चरणप्रयोगः ॥ अथो वक्ष्यामि गायत्रीं तत्त्वरूपां त्रयीमयीम् ॥ यया प्रकाश्यते ब्रह्म सच्चिदानंदलक्षणम् ॥ १ ॥
तत्र चन्द्रतारादिबलान्विते पूर्वोक्ते सुमुहूर्ते शिवालयादिपवित्रस्थले जपस्थानं प्रकल्प्य गोमयोपलेपनादिभिः संशोध्य तत्रासन
भूमौ कूर्मशोधनं दीपस्थानशोधनं च कृत्वा अनुष्ठानारंभं कुर्यात् ॥ तद्यथा—कर्ता प्रारंभात्पूर्वदिने ब्राह्मे मुहूर्ते चोत्थाय
नद्यादौ स्नात्वा प्रातः संध्यादिनित्यकर्म समाप्य आचार्यमाहूय संपूज्य तदनुज्ञया स्वासने प्राङ्मुख उपविश्य सपवित्रकरः
आचम्य प्राणानायम्य सामान्यतो गणपत्यादिस्मरणं कृत्वा देहशुद्धचर्थं प्रायश्चित्तं कुर्यात् ॥ देशकालौ संकीर्त्य करिष्यमाणगा
यत्रीपुरश्चरणेऽधिकारसिद्धचर्थं कृच्छ्रत्रयममुकप्रत्याम्नायेनाहमाचरिष्ये इति संकल्प्य धेनुदानतिलहोमसुवर्णादिप्रत्याम्नायद्वारा
कृच्छ्राणि संपाद्य कृतांजलिः अमुकशर्मणो मम गायत्रीपुरश्चरणे अनेन कृच्छ्रत्रयानुष्ठानेनाधिकारसिद्धिरस्त्विति विप्रान् वदेत्
विप्रा अधिकारसिद्धिरस्त्विति ब्रूयुः । पुनर्देशकालौ संकीर्त्य करिष्यमाणपुरश्चरणांगत्वेन मंत्रसिद्धचर्थं गायत्र्या अयुतजपं करिष्ये
इति संकल्प्य स्वयं विप्रद्वारा वा कुर्यात् एवं सप्रणवव्याहृतिगायत्र्ययुतं जप्त्वा तर्पणं कुर्यात् तद्यथा ॐ तत्सवितुरित्यस्याऽऽचार्य
ऋषिं विश्वामित्रं तर्पयामि ॥ १ ॥ ॐ गायत्रीछंदसं तर्पयामि ॥ २ ॥ ॐ सवितारं देवं तर्पयामि ॥ ३ ॥ इति तर्पणं कृत्वा रुद्रं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नमस्कृत्य कद्रुदायेत्यादीनि रुद्रसूक्तानि सकृज्जपेत् ॥ इति पूर्वदिनकृत्यम् ॥ ततो जपप्रारंभदिने सुमुहूर्ते सपत्नीको यजमानः सुगंधतैलाभ्यङ्गपूर्वकमुष्णोदकेन मंगलस्नानं कृत्वा शुक्लधौतवासांसि परिधाय यथायोग्यालंकृतो धृतकुंकुमादित्रिपुंड्रतिलकः सपवित्रोपग्रहः स्वासने प्राङ्मुख उपविश्य आचम्य प्राणानायम्य देशकालौ संकीर्त्य मम इह जन्मनि जन्मांतरेषु च कृतकायिकवाचिकमानसिकसांसर्गिकसमस्तपापक्षयार्थं पुत्रपौत्रधनधान्याभिवृद्ध्यर्थं चतुर्विधपुरुषार्थसिद्ध्यर्थं श्रीपरमेश्वरप्रीत्यर्थं सप्रणवव्याहृतिपूर्वकचतुर्विंशतिलक्षजपात्मकगायत्रीपुरश्चरणं (स्वयं) विप्रद्वारा वा करिष्ये तदंगत्वेन गणेशपूजनं स्वस्तिपुण्याहवाचनं मातृकापूजनं नांदीश्राद्धमाचार्यजपकर्तृवरणं च करिष्ये, इति संकल्प्य गणेशपूजनादिनांदीश्राद्धांतं पूर्ववत् कृत्वा नांदीश्राद्धांते सविता प्रीयतामिति पठित्वा आचार्यजपकर्तृवरणं कुर्यात्।तद्यथा–आचार्यं जपकर्तृंश्चोदङ्मुखानासनेषूपवेश्य स्वयंप्राङ्मुख उपविश्य सर्वेषां पादप्रक्षालनं कृत्वा दक्षिणहस्ते वरणद्रव्याणि गृहीत्वा देशकालौ संकीर्त्य मम सकलपापक्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थं करिष्यमाणगायत्रीजपपुरश्चरणकर्मणि अमुकगोत्रोत्पन्नममुकवेदशाखाध्यायिनममुकशर्माणं ब्राह्मणमेभिर्गंधाक्षततांबूलस्वर्णांगुलीयकासनमालाकमंडलुयुग्मवासोभिर्जपकरणार्थमाचार्यत्वेन त्वामहं वृणे इत्याचार्यं वृत्वा ॐ वृतोस्मीति प्रतिवचनानंतरं हस्ते यज्ञकंकणं बद्ध्वा गंधपुष्पादिभिः पूजां कुर्यात्। ततो जापकवरणं देशकालौ संकीर्त्य मम सकलपापक्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थं करिष्यमाणगायत्रीपुरश्चरणकर्मणि नानागोत्रोऽत्पन्नानमुकाऽमुकशर्मणो विप्रानेभिर्गंधाक्षततांबूलस्वर्णांगुलीयकासनमालाकमंडलुवासोभिर्विहितजपकरणार्थं जापकत्वेन युष्मानहं वृणे । ॐ वृताः स्म इति प्रतिवचनानंतरं पृथक्पृथक् हस्ते यज्ञ

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ककणं बद्धा गंधादिभिः संपूज्य प्रार्थयेत् । ॐ अस्य यागस्य निष्पत्तौ भवंतोऽभ्यर्थिता मया॥सुप्रसन्नैः प्रकर्त्तव्यो मद्यज्ञो विधि पूर्वकम् ॥ १ ॥ अंगीकुर्वंतु कर्मैतत्कल्पद्रुमसमाशिषः ॥ यथोक्तनियमैर्युक्ता जपार्थं स्थिरबुद्धयः ॥ २ ॥ अस्मिन्यज्ञे मया पूज्याः संतु मे नियमान्विताः ॥ अक्रोधनाः शौचपराः सततं ब्रह्मचारिणः ॥ ३ ॥ जपध्यानरता नित्यं प्रसन्नमनसः सदा ॥ अदुष्टभाषणाः संतु॥ मा संतु परनिंदकाः ॥ ४ ॥ नमापि नियमा ह्येते भवन्तु भवतामपि॥५॥ इति प्रार्थ्य मधुपर्कपूजां कृत्वा प्रत्येकं वस्त्रद्वयमासनमर्घ्यपात्रमाचमनपात्रं जलपात्रं सुवर्णांगुलीयकं मालां च दद्यात् ॥ (अत्र जापकास्त्वेकविंशतिः न्यूनाधिका वा कार्याः) ततः सर्वे जापका आचम्य प्राणानायम्य । " ॐ सूर्यः सोमो यमः कालः संध्ये भूतान्यहः क्षपा ॥ पवमानो दिक्पतिर्भूराकाशं खेचरामराः ॥ ब्रह्मशासनमास्थायकल्पध्वमिह सन्निधिम्" ति प्रार्थयेयुः ॥ ततो देशकालौ संकीर्त्य ममामुकशर्मणो यजमानस्य वा सकलपापक्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थम् (यजमानानुज्ञया) गायत्रीपुरश्चरणांतर्गतामुकसहस्रसंख्यापरिमितविहितगायत्रीजपं करिष्ये तदंगत्वेन भूतशुद्धिं प्राणप्रतिष्ठामंतर्मातृकाबहिर्मातृकान्यासं च करिष्ये । इति संकल्प्य । पूर्वोक्तपद्धतिकाण्डमार्गेण भूतशुद्ध्यादिबहिर्मातृकान्यासांतं कृत्वा गायत्रीन्यासं कुर्यात् । तद्यथा—ॐ प्रणवस्य ब्रह्मा ऋषिः । गायत्री छंदः । परमात्मा देवता । शरीरशुद्ध्यर्थं जपे विनियोगः ।ॐ ब्रह्मऋषये नमः शिरसि । ॐ गायत्रीछंदसे नमः मुखे ॥२॥ ॐ परमात्मदेवतायै नमः हृदये ॥३॥ इति प्रणवन्यासः । सप्तव्याहृतीनां जमदग्निभारद्वाजात्रिगौतमकश्यपविश्वामित्रवसिष्ठाः ऋषयः । गायत्र्युष्णिगनुष्टुब्बृहतीपङ्क्तित्रिष्टुब्जगत्यश्छंदांसि । अग्निवायुसूर्यबृहस्पतिवरुणेंद्रविश्वेदेवा देवताः । न्यासे जपे च विनियोगः ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ॐ जमदग्निभारद्वाजात्रिगौतमकश्यपविश्वामित्रवसिष्ठऋषिभ्यो नमः शिरसि॥१॥ ॐ गायत्र्युष्णिगनुष्टुब्बृहतीपङ्क्तित्रिष्टुब्जगतीछं दोभ्यो नमः मुखे ॥२॥ ॐ अग्निवायुसूर्यबृहस्पतिवरुणेंद्रविश्वेदेवदेवताभ्यो नमः हृदये ॥३॥ इति व्याहृतिऋष्यादिन्यासः । ॐ गायत्र्या विश्वामित्र ऋषिः । गायत्री छंदः । सविता देवता । न्यासे जपे च विनियोगः ॥ ॐ विश्वामित्रऋषये नमः शिरसि । ॐ गायत्री छंदसे नमो मुखे । ॐ सवितृदेवतायै नमः हृदये । इति गायत्र्या ऋष्यादिन्यासः । ॐ शिरसः प्रजापतिःऋषिः ब्रह्माग्निवायुसूर्या देवताः । यजुश्छंदः । प्राणायामे विनियोगः । ॐ प्रजापतिऋषये नमः शिरसि । ॐ यजुश्छंदसे नमः मुखे । ॐ ब्रह्माग्निवायुसूर्यदेवताभ्यो नमः हृदये । इति शिरस ऋष्यादिन्यासः ॥ ॐ भूः अंगुष्ठाभ्यां नमः ॥ १ ॥ ॐ भुवः तर्जनीभ्यां नमः ॥ २ ॥ ॐ स्वः मध्यमाभ्यां नमः ॥ ३ ॥ ॐ तत्सवितुर्वरेण्यम् अनामिकाभ्यां नमः ॥ ४ ॥ ॐ भर्गोदेवस्य धीमहि कनिष्ठिकाभ्यां नमः ॥ ५ ॥ ॐ धियो यो नः प्रचोदयात् करतलकरपृष्ठाभ्यां नमः ॥ ६ ॥ इति करन्यासः । एवमेव हृदयादिन्यासं कुर्यात् । ततः । ॐ भूः नमः हृदये ॥ १ ॥ ॐ भुवः नमो मुखे ॥ २ ॥ ॐ स्वः नमो दक्षांसे ॥ ३ ॥ ॐ महः नमो वामांसे॥४॥ ॐ जनः नमो दक्षिणोरौ ॥ ५ ॥ ॐ तपः नमो वामोरौ ॥ ६ ॥ ॐ सत्यं नमः जठरे ॥७॥ इति व्याहृतिन्यासः ॥ अथ गायत्री वर्णन्यासः । ॐ तत् नमः पादद्वयांगुलिमूलयोः ॥ १ ॥ ॐ सं नमः गुल्फयोः ॥ २ ॥ ॐ वि नमः जानुनोः ॥ ३ ॥ ॐ तुं नमः पादमूलयोः ॥ ४ ॥ ॐ वं नमः लिंगे ॥ ५ ॥ ॐ रें नमः नाभौ ॥ ६ ॥ ॐ णिं नमः हृदये ॥ ७ ॥ ॐ यं नमः कंठे ॥ ८ ॥ ॐ भं नमः हस्तद्वयांगुलीमूलयोः ॥ ९ ॥ ॐ गों नमः मणिबंधयोः ॥ १० ॥ ॐ दें नमः कूर्परयोः ॥ ११ ॥ ॐ वं नमः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

बाहुमूलयोः ॥ १२ ॥ ॐ स्यं नमः आस्ये ॥ १३ ॥ ॐ धीं नमः नासापुटयोः ॥ १४ ॥ ॐ मं नमः कपोलयोः ॥ १५ ॥
ॐ हिं नमः नेत्रयोः ॥ १६ ॥ ॐ धिं नमः कर्णयोः ॥ १७ ॥ ॐ यों नमः भ्रूमध्ये ॥ १८ ॥ ॐ यों नमः मस्तके ॥ १९ ॥
ॐ नं नमः पश्चिमवक्त्रे ॥ २० ॥ ॐ प्रं नमः उत्तरवक्त्रे ॥ २१ ॥ ॐ चों नमः दक्षिणवक्त्रे ॥ २२ ॥ ॐ दं नमः पूर्ववक्त्रे ॥ २३ ॥
ॐ यात् नमः ऊर्ध्ववक्त्रे ॥ २४ ॥ इति गायत्र्यक्षरन्यासः ॥ ॐ तत् नमः शिरसि ॥ १ ॥ ॐ सवितुर्नमः भ्रुवोर्मध्ये ॥ २ ॥
ॐ वरेण्यं नमः नेत्रयोः ॥ ३ ॥ ॐ भर्गो नमः मुखे ॥४॥ ॐ देवस्य नमः कंठे ॥५॥ ॐ धीमहि नमः हृदये ॥ ६॥ ॐ धियो नमः
नाभौ ॥७॥ ॐ यो नमः गुह्ये ॥८॥ ॐ नः नमः जानुनोः ॥९॥ ॐ प्रचोदयात् नमः पादयोः ॥१०॥ ॐ आपोज्योतीरसोमृतं ब्रह्मभूर्भुवः
स्वरोमिति शिरसि ॥११॥ इति पदन्यासः ॥ ततः ॐ तत्सवितुर्वरेण्यं नमः नाभ्यादिपादांगुलीपर्यंतम् ॥१॥ ॐ भर्गोदेवस्य धीमहि नमः
हृदयादि नाभ्यंतम् ॥२॥ ॐ धियो यो नः प्रचोदयात् नमः मूर्द्धादिहृदयांतम् ॥३॥ इति विन्यस्य षडंगन्यासं कुर्यात् ॥ ॐ तत्सवितु
ब्रह्मणे हृदयाय नमः ॥ १ ॥ ॐ वरेण्यं विष्णवे शिरसे स्वाहा ॥ २ ॥ ॐ भर्गोदेवस्य रुद्राय शिखायै वषट् ॥ ३ ॥ ॐ धीमहि
ईश्वराय कवचाय हुं ॥ ४ ॥ ॐ धियो यो नः सदाशिवाय नेत्रत्रयाय वौषट् ॥५ ॥ ॐ प्रचोदयात् सर्वात्मने अस्त्राय फट् ॥६॥
इति षडंगन्यासं कृत्वा ध्यायेत् ॥ अथ ध्यानम् ॥ मुक्ताविद्रुमहेमनीलधवलच्छायैर्मुखैस्त्रीक्षणैर्युक्तामिंदुनिबद्धरत्नमुकुटां तत्त्वार्थवर्णा
त्मिकाम् ॥ सावित्रीं वरदाभयांकुशकशां पाशं कपालं गुणं शंखं चक्रमथारविंदयुगलं हस्तैर्वहंतीं भजे ॥ १ ॥ इति ध्यात्वा । ॐ
लँ पृथिव्यात्मकं गंधं समर्पयामि ॥ १ ॥ ॐ हँ आकाशात्मकं पुष्पं समर्पयामि ॥ २ ॥ ॐ यँ वाय्वात्मकं धूपं समर्प

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यामि ॥ ३ ॥ ॐ रँ तेजआत्मकं दीपं समर्पयामि ॥४॥ ॐ वँ अमृतात्मकं नैवेद्यं समर्पयामि ॥ ५ ॥ ॐ सँ सर्वात्मकं मंत्रपुष्पं समर्पयामि ॥ ६ ॥ इति मानसोपचारैः संपूज्य (भेदपक्षे) त्रिकोणपीठपूजां कुर्य्यात् ॥ तद्यथा—पूर्वादिचतुर्दिक्षु मध्ये च । ॐ प्रभूताय नमः ॥ १ ॥ ॐ विमलाय नमः ॥ २ ॥ ॐ साराय नमः ॥ ३ ॥ ॐ समाराध्याय नमः ॥ ४ ॥ (मध्ये) ॐ परमसुखाय नमः ॥ ५ ॥ इति संपूज्य तद्बहिः । ॐ अं अनंताय नमः ॥ १ ॥ ॐ पृं पृथिव्यै नमः ॥ २ ॥ ॐ अं अमृतसागराय नमः ॥ ३ ॥ ॐ रं रत्नद्वीपाय नमः ॥ ४ ॥ ॐ हें हेमगिरये नमः ॥५॥ ॐ नं नंदनोद्यानाय नमः ॥ ६॥ ॐ कं कल्पवृक्षेभ्यो नमः ॥ ७ ॥ ॐ मं मणिभूषितभूतलाय नमः ॥ ८ ॥ ॐ सं सोममंडलाय नमः ॥ ९ ॥ ॐ अं अग्निमंडलाय नमः ॥ १० ॥ ॐ सूं सूर्यमंडलाय नमः ॥ ११ ॥ इति पीठदेवताः संपूजयेत् । ततः (पूज्यपूजकयोर्मध्ये प्राचीं प्रकल्प्य) पूर्वादिक्रमेण । ॐ रां दीतायै नमः ॥ १ ॥ ॐ रीं सूक्ष्मायै नमः ॥ २ ॥ ॐ रूं जयायै नमः ॥ ३ ॥ ॐ रें भद्रायै नमः ॥ ४ ॥ ॐ रैं विभूत्यै नमः ॥ ५ ॥ ॐ रों विमलायै नमः ॥ ६ ॥ ॐ रौं अमोघायै नमः ॥ ७ ॥ ॐ रं विद्युतायै नमः ॥ ८ ॥ (मध्ये) ॐ रः सर्वतोमुख्यै नमः ॥९॥ इति पीठशक्तीः संस्थाप्य गंधपुष्पैः पूजयेत् । तन्मध्ये ॐ ब्रह्मविष्णुशिवात्मकाय सौराय योगपीठात्मने नमः । इति पुष्पांजलिना आसनं दत्त्वा । तत्र सर्वतोभद्रमध्ये गायत्रीयंत्रं विलिख्य तदुपरि "ॐ महीद्यौः" इत्यादिमंत्रैः पूर्णपात्रांतं पूर्ववत्ताम्रकलशं संस्थाप्य । "तत्त्वायामि" इति वरुणमावाह्य संपूज्य । कलशस्य मुखे विष्णुइत्याद्यभिमंत्र्य । देवदानवसंवादे इत्यादि प्रार्थयेत् ततः । तदुपरि पट्टवस्त्रे शक्तिगंधाष्टकेन यंत्रं विलिख्य तन्मध्ये मूलमंत्रेण । पलस्वर्णमयीं पूर्वोक्तध्यानप्रतिपादितां

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भगवत्या गायत्र्याः प्रतिमां सावयवां वा त्रिकोणाकारामभ्युत्तार णपूर्विकां संस्थाप्य प्राणप्रतिष्ठां कृत्वा मूलेन तस्यां भगवतीं वेदमातरं श्रीगायत्रीमावाह्य पुरुषसूक्तेन श्रीसूक्तेन पाद्यादि पुष्पांतैरुपचारैः संपूज्य। आवरणार्चनं कुर्य्यात् । तद्यथा— तत्र त्रिकोणस्य पूर्वकोणे ॐ गायत्र्यै नमः ॥ १ ॥ (निर्ऋति कोणे) ॐ सावित्र्यै नमः ॥ २ ॥ (वायुकोणे) ॐ सरस्वत्यै नमः ॥ २ ॥ (त्रिकोणांतरालेषु) ॐ ब्रह्मणे नमः ॥ १ ॥ ॐ विष्णवे नमः ॥ २ ॥ ॐ रुद्राय नमः ॥ ३ ॥ इति पूजयेत् ॥ ततो मूलेन पुष्पांजलिं गृहीत्वा "अभीष्टसिद्धिं मे देहि शरणाग तवत्सले ॥ भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम्" इति पुष्पां जलिं दत्त्वा विशेषार्घाद्बिन्दुं निक्षिप्य 'पूजितास्तर्पिताः संतु' इति वदेत् ॥ इति प्रथमावरणम् ॥ १ ॥ ततोऽष्टदले पूर्वादिचतुर्दिक्षु ॐ आदित्याय नमः ॥ १ ॥ ॐ भानवे नमः ॥ २ ॥ ॐ भा

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

स्कराय नमः ॥३॥ ॐ रवयेनमः ॥ ४ ॥ (आग्नेयादिकेसरेषु) ॐ उषायै नमः ॥ १ ॥ ॐ प्रज्ञायै नमः ॥ २ ॥ ॐ प्रभायै नमः ॥ ३ ॥ ॐ संध्यायै नमः ॥ इति पूजयेत् । ततो मूलमुच्चरन् 'अभीष्टसिद्धिं मे देहि०' इत्यादिना पुष्पांजलिं दद्यात् इति द्वितीयावरणम् ॥ २ ॥ ततः षट्कोणे आग्नेयादिकोणकेसरेषु मध्ये दिक्षु च । ॐ ब्रह्मणे हृदयाय नमः ॥१॥ ॐ विष्णवे शिरसे स्वाहा ॥ २ ॥ ॐ रुद्राय शिखायै वषट् ॥ ३ ॥ ॐ ईश्वराय कवचाय हुं ॥ ४ ॥ ॐ सदाशिवाय नेत्रत्रयाय वौषट् ॥ ५ ॥ ॐ सर्वात्मने नमः अस्त्राय फट् ॥६॥ इति षडंगानि पूजयेत् ॥ ततः पुष्पांजलिं गृहीत्वा मूलमुच्चार्य । 'अभीष्टसिद्धिं मे देहि०' इति पुष्पांजलिं दत्त्वा 'पूजितास्तार्पिताः संतु' इति वदेत्।इति तृतीयावरणम् ॥३॥ ततो वर्तुले प्राचीक्रमेण। ॐ प्रह्लादिन्यै नमः॥१॥ ॐ प्रभायै नमः ॥ २ ॥ ॐ नित्यायै नमः ॥ ३ ॥ ॐ विश्वंभरायै नमः ॥४॥ ॐ विशालिन्यै नमः ॥५॥ ॐ प्रभावत्यै नमः ॥६॥ ॐ जयायै नमः ॥ ७॥ ॐ शांत्यै नमः ॥ ८ ॥ इति पूजयेत् ॥ ततः पुष्पांजलिं गृहीत्वा मूलमुच्चार्य । 'अभीष्टसिद्धिं मे देहि०' इति पुष्पांजलिं दत्त्वा 'पूजितास्तार्पिताः संतु' इति वदेत् । इति चतुर्थावरणम् ॥ ४ ॥ तद्बाह्ये वर्तुले प्राचीक्रमेण। ॐ कांत्यै नमः ॥ १ ॥ ॐ दुर्गायै नमः ॥ २ ॥ ॐ सरस्वत्यै नमः ॥ ३ ॥ ॐ विश्वरूपायै नमः ॥ ४ ॥ ॐ विशालायै नमः ॥५॥ ॐ ईशायै नमः ॥ ६ ॥ ॐ चापिन्यै नमः ॥ ७ ॥ ॐ विमलायै नमः ॥ ८ ॥ इति पूजयेत् । ततः पुष्पांजलिं गृहीत्वा मूलमुच्चार्य 'अभीष्टसिद्धिं मे देहि०' इति पुष्पांजलिं दत्त्वा 'पूजितास्तर्पिता संतु' इति वदेत् । इति पंचमावरणम् ॥ ५ ॥ तद्बाह्ये ऽष्टदल मूले पूर्वादिक्रमेण । ॐ अपहारिण्यै नमः॥१॥ॐ सूक्ष्मायै नमः॥२॥ ॐ विश्वयोन्यै नमः॥३॥ ॐ जयावहायै नमः॥४॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ॐ पद्मालयायै नमः ॥ ५ ॥ ॐ परायै नमः ॥ ६ ॥ ॐ शोभायै नमः ॥ ७ ॥ ॐ पद्मरूपायै नमः ॥ ८ ॥ इति पूजयेत् । पुष्पांजलिं गृहीत्वा मूलमुच्चार्य 'अभीष्टसिद्धिं मे देहि०'इति पुष्पांजलिं दत्त्वा 'पूजितास्तर्पिताः सन्तु' इति षष्ठावरणम् ॥ ६ ॥ ततोऽष्टदलमध्ये पूर्वादिक्रमेण ॐ आं ब्राह्म्यैनमः ॥ १ ॥ ॐ ईं माहेश्वर्य्यै नमः ॥ २ ॥ ॐ ऊं कौमार्यै नमः ॥ ३ ॥ ॐ ऋं वैष्णव्यै नमः ॥ ४ ॥ ॐ ॡं वाराह्यै नमः ॥ ५ ॥ ॐ ऐं इन्द्राण्यै नमः ॥ ६ ॥ ॐ औं चामुंडायै नमः ॥ ७ ॥ ॐ अः महालक्ष्म्यै नमः ॥ ८ ॥ इति पूजयेत् । ततः पुष्पांजलिं गृहीत्वा मूलमुच्चार्य 'अभीष्टसिद्धिं मे देहि० ' इति पुष्पांजलिं दत्त्वा 'पूजितास्तर्पिताः संतु' इति वदेत्॥इति सप्तमावरणम्॥७॥ततो दलाग्रेषु ॐ सों सोमाय नमः॥१॥ ॐ भौं भौमाय नमः ॥ २ ॥ ॐ बुं बुधाय नमः ॥ ३ ॥ ॐ बृं बृहस्पतये नमः ॥ ४ ॥ ॐ शुं शुक्राय नमः ॥ ५ ॥ ॐ शं शनैश्चराय नमः ॥ ६ ॥ ॐ रां राहवे नमः ॥ ७ ॥ ॐ कें केतवे नमः इति पूजयेत् । ततो पुष्पांजलिं गृहीत्वा मूलमुच्चार्य । ' अभीष्टसिद्धिं मे देहि०' इति पुष्पांजलिं दत्त्वा 'पूजितास्तर्पिताः संतु' इति वदेत् ॥ इत्यष्टमावरणम् ॥८॥ ततो भूपुरे पूर्वादिदशादिक्षु ॐ लं इन्द्राय नमः ॥ १ ॥ ॐ रं अग्नये नमः ॥ २ ॥ ॐ मं यमाय नमः ॥ ३ ॥ ॐ क्षं निर्ऋतये नमः ॥ ४ ॥ ॐ वं वरुणाय नमः ॥ ५ ॥ ॐ यं वायवे नमः ॥ ६ ॥ ॐ सं सोमाय नमः ॥ ७ ॥ ॐ ईं ईशानाय नमः ॥ ८ ॥ (ईशानपूर्वयोर्मध्ये) ॐ आं ब्रह्मणे नमः ॥ ९ ॥ (निर्ऋतिपश्चिमयोर्मध्ये) ॐ अं अनंताय नमः ॥१०॥ इति पूजयेत् । ततः पुष्पांजलिं गृहीत्वा मूलमुच्चार्य 'अभीष्टसिद्धिं मे देहि०' इति पुष्पांजलिं दत्त्वा ' पूजितास्तर्पिताः संतु ' इति वदेत्॥ इति नवमावरणम् ॥९॥ तद्बहिस्तत्तत्समीपे

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ॐ वं वज्राय नमः ॥ १ ॥ ॐ शं शक्तये नमः० ॥ २ ॥ ॐ दं दंडाय नमः ॥३॥ ॐ खं खड्गाय नमः ॥ ४ ॥ ॐ पं पाशाय नमः ॥५॥ ॐ अं अंकुशाय नमः॥६॥ॐ गं गदायै नमः॥७॥ ॐ त्रिं त्रिशूलाय नमः ॥८॥ॐ पं पद्माय नमः॥९॥ॐ चं चक्राय नमः ॥१०॥इति पूजयेत् ॥ ततः पुष्पाजलिं गृहीत्वा मूलमुच्चार्य 'अभीष्टसिद्धिं मे देहि०' इति पुष्पांजलिं दत्त्वा 'पूजितास्तर्पिताः संतु' इति वदेत्। इति दशमावरणम्॥१०॥"इत्थमावरणैर्देवीं दशाभिः परिपूजयेत् ॥ धर्म्मार्थकाममोक्षाणां भोक्ता स्याद्विजसत्तमः॥१॥" इत्यावरणपूजां कृत्वा धूपादिनीराजनांतं संपूज्य स्तवेन स्तुत्वा शापविमोचनं पठित्वा यथाविधि जपं कुर्यात् तत्र मंत्रः।"ॐ भूर्भुवः स्वः तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात्॥इति वैदिको मंत्रः।सर्वेषां समान एव जपो न तु न्यूनाधिकः॥ (उत्तमजपो द्विसाहस्रः मध्यमः सार्द्धद्विसाहस्रः अधमस्त्रिसाहस्रो ज्ञेयः अस्य पुरश्चरणं चतुर्विंशतिलक्षजपः) ततो जपांते पूर्वोक्त ऋष्यादिन्यासं हृदयादिषडंगन्यासं च कृत्वा कवचं पठेयुः । ततो देवीं पुनः पंचोपचारैः संपूज्य नीराजनं कृत्वा पुष्पांजलिं च दत्त्वा देव्या दक्षिणकरे जपसमर्पणं कुर्युः । ततः सर्वे जापकाः भूमौ शयानाः हविष्यान्नमश्नंतो ब्रह्मचर्यास्पृश्यास्पर्शादिनियमां श्चरेयुः प्रत्यहम् 'ॐ यज्ञाग्रतो' इति शिवसंकल्पं त्रिःपठेयुः ततः पुरश्चरणजपसमाप्तौ होमः। तद्यथा देशकालौ संकीर्त्य अद्य पुरश्च णसांगतासिद्ध्यर्थं होमाविधिं करिष्ये। इति संकल्प्य गणपतिपूजनादिनांदीश्राद्धांतं पूर्ववत् कुर्यात् ॥ ततः कुंडे स्थंडिले वा स्वगृ ह्योक्तविधिना पंचभूसंस्कारपूर्वकमग्निं प्रतिष्ठाप्य ग्रहपीठे सूर्यादिनवग्रहमंडलदेवानावाह्य संपूज्य तदीशान्यां रुद्रकलशं स्थापये त् । ततो मध्यपीठे सर्वतोभद्रमंडले ताम्रकलशोपरि स्वर्णप्रतिमायां भगवंतं सवितारं गायत्रीं च षोडशोपचारैः संपूज्य पूर्वो

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

क्तावरणदेवतापूजां विधाय गीतवादित्रादिभिः सह महानीराजनं कृत्वा सप्त प्रदक्षिणाश्च कृत्वा साष्टांगं प्रणमेत् । ततः कुशकंडिकां संपाद्य आघारावाज्यभागौ हुत्वा 'ॐ इदं हवनीयद्रव्यमन्वाधानोक्तदेवताभ्योऽस्तु न मम' इति यजमानो द्रव्यत्यागं कुर्य्यात्। ततः सूर्यादिग्रहेभ्यः अर्कादिसमिच्चर्वाज्यतिलाहुतिभिः प्रत्येकमष्टाविंशतिरष्टौ वा हुत्वा तैरेव द्रव्यैरधिप्रत्यधिदेवताभ्यश्चतुश्चतुः संख्याकाभिः पंचलोकपालदशदिक्पालेभ्यश्च द्विद्विसंख्याकाभिश्च जुहुयात् ॥ ततो बहुजपकर्तृकपक्षे जपदशांशेन पायसादि होमः कार्यः । तथा च–(देवीभागवते) "जुहुयात्तद्दशांशेन सघृतेन पयोन्धसा ॥ तिलैः पत्रैः प्रसूनैश्च यवैश्च मधुरान्वितैः॥१॥" एकजपकर्तृकपक्षे तु शतांशहोमः कार्यः तथा च (शारदातिलके) "तत्त्वसंख्यासहस्राणि मंत्रविज्जुहुयात्तिलैः ॥ सर्वपापविनिर्मुक्तो दीर्घमायुः स विंदति ॥ १ ॥" अथ शतांशहोमप्रकारः ॥ प्रधानदेवसवित्रे चतुर्विंशतिसहस्रतिलाहुतिभिस्त्रिसहस्रपायसाहुतिभिस्तावतीभिर्घृताहुतिभिर्दूर्वाहुतिभिस्तावतीभिः क्षीरद्रुमसमिधाहुतिभिश्च हुत्वा पूर्वोक्तावरणदेवताभ्यश्चर्वादिद्रव्यैरेकैकाहुतीर्हुत्वा शेषेण स्विष्टकृद्धोमं च कृत्वा समापयेत् । होमकाले 'इदं सवित्रे न मम' इति त्यागः (होमे सप्रणवा व्याहृतिरहिता स्वाहांता गायत्री दूर्वात्रयस्यैकाहुतिः । दूर्वासमिधां दधिमध्वाज्याक्तानां होमः) ततो होमांते बलिदानम् । यजमानस्याभिषेकश्च कार्य्यः ॥ अभिषेकांते तत्समये एव दक्षिणां दद्यात् ॥ अदाने प्रत्यवायी भवति क्षणेक्षणे पापभागी भवति । दक्षिणा च प्रतिलक्षं सुवर्णनिष्कत्रयं तदर्द्धं वा शक्त्या वा देया। ततो जले सवितारं रक्तचंदनादिभिः संपूज्य होमदशांशेन मूलमंत्रांते सवितारं तर्पयामि ॥ इत्युक्त्वा दुग्धमिश्रजलेन तर्पणं कार्य्यम् ॥ ततस्तर्पणदशांशेन गायत्र्यंते 'आत्मानमभिषिंचामि न मम' इति यजमान

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मूर्ध्न्यभिषेकः कार्यः। ततः अभिषेकदशांशसंख्ययाधिकं वा ब्राह्मणभोजनम्। (होमतर्पणाभिषेकानां मध्ये यदेव न संभवति तत्स्थाने तद्द्विगुणो जपः कार्य्यः। ततो भूयसी दक्षिणा विप्राशीर्वादश्च। ततः कृतांजलिपुटः। ॐ चतुर्विंशतिलक्षात्मकगायत्रयीपुरश्चरणं संपूर्णमस्त्विति भवंतो ब्रुवंत्विति विप्रान् प्रार्थ्य। ते च—ॐ गायत्रीपुरश्चरणं संपूर्णमस्त्विति ब्रूयुः। इति प्रतिवचनानंतरं कर्म्मपूर्तिकामो विष्णुं स्मरेत्। एवं कृते सर्वपापक्षयो भवति दीर्घायुश्च विंदति। (शारदातिलके) "व्याहृतित्रयसंयुक्तां गायत्रीं दीक्षितो यजेत् ॥ तत्त्वलक्षं विधानेन भिक्षाशी विजितेन्द्रियः ॥ १ ॥ क्षीरौदनतिलान्दूर्वाक्षीरद्रुमसमिद्वरान् ॥ पृथक्सहस्रत्रितयं जुहुयान्मंत्रसिद्धये ॥ २ ॥ तत्त्वसंख्यासहस्राणि मंत्रविज्जुहुयात्तिलैः ॥ सर्वपापविनिर्मुक्तो दीर्घमायुः स विंदति ॥ ३ ॥ आयुषे साज्यहविषा केवलेनापि सर्पिषा ॥ दूर्वात्रिकैस्तिलैर्मंत्री जुहुहुयात्त्रिसहस्रकम् ॥ ४ ॥ अरुणाब्जैस्त्रिमध्वक्तैर्जुहुयादयुतं ततः ॥ महालक्ष्मीर्भवेत्तस्य षण्मासान्नात्र संशयः ॥ ५ ॥ ब्रह्मश्रिये प्रजुहुयात्प्रसूनैर्ब्रह्मवृक्षजैः ॥ बहुना किमिहोक्तेन यथावत्साधु साधिता ॥६॥ द्विजन्मनामियं विद्या सिद्धा कामदुघा मता ॥" (गायत्रीपटले) "आदित्यस्योदये स्नात्वा सहस्रं प्रत्यहं जपेत् ॥ आयुरोग्यमैश्वर्यं धनं च लभते ध्रुवम् ॥ १ ॥ त्रिरात्रोपोषितः सम्यग्घृतं हुत्वा सहस्रशः ॥ सहस्रं लाभमाप्नोति हुत्वाग्नौ खादिरेंधनम् ॥ २ ॥ पालाशीभिः समिद्भिश्च घृताक्ताभिर्हुताशने ॥ सहस्रं लाभमाप्नोति राहुसूर्यसमागमे ॥ ३ ॥ हुत्वा तु खादिरं वह्नौ घृताक्तं रक्तचंदनम् ॥ हेम्ना सहस्रमाप्नोति राहुचंद्रसमागमे ॥ ४ ॥ रक्तचंदनमिश्रं तु सघृतं हव्यवाहने ॥ हुत्वा गोमयमाप्नोति सहस्रं गोमयं द्विजः ॥ ५ ॥ जातीचंपकराजार्ककुसुमानां सहस्रशः ॥ हुत्वा वस्त्रमवाप्नोति घृताक्तानां हुताशने ॥ ६ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सूर्यमंडलबिंबे च हुत्वा तोयं सहस्रशः ॥ सहस्रं प्राप्नुयाद्धेम रौप्यमिंदुमये हुते ॥ ७ ॥ अलक्ष्मीपापसंयुक्ते मलव्याधिविनाशने ॥ जाप्यैःसहस्रैर्मुच्येत स्नायाद्यस्तु जलेन वै ॥ ८ ॥ गोघृतेन सहस्रेण लोध्रेण जुहुयाद्यदि ॥ चौराग्निमारुतोत्थान्यभव्यानि न भवंति वै ॥ ९ ॥ क्षीराहारो जपेल्लक्षमपमृत्युमपोहति ॥ घृताशी प्राप्नुयान्मेधां बहुविज्ञानसंचयाम् ॥ १० ॥ हुत्वा वेतसपत्राणि घृताक्तानि हुताशने॥लक्षाधिपस्य पदवीं सार्वभौमत्वमाप्नुयात् ॥ ११ ॥ लक्षेण भस्महोमस्य हुत्वा ह्युत्तिष्ठते जलात् ॥ आदित्याभिमुखं स्थित्वा नाभिमात्रजले शुचौ ॥ १२ ॥ गर्भपातादिप्रदराश्चान्ये स्त्रीणां महारुजः ॥ नाशमेष्यंति ते सर्वे मृतवत्सादिदुःखदाः ॥ १३ ॥ तिलानां लक्षहोमेन घृताक्तानां हुताशने ॥ सर्वकामसमृद्धात्मा परं स्थानमवाप्नुयात् ॥ १४ ॥ यवानां लक्षहोमेन घृताक्तानां हुताशने ॥ सर्वकामसमृद्धात्मा परां सिद्धिमवाप्नुयात् ॥ १५ ॥ घृतस्याहुतिलक्षेण सर्वान्कामानवाप्नुयात् ॥ पंचगव्याशनो लक्षं जपेज्जातिस्मृतिर्भवेत् ॥ १६ ॥ तदेव ह्यनले हुत्वा प्राप्नोति बहुशो धनम् ॥ अन्नादिहवनान्नित्यमन्नाद्यं च भवेत्सदा ॥ १७ ॥ जुहुयात्सर्वसाध्यानामाहुत्याऽयुतसंख्या ॥ रक्तसिद्धार्थकान्हुत्वा सर्वान्साधयते रिपून् ॥ १८ ॥ लवणं मधुसंयुक्तं हुत्वा सर्ववशी भवेत् ॥ हुत्वा तु करवीराणि रक्तानि ज्वालयेज्ज्वलम् ॥१९॥ हुत्वा भल्लातकं तैलं देशादेव प्रचालयेत् ॥ हुत्वा तु निम्बपत्राणि विद्वेषशांतये नृणाम्॥२०॥रक्तानां तंडुलानां च घृताक्तानां हुताशने॥हुत्वा बलमवाप्नोति शत्रुभिर्न स जीयते॥२१॥ ब्रह्मचारी जिताहारो यः सहस्रत्रयं जपेत् ॥ संवत्सरेण लभते धनैश्वर्यं न संशयः ॥ २२ ॥ शमीबिल्वपलाशानामर्कस्य तु विशेषतः ॥ पुष्पाणां समिधश्चैव हुत्वा हेम ह्यवाप्नुयात् ॥ २३ ॥ आब्रह्मत्र्यंबकादीनां यस्यायतनमाश्रितः ॥ जपेल्लक्षं निराहारो स

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तस्य वरदो भवेत् ॥ २४ ॥ बिल्वानां लक्षहोमेन घृताक्तानां हुताशने ॥ परां श्रियमवाप्नोति यदि न भ्रूणहा भवेत् ॥ २५ ॥ पद्मानां लक्षहोमेन घृताक्तानां हुताशने ॥ प्राप्नोति राज्यमखिलं सुसंपन्नमकंटकम् ॥ २६ ॥ पंचविंशतिलक्षेण दधि क्षीरं हुताशने ॥ स्वदेहे सिद्धचते जंतुः कौशिकस्य मतं तथा ॥ २७ ॥ एकाहं पंचगव्याशी एकाहं मारुताशनः ॥ एकाहं च द्विजोन्नाशी गायत्रीजप उच्यते ॥ २८ ॥ महारोगा विनश्यंति लक्षजप्यानुभावतः ॥ शतेन गायत्र्याः स्नात्वा शतमंतर्जले जपेत् ॥ शतेन यस्त्वपः पीत्वा सर्वपापैः प्रमुच्यते ॥ २९ ॥ गोघ्नः पितृघ्नमातृघ्नौ ब्रह्महा गुरुतल्पगः ॥ स्वर्णहारी तैलहारी यस्तु विप्रः सुरां पिबेत् ॥ ३० ॥ चंदनद्वयसंयुक्तं कर्पूरं तंडुलं यवम् ॥ लवंगं सुफलं चाज्यं सिता चाम्रस्य दारुकैः ॥ ३१ ॥ अयं न्यूनविधिः प्रोक्तो गायत्र्याः प्रीतिकारकः ॥ एवं कृते महासौख्यं प्राप्नोति साधको ध्रुवम् ॥ ३२ ॥ अन्नाज्यभोजनं हुत्वा कृत्वा वा कर्मगर्हितम् ॥ न सीदेत्प्रतिगृह्णानो महीमपि ससागराम् ॥ ३३ ॥ ये चास्य उत्थिता लोके ग्रहाः सूर्यादयो भुवि ॥ ते यांति सौम्यतां सर्वे शिवे इति न संशयः ॥ ३४ ॥ इति गायत्रीपुरश्चरणं समाप्तम् ॥ अथ गायत्रीकवचप्रारंभः ॥ अस्य श्रीगायत्रीकवचस्य ब्रह्मविष्णुरुद्रा ऋषयः । ऋग्यजुःसामाथर्वाणिच्छंदांसि । परब्रह्मस्वरूपिणी गायत्री देवता । भूः बीजम् । भुवः शक्तिः । स्वः कीलकम् । श्रीगायत्रीप्रीत्यर्थे जपे विनियोगः । वर्णास्यां कुंडिकाहस्तां शुद्धनिर्मलज्योतिषीम् ॥ सर्वतत्त्वमयीं वन्दे गायत्रीं वेदमातरम् ॥ १ ॥ अथ ध्यानम् । मुक्ताविद्रुमहेमनीलधवलच्छायैर्मुखैस्त्रीक्षणैर्युक्तामिंदुनिबद्धरत्नमुकुटां तत्त्वार्थवर्णात्मिकाम् ॥ गायत्रीं वरदाभयांकुशकशां शूलं कपालं गुणं शंखं चक्रमथारविंदयुगलं हस्तैर्वहंतीं भजे ॥ १ ॥ ॐ गायत्री पूर्वतः पातु सावित्री पातु दक्षिणे ॥ ब्रह्मविद्या च मे पश्चादुत्तरे

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मां सरस्वती ॥ १ ॥ पावकीं मे दिशं रक्षेत्पावकोज्वलशालिनी ॥ यातुधानीं दिशं रक्षेद्यातुधानगणार्दिनी ॥ २ ॥ पावमानीं दिशं रक्षेत्पवमानविलासिनी ॥ दिशं रौद्रीमवतु मे रुद्राणी रुद्ररूपिणी ॥ ३ ॥ ऊर्ध्वं ब्रह्माणी मे रक्षेदधस्ताद्वैष्णवी तथा ॥ एवं दश दिशो रक्षेत्सर्वतो भुवनेश्वरी ॥४॥ ब्रह्मास्त्रस्मरणादेव वाचां सिद्धिः प्रजायते ॥ ब्रह्मदण्डश्च मे पातु सर्वशस्त्रास्त्रभक्षकः ॥५॥ ब्रह्मशीर्षस्तथा पातु शत्रूणां वधकारकः ॥ सप्तव्याहृतयः पांतु ससदाबिंदुसंयुताः ॥ ६ ॥ वेदमाता च मां पातु सरहस्या सदैवता ॥ देवीसूक्तं सदा पातु सहस्राक्षरदेवता ॥ ७ ॥ चतुःषष्टिकला विद्या दिव्याद्या पातु देवता ॥ बीजशक्तिश्च मे पातु पातु विक्रमदेवता ॥ ८ ॥ तत्पदं पातु मे पादौ जंघे मे सवितुः पदम् ॥ वरेण्यं कटिदेशं तु नाभिं भर्गस्तथैव च ॥ ९ ॥ देवस्य मे तु हृदयं धीमहीति गलं तथा ॥ धियो मे पातु जिह्वायां यः पदं पातु लोचने ॥ १० ॥ ललाटे नः पदं पातु मूर्द्धानं मे प्रचोदयात् ॥ तद्वर्णः पातु मूर्द्धानं सकारः पातु भालकम् ॥११॥ चक्षुषी मे विकारस्तु श्रोत्रं रक्षेत्तुकारकः ॥ नासापुटे वकारो मे रेकारस्तु कपोलयोः ॥ १२ ॥ णिकारस्त्वधरोष्ठ च यकारस्त्वधरोष्ठके ॥ आस्यमध्ये भकारस्तु र्गोकारस्तु कपोलयोः ॥ १३ ॥ देकारः कंठदेशे च वकारः स्कंधदेशयोः ॥ स्यकारो दक्षिणं हस्तं धीकारो वामहस्तकम्॥१४॥मकारो हृदयं रक्षेद्धिकारो जठरं तथा॥ धिकारो नाभिदेशं तु योकारस्तु कटिद्वयम् ॥ १५ गुह्यं रक्षतु योकार ऊरू मे नः पदाक्षरम् ॥ प्रकारो जानुनी रक्षेच्चोकारो जंघदेशयोः ॥ १६ ॥ दकारो गुल्फदेशं तु यात्कारः पादयुग्मकम् ॥ जातवेदेति गायत्री त्र्यंबकेति दशाक्षरा॥१७॥सर्वतः सर्वदा पातु आपोज्योतीतिषोडशी ॥ इदं तु कवचं दिव्यं बाधाशतविनाशनम् ॥ चतुःषष्टिकलाविद्यासकलैश्वर्य्यसिद्धिदम् ॥ जपारंभे च हृदयं जपांते कवचं पठेत् ॥ १९॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

स्त्रीगोब्राह्मणमित्रादिद्रोहाद्यखिलपातकैः॥मुच्यते सर्वपापेभ्यः परं ब्रह्माधिगच्छति॥२०॥पुष्पांजलिं च गायत्र्या मूलेनैव पठेत्सदा॥ शतसाहस्रवर्षाणां पूजायाः फलमाप्नुयात् ॥ २१ ॥ भूर्जपत्रे लिखित्वैतत्स्वकंठे धारयेद्यदि ॥ शिखायां दक्षिणे वाहौ कंठे वा धारयेद्बुधः ॥ २२ ॥ त्रैलोक्यं क्षोभयेत्सर्वं त्रैलोक्यं दहति क्षणात् ॥ पुत्रवाञ्धनवाञ्छ्रीमान्नानाविद्यानिधिर्भवेत् ॥ २३ ॥ ब्रह्मादीनि सर्वाणि तदंगस्पर्शनात्ततः ॥ भवंति पुष्पतुल्यानि किमन्यत्कथयामि ते ॥२४॥ अभिमंत्रितगायत्रीकवचं मानसं पठेत् ॥ तज्जलं पिबतो नित्यं पुरश्चर्य्याफलं भवेत् ॥ २५ ॥ इति गायत्रीकवचं संपूर्णम् ॥ ॥ इति श्रीबीकानेरराज्यान्तर्गत श्रीरत्नगढनगरनिवासिना श्रीवसिष्ठगोत्रोद्भवपण्डितश्रीरामकृष्णामरचन्द्रपौत्रेण श्रीकस्तूरीचंद्रतनुजन्मना श्रीचतुर्भुजदत्तसूनुना गौडवंशावतंसश्रीमहादेवभक्तशुक्लयजुर्वेदीयमाध्यंदिनवाजसनेयिशाखानुयायिना पण्डितवैद्यश्रीचतुर्थीलालशर्म्मणा विरचिते अनुष्ठानप्रकाशे महानिबंधे पुरश्चरणकाण्डे देवीमंत्रानुष्ठानप्रकरणं तृतीयं समाप्तम् ॥ ॥ अथ विष्णुमंत्रानुष्ठानप्रकरणम् ॥ ४ ॥ उद्यत्कोटिदिवाकराभमनिशं शंखं गदां पंकजं चक्रं बिभ्रतमिंदिरावसुमतीसंशोभि पार्श्वद्वयम् ॥ कोटीरांगदहारकुण्डलधरं पीतांबरं कौस्तुभोद्दीप्तं विश्वधरं स्ववक्षसि लसच्छ्रीवत्सचिह्नं भजे ॥ १ ॥ अथ वक्ष्ये महामंत्रान् विष्णोः सर्वार्थसाधकान् ॥ येषां संस्मरणात्सन्तो भवाब्धेः पारमाश्रिताः ॥ २ ॥ तत्र तावद्विष्णोः सर्वमंत्रोपयोगि प्रयोगः ॥ पूर्वदिने प्रायश्चित्तमयुतगायत्रीजपं च कृत्वा उपवासादि विधाय प्रारंभदिने उषसि नद्यादौ स्नात्वा प्रातर्नित्याह्निकं समाप्य। मंगलस्नानांते धौतशुक्लवाससी परिधाय यथायोग्यालंकृतो घृतद्वादशांगेषु चंदनकेशरकुंकुमान्यतमतिलकः सपवित्रकुशः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

स्वासने प्राङ्मुख उपविश्य । मूलेनाचम्य प्राणानायम्य शांतिपाठं गणपत्यादिदेवतास्मरणं च कुर्य्यात् ॥ ततो देशकालौ संकीर्त्य ममात्मनः ॥ श्रुतिस्मृतिपुराणोक्तफलावाप्तये इह जन्मनि जन्मांतरे वा कृतकायिकवाचिकमानसिकसांसर्गिकम हापातकोपपातकादिसमस्तपातकनिवृत्तिद्वाराधर्मार्थकाममोक्षसिद्ध्यर्थं श्रीपरमेश्वरप्रीत्यर्थं श्रीविष्णोरमुकमंत्रपुरश्चरणं स्वयं ब्राह्मणद्वारा वा करिष्ये । तदंगत्वेन श्रीगणपतिपूजनं पुण्याहवाचनं मातृकापूजनं नांदीश्राद्धमाचार्यजापकवरणं च करिष्ये ॥ इति संकल्प्य । पूर्वोक्तपद्धतिकाण्डमार्गेण दिग्रक्षणांतं सर्वं विधाय ॥ 'ॐ भद्रंकर्णेभिः' इत्यादिवेदघोषेण जपस्थानसमीपमागत्य । पूर्ववत् द्वारपूजां कृत्वा प्रविश्य कूर्म्मसंशोधिते स्वासने प्राङ्मुख उदङ्मुखो वा उपविश्य । स्ववामे कर्म्मपात्रं यथाविधि संस्थापयेत् । ततः 'ॐ अपवित्रः०' इत्यादिप्रोक्षणं विधाय । "पृथ्वि त्वया०" इत्यादिना भूमिं प्रार्थ्य । मूलेनाचम्य प्राणानायम्य । देशकालौ स्मृत्वा । मम (यजमानस्य वा) सर्वविधपातकनिवृत्तिद्वारा श्रीपरमेश्वरप्रीत्यर्थं श्रीविष्णोरमुकमंत्रस्य अमुकसंख्यया जपं करिष्ये । तदंगत्वेन भूतशुद्धिं प्राणप्रतिष्ठामंतर्मातृकाबहिर्मा तृकान्यासं केशवादिकलान्यासं च करिष्ये । इति संकल्प्य । पद्धतिमार्गोक्तविधिना बहिर्न्यासांतं कृत्वा । केशवादिकलामा तृकान्यासं कुर्य्यात् । अथ केशवादिकलान्यासः । ॐ केशवादिमातृकान्यासंस्य साध्यनारायण ऋषिः । गायत्री छंदः । लक्ष्मी नारायणो देवता । हलो बीजानि । स्वराः शक्तयः । विष्णोरमुकमंत्रजपांगत्वेन न्यासे विनियोगः । ॐ साध्यनारायणऋषये नमः शि रसि ॥१॥ गायत्रीछंदसे नमः मुखे ॥२॥ ॐ लक्ष्मीनारायणदेवतायै नमः हृदये ॥३॥ ॐ हल्बीजेभ्यो नमः गुह्ये ॥४॥ ॐ स्वर

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

शक्तिभ्यो नमः पादयोः ॥ ५ ॥ इति ऋष्यादिन्यासः ॥ ॐ ह्रीं हृदयाय नमः ॥ १ ॥ ॐ श्रीं शिरसे स्वाहाः ॥ २ ॥ ॐ क्लीं शिखायै वषट् ॥३॥ ॐ ह्रीं कवचायहुं ॥४॥ ॐ श्रीं नेत्रत्रयाय वौषट् ॥ ५ ॥ ॐ क्लीं अस्त्राय फट् ॥६॥ इति षडंगन्यासं कृत्वा ध्यायेत् ॥ "शंखचक्रगदापद्मकुंभारऽदर्शाब्जपुस्तकम् ॥ विभ्रतं मेघचपलावर्णं लक्ष्मीहरिं भजे ॥१॥ (अथवा) विद्यारविंदमुकुरामृत कुंभपद्म कौमोदकीदरसुदर्शनशोभिहस्तम्॥सौदामिनीमकरकांति विभाति लक्ष्मीनारायणात्मकमखण्डितमादिमूर्तिं॥१॥इतिध्यात्वा न्यासं कुर्य्यात्। तद्यथा ॐ ह्रीँश्रीँक्लीँ अंक्लीँश्रीँह्रीँ ॐ केशवकीर्तिभ्यां नमः शिरसि ॥ १ ॥ ॐ ह्रीँश्रीँक्लीँआँक्लीँश्रीँह्रीँ ॐ नारायण कांतिभ्यां नमः मुखवृत्ते ॥ २ ॥ ॐ ह्रीँश्रीँक्लीँइंश्रीँह्रीँक्लीँ ॐ माधवतुष्टिभ्यां नमः दक्षनेत्रे ॥ ३ ॥ ॐ ह्रीँश्रीँक्लीँईंक्लीँश्रीँह्रीँ ॐ गोविंदपुष्टिभ्यां नमः वामनेत्रे ॥ ४॥ ॐ ह्रीँश्रीँक्लीँ डं क्लीँश्रीँह्रीँ ॐ विष्णुधृतिभ्यां नमः दक्षकर्णे ॥५॥ ॐ ह्रीँश्रीँक्लीँ ऊँ क्लीँश्रीँह्रीँ ॐ मधुसूदनशांतिभ्यां नमः वामकर्णे ॥ ६ ॥ ॐ ह्रीँश्रीँक्लीँऋंक्लीँश्रीँह्रीँ ॐ त्रिविक्रमक्रियाभ्यां नमः दक्षनासापुटे ॥ ७ ॥ ह्रीँ श्रीँक्लीँॠंक्लीँश्रीँह्रीँ ॐ वामनदयाभ्यां नमः वामनासापुटे ॥ ८ ॥ ॐ ह्रीँश्रीँक्लीँऌंक्लीँश्रीँह्रीँ ॐ श्रीधरमेधाभ्यां नमः दक्षगंडे ॥ ९ ॥ ॐ ह्रीँश्रीँक्लीँॡंक्लीँश्रीँह्रीँ ॐ हृषीकेशहर्षाभ्यां नमः वामगंडे ॥ १० ॥ ॐ ह्रीँश्रीँक्लीँएंक्लीँश्रीँह्रीँॐ पद्मनाभश्रद्धाभ्यां नमः ऊर्ध्वोष्टे ॥ ११ ॥ ॐ ह्रीँश्रीँक्लीँऐंक्लीँश्रीँह्रीँ ॐ दामोदरलज्जाभ्यां नमः अधरोष्ठे ॥ १२ ॥ ॐ ह्रीँश्रीँक्लीँओंक्लीँश्रीँह्रीँ ॐ वासुदेव लक्ष्मीभ्यां नमः ऊर्ध्वदंतपंक्तौ ॥ १३ ॥ ॐ ह्रीँश्रीँक्लीँऔंक्लीँश्रीँह्रीँ ॐ संकर्षणसरस्वतीभ्यां नमः अधोदन्तपंक्तौ ॥ १४ ॥ ॐ ह्रीँश्रीँक्लीँअंक्लीँश्रीँह्रीँ ॐ प्रद्युम्नप्रीतिभ्यां नमः मूर्ध्नि ॥ १५ ॥.ॐ ह्रीँश्रीँक्लीँअःक्लीँश्रीँह्रीँ ॐ अनिरुद्धरतिभ्यां नमः मुखे ॥ १६ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ॐ ह्रौँश्रीँक्लीँकंक्लीँश्रीँह्रौँ ॐ चक्रिजयाभ्यां नमः दक्षबाहुमूले ॥ १७ ॥ ॐ ह्रौँश्रीँक्लीँखंक्लीँश्रीँह्रौँ ॐ गदिदुर्गाभ्यां नमः दक्षकूर्परे ॥ १८ ॥ ॐ ह्रौँश्रीँक्लीँगंक्लीँश्रीँह्रौँ ॐ शार्ङ्गिप्रभाभ्यां नमः दक्षमणिबंधे ॥ १९ ॥ ॐ ह्रौँश्रीँक्लीँघंक्लीँश्रीँह्रीं ॐ खड्गिसत्याभ्यां नमः दक्षहस्तांगुलिमूले ॥२०॥ ॐ ह्रौँश्रीँक्लीँङंक्लीँश्रीँह्रौँ ॐ शंखचंडाभ्यां नमः दक्षहस्तांगुल्यग्रे ॥२१॥ ॐ ह्रौँश्रीँक्लीँचंक्लीँश्रीँह्रौँ ॐ हलिवाणीभ्यां नमः वामबाहुमूले ॥ २२ ॥ ॐ ह्रौँश्रीँक्लीँछंक्लीँश्रीँह्रौँॐ मुसलिविलासिनीभ्यां नमः वामकूर्परे ॥२३ ॥ ॐ ह्रौँ श्रीँक्लीँजंक्लीँश्रीँह्रौँॐ शूलिविजयाभ्यां नमः वाममणिबंधे ॥ २४ ॥ ॐ ह्रौँश्रीँक्लीँझंक्लीँश्रीँह्रौँॐ पाशविरजाभ्यां नमः वामांगुलिमूले ॥ २५ ॥ ॐ ह्रौँश्रीँक्लीँञंक्लीँश्रीँह्रौँॐ अङ्कुशिविश्वाभ्यां नमः वामांगुल्यग्रे ॥ २६ ॥ ॐह्रौँश्रीँक्लीँटंक्लीँश्रीँह्रौँॐ मुकुंदविनदाभ्यां नमः दक्षोरुमूले ॥ २७ ॥ ॐ ह्रौँश्रीँक्लीँठंक्लीँश्रीँह्रौँॐ नंदजसुनन्दाभ्यां नमः दक्षजानुनि ॥ २८ ॥ ॐ ह्रौँश्रीँक्लीँडंक्लीँश्रीँह्रौँॐ नंदि सत्याभ्यां नमः दक्षगुल्फे ॥ २९ ॥ ॐह्रौँश्रीँक्लीँढंक्लीँश्रीँह्रौँॐ नरऋद्धिभ्यां नमः दक्षपादांगुलिमूले ॥ ३० ॥ ॐ ह्रौँश्रीँक्लीँणंक्लीँ श्रीँह्रौँॐ नरकजित्समृद्धिभ्यां नमः दक्षपादाङ्गुल्यग्रे ॥ ३१ ॥ ॐह्रौँश्रीँक्लीँतंक्लीँश्रीँह्रौँॐ हरिशुद्धिभ्यां नमः वामोरुमूले ॥ ३२ ॥ ॐ ह्रौँश्रीँक्लीँथंक्लीँह्रौँॐ कृष्णबुद्धिभ्यां नमः वामजानुनि ॥ ३३ ॥ॐ ह्रौँश्रीँक्लीँदंक्लीँश्रीँह्रौँॐ सत्यभुक्तिभ्यां नमः वामगुल्फे ॥३४॥ ॐ ह्रौँश्रीँह्रौँधंक्लीँश्रीँह्रौँॐ सात्वतमतिभ्यां नमः वामपादांगुलिमूले ॥ ३५ ॥ ॐ ह्रौँश्रीँक्लीँनंक्लीँश्रीँह्रौँॐ सौरिक्षमाभ्यां नमः वा मपादांगुल्यग्रे ॥ ३६ ॥ ॐ ह्रौँश्रीँक्लीँपंक्लीँश्रीँह्रौँॐ शूररमाभ्यां नमः दक्षपार्श्वे ॥ ३७ ॥ ॐ ह्रौँश्रीँक्लीँफंक्लीँश्रीँह्रौँॐ जनार्दनो माभ्यां नमः वामपार्श्वे ॥ ३८ ॥ ॐ ह्रौँश्रीँक्लीँबंक्लीँश्रीँह्रौँ ॐ भूधरक्लेदिनीभ्यां नमः पृष्ठे ॥ ३९ ॥ ॐ ह्रौँश्रीँक्लीँभँक्लीँश्री

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ह्रीँ॒ॐ विश्वमूर्तिक्लिन्नाभ्यां नमः नाभौ ॥ ४० ॥ ॐ ह्रीँश्रीँक्लीँमंक्लीँश्रीँह्रीँॐ वैकुंठवसुधाभ्यां नमः जठरे ॥ ४१ ॥ ॐ ह्रीँश्रीँक्लीँयंक्लीँ श्रीँ ह्रीँ ॐ त्वगात्मभ्यां पुरुषोत्तमवसुदाभ्यां नमः हृदये ॥४२॥ ॐ ह्रीँश्रीँक्लीँरंक्लीँश्रीँह्रीँॐ असृगात्मभ्यां वली पराभ्यां नमः दक्षांसे ॥४३॥ ॐ ह्रीँ श्रीँक्लीँलंक्लींश्रीँह्रीँ ॐ मांसात्मभ्यां बलानुजपरायणाभ्यां नमः ककुदि ॥४४॥ ॐ ह्रीँश्रीँ क्लीं वंक्लीँश्रीँह्रीँ ॐ मेदात्मभ्यां वालसूक्ष्माभ्यां नमः वामांसे ॥ ४५ ॥ ॐ ह्रीँश्रीँक्लीँशंश्रीँह्रीँॐ अस्थ्यात्मभ्यां वृषघ्नसंध्याभ्यां नमः हृदयादिदक्षकराग्रपर्यंतम् ॥ ४६ ॥ ॐ ह्रीँश्रीँक्लीँषंक्लींश्रीँह्रीँॐ मज्जात्मभ्यां वृषप्रज्ञाभ्यां नमः हृदयादिवामकराग्रपर्यंतम् ॥ ४७ ॥ ॐ ह्रीँश्रीँक्लीँसंक्लींश्रीँह्रीँ ॐ शुक्रात्मभ्यां हंसप्रभाभ्यां नमः हृदयादिदक्षपादाग्रपर्यंतम् ॥ ४८ ॥ ॐ ह्रीँ श्रीँक्लीँहंक्लींश्रीँह्रीँ ॐ प्राणात्मभ्यां वराहनिशाभ्यां नमः हृदयादिवामपादाग्रपर्यंतम् ॥ ४९ ॥ ॐ ह्रीँश्रीँक्लीँलंक्लींश्रीँह्रीँॐ शक्त्यात्मभ्यां विमलमेधाभ्यां नमः हृदादिनाभ्यंतम् ॥ ५० ॥ ॐ ह्रीँश्रीँक्लीँ क्षंक्लींश्रीँह्रीँॐ परमात्मभ्यां नृसिंहविद्युताभ्यां नमः हृदादि मूर्धान्तंच न्यसेत् ॥ ५१ ॥ इति केशवादिकलामातृकान्यासः ॥ (अयं न्यासः विष्णोः सर्वमंत्रेष्वादौ ज्ञेयः) एवं न्यासं कृत्वा मूलमंत्रन्यासं कुर्य्यात् ॥ तत्र तावद्विष्णोरष्टाक्षरमंत्रप्रयोगः । (शारदातिलके) (मूलमंत्रो यथा) " ॐ नमो नारायणाय " इति अष्टाक्षरो मंत्रः ॥ अस्य श्रीविष्णोरष्टाक्षरमंत्रस्य साध्यो नारायण ऋषिः । गायत्री छंदः । विष्णुदेवता धर्मार्थकाममोक्षसिद्ध्यर्थे जपे विनियोगः ॐ साध्यनारायणऋषये नमः शिरसि ॥ १ ॥ ॐ गायत्रीछंदसे नमः मुखे ॥ २ ॥ विष्णुदेवतायै नमः हृदि ॥ ३ ॥ इति ऋष्यादिन्यासः ॥ ॐ क्रुद्धोल्काय अंगुष्ठाभ्यां नमः ॥ १ ॥ ॐ महोल्काय तर्जनीभ्यां

॥२४९॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नमः ॥ २ ॥ ॐ वीरोल्काय मध्यमाभ्यां नमः ॥ ३ ॥ ॐ द्युल्काय अनामिकाभ्यां नमः ॥ ४ ॥ ॐ सहस्रोल्काय कनिष्ठिकाभ्यां नमः ॥ ५ ॥ इति करन्यासः ॥ एवं हृदयादिनेत्रहीनपंचांगन्यासं कृत्वा मंत्रांगन्यासं कुर्यात् ॥ तत्र क्रमः ॥ ॐ नमः हृदयाय नमः ॥ १ ॥ ॐ नं नमः शिरसे स्वाहा ॥ २ ॥ ॐ मों नमः शिखायै वषट् ॥ ३ ॥ ॐ नां नमः कवचायहुं ॥ ४ ॥ ॐ रां नमः नेत्राभ्यां वौषट् ॥ ५ ॥ ॐ यं नमः अस्त्राय फट् ॥ ६ ॥ ॐ णं नमः कुक्षौ ॥ ७ ॥ ॐ यं नमः पृष्ठे ॥ ८ ॥ ॐ नमः सुदर्शनास्त्रायफडिति मंत्रेण दिग्बंधं कुर्यात् ॥ इति प्रथमो न्यासः ॥ १ ॥ ॐ नमः मूलाधारे ॥ १ ॥ ॐ नं नमः हृदये ॥ २ ॥ ॐ मों नमः वक्त्रे ॥ ३ ॥ ॐ नां नमः दक्षिणबाहुमूले ॥ ४ ॥ ॐ रां नमः वामबाहुमूले ॥ ५ ॥ ॐ यं नमः दक्षपादमूले ॥ ६ ॥ ॐ णां नमः वामपादमूले ॥ ७ ॥ ॐ यं नमः नाभौ ॥ इति द्वितीयो न्यासः ॥ २ ॥ ॐ नमः कंठे ॥ १ ॥ ॐ नं नमः नाभौ ॥ २ ॥ ॐ मों नमः हृदये ॥ ३ ॥ ॐ नां नमः दक्षस्तने ॥ ४ ॥ ॐ रां नमः वामस्तने ॥ ५ ॥ ॐ यं नमः दक्षपार्श्वे ॥ ६ ॥ ॐ णां नमः वामपार्श्वे ॥ ७ ॥ ॐ यं नमः पृष्ठे ॥ ८ ॥ इति तृतीयो न्यासः ॥ ३ ॥ ॐ नमः मूर्ध्नि ॥ १ ॥ ॐ नं नमः मुखे ॥ २ ॥ ॐ मों नमः दक्षनेत्रे ॥ ३ ॥ ॐ नां नमः वामनेत्रे ॥ ४ ॥ ॐ रां नमः दक्षकर्णे ॥ ५ ॥ ॐ यं नमः वामकर्णे ॥ ६ ॥ ॐ णां नमः दक्षिणनासिकायाम् ॥ ७ ॥ ॐ यं नमः वामनासिकायाम् ॥ ८ ॥ इति चतुर्थो न्यासः ॥ ४ ॥ ॐ नमः बाहुमूलयोः ॥ १ ॥ ॐ नं नमः कूर्परयोः ॥ २ ॥ ॐ मों नमः मणिबंधयोः ॥ ३ ॥ ॐ नां नमः हस्तांगुलीषु ॥ ४ ॥ ॐ रां नमः पादमूलयोः ॥ ५ ॥ ॐ यं नमः जानुनोः ॥ ६ ॥ ॐ णं नमः गुल्फयोः ॥ ७ ॥ ॐ यं नमः पादांगुलीषु ॥ ८ ॥ इति पंचमो न्यासः ॥ ५ ॥ ॐ नमः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

त्वचि ॥ १ ॥ ॐ नं नमः रक्ते ॥ २ ॥ ॐ मों नमः मांसे ॥ ३ ॥ ॐ नां नमः मेदसि ॥४॥ ॐ रां नमः अस्थि ॥५॥ ॐ यं नमः मज्जायाम् ॥ ६ ॥ ॐ णं नमः शुक्रे ॥ ७ ॥ इति सप्तधातून् हृदये न्यस्य ॐ यं नमः प्राणेषु इति गले न्यसेत् ॥ इति षष्ठो न्यासः ॥ ६ ॥ ॐ नमः मूर्ध्नि ॥ १ ॥ ॐ नं नमः नेत्रयोः ॥२॥ ॐ मों नमः मुखे ॥३॥ ॐ नां नमः हृदये ॥ ४॥ ॐ रां नमः कुक्षिद्वये ॥ ५ ॥ ॐ यं नमः ऊरुद्वये ॥ ६ ॥ ॐ णां नमः जंघाद्वये ॥ ७ ॥ ॐ यं नमः पादद्वये ॥८॥ इति सप्तमो न्यासः ॥७॥ ॐ नमः दक्षगंडे ॥१॥ ॐ नं नमः वामगंडे ॥२॥ ॐ मों नमः दक्षांसे ॥३॥ ॐ नां नमः वामांसे ॥४॥ ॐ रां नमः दक्षोरौ ॥५॥ ॐ यं नमः वामोरौ ॥६॥ॐ णां नमः दक्षपादे॥७॥ ॐ यं नमः वामपादे ॥८॥ इत्यष्टमो न्यासः ॥८॥ एवं मूलमंत्रवर्णन्यासं कृत्वा द्वादशमूर्त्तिपंजरन्यासं कुर्य्यात् ॥ ॐ अँ धातृसहिताय केशवाय नमः ललाटे ॥ १ ॥ ॐ नं आँ अर्यमसहिताय नारायणाय नमः कुक्षौ ॥ २ ॥ ॐ मों इँ मित्रसहिताय माधवाय नमः हृदये ॥ ३ ॥ ॐ भं ईं वरुणसहिताय गोविंदाय नमः कंठे ॥ ४ ॥ ॐ गं उँ अंशुमत्सहिताय विष्णवे नमः दक्षिणपार्श्वे ॥ ५ ॥ ॐ वं ऊँ भगसहिताय मधुसूदनाय नमः दक्षिणांसे ॥ ६ ॥ ॐ तें एँ विवस्वत्सहिताय त्रिविक्रमाय नमः गले ॥ ७ ॥ ॐ वां ऐं मित्रसहिताय वामनाय नमः ॥ ८ ॥ ॐ सुं ओं पूषसहिताय श्रीधराय नमः वामांसे ॥ ९ ॐ दें ओं पर्जन्यसहिताय हृषीकेशाय नमः गले ॥ १० ॥ ॐ वां अँ त्वष्टृसहिताय पद्मनाभाय नमः पृष्ठे ॥११॥ ॐ यँ अः विष्णुसहिताय दामोदराय नमः ककुदि ॥ १२ ॥ ॐ नमो भगवते वासुदेवाय मूर्ध्नि ॥ १ ॥ ॐ किरीटकेयूरहारम करकुंडलशंखचक्रगदांभोजहस्ताय पीतांबरधराय श्रीवत्सांकितवक्षस्थलाय श्रीभूमिसहिताय स्वात्मज्योतिर्द्वयदीप्तिकरायं सहस्रा

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

दित्यतेजसे नमः ॥ १ ॥ इति व्यापकं च विन्यस्य नारायणं ध्यायेत् ॥ अथ ध्यानम् ॥ उद्यत्कोटिदिवाकराभमनिशं शंखं गदां पंकजं चक्रं बिभ्रतमिंदिरावसुमतीसंशोभि पार्श्वद्वयम् ॥ कोटीरांगदहारकुंडलधरं पीतांबरं कौस्तुभोद्दीप्तं विश्वधरं स्ववक्षसि लसच्छ्रीवत्सचिह्नं भजे ॥ इति ध्यात्वा मानसोपचारैः संपूज्य पीठपूजां कुर्य्यात् ॥ तत्रादौ पूर्ववत् मंडूकादिपरतत्त्वांतपीठदेवताः संपूज्य (पूर्वादिषु केसरेषु) ॐ विमलायै नमः॥१॥ॐ उत्कर्षिण्यै नमः॥२॥ॐ ज्ञानायै नमः॥३॥ॐ क्रियायै नमः॥४॥ॐ योगायै नमः॥५॥ॐ प्रह्वयै नमः॥६॥ॐ सत्यायै नमः॥७॥ॐ ईशानायै नमः॥८॥(मध्ये) ॐ अनुग्रहायै नमः॥९॥इति पीठशक्तीः पूजयेत् ततः ॐ नमो भगवते विष्णवे सर्वभूतात्मने वासुदेवाय सर्वात्मसंयोगपद्मपीठात्मने नमः । इति पुष्पांजलिनाऽऽसनं दत्त्वा तत्र मूलेन मूर्तिं प्रकल्प्य ॥ (अथवा स्वर्णादिनिर्मितं यंत्रं प्रतिमां वा सं स्थाप्य) पूर्ववत् पाद्याद्यैः पुष्पांतैरुपचारैः पुरुषसूक्तेन मूलमंत्रेण च संपूज्य आवरणपूजां कुर्यात् ॥ तद्यथा—आग्नेयादिकोणेषु दिक्षु च ॐ क्रुद्धोल्काय हृदयाय नमः ॥ १ ॥ ॐ महोल्काय शिरसे स्वाहा ॥ २ ॥ ॐ वीरोल्काय शिखायै वषट् ॥ ३ ॥ ॐ द्युल्काय कवचायहुं ॥ ४ ॥ ॐ हस्तोल्काय अस्त्राय फट्॥५॥ इति प्रथमावरणम् ॥१ ॥ तद्बाह्ये केसरेषु पूर्वादिक्रमेण ॐ नमः ॥१॥ ॐ नं नमः ॥२॥ ॐ मों नमः ॥ ३ ॥ ॐ नां नमः ॥४॥ ॐ रां नमः ॥ ५ ॥ ॐ यं नमः ॥ ६ ॥ ॐ णां नमः ॥ ७ ॥ ॐ यं नमः ॥ ८ ॥ इति पूजयेत् । इति द्वितीयावरणम् ॥ २ ॥ तद्बहिरष्टदलेषु पूर्वादिचतुर्दिक्षु । ॐ वासुदेवाय नमः॥१॥ॐ संकर्षणाय नमः॥२॥ॐप्रद्युम्नाय नमः॥३॥ॐअनिरुद्धाय नमः॥४॥ (आग्नेयादिकोणेषु) ॐ शांत्यै नमः ॥ ५ ॥ ॐ श्रियै नमः ॥ ६ ॥ ॐ सरस्वत्यै नमः ॥ ७ ॥ ॐ रत्यैनमः ॥ ८ ॥ इति

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

❀ तृतीयावरणम् ॥ ३ ॥ ततो दलाग्रेषु ॐ शंखाय नमः ॥ १ ॥ ॐ चक्राय० ॥ २ ॥ ॐ गदायै० ॥ ३ ॥ ॐ पद्माय० ॥ ४ ॥ ॐ कौस्तुभाय० ॥ ५ ॥ ॐ मुशलाय० ॥ ६ ॥ ॐ खड्गाय० ॥ ७ ॥ ॐ वनमालायै नमः ॥ ८ ॥ इति चतुर्थावरणम् ॥ ४ ॥ तद्बहिरग्रे ॐ गरुडाय नमः ॥ १ ॥ (दक्षिणे) ॐ शंखनिधये नमः ॥ २ ॥ (वामे) ॐ पद्मनिधये नमः ॥ ३ ॥ (पश्चिमे) ॐ ध्वजाय नमः ॥ ४ ॥ (अग्निकोणे) ॐ विघ्नाय नमः ॥ ५ ॥ (निर्ऋतिकोणे) ॐ आर्याय नमः ॥ ६ ॥ (वायुकोणे) ॐ दुर्गायै० ॥ ७ ॥ (ऐशान्याम्) ॐ सेनान्यै नमः ॥ ८ ॥ इति पंचमावरणम् ॥ ५ ॥ ततस्तद्बाह्ये भूपुरे पूर्वादि क्रमेण । ॐ इंद्राय नमः ॥ १ ॥ ॐ अग्नये नमः ॥ २ ॥ ॐ यमाय नमः ॥ ३ ॥ ॐ निर्ऋतये नमः ॥ ४ ॥ ॐ वरुणाय नमः ॥ ५ ॥ ॐ वायवे नमः ॥६॥ ॐ कुबेराय नमः ॥ ७ ॥ ॐ ईशानाय नमः ॥ ८ ॥ (ईशानपूर्वयोर्मध्ये) ॐ ब्रह्मणे नमः ॥ ९ ॥ (निर्ऋतिपश्चिमयोर्मध्ये) ॐ अनंताय नमः ॥ १० ॥ इति षष्ठावरणम् ॥ ६ ॥ (पुनः पूर्वादिक्रमेण) ॐ वज्राय नमः ॥ १ ॥ ॐ शक्तये नमः ॥ २ ॥ ॐ दंडाय नमः ॥ ३ ॥ खड्गाय नमः ॥ ४ ॥ ॐ पाशाय नमः ॥ ५ ॥ ॐ अंकुशाय नमः ॥ ६ ॥ ॐ गदायै नमः ॥ ७ ॥ ॐ त्रिशूलाय नमः ॥ ८ ॥ ॐ पद्माय नमः ॥ ९ ॥ ॐ चक्राय नमः ॥ १० ॥ इत्यायुधानि च पूजयेत् । इति सप्तमावरणम् ॥ ७ ॥ इत्यावरणपूजां कृत्वा । मूलमंत्रेण पुरुषसूक्तेन च धूपदीपनैवेद्याचमनीयतांबूलदक्षिणानीराजनैर्नारायणं संपूज्य । "ॐ जितं ते पुंडरीकाक्ष नमस्ते विश्वभावन ॥ सुब्रह्मण्य नमस्तेस्तु महापुरुष पूर्वज"

❀ श्रीतारायणमंत्रानुष्ठानपूजायंत्रम्—प्र. ३ चि. पृ. नं. २५१

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

इत्यादिमहापुरुषस्तवेन पूर्वोक्तेन स्तुत्वा साष्टांगं प्रणम्य । यथाविधि जपं कुर्य्यात् ॥ अस्य पुरश्चरणं षोडशलक्षात्मकम् ॥ ततो जपांते मधुराप्लुतैः कमलैर्दशांशहोमं कृत्वा तद्दशांशेन तर्पणं तद्दशांशेन मार्जनं तद्दशांशेन ब्राह्मणांश्च भोजयेत् ॥ तथा च (शारदातिलके) "विकारलक्षं प्रजपेन्मनुमेनं समाहितः ॥ तद्दशांशं सरासिजैर्जुहुयान्मधुराप्लुतैः ॥ १ ॥ एवं संपूजयेद्विष्णुं प्रोक्तैरावरणैः सह ॥ धर्मार्थकामाँल्लब्ध्वा वै विष्णोः सायुज्यमाप्नुयात् ॥ इति श्रीविष्णोरष्टाक्षरनारायणमंत्रपुरश्चरणप्रयोगः ॥ अथ विष्णोर्द्वादशाक्षरमंत्रप्रयोगः ॥ (मूलमंत्रो यथा) "ॐ नमो भगवते वासुदेवाय" इति द्वादशाक्षरो मंत्रः ॥ अस्य मंत्रस्य प्रजापतिः ऋषिः । गायत्री छंदः । वासुदेवो देवता । धर्मार्थकाममोक्षार्थे जपे विनियोगः ॥ ॐ प्रजापतिऋषये नमः शिरसि ॥ १ ॥ ॐ गायत्रीछंदसे नमः मुखे ॥ २ ॥ ॐ वासुदेवदेवतायै नमः हृदये ॥ ३ ॥ इति ऋष्यादिन्यासः ॥ ॐ अंगुष्ठाभ्यां नमः ॥ १ ॥ ॐ नमो तर्जनीभ्यां नमः ॥ २ ॥ ॐ भगवते मध्यमाभ्यां नमः ॥ ३ ॥ ॐ वासुदेवाय अनामिकाभ्यां नमः ॥ ४ ॥ ॐ नमो भगवते वासुदेवाय कनिष्ठिकाभ्यां नमः ॥ ५ ॥ इति करन्यासः ॥ एवं हृदयादिनेत्रवर्जपंचांगन्यासं कृत्वा मंत्रन्यासं कुर्यात् ॥ तद्यथा—ॐ नमः मूर्ध्नि ॥ १ ॥ ॐ नं नमः ललाटे ॥ २ ॥ ॐ मों नमः नेत्रयोः ॥ ३ ॥ ॐ भं नमः मुखे ॥ ४ ॥ ॐ गं नमः गले ॥ ५ ॥ ॐ वं नमः बाह्वोः ॥ ६ ॥ ॐ तें नमः हृदये ॥ ७ ॥ ॐ वां नमः कुक्षौ ॥ ८ ॥ ॐ सुं नमः नाभौ ॥ ९ ॥ ॐ दें नमः लिंगे ॥ १० ॥ ॐ वां नमः जानुनोः ॥ ११ ॥ ॐ यं नमः पादयोः ॥ १२ ॥ इति मंत्रन्यासः ॥ अथ मूर्तिपंजरन्यासः ॥ ॐ अं केशवाय धात्रे नमः ललाटे ॥ १ ॥ ॐ नं आं नारायणाय अर्यम्णे नमः कुक्षौ ॥ २ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ॐ मां इं माधवाय मित्राय नमः हृदि ॥ ३ ॥ ॐ भं ईं गोविंदाय वरुणाय नमः कंठे ॥ ४ ॥ ॐ गं उं विष्णवे अंशवे नमः कंठदक्षपार्श्वे ॥ ५ ॥ ॐ यं ऊं मधुसूदनाय भगाय नमः दक्षिणांसे ॥ ६ ॥ ॐ तें एं त्रिविक्रमाय विवस्वते नमः दक्षगले ॥ ७ ॥ ॐ वां ऐं वामनाय मित्राय नमः कंठवामपार्श्वे ॥ ८ ॥ ॐ सुं ओं श्रीधराय पूष्णे नमः वामांसे ॥ ९ ॥ ॐ दें औं हृषीकेशाय पर्जन्याय नमः वामगले ॥ १० ॥ ॐ वां अं पद्मनाभाय त्वष्ट्रे नमः पृष्ठे ॥ ११ ॥ ॐ यं अः दामोदराय विष्णवे नमः ककुदि ॥ १२ ॥ ॐ नमो भगवते वासुदेवाय नमः शिरसि ॥ १३ ॥ इति पंजरन्यासः । "ॐ किरीटकेयूरहारमकरकुंडलधरशंखचक्रगदां भोजपीतांबरधरश्रीधरश्रीवत्सांकितवक्षःस्थलश्रीभूमिसहितआत्मज्योतिर्द्वयदीप्तकरायसहस्रादित्यतेजसेनमः ।" इति मंत्रेण व्यापकं विन्यस्य ध्यायेत ॥ अथ ध्यानम् ॥ विष्णुं शारदचंद्रकोटिसदृशं शंखं रथांगं गदामंभोजं दधतं सिताब्जनिलयं कांत्या जगन्मोहनम् ॥ आबद्धांगदहारकुंडलमहामौलिं स्फुरत्कंकणं श्रीवत्सांकमुदारकौस्तुभधरं वंदे मुनींद्रैः स्तुतम् ॥ १ ॥ इति ध्यात्वा ॥ पीठपूजां कुर्य्यात् ॥ तत्रादौ पीठे । पूर्वोक्तमंडूकादिपरतत्त्वांतदेवताः संपूज्य । पूर्वादिषु ॐ विमलायै नमः ॥ १ ॥ ॐ उत्कर्षिण्यै० ॥ २ ॥ ॐ ज्ञानायै० ॥ ३ ॥ ॐ क्रियायै० ॥ ४ ॥ ॐ योगायै० ॥ ५ ॥ ॐ प्रह्व्यै० ॥ ६ ॥ ॐ सत्यायै० ॥ ७ ॥ ॐ ईशानायै० ॥ ८ ॥ (मध्ये) ॐ अनुग्रहायै नमः ॥ ९ ॥ इति पीठशक्तीः संपूज्य ॐ नमो भगवते विष्णवे सर्वभूतात्मने वासुदेवाय सर्वात्मसंयोगपद्मपीठात्मने नमः इत्यासनं दत्त्वा तत्र मूलेन मूर्तिं प्रकल्प्य (अथवा स्वर्णादिनिर्मितं यंत्रं प्रतिमां वा संस्थाप्य) पूर्ववत् पाद्याद्यैः पुष्पांतैरुपचारैः पुरुषसूक्तेन मूलमंत्रेण च संपूज्य आवरणपूजां कुर्य्यात् ॥ तद्यथा

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(आग्नेयादिकोणेषु दिक्षु च) ॐ हृदयाय नमः ॥ १ ॥ ॐ नमः शिरसे स्वाहा ॥ २ ॥ ॐ भगवते शिखायै वषट् ॥ ३ ॥ ॐ वासुदेवाय कवचाय हुं ॥ ४ ॥ ॐ नमो भगवते वासुदेवाय अस्त्राय फट् ॥ ५ ॥ इति नेत्रवर्जपंचांगान्यभ्यर्च्य । (तद्बहिरष्टद लेषु पूर्वादिक्रमेण) ॐ वासुदेवाय नमः ॥ १ ॥ (दक्षिणे) ॐ संकर्षणाय० ॥ २ ॥ (पश्चिमे) ॐ प्रद्युम्नाय० ॥ ३ ॥ (उत्तरे) ॐ अनिरुद्धाय नमः ॥ ४ ॥ (अग्निकोणे) ॐ शांत्यै नमः ॥ ५ ॥ (नैर्ऋत्याम्) ॐ श्रियै नमः ॥ ६ ॥ (वायव्याम्) ॐ सरस्वत्यै० ॥ ७ ॥ (ऐशान्याम्) ॐ रत्यै नमः ॥ ८ ॥ (ततो दलाग्रेषु) ॐ शंखाय नमः ॥ १ ॥ ॐ चक्राय० ॥ २ ॥ ॐ गदायै० ॥ ३ ॥ ॐ पद्माय० ॥ ४ ॥ ॐ कौस्तुभाय० ॥ ५ ॥ ॐ मुसलाय० ॥ ६ ॥ ॐ खड्गाय० ॥ ७ ॥ ॐ वनमालायै नमः ॥ ८ ॥ इति पूजयेत् (तद्बहिर्देवाग्रे) ॐ गरुडाय नमः ॥ १ ॥ (दक्षिणे) ॐ शंखनिधये नमः ॥ २ ॥ (वामे) ॐ पद्मनिधये नमः ॥ ३ ॥ (पश्चिमे) ॐ ध्वजाय नमः ॥ ४ ॥ (अग्निकोणे) ॐ विघ्नाय नमः ॥ ५ ॥ (नैर्ऋत्याम्) ॐ आर्यायै नमः ॥ ६ ॥ (वायव्याम्) ॐ दुर्गायै नमः ॥ ७ ॥ (ऐशान्याम्) ॐ सेनान्यै नमः ॥ ८ ॥ इति संपूज्य तद्बहिः भूपुरे पूर्वादिषु पूर्ववत् इंद्रादिदशदिक्पालान् पूजयित्वा । तद्बाह्ये वज्राद्यायुधानिच पूजयेत् । एवमावरणपूजां कृत्वा वासुदेवं धूपादिनीराजनांतैरुपचारैः संपूज्य स्तवेन स्तुत्वा साष्टांगं प्रणम्य जपं कुर्य्यात् । अस्य पुरश्चरणं द्वादशलक्षात्मकम् ॥ जपान्ते आज्यप्लुतैस्तिलैः पायसेन क्षीरद्रुमसमिद्भिश्च दशांशेन वा शतांशेन होमः । तद्दशांशेन तर्पणम् ॥ तद्दशांशेन मार्ज्जनम् ॥ तद्दशांशेन यथाशक्ति वा ब्राह्मणान् भोजयेत् । तथा च (शारदातिलके) "वर्णलक्षं जपेन्मंत्रं दीक्षितो विजितेंद्रियः ॥ तत्सहस्रं प्रजुहुयात्तिलै

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

राज्यपरिच्छुतैः ॥ १ ॥ एवं संपूजितो विष्णुः प्रदद्यादिष्टमात्मनः ॥ पायसेन घृताक्तेन मंत्रवर्णसहस्रकम् ॥ २ ॥ जुहुयान्मानवः सिद्धयै समिद्भिः क्षीरिभूरुहाम् ॥ तत्संख्यया पयोक्ताभिः सर्वपापविमुक्तये ॥ ३ ॥ इति वासुदेवमंत्रपुरश्चरणम् ॥ अथ लक्ष्मी नारायणमंत्रपुरश्चरणप्रयोगः (शारदातिलके) भूतशुद्ध्यादिकेशवादिकलामातृकान्यासांतं पूर्ववत् ॥ मंत्रस्वरूपं यथा—" ह्रीँह्रीँ श्रीँश्रीँलक्ष्मीवासुदेवाय नमः ॥" इति चतुर्दशाक्षरो मंत्रः ॥ अस्य मंत्रस्य प्रजापतिः ऋषिः । गायत्री छंदः । वासुदेवो देवता । धर्मार्थकाममोक्षसिद्ध्यर्थे जपे विनियोगः ॥ ॐ प्रजापतिऋषये नमः शिरसि ॥ १ ॥ ॐ गायत्रीछंदसे नमः मुखे ॥ २ ॥ ॐ वासुदेवदेवतायै नमः हृदये ॥ ३ ॥ इति न्यस्य ॐ ह्रीँह्रीँअंगुष्ठाभ्यां नमः ॥ १ ॥ ॐ श्रीँश्रीँतर्जनीभ्यां नमः ॥ २ ॥ ॐ लक्ष्मीमध्यमाभ्यां नमः ॥ ३ ॥ ॐ वासुदेवाय अनामिकाभ्यां नमः ॥ ४ ॥ ॐ नमः कनिष्ठिकाभ्यां नमः ॥ ५ ॥ इति कर न्यासः ॥ एवमेव नेत्रवर्जहृदयादिपंचांगन्यासं कुर्य्यात् ॥ तद्यथा—ॐ क्रींक्रीं हृदयाय नमः ॥ १ ॥ ॐ श्रीँश्रीँ शिरसे स्वाहा ॥ २ ॥ ॐ लक्ष्मीशिखायै वषट् ॥ ३ ॥ ॐ वासुदेवाय कवचाय हुं ॥ ४ ॥ ॐ नमः अस्त्राय फट् ॥ ५ ॥ एवं हृदयादिपंचां गन्यासं कृत्वा ध्यायेत ॥ विद्युच्चंद्रनिभं वंपुः कमलजावैकुंठयोरेकतां प्राप्तं स्नेहवशेन रत्नविलसद्भूषाभरालंकृतम् ॥ विद्यापंकज दर्पणान्मणिमयं कुंभं सरोजं गदां शंखं चक्रमप्यनि बिभ्रदमितां दिश्याच्छ्रियं वः सदा ॥ १ ॥ इति ध्यानं कृत्वा ॥ पूर्वोक्तद्वादशा क्षरमंत्रवत् पीठपूजामावरणपूजां च कृत्वा जपं कुर्यात् । अस्य पुरश्चरणं चतुर्दशलक्षात्मकं (तथा च) वर्णलक्षं जपेदेनं तत्सहस्रं सरोरुहैः ॥ होमं कुर्याद्घृतसितैर्मधुरत्रयसंयुतैः ॥ १ ॥ पूजा स्याद्वैष्णवे पीठे द्वादशाक्षरवर्त्मना ॥ पायसेन कृतो होमो लक्ष्मीवश्य

॥२५३॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

प्रदायकः ॥ २ ॥ मधुराक्तैस्तिलैर्हुत्वा सर्वकार्याणि साधयेत् ॥ इति लक्ष्मीनारायणमंत्रपुरश्चरणम् ॥ अथ दधिवामनाख्यचम त्कारिप्रयोगः ॥ भूतशुद्ध्यादिकेशवादिकलामातृकान्यासांतं पुर्ववत् । मंत्रो यथा–(शारदायाम्) " ॐ नमो विष्णवे सुरपतये महाबलाय स्वाहा ॥" इत्यष्टादशाक्षरो मंत्रः। अस्य मंत्रस्य इंदुः ऋषिः।विराट् छंदः । दधिवामनो देवता । सर्वेष्टसिद्धये जपे विनि योगः ॥ ॐ इन्दुऋषये नमः शिरसि ॥ १ ॥ ॐ विराट्छंदसे नमः मुखे ॥ २ ॥ ॐ दधिवामनदेवतायै नमः हृदये ॥ ३ ॥ इति ऋष्यादिन्यासः ॥ १ ॥ ॐ अंगुष्ठाभ्यां नमः ॥ १ ॥ ॐ नमो तर्जनीभ्यां नमः ॥ २ ॥ ॐ विष्णवे मध्यमाभ्यां नमः ॥ ३ ॥ ॐ सुरपतये अनामिकाभ्यां नमः ॥ ४ ॥ ॐ महाबलाय कनिष्ठिकाभ्यां नमः ॥ ५ ॥ ॐ स्वाहा करतलकरपृष्ठाभ्यां नमः ॥ ६ ॥ इति करन्यासः ॥ २ ॥ एवमेव हृदयादिषडंगन्यांसं कुर्यात् ॥ ततः ॐ नमः मूर्ध्नि ॥१॥ ॐ नं नमः भाले ॥ २ ॥ ॐ मों नमः नेत्रयोः ॥ ३ ॥ ॐ विं नमः कर्णयोः ॥ ४ ॥ ॐ ष्णं नमः नासिकयोः ॥ ५ ॥ ॐ वें नम ओष्ठयोः ॥ ६ ॥ ॐ सुं नमः तालुके ॥ ७ ॥ ॐ रं नमः कंठे ॥ ८ ॥ ॐ पं नमः बाहुद्वये ॥ ९ ॥ ॐ तं नमः पृष्ठे ॥ १० ॥ ॐ यें नमः हृदये ॥ ११ ॥ ॐ मं नमः उदरे ॥ १२ ॥ ॐ हां नमः नाभौ ॥ १३ ॥ ॐ वं नमः गुह्ये ॥ १४ ॥ ॐ लां नमः ऊरुद्वये ॥ १५ ॥ ॐ यं नमः जानुद्वये ॥ १६ ॥ ॐ स्वां नमः जंघयोः ॥ १७ ॥ ॐ हां नमः पादयोः ॥ १८ ॥ इति मंत्रन्यासः ॥ ४ ॥ इति न्यासं कृत्वा ध्यायेत् ॥ "मुक्तागौरं नवमणिलसद्भूषणं चंद्रसंस्थं भृंगाकारैरलकनिकरैः शोभि वक्त्रारविंदम् ॥ हस्ताब्जाभ्यां कन ककलशं शुद्धतोयैस्सुपूर्णं दध्यान्नाढ्यं कनकचषकं धारयंतं भजामः ॥ १ ॥ इति ध्यात्वा पीठे मंडूकादिचंद्रमंडलांतपीठदे

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वताः पूर्वत् संपूज्य द्वादशाक्षरमंत्रोदितविमलादिनवपीठशक्तीः संपूजयेत् ॥ ॐ नमो भगवते विष्णवे सर्वभूतात्मने वासुदेवाय सर्वात्मसंयोगपदपीठात्मने नमः ॥ इत्यासनं दत्त्वा मूलेन मूर्तिं प्रकल्प्य पुष्पांतैरुपचारैः संपूज्य आवरणपूजां कुर्यात् ॥ तद्यथा अग्न्यादिकोणेषु मध्ये दिक्षु च ॐ हृदयाय नमः ॥ १ ॥ इत्यादि षडंगान्यभ्यर्च्य तद्बहिरष्टदलेषु पूर्वादिक्रमेण पूर्ववत् वासुदेवादीन् शक्तिसहितान् पूजयेत् ततोदलाग्रेषु ॐ केशवाय नमः ॥ १ ॥ ॐ नारायणाय नमः ॥ २ ॥ ॐ माधवाय नमः ॥ ३ ॥ ॐ गोविंदाय नमः ॥ ४ ॥ ॐ विष्णवे नमः ॥ ५ ॥ ॐ मधुसूदनाय नमः ॥ ६ ॥ ॐ त्रिविक्रमाय नमः ॥ ७ ॥ ॐ वामनाय नमः ॥ इति पूजयेत् ॥ तद्बाह्ये ध्वजादीन् तद्बहिः भूपुरे पूर्वादिक्रमेण इंद्रादिदिक्पालान् सायुधांश्च संपूज्य तद्बहिः ॐ ऐरावताय नमः ॥ १ ॥ ॐ पुंडरीकाय नमः ॥ २ ॥ ॐ वामनाय नमः ॥ ३ ॥ ॐ कुमुदाय नमः ॥ ४ ॥ ॐ अंजनाय नमः ॥ ५ ॥ ॐ पुष्पदंताय नमः ॥ ६ ॥ सार्वभौमाय नमः ॥ ७ ॥ ॐ सुप्रतीकाय नमः ॥ ८॥ इत्यष्टौ गजान् पूजयेत् ॥ एवं सप्तावरणपूजां कृत्वा धूपदीपादिनीराजनांतैरुपचारैर्देवं संपूज्य जपं कुर्यात् ॥ अस्य पुरश्चरणं लक्षत्रयात्मकम् । तथा च–"गुणलक्षं जपेन्मंत्रं तद्दशांशं घृतप्लुतैः ॥ पायसान्नैः प्रजुहुयाद्ध्यब्नैर्वा यथाविधि ॥ १ ॥ विधानमेतद्देवस्य कीर्तितं सुरपूजितम् ॥ पायसाज्येन जुहुयात्सहस्रं श्रियमाप्नुयात् ॥ २ ॥ धान्यहोमेन धान्यातिः शतपुष्पासमुद्भवैः ॥ बीजैः सहस्रसंख्याकैर्होमो भयविनाशनः ॥ ३ ॥ दध्योदनेन शुद्धेन हुत्वा मुच्येत दुर्गतेः ॥ स्मृत्वा त्रैविक्रमं रूपं जपेन्मंत्रमनन्यधीः ॥ ४ ॥ मुक्तो बंधाद्भवेत्सद्यो नात्र कार्या विचारणा ॥ पटे संपाद्य देवेशं भित्तौ वा पूजयेत्सुधीः ॥ ५ ॥ सुगंधकुसुमैर्नित्यं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

महतीं श्रियमश्नुते इति दधिवामनमंत्रप्रयोगः ॥ ॥ अथ राममंत्रपुरश्चरणप्रयोगः ॥ मंत्रो यथा—"ॐ रां रामाय नमः" (अथ षडक्षरो मंत्रः)(तंत्रसारे) अयं मंत्रः षड्विधः। तथा च—स्वकामशक्तिवाग्लक्ष्मीताराद्यः पंचवर्णकः॥षडक्षरः षड्विधः स्याच्च तुवर्गफलप्रदः ॥ १ ॥ ब्रह्मासंमोहनः शक्तिर्दाक्षिणामूर्तिरव्ययः ॥ अगस्तिः श्रीशिवः प्रोक्तो मुनयोत्र क्रमादिमे ॥ २ ॥ अस्य मंत्रस्य ब्रह्मा ऋषिः। गायत्री छंदः। श्रीरामो देवता। सर्वेष्टसिद्धये जपे विनियोगः। ॐ ब्रह्मऋषये नमः शिरसि॥१॥ ॐ गायत्रीछंदसे नमः मुखे ॥ २ ॥ ॐ श्रीरामदेवतायै हृदि ॥ ३ ॥ इति ऋष्यादिन्यासः ॥ ॐ रां अंगुष्ठाभ्यां नमः ॥ १ ॥ ॐ रीं तर्जनीभ्यां नमः ॥ २ ॥ ॐ रूं मध्यमाभ्यां नमः ॥ ३ ॥ ॐ रैं अनामिकाभ्यां नमः ॥ ४ ॥ ॐ रौं कनिष्ठिकाभ्यां नमः ॥ ५ ॥ ॐ रः करतलकरपृष्ठाभ्यां नमः ॥ ६ ॥ इति करन्यासः ॥ एवं हृदयादिन्यासं कुर्यात् ॥ अथ मंत्रन्यासः ॥ ॐ रां नमः ब्रह्मरंध्रे ॥ १ ॥ ॐ रां नमः भ्रुवोर्मध्ये ॥ २ ॥ ॐ मां नमः हृदि ॥ ३ ॥ ॐ यं नमः नाभौ ॥ ४ ॥ ॐ नं नमः लिंगे ॥ ५ ॥ ॐ मं नमः पादयोः इति न्यासं कृत्वा ध्यायेत् ॥ "कालांभोधरकांतिकांतमनिशं वीरासनाध्यासिनं मुद्रां ज्ञानमयीं दधानमपरं हस्तां बुजं जानुनि ॥ सीतां पार्श्वगतां सरोरुहकरां विद्युन्निभां राघवं पश्यंतीं मुकुटांगदादिविविधाकल्पोज्वलांगं भजे ॥ १ ॥ इति ध्यात्वा। पूर्वोक्ते द्वादशाक्षरे वैष्णवे पीठे पीठपूजां कृत्वा मूलेन मूर्तिं प्रकल्प्य पुष्पांतैरुपचारैः संपूज्यावरणपूजां कुर्यात् ॥ तद्यथा (देववामपार्श्वे) श्रीं सीतायै नमः ॥ १ ॥ (अग्रे) ॐ शार्ङ्गाय नमः ॥२॥(दक्षपार्श्वे) ॐ सरेभ्यो नमः ॥३॥ (वामपार्श्वे) ॐ चापाय नमः ॥ ४ ॥ इति पूजयेत् ॥ इति प्रथमावरणम् ॥ १ ॥ तद्बहिः केसरेषु अग्न्यादिकोणेषु मध्ये दिक्षु च ॐ रां

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

❀ हृदयाय नमः ॥ १ ॥ इत्यंगानि पूर्ववत्संपूजयेत् ॥ इति द्वितीयावरणम् ॥ २ ॥ ततोऽष्टदलेषु पूर्वादि दिक्षु । ॐ हनुमते नमः ॥ १ ॥ ॐ सुग्रीवाय नमः ॥ २ ॥ ॐ भरताय नमः ॥ ३ ॥ ॐ विभीषणाय नमः ॥ ४ ॥ ॐ लक्ष्मणाय नमः ॥ ५ ॥ ॐ अंगदाय नमः ॥ ६ ॥ ॐ शत्रुघ्नाय नमः ॥ ७ ॥ ॐ जांबवते नमः ॥ ८ ॥ इति पूजयेत् ॥ इति तृतीयावरणम् ॥ ३ ॥ ततो दलाग्रेषु । ॐ सृष्टये नमः ॥ १ ॥ ॐ जयंताय नमः ॥ २ ॥ ॐ विजयाय नमः ॥ ३ ॥ ॐ सुराष्ट्राय नमः ॥ ४ ॥ ॐ राष्ट्रवर्धनाय नमः ॥ ५ ॥ ॐ अकोपाय नमः ॥ ६ ॥ ॐ धर्म्मपालाय नमः ॥ ७ ॥ ॐ सुमंताय नमः ॥ ८ ॥ इति चतुर्थावरणम् ॥ ४ ॥ ततो भूपुरे पूर्वादिदिक्षु इंद्रादिदशदिक्पालान्सायुधांश्च संपूज्य । धूपादिनीराजनांतैरुपचारैः श्रीरामं समर्च्य स्तवेन स्तुत्वा जपं कुर्य्यात् । अस्य पुरश्चरणं षड्लक्षात्मकम् । तथा च (शारदायाम्) "वर्णलक्षं जपेन्मंत्रं तद्दशांशं सरोरुहैः ॥ जुहुयादर्चिते वह्नौ ब्राह्मणान्भोजयेत्ततः ॥ १ ॥ एवं पूजादिभिः सिद्धे मनौ कर्म्माणि साधयेत् ॥ जातीप्रसूनैर्जुहुयाच्चंदनांभःसमुक्षितैः ॥ २ ॥ राज्यवश्याय कमलैर्धनधान्यादिसंपदे ॥ नीलोत्पलानां होमेन वशयेदखिलं जगत् ॥ ३ ॥ बिल्वप्रमाणैर्जुहुयादिंदिरावाप्तये नरः ॥ दूर्वाहोमेन दीर्घायुर्भवेन्मंत्री निरामयः ॥ ४ ॥ रक्तोत्पलहुतान्मंत्री धनमाप्नोति वांछितम् ॥ मेधाकामेन होतव्यं पालाशकुसुमैर्नवैः ॥ ५ ॥ तज्जतमंभः प्रपिबेत्कविर्भवति वत्सरात् ॥ तन्मंत्रितान्नं भुंजीत महदारोग्यमाप्नुयात् ॥ ६ ॥ इति षडक्षरश्रीराममंत्रपुरश्चरणं समाप्तम् ॥ ॥

❀ श्रीरामयंत्रमिदम्—प्र. ३ चि. पृ. नं. २५५.

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अथ दशाक्षररामंत्रप्रयोगः ॥ मंत्रो यथा–"ॐ जानकीवल्लभाय स्वाहा हुं" इति दशाक्षरो मंत्रः ॥ अस्य मंत्रस्य वसिष्ठ ऋषिः । विराट् छंदः। जानकीवल्लभो रामो देवता।रां बीजम् । स्वाहा शक्तिः । सर्वेष्टसिद्धये विनियोगः ॥ ॐ वसिष्ठऋषिये नमः शिरसि ॥ १ ॥ ॐ विराट्छंदसे नमः मुखे ॥२॥ ॐ रामदेवतायै नमः हृदि ॥ ३ ॥ ॐ रां बीजाय नमः गुह्ये ॥ ४ ॥ ॐ स्वाहाशक्तये नमः पादयोः॥५॥इति ऋष्यादिन्यासः॥१॥ ॐ क्लीं अंगुष्ठाभ्यां नमः ॥१॥ॐ क्लीं तर्जनीभ्यां नमः ॥२॥ॐ क्लीं मध्यमाभ्यां नमः ॥ ३ ॥ ॐ क्लीं अनामिकाभ्यां नमः ॥ ४ ॥ ॐ क्लीं कनिष्ठिकाभ्यां नमः ॥ ५ ॥ इति करन्यासः ॥ २ ॥ एवं हृदयादिन्यासं कुर्यात् ॥ ३ ॥ ततः ॐ जां शिरसि ॥ १ ॥ ॐ नं ललाटे ॥ २ ॥ ॐ कीं भ्रुवोः ॥ ३ ॥ ॐ वं तालवोः ॥ ४ ॥ ॐ ल्लं कंठे ॥५॥ ॐ भां हृदि ॥ ६ ॥ ॐ यं नाभौ ॥ ७ ॥ ॐ स्वां ऊर्वोः ॥ ८ ॥ ॐ हां जानुनोः ॥ ९ ॥ ॐ हुं पादयोः ॥ १० ॥ इति न्यासं कृत्वा ध्यायेत् ॥ अथ ध्यानम् ॥ "अयोध्यानगरे रम्ये रत्नसौन्दर्य्यमंडपे ॥ मंदारपुष्पैराबद्धवितानतोरणांचिते ॥ १ ॥ सिंहासन समारूढं पुष्पकोपरिराघवम् ॥ रक्षोभिर्हरिभिर्देवैर्दिव्ययानगतैः शुभैः ॥ २ ॥ संस्तूयमानमुनिभिः सर्वतः परिसेवितम् ॥ सीता लंकृतवामांगं लक्ष्मणेनोपशोभितम् ॥३॥ श्यामं प्रसन्नवदनं सर्वाभरणभूषितम् ॥ " इति ध्यात्वा पूर्वोक्तमंत्रवत् पीठपूजादिकं कृत्वा जपं कुर्यात् ॥ तथा च–'ध्यायेद्देवं जपेन्मंत्रं वर्णलक्षमनन्यधीः ॥ अन्यत्सर्वं पूर्ववत् ॥' इति दशाक्षररामंत्रप्रयोगः ॥ अथ नरसिंहमंत्रप्रयोगः ॥ (शारदायाम्) मंत्रो यथा–"ॐ उग्रं वीरं महाविष्णुं ज्वलंतं सर्वतोमुखम् ॥ नृसिंहं भीषणं भद्रं मृत्युमृत्युं नमाम्यहम् ॥१॥" इति द्वात्रिंशद्वर्णात्मको मंत्रः ॥ अस्य मंत्रस्य ब्रह्मा ऋषिः । अनुष्टुप् छंदः। श्रीनरसिंहो देवता । हं बीजम् । ईं शक्तिः । सर्वेष्टसिद्धयर्थं जपे

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

विनियोगः ॥ ॐ ब्रह्मऋषये नमः शिरसि ॥१॥अनुष्टुप्छंदसे नमः मुखे॥२॥श्रीनृसिंहदेवतायै नमः हृदि ॥३॥ ॐ हं बी जाय नमः गुह्ये ॥ ४ ॥ ॐ ईं शक्तये नमःपादयोः ॥५॥ इति ऋष्यादिन्यासः॥१॥ॐ उग्रं वीरम् अंगुष्ठाभ्यां नमः ॥१॥ॐ महाविष्णुं तर्जनीभ्यां नमः ॥२॥ॐज्वलंत सर्वतोमुखं मध्यमाभ्यां नमः॥३॥ॐ नृसिंहं भीषणम् अनामिकाभ्यां नमः ॥४॥ ॐ भद्रं मृत्युमृत्युं कनिष्ठिकाभ्यां नमः ॥ ५ ॥ ॐ नमाम्यहं करतलकरपृष्ठाभ्यां नमः ॥ ६ ॥ इति करन्यासः ॥ एवं हृदयादिषडंगन्यासं कुर्य्यात् ॥ ३ ॥ ॐ उं नमः शिरसि ॥ १ ॥ ॐ ग्रं नमः ललाटे ॥ २ ॥ ॐ वीं नमः नेत्रयोः ॥ ३ ॥ ॐ रं नमः मुखे ॥ ४ ॥ ॐ मं नमः दक्षिणबाहुमूले ॥ ५ ॥ ॐ हां नमः दक्षकूर्परे ॥ ६ ॥ ॐ विं नमः दक्षिणमणिबंधे ॥ ७ ॥ ॐ ष्णुं नमः दक्षहस्तांगुलिमूले ॥८॥ ॐ ज्वं नमः दक्षहस्तांगुल्यग्रे ॥ ९ ॥ ॐ लं नमः वामबाहुमूले ॥ १० ॥ ॐ तं नमः वामकूर्परे ॥ ११ ॥ ॐ सं नमः वाममणिबंधे॥१२॥ ॐ वैं नमः वामहस्तांगुलिमूले ॥१३॥ ॐ तों नमः वामहस्तांगुल्यग्रे॥१४॥ॐ मैं नमः दक्षपादमूले॥१५॥ ॐ खं नमः दक्षजानुनि ॥ १६ ॥ ॐ नृं नमः दक्षगुल्फे ॥१७॥ ॐ सिं नमः दक्षपादांगुलिमूले ॥ १८ ॥ ॐ हं नमः दक्षपादांगुल्यग्रे॥१९॥ ॐ भीं नमः वामपादमूले ॥ २० ॥ ॐ षं नमः वामजानुनि ॥२१॥ ॐ णं नमः वामगुल्फे ॥ २२ ॥ ॐ भं नमः वामपादांगुलिमूले ॥ २३ ॥ ॐ द्रं नमः वामपादांगुल्यग्रे ॥ २४ ॥ॐ मृं नमः दक्षिणकुक्षौ ॥२५॥ ॐ त्युं नमः वामकुक्षौ ॥२६॥ ॐ मृं नमः हृदि ॥ २७ ॥ ॐ त्युं नमः गले ॥ २८ ॥ ॐ नं नमः दक्षिणपार्श्वे ॥ २९ ॥ ॐ मां नमः वामपार्श्वे ॥ ३० ॥ ॐ म्यं नमः लिंगे ॥ ३१ ॥ ॐ हं नमः ककुदि ॥ ३२ ॥ इति मंत्रन्यासः ॥ ५ ॥ इति न्यासविधिं कृत्वा ध्यायेत् " माणिक्या

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

❋ द्विसमप्रभं निजरुचा संत्रस्तरक्षोगणं जानुन्यस्तकरांबुजं त्रिनयनं रत्नोल्लसद्भूषणम् ॥ बाहुभ्यां धृतशंखचक्रमनिशं दंष्ट्राग्रवक्त्रोल्लसज्ज्वालाजिह्वमुदग्रकेशनिचयं वंदे नृसिंहं विभुम् ॥ १ ॥ इति ध्यात्वा पूर्वोक्तविष्णोः पीठपूजादि कृत्वा मूलेन मूर्तिं प्रकल्प्य पुष्पांतैरुपचारैः नृसिंहं संपूज्य आवरणपूजां कुर्यात् ॥ (अग्न्यादिकोणकेसरेषु मध्ये दिक्षु च) ॐ उग्रं वीरं हृदयाय नमः ॥ १ ॥ ॐ महाविष्णुं शिरसे स्वाहा ॥ २ ॥ ॐ ज्वलंतं सर्वतोमुखं शिखायै वषट् ॥ ३ ॥ ॐ नृसिंहं भीषणं कवचाय हुं ॥ ४ ॥ ॐ भद्रं मृत्युमृत्युं नेत्रत्रयाय वौषट् ॥ ५ ॥ ॐ नमाम्यहम् अस्त्राय फट् ॥ ६ ॥ इत्यंगानि संपूजयेत् ॥ ततोऽष्टदलेषु पूर्वादिचतुर्दिक्षु । ॐ । पक्षीन्द्राय नमः ॥१॥ ॐ शंकराय नमः ॥ २ ॥ ॐ शेषाय नमः ॥ ३ ॥ ॐ ब्रह्मणे नमः॥४॥ (अग्नेयादिकोणेषु) ॐ श्रियै नमः॥५॥ ॐ ह्रियै नमः॥६॥ ॐ धृत्यै नमः॥७॥ ॐ पुष्ट्यै नमः॥८॥ इति पूजयेत् ॥ भूपुरे पूर्वादिक्रमेण इंद्रादीन् दशदिक्पालान् संपूज्य तदुपरि वज्राद्यस्त्राणि च पूजयेत् ॥ एवमावरणपूजां कृत्वा धूपादिनमस्कारांतपूजां समाप्य जपं कुर्यात् । अस्य पुरश्चरणं द्वात्रिंशल्लक्षात्मकम् । तथा च–"वर्णलक्षं जपेन्मंत्रं तत्सहस्रं घृतप्लुतैः ॥ पायसान्नैः प्रजुहुयाद्विधिवत्पूजितेऽनले ॥ १ ॥ एवंकृते भवेन्मंत्री सिद्धमंत्रः प्रतापवान् ॥ श्रीपुष्ट्यै जुहुयान्मंत्री बिल्वकाष्ठैर्घृतेऽनले ॥२॥ सहस्रं श्रियमाप्नोति पत्रैर्वा बिल्वसंभवैः ॥ प्रसूनैर्वा फलैस्तद्वद्दूर्वाहोमादरोगताम् ॥ ३ ॥ मंत्रजप्तां वचां श्वेतां भक्षयेत्प्रातरन्वहम् ॥ वाक्सिद्धिं लभते मंत्री वाचस्पतिरिवापरः ॥ ४ ॥ सलिले देवमभ्यर्च्य गंधपुष्पादिभिः शुभैः ॥ दूर्वाभिस्तत्र जुहुयान्नित्यमष्टोत्तरं शतम् ॥५॥ उप

❋ श्रीनृसिंहयंत्रमिदम्—प्र. ३ चि. पृ. नं.२५७.

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सर्गा विनश्यंति क्षुद्रभूतज्वरादिभिः ॥ दुःस्वप्ने निशि संजाते स्नात्वा मंत्रमिमं जपेत् ॥ ६ ॥ अनिद्रो मंत्रवित्पश्चात्सुस्वप्नस्तस्य जायते ॥ व्याघ्रचौरमृगादिभ्यो महारण्ये भयाकुले ॥ ७ ॥ रक्षेन्मनुरयं जप्तो भयेष्वन्येषु मंत्रिणम् ॥ अनेन मंत्रितं भस्म विषग्रहमहामयान् ॥ ८ ॥ नाशयेदचिरादेवं मंत्रस्यास्य प्रभावतः ॥ घोराभिचारे सोन्मादे महोत्पाते महाभये ॥ ९ ॥ जपेन्मंत्रं स्मरन्देवं दुःखान्मुक्तो भवेन्नरः ॥ सिंहरूपं महाभीमं महादंष्ट्रादिभीषणम् ॥ १० ॥ स्मृत्वात्मानं रिपुं पश्चाद्ध्यायन्मृगशिशुं रिपुम् ॥ गृहीत्वा गलदेशे तं पुनर्दिक्षु क्षिपेद्द्रुतम् ॥ ११ ॥ पुत्रमित्रकलत्राद्यैरुच्चाटो जायते रिपोः ॥ पूर्वमृत्युपदे साध्यनाम कृत्वा स्वयं हरिः ॥ १२॥ निशितैर्नखदंष्ट्राद्यैः खण्ड्यमानं रिपुं स्मरन् ॥ नित्यमष्टोत्तरशतं जपन्मंत्रमतंद्रितः ॥ १३ ॥ जायते मण्डलादर्वाक् शत्रुर्वैवस्वतप्रियः ॥ यंत्रं कुर्वीति विधिवच्छत्रुसेनानिवारणे ॥ १४ ॥ विभीतकाष्ठैर्ज्वलिते पावके रिपुमर्दनम् ॥ विचिंत्य देवं नृहरिं संपूज्य कुसुमादिभिः ॥ १५ ॥ समूलचूलैर्जुहुयाच्छरैर्दशशतं पृथक् ॥ रिपुं खादन्निव जपेन्त्रिभिर्मन्त्रिवन्द तान् क्षिपेत् ॥१६॥ हुत्वा सप्तदिनं सेनामिष्टां मंत्री महीपतेः ॥ प्रस्थापयेच्छुभे लग्ने परराष्ट्रजयेच्छया ॥ १७ ॥ तस्याः पुरस्तान्नृहरिं निघ्नंतं रिपुमंडलम् ॥ ध्यात्वा प्रयोगं कुर्वीत यावदायाति सा पुनः ॥ १८ ॥ विजित्य निखिलाञ्छत्रून्सेह वीरश्रिया सुखम् ॥ आगत्य विजयी राजा ग्रामक्षेत्रधनादिभिः ॥ १९ ॥ प्रीणयेन्मंत्रिणं सम्यक् विभवैः प्रीतमानसः ॥ मंत्री यदि न संतुष्येदनर्थः स्यान्महीपतेः ॥ २० ॥ इति नृसिंहस्य द्वात्रिंशद्वर्णमंत्रप्रयोगः ॥ अथ लक्ष्मीनृसिंहप्रयोगः॥ मूलमंत्रो यथा–"ॐ श्रींह्रीँ जयलक्ष्मीप्रियाय नित्यप्रमुदितचेतसे लक्ष्मीश्रितार्धदेहाय श्रींह्रीँ नमः" इत्येकत्रिंशद्वर्णो मंत्रः ॥ अस्य लक्ष्मीनृसिंहमंत्रस्य पद्मभवो ऋषिः। अतिजगती छंदः श्रीनरकेसरी देवता।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

श्रीँ वीजम् । ह्रीँ शक्तिः । ममाभीष्टसिद्धयर्थं जपे विनियोगः । ॐ पद्मभवऋषये नमः शिरसि ॥१॥ ॐ अतिजगतीछंदसे नमः मुखे ॥ २ ॥ श्रीनरकेसारिदेवतायै नमः हृदि ॥ ३ ॥ श्रीं बीजाय नमः गुह्ये ॥ ४ ॥ ह्रींशक्तये नमः पादयोः ॥ इति ऋष्यादिन्यासः ॥ १ ॥ ॐ श्राँ अंगुष्ठाभ्यां नमः ॥ १ ॥ ॐ श्रीं तर्जनीभ्यां नमः ॥ २ ॥ ॐ श्रूँ मध्यमाभ्यां नमः ॥ ३ ॥ ॐ श्रैं अनामिकाभ्यां नमः॥४॥ॐ श्रौं कनिष्ठिकाभ्यां नमः॥५॥ॐ श्रः करतलकरपृष्ठाभ्यां नमःइति करन्यासः॥२॥एवं ग्रदयादिन्यासं कुर्यात् ।३। एवं न्यासविधिं कृत्वा ध्यायेत् ॥ क्षीराब्धौ वसुमुख्यदेवनिकरैरग्रादिसंवेष्टितः शंखं चक्रगदांबुजं निजकरैर्बिभ्रत्रिनेत्रः सितः ॥ सर्पाधीशफणातपत्रलसितः पीतांबरालंकृतो लक्ष्म्याश्लिष्टकलेवरो नरहरिस्तान्नीलकंठो मुदे ॥ १ ॥ एवं ध्यात्वा पूर्वोक्ते विष्णोः पीठे मूलेन मूर्तिं प्रकल्प्य पाद्यादिपुष्पांतैरुपचारैः संपूज्य आवरणपूजां कुर्यात् ॥ (षट्कोणे) ॐ श्रां हृदयाय नमः ॥ १ ॥ ॐ श्रीं शिरसे स्वाहा ॥ २ ॥ ॐ श्रूंशिखायै वषट् ॥ ३ ॥ ॐ श्रैं कवचायहुं ॥ ४ ॥ ॐश्रौं नेत्रत्रयाय वौषट् ॥ ५ ॥ ॐ श्रः अस्त्राय फट् ॥ ६ ॥ इति प्रथमावरणम् ॥ ततोऽष्टदलेषु पूर्वादिक्रमेण ॐ भास्वत्यै नमः ॥ १ ॥ ॐ भास्कर्यै नमः ॥ २ ॥ ॐ चिंतायै नमः ॥ ३ ॥ ॐ द्युतये नमः ॥ ४ ॥ ॐ उन्मीलिन्यै नमः ॥५॥ ॐ रमायै नमः ॥ ६ ॥ ॐ कान्त्यै नमः॥७॥ ॐ रुचये नमः ॥ ८॥ इत्यष्टौ शक्तीः पूजयेत् ॥ ततो भूपुरे पूर्वादिषु इन्द्रादिदिक्पालान् तद्बाह्ये वज्राद्यायुधानि च पूजयेत् ॥ एवमावरणपूजां कृत्वा धूपादिनमस्कारांतैरुपचारैः संपूज्य जपं कुर्यात् ॥ अस्य पुरश्चरणं षष्टिसहस्राधिकलक्षत्रयम् ॥ तथा च–" एवं ध्यात्वा जपेल्लक्ष त्रयं षष्टिसहस्रकम् ॥ मध्वक्तैर्मल्लिकापुष्पैर्जुहुयाज्जातवेदसि ॥१॥ (षट्शतं त्रिसहस्राणि आहुतीर्दद्यात्) इत्थं सिद्धे मनौ मंत्री

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

निग्रहानुग्रहक्षमः ॥ मल्लिकाकुसुमैर्होमादिष्टसिद्धिमवाप्नुयात् ॥ २ ॥ अथ षडक्षरनृसिंहमंत्रप्रयोगः ॥ मंत्रो यथा–" ॐ आं ह्रीँ क्ष्रौं क्रौं हुं फट्" इति षडक्षरो मंत्रः ॥ अस्य मंत्रस्य ब्रह्मा ऋषिः । पंक्तिश्छंदः । नरसिंहो देवता । सर्वेष्टसिद्धये जपे विनियोगः ॐ ब्रह्मऋषये नमः शिरसि ॥ १ ॥ ॐ पंक्तिच्छंदसे नमः मुखे ॥ २ ॥ ॐ नरसिंहदेवतायै नमः हृदि ॥ ३ ॥ इति ऋष्यादि न्यासः ॥ १ ॥ आं अंगुष्ठाभ्यां नमः ॥ १ ॥ ह्रीँ तर्जनीभ्यां नमः ॥ २ ॥ क्ष्रौं मध्यमाभ्यां नमः ॥ ३ ॥ क्रौं अनामिकाभ्यां नमः ॥ ४ ॥ हुं कनिष्ठिकाभ्यां नमः ॥ ५ ॥ फट् करतलकरपृष्ठाभ्यां नमः ॥ ६ ॥ इति करन्यासः ॥ एवं हृदयादिषडंग न्यासं कुर्यात् ॥ एवं न्यासविधिं कृत्वा ध्यायेत् ॥ "कोपादालोलजिह्वं विवृतनिजमुखं सोमसूर्याग्निनेत्रं पादादानाभिरक्तप्रभमुप रि सितं भिन्नदैत्येंद्रगात्रम् ॥ शंखं चक्रासिपाशांकुशकुलिशगदादोरणान्युद्वहंतं भीमं तीक्ष्णोग्रदंष्ट्रं मणिमयविविधाकल्पमीडे नृसिं हम् ॥ १ ॥ इति ध्यात्वा पूर्वोक्ते पीठे मूलेन मूर्तिं प्रकल्प्य पुष्पांतैरुपचारैः संपूज्य अवरणपूजां कुर्यात् ॥ षट्कोणे आग्नेयादि केसरेषु मध्ये दिक्षु च । ॐ आं हृदयाय नमः ॥१॥ ॐ ह्रीँ शिरसे स्वाहा ॥२॥ ॐ क्ष्रौं शिखायै वषट् ॥३॥ ॐ क्रौं कवचाय हुं ॥ ४ ॥ ॐ हुं नेत्रत्रयाय वौषट् ॥५॥ फट् अस्त्रायफट् ॥६॥ इति पूजयेत् । तद्बहिः अष्टदलेषु पूर्वादिक्रमेण । ॐ चक्राय नमः॥१॥ ॐ शंखाय नमः ॥ २ ॥ ॐ पाशाय नमः ॥ ३ ॥ ॐ अंकुशाय नमः ॥ ४ ॥ ॐ वज्राय नमः ॥ ५ ॥ ॐ कौमोदक्यै नमः ॥ ६ ॥ ॐ खड्गाय नमः ॥ ७ ॥ ॐ खेटाय नमः ॥ इति संपूजयेत् ॥ ततो भूपुरे इन्द्रादीन् दिक्पालान् तद्बाह्ये वज्रा द्यायुधानि च पूजयेत् ॥ इत्यावरणपूजां कृत्वा ॥ धूपादिनमस्कारांतैरुपचारैरभ्यर्च्य जपं कुर्यात् । तथा च अस्य पुरश्चरणं षट्ल

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

क्षम् ॥ "ऋतुलक्षं जपेदेनं घृतेन जुहुयान्नरः ॥ तत्सहस्रं समिद्धेऽग्नौ तोषयेद्गविणैर्गुरुम् ॥ १ ॥ एवं कृत्वा पुरश्चर्यां मंत्रेणानेन मंत्रवित् ॥ प्रयोगान्कल्पनिर्दिष्टान्कुर्यात्स्वस्य परस्य वा ॥ २ ॥ रक्तोत्पलैस्त्रिमध्वक्तैः सहस्रं जुहुयान्नरैः ॥ नित्यं मासाद्धवेदिष्टं वत्सराद्धनधान्यवान् ॥ ३ ॥ रक्तैस्त्रिमधुरोपेतैः पद्मैर्भानुसहस्रकम् ॥ जुहुयान्महतीं लक्ष्मीमायुर्वश्यमवाप्नुयात् ॥ ४ ॥ लाजांस्त्रिमधुरोपेतान्प्रातःकालेषु जुह्वतः ॥ कन्यासिद्धिर्भवेत्पक्षात्कन्यायाः सद्वरो भवेत् ॥ ५ ॥ दूर्वापयोघृताभ्यक्ता अष्टोत्तर शतं सुधीः ॥ अन्वहं जुहुयात्सम्यग्दीर्घमायुरवाप्नुयात् ॥ ६ ॥ तस्य रोगाः प्रणश्यंति कृत्याद्रोहादिभिः सह ॥ ७ ॥ सपंचगव्यं जुहुयादपामार्गस्य मंजरीम् ॥ नित्यं सहस्रमानेन सप्ताहं विजितेंद्रियः ॥ ८ ॥ होमोयं सर्वथा भूतकृत्यारोगान्प्रणाशयेत् ॥ पयोक्तैरमृताखंडैस्त्रिसहस्रं चतुर्दिनम् ॥ ९ ॥ अनेन विहितो होमो भ्रमज्वरविनाशनः ॥ समो नास्ति मनुः कश्चिच्छायानुग्रहसाधनः ॥१०॥ इति षडक्षरनृसिंहमंत्रप्रयोगः ॥ ॥ अथ गोपालमंत्रपुरश्चरणप्रयोगः ॥ (मंत्रमहोदधौ) भूतशुद्ध्यादिकेशवादि कलामातृकान्यासातं पूर्ववत् ॥ मूलमंत्रोयथा–"ॐ गोपीजनवल्लभाय स्वाहा" इति दशाक्षरो मंत्रः ॥ अस्य श्रीगोपालमंत्रस्य नारदः ऋषिः।विराट् छंदः । कृष्णो देवता । क्लीं वीजम् । स्वाहा शक्तिः । ममाभीष्टसिद्ध्यर्थं जपे विनियोगः । ॐ नारदऋषये नमः शिरसि ॥ १ ॥ ॐ विराट्छंदसे नमो मुखे ॥ २ ॥ ॐ कृष्णदेवतायै नमः हृदये ॥ ३ ॥ ॐ क्लीं बीजाय नमः गुह्ये ॥ ४ ॥ ॐ स्वाहाशक्तये नमः पादयोः ॥ ५ ॥ इति ऋष्यादिन्यासः ॥ ॐ आचक्राय अंगुष्ठाभ्यां नमः ॥ १ ॥ ॐ विचक्राय तर्जनीभ्यां नमः ॥ २ ॥ ॐ सुचक्राय मध्यमाभ्यां नमः ॥ ३ ॥ त्रैलोक्यरक्षणचक्राय अनामिकाभ्यां नमः ॥ ४ ॥ ॐ असुरांतकचक्रा

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

य कनिष्ठिकाभ्यां नमः ॥ ५ ॥ इति करन्यासः ॥ ॐ आचक्राय हृदयाय नमः ॥ १ ॥ ॐ विचक्राय शिरसे स्वाहा ॥ २ ॥ ॐ सुचक्राय शिखायै वषट् ॥ ३ ॥ ॐ त्रैलोक्यरक्षणचक्राय कवचाय हुम् ॥ ४ ॥ असुरांतकचक्राय अस्त्राय फट् ॥५॥ इति हृदयादिपंचांगन्यासं कृत्वा । मूलेन व्यापकं न्यस्य वर्णन्यासं कुर्य्यात् ॥ ॐ गों ॐ नमः शिरसि ॥ १ ॥ ॐ पीं ॐ नमः नेत्रयोः ॥२॥ ॐ जं ॐ नमः श्रोत्रयोः ॥३॥ ॐ नं ॐ नमः नासिकयोः ॥४॥ ॐ वं ॐ नमः वक्त्रे ॥५॥ ॐ ह्लं ॐ नमः हृदये ॥६॥ ॐ भां ॐ नमः जठरे ॥७॥ ॐ यं ॐ नम नमः लिंगे ॥८॥ ॐ स्वां ॐ नमः जानुनोः ॥९॥ ॐ हां ॐ नमः पादयोः ॥१०॥ इति वर्णन्यासं कृत्वा ध्यायेत् ॥ ॥ अथ ध्यानम् ॥"वृंदारण्यगकल्पपादपतले सद्रत्नपीठेम्बुजे शोणाभे वसुपत्रके स्थितमजं पीतांबरालंकृतम् ॥ जीमूताभमनेकभूषणयुतं गोगोपगोपीवृतं गोविंदं स्मरसुंदरं मुनियुतं वेणुं रणंतं स्मरेत् ॥१॥ (तंत्रसारे तु) फुल्लेंदीवरकान्तिमिंदुवदनं बर्हावतंसप्रियं श्रीवत्सांकमुदारकौस्तुभधरं पीतांबरं सुंदरम् ॥ गोपीनां नयनोत्पलार्चिततनुं गोगोपसंघावृतं गोविंदं कलवेणुवादनपरं दिव्यांगभूषंभजे ॥ १ ॥" एवं ध्यात्वा मानसोपचारैः संपूज्य पीठपूजां कुर्य्यात् ॥ तद्यथा—पीठे पूर्वोक्तमंडूकादिपरतत्त्वांतदेवताः संपूज्य । तत्र अष्टदलं कृत्वा । तेषु पूर्वादिक्रमेण । ॐ विमलायै नमः ॥१॥ ॐ उत्कर्षिण्यै नमः ॥ २ ॥ ॐ ज्ञानायै० ॥ ३ ॥ ॐ क्रियायै० ॥ ४ ॥ ॐ योगायै० ॥ ५ ॥ ॐ प्रह्व्यै नमः ॥ ६ ॥ ॐ सत्यायै० ॥ ७ ॥ ॐ ईशानायै० ॥ ८ ॥ (मध्ये) ॐ अनुग्रहायै नमः ॥ ९ ॥ इति पीठशक्तीः पूजयेत् । ततो मध्ये ॐ नमो भगवते विष्णवे सर्वभूतात्मने वासुदेवाय सर्वात्मसंयोगपद्मपीठात्मने नमः ॥ इति पुष्पांजलिनासनं दत्त्वा । तत्र मूलेन मूर्तिं प्रकल्प्य । आवाहना

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

❋दिपुष्पांतैरुपचारैः मूलेन संपूज्य आवरणपूजां कुर्य्यात् । तद्यथा–(षट्कोणे) आग्नेयादिचतुःकोणेषु दिक्षु च । ॐ आचक्राय हृदयाय नमः ॥ १ ॥ ॐ विचक्राय शिरसे स्वाहा ॥ २ ॥ ॐ सुचक्राय शिखायै वषट् ॥ ३ ॥ ॐ त्रैलोक्यरक्षणचक्राय कवचाय हुम् ॥ ४ ॥ (दिक्षु) ॐ असुरांतकचक्राय अस्त्राय फट् ॥ ५ ॥ इति नेत्रवर्जं पंचांगानि संपूजयेत् ॥ इति प्रथमावरणम् ॥ १ ॥ तद्बहिरष्टदलेषु प्राचीक्रमेण (पूज्यपूजकयोर्मध्ये प्राची) ॐ रुक्मिण्यै नमः ॥ १ ॥ ॐ सत्यभामायै नमः ॥ २ ॥ ॐ नाग्नजित्यै नमः ॥ ३ ॥ ॐ कालिंद्यै नमः ॥ ४ ॥ ॐ मित्रविंदायै नमः ॥ ५ ॥ ॐ लक्ष्मणायै नमः ॥ ६ ॥ ॐ जांबवत्यै नमः ॥ ७ ॥ ॐ सत्यायै नमः ॥ ८ ॥ इति पूजयेत् ॥ इति द्वितीयावरणम् ॥ २ ॥ ततो दलाग्रेषु तेनैव क्रमेण । ॐ वसुदेवाय नमः ॥ १ ॥ ॐ देवक्यै नमः ॥ २ ॥ ॐ नंदाय नमः ॥ ३ ॥ ॐ यशोदायै नमः ॥ ४ ॥ ॐ बलभद्राय नमः ॥ ५ ॥ ॐ सुभद्रायै नमः ॥ ६ ॥ ॐ गोपेभ्यो नमः ॥ ७ ॥ ॐ गोपिकाभ्यो नमः ॥ ८ ॥ इति तृतीयवरणम् ॥ ३ ॥ तद्बाह्ये भूपुरे पूर्वादिषु । ॐ इंद्राय नमः ॥ १ ॥ ॐ अग्नये नमः ॥ २ ॥ ॐ यमाय नमः ॥ ३ ॥ ॐ निर्ऋतये नमः ॥ ४ ॥ ॐ वरुणाय नमः ॥ ५ ॥ ॐ वायवे नमः ॥ ६ ॥ ॐ कुबेराय नमः ॥ ७ ॥ ॐ ईशानाय नमः ॥ ८ ॥ (ईशानपूर्वयोर्मध्ये) ॐ ब्रह्मणे नमः ॥ ९ ॥ (इति निर्ऋतिपश्चिमयोर्मध्ये) ॐ अनंताय नमः ॥ १० ॥ इति दश दिक्पालान् पूजयेत् ॥ इति चतुर्थावरणम् ॥ ४ ॥ तद्बहिः पूर्वादिषु । ॐ वज्राय नमः ॥ १ ॥ ॐ शक्तये नमः ॥ २ ॥ ॐ दंडाय० ॥ ३ ॥ ॐ खड्गाय० ॥ ४ ॥ ॐ पाशाय० ॥ ५ ॥ ॐ अंकुशाय० ॥ ६ ॥ ॐ गदायै० ॥ ७ ॥ ॐ

❋ श्रीगोपालयंत्रमिदम्—प्र. चि. पृ. नं. २६०.

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

त्रिशूलाय० ॥ ८ ॥ ॐ पद्माय० ॥ ९ ॥ ॐ चक्राय नमः ॥ १० ॥ इत्यायुधानि पूजयेत् ॥ इति पंचमावरणम् ॥ ५ ॥ एवमावरणपूजां कृत्वा पुष्पांजलिं दत्त्वा धूपदीपनैवेद्यतांबूलदक्षिणानीराजनैः सांगं श्रीकृष्णं संपूज्य स्तुत्वा साष्टांगं प्रणम्य जपं कुर्य्यात् । अस्य पुरश्चरणं लक्षमंत्रात्मकम् ॥ तथा च—एवं ध्यात्वा जपेल्लक्षं दशांशं सरसीरुहैः ॥ जुहुयात्पूजयेत्पीठे वैष्णवे नंदनंदनम् ॥ ॥ १ ॥ एवं सिद्धे मनौ मंत्री साधयेत्स्वमनीषितम् ॥ गुडूचीशकलैरग्नौ जुहुयाज्ज्वरशान्तये ॥ २ ॥ कृष्णद्वेषं प्रकुर्वंतं बलदेवस्य रुक्मिणः ॥ द्यूतासक्तस्य संचिंत्य गोमयोद्भवगोलकान् ॥ ३ ॥ जुहुयाद्वेषसिद्ध्यर्थं नरयोः सुहृदोर्मिथः ॥. पिचुमंदफलोत्पन्नतैलाभ्यक्तैः समिद्वरैः ॥ ४ ॥ अक्षतैर्जुहुयाद्रात्रावयुतं शत्रुशांतये ॥ अयुतं प्रजपेन्मंत्रमात्मानं संस्मरन् हरिम् ॥ ५ ॥ मंचस्रस्तगतप्राणाकृष्टकंसं रिपुं सुधीः ॥ शत्रुजन्मर्क्षवृक्षोत्थसमिद्भिरयुतं निशि ॥ ६ ॥ जुहुयादित्थमुग्रोपि सपत्नो निधनं व्रजेत् ॥ पलाशकुसुमैर्लक्षं विद्यासिद्ध्यै जुहोतु ना ॥ ७ ॥ तंडुलैः सितपुष्पाद्यैराज्याक्तैः प्रत्यहं नरः ॥ हुत्वा सप्तदिनांतं तद्भस्मभाले च मूर्द्धनि ॥ ८ ॥ धारयन्वशयेत्सद्यो यौवनं तच्च पूरुषान् ॥ पुष्पं वासोंजनं वापि तांबूलमथचंदनम् ॥ ९ ॥ सहस्रं मनुना जप्तं दद्याद्यस्मै नराय सः ॥ वशमेत्यचिरादेव सपुत्रपशुबांधवः ॥ १० ॥ वृंदावनस्थं गायंतं गोपीभिः संस्मरन्हरिम् ॥ अपामार्गसमिद्भिर्यो जुहुयाद्वशयेज्जगत् ॥ ११ ॥ रासक्रीडागतं कृष्णं ध्यायन्योऽयुतमाजपेत् ॥ षण्मासाद्वांछितां कन्यामुद्वहेद्भक्तितत्परः ॥ १२ ॥ जपेत्सहस्रं ध्यायंती यावदेव स्थितं हरिम् ॥ कन्यकावाञ्छितं नाथं मंडलांतर्लभेत सा ॥ १३ ॥ पत्रैः फलैःसमिद्भिर्वा बिल्वोत्थैर्मधुसंयुतैः ॥ कमलैः शर्करायुक्तैर्होमाल्लक्ष्मीपतिर्भवेत् ॥ १४ ॥ बहुना किमिहोक्तेन कृष्णः सर्वार्थदो नृणाम् ॥ इति

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

दशाक्षरो गोपालकृष्णमंत्रपुरश्चरणम् ॥ ॥ अथाष्टादशवर्णात्मकश्रीकृष्णमंत्रप्रयोगः ॥ मंत्रो यथा । "क्लीं कृष्णाय गोविं दाय गोपीजनबल्लभाय स्वाहा ॥" इत्यष्टादशाक्षरः ॥ तंत्रसारे त्वयं विंशत्यर्णोपि लिखितः स च "ह्रीं श्रीं क्लीं कृष्णाय गोविं दाय गोपीजनवल्लभाय स्वाहा" इति विंशत्यक्षरः ॥ अस्य मंत्रस्य नारद ऋषिः । गायत्री छंदः । श्रीकृष्णो देवता क्लीं । बीजम् । स्वाहा शक्तिः । सर्वेष्टसिद्ध्यर्थे जपे विनियोगः ॥ ॐ नारदऋषये नमः शिरसि ॥ १ ॥ ॐ गायत्रीछंदसे नमः मुखे ॥ २ ॥ ॐ श्रीकृष्णदेवतायै नमः हृदये ॥ ३ ॥ ॐ क्लीं बीजाय नमः गुह्ये ॥ ४ ॥ ॐ स्वाहाशक्तये नमः पादयोः ॥ ५ ॥ इति ऋष्यादिन्यासः ॥ ॐ क्लीं कृष्णाय अंगुष्ठाभ्यां नमः ॥ १ ॥ ॐ गोविंदाय तर्जनीभ्यां नमः ॥ २ ॥ ॐ गोपीजन मध्यमा नमः ॥ ३ ॥ ॐ वल्लभाय अनामिकाभ्यां नमः ॥४॥ ॐ स्वाहा कनिष्ठिकाभ्यां नमः ॥ ५ ॥ इति करन्यासः ॥ एवमेव हृदयादि नेत्रवर्जं पंचाङ्गन्यासं कुर्य्यात् । अथ मंत्रवर्णन्यासः ॥ ॐ नमः शिरसि ॥ १ ॥ ॐ क्लीं नमः ललाटे ॥ २ ॥ ॐ कृं नमः भ्रूमध्ये ॥ ३ ॥ ॐ ष्णां नमः दक्षिणकर्णे ॥ ४ ॥ ॐ यं नमः वामकर्णे ॥ ५ ॥ ॐ गों नमः दक्षनेत्रे ॥ ६ ॥ ॐ विं नमः वाम नेत्रे ॥ ७ ॥ ॐ दां नमः दक्षनासिकायाम् ॥ ८ ॥ ॐ यं नमः वामनासिकायाम् ॥ ९ ॥ ॐ गों नमः मुखे ॥ १० ॥ ॐ पीं नमः ग्रीवायाम् ॥ ११ ॥ ॐ जं नमः हृदये ॥ १२ ॥ ॐ नं नमः नाभौ ॥ १३ ॥ ॐ वं नमः कट्याम् ॥ १४ ॥ ॐ लं नमः लिंगे ॥ १५ ॥ ॐ भां नमः दक्षिणजानुनि ॥ १६ ॥ ॐ यं नमः वामजानुनि ॥ १७ ॥ ॐ स्वां नमः दक्षपादे ॥ १८ ॥ ॐ हां नमः वामपादे ॥ १९ ॥ इति वर्णन्यासः ॥ अथ पदन्यासः । ॐ क्लीं नमः नेत्रयोः ॥ १ ॥ ॐ कृष्णाय मुखे ॥ २ ॥ ॐ गोविंदाय

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

हृदये ॥ ३ ॥ ॐ गोपीजनवल्लभाय गुह्ये ॥ ४ ॥ ॐ स्वाहा पादयोः ॥ ५ ॥ एवं न्यासं कृत्वा ध्यायेत् ॥ "स्मेरेद्वृंदावने रम्ये मोहयंतमनारतम् ॥ गोविंदं पुंडरीकाक्षं गोपकन्यासहस्रशः ॥ १ ॥ आत्मनो वदनांभोजप्रेषिताक्षिमधुव्रताः ॥ पीडिताः कामवाणेन चिरमाश्लेषणोत्सुकाः ॥ २ ॥ मुक्ताहारलसत्पीनतुंगस्तनभरानताः ॥ स्रस्तधम्मिल्लवसना मदस्खलितभाषणाः ॥ ३ ॥ दंतपंक्तिप्रभोद्भासिस्पंदमानाधरांचिताः ॥ विलोभयंतीर्विविधैर्विभ्रमैर्भावगर्भितैः ॥ ४ ॥" अथ ध्यानम् । "फुल्लेंदीवरकांतिमिंदुवदनं वर्हावतंसप्रियं श्रीवत्सांकमुदारकौस्तुभधरं पीतांबरं सुंदरम् ॥ गोपीनां नयनोत्पलार्चिततनुं गोगोपसंघावृतं गोविंदं कलवेणुवादनपरं दिव्यांगभूषं भजे ॥ १ ॥ एवं ध्यात्वा पूर्वोक्ते पीठे मूलेन मूर्तिं प्रकल्प्य पाद्यादिपुंष्पांतैरुपचारैः श्रीकृष्णं संपूज्य आवरणपूजां कुर्य्यात् । षट्कोणे आग्नेयादिकोणकेसरेषु दिक्षु च । ॐ क्लीं कृष्णाय हृदयाय नमः ॥ १ ॥ ॐ गोविंदाय शिरसे स्वाहा ॥ २ ॥ ॐ गोपीजनशिखायै वषट् ॥ ३ ॥ ॐ वल्लभाय कवचाय हुं ॥ ४ ॥ (दिक्षु) ॐ स्वाहा अस्त्राय फट् ॥ ५ ॥ इति पंचांगानि संपूजयेत् ॥ इति प्रथमावरणम् ॥१॥ तद्बहिरष्टदलेषु । ॐ कालिंद्यै नमः ॥ १ ॥ ॐ नाग्नजित्यै० ॥ २ ॥ ॐ मित्रविंदायै० ॥ ३ ॥ ॐ चारुहासिन्यै० ॥ ४ ॥ ॐ रोहिण्यै० ॥ ५ ॥ ॐ जांबवत्यै० ॥ ६ ॥ ॐ रुक्मिण्यै० ॥ ७ ॥ ॐ सत्यायै नमः ॥ ८ ॥ इत्यष्टौ प्रियाः पूजनीयाः ॥ इति द्वितीयावरणम् ॥ २ ॥ तद्बाह्ये पूर्वादिषु । ॐ ऐरावताय नमः ॥ १ ॥ ॐ पुंडरीकाय० ॥ २ ॥ ॐ वामनाय० ॥ ३ ॥ ॐ कुमुदाय० ॥ ४ ॥ ॐ अंजनाय० ॥ ५ ॥ ॐ पुष्पदंताय० ॥ ६ ॥ ॐ सार्वभौमाय० ॥ ७ ॥ ॐ सुप्रतीकाय नमः ॥ ८ ॥ इत्यष्टौ गजान्पूजयेत् ॥ इति तृतीयावरणम् ॥ ३ ॥ तद्बहिर्भूपुरे पूर्वादिक्रमेण । इंद्रादिदश दिक्पा

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

लान्संपूज्य तद्बहिः । वज्राद्यायुधानि च पूजयेत् ॥ इत्यावरणपूजां कृत्वा देवं धूपादिनीराजनांतैरभ्यर्च्य स्तवेन स्तुत्वा जपं कुर्य्यात् । अस्य पुरश्चरणमयुतद्वयम् । तथा च–मंत्रमेनं यथान्यायमयुतद्वितयं जपेत् ॥ जुहुयादरुणांभोजैर्दशांशं सुसमाहितः ॥ १ ॥ इति संपूज्य देवेशं गोविंदं जगतां पतिम् ॥ कुर्वीत कल्पनिर्दिष्टान्प्रयोगान्निजवांछितान् ॥ २ ॥ लक्ष्मीप्रसूनैर्जुहुयाच्छ्रियमिच्छन्निंदिताम् ॥ साज्येनान्नेन जुहुयादाज्यान्नस्य समृद्धये ॥ ३ ॥ अरुणैः कुसुमैर्विप्राञ्जातीभिः पृथिवीपतीन् ॥ प्रसूनैरसितैर्वैश्याञ्शूद्रान्नीलोत्पलैर्नवैः ॥ ४ ॥ वशयेल्लवणैः सर्वान्पंकजैर्वनिताजनान् ॥ गोशालासु कृतो होमः पायसेन ससर्पिषा ॥ ५ ॥ गवां शांतिं करोत्याशु गोविंदो गोकुलप्रियः ॥ शिशुवेषधरं देवं किंकिणीदामशोभितम् ॥ ६ ॥ स्मृत्वा प्रतर्पयेन्मंत्री दुग्धबुद्ध्या शुभैर्जलैः ॥ धनध्यान्यांशुकादीनि प्रीतस्तस्मै ददाति सः ॥ ७ ॥ इत्यष्टादशाक्षरकृष्णमंत्रप्रयोगः समाप्तः ॥ अथ अष्टाक्षरत्रैलोक्यमोहनमंत्रप्रयोगः ॥ मंत्रस्वरूपं यथा–"क्लीँ हृषीकेशाय नमः" इत्यष्टाक्षरो मंत्रः (मंत्रमहोदधौ) अस्य मंत्रस्य संमोहन नारद ऋषिः । गायत्री छंदः । त्रैलोक्यमोहनो देवता । ममाभीष्टसिद्ध्यर्थं जपे विनियोगः । ॐ संमोहननारदऋषये नमः शिरसि ॥ १ ॥ ॐ गायत्रीछंदसे नमः मुखे ॥ २ ॥ ॐ त्रैलोक्यमोहनदेवतायै नमः हृदये ॥ ३ ॥ इति ऋष्यादिन्यासः ॥ ॐ क्लाँ अंगुष्ठाभ्यां नमः ॥ १ ॥ ॐ क्लीँ तर्जनीभ्यां नमः ॥ २ ॥ ॐ क्लूँ मध्यमाभ्यां नमः ॥ ३ ॥ ॐ क्लैं अनामिकाभ्यां नमः ॥ ४ ॥ ॐ क्लौं कनिष्ठिकाभ्यां नमः ॥ ५ ॥ ॐ क्लः करतलकरपृष्ठाभ्यां नमः ॥ ६ ॥ इति करन्यासः ॥ एवं हृदयादिन्यासं कृत्वा ध्यायेत् ॥ अथ ध्यानम् ॥ कल्पानोरुहमूलसंस्थितवयोराजोन्नतांसंस्थितं पौष्पं बाणमथेक्षुचापकमले पाशांकुशे बिभ्रतम् ॥ चक्रं शंख

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

गदे करैरुदधिजासंश्लिष्टदेहं हरिं नानाभूषणरक्तलेपकुसुमं पीताबरं संस्मरेत् ॥ १ ॥ एवं ध्यात्वा पूर्वोक्ते पीठे मूलेन मूर्तिं प्रकल्प्य पुष्पांतैरुपचरैः संपूज्य आवरणपूजां कुर्यात् ॥ तद्यथा–ॐ पक्षिराजाय स्वाहा इति सम्मुखे गरुडं पूजयेत् ॥ १ ॥ शिरसि ॐ मुकुटाय नमः ॥ २ ॥ कर्णे ॐ कुंडलाय नमः ॥ ३ ॥ करे ॐ चक्राद्यस्त्राय नमः ॥ ४ ॥ हृदये ॐ श्रीवत्साय नमः ॥ ५ ॥ कण्ठे ॐ कौस्तुभाय नमः ॥६॥ गले ॐ वनमालायै नमः ॥७॥ नितंबे ॐ पीतांबराय नमः ॥८॥ वामांगे ॐ श्रीलक्ष्म्यै नमः ॥ ९ ॥ इति पूजयेत् ॥ ततः केसरेषु अग्न्यादिकोणे मध्ये दिक्षु च । ॐ क्रां हृदयाय नमः ॥ १ ॥ ॐ क्रीं शिरसे स्वाहा ॥ २ ॥ ॐ क्रूँ शिखायै वषट् ॥ ३ ॥ ॐ क्रैं कवचाय हुं ॥ ४ ॥ ॐ क्रौं नेत्रत्रयाय वौषट् ॥ ५ ॥ ॐ क्रः अस्त्राय फट् ॥ ६ ॥ इति पूजयेत् । ततः पूर्वादिदिक्षु ॐ द्रां नमः ॥ १ ॥ द्रीँ नमः ॥ २ ॥ द्रूँ नमः ॥ ३ ॥ द्रैं नमः ॥ ४ ॥ इति संपूज्य कोणेषु ॐ द्रौं नमः । इति पंचबाणान् पूजयेत् ॥ तद्बहिरष्टदलेषु पूर्वादिक्रमेण । ॐ लक्ष्म्यै नमः ॥ १ ॥ ॐ सरस्वत्यै नमः ॥ २ ॥ ॐ रत्यै नमः ॥ ३ ॥ ॐ प्रीत्यै नमः ॥ ४ ॥ ॐ कीर्त्यै नमः ॥ ५ ॥ ॐ कांत्यै नमः ॥ ६ ॥ ॐ तुष्ट्यै नमः ॥७॥ ॐ पुष्ट्यै नमः ॥ इत्यष्टौ शक्तीः पूजयेत् । तद्बाह्ये भूपुरे पूर्वादिक्रमेण इंद्रादिदशदिक्पालान् तद्बाह्ये वज्राद्यायुधानि च पूजयेत् इत्यावरणपूजां कृत्वा धूपादिनमस्कारांतं संपूज्य जपं कुर्यात् । अस्य पुरश्चरणं द्वादशलक्षजपः तथा च–" एवं ध्यात्वा जपेत्सूर्यलक्षं त्रिमधुरप्लुतैः ॥ पालाशपुष्पैर्जुहुयात्तत्सहस्रं हुताशने ॥१॥ विजयापुष्पसंयुक्तैर्जलैः संतर्पयेच्छतम् ॥ प्रातः प्रत्यहमेतस्य वाञ्छितं मासतो भवेत् ॥ २ ॥ अयुतं तु घृतेनाग्नौ हुत्वा संपातजं घृतम् ॥ तावज्जप्तं प्रियाकांतं भोजयेद्वशमेति सः ॥ कामबीजेपि विज्ञेया

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पारिचय्योक्तमंत्रवत् ॥ ४ ॥ विशेषात्कामिनीवर्गमोहकोमनुनायकः ॥ इति त्रैलोक्यमोहनकृष्णमंत्रपुरश्चरणम् ॥ अथ प्रसंगतः पुत्रप्रदसंतानगोपालमंत्रपुरश्चरणप्रयोगः ॥ तत्र तावत् पूर्वदिने नद्यादौ स्नात्वा । प्रातर्नित्यावश्यकं समाप्य । विदुषामुपदेशानुसारेण पूर्वोक्तपद्धतिकांडरीत्या प्रायश्चित्तं कृत्वा स्वयं ब्राह्मणद्वारा वा अयुतगायत्रीजपं च कृत्वा तद्दिने उपवासं नक्तव्रतं वा संपाद्य रात्रौ दंपती शुद्धासनयोर्भूमावेव स्वपेताम् ॥ ततः आरंभदिने उषसि स्नात्वा नित्यकर्म कृत्वा । मंगलस्नानं विधाय यथा योग्यालंकृतः सपवित्रकरः सपत्नीकः स्वासने प्राङ्मुख उपविश्य आचम्य प्राणानायम्य । शांतिपाठं पठित्वा श्रीगणेशादिस्मरणं कुर्य्यात् । ततो देशकालौ संकीर्त्य मम सभार्यस्यैतज्जन्मजन्मांतरार्जिताऽनपत्यत्वादिकारणीभूतबालघातविप्ररत्नापहारादिजन्यदुरितसमूलप्रशमनार्थं दीर्घायुष्मद्बहुपुत्रादिसंततिप्राप्त्यर्थं मंत्रसिद्धिपूर्वकश्रीपरमेश्वरप्रीत्यर्थं च संतानगोपाललक्षमंत्रजपात्मकं पुरश्चरणं स्वयं ब्राह्मणद्वारा वाहं करिष्ये । तदंगत्वेन गणपतिपूजनं पुण्याहवाचनं मातृकापूजां नांदीश्राद्धमाचार्यजापकवरणं च करिष्ये। इति च संकल्प्य। गणेशपूजनादिजापकवरणांतं पद्धतिकांडोक्तमार्गेण सर्व्वं कुर्य्यात् । ततः "ॐ भद्रं कर्णेभिः" इति वेदघोषेण जपस्थानसमीपमागत्य द्वारपूजां कृत्वा प्रविश्य कूर्म्मसंशोधिते स्वासने प्राङ्मुख उपविश्य । आचम्य प्राणानायम्य । देशकालौ संकीर्त्य । मम सभार्यस्य (यज्ञमानस्य वा) जन्मांतरार्जिताऽनपत्यत्वादिनिदानभूतबालघातादिजन्यदुरितशमनार्थं दीर्घायुष्मद्बहुपुत्रादिसंततिप्राप्त्यर्थं मंत्रसिद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थं संतानगोपालमंत्रजपं यथासंख्यं करिष्ये । तदंगत्वेनादौ भूतशुद्धिं प्राणप्रतिष्ठामंतर्मातृकाबहिर्मातृकान्यासं केशवादिकलामातृकान्यासं च करिष्ये इति च प्रत्याहिकं संकल्प्य पूर्ववत् भूतशुद्ध्यादिबहिर्मा

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

*तृकान्यासांतं कृत्वा विष्णोरष्टाक्षरोक्तक्रमेण केशवादिकलामातृकान्यासं च कुर्य्यात् ॥ अथ मूलमंत्रन्यासादि (मंत्रमहोदधौ) मंत्रो यथा–"ॐ देवकीसुत गोविंद वासुदेव जगत्पते ॥ देहि मे तनयं कृष्ण त्वामहं शरणं गतः ॥" इति द्वात्रिंशदक्षरो मंत्रः ॥ अस्य मंत्रस्य नारदऋषिः । अनुष्टुप्छंदः । सुतप्रदकृष्णो देवता । मम पुत्रप्राप्त्यर्थे जपे विनियोगः ॥ ॐ नारदऋषये नमः शिरसि ॥ १ ॥ ॐ अनुष्टुप्छंदसे नमः मुखे ॥ २ ॥ ॐ सुतप्रदकृष्णदेवतायै नमः हृदये ॥ ३ ॥ इति ऋष्यादिन्यासः ॥ १ ॥ ॐ देव कीसुत गोविन्द इत्यंगुष्ठाभ्यां नमः ॥ १ ॥ ॐ वासुदेव जगत्पते इति तर्ज्जनीभ्यां नमः ॥ २ ॥ ॐ देहि मे तनयं कृष्ण इति मध्य माभ्यां नमः ॥ ३ ॥ ॐ त्वामहं शरणं गतः इत्यनामिकाभ्यां नमः ॥४॥ ॐ देवकीसुत गोविंद वासुदेव जगत्पते ॥ देहि मे तनयं कृष्ण त्वामहं शरणं गतः इति कनिष्ठिकाभ्यां नमः ॥ इति करन्यासः ॥ ॐ देवकीसुत गोविंद हृदयाय नमः ॥१॥ ॐ वासुदेव जगत्पते शिरसे स्वाहा ॥२॥ ॐ देहि मे तनयं कृष्ण शिखायै वषट् ॥३॥ ॐ त्वामहं शरणं गतः कवचाय हुं ॥ ४ ॥ ॐ देवकीसुत गोविंद वासुदेव जगत्पते ॥ देहि मे तनयं कृष्ण त्वामहं शरणं गतः अस्त्राय फट् ॥५॥ इति नेत्रहीनं पञ्चाङ्गन्यासं कुर्यात् ॥ अथ ध्यानम् ॥ "विजयेन युतो रथस्थितः प्रसमानीय समुद्रमध्यतः ॥ प्रददत्तनयान् द्विजन्मने स्मरणीयो वसुदेवनन्दनः ॥ १ ॥" इति ध्यात्वा पीठपूजां कुर्यात् ॥ तद्यथा–ॐ मंडूकादिपरतत्त्वांतपीठदेवताभ्यो नमः । इति पीठदेवताः संपूज्य पूर्वादिदिक्षु । ॐ विमलायै नमः ॥१॥ ॐ उत्कर्षिण्यै नमः ॥ २ ॥ ॐ ज्ञानायै नमः ॥ ३ ॥ ॐ क्रियायै नमः ॥ ४ ॥ ॐ योगायै नमः ॥ ५ ॥

* सन्तानगोपालमन्त्रपूजायन्त्रम्—प्र.३ चि. पृ.नं. २६३.

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ॐ प्रह्वये नमः ॥ ६ ॥ ॐ सत्यायै नमः ॥ ७ ॥ ॐ ईशानायै नमः ॥ ८ ॥ (मध्ये) ॐ अनुग्रहायै नमः ॥ ९ ॥ इति पीठशक्तीः संपूजयेत् ॥ ततः ॐ नमो भगवते विष्णवे सर्वभूतात्मने वासुदेवाय सर्वात्मसंयोगपदपीठात्मने नमः ॥ इत्यासनं दत्त्वा तत्र मूलेन मूर्तिं प्रकल्प्य (अथवा स्वर्णमूर्तिं यंत्रं वा संस्थाप्य) मूलमंत्रेण पुरुषसूक्तेन च पाद्याद्यैः पुष्पांतैरुपचारैः संपूज्य आवरणपूजां कुर्यात् ॥ तद्यथा षट्कोणे आग्नेयादिकोणेषु दिक्षु च । ॐ देवकीसुत गोविंद हृदयाय नमः ॥ १ ॥ ॐ वासुदेव जगत्पते शिरसे स्वाहा ॥ २ ॥ ॐ देहि मे तनयं कृष्ण शिखायै वषट् ॥ ३ ॥ ॐ त्वामहं शरणं गतः कवचाय हुं ॥ ४ ॥ ॐ देवकीसुत गोविंद वासुदेव जगत्पते ॥ देहि मे तनयं कृष्ण त्वामहं शरणं गतः ॥ अस्त्राय फट् ॥ ॥ ५ ॥ इति पूजयेत् ॥ तद्बहिरष्टदलेषु पूर्वादिक्रमेण । ॐ रुक्मिण्यै नमः ॥ १ ॥ ॐ सत्यभामायै नमः ॥ २ ॥ ॐनाग्नजित्यै ॥ ३ ॥ ॐ कालिंद्यैनमः ॥ ४ ॥ ॐ मित्रविन्दायै नमः ॥ ५ ॥ ॐ लक्ष्मणायै नमः ॥ ६ ॥ ॐ जांबवत्यै नमः ॥ ७ ॥ ॐ सत्यायै नमः ॥८॥ इत्यष्टौ महिषीः पूजयेत् ॥ ततो दलाग्रेषु । ॐ वसुदेवाय नमः ॥१॥ ॐ देवक्यै नमः॥२॥ ॐ नंदगोपाय नमः ॥ ३ ॥ ॐ यशोदायै नमः ॥ ४ ॥ ॐ बलभद्रायै नमः ॥ ५ ॥ ॐ सुभद्रायै नमः ॥ ६ ॥ ॐ गोपेभ्यो नमः ॥ ७ ॥ ॐ गोपिकाभ्यो नमः ॥ ८ ॥ इति संपूजयेत् ॥ तद्बाह्ये भूपुरे पूर्वादिदिक्षु । ॐ इन्द्राय नमः ॥ १ ॥ ॐ अग्नये नमः ॥ २ ॥ ॐ यमाय नमः ॥ ३ ॥ ॐ निर्ऋतये नमः ॥ ४ ॥ ॐ वरुणाय नमः ॥ ५ ॥ ॐ वायवे नमः ॥ ६ ॥ ॐ कुबेराय नमः ॥ ७ ॥ ॐ ईशानाय नमः ॥८॥ ईशानपूर्वयोर्मध्ये । ॐ ब्रह्मणे नमः ॥ ९ ॥ निर्ऋतिवरुणयोर्मध्ये । ॐ अनं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ताय नमः ॥ १० ॥ इति दशादिक्पालान् पूजयेत् ॥ तद्बाह्ये। ॐ वज्राय नमः ॥ १ ॥ ॐ शक्तये नमः ॥ २ ॥ ॐ दंडाय नमः ॥ ३ ॥ ॐ खड्गाय नमः ॥ ४ ॥ ॐ पाशाय नमः ॥ ५ ॥ ॐ अंकुशाय नमः ॥ ६ ॥ ॐ गदायै नमः ॥ ७ ॥ ॐ त्रिशूलाय नमः ॥ ८ ॥ ॐ पद्माय नमः ॥ ९ ॥ ॐ चक्राय नमः ॥ १० ॥ इति पूजयेत् ॥ इत्यावरणपूजां कृत्वा धूपादिनमस्कारांतां यथाविधि पूजां विधाय वक्ष्यमाणसंतानगोपालस्तवेन स्तुत्वा जपं कुर्यात् ॥ अस्य पुरश्चरणं लक्षमंत्रात्मकम् ॥ जपांते दशांशेन मधुशर्कराघृतमिश्रितैस्तिलैर्होमं कृत्वा तत्तद्दशांशेन तर्पणमार्जनब्राह्मणाभोजनानि कुर्यात् ॥ एवं कृते सिद्धमंत्रो भवति ततः प्रयोगान् साधयेत् ॥ तथा च–लक्षं जपोऽयुतं होमस्तिलैर्मधुरसंयुतैः ॥ अर्चा पूर्वोदिता चैवं मंत्रः पुत्रप्रदो नृणाम् ॥ १ ॥ इति मंत्रमहोदधिप्रोक्तसंतानगोपालप्रयोगः समाप्तः॥ (ग्रंथांतरे संतानगोपालमंत्रप्रयोगः) मूलमंत्रो यथा–ॐ क्लीँश्रीँह्रीँजीँॐभूर्भुवः स्वः ॐ देवकीसुत गोविंद वासुदेव जगत्पते॥ देहि मे तनयं कृष्ण त्वामहं शरणं गतः ॐ स्वः भुवः भूः ॐ जीँह्रीँश्रीँक्लीँ ॐ इति चतुःपंचाशद्वर्णात्मको मंत्रः। ॐ अस्य श्रीसंतानगोपालमंत्रस्य नारायणऋषिः। अनुष्टुप् छंदः। श्रीगोपालो देवता।क्लीं बीजम्। श्रीँह्रीँ शक्तिः जीँ कीलकम्। संतानगोपालप्रसादसिद्ध्यर्थे जपे विनियोगः ॥ ॐ नारायणऋषये नमः शिरसि ॥१॥ ॐ अनुष्टुप्छंदसे नमः मुखे ॥ २ ॥ ॐ श्रीगोपालदेवतायै नमः हृदि ॥ ३ ॥ ॐ क्लीं बीजाय नमः गुह्ये ॥ ४ ॥ ॐ श्रीँ ह्रीँ शक्तये नमः पादयोः ॥ ५ ॥ ॐ जीँकीलकाय नमः सर्वाङ्गे ॥६॥ इति ऋष्यादिन्यासः॥ॐ देवकीसुत गोविंद अंगुष्ठाभ्यां नमः ॥१॥ वासुदेव जगत्पते तर्जनीभ्यां नमः ॥ २ ॥ ॐ देहि मे तनयं कृष्ण मध्यमाभ्यां नमः॥३॥ॐ त्वामहं शरणं गतः अनामिकाभ्यां नमः ॥४॥ देवकीसुत

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

गोविंद देवदेव जगत्पते कनिष्ठिकाभ्यां नमः ॥५॥ ॐ देहि मे तनयं कृष्ण त्वामहं शरणं गतः करतलकरपृष्ठाभ्यां नमः ॥ ६॥ इति करन्यासः ॥ एवं हृदयादिषडंगन्यासं कृत्वा ध्यायेत् ॥ "ॐ वैकुंठतेजसा दीप्तमर्जुनेन समन्वितम् ॥ समर्पयंतं विप्राय नष्टानानीय बालकान् ॥१॥ " इति ध्यात्वा जपं कुर्यात् ॥ अन्यत्सर्वं पूर्ववत् ॥ इति ग्रंथांतरोक्तं संतानगोपालविधानम् ॥ ॥ अथसंतान गोपालस्तोत्रं प्रारभ्यते ॥ "श्रीशं कमलपत्राक्षं देवकीनंदनं हरिम् ॥ सुतसंप्राप्तये कृष्णं नमामि मधुसूदनम् ॥ १ ॥ नमाम्यहं वासुदेवं सुतसंप्राप्तये हरिम् ॥ यशोदांकगतं बालं गोपालं नंदनंदनम् ॥ २ ॥ अस्माकं पुत्रलाभाय गोविंदं मुनिवंदितम् ॥ नमाम्यहं वासुदेवं देवकीनंदनं सदा ॥ ३ ॥ गोपालं डिंभकं वंदे कमलापतिमच्युतम् ॥ पुत्रसंप्राप्तये कृष्णं नमामि यदुपुंगवम् ॥ ४ ॥ पुत्रकामेष्टफलदं कञ्जाक्षं कमलापतिम् ॥ देवकीनंदनं वंदे सुतसंप्राप्तये मम ॥ ५ ॥ पद्मापते पद्मनेत्र पद्मनाभ जनार्दन ॥ देहि मे तनयं श्रीश वासुदेव जगत्पते ॥ ६ ॥ यशोदांकगतं बालं गोविंदं मुनिवंदितम् ॥ अस्माकं पुत्रलाभाय नमामि श्रीशमच्युतम् ॥ ७ ॥ श्रीपते देवदेवेश दीनार्तिहरणाच्युत ॥ गोविंद मे सुतं देहि नमामि त्वां जनार्दन ॥ ८ ॥ भक्तकामद गोविंद भक्तरक्ष शुभप्रद ॥ देहि मे तनयं कृष्ण रुक्मिणीवल्लभ प्रभो ॥ ९ ॥ रुक्मिणीनाथ सर्वेश देहि मे तनयं सदा ॥ भक्तमंदार पद्माक्ष त्वामहं शरणं गतः ॥१०॥ देवकीसुत गोविंद देवदेव जगत्पते ॥ देहि मे तनयं कृष्ण त्वामहं शरणं गतः ॥ ११ ॥ वासुदेव जगद्वंद्य श्रीपते पुरुषोत्तम ॥ देहि मे तनयं कृष्ण त्वामहं शरणं गतः ॥१२॥ कंजाक्ष कमलानाथ परकारुणिकोत्तम ॥ देहि मे तनयं कृष्ण त्वामहं शरणं गतः ॥१३॥ लक्ष्मीपते पद्मनाभ मुकुंद मुनिवंदित ॥ देहि मे तनयं कृष्ण त्वा

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

महं शरणं गतः ॥ १४ ॥ कार्यकारणरूपाय वासुदेवाय ते सदा ॥ नमोस्तु पुत्रलाभार्थं सुखदाय बुधाय ते ॥ १५ ॥ राजीवनेत्र
श्रीराम रावणारे हरे कवे ॥ तुभ्यं नमोस्तु देवेश तनयं देहि मे हरे ॥ १६ ॥ अस्माकं पुत्रलाभाय भजामि त्वां जगत्पते ॥ देहि
मे तनयं कृष्ण वासुदेव रमापते ॥ १७ ॥ श्रीमानिनीमानचोर गोपीवस्त्रापहारक ॥ देहि मे तनयं कृष्ण वासुदेव जगत्पते ॥१८॥
अस्माकं पुत्रसंप्राप्तिं कुरुष्व यदुनंदन ॥ रमापते वासुदेव मुकुंद मुनिवंदित ॥१९॥ वासुदेव सुतं देहि तनयं देहि माधव ॥ पुत्रं मे देहि
श्रीकृष्ण वत्सं देहि महाप्रभो ॥ २० ॥ डिंभकं देहि श्रीकृष्ण ह्यात्मजं देहि राघव ॥ भक्तमंदार मे देहि तनयं नंदनंदन ॥ २१ ॥
नंदनं देहि मे कृष्ण वासुदेव जगत्पते ॥ कमलानाथ गोविंद मुकुंदमुनिवंदित ॥२२॥ अन्यथा शरणं नास्ति त्वमेव शरणं मम ॥
सुतं देहि श्रियं देहि श्रियं पुत्रं प्रदेहि मे ॥ २३ ॥ यशोदास्तन्यपानज्ञं पिबंतं यदुनंदनम् ॥ वंदेहं पुत्रलाभार्थं कपिलाक्षं हरिं सदा
॥ २४ ॥ नंदनंदन देवेश नंदनं देहि मे प्रभो ॥ रमापते वासुदेव श्रियं पुत्रं जगत्पते ॥ २५ ॥ पुत्रं श्रियं श्रियं पुत्रं पुत्रं मे देहि
माधव ॥ अस्माकं दीनवाक्यानि ह्यवधारय श्रीपते ॥ २६ ॥ गोपालडिंभ गोविंद वासुदेव रमापते ॥ अस्मभ्यं डिंभकं देहि श्रियं
देहि जगत्पते ॥ २७ ॥ मद्वांछितफलं देहि देवकीनंदनाच्युत ॥ मां च पुत्रार्थिनं धन्यं कुरुष्व यदुनंदन ॥ २८ ॥ याचेहं त्वां श्रियं
पुत्रं देहि मे पुत्रसंपदम् ॥ भक्तचिंतामणे राम कल्पवृक्ष महाप्रभो ॥ २९ ॥ आत्मजं नंदनं पुत्रं कुमारं डिंभकं सुतम् ॥ अर्भकं
तनयं देहि मे सदा रघुनंदन ॥ ३० ॥ वंदे संतानगोपालमाधवं भक्तकामदम् ॥ अस्माकं पुत्रसंप्राप्त्यै सदा गोविंदमच्युतम् ॥३१॥
अकारयुक्तं गोपालं श्रीयुक्तं यदुनंदनम् ॥ क्लींयुक्तं देवकीपुत्रं नमामि यदुनायकम् ॥ ३२ ॥ वासुदेव मुकुंदेश गोविंद माधवाच्युत ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

देहि मे तनयं कृष्ण रमानाथ महाप्रभो॥३३॥राजीवनेत्र गोविंद कपिलाक्ष हरे प्रभो ॥ समस्तकाम्यवरद देहि मे तनयं सदा ॥३४॥
अब्जपद्मानभःपद्मावृंदरूप जगत्पते ॥ देहि मे वंरसत्पुत्रं रमानायक माधव ॥ ३५ ॥ नंदपाल धरापाल गोविंद यदुनंदन ॥ देहि मे
तनयं कृष्ण रुक्मिणीवल्लभ प्रभो ॥३६॥ दासमंदार गोविद मुकुंद माधवाच्युत ॥ गोपाल पुंडरीकाक्ष देहि मे तनयं श्रियम् ॥३७॥
यदुनायक पद्मेश नंदगोपवधूसुत ॥ देहि मे तनयं कृष्ण श्रीधर प्राणनायक ॥ ३८ ॥ अस्माकं वांछितं देहि देहि पुत्रं रमापते ॥
भगवन्कृष्ण सर्वेश वासुदेव जगत्पते ॥ ३९ ॥ रमाहृदयसंभार सत्यभामामनःप्रिय ॥ देहि मे तनयं कृष्ण रुक्मिणीवल्लभ प्रभो
॥ ४० ॥ चंद्रसूर्याक्ष गोविंद पुंडरीकाक्ष माधव ॥ अस्माकं भाग्यसत्पुत्रं देहि देव जगत्पते ॥ ४१ ॥ कारुण्यरूप पद्माक्ष पद्म
नाभ समर्चित ॥ देहि मे तनयं कृष्ण देवकीनंदनंदन ॥ ४२ ॥ देवकीसुत श्रीनाथ वासुदेव जगत्पते ॥ समस्तकामफलद देहि मे
तनयं सदा ॥ ४३ ॥ भक्तमंदार गंभीर शंकराच्युत माधव ॥ देहि मे तनयं गोपबाल वत्सक श्रीपते ॥ ४४ ॥ श्रीपते वासु
देवेश देवकीप्रियनंदन ॥ भक्तमंदार मे देहि तनयं जगतां प्रभो ॥ ४५ ॥ जगन्नाथ रमानाथ भूमिनाथ दयानिधे ॥ वासुदेवेश
सर्वेश देहि मे तनयं प्रभो ॥ ४६ ॥ श्रीनाथ कमलपत्राक्ष वासुदेव जगत्पते ॥ देहि मे तनयं कृष्ण त्वामहं शरणं गतः ॥ ४७ ॥
दासमंदार गोविंद भक्तचिंतामणे प्रभो ॥ देहि मे तनयं कृष्ण त्वामहं शरणं गतः ॥ ४८ ॥ गोविंद पुंडरीकाक्ष रमानाथ महाप्रभो ॥
देहि मे तनयं कृष्ण त्वामहं शरणं गतः ॥ ४९ ॥ श्रीनाथ कमलपत्राक्ष गोविंद मधुसूदन ॥ मत्पुत्रफलसिद्ध्यर्थं भजामि त्वां
जनार्दन ॥ ५० ॥ स्तन्यं पिबंतं जननीमुखांबुजं विलोक्य मंदस्मितमुज्वलाङ्गम् ॥ स्पृशंतमन्यस्तनमंगुलीभिर्वंदे यशोदांकगतं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मुकुंदम् ॥ ५१ ॥ याचेहं पुत्रसंतानं भवंतं पद्मलोचन ॥ देहि मे तनयं कृष्ण त्वामहं शरणं गतः ॥ ५२ ॥ अहं तु पुत्रसंपत्तिं चिंतयामि जगत्पते ॥ शीघ्रं मे देहि दातव्यं भवता मुनिवंदित ॥ ५३ ॥ वासुदेव जगन्नाथ श्रीपते पुरुषोत्तम ॥ कुरु मां दत्तपुत्रं च कृष्ण देवेंद्रपूजित ॥५४॥ कुरु मां दत्तपुत्रं च यशोदाप्रियनंदन ॥ मह्यं वै पुत्रसंतानो दातव्यो भवता हरे ॥ ५५ ॥ वासुदेव जगन्नाथ गोविंद देवकीसुत ॥ देहि मे तनयं राम कौशल्याप्रियनंदन ॥ ५६ ॥ पद्मपत्राक्ष गोविंद विष्णो वामन माधव ॥ देहि मे तनयं सीताप्राणनायक राघव ॥ ५७ ॥ कंजाक्ष कृष्ण देवेंद्रमंडित मुनिवंदित ॥ लक्ष्मणाग्रज श्रीराम देहि मे तनयं सदा ॥ ५८ ॥ देहि मे तनयं राम दशरथप्रियनंदन ॥ सीतानायक कंजाक्ष मुचुकुंदवरप्रद ॥ ५९ ॥ विभीषणस्य या लंका भवता दीयते पुरा ॥ अस्माकं तत्प्रकारेण तनयं देहि माधव ॥ ६० ॥ भवदीयपदांभोजे चिंतयामि निरंतरम् ॥ देहि मे तनयं सीताप्राणवल्लभ राघव ॥ ६१ ॥ राम मत्काम्यवरद पुत्रोत्पत्तिफलप्रद ॥ देहि मे तनयं श्रीश कमलासनवंदित ॥ ६२ ॥ राम राघव सीतेश लक्ष्मणानुज देहि मे ॥ भाग्यमत्पुत्रसंतानं दशरथात्मज श्रीपते ॥ ६३ ॥ देवकीगर्भसंजात यशोदाप्रियनंदन ॥ देहि मे तनयं राम कृष्ण गोपाल माधव ॥६४॥ कृष्ण माधव गोविंद वामनाच्युत शंकर ॥ देहि मे तनयं श्रीश गोपबालकनायक ॥ ६५ ॥ गोपबाल महापुण्य गोविंदाच्युत माधव ॥ देहि मे तनयं कृष्ण वासुदेव जगत्पते ॥ ६६ ॥ दिशतुदिशतु पुत्रं देवकीनंदनोयं दिशतुदिशतु शीघ्रं भाग्यवत्पुत्रलाभम् ॥ दिशतुदिशतु श्रीशो राघवो रामभद्रो दिशतुदिशतु पुत्रं वंशविस्तारहेतोः ॥ ६७ ॥ दीयतां वासुदेवेन तनयो मत्प्रियः सुतः ॥ कुमारो नंदनो सीतानायकेन सदा मम ॥ ६८॥ राम राघव गोविंद देवकी

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सुत माधव ॥ देहि मे तनयं श्रीश गोपबालकनायक ॥ ६९ ॥ वंशविस्तारकं पुत्रं देहि मे मधुसूदन ॥ सुतं देहि सुतं देहि त्वामहं शरणं गतः ॥ ७० ॥ ममाभीष्टसुतं देहि कंसारे माधवाच्युत ॥ सुतं देहि सुतं देहि त्वामहं शरणं गतः ॥ ७१ ॥ चन्द्रार्क कल्पपर्यंतं तनयं देहि माधव ॥ सुतं देहि सुतं देहि त्वामहं शरणं गतः ॥ ७२ ॥ विद्यावंतं बुद्धिमन्तं श्रीमन्तं तनयं सदा ॥ देहि मे तनयं कृष्ण देवकीनन्दनः सदा ॥ ७३ ॥ नमामि त्वां पद्मनेत्र सुतलाभाय कामदम् ॥ मुकुंदं पुंडरीकाक्षं गोविंदं मधुसूदनम् ॥ ७४ ॥ भगवन्कृष्ण गोविंद सर्वकामफलप्रद ॥ देहि मे तनयं स्वामिंस्त्वामहं शरणं गतः ॥ ७५ ॥ स्वामिंस्त्वं भगवन्नाम कृष्ण माधव कामद ॥ देहि मे तनयं नित्यं त्वामहं शरणं गतः ॥ ७६ ॥ तनयं देहि गोविंद कंजाक्ष कमलापते ॥ सुतं देहि सुतं देहि त्वामहं शरणं गतः ॥ ७७ ॥ पद्मापते पद्मनेत्र प्रद्युम्नजनक माधव ॥ सुतं देहि सुतं देहि त्वामहं शरणं गतः ॥ ७८ ॥ शंखचक्रगदाखड्गशार्ङ्गपाणे रमापते ॥ देहि मे तनयं कृष्ण त्वामहं शरणं गतः ॥ ७९ ॥ नारायण रमानाथ राजीवपत्रलोचन॥ सुतं मे देहि मे देहि पद्मसद्मानुवंदित ॥ ८० ॥ राम राघव गोविंद देवकीवरनंदन ॥ रुक्मिणीनाथ सर्वेश नारदादिसुरार्चित ॥८१॥ देवकीसुत गोविंद वासुदेव जगत्पते ॥ देहि मे तनयं श्रीश गोपबालकनायक ॥ ८२ ॥ मुनिवंदित गोविंद रुक्मिणीवल्लभ प्रभो ॥ देहि मे तनयं० ॥ ८३ ॥ गोपिकार्चित पंकेजमकरंदासक्तमानस ॥ देहि मे त० ॥ ८४ ॥ रामाहृदयपंकेजलोल माधव कामद ॥ ममाभीष्टसुतं देहि त्वामहं शरणं गतः ॥ ८५ ॥ वासुदेव रमानाथ दासानां मंगलप्रद ॥ देहि मे त० ॥ ८६ ॥ कल्याणप्रद गोविंद मुरारे मुनिवंदित ॥ देहि मे त० ॥ ८७ ॥ पुत्रप्रद मुकुंदेश रुक्मिणीवल्लभ प्रभो ॥ देहि मे त० ॥ ८८ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पुंडरीकाक्ष गोविंद वासुदेव जगत्पते ॥ देहि मे त० ॥ ८९ ॥ दयानिधे वासुदेव मुकुंद मुनिवंदित देहि मे त० ॥ ९० ॥ पुत्रसंपत्प्रदातारं गोविंदं देवपूजितम् ॥ वंदामहे सदा कृष्णं पुत्रलाभप्रदायकम् ॥ ९१ ॥ कारुण्यनिधये गोपीवल्लभाय मुरारये ॥ नमोऽस्तु पुत्रलाभार्थं देहि मे तनयं विभो ॥ ९२ ॥ नमस्तस्मै रमेशाय रुक्मिणीवल्लभाय ते ॥ देहि मे तनयं श्रीश गोपबालक नायक ॥ ९३ ॥ नमस्ते वासुदेवाय नित्यश्रीकामुकाय च ॥ पुत्रदाय च शेषेंद्रशायिने रंगशायिने ॥ ९४ ॥ रंगशायिन्रमानाथ मंगलप्रद माधव ॥ देहि मे तनयं श्रीश गोपबालकनायक ॥ ९५ ॥ दासाय मे सुतं देहि दीनमंदार राघव ॥ सुतं देहि सुतं देहि पुत्रं देहि रमापते ॥ ९६ ॥ नमोऽस्तु ते ममाभीष्टपुत्रदानकृते सदा ॥ देहि मे त० ॥ ९७ ॥ मदिष्टदेव गोविंद वासुदेव जनार्दन ॥ देहि मे त० ॥ ९८ ॥ नीतिमान्धनवान्पुत्रो विद्यावांश्च सुजायते ॥ भगवंस्त्वत्कृपायाश्च वासुदेवेंद्रपूजित ॥ ९९ ॥ यः पठेत्पुत्रशतकं सोपि सत्पुत्रवान्भवेत् ॥ श्रीवासुदेवकथितं स्तोत्ररत्नं सुखाय च ॥ १०० ॥ जपकाले पठेन्नित्यं पुत्रलाभं धनं श्रियम् ॥ ऐश्वर्यं राजसम्मानं सद्यो याति न संशयः ॥" इति लक्ष्मीकेशवसंवादेसंतानगोपालस्तोत्रं सम्पूर्णम् ॥ ॥

अथ विष्णोः प्रसंगादन्यान्यपि संतानोपायविधानानि लिख्यन्ते । (महार्णवे कौस्तुभे च)–अरुण उवाच ॥ वृथा धनं गृहं धान्यमपुत्रं जन्म निष्फलम् ॥ ममोपरि दयां कृत्वा प्रायश्चित्तं वदस्व मे ॥ १ ॥ श्रीसूर्य उवाच ॥ तीर्थ यात्रा प्रकर्तव्या रेवातापीसमुद्भवा ॥ एकेनापि हि वस्त्रेण दंपतीस्नानमुत्तमम् ॥ २ ॥ श्रवणं हरिवंशस्य ब्राह्मणोद्वाहनं खग ॥ अष्टोत्तरशतान्विप्रान्मिष्टान्नेन तु तर्पयेत् ॥ ३ ॥ ईशान इति मंत्रेण जपं कुर्य्यात्सहस्रकम् ॥ दशांशहोमसंयुक्तं कुर्याच्च

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

विधिवत्ततः ॥ ४ ॥ पद्मैस्तु लक्षसंख्याकैः शिवं संपूज्य यत्नतः ॥ स्वर्णधेनुः प्रदातव्या सवत्सा सुरभिस्तथा ॥ ५ ॥ घृतकुंभं वैनतेय ब्राह्मणाय निवेदयेत् ॥ एवं कृतेन वै तस्य ह्यपत्यं जायते कलौ ॥ ६ ॥ (महार्णवेपि) सुवर्णबालकं कृत्वा दद्याद्दोलास मन्वितम् ॥ अथवा वृषभं दद्याद्विप्रोद्वाहनमेव वा ॥ ७ ॥ महारुद्रजपो वापि लक्षपद्मैः शिवार्चनम् ॥ (गारुडे) हरिवंशकथां श्रुत्वा शतचंडीविधानतः ॥ भक्त्या श्रीशिवमाराध्य पुत्रमुत्पादयेत्सुधीः ॥ ८ ॥ शातातपः—विप्ररत्नापहारी च सोऽनपत्यः प्रजा यते ॥ तेन कार्यं विशुद्ध्यर्थं महारुद्रजपादिकम् ॥ ९ ॥ (पद्मपुराणे) संतानगोपालमंत्री महारुद्रजपस्तथा ॥ पूजनं पार्थिव स्यैव गणनाथमनुं जपेत् ॥ १० ॥ मृतपुत्रत्वहरोपायमेपि (महार्णवे) बालघाती च पुरुषो मृतवत्सः प्रजायते ॥ ब्राह्मणोद्वाहनं चैव कर्तव्यं तेन शुद्ध्यति ॥११॥ श्रवणं हरिवंशस्य कर्तव्यं च यथाविधि ॥ महारुद्रजपं चैव कारयेच्च यथाविधि ॥ १२॥ जुहुयाच्च दशांशेन दूर्वामाज्यपरिप्लुताम् ॥ एकादशस्वर्णनिष्कं प्रदातव्याश्च दक्षिणाः ॥१३॥एकादशपशूंश्चैव दद्याद्वित्तानुसारतः॥ अन्येभ्योपि यथाशक्ति द्विजेभ्यो दक्षिणां दिशेत् ॥१४॥ स्नापयेद्दंपती पश्चान्मंत्रैर्वरुणदैवतैः ॥ आचार्याय प्रदेयानि वस्त्रालंकरणानि च ॥१५ ॥ ॥ अथ हरिवंशश्रवणविधानम् ॥ तत्र तावत्पूर्वोक्तपद्धतिकाण्डोक्तप्रायश्चित्तविधिना प्राजापत्यचान्द्रायणादीनि कृत्वा तदशक्तौ तत्प्रतिनिधिरूपधेनुदानादिद्वारा वा प्रायश्चित्तं विधाय सूर्यारुणसंवादमहार्णवादिकर्मविपाकग्रंथोक्तहरिवंशश्रवणादि कर्म्म कुर्यात् ॥ तद्यथा—दंपत्योरनुकूले सुदिने प्रातः कृतनित्यक्रियो देवालयादिपुण्यस्थले स्वगृहे वा शुभं मंडपं विधाय गोमयोपलिप्ते देशे पीठे सर्वतोभद्रं विरच्य सपत्नीकः स्वासने प्राङ्मुख उपविश्य । आचम्य प्राणानायम्य । देशकालौ संकीर्त्य । अमुकगोत्रो

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ऽमुकशर्माहं ममानेकजन्मार्जिताऽनपत्यत्वमृतापत्यत्वादिनिदानभूतबालघातनिक्षेपहरणविप्ररत्नापहरणादिजन्यदुरितसमूलनाश द्वारा दीर्घायुष्मद्बहुपुत्रादिसंततिप्राप्तिकामो हरिवंशश्रवणं करिष्ये । तदंगत्वेन निर्विघ्नतार्थं सांगतासिद्ध्यर्थं च गणपति पूजनं पुण्याहवाचनं मातृकापूजनं नांदीश्राद्धं च करिष्ये ॥ इति च संकल्प्य । गणपतिपूजनादि नांदीश्राद्धांतं पूर्ववत् कुर्य्यात् ॥ ततः श्रुताध्ययनसंपन्नं ब्राह्मणमासने उदङ्मुखमुपवेश्य स्वयं प्राङ्मुख उपविश्य । विप्रस्य पादप्रक्षालनं कृत्वा गंधादिभिः संपूजयेत् । ततो विभवानुसारेण वरणद्रव्याणि गृहीत्वा । देशकालौ संकीर्त्य मम दीर्घायुष्मत्पुत्रप्राप्तये अमुकगोत्रममुकशर्माणं ब्राह्मणमेभिर्गंधाक्षतपुष्पतांबूलस्वर्णमुद्रिकाकुंडलकमंडलुवासोभिर्हरिवंशश्रवणार्थं वाचकत्वेन श्रावयितारं त्वामहं वृणे । इति वृत्वा । ॐ वृतोस्मीति प्रतिवचनानंतरं वस्त्रालंकारादिभिः संपूजयेत् ॥ ततः कथाभंगनिवृत्तये साङ्गतासिद्धये च विष्णोर्द्वादशाक्षरसंतानगोपालमहारुद्रजपपार्थिवपूजागणेशमंत्रजपकरणार्थं पंच ब्राह्मणान् वृणुयात् ॥ तथा च (पाद्मे) वरणं पंचविप्राणां कथाभंगनिवृत्तये ॥ कर्तव्यं तैर्हरेर्जाप्यं द्वादशाक्षरविद्यया ॥ १ ॥ संतानगोपालमंत्रो महारुद्रजपस्तथा ॥ पूजनं पार्थिवस्यैव गणनाथमनुं जपन् ॥ २ ॥ आसूर्योदयमारभ्य सार्धं त्रिप्रहरार्धकम् । वाचनीया कथा सम्यग्धीरकंठं सुधीमता ॥ ३ ॥ कथाविरामः कर्तव्यो माध्याह्ने घटिकाद्वयम् ॥ नवरात्रं यथाशक्त्या उपोष्य शृणुयात्तदा ॥ ४ ॥ (द्वादशाक्षरमंत्रादीनि तत्तद्देवानुष्ठानप्रकरणे द्रष्टव्यानि) ततो वाचयिता प्रतिदिनम् । ॐ नारायणाय नमः ॥ ॐ नराय नमः ॥ ॐ नरोत्तमाय नमः ॥ ॥ ॐ देव्यै नमः ॥ ॐ सरस्वत्यै नमः ॥ ॐ व्यासाय नमः ॥ "ॐ नमस्ते भगवन् व्यास सर्वशास्त्रार्थकोविद ॥ ब्रह्मवि

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ष्णुमहेशानमूर्ते सत्यवतीसुत ॥ १ ॥" इति नमस्कृत्य स्वगुरून्प्रणम्य स्पष्टपदाक्षरं सार्थकं वाचयेत् ॥ श्रोता प्रतिदिनं शालिग्रामप्रतिमादौ श्रीविष्णुं पुरुषसूक्तेन षोडशोपचारैः संपूज्य वाचकं पुस्तकं च गंधपुष्पादिभिः पूजयेत् ॥ दंपती प्रतिदिनम् "ॐ त्रायंताम्" इत्यादिवैदिकैर्मंत्रैः 'सुरास्त्वाम्' इत्यादिपौराणमंत्रैश्च सुस्नातावलंकृतौ कृतविश्वासौ आस्तिकौ तदेकचित्तौ शृणुयाताम् । तैलतांबूलक्षौरमैथुनखट्वाशयनानि यावत्समाप्ति वर्जयंतौ हविष्यं भुंजीयाताम् ॥ वाचकादीनपि प्रत्यहं पायसादिना भोजयेत् ॥ ग्रंथसमाप्तौ वाचकाय स्वलंकृतां गां पयस्विनीं सवत्सां सोपस्करां सुवर्णाभरणादिदक्षिणां च दत्त्वा गायत्रीमंत्रेण संहस्रं तिलाज्यं हुत्वा न्यूनं संपूर्णतां वाचयित्वा शतं विप्रान् चतुर्विंशतिमिथुनानि च पायसान्नेन भोजयेत् ॥ इति हरिवंशश्रवणप्रयोगः ॥ अथ हरिवंशश्रवणमहात्म्यम् (पाद्मे) " बालघाती च पुरुषो मृतवत्सः प्रजायते ॥ श्रवणं हरिवंशस्य कर्तव्यं च यथाविधि ॥ १ ॥ गुरुचंद्राग्निसूर्याणां संमुखे मेहते च यः ॥ बीजमुत्सृज्यते तेन त्यक्तरेता नरो भवेत् ॥ २ ॥ योषित्पुष्पफलानां च बालानां घातिनी तथा ॥ फलानां कर्तनकरी मातापितृवियोगिनी ॥ ३ ॥ स्राविणी परगर्भणां तत्तत्प्रायोपयोषिणी ॥ ईदृग्विधा भविष्यंति पंचदोषयुताः स्त्रियः ॥ ४ ॥ अपुष्पा मृतवत्सा च काकवंध्या तथैव च ॥ कन्याप्रजात्वं च तथा स्रावयुक्ता स्वपातकैः ॥ ५ ॥ तासां दोषापहारार्थं हरिवंशोऽभिगर्जति ॥ तदीयश्रवणात्सद्यो दोषा नश्यंति सत्वरम् ॥ ६ ॥ नरः सुवर्णं सर्पिश्च पददानैः समन्वितम् ॥ दशावृत्तीः शृणोत्येवं बीजसाफल्यमाप्नुयात् ॥ ७ ॥ दशावृत्तीरपुष्पार्थं मृतवत्सा तु सप्त वै ॥ पंचावृत्तीः स्रवद्गर्भा काकवंध्या त्रयं तथा ॥ ८ ॥ कन्याप्रसूश्चैकावृत्तिं श्रुत्वा पुत्रमवाप्नुयात् ॥ जीवितावधिकं श्राव्यं सर्वदोषोप

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

शांतये ॥ ९ ॥ भविष्यं जन्म संप्राप्य न भवेत्तादृशी पुनः ॥ उत्तमं सार्थपाठं च मध्यमं च निरर्थकम् ॥ १० ॥ विनार्थं शुद्धपाठश्चेदुत्तमेन समं भवेत् ॥ नवाहमुत्तमं प्रोक्तमेकत्रिंशाहं मध्यमम् ॥ ११ ॥ निकृष्टमेकत्रिंशाहं सुखसाध्यं समाचरेत् ॥ बहुभिर्दिवसैराजन् साध्यानां साधनं कलौ ॥ १२ ॥ तेन पारायणं साध्यं प्रोक्तं नारायणात्मना ॥ नवाहो गर्जति कलौ चैक विंशाहिकस्तथा ॥ १३ ॥ एकत्रिंशाहिको यज्ञो वंध्यादोषविनाशकः ॥ गोव्रतं तु स्त्रिया कार्यं पारणं पुरुषेण च ॥ १४ ॥ श्रवणारंभणे राजन्यथावत्कथमामि ते ॥ अवसायांतपर्यंतं कार्यं मासव्रतं शुभम् ॥ १५ ॥ चतुर्थ्यां प्रातरुत्थाय स्त्रिया हृष्टेन मानसा ॥ गोव्रतं नियतं कार्यं निराहारं निरौदकम् ॥ १६ ॥ सूर्यास्तकालपर्यंतं यावद्गोरागमो भवेत् ॥ आगतां च सवत्सां हि पूजायित्वा यथाविधि ॥ १७ ॥ यवसं पुष्कलं दत्त्वा यवान्नं कुरुते स्वयम् ॥ एवं मासे चतुर्थ्यां सा शुक्लायां व्रतमाचरेत् ॥ ॥ १८ ॥ स्त्रीव्रतं कथितं राजन् पुरुषस्य तथैव च ॥ एवं मासव्रतं कृत्वा सुपुत्रं लभते ध्रुवम् ॥ १९ ॥ दरिद्रः क्षयरोगी च निर्भाग्यः पापकर्मवान् ॥ अनपत्यो मोक्षकामः शृणुयात्स कथामिमाम् ॥२०॥ अपुष्पा काकबंध्या च बंध्या या च मृतार्भका ॥ स्रवद्गर्भा च या नारी तया श्राव्या प्रयत्नतः ॥ २१ ॥ सुपुत्रं लभते राजन् व्यासस्य वचनं यथा ॥ सर्वान्कामानवाप्नोति कथां श्रुत्वा हरेरिमाम् ॥ २२ ॥ समाप्तौ विधिवद्वस्त्रं क्षौमं दद्याच्चवाचके ॥ हिरण्यमन्यद्द्रव्यं च दक्षिणां तत्र दापयेत् ॥ २३ ॥ हरिवंशं लिखित्वा यो वाचकाय प्रदापयेत् ॥ यत्फलं भूमिदानस्य तत्फलं लभते हि सः ॥ २४ ॥ राजसूयेन तेनेष्टमश्व मेधेन वै नृप ॥ दत्तानि सर्वदानानि हरिवंशे श्रुतेऽखिले ॥ २५ ॥ राजसूयाश्वमेधाद्या यज्ञाश्चैव युगेयुगे ॥ श्रवणं हरिवंशस्य

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कलौ यज्ञफलप्रदम् ॥ २६ ॥ हवनं च तथा राजन्कर्तव्यं कर्मशांतये ॥ प्रतिश्लोकं च जुहुयाद्दशांशैनैव वा पुनः ॥ २७ ॥ पायसं मधुसर्पिश्च तिलान्नादिकसंयुतम् ॥ अथ वा हवनं कुर्याद्गायत्र्या सुसमाहितः ॥ २८ ॥ होमाशक्तौ बुधो हेम दद्यात्त त्फलसिद्धये ॥ नानाछिद्रनिरोधार्थं न्यूनताधिकताख्ययोः ॥ २९ ॥ दोषयोः प्रशमार्थं च पठेन्नामसहस्रकम् ॥ तेन स्यात्स फलं सर्वं नास्त्यस्मादधिकं यतः ॥ ३० ॥ भोजयेन्मिथुनान्येव चतुर्विंशतिरादरात् ॥ अनेन विधिना राजन् यः पुराणं समा पयेत् ॥ ३१ ॥ तस्य स्त्री लभते गर्भं मासैकेन च भारत ॥ तत्कृत्वा लभते नारी पुत्रं भास्करतेजसम् ॥ ३२ ॥ तथा वंध्या लभेद्गर्भं व्यासस्य वचनं यथा ॥ इति पद्मपुराणे संतानोत्पादकश्रीहरिवंशश्रवणविधानं समाप्तम् ॥ ॥ अथ पुत्रोत्पादकविधानांतराणि ॥ शिवमंत्रानुष्ठानप्रकरणोक्तां पार्थिवशिवपूजां प्रत्यहं कृत्वा अभिलाषाष्टकजपं संवत्सरं कुर्यात् । तद्यथा—विश्वानर उवाच ॥ एकं ब्रह्मैवाद्वितीयं समस्तं सत्यं सत्यं नेह नानास्ति किंचित् ॥ एको रुद्रो न द्वितीयोवतस्थे तस्मादे कं त्वां प्रपद्ये महेशम् ॥१॥ एकः कर्ता त्वं हि विश्वस्य शंभो नानारूपेष्वेकरूपोस्य रूपः ॥ यद्वत्तपर्त्यर्क एकोप्यनेकस्तस्मान्ना न्यं त्वां विनेशं प्रपद्ये ॥ २ ॥ रज्जौ सर्पः शुक्तिकायां च रौप्यं नैरे पूरस्तन्मृगाख्यै मरीचौ ॥ यद्वत्तद्वद्विष्वगेष प्रपंचो यस्मिन् ज्ञाते तं प्रपद्ये महेशम् ॥३॥ तोये शैत्यं दाहकत्वं च वह्नौ तापो भानौ शीतभानौ प्रसादः ॥ पुष्पे गंधो दुग्धमध्ये च सर्पिर्यत्तच्छं भो त्वं ततस्त्वां प्रपद्ये ॥४॥ शब्दं गृह्णास्यश्रवास्त्वं हि जिघ्रस्यघ्राणस्त्वं व्यंघ्रिरायासि दूरात् ॥ व्यक्षः पश्येस्त्वं रसज्ञोप्यजिह्वः कस्त्वां सम्यग्वेत्त्यतस्त्वां प्रपद्ये ॥५॥ नो वेदस्त्वामीश साक्षाद्धि वेद नो वा विष्णुर्नो विधाताखिलस्य ॥ नो योगींद्रा नेंद्रमुख्याश्च

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

देवा भक्तो वेदत्वामतस्त्वांप्रपद्ये ॥ ६ ॥ नो ते गोत्रं नापि जन्मापि नाख्या नो वा रूपं नैव शीलं न देशः ॥ इत्थंभूतोपीश्वरस्त्वं त्रिलोक्याः सर्वान्कामान्पूरयेस्तद्भजे त्वाम् ॥७॥ त्वत्तः सर्वं त्वं हि सर्वं स्मरारे त्वं गौरीशस्त्वं च नग्नोऽतिशांतः॥ त्वं वै वृद्धस्त्वं युवा त्वं च बालस्तात्किं यत्त्वं नास्यतस्त्वां नतोस्मि॥८॥ स्तुत्वेति भूमौ निपपात विप्रः स दंडवद्यावदतीव हृष्टः ॥ तावत्स बालोऽखिल वृद्धवृद्धः प्रोवाच भूदेव वरं वृणीहि ॥ ९ ॥ तत उत्थाय हृष्टात्मा मुनिर्विश्वानरः कृती ॥ प्रत्यब्रवीत्किमज्ञातं सर्वज्ञस्य तव प्रभो ॥ १० ॥ सर्वांतरात्मा भगवान् शर्वः सर्वप्रदो भवान् ॥ याच्ञा प्रतिनियुंक्तेमामयशोदैन्यकारिणी ॥ ११ ॥ इति श्रुत्वा वचस्तस्य देवो विश्वानरस्य ह ॥ शुचे शुचिव्रतस्याथ शुचिः स्मित्वाब्रवीच्छिवः ॥ १२ ॥ बाल उवाच ॥ त्वया शुचे शुचिष्मत्यां योभिलाषः कृतो हृदि ॥ अचिरेणैव कालेन स भविष्यत्यसंशयः ॥ १३ ॥ तव पुत्रत्वमेष्यामि शुचिष्मत्यां महामते ॥ ख्यातो गृहपतिर्नाम्ना शुचिः सर्वामरप्रियः ॥ १४ ॥ अभिलाषाष्टकं पुण्यं स्तोत्रमेतत्त्वयेरितम् ॥ अब्दं त्रिकालपठनात्कामदं शिवसन्निधौ ॥ १५ ॥ एतत्स्तोत्रस्य पाठं तु पुत्रपौत्रधनप्रदम् ॥ सर्वशांतिकरं वापि सर्वापत्त्यरिनाशनम् ॥ १६ ॥ स्वर्गापवर्ग संपत्तिकारकं नात्रसंशयः ॥ प्रातरुत्थाय सुस्नातो लिंगमभ्यर्च्य शांभवम् ॥ १७ ॥ वर्षं जपन्निदं स्तोत्रमपुत्रः पुत्रवान्भवेत् ॥ वैशाखे कार्त्तिके माघे विशेषनियमैर्युतः ॥ १८ ॥ यः पठेत्स्नानसमये लभते सकलं फलम् ॥ कार्तिकस्य तु मासस्य प्रसादा दहमव्ययः ॥ १९ ॥ तव पुत्रत्वमेष्यामि यस्त्वन्यस्तत्पठिष्यति ॥ अभिलाषाष्टकमिदं न देयं यस्य कस्य चित् ॥ २० ॥ गोपनीयं प्रयत्नेन एवं वंध्याप्रसूतिकृत् ॥ स्त्रिया वा पुरुषेणापि नियमाल्लिंगसन्निधौ ॥ २१ ॥ अब्दं जप्तमिदं स्तोत्रं पुत्रदं नात्रसंशयः ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

इत्युक्तांतर्दधे बालः सोपि विप्रो गृहं गतः ॥ २२ ॥ इति स्कंदपुराणे काशीखंडे अभिलाषाष्टकाख्यं विश्वेश्वरस्तोत्रं स० ॥ अथवा यथाशक्तिद्रव्येण विप्रस्य विवाहः कार्यस्तेनापिपुत्रो भविता ॥ अथवा रेवातापीयात्राकर्तव्या तत्र दंपती एकेनैव वस्त्रेण स्नाताम् ॥ अथवा अष्टोत्तरशतान् विप्रान् पायसान्नादिना भोजयेत् । अथवा–"ॐ ईशानः सर्वविद्यानामीश्वरः सर्वभूतानां ब्रह्माधिपतिर्ब्रह्मणोधिपतिर्ब्रह्मा शिवो मे अस्तु सदाशिवोम् ॥ १ ॥ इति मंत्रेण सहस्रमयुतं लक्षं वा जपं कृत्वा तद्दशांशेन तिलपायसान्नैर्होमं कुर्यात् । अथ वा–लक्षसंख्याकैः कमलैः शिवपंचाक्षरेण शिवपूजा कार्या । अथ वा–दानकल्पोक्तविधिना स्वर्णधेनुः सवत्सा सुरभिर्वा दातव्या । अथ वा–घृतपूर्णं ताम्रकलशं दद्यात् । अथ वा–सुवर्णमयं बालकं कृत्वा दोलायां संस्थाप्य यथाविधि दानं कार्यम् । अथ वा–वृषभदानमेकादशधेनुदानं च कार्यम्।अथ वा–रुद्रानुष्ठानप्रकरणोक्तं महारुद्रजपं कुर्यात् अथ वा–देवीमंत्रानुष्ठानप्रकरणोक्तं पूर्ववत् शतचंडीविधानं कार्यम् । अथ वा–गयायात्रा कार्या । अथ वा–सूर्याराधनं कुर्यात् । एषामन्यतमेनापि फलाऽप्राप्तौ विष्णुयागं कुर्यात्॥अथ विष्णुयागः (बृहत्पाराशरे) "अथान्यं संप्रवक्ष्यामि विधिं पावनमुत्तमम्॥अस्मत्तातप्रभावोयं रघुपौत्रस्य धीमतः ॥ १ ॥ अनपत्यस्य पुत्रार्थं चक्रे वैभांडकस्तु यम् ॥ सहस्रशीर्षसूक्तस्य विधानं चरुपाककृत् ॥ २ ॥ यैर्यैर्नृपैः कृतः पूर्वमन्यैरपि द्विजोत्तमैः ॥ सिध्यंति सर्वमंत्राणि विधिविद्भिर्द्विजोत्तमैः ॥ ३ ॥ उपासितानि सद्भक्त्या श्रोत्रियैः श्रुतिपारगैः ॥ आत्मविद्भिर्निराहारैर्व्रतिभिर्मंत्रवित्तमैः ॥ ४ ॥ क्रियमाणाः क्रियाः सर्वाः सिध्यंति व्रतचारिभिः ॥ न पाठान्न धनात्स्नानान्नात्मनः प्रतिपादनात् ॥ ५ ॥ प्राक्तनात्कर्मणः पुंसां सर्वाः सिध्यंति सिद्धयः ॥ शुक्लपक्षे शुभे वारे शुभनक्षत्रगोचरे ॥ ६ ॥ द्वादश्यां पुत्रका

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

माय चरुं कुर्वीत वैष्णवम् ॥ दंपत्योरुपवासः स्यादेकादश्यां सुरालये ॥ ७ ॥ ऋग्भिः षोडशभिः सम्यगर्च्चयित्वा जनार्द्दनम् ॥ चरुं पुरुषसूक्तेन श्रपयेत्पुत्रकाम्यया ॥ प्राप्नुयाद्वैष्णवं पुत्रं चिरायुः संततिक्षमम् ॥ ८ ॥ द्वादश्यां द्वादशचरून्विधिवन्निर्वपेद्विजः ॥ यः करोति महायागं विष्णुलोकं स गच्छति ॥ ९ ॥ हुत्वाज्यं विधिवत्पूर्वमृग्भिः षोडशभिस्तथा ॥ समिधोऽश्वत्थवृक्षस्य हुत्वाज्यं जुहुयात्पुनः ॥ १० उपस्थानं ततः कुर्याद्धत्वा तु मधुसूदनम् ॥ हविर्होमं ततः कृत्वा दद्यात्पंच घृताहुतीः ॥ ११ ॥ कामप्रदं नमस्कृत्य नारी नारायणं प्रति ॥ संप्राप्य च हविःशेषं वसेच्छुध्वशनी गृहे ॥ १२ ॥ विधिमेतं ततः कृत्वा कर्त्तव्यं द्विजतर्पणम् ॥ अन्यस्त्रीषु निवर्तेत यावद्गर्भं न विंदति ॥ १३ ॥ अप्रसूता मृतापत्या या च कन्याप्रसूर्भवेत् ॥ क्षिप्रं सा जनयेत्पुत्रं पाराशरवचो यथा ॥१४॥ होमांते दक्षिणां दद्याद्धेम वासस्तिलान्वसु ॥ भूमिं हिरण्यं रत्नानि यथासंभवमेव च ॥१५॥ यः सिद्धमंत्रः सततं द्विजेंद्रः सम्पूज्य विष्णुं विधिवत्सुतार्थी ॥ इदं विधानं विदधाति सम्यक्स पुत्रमाप्नोति हरिप्रसादात् ॥१६॥ इति बृहत्पाराशरीये पुत्रार्थं पुरुषसूक्तविधानम् ॥

॥ अथ विष्णुयागप्रयोगः ॥ विष्णुयागं चिकीर्षुः पूर्वोक्तविधिना चांद्रायणधेनुदानादिद्वारा प्रायश्चित्तं संपाद्य कृतपापक्षयो मलमासशुक्लास्तादिवर्जिते कार्त्तिकमार्गशिरमाघान्यतमे मासि पूर्वोक्तमंडमादिसंभारान् विधाय शुक्लैकादश्यां प्रातर्नद्यादौ स्नात्वा संध्यादिनित्यकर्म्म कृत्वा चंद्रतारादिबलान्विते सुमुहूर्त्ते सपत्नीकः स्वासने प्राङ्मुख उपविश्य । आचम्य प्राणानायम्य । देशकालौ संकीर्त्य । अमुकगोत्रोऽमुकशर्म्मा मम अनपत्यत्वमृतापत्यत्वदोषनिदानदुरितक्षयद्वारा तथा अस्याश्च भार्य्यायाश्चतुर्विधवंध्यात्वनिदानदुरितविनाशार्थं बहुदीर्घायुः सुपुत्रप्राप्तिकामनया श्रीपरमेश्वरप्रीत्यर्थमनया भार्य्यया

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सह पुरुषसूक्तेन जपपूजाहोमात्मकं स्वयं ब्राह्मणद्वारा वा विष्णुयागं करिष्ये । तदंगत्वेन निर्विघ्नतासिद्धये श्रीगणपतिपूजनं पुण्याहवाचनं मातृकापूजनं नांदीश्राद्धं च करिष्ये ॥ इति संकल्प्य । गणेशपूजनादि नांदीश्राद्धांतं सर्व्वं पूर्ववत्कुर्य्यात्। ततः श्रोत्रियं ब्राह्मणमाचार्यत्वेन वृत्वा पुष्पमण्डपे वक्ष्यमाणविधिना न्यासादिपूर्विकां स्तोत्रांतां च यथाविधि विष्णुपूजां कुर्यात् तद्यथा-आत्मनो बहुसद्वृत्तदीर्घायुःपुत्रलब्धये गर्भदोषापहृतये विष्णुयागं समारभे ॥१॥ इति पठित्वा व्रतं प्रगृह्य (तद्दिने सुरालये दंपत्योरुपवासः) देशकालौ स्मृत्वा । मम सभार्य्यस्य जन्मांतरार्जितपापजन्याऽनपत्यत्वदोषविनाशार्थं सत्पुत्रप्राप्त्यर्थं श्रीपरमेश्वरप्रीत्यर्थं च पुरुष सूक्तेन विष्ण्वाराधनम् (होमं) जपं च करिष्ये । तदंगत्वेन न्यासध्यानादि कर्म्म करिष्ये। इति संकल्पं कुर्यात् । ॐ सहस्रशीर्षेति षोडशर्चस्य पुरुषसूक्तस्य नारायण ऋषिः । अनुष्टुप्छंदः। अंत्यायास्त्रिष्टुप्छंदः । पुरुषो नारायणो देवता । न्यासे पूजायां होमे च विनियोगः । ॐ नारायणऋषये नमः शिरसि । ॐ अनुष्टुप्छंदसे नमो मुखे । ॐ पुरुषपरमात्मदेवतायै नमः हृदये । इति ऋष्यादिन्यासः । ॐ सहस्रशीर्षा० इति वामकरे ॥ १ ॥ ॐ पुरुषऽएवेद७सर्वमिति दक्षिणकरे ॥ २ ॥ ॐ एतावानस्यमहिमेति वामपादे ॥ ३ ॥ ॐ त्रिपादूर्ध्वमिति दक्षिणपादे ॥ ४ ॥ ॐ ततोव्विराडिति वामजानुनि ॥ ५ ॥ ॐ तस्माद्यज्ञात्सर्वहुत इति दक्षिणजानुनि ॥ ६ ॥ तस्माद्यज्ञात्सर्वहुतऽऋचः इति वामकटौ ॥ ७ ॥ ॐ तस्मादश्वा इति दक्षिणकटौ ॥ ८ ॥ ॐ तंयज्ञमिति नाभौ ॥ ॥ ९ ॥ ॐ यत्पुरुषं व्यदधुरिति ॥ १० ॥ ॐ ब्राह्मणोस्य मुखमिति कंठे ॥ ११ ॥ ॐ चंद्रमामनस इति वामबाहौ ॥ १२ ॥ ॐ

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नाभ्यांऽआसीदिति दक्षिणबाहौ ॥ १३ ॥ ॐ यत्पुरुषेणेति मुखे ॥ १४ ॥ ॐ सप्तास्यासन्निति अक्ष्णोः ॥ १५ ॥ ॐ यज्ञेनयज्ञमिति मूर्ध्नि ॥ १६ ॥ अथ पंचांगन्यासः ॥ ॐ अद्भ्यःसम्भृतमिति हृदये ॥ १ ॥ ॐ वेदाहमेतमिति शिरसि ॥ २ ॥ ॐ प्रजापतिश्च इति शिखायाम् ॥ ३ ॥ ॐ योदेवेभ्यऽआतपतीति कवचाय हुं ॥ ४ ॥ ॐ रुचं ब्राह्ममिति अस्त्राय फट् ॥ ॥ ५ ॥ अथ वा—ॐ ब्राह्मणोस्य० हृदयाय नमः ॥ १ ॥ ॐ चंद्रमामनस० शिरसे स्वाहा ॥ २ ॥ ॐ नाभ्या आसीत्० शिखायै वषट् ॥ ३ ॥ ॐ सप्तास्यासन्० कवचाय हुम् ॥ ४ ॥ ॐ यज्ञेन यज्ञं० अस्त्राय फट् इति पंचागन्यासः ॥ एवं न्यासं मूर्तौ स्वात्मनि च कृत्वा ध्यायेत् ॥ "नमस्कृत्य महाविष्णुं संस्मरेत्क्षीरसागरम् ॥ क्षीरसागरमध्यस्थं श्वेतद्वीपं विचिंतयेत् ॥ १ ॥ कोटियोजनविस्तीर्णं भानुकोटिसमप्रभम् ॥ तन्मध्ये तु महादिव्यं प्रासादं रत्ननिर्मितम् ॥ २ ॥ प्रासादमध्ये चंन्द्राभं सिंहासनमनुत्तमम् ॥ तस्योपरि महानागं शेषाख्यं मणिमण्डितम् ॥ ॥ ३ ॥ तदासने महाविष्णुं तत्फणाव्याप्तमस्तकम् ॥ वेदमूर्त्तैः स्तूयमानं नानारत्नविभूषितम् ॥ ४ ॥ घननीलतनुं देवमप्सरो गणसेवितम् ॥ तृणादिब्रह्मपर्यंतं विश्वगं विश्वसाक्षिणम् ॥ ५ ॥ चराचरगुरुं देवं घनश्यामं चतुर्भुजम् ॥ ब्रह्माद्यैरर्चितं विष्वक्सेनाभरणभूषितम् ॥ ६ ॥ एवं ध्यायेन्महाविष्णुं गदाब्जासिसुशङ्खकम् ॥ वामभागे स्थितां देवीं नीलकुंचितमूर्द्धजाम् ॥ ७ ॥ हेमारविंदप्रमितां मौक्तिकाभरणोज्ज्वलाम् ॥ दाडिमं सव्यहस्ते तु दक्षिणालिङ्ग्य संततिम् ॥ ८ ॥ श्रीविष्ण्वभिमुखां ध्यायेद्भक्ताभीष्टफलप्रदाम् ॥ " इति ध्यानं कृत्वा स्ववामे कलशं पुरतः शंखं घंटां च संपूज्य शालिग्रामप्रतिमादौ देवं ध्यायन् पूज

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

येत् ॥ ॐ सहस्रशीर्षा० इत्यावाहनम् ॥ १ ॥ पुरुषऽएवेदर्ठ्इत्यासनम् ॥ २ ॥ ॐ एतावानस्य०इति पाद्यम् ॥ ३ ॥ ॐ त्रिपादूर्द्ध्व०इत्यर्घ्यम् ॥ ४ ॥ ॐ ततोव्विराडजायत० इत्याचमनम्॥५॥ॐ तस्माद्यज्ञात्स०इति स्नानम्॥ ६ ॥(स्नानांते पुनराचमनम्) तत्तन्मंत्रैः पंचामृतस्नानं कार्य्यं ततः पुरुषसूक्तेनाऽभिषेकः कार्यः)ॐ तस्माद्यज्ञात्सर्व्वहुत०इति वस्त्रम् ॥ ७॥ (वस्त्रांते आचमनम्) ॐ तस्मादश्वा० इति यज्ञोपवीतम् ॥ ८ ॥ (आचमनम्) ॐ तं यज्ञंब्बार्हि० इति गंधम् ॥ ९ ॥ ॐ यत्पुरुषं० इति पुष्पम् ॥ ॥ १० ॥ ॐ ब्राह्मणोस्य० इति धूपम् ॥ ११ ॥ ॐ चंद्रमामनसो इति दीपम् ॥ १२ ॥ ॐ नाभ्याऽआसीत० इति नैवेद्यम् ॥ ॥ १३ ॥ (आचमनम्) ॐ यत्पुरुषेण० इति नमस्कारम् ॥ १४ ॥ ॐ सप्तास्या० इति प्रदक्षिणाम् ॥ १५ ॥ ॐ यज्ञेन यज्ञमयजन्त० इति पुष्पांजलिम् ॥ १६ ॥ (दद्यात्पुरुषसूक्तेन यः पुष्पाण्यप एव वा ॥ अर्चितं तेन वै सर्वं त्रैलोक्यं सचराचरम् ॥१॥) एवं द्वादशमासेषु शुक्लैकादश्यां तत्तद्विष्णुनाम्ना पूजां कुर्य्यात् ॥ प्रतिमासं विष्णुनामानि (ऋग्विधाने) केशवं मार्गशीर्षे तु पौषे नारायणं विदुः ॥ माधवं माघमासे च गोविंदं फाल्गुने तथा ॥१॥चैत्रे चैव तथा विष्णुं वैशाखे मधुसूदनम् ॥ ज्येष्ठे त्रिविक्रमं विद्यादाषाढे वामनं विदुः ॥२॥श्रावणे श्रीधरं विद्याद्धृषीकेशं ततः परम् ॥आश्विने पद्मनाभं तु दामोदरं च कार्त्तिके ॥३॥ द्वादशैतानि नामानि प्रतिमासं तु पूजयेत्। एवं षोडशोपचारपूजां कृत्वा यथाशक्ति पुरुषसूक्तं जपित्वा देवाय निवेद्य तां रात्रिं देवा

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

लये जागरित्वा द्वादश्यां प्रभाते पुरुषसूक्तेन स्नात्वा कृतनित्यक्रियः पूर्वोक्तन्यासादिपूर्वकं विष्णुं संपूज्य देवदक्षिणभागे कुंडे स्थंडिले वा पंचभूसंस्कारपूर्वकं स्वगृह्योक्तविधिना अग्निं स्थापयेत् ॥ तद्यथा—ॐ सुहस्रशीर्षा० इति कुंडं कृत्वोपलेपनोल्लेखनांतं कर्म कुर्य्यात् । ॐ पुरुषऽएवेदꣳ इति प्रोक्षणम् ॥ २ ॥ ॐ एतावानस्य० इत्यग्निस्थापनम् ॥ ३ ॥ त्रिपादूर्ध्वम्० इतिसमित्प्रक्षेपेण समिध्य ॥ स्वगृह्योक्तविधिनाऽग्नौ चरुस्थापनांतं कर्म कृत्वा ॥ ४ ॥ ॐ ततो विराडिति मंत्रेणाज्यसंस्कारञ्चरुश्रपणं च कुर्य्यात् ॥ ५ ॥ ॐ तस्माद्यज्ञात्सर्व्व० इति वह्नेर्मध्ये पद्मासनकल्पनम् ॥ ६ ॥ (चिंतयेत्तत्र देवेशं कालानलसमप्रभम् ॥ विवृत्तास्यं वाहशीर्षं रक्तास्यं रक्तलोचनम्॥१॥) इति ध्यात्वा । ॐ तस्माद्यज्ञात्सर्व्वहुतऽऋचः० इति गंधम् ॥७॥ ॐ तस्मादश्वा० इति पुष्पम् ॥ ८ ॥ ॐ तꣳयज्ञंबर्हिषि०इति धूपम्० ॥ ९ ॥ ॐ यत्पुरुषं० इति दीपम् ॥ १० ॥ ॐ ब्राह्मणोस्य० इति नैवेद्यं च दद्यात् ॥ ११ ॥ एवमग्निं संपूज्य पुरुषसूक्तेन प्रार्थयेत् ॥ अथ पुरुषसूक्तम् ॥ हरिः ॐ सुहस्रशीर्षा पुरुषꣳसहस्राक्षꣳसहस्रपात् ॥ सभूमिꣳसर्व्वतस्पृत्वात्त्यतिष्ठद्दशाङ्गुलम् ॥ १ ॥ पुरुषएवेदꣳसर्व्वंयद्भूतंयच्चभाव्यम् ॥ उतामृतत्त्वस्येशानोयदन्नेनातिरोहति ॥ २ ॥ एतावानस्यमहिमातोज्ज्यायाꣳश्चपूरुषः ॥ पादोस्यविश्वाभूतानित्रिपादस्यामृतन्दिवि ॥ ३ ॥ त्रिपादूर्द्ध्वऽउदैत्पुरुषःपादोस्येहाभवत्पुनः ॥ ततोव्विष्वङ्व्यक्रामत्साशनानशनेऽअभि ॥ ४ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ततो विराडजायत विराजोऽअधिपूरुषः ॥ सजातोऽअत्यरिच्यत पश्चाद्भूमिमथोपुरः ॥ ५ ॥ तस्माद्यज्ञात्सर्व्वहुतः सम्भृतम्पृषदाज्यम् ॥ पशूँस्ताँश्चक्रेवायव्यानारण्यान्ग्राम्याश्चये ॥ ६ ॥ तस्माद्यज्ञात्सर्व्वहुतऽऋचः सामानि जज्ञिरे ॥ छन्दाँसिजज्ञिरेतस्माद्यजुस्तस्मादजायत ॥ ७ ॥ तस्मादश्वाँऽअजायन्तयेकेचोभयादतः ॥ गावोहजज्ञिरेतस्मात्तस्माज्जाताऽअजावयः ॥ ८ ॥ तंयज्ञम्बर्हिषिप्प्रौक्षन्पुरुषजातमग्रतः ॥ तेनदेवाऽअयजन्तसाद्ध्याऽऋषयश्चये ॥ ९ ॥ यत्पुरुषंव्यदधुःकतिधाव्यकल्पयन् ॥ मुखङ्किमस्यासीत्किम्बाहूकिमूरूपादाऽउच्येते ॥ १० ॥ ब्राह्मणोस्यमुखमासीद्बाहूराजन्यः कृतऽऊरूतदस्ययद्वैश्यः पद्भ्याँशूद्रोऽअजायत ॥ ११ ॥ चन्द्रमामनसोजातश्चक्षोःसूर्य्योऽअजायत ॥ श्रोत्राद्वायुश्चप्राणश्चमुखादग्निरजायत ॥ १२ ॥ नाभ्याऽआसीदन्तरिक्षँशीर्ष्णोद्यौःसमवर्त्तत ॥ पद्भ्याम्भूमिर्द्दिशःश्रोत्रात्तथालोकाँ ॥२॥ऽअकल्पयन्न॥१३॥यत्पुरुषेणहविषादेवायज्ञमतन्वत ॥ वसन्तोस्यासीदाज्यङ्ग्रीष्मऽइध्मःशरद्धविः ॥ १४ ॥ सप्तास्यासन्परिधयस्त्रिःसप्तसमिधःकृताःदेवायज्ञन्तन्वानाऽअबध्नन्पुरुषम्पशुम् ॥ १५ ॥ यज्ञेनयज्ञमयजन्तदेवास्तानिधर्म्माणिप्रथमान्यासन् ॥ तेहनाकम्महिमानःसचन्तयत्रपूर्व्येसाद्ध्याःसन्तिदेवाः ॥ १६ ॥ इति पुरुषसूक्तम् ॥ ॥ ततो घृते नावारावाज्यहोमं कृत्वा शुचिः वाग्यतः पूर्ववत् षोडशभिःऋग्भिः प्रत्यृचं घृताक्ताऽश्वत्थसमिधो हुत्वा तैरेव षोडशभि श्चरुहोमं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

च कुर्य्यात् इदं जगद्बीजाय पुरुषाय इति त्यागः ॥ ततः पुनराज्यहोमं कृत्वा मधुसूदनं ध्यात्वा प्रार्थयेत् ॥ "जितं ते पुंडरीकाक्ष नमस्ते विश्वभावन ॥ नमस्तेस्तु हृषीकेश महापुरुष पूर्वज ॥ १ ॥ नमोहिरण्यगर्भाय प्रधानव्यक्तरूपिणे ॥ ॐ नमो वासुदेवाय शुद्धज्ञानस्वरूपिणे ॥ २ ॥ देवानां दानवानां च सामान्यमधिदैवतम् ॥ सर्वदा चरणद्वंद्वं व्रजामि शरणं तव ॥ ३ ॥ एकस्त्वमसि लोकस्य स्रष्टा संहारकस्तथा ॥ अध्यक्षश्चानुमंता च गुणमायासमावृतः ॥ ४ ॥ संसारसागरं घोरमनंतं क्लेशभाजनम् ॥ त्वामेव शरणं प्राप्य निस्तरंति मनीषिणः ॥५॥ न ते रूपं न चाकारो नायुधानि नचास्पदम्॥तथापि पुरुषाकारो भक्तानां त्वं प्रकाशसे ॥ ६ ॥ नैव किंचित्परोक्षं ते प्रत्यक्षोऽसि न कस्यचित् ॥ नैव किंचिदसाध्यं ते न च साध्योसि कस्यचित् ॥ ७ ॥ कार्य्याणां कारणं पूर्वं वचसां वाच्यमुत्तमम् ॥ योगिनां परमां सिद्धिं परमं ते परं विदुः ॥ ८ ॥ अहं भीतोस्मि देवेश संसारेस्मिन्महाभये ॥ त्राहि मां पुंडरीकाक्ष न जाने शरणं परम् ॥ ९ ॥ कालेष्वपि च सर्वेषु दिक्षु सर्वासु वाच्युत ॥ शरीरेपि गतौ चासि वर्त्तते मे महद्भयम् ॥१०॥ त्वत्पादकमलादन्यन्न मे जन्मांतरेष्वपि ॥ निमित्तं कुशलस्यास्ति येन गच्छामि सद्गतिम् ॥ ११ ॥ विज्ञानं यादिदं प्राप्य यादिदं स्थानमर्जितम् ॥ जन्मांतरेपि मे देव माभूदस्य परिक्षयः ॥ १२ ॥ दुर्गतावपि जातायां त्वं गतिस्त्वं मतिर्मम ॥ यदि नाथश्च विज्ञेयस्तावतास्यां कृती सदा ॥ १३ ॥ आकामकलुषं चित्तं मम ते पादयोः स्थितम् ॥ कामये वैष्णवत्वं च सर्वजन्मसु केवलम् ॥ १४ ॥ इत्येवमनया स्तुत्या स्तुत्वा देवं दिनेदिने ॥ किंकरोमीति चात्मानं देवायैव निवेदयेत् ॥" इत्युपस्थाय प्रदक्षिणानमस्कारौ कृत्वा । आज्येन पंचवारुणहोमं कृत्वा होमशेषं समाप्य आचार्याय धेनुं भूमि हिरण्यं च

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

दत्त्वा ब्राह्मणान् भोजयेत् ॥ ततः । कामप्रदं नारायणं नमस्कृत्य । वैष्णवचरुशेषमितराऽऽहारपरिहारपूर्वकं दंपती पवित्रौ भूत्वा भुंजीयाताम् । रात्रौ च पत्नी पातिं नारायणरूपतया मनसा ध्यात्वा तेन सह उपसंगम्य वामपार्श्वशायिनी भवेत् । पतिश्च याव द्गर्भाधानमन्यां स्वस्त्रियं परिहरेत् । एवं मासिमासि शुक्लद्वादश्यां द्वादशमासपर्य्यंतं कृत्वा संवत्सरांते मासांते वा जपदशांशहोमं कुर्य्यात् ॥ एवं कृते निःसंदेहेन पुत्रो भविता । सहस्रसंख्याचरुहोमेन विष्णोः परं पदं प्राप्नुयात् । (तथा च महार्णवे ऋग्विधानम्) "अथाभिधीयते कर्म पुत्रकामस्य वैष्णवम् ॥ शुक्लपक्षे शुभे वारे सुनक्षत्रे सुगोचरे ॥ १ ॥ द्वादश्यां पुत्रकामस्तु चरुं कुर्वीत वैष्ण वम् ॥ दंपत्योरुपवासः स्यादेकादश्यां सुरालये ॥ २ ॥ ऋग्भिः षोडशभिः सम्यगर्चयित्वा जनार्दनम् ॥ चरुं पुरुषसूक्तेन श्रपये त्पुत्रकाम्यया ॥ ३ ॥ प्राप्नुयाद्वैष्णवं पुत्रमचिरात्संततिक्षमम् ॥ द्वादशद्वादशीष्वेवं पयसा निर्वपेच्चरुम् ॥ ४ ॥ यः करोति सहस्रं तु याति विष्णोः परं पदम् ॥ हुत्वाग्निं विधिवत्सम्यगृग्भिः षोडशभिर्बुधः ॥ ५ ॥ कृतांजलिपुटो भूत्वा स्तवं ताभिः प्रयोजयेत् ॥ समिधोश्वत्थवृक्षस्य हुत्वाज्यं जुहुयात्पुनः ॥ ६ ॥ उपस्थानं हुताशस्य ध्यात्वा तु मधुसूदनम् ॥ हविर्होमं ततः कुर्य्यात्प्रत्यृचं वाग्यतः शुचिः ॥ ७ ॥ सूक्तेन जुहुयादाज्यमादावंते च पूर्ववत् ॥ हविःशेषं नमस्कृत्य नारी नारायणं पतिम् ॥ ८ ॥ भक्षयित्वा हविःशेषं लघ्वाशी संविशेत्क्षणम् ॥ ततः कृत्वा त्विदं कर्म्म कर्त्तव्यं द्विजतर्पणम् ॥ ९ ॥ द्वितीयां स्त्रीं निवर्तेत यावद्गर्भं न विंदति ॥ अपुत्रा मृतपुत्रा वा या च कन्या प्रसूयते ॥१०॥ क्षिप्रं सा जनयेत्पुत्रमृष्यशृंगो यथाब्रवीत् ॥" अथ होमात्मकप्रयोगः । पूर्वोक्तचंद्रतारादिबलान्विते सुमुहूर्त्ते कृष्णैकादश्यामुपक्रम्य ब्राह्मणद्वारा अयुतपुरुषसूक्तजपं विष्णोः सहस्रनामसहस्रजपं च समाप्य

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

शुक्लैकादश्यां दंपती उपोष्य द्वादश्यां प्रातर्नद्यादौ स्नात्वा कृतनित्यक्रियो मंडपमागत्य देशकालौ संकीर्त्य । ममानपत्यत्वदोषनिवृत्तिद्वारा तथास्या भार्य्यायाश्च चतुर्विधवंध्यत्वनिदानदोषदुरितक्षयद्वारा दीर्घायुष्मत्सत्पुत्रप्राप्त्यर्थं श्रीपरमेश्वरप्रीत्यर्थं च ब्राह्मणद्वारा कारितजपदशांशसंख्यया पुरुषसूक्तकरणकहोमात्मकं वैष्णवयागं सहस्रमखं विष्णुसहस्रनामशतसंख्यहोमसहितं सनवग्रहमखं करिष्ये । इति संकल्प्य । पूर्ववत् गणपतिपूजनादि नांदीश्राद्धांतं कृत्वा आचार्यादिवरणं दिग्रक्षणं च कुर्य्यात् ॥ ततः कुंडे स्थंडिले वा पुत्रप्रदनामानं वैश्वानरं यथाविधि संस्थाप्य । तदीशान्यां नवग्रहवेद्यां तत्तन्मंत्रैः पूर्वोक्तपद्धतिकांडवद्ग्रहमंडलदेवताः संपूज्य तदीशान्यां कलशं संस्थापयेत् ॥ ततो मध्यपीठे सर्वतोभद्रमंडले ब्रह्मादिदेवानावाह्य पूजयित्वा । तन्मध्ये ताम्रकलशम् । " ॐ महीद्यौरित्यादि पूर्ववत्पूर्णपात्रनिधानांतं संस्थाप्य । तत्वायामीति वरुणं संपूज्य । 'कलशस्य मुखे' इत्याद्यभिमंत्र्य । 'देव दानव' इति प्रार्थयेत् । ततः कलशोपरि पट्टवस्त्रं प्रसार्य तत्र विष्णोर्गंधाष्टकेन अष्टदलं विलिख्य तन्मध्ये निष्केण तदर्द्धेन वा सुवर्णेन निर्मितं सगरुडासनं सलक्ष्मीकं विष्णुमभ्युत्तारणपूर्वकं संस्थाप्य तस्य वामभागे सौवर्णं रुद्रं दक्षिणभागे ब्रह्माणं च स्थापयेत् ॥ ततः पूर्वोक्तप्राणप्रतिष्ठां कृत्वा तेषां पुरत ईशानादितंडुलपुंजेषु वक्ष्यमाणदेवताः स्थापयेत् ॥ तद्यथा—ॐ ध्रुवाय नमः ॥ १ ॥ ॐ स्कंदाय नमः ॥ १ ॥ ॐ बलये नमः ॥ २ ॥ ॐ व्यासाय नमः ॥ ३ ॥ ॐ स्वयंभुवे नमः ॥ ४ ॥ ॐ औशनसे नमः ॥५॥ ॐ क्रतवे नमः ॥६॥ ॐ दक्षाय० ॥७॥ ॐ प्रजापतये० ॥८॥ ॐ भीष्माय० ॥९॥ ॐ कपिलाय० ॥१०॥ ॐ च्यवनाय नमः ॥११॥ ॐ अर्जुनाय नमः ॥ १२ ॥ ॐ पुलस्त्याय नमः ॥१३॥ ॐ पुलहाय नमः ॥ १४ ॥ ॐ अगस्त्याय नमः ॥ १५ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ॐ वसिष्ठाय नमः ॥१६॥ ॐ आथर्वणाय० ॥१७॥ ॐ रुक्मांगदाय नमः ॥१८॥ ॐ भरताय०॥१९॥ ॐ धौम्याय०॥२०॥ॐ सुनं
दाय नमः ॥ २१ ॥ ॐ नंदवर्द्धनाय नमः ॥ २२ ॥ ॐ प्रह्लादाय नमः ॥ २३ ॥ ॐ नारदाय नमः ॥ २४ ॥ ॐ वैन्याय नमः
॥ २५ ॥ ॐ नंदनाय नमः ॥ २६ ॥ ॐ वायुनंदनाय नमः ॥ २७ ॥ ॐ विष्वक्सेनाय नमः ॥ २८ ॥ ॐ जयाय नमः ॥२९॥
ॐ भद्राय नमः ॥ ३० ॥ ॐ सुग्रीवाय नमः ॥ ३१ ॥ ॐ हनुमते नमः ॥ ३२ ॥ ॐ विभीषणाय नमः ॥ ३३ ॥ इति स्थाप
येत् ॥ ततः पूर्वादिदिक्षु इंद्रादिदशदिक्पालान् । (पुनरुत्तरस्याम्) ॐ दुर्गायै नमः । ॐ क्षेत्रपालाय नमः । ॐ गणपतये
नमः ॥ इति संस्थाप्य ॥ विष्णोः पुरतः ॥ ॐ गरुडाय नमः ॥ इति गरुडं स्थापयेत् ॥ ततः पूर्ववत् पुरुषसूक्तन्यासं ध्यानं च
कृत्वा पुरुषसूक्तेन षोडशोपचारैः श्रीविष्णुं संपूज्य पायसान्नं निवेद्य । ॐ त्र्यंबकमिति मंत्रेण रुद्रं २ ॐ ब्रह्मयज्ञानमिति ब्रह्माणं
चावाह्य पूजयेत् ॥ ततः स्कंदादिपरिवारदेवतापूजां कृत्वा प्रार्थयेत् । " कृष्णाय गोकुलेशाय वंशरक्षाकराय च ॥ यशोदानंद
भद्राय नमोस्तु गुणसिंधवे ॥ १ ॥ सुतान् देहि सुतान् देहि त्वं पूजाऽक्षयपुण्यतः ॥ वासुदेव जगन्नाथ कृपालो भक्तवत्सल॥२॥"
इति प्रार्थ्य । पुरुषसूक्तेन प्रणमेत् ॥ ततः स्थापितवह्नौ स्वगृह्योक्तविधिना विष्णुमुद्दिश्य पूर्ववत् पृथक् पयसि वैष्णवं चरुं श्रप
यित्वा आज्यभागांते अर्कादिसमिच्चरुतिलाज्यद्रव्यैर्ग्रहहोमं कृत्वा सर्वतोभद्रमंडलदेवताभ्यश्च हुत्वा प्रधानदेवहोमं कुर्य्यात् ॥
तद्यथा ॥ वैष्णवचरुणाश्वत्थवृक्षसमिद्भिस्तिलाज्येन च पूर्वोक्तपुरुषसूक्तेन सहस्रहोमं कुर्य्यात् होमांते । इदं विश्वरूपाय नारायणाय
न मम इति त्यागः ॥ (होमस्तु सकलसूक्तेन एकाहुतिरेवं सहस्रहोम इति महार्णवः) ततः ॐ त्र्यंबकंयजामहे० इति मंत्रेण रुद्राय ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ॐ ब्रह्मयज्ञानामिति ब्रह्मणे चाष्टोत्तरशतहोमः कार्य्यः। ततो ध्रुवादीनामपि प्रणवादिस्वाहांतैर्नाममंत्रैः यथाशक्ति होमं कृत्वा विष्णु सहस्रनामभिः शतावृत्त्या पायसं जुहुयात्। ॐ विश्वाय स्वाहा ॥१॥ इत्यादिनामभिर्होमः। ततः स्विष्टकृदादिहोमांतं समाप्य बलिदानंकृत्वा पुरुषसूक्तेन एव पूर्णाहुतिं दत्वा तेनैव वैश्वानरं प्रार्थ्य शेषं समापयेत्॥तत आचार्याय सवत्सां पयस्विनीं गां दत्वा कर्मपूर्णतां वाचयित्वा शतब्राह्मणान् चतुर्विंशतिमिथुनानि च पायसान्नेन भोजयेत्।ततो वैष्णवं चरुशेषं दंपती पवित्रौ भूत्वा भुंजीयाताम् यः सिद्धमंत्रः सततं द्विजेंद्रः संपूज्य विष्णुं विधिवत्सुतार्थी॥ इदं विधानं विदधाति सम्यक् स पुत्रमाप्नोति हरिप्रसादात् ॥१॥(ऋग्विधाने विशेषः) पुरुषस्य हरेः सूक्तं स्वर्ग्यं धन्यं यशस्करम्॥ आत्मज्ञानमिदं पुण्यं योगज्ञानमिदं परम् ॥ फलाहारो जपेन्नित्यं पश्यत्यात्मानमात्मनि ॥ फलानि भुक्त्वोपवसेन्मासमद्भिश्च वर्तयेत् ॥ अरण्ये निवसेन्नित्यं जपन्निमृषिं सदा ॥ ऋग्भिस्त्रिषवणं काले स्नायादप्सुसमाहितः ॥ आदित्यमुपतिष्ठेत सूक्तेनानेन नित्यशः ॥ आज्याहुतिरनेनैव हुत्वैवं चिंतयेद्दृषिम् ॥ ऊर्ध्वं मासात्फलाहार स्त्रिभिर्वर्षैर्जपोदिदम् ॥ तद्भक्तस्तन्मना युक्तो दश वर्षाण्यनन्यभाक् ॥ साक्षात्पश्यति तं देवं नारायणमनामयम् ॥ ज्ञानगम्यं परं सूक्ष्मं व्याप्यं सर्वमवस्थितम् ॥ ग्राह्यमत्यंतयत्नेन स्रष्टारं जगतोव्ययम् ॥ अनासादयमाप्नोति भक्तं न परिहापयेत् ॥ भक्तानुकंपी भगवाञ् जायते पुरुषोत्तमः ॥ येनयेन च कामेन जपेत प्रयतः सदा ॥ प्राप्तकामः समृद्धः स्याच्छ्रद्दधानस्य कुर्वतः ॥ होमं वाप्यथवा जाप्यमुपहारमथो चरुम् ॥ कुर्वीत येन कामेन तत्सिद्धिमुपधारयेत् ॥ ज्ञातिश्रेष्ठत्वं महद्वित्तं यशो लोके परां गतिम् ॥ पापेन विप्रमोक्षश्च भवेत्सर्वं न संशयः ॥ इति पुरुषसूक्तविधानं समाप्तम् ॥

॥ अथ गार्भिण्या गर्भस्रावहरणाविधानं (महार्णवे

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सूर्य्यारुणसंवादे च) श्रीअरुण उवाच ॥ स्रवद्गर्भा भवेत्सा तु बालकं हंति या विषैः ॥ प्रायश्चित्तं कथं स्वामिन् सत्यं वद ममाग्रतः ॥ १ ॥ श्रीसूर्य उवाच ॥ एकवासोविधिं चैव कुर्याच्च विधिवत्ततः ॥ चन्द्रसूर्योपरागे तु स्वर्णधेनुं प्रदापयेत् ॥ २ ॥ ब्राह्मणान्भोजयेत्पश्चात्प्राजापत्यचतुष्टयम् ॥ सारस्वतजपं लक्षं दशांशहोमसंयुतम् ॥ ३ ॥ श्रवणं हरिवंशस्य एकचित्तेन मानद ॥ शतपत्रैः शिवं पूज्य षण्मासाद्विवासरे ॥ ४ ॥ कुंभंस्ताम्रमयश्चैव घृतेन परिपूरितः ॥ दातव्यो ब्राह्मणायैव सर्वकार्यार्थसिद्धये ॥ ५ ॥ एवं कृते वैनतेय गर्भो निश्चलतां व्रजेत् ॥ इति गर्भस्रावहरणविधानम् ॥ एवं गर्भस्थैर्यैपि कन्यानामेवोत्पत्तौ पुत्रार्थं पुत्रकामेष्टिं कुर्यात् ॥ तत्प्रयोगस्तु कौस्तुभादौ ज्ञेयः ॥ इति संतानोपायविधानानि समाप्तानि ॥ अथ सूर्यारुणसंवादोक्तमेकवस्त्रस्नानम् ॥ अरुण उवाच ॥ यत्त्वया कथितं स्वामिन्नेकवस्त्राभिषेचनम् ॥ दंपत्योरनपत्यादिदौर्भाग्यशमनं परम् ॥ १ ॥ विधिं तस्याखिलं ब्रूहि यथा श्रुतिनिरूपितम् ॥ कीदृग्वस्त्रं कथं धार्यमुभाभ्यामेव तत्पुनः ॥ २ ॥ श्रीसूर्य उवाच ॥ शुभे मासे सिते पक्षे सानुकूले ग्रहे दिने ॥ नदनद्योः समायोगे महानद्योर्द्वयोरपि ॥ ३ ॥ प्रत्यूषे सिद्धिमास्थाय शरीरस्य यथाविधि ॥ विधिं विविधमाधाय पत्न्या सह ममार्हणम् ॥ ४ ॥ विधाय श्रद्धया युक्तो मंत्रमेतमुदीरयेत् ॥ कर्मसाक्षिञ्ज जगन्नाथ यन्मया पूर्वजन्मना ॥ ५ ॥ पंचधापत्यदुःखाख्यं दौर्भाग्यमतुलं भवेत् ॥ प्राप्तं तस्य विनाशाय विधिं वद ममोत्तमम् ॥ ६ ॥ सह पत्न्या दिवानाथ तत्र सिद्धिं प्रयच्छ मे ॥ एवमुच्चार्य तद्वस्त्रमहतं द्विदशात्मकम् ॥ ७ ॥ सार्द्धद्वयकरायामं पंचविंशकरोन्मितम् ॥ विततं तंतुभिः श्लक्ष्णैस्तन्मध्ये तद्धृतं वनैः ॥ ८ ॥ युवा सुवासा मंत्रेण मंत्रितं दैववेदिना ॥ सम्यग्दत्तं तदादाय परिदध्यात्सवस्त्रकम् ॥ ९ ॥ दृढनीवीरभिन्नानि देशे त्रिद्विगुणीकृतम् ॥ तच्छेषदक्षि

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

णांगस्था सपत्नीकं सुपुत्रिका ॥ १० ॥ परिदध्यात्प्रयत्नेन संवृत्तममस्तका ॥ केशान्संमृज्य संगोप्य पतिपृष्ठानुगामिनी ॥ ११ ॥ उपविश्य जलस्थाने तावुभावपि दंपती ॥ प्रक्षाल्य पाणिपादौ च स्वाचांतौ मम सम्मुखौ ॥ १२ ॥ वैदिकाँल्लौकिकांश्चापि सावधानौ जितेंद्रियौ ॥ आपस्त्वमसि सर्वेषां देवानामग्रणीः प्रभो ॥ १३ ॥ जीवनं सर्वजंतूनां गर्भं धेहि मम प्रभो ॥ यानि यानीह पापानि अनपत्यकराणि नौ ॥१४॥ हत्वा तान्यखिलानीश गर्भं धेहि मम प्रभो ॥ यदावाभ्यां महत्पापं पुरा जन्मनि दुःखकृत् ॥ १५ ॥ कृतं तन्मे विनिर्धूय गर्भं धेहि मम प्रभो ॥ त्वयैवाधिष्ठिताः सर्वे नदीनदजलाशयाः ॥ १६ ॥ पुनंति पापिनः सर्वान्गर्भं धेहि मम प्रभो ॥ त्वंमावाभ्यां प्रयत्नाभ्यां शरणं दुःखशांतये ॥ १७ ॥ प्रार्थितः परमेशान गर्भं धेहि मम प्रभो ॥ आशास्महे महाभाग संततिं लोकपावनीम् ॥ १८ ॥ प्रसन्नाद्भवतः स्वामिन्गर्भं धेहि मम प्रभो ॥ भूतप्रेतपिशाचाद्या ये नौ संततिकारकाः ॥ १९ ॥ पाशेनाहत्य तान्सर्वान्गर्भं धेहि मम प्रभो ॥ एवं संप्रार्थ्य ता आपो दंपती तौ जलाद्बहिः ॥२०॥ सुनाय्य प्राङ्मुखस्तिष्ठेन्मंत्रं सुश्रावयेदिति ॥ इमां गिरस आदित्येभ्यो द्वयमिमं शुभम् ॥२१॥ श्रावयन् भुवि विन्यस्य पात्रं तत्प्रणमेच्च माम् ॥ ततोऽन्ये वाससी शुभ्रे शुचिनी परिधाय तौ ॥ २२ ॥ उपविश्यासने शुभ्रे पुष्पस्रक्चंदनान्वितौ ॥ ततः सकनकं सार्पिः स्पृशेत सुरभीं द्विजान् ॥ २३ ॥ प्रणिपत्य ततः शेषं कर्म सर्वं समापयेत् ॥ आचार्यः स्वविधानेन दैवज्ञेनानुमोदितः ॥ २४ ॥ हस्तमात्रे ततस्तत्र स्थंडिलेष्टांगुलोच्छ्रये ॥ स्थापयेद्विधिवद्वह्निं निजशाखाविधानतः ॥ २५ ॥ पायसं निर्वपेत्तत्र वैधेयविधिवत्ततः ॥ तस्मादीशानभागे तु स्थंडिले कलशं न्यसेत् ॥ २६ ॥ अव्रणं पयसा पूर्णं स्वर्णपुष्पौषधैर्युतम् ॥ पूर्णपात्रं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

न्यसेत्तत्रपूर्णं पूष्पफलाक्षतैः ॥ २७ ॥ स्वस्वमंत्रैः प्रतिष्ठाप्य महेशमुमया सह ॥ तस्याग्रे प्रजपेयुस्ते ब्राह्मणा मंत्रकोविदाः॥२८॥
पंचांगान्विधिवन्मंत्रान् रुद्रसूक्तैश्च याजुषैः ॥ उद्धास्याथ चरून्सम्यगाचार्यः स्वविधानतः ॥२९॥ आघारावाज्यभागौ च हुत्वा बा
ह्यविभावसुम् ॥ दिक्पतीन् परितः पूज्य स्वस्वमंत्रैः समाहितः ॥ ३० ॥ प्रजापते तथाग्नेय्यां गर्भं धेहीति चापराम् ॥ अपां
पृष्टां तथा होता इमंमे सप्तत्रारुणम् ॥ ३१ ॥ ततः स्विष्टकृतं हुत्वा कर्मशेषं समापयेत् ॥ होमांते शिवमभ्यर्च्य सशिवं विधि
पूर्वकम् ॥ ३२ ॥ जप होमं निवेद्यास्मै विधिवद्विजकोविदः ॥ ततो विप्राय विदुषे सुशांताय पयस्विनीम् ॥ ३३ ॥ वस्त्रस्रग्दक्षि
णोपेतां सवत्सां धेनुमुत्तमाम् ॥ तथालंकृतसर्वांगं वृषभं शुभलक्षणम् ॥ ३४ ॥ दत्त्वा तौ दंपती पश्चाद्दैवज्ञेनानुमोदितौ ॥ मंत्रमु
च्चारयेयातां विधिवद्विहितार्हणैः ॥ ३५ ॥ देवदेव जगन्नाथ सर्वपापौघनाशन ॥ कर्मणानेन दानेन तथा गोयुगलस्य तु ॥ ३६ ॥
संतुष्टः सततं भूत्वा संततिं देहि मे प्रभो ॥ ततस्तु वैणवं पात्रं शिवस्याग्रे निवेदयेत् ॥ ३७ ॥ आचार्याय प्रदेयानि दानानि
निजशक्तितः ॥ गुरवे वाससी दत्त्वा कर्मशेषं समापयेत् ॥ ३८ ॥ प्रणम्य देवतास्ताश्च विसृज्य च विधानतः ॥ ततः कुंभाम्भसा
विप्रा अभिषिंचेयुरादृताः ॥ ३९ ॥ मंत्रैश्च वारुणैः सौरैः शांतिस्वस्त्ययनादिभिः ॥ पौराणैरागमोक्तैस्तु नानाफलविधायिभिः
॥ ४० ॥ नांदीमुखेन विधिना ततः श्राद्धं समारभेत् ॥ नमो व इति मंत्रेण नमस्कारमुदीरयेत् ॥ ४१ ॥ सप्त ते तांत्रिका मंत्रा
श्छांदसाः पंच वारुणाः ॥ त्वन्नः प्रभृतयो द्वौ च वारुणौ चापरावपि ॥ ४२ ॥ एवं तज्जलमामंत्र्य स्तुत्वा मंत्रैः प्रणम्य च ॥ निम
ज्योन्मज्य च पुनस्तत्र स्नानं समाचरेत् ॥ ४३ ॥ प्रयोगं विधिवत्कृत्वा पुत्रकामसमृद्धये ॥ स्नास्यामहे स भगवान् प्रचेता नौ

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

प्रसीदतु ॥ ४४ ॥ स्नायीयातां ततः स्नानं द्रव्यैर्मंत्राभिमंत्रितैः ॥ मृत्स्नागोमयगोमूत्रैर्द्रव्यैर्दधिपयोघृतैः ॥४५॥ तिलामलकपिष्टैश्च सर्वौषधिकुशोदकैः ॥ निवृत्त्य विधिवत्स्नानं दंपती तावुभावपि ॥ ४६ ॥ स्नापितैव ततः पत्नी एकैकद्रव्यसंचयैः ॥ औदुंबरं बहुफलं बिभ्रती निजमूर्द्धनि ॥ ४७ ॥ मंत्रपूर्वं स्वपतिना दत्तां शाखां स्रजान्विताम् ॥ सप्तौषधिसुसंपूर्णैः कलशैश्चैव सप्तभिः ॥ ४८ ॥ मंत्रपूतैः स दैवज्ञः स्नापयेत्तां विधानतः ॥ वर्धाकरश्च रास्ना च सहदेवी शतावरी ॥ ४९ ॥ पंचैला लक्ष्मणा चेति सप्तौषध्योभिषेचने ॥ या ओषध्यनुवाकेन सप्तौषध्यभिषेचने ॥ ५० ॥ ततस्तु वैणवं पात्रं सप्तधान्योपसंभृतम् ॥ मुद्गतंडुलगोधूमयवशालिसमन्वितैः ॥ ५१ ॥ सकंगुसहमाषैश्च धान्यैरिति च सप्तभिः ॥ फलानि विन्यसेत्तत्र याः फलिनीरिति मंत्रतः ॥५२॥ नालिकेरं च नारिंगं दाडिमं बीजपूरकम्॥उत्तथीमथ पूगं च जंबीरं चात्र सप्तमम् ॥ ५३ ॥ वैदिकैर्लौकिकैर्मंत्रैः पूर्वोक्तैरेव सप्तभिः॥ शिरोमेत्यनुवाकेन स्नानं दौर्भाग्यनाशनम् ॥ ५४ ॥ समाप्य विधिवत्पश्चान्मंत्रमेतमुदीरयेत् ॥ शिशुमृत्युकरं यन्मे दौर्भाग्यं प्रागुपस्थितम् ॥ ५५ ॥ पादांगुष्ठादानखाग्रादाकेशांतं समुत्सृजन् ॥ स्नानेनानेन मे देव तान्सर्वानपसारय ॥ ५६ ॥ इति विज्ञाप्य वरुणं मां च कर्मादिसाक्षिणम् ॥ एकचित्तः स्मरेद्देवमुमया सहितं शिवम् ॥ ५७ ॥ नांदीमुखेन विधिना संतर्प्य पितृदेवताः ॥ विभ्राडित्यनुवाकेन फलपुष्पाक्षतांजलिः ॥ ५८ ॥ उपस्थाय ततः पश्चात्कर्मशेषं समापयेत् ॥ ततस्तद्वैणवं पात्रं शिरस्याधाय योषितः ॥ ५९ ॥ कुशाग्रेण समालभ्य पठेन्मंत्रान्सुशांतिकान् ॥ स्वस्त्ययनाय च तथा शांतये च मुहुर्मुहुः ॥६०॥ मध्यमं पिंडमश्नाति पत्नी दैवज्ञनोदिता ॥ आधत्त पितरो गर्भमिति मंत्रेण मंत्रितम्॥६१॥आचम्य विधिवत्पश्चात्कर्मशेषं समाप

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

येत्॥शतं च भोजयेदन्यान् द्विजान्संतोष्य शक्तितः ॥६२॥ कृतकृत्यौ च तौ स्यातां पुत्रपौत्रसुखान्वितौ ॥ इति सूर्यारुणसंवादोक्त मेकवस्त्रस्नानविधानम् ॥ ॥अथ रुद्रस्नानाविधानम् (हेमाद्रौ भविष्योत्तरे)–"युधिष्ठिर उवाच॥रुद्रस्नानं विधानेन कथयस्व जनार्दन॥ सर्व्वदोषोपशमनं सर्व्वशान्तिप्रदं नृणाम् ॥ १ ॥ श्रीकृष्ण उवाच ॥ देवसेनापतिं स्कंदं रुद्रपुत्रं षडाननम् ॥ अगस्त्यो मुनिशार्दूलः सुखासीनमुवाच ह ॥ २ ॥ सर्वज्ञोऽसि कुमार त्वं प्रसादाच्छंकरस्य वै ॥ स्नानं रुद्रविधानेन ब्रूहि कस्य कथं भवेत् ॥ ३ ॥ स्कंद उवाच ॥ मृतवत्सा तु या नारी दुर्भगा ऋतुवर्जिता ॥ या सूते कन्यकां वंध्या स्नानमासां विधीयते ॥ ४ ॥ अष्टम्यां वा चतुर्दश्या मुपवासपरायणा ॥ ऋतौ शुद्धे चतुर्थेऽह्नि प्राप्ते सूर्यदिनेऽथवा ॥ ५ ॥ नद्योस्तु संगमे कुर्यान्महानद्योर्विशेषतः ॥ शिवालये तथा गोष्ठे विविक्ते वा गृहांगणे ॥ ६ ॥ अहिताग्निं द्विजं शांतं धर्मज्ञं सत्यशीलिनम् ॥ स्नानार्थं प्रार्थयेद्देवं निपुणं रुद्रकर्मणि ॥ ७ ॥ ततस्तु मंडपं कुर्याच्चतुरस्रमुदक्प्लवम् ॥ बद्धचंदनमाल्यं च गोमयेनानुलेपितम् ॥ ८ ॥ तन्मध्ये श्वेतरजसा संपूर्णं पद्ममालिखेत् ॥ मध्ये तस्य महादेवं स्थापयेत्कर्णिकोपरि ॥ ९ ॥ दद्याद्दलेषु नंद्यादींश्चतुर्षु विधिपूर्वकम् ॥ इंद्रादिलोकपालांश्च दलेष्वन्येषु विन्य सेत् ॥ १० ॥ देवीं विनायकं चैव स्थापयेत्तत्र पार्थिव ॥ दत्त्वार्घ्यं गंधपुष्पं च धूपं दीपं गुडौदनम् ॥ ११ ॥ भक्ष्यान्नानाविधा न्दद्यात्फलानि विविधानि च ॥ चतुष्कोणेषु भृंगारमश्वत्थदलभूषितम् ॥ १२ ॥ एकैकं विन्यसेद्भस्मन्सर्वौषधिसमन्वितम् ॥ चतु र्दिक्षु मंडपस्य दद्याद्भूतबलिं ततः ॥ १३ ॥ आग्नेय्यां दिशि कर्त्तव्यं मंडलस्य समीपतः ॥ अग्निकार्यं शुभे कुंडे पत्रपुष्पैरलंकृते ॥ १४ ॥ लवणं सर्पिषा युक्तं घृतेन मधुना सह ॥ मानस्तोकेन जुहुयात्कृतहोमे नवग्रहे ॥ १५ ॥ द्वितीयस्याग्निकार्यस्य कर्त्ता चः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ब्राह्मणो भवेत् ॥ रुद्रजाप्यकृदाचार्यं सितचंदनचर्चितम् ॥ १६॥ सितवस्त्रपरीधानं सितमाल्यविभूषितम् ॥ शोभयेत्कंकणैः कंठ्यैः कर्णवेष्टांगुलीयकैः ॥ १७ ॥ मंडपस्य समीपस्थो जपेद्रुद्रान्विमत्सरः ॥ यावदेकादशगताः पुनरेव जपेच्च तान् ॥ १८ ॥ देवमंडलवत्कार्य्यं द्वितीयं मंडलं शुभम् ॥ तस्य मध्ये तु सा नारी श्वेतपुष्पैरलंकृता ॥ १९ ॥ श्वेतवस्त्रपरीधाना श्वेतगंधानुलेपना ॥ सुखासनोपविष्टांतामाचार्य्यो रुद्रजापकः ॥ २० ॥ अभिषिञ्चेत्ततश्चैनामर्कपत्रपुटाम्बुना ॥ चतुःषष्टिऋचैनैव रुद्रैणैकादशेन तु ॥ शतानि सप्तवर्णानां चतुर्भिरधिकानि तु॥२१॥(चतुःषष्टिसंख्यानामेकादशकृत्वः) पवित्रामिंद्रकीटाजगृहगोदावरीमृदम्॥सर्वौषधी रोचनांच नदीतीर्थोदकानि च॥२२॥अश्वस्थानाद्गजस्थानाद्वल्मीकात्संगमाद्भदात्॥वेश्यास्थानाद्राजमूयात् गोष्ठादानीयवैमृदम्॥२३॥ एतत्प्रक्षिप्य कलशे शिवसंज्ञे सुपूजिते ॥ आपादतलकेशांतं कुक्षिदेशे विशेषतः ॥ २४ ॥ सर्वांगं लेपयेद्भक्त्या सुशीला काचिदंगना रुद्राभिजप्तेन ततः स्नापयेत्कलशेनताम्॥२५॥तोयपूर्णाष्टकलशैरश्वत्थदलपूरितैः॥ सर्वतो दिक्स्थितैः पश्चात्स्थापयेत्कलशाक्षतैः॥ ॥२६॥एवं स्नाता स्नापकाय दद्याद्गां कांचनं तथा॥ होतुरेवात्र निर्दिष्टा दक्षिणा गौः पयस्विनी॥२७॥ब्राह्मणानामथान्येषां स्वशक्त्या मुनिपुंगव ॥ गोवस्त्रकांचनादीनि दत्त्वा सर्वान्क्षमापयेत्॥२८॥कृतेनानेन विप्रेंद्र रुद्रस्नानेन भामिनी ॥ सुभगा कांतिसंयुक्ता बहुपुत्रा प्रजायते ॥ २९ ॥ सर्वेष्वपि हि मासेषु ब्राह्मणानुमतौ शुभम् ॥ तस्मादवश्यं कर्तव्यं पुत्रात्स्त्री सुखमिच्छति ॥ ३० ॥ या स्नानमाचरति रुद्रमिति प्रसिद्धं श्रद्धान्विता द्विजवरानुमता नतांगी ॥ दोषान्निहत्य सकलांश्च शरीरभाजो भर्तुः प्रिया भवति भारत जीववत्सा ॥ ३१ ॥ इति भविष्योत्तरोक्तं रुद्रस्नानम् ॥ अथ रुद्रस्नानप्रयोगः विधानपारिजाते–यस्यां कस्याञ्चिदृष्टम्यां चतुर्द

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

श्यां वा संभारान् संभृत्य चतुर्थेऽह्नि ऋतुस्नातायां सूर्यवारे वा नदीसंगमं गत्वा तदभावे शिवालयादिकमुपेत्य पुण्याहं वाचयित्वा आहिताग्न्यादिगुणविशिष्टं द्विजमाचार्यत्वेन वृत्वा ब्रह्माणं च वृणुयात्। अथाचार्य्योऽष्टहस्तं चतुरस्रं मंडपं कृत्वा तन्मध्ये श्वेतरजसा अष्टदलपद्ममालिख्य ब्रह्मादीन्मण्डलदेवांस्तत्रावाह्य पूजयित्वा कर्णिकायां रुद्रकलशं मंत्रवत् स्थापयित्वा दध्यक्षतादिभिः शोभयित्वा तत्र महादेवमावाह्य पूर्वादिचतुर्षु दलेषु नंदिनं भृंगारिटिं कालं महाकालं च क्रमेणावाह्य तेष्वेव अष्टदलेषु इंद्रादीनष्टदिक्पालांश्चावाह्य महादेवस्य वामभागे पार्वतीदक्षिणभागे विनायकं चावाह्य षोडशोपचारैः पूजयित्वा पद्मचतुष्कोणेषु कुंभचतुष्टयं यथाविधि स्थापयित्वा उदकमासिच्य अश्वत्थपल्लवादीनि निक्षिप्य वरुणमावाह्य कलशं प्रार्थ्य ततो मण्डपस्य अष्टदिक्षु कुंभाष्टकं स्थापयित्वा इंद्रादीन् संपूज्य तेभ्यो बलीन् दत्वा कुंभान् संस्पृशन्नेकादशावृत्त्या रुद्रान् जपेत् ॥ तस्मिन्काले ब्रह्मा पद्मादाग्नेय्यां दिशि कुंडे स्थंडिले वा अग्निमुपसमाधाय दधिमधुघृतापेतं लवणमाहुतिपरिमितं ॐ मानस्तोके इति मंत्रेण अष्टोत्तरशतवारं नवग्रहहोमपूर्वकं जुहुयात्॥ तत आचार्यो देवमण्डलवत् मण्डलान्तरं कृत्वा तत्र यजमानदंपती श्वेतवस्त्रावृतौ उपवेश्य पूर्वादिकलशोदकेन रुद्राध्यायस्य एकैकमंत्रमुक्त्वा अर्कपत्रपुटगृहीतेनाभिषिंचेत् ॥ चतुःषष्टिमंत्रविभागेन ॥ एवमेकादशावृत्तौ चतुरधिकसप्तशतानि भवंति ॥ अथ रुद्रकलशोदकेनसप्तमृत्तिकासर्वौषधिगोरोचनादियुतेन आपादतलकेशांतं विशेषतः कुक्षिदेशे अभिषिंचेत् ॥ ततो मंडपस्य अष्टदिक्स्थापितकलशोदकैरभिषिंचेत्॥ एवं स्नात्वा स्नानवस्त्रं पार्त्यज्य वस्त्रांतरं परिधाय आचार्याय सुवर्णादि दक्षिणात्वेन दत्वा होमकर्त्रै पयस्विनी गौर्देया। अन्येषाञ्चभूयसी दक्षिणा देय ततो यथाशक्ति ब्राह्मणान् भोजयेत्॥ इति अनुष्ठानप्रकाशे रुद्रस्नान प्रयोगः समाप्तः॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अथ हरिप्रसंगात्तद्दाहनगरुडमंत्रपुरश्चरणम् ॥ (मंत्रमहोदधौ) मंत्रो यथा "क्षिपः ॐ स्वाहा" इति पंचाक्षरो मंत्रः ॥ अस्य गरुडमंत्रस्य अनंत ऋषिः । पंक्तिश्छंदः । पक्षींद्रो देवता । ॐ बीजम् ॥ स्वाहा शक्तिः । ममाभीष्टसिद्ध्यर्थे जपे विनियोगः ॥ ॐ अनंतऋषये नमः शिरसि ॥ १ ॥ ॐ पंक्तिश्छंदसे नमः मुखे ॥ २ ॥ ॐ पक्षींद्रदेवतायै नमः हृदये ॥ ३ ॥ ॐ बीजाय नमः गुह्ये ॥ ४ ॥ ॐ स्वाहाशक्तये नमः पादयोः ॥ ५ ॥ इति ऋष्यादिन्यासः ॥ ॐ ज्वलज्वलमहामतिस्वाहा इति हृदयाय नमः ॥ १ ॥ गरुडचूडाननस्वाहा इति शिरसे स्वाहा ॥ २ ॥ गरुडशिखेस्वाहा इति शिखायै वषट् ॥ ३ ॥ गरुडग्रभंजनजय जयग्रभेदय २ वित्रासय २ विमर्दय २ स्वाहा इति कवचायहुं ॥ ४ ॥ उग्ररूपधर सर्वविषहर भीषय २ सर्वं दह २ भस्मीकुरु २ स्वाहा इति नेत्रत्रयाय वौषट् ॥ ५ ॥ अप्रतिहतबलाप्रतिहतशासन हुंफट् स्वाहा इत्यस्त्राय फट् ॥ ६ ॥ इति हृदयादिषडंग न्यासः ॥ ॥ अथ वर्णन्यासः ॥ ॐ क्षिं नमः पादयोः ॥ १ ॥ ॐ पं नमः कटौ ॥ २ ॥ ॐ नमः हृदये ॥ ३ ॥ ॐ स्वां नमः मुखे ॥ ४ ॥ ॐ हां नमः मूर्ध्नि ॥ ५ ॥ इति वर्णन्यासं कृत्वा ध्यायेत ॥ "तप्तस्वर्णनिभं फणींद्रनिकरैरुद्भूतांगभूषं प्रभुं स्मर्तॄणां शमयंतमुग्रमखिलं नृणां विषं तत्क्षणात् ॥ चंच्वग्रचलद्भुजंगमभयं पाण्योर्वरं बिभ्रतं पक्षोच्चारितसामगीतममलं श्रीपक्षिराजं भजे ॥ १ ॥ " एवं ध्यात्वा पूर्वोक्ते वैष्णवे पीठे मातृकायंत्रं विलिख्य तन्मध्ये ॐ पक्षिराजाय स्वाहा इति मंत्रेण मूर्तिं प्रकल्प्य मूलेन पाद्यादिपुष्पांतैरुपचारैः संपूज्य आवरणपूजां कुर्य्यात् ॥ तद्यथा । षट्कोणे आग्नेयादिकोणेषु मध्ये दिक्षु च पूर्वोक्तहृदयादिमंत्रषडंगपूजां कृत्वा तद्बहिरष्टपत्रेषु पूर्वादिक्रमेण । ॐ अनंताय नमः ॥ १ ॥ ॐ वासुकये० ॥ २ ॥ ॐ तक्ष

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

काय० ॥ ३ ॥ ॐ कर्कोटकाय० ॥ ४ ॥ ॐ पद्माय० ॥ ५ ॥ ॐ महापद्माय० ॥ ६ ॥ शंखपालाय० ॥ ७ ॥ ॐ कुलि
काय नमः ॥ ८ ॥ इत्यष्टौ नागान् पूजयेत् । ततो भूपुरे पूर्वादिदिक्षु इंद्रादिदशदिक्पालान् (तद्बहिः) वज्राद्यायुधानि च
पूजयेत् ॥ इत्यावरणपूजां कृत्वा धूपादिनीराजनांतपूजां कृत्वा जपं कुर्य्यात् । अस्य पुरश्चरणं पंचलक्षात्मकं ततो जपांते दशां
शहोमं तत्तदशांशेन तर्पणमार्ज्जनब्राह्मणभोजनानि च कुर्य्यात् तथा च–पंचलक्षं जपेन्मंत्रान्दशांशं जुहुयात्तिलैः ॥ एवं सिद्धे
मनौ मंत्री नाशयेद्दुरलद्वयम् ॥ १ ॥ विष्णुभक्तिपरो नित्यं यो भजेत्पक्षिनायकम् ॥ शत्रून्सर्वान्पराभूय सुखी भोगसम
न्वितः ॥ २ ॥ जीवेदनेकवर्षाणि सेवितो धरणीधवैः ॥ कलेवरांते श्रीनाथसायुज्यं लभते तु सः ॥ ३ ॥ इति गरुडमंत्रपुरश्च
रणम् ॥

॥ अथ श्रीहनुमन्मंत्रविधानम् ॥ तत्र तावद्बादशाक्षरहनुमन्मंत्रप्रयोगः । (मंत्रमहोदधौ) मुमुहूर्त्ते कृतनित्यक्रियः
शुचिः स्वासने प्राङ्मुख उपविश्य मूलेनाचम्य प्राणानायम्य देशकालौ संकीर्त्य ममामुककामनासिद्धिद्वारा श्रीहनुमद्देवताप्रीत्यर्थं
द्वादशसहस्रमंत्रजपात्मकं पुरश्चरणं करिष्ये । इति संकल्प्य तदंगतया गणपतिपूजनादिनांदीश्राद्धांतं कृत्वा (ब्राह्मणद्वाराकारिते)
आचार्यजापकवरुणं च कुर्य्यात् । ततो जपस्थाने हनुमत्प्रतिमासंमुखो दर्भासनादौ प्राङ्मुख उदङ्मुखो वा उपविश्य आचम्य
प्राणायामं कृत्वा देशकालौ संकीर्त्य अमुककामनासिद्धिपूर्वकश्रीहनुमत्प्रीतये अमुकसंख्यापरिमितहनुमन्मंत्रजपं करिष्ये इति
संकल्प्य भूतशुद्धिं प्राणप्रतिष्ठामंतर्मातृकाबहिर्मातृकान्यासं च पूर्ववत् कृत्वा शिवपंचाक्षरोदितं श्रीकंठादिकलान्यासं च कुर्य्यात्॥
अथ श्रीहनुमन्मंत्रन्यासादिप्रयोगः ॥ मूलमंत्रो यथा–"ॐ ह्रौं ह्रस्फ्रेख्फ्रें ह्रसौंह्रस्ख्फ्रेह्सौंहनुमते नमः इति द्वादशाक्षरो मंत्रः ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अस्य श्रीहनुमन्मंत्रस्य श्रीरामचंद्र ऋषिः । जगती छंदः । हनुमान् देवता । ह्लौं बीजम् । ह्स्फ्रें शक्तिः । हनुमते कीलकम् इष्टसिद्धयर्थे जपे विनियोगः । ॐ श्रीरामचंद्रऋषये नमः शिरसि ॥ १ ॥ ॐ जगतीछंदसे नमः मुखे ॥ २ ॥ ॐ हनुमद्देवतायै नमः हृदये ॥३॥ ॐ ह्लौं बीजाय नमः गुह्ये ॥४॥ ॐ ह्स्फ्रें शक्तये नमः पादयोः ॥५॥ ॐ हनुमते कीलकाय नमः नाभौ ॥ ६ ॥ ॐ इष्टार्थे विनियोगाय नमः अंजलौ ॥ ७ ॥ इति ऋष्यादिन्यासः ॥ ॐ हौं अंगुष्टाभ्यां नमः ॥ १ ॥ ॐ ह्स्फ्रें तर्जनीभ्यां नमः ॥२॥ ॐ ख्फ्रें मध्यमाभ्यां नमः ॥३॥ ॐ ह्लौं अनामिकाभ्यां नमः ॥४॥ॐ ह्स्ख्फ्रें कनिष्ठिकाभ्यां नमः ॥५॥ ॐ ह्लौं करतलकरपृष्ठाभ्यां नमः ॥६॥ इति करन्यासः ॥एवं हृदयादिन्यासं कुर्य्यात् ॥ ॐ हौं नमः मूर्ध्नि ॥१ ॥ ॐ ह्स्फ्रें नमः ललाटे ॥२॥ ॐ ख्फ्रें नमः नेत्रयोः ॥३॥ ॐ ह्स्रौं नमः मुखे ॥४॥ ॐ ह्स्ख्फ्रें नमः कंठे॥५॥ ॐ ह्लौं नमः बाह्वोः ॥६॥ ॐ हं नमः हृदि॥७॥ ॐ नुं नमः कुक्षौ ॥ ८ ॥ ॐ मं नमः नाभौ ॥ ९ ॥ ॐ तें नमः लिंगे ॥ १० ॥ ॐ नं नमः जानुनोः ॥ ११ ॥ ॐ मं नमः पादयोः ॥ १२ ॥ इति वर्णन्यासः ॥ ॐ हौं नमः मूर्ध्नि ॥ १ ॥ ॐ ह्स्फ्रें नमः ललाटे ॥ २ ॥ ॐ ख्फ्रें नमः मुखे ॥ ३ ॥ ॐ ह्सौं नमः हृदि ॥ ४ ॥ ॐ ह्स्ख्फ्रें नमः नाभौ ॥ ५ ॥ ॐ ह्सौं नमः ऊर्वोः ॥ ६ ॥ ॐ हनुमते नमः जंघयोः ॥ ७ ॥ ॐ नमः नमः पादयोः ॥ ८ ॥ इति पदन्यासः ॥ मूलेन व्यापकं कुर्यात् ॥ इति न्यासविधिं कृत्वा ध्यायेत् ॥ " बालार्कायुतते जसं त्रिभुवनप्रक्षोभकं सुन्दरं सुग्रीवादिसमस्तवानरगणैः संसेव्यपादाम्बुजम् ॥ नादेनैव समस्तराक्षसगणान्संत्रासयंतं प्रभुं श्रीमद्रामपदांबुजस्मृतिरतं ध्यायामि वातात्मजम् ॥ १ ॥ इति ध्यात्वा मानसोपचारैः संपूज्य पीठपूजां कुर्यात् तद्यथा—

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पीठे ॐ मंडूकादिपरतत्त्वांतपीठदेवताभ्यो नमः इति संपूज्य पूर्वादिदिक्षु । ॐ विमलायै नमः ॥ १ ॥ ॐ उत्कर्षिण्यै नमः ॥ २ ॥ ॐ ज्ञानायै नमः ॥ ३ ॥ ॐ प्रियायै नमः ॥ ४ ॥ ॐ योगायै नमः ॥ ५ ॥ ॐ प्रह्वयै नमः ॥ ६ ॥ ॐ सत्यायै नमः ॥ ७ ॥ ॐ ईशानायै नमः ॥ ८ ॥ (मध्ये) ॐ अनुग्रहायै नमः ॥ ९ ॥ इति पीठशक्तीः पूजयेत् ॥ ॐ ह्रीँ नमो भगवते सकलगुणात्मशक्तियुक्ताय अनंताय योगपीठात्मने नमः इत्यासनं दत्त्वा मूलेन मूर्तिं प्रकल्प्य पुष्पांतै रुपचारैः संपूज्य आवरणपूजां कुर्यात् । तद्यथा—षट्कोणे आग्नेयादिकोणेषु मध्ये दिक्षु च । ॐ हौं हृदयाय नमः ॥ १ ॥ ह्रस्फ्रें शिरसे स्वाहा ॥ २ ॥ रुफ्रें शिखायै वषट् ॥ ३ ॥ ह्रस्त्रौं कवचाय हुम् ॥ ४ ॥ ह्रस्फ्रें नेत्रत्रयाय वौषट् ॥ ५ ॥ ह्लौं अस्त्राय फट् ॥ ६ ॥ इति षडंगानि पूजयेत् ॥ इति प्रथमावरणम् ॥ १ ॥ तद्बहिः पूर्वाद्यष्टदलेषु । ॐ रामभक्ताय नमः ॥ १ ॥ ॐ महातेजसे नमः ॥ २ ॥ ॐ कपिराजाय नमः ॥ ३ ॥ ॐ महाबलाय नमः ॥ ४ ॥ ॐ द्रोणाद्रिहारकाय नमः ॥ ५ ॥ ॐ मेरुपीठकार्चनकारकाय नमः ॥ ६ ॥ ॐ दक्षिणाशाभास्कराय नमः ॥ ७ ॥ ॐ सर्वविघ्ननिवारकाय नमः ॥ ८ ॥ इति द्वितीयावरणम् ॥ २ ॥ ततो दलाग्रेषु ॐ सुग्रीवाय नमः ॥ १ ॥ ॐ अङ्गदाय नमः ॥ २ ॥ ॐ नीलाय नमः ॥ ३ ॥ ॐ जाम्बवते नमः ॥ ४ ॥ ॐ नलाय नमः ॥ ५ ॥ ॐ सुषेणाय नमः ॥ ६ ॥ ॐ द्विविदाय नमः ॥ ७ ॥ ॐ मैन्दाय नमः ॥८॥ इति तृतीयावरणम् ॥ ३ ॥ (ततो दलसंधिषु) ॐ रक्षोघ्नाय नमः ॥१॥ ॐ विषघ्नाय० ॥ २ ॥ ॐ रिपुघ्नाय० ॥ ३ ॥ ॐ व्याधिघ्नाय नमः ॥ ४ ॥ ॐ चौरघ्नाय० ॥ ५ ॥ ॐ भूतघ्नाय० ॥ ६ ॥ ॐ परशस्त्रास्त्रमंत्रघ्नाय० ॥ ७ ॥ ॐ भय

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

* घ्राय नमः ॥ ८ ॥ इति चतुर्थावरणम् ॥ ४ ॥ ततो भूपुरप्रथमरेखायां पूर्वादिक्रमेण । ॐ ऐरावताय नमः ॥ १ ॥ ॐ पुंडरीकाय नमः ॥ २ ॥ ॐ वामनाय नमः ॥ ३ ॥ ॐ कुमुदाय नमः ॥ ४ ॥ ॐ अंजनाय नमः ॥ ५ ॥ ॐ पुष्पदंताय नमः ॥ ६ ॥ ॐ सार्वभौमाय नमः ॥ ७ ॥ ॐ सुप्रतीकाय नमः ॥ ८ ॥ इति पंचमावरणम् ॥ ५ ॥ ततो भूपुरद्वितीयरेखायाम् । लं इंद्राय नमः ॥ १ ॥ रं अग्नये नमः ॥ २ ॥ मं यमाय नमः ॥ ३ ॥ क्षं निर्ऋतये नमः ॥ ४ ॥ वं वरुणाय नमः ॥ ५ ॥ यं वायवे नमः ॥ ६ ॥ सं कुबेराय नमः ॥ ७ ॥ हं ईशानाय नमः ॥ ८ ॥ (ऊर्ध्वम्) ह्रीं ब्रह्मणे नमः ॥ ९ ॥ (अधः) अं अनंताय नमः ॥ १० ॥ इति पूजयेत् ॥ इति षष्ठावरणम् ॥ ६ ॥ ततो भूपुरे तृतीयरेखायाम् । ॐ वज्राय नमः ॥ १ ॥ ॐ शक्तये नमः ॥ २ ॥ ॐ दंडाय नमः ॥ ३ ॥ ॐ खड्गाय नमः ॥ ४ ॥ ॐ पाशाय नमः ॥ ५ ॥ ॐ अंकुशाय नमः ॥ ६ ॥ ॐ गदायै नमः ॥ ७ ॥ ॐ त्रिशूलाय नमः ॥ ८ ॥ ॐ पद्माय नमः ॥ ९ ॥ ॐ चक्राय नमः ॥ १० ॥ इति पूजयेत् । इति सप्तमावरणम् ॥ ७ ॥ एवमावरणपूजां विधाय । ॐ सांगाय सपरिवाराय श्रीहनुमते नमः । इति धूपदीपनैवेद्यतांबूलदक्षिणानीराजनैः स्तुतिपाठैश्च संपूज्य । यथाविधि जपं कुर्य्यात् ॥ अस्य पुरश्चरणं द्वादशसहस्रजपः ॥ तथा च—"एवं ध्यात्वा जपेदर्कसहस्रं जितमानसः ॥ दशांशं जुहुयाद्घोहीन्पयोदध्याज्यसंयुतान् ॥ १ ॥ एवं सिद्धे मनौ मंत्री स्वपरेष्टं प्रसाधयेत् ॥ कदलीबीजपूराम्रफलैर्हुत्वा सहस्रकम् ॥ २ ॥ द्वाविंशतिं ब्रह्मचारिविप्रान्संभोजयेदथ ॥ एवं कृते महाभूतविषचौराद्युपद्रवाः ॥ ३ ॥ नश्यंति क्षणमात्रेण विद्वेषिग्रहदानवाः ॥

* श्रीहनुमन्मन्त्रपूजायन्त्रमिदम्—प्र. ३ चि. पृ. नं. २८२.

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अष्टोत्तरशतैर्वारि मंत्रितं विषनाशनम् ॥ ४ ॥ रात्रौ नवशतं मंत्रं जपेद्दशदिनावधि ॥ यो नरस्तस्य नश्यंति राजशत्रूत्थभीतयः ॥ ५ ॥ अभिचारोत्थभूतोत्थज्वरे तन्मंत्रितैर्जलैः ॥ भस्मभिः सलिलैर्वापि ताडयेज्ज्वरिणः क्रुधा ॥ ६ ॥ दिनत्रयाज्ज्वरान्मुक्तः स सुखं लभते नरः ॥ तन्मंत्रितौषधं जग्ध्वा नीरोगो जायते ध्रुवम् ॥ ७ ॥ तन्मंत्रितं पयः पीत्वा योद्धुं गच्छेन्मनुं जपन् ॥ तज्ज्ञभस्मलिप्तांगः शस्त्रसंघैर्न बाध्यते ॥ ८ ॥ शस्त्रक्षतं व्रणः शोफो लूता स्फोटोपि भस्मना ॥ त्रिमंत्रितेन संस्पृष्टाः शुष्यंत्यचिरतो नृणाम् ॥ ९ ॥ सूर्यास्तमयमारभ्य जपेत्सूर्य्योदयावधि ॥ कीलकं भस्म चादाय सप्ताहावधिसंयुतः ॥ १० ॥ निखनेद्गृस्मकीलौ तौ विद्विषां द्वार्य्यलक्षितः ॥ विद्वेषं मिथ आपन्नाः पलायन्तेऽरयोऽचिरात् ॥ ११ ॥ अभिमंत्रितभस्मांबु देहचंदनसंयुतम् ॥ खाद्यादि योजितं यस्मै दीयते स तु दासवत् ॥ १२ ॥ क्रूराश्च जंतवोऽनेन भवंति विधिना वशाः ॥ ईशानदिक्स्थले मूलेन भूतां कुशतरोः शुभाम् ॥ १३ ॥ अंगुष्ठमात्रां प्रतिमां प्रविधाय हनूमतः ॥ प्राणसंस्थापनं कृत्वा सिंदूरैः परिपूज्य च ॥ १४ ॥ गृहस्याभिमुखो द्वारे निखनेन्मंत्रमुच्चरन् ॥ भूताभिचारचौराग्निविषरोगनृपोद्भवाः ॥ १५ ॥ संजायंते गृहे तस्मिन्न कदाचिदुपद्रवाः ॥ प्रत्यहं धनपुत्राद्यैरेधते तद्गृहं चिरम् ॥ १६ ॥ वश्यार्थं सर्षपैर्होमो विद्वेषे करवीरजैः ॥ कुसुमैरिध्मकाष्ठैर्वा जीरकैर्मरिचैरपि ॥ १७ ॥ ज्वरे दूर्वागुडूचीभिर्दध्ना क्षीरेण वा घृतैः ॥ शूले होमः कुबेराक्षैरेरंडसमिधा तथा ॥ १८ ॥ तैलाक्ताभिश्च निर्गुंडीसमिद्भिर्वा प्रयत्नतः ॥ सौभाग्यं चंदनैश्चंद्रे रोचनैलालवंगकैः ॥ १९ ॥ सुगंधपुष्पैर्वस्त्राद्यैस्तत्तद्धान्यैस्तदाप्तये ॥ तत्पादरजसा राजीलवणाक्तेन मृत्यवे ॥ २० ॥ किं बहूक्तैर्विषे व्याधौ शांतौ मोहे च मारणे ॥ विवादे स्तंभने द्यूते भूतभीतौ च संकटे ॥ २१ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वश्ये युद्धे नृपद्वारे समरे चौरसंकटे ॥ मंत्रोयं साधितो दद्यादिष्टसिद्धिं ध्रुवं नृणाम् ॥ २२ ॥ इति द्वादशाक्षरश्रीहनुमन्मंत्रपुरश्चरणम् ॥ अथाष्टादशाक्षरहनुमन्मंत्रप्रयोगस्तत्रैव । (भूतशुद्ध्यादि श्रीकंठकलामातृकान्तो न्यासः पूर्ववत्) मूलमंत्रो यथा—" ॐ नमो भगवते आंजनेयाय महाबलाय स्वाहा" इत्यष्टादशाक्षरो मंत्रः ॥ अस्य मंत्रस्य ईश्वर ऋषिः । अनुष्टुप् छंदः । हनुमान् देवता । हूं बीजम् । स्वाहा शक्तिः । ममाभीष्टसिद्ध्यर्थे जपे विनियोगः ॥ ॐ ईश्वरऋषये नमः शिरसि ॥ १ ॥ ॐ अनुष्टुप्छंदसे नमः मुखे ॥ ॥ २ ॥ ॐ हनुमद्देवतायै नमः हृदये ॥ ३ ॥ ॐ हूं बीजाय नमः गुह्ये ॥ ४ ॥ ॐ स्वाहाशक्तये नमः पादयोः ॥ ५ ॥ ॐ आंजनेयाय अंगुष्ठाभ्यां नमः ॥ १ ॥ ॐ रुद्रमूर्त्तये तर्जनीभ्यां नमः ॥ २ ॥ ॐ वायुपुत्राय मध्यमाभ्यां नमः ॥ ३ ॥ ॐ अग्निगर्भाय अनामिकाभ्यां नमः ॥ ४ ॥ ॐ रामदूताय कनिष्ठिकाभ्यां नमः ॥ ५ ॥ ॐ ब्रह्मास्त्रनिवारणाय करतलकरपृष्ठाभ्यां नमः ॥ ६ ॥ इति करन्यासः । एवमेव हृदयादिषडंगन्यासं च कृत्वा ध्यायेत् ॥ "दहनतप्तसुवर्णसमप्रभं भयहरं हृदये विहितांजलिम् ॥ श्रवणकुंडलशोभिमुखांबुजं नमत वानरराजमिहाद्भुतम्" ॥१॥ इति ध्यात्वा पूर्वोक्ते पीठे । मूलेन मूर्तिं प्रकल्प्य पाद्याद्यैः पुष्पांतैरुपचारैः संपूज्य पूर्ववदावरणपूजान्ते धूपादिनीराजनातं संपाद्य । स्तवेन स्तुत्वा जपं कुर्य्यात् । अस्य पुरश्चरणमयुतमंत्राः तथा च—अयुतं प्रजपेन्मंत्रान्दशांशं जुहुयात्तिलैः ॥ वैष्णवे पूजयेत्पीठे पूर्ववत्कपिनायकम् ॥ १ ॥ जितेंद्रियो नक्तभोजी प्रत्यहं साष्टकं शतम् ॥ जपित्वा क्षुद्ररोगेभ्यो मुच्यते दिवसत्रयात् ॥ २ ॥ भूतप्रेतपिशाचादिनाशायैवं समाचरेत् ॥ महारोगनिवृत्त्यै तु सहस्रं प्रत्यहं जपेत् ॥ ३ ॥ यत्ताशनोऽयतं नित्यं जपन्ध्यायन्कपीश्वरम् ॥ राक्षसौघं विनिघ्नंतमचिराज्जयति द्विषम् ॥ ४ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सुग्रीवेण समं रामं संदधानं स्मरन्कपिम् ॥ प्रजप्यायुतमेतस्य संधिं कुर्य्याद्विरुद्धयोः ॥ ५ ॥ लंकां दहंतं तं ध्यायन्नयुतं प्रजपेन्मनुम् ॥ शत्रूणां प्रदहेद्ग्रामानचिरादेव साधकः ॥ ६ ॥ प्रयाणसमये ध्यायन्हनूमंतं मनुं जपन् ॥ यो याति सोऽचिरात्स्वेष्टं साधयित्वा गृहं व्रजेत् ॥ ७ ॥ यः कपीशं सदा गेहे पूजयेज्जपतत्परः ॥ आयुर्लक्ष्म्यौ प्रवर्द्धेते तस्य नश्यंत्युपद्रवाः ॥ ८ ॥ शार्दूलतस्करादिभ्यो रक्षेन्मनुरयं स्मृतः ॥ प्रस्वापकाले चौरेभ्यो दुष्टस्वप्नादपि ध्रुवम् ॥ ९ ॥ इत्यष्टादशाक्षरहनुमन्मंत्रप्रयोगः ॥ अथ तंत्रसारोक्तद्वादशाक्षरहनुमन्मंत्रविधानम् ॥ "देव्युवाच ॥ शैवानि गाणपत्यानि शाक्तानि वैष्णवानि च ॥ साधनानि च सौराणि चान्यानि यानि कानि च ॥ १ ॥ श्रुतानि देवदेवेश त्वद्वक्त्रान्निःसृतानि च ॥ किंचिदन्यत्तु देवानां साधनं यदि कथ्यताम् ॥ २ ॥ शंकर उवाच ॥ शृणु देवि प्रवक्ष्यामि सावधानावधारय ॥ हनुमत्साधनं पुण्यं महापातकनाशनम् ॥ ३ ॥ एतद्ध्रुवतमं लोके शीघ्रसिद्धिकरं परम् ॥ जयो यस्य प्रसादेन जितलोकत्रयो भवेत् ॥ ४ ॥ तत्साधनविधिं वक्ष्ये नृणां सिद्धिकरं द्रुतम् ॥ वियत्सलवकं हनूमते च तदनंतरम् ॥ रुद्रात्मकाय कवचं फडिति द्वादशाक्षरः ॥ ५ ॥ एतन्मंत्रं समाख्यातं गोपनीयं प्रयत्नतः ॥ तव स्नेहेन भक्त्या च दासोस्मि तव सुंदरि ॥ ६ ॥ एतन्मंत्रमर्जुनाय पुरा दत्तं तु शौरिणा ॥ जपेन साधनं कृत्वा जितं सर्वं चराचरम् ॥ ७ ॥ नदीकूले विष्णुगेहे निर्जने पर्वते वने ॥ एकाग्रचित्तमाधाय साधयेत्साधनं महत् ॥ ८ ॥" तत्र प्रयोगः ॥ प्रातः स्नात्वा नदीतीरे वा विष्णुगेहे निर्जने स्थाने कुशासने उपविश्य मूलेन आचम्य प्राणानायम्य स्वकामनया संकल्प्य भूतशुध्यादिश्रीकंठादिकलामातृकान्तन्यासं कृत्वा मूलमंत्रेण षडंगन्यासं कुर्य्यात् । (मूलमंत्रस्वरूपं यथा) " हं हनूमतेरुद्रात्मकाय

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

हुंफट्" ॥ इति द्वादशवर्णात्मको मंत्रः ॥ ॐ हं हनूमते रुद्रात्मकाय अंगुष्ठाभ्यां नमः ॥ १ ॥ ॐ हं हनूमते रुद्रात्मकाय तर्जनीभ्यां नमः ॥ २ ॥ ॐ हं हनूमते रुद्रात्मकाय मध्यमाभ्यां नमः ॥ ३ ॥ ॐ हं हनूमते रुद्रात्मकाय अनामिकाभ्यां नमः ॥ ४ ॥ ॐ हं हनूमते रुद्रात्मकाय कनिष्ठिकाभ्यां नमः ॥ ५ ॥ ॐ हं हनूमते रुद्रात्मकाय करतलकरपृष्ठाभ्यां नमः ॥ ६ ॥ इति करन्यासः ॥ एवमेव हृदयादिषडंगन्यासं कृत्वा ध्यायेत् ॥ "महाशैलं समुत्पाट्य धावंतं रावणं प्रति ॥ तिष्ठतिष्ठ रणे दुष्ट घोरावं समुत्सृजन् ॥ १ ॥ लाक्षारक्तारुणं रौद्रं कालांतकयमोपमम् ॥ ज्वलदग्निसमं नेत्रं सूर्यकोटिसमप्रभम् ॥ २ ॥ अंगदाद्यैर्महावीरैर्वेष्टितं रुद्ररूपिणम्" ॥ इति ध्यात्वा मानसोपचारैः संपूज्य पूर्वोक्ते वैष्णवे पीठे यंत्रं विलिखेत् तद्यथा—ताम्रपात्रे ततः पद्ममष्टपत्रं सकेसरम् ॥ रक्तचंदनघृष्टेन लिखेत्ताम्रशलाकया ॥ १ ॥ कर्णिकायां लिखेन्मन्त्रं तत्रावाह्य कपिप्रभुम् ॥ कर्णिकायां हनूमंतं ध्यात्वा पाद्यादिभिस्ततः ॥२॥ (पूजयेदिति शेषः) एवं यंत्रं विलिख्य । तन्मध्ये मूलमंत्रं लिखित्वा तत्र मूलेन श्रीहनुमंतमावाह्य । पाद्यादिपुष्पांतैरुपचारैः संपूज्य आवरणपूजां कुर्यात् । तद्यथा—षट्कोणे आग्नेयादिकोणेषु मध्ये दिक्षु च मूलेन पूर्ववत् हृदयादिषडंगपूजां कुर्यात् । तद्बहिरष्टदलेषु पूर्वादिक्रमेण । ॐ सुग्रीवाय नमः ॥ १ ॥ ॐ लक्ष्मणाय नमः ॥ २ ॥ ॐ अंगदाय नमः ॥ ३ ॥ ॐ नलाय नमः ॥ ४ ॥ ॐ नीलाय नमः ॥ ५ ॥ ॐ जांबवते नमः ॥ ६ ॥ ॐ कुमुदाय नमः ॥ ७ ॥ ॐ केशरिणे नमः ॥ ८ ॥ इति पूजयेत् । ततो देवदक्षिणे । ॐ पवनाय नमः ॥ १ ॥ (वामभागे) ॐ अंजनायै नमः ॥ २ ॥ इति पूजयेत् ॥ ततो दलाग्रेषु । पूर्वोक्ताष्टकपिभ्यः पुष्पांजल्यष्टकं तत्तन्नाममंत्रेण दत्त्वा तद्बाह्ये भपुरे पूर्वादिषु । इंद्रादिदशदिक्पा

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

लान्संपूज्य तद्बाह्ये वज्राद्यायुधानि च पूजयेत् । एवमावरणपूजां कृत्वा धूपादिनीराजनान्तैरुपचारैः पूजां कृत्वा रामं ससीतं ध्यात्वा जपं कुर्यात् ॥ अस्य पुरश्चरणं लक्षमंत्रजपः । जपांते पूर्वोक्तद्रव्यैर्दशांशहोमं कृत्वा तत्तद्दशांशेन तर्पणमार्जनब्राह्मणभोजनानि च कुर्यात् । तथा च–ध्यात्वा जपेन्मंत्रराजं लक्षं यावत्तु साधकः ॥ लक्षांतदिवसं प्राप्य कुर्याच्च पूजनं महत् ॥ १ ॥ एकाग्रशुद्धमनसा तस्मिन्पवननंदने ॥ दिवा रात्रौ जपं कुर्याद्यावत्संदर्शनं भवेत् ॥ २ ॥ सुदृढं साधकं मत्वा निशीथे पवनात्मजः ॥ सुप्रसन्नस्ततो भूत्वा प्रयाति साधकाग्रतः ॥ ३ ॥ यथेप्सितं वरं दत्त्वा साधकाय कपिप्रभुः ॥ वरं लब्ध्वा साधकेन्द्रो विहरेदात्मनः सुखैः ॥ ४ ॥ एतद्धि साधनं पुण्यं देवानामपि दुर्लभम् ॥ तव स्नेहात्समाख्यातं भक्तासि मयि पार्वति ॥ ५ ॥ इति गारुडे तंत्रे द्वादशाक्षरहनुमत्कल्पं समाप्तम् ॥ अथ दशाक्षरमंत्रवीरसाधनप्रयोगः ॥ मंत्रो यथा–'हं पवननंदनाय स्वाहा' इति दशाक्षरो मंत्रः । ब्राह्मे मुहूर्त्ते चोत्थाय कृतनित्यक्रियो द्विजः ॥ गत्वा नदीं ततः स्नात्वा तीर्थमावाह्य चांभसि ॥ १ ॥ मूलमंत्रं ततो जप्त्वा सिंचेदादित्यसंख्यया ॥ अथो वासः परिधाय गंगातीरेऽथवा गृहे ॥ २ ॥ तत्र प्रयोगः–कुशासने उपविश्य मूलेनाचम्य प्राणायम्य । ॐ आं अंगुष्ठाभ्यां नमः ॥ १ ॥ ईं तर्जनीभ्यां० ॥ २ ॥ ऊं मध्यमाभ्यां० ॥ ३ ॥ ऐं अनामिकाभ्यां० ॥ ४ ॥ औं कनिष्ठिकाभ्यां नमः ॥ ५ ॥ अः करतलकरपृष्ठाभ्यां नमः ॥ ६ ॥ एवं हृदयादिन्यासः ॥ ततः अकारादिवर्णानुच्चरन् वामनासापुटेन वायुं पूरयेत् । ककारादिमकारांतं पंचवर्गेण कुंभयेत् । यकारादिक्षकारांतवर्णैर्वायुं रेचयेत् । एवं वारत्रयं कृत्वा मंत्रवर्णैरंगन्यासं कुर्यात् । ॐ हं पवननंदनाय स्वाहा अंगुष्ठाभ्यां नमः ॥ १ ॥ हं पवननंदनाय तर्जनीभ्यां नमः ॥ २ ॥ हं पवननंदनाय

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मध्यमाभ्यां नमः ॥ ३ ॥ हं पवननंदनाय अनामिकाभ्यां नमः ॥ ४ ॥ हं पवननंदनाय कनिष्ठिकाभ्यां नमः ॥ ५ ॥ हं पवन नंदनाय करतलकरपृष्ठाभ्यां नमः ॥ ६ ॥ एवं हृदयादिषडंगन्यासं कुर्यात् । एवं न्यासविधिं कृत्वा ध्यायेत् ॥ "ध्यायेद्रणे हनूमंतं कपिकोटिसमन्वितम् ॥ धावंतं रावणं जेतुं दृष्ट्वा सत्वरमुत्थितम् ॥१॥ लक्ष्मणं च महावीरं पतितं रणभूतले ॥ गुरुं च क्रोधमुत्पाद्य गृहीत्वा गुरुपर्वतम् ॥ २ ॥ हाहाकारैः सदर्पैश्च कंपयंतं जगत्त्रयम् ॥ आब्रह्मांडं समाव्याप्य कृत्वा भीमं कलेवरम् ॥ ३ ॥" इति ध्यात्वा षट्सहस्रं जपेत् ॥ सप्तमदिवसे दिवा रात्रिंच व्याप्य जपेत् ॥ सप्तम्यां रात्रौ महाभयं दत्त्वा त्रिभागशेषासु निशासु नियतमा गच्छति साधको यदि मायां तरति भीतो न भवति तदेप्सितं वरं प्राप्नोति—विद्यां वापि धनं वापि राज्यं वा शत्रुनिग्रहम् ॥ तत्क्षणादेव चाप्नोति सत्यं सत्यं सुनिश्चितम् ॥ इति दशाक्षरमंत्रप्रयोगः ॥ ॥ अथ एकमुखीहनुममत्कवचप्रारंभः ॥ "नारद उवाच ॥ एकदा सुखमासीनं शंकरं लोकशङ्करम् ॥ पप्रच्छ गिरिजा कांतं कर्पूरधवलं शिवम् ॥ १ ॥ श्रीपार्वत्युवाच ॥ भगवन्देवदेवेश लोकनाथ जगत्प्रभो ॥ शोकाकुलानां लोकानां केन रक्षा भवेद्भव ॥ २ ॥ संग्रामे संकटे घोरे भूतप्रेतादिके भये ॥ दुःखदावाग्निसन्ततचेतसां दुःखभागिनाम् ॥ ३ ॥ ईश्वर उवाच ॥ शृणु देवि प्रवक्ष्यामि लोकानां हितकाम्यया ॥ विभीषणाय रामेण कथितं कवचं पुरा ॥ ४ ॥ कवचं कपिनाथस्य वायुपुत्रस्य धीमतः ॥ गुह्याद्गुह्यं प्रवक्ष्यामि विशेषात्तव सुन्दरि ॥ ५ ॥ ॐ अस्य श्रीहनुमत्कवचस्तोत्रमंत्रस्य श्रीरामचन्द्र ऋषिः । श्रीवीरो हनुमान्परमात्मा देवता । अनुष्टुप् छंदः । मारुतात्मज इति बीजम् । अञ्जनीसूनुरिति शक्तिः । लक्ष्मणप्राणदाता इति जीवः । श्रीरामभक्तिरिति कवचम् । लंकाप्रदाहक इति कीलकम् । मम सकलकार्यसिद्ध्यर्थे

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

जपे विनियोगः ॥ ॐ ऐंश्रींह्रांह्रींह्रूं ॐ ह्रां अंगुष्ठाभ्यां नमः ॥ १ ॥ ॐ ह्रीं तर्जनीभ्यां नमः ॥ २ ॥ ॐ ह्रूं मध्यमाभ्यां नमः ॥ ३ ॥ ॐ ह्रैं अनामिकाभ्यां नमः ॥ ४ ॥ ॐ ह्रौं कनिष्ठिकाभ्यां नमः ॥ ५ ॥ ॐ ह्रः करतलकरपृष्ठाभ्यां नमः ॥ ६ ॥ इति करन्यासः ॥ ॐ अञ्जनीसूनवे नमो हृदयाय नमः ॥ १ ॥ ॐ रुद्रमूर्तये नमः शिरसे स्वाहा ॥ २ ॥ ॐ वातात्मजाय नमः शिखायै वषट् ॥ ३ ॥ ॐ श्रीरामभक्तिसहिताय नमः कवचाय हुम् ॥ ४ ॥ ॐ वज्रकवचाय नमो नेत्रत्रयाय वौषट् ॥५॥ ॐ ब्रह्मास्त्रनिवारणाय नमः अस्त्राय फट् ॥ ६ ॥ इति हृदयादिन्यासः । अथ ध्यानम् ॥ "ध्यायेद्बालदिवाकरद्युतिनिभं देवारिदर्पापहं देवेन्द्रप्रमुखं प्रशस्तयशसं देदीप्यमानं रुचा ॥ सुग्रीवादिसमस्तवानरयुतं सुव्यक्ततत्त्वप्रियं संरक्तारुणलोचनं पवनजं पीताम्बरालंकृतम् ॥ ६ ॥ उद्यन्मार्तण्डकोटिप्रकटरुचियुतं चारुवीरासनस्थं मौञ्जीयज्ञोपवीताभरणरुचिशिखाशोभितं कुण्डलाढ्यम् ॥ भक्तानामिष्टदानप्रवणमनुदिनं वेदनादप्रमोदं ध्यायेदेवं विधेयं प्लवगकुलपतिं गोष्पदीभूतवार्धिम् ॥ ७ ॥ मनोजवं मारुततुल्यवेगं जितेंद्रियं बुद्धिमतां वरिष्ठम् ॥ वातात्मजं वानरयूथमुख्यं श्रीरामदूतं शरणं प्रपद्ये ॥ ८ ॥ वज्रांगं पिङ्गकेशाढ्यं स्वर्णकुण्डलमण्डितम् ॥ उद्यद्दक्षिणदोर्दण्डं हनुमंतं विचिंतये ॥ ९ ॥ स्फटिकाभं स्वर्णकांतिं द्विभुजं च कृताञ्जलिम् ॥ कुण्डलद्वयसंशोभिमुखाम्भोजं हरिं भजे ॥ १० ॥ उद्यदादित्यसङ्काशमुदारभुजविक्रमम् ॥ कन्दर्पकोटिलावण्यं सर्वविद्याविशारदम् ॥ ११ ॥ श्रीरामहृदयानन्दं भक्तकल्पमहीरुहम् ॥ अभयं वरदं दोर्भ्यां कलये मारुतात्मजम् ॥१२॥ अपराजित नमस्तेऽस्तु नमस्ते रामपूजित ॥ प्रस्थानं च करिष्यामि सिद्धिर्भवतु मे सदा ॥ १३ ॥ यो वारां निधिमल्पपल्वलमिवोल्लंघ्य प्रतापान्वि

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तो वैदेहीघनशोकतापहरणो वैकुण्ठभक्तप्रियः ॥ अक्षाद्यूर्जितराक्षसेश्वरमहादर्पापहारी रणे सोऽयं वानरपुङ्गवोऽवतु सदा चास्मा
न्समीरात्मजः ॥ १४ ॥ वज्राङ्गं पिङ्गनेत्रं कनकमयलसत्कुण्डलाक्रान्तगण्डं सर्वाविद्याधिनाथं करतलविधृतं पूर्णकुम्भं दृढं च ॥
भक्ताभीष्टाधिकारं विदधति च सदा सुप्रसन्नं कपीन्द्रं त्रैलोक्यत्राणकारं सकलभुवनगं रामदूतं नमामि ॥ १५ ॥ उद्यल्लांगूलकेशप्र
चलजलधरं भीममूर्तिं कपीन्द्रं वन्दे रामांघ्रिपद्मभ्रमरपरिवृतं सत्त्वसारं प्रसन्नम् ॥ १६ ॥ वामे करे वैरिभयं वहंतं शैलं च धत्ते
निजकंठलग्नम् ॥ उद्यानमुत्थाय सुवर्णवर्णं भजे ज्वलत्कुण्डलरामदूतम् ॥ १७ ॥ पद्मरागमणिकुण्डलत्विषा पाटलीकृतकपोल
मण्डलम् ॥ दिव्यगेहकदलीवनान्तरे भावयामि पवमाननन्दनम् ॥ १८ ॥ ॐ ऐं ह्रीं हनुमते रामदूताय शाकिनीडाकिनीविध्वं
सनाय किलकिल वामकरेण निषण्णाय हनुमदेवाय ॐ ह्रीं श्रीं ह्रौं ह्रां स्वाहा ॥ अथ मंत्रः ॥ ॐ नमो भवगते हनुमदाख्यरुद्राय सर्वदु
ष्टजनमुखस्तंभनं कुरुकुरु ह्रांह्रींह्रूंठंठंठंहुंफट्स्वाहा । ॐ नमो हनुमते अञ्जनीगर्भसम्भूताय रामलक्ष्मणानन्दकराय कपिसैन्यप्र
काशनाय पर्वतोत्पाटनाय सुग्रीवामात्याय रणपरोद्घाटनाय कुमारब्रह्मचारिणे गम्भीरभीमशब्दोदयाय ॐ ह्रांह्रींह्रूंसर्वदुष्टनिवारणाय
स्वाहा । ॐ नमो हनुमते सर्वग्रहान् भूतभविष्यद्वर्तमानान् दूरस्थान् समीपस्थान् सर्वकालदुष्टबुद्धीनुच्चाटयोच्चाटय परबलानि
क्षोभयक्षोभय मम सर्वकार्याणि साधयसाधय ॐ ह्रांह्रींह्रूं फट् देहिदेहि स्वाहा शिवं सिद्धिं हूंह्राह्रांस्वाहा ॐ नमो हनुमते परकृतयं
त्रमंत्रपराहंकारभूतप्रेतपिशाचपरदृष्टिसर्वविघ्नदुर्जनचेटकविद्यासर्वग्रहभयं निवारय २ वध २ पच २ दल २ विचुलु २ किलु २
सर्वयंत्राणि कुरुष्व वाचं ॐ फट् स्वाहा । ॐ नमो हनुमते पाहि २ एहि २ सर्वग्रहभूतानां शाकिनीडाकिनीनां विषमदुष्टानां

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सर्वविषयान् आकर्षय २ मर्दय २ छेदय २ अपमृत्युं मम उपशोषय २ ज्वल २ प्रज्वल २ भूतमंडलं पिशाचमण्डलं निरासय २ भूत
ज्वरप्रेतज्वरचतुर्थज्वरविषमज्वरमहेशज्वरं छिन्धि २ भिन्धि २ अक्षिशूलपक्षशूलशिरोभ्यंतरशूलगुल्मशूलपित्तशूलब्रह्मराक्षसकुल
परबलनागकुलविषनिर्विषफट् ॐ सर्वदुष्टग्रहनिवारणाय स्वाहा ॐ नमो हनुमते पवनपुत्राय वैश्वानरमुखाय पापदृष्टिघोरदृष्टिहनु
मदाज्ञास्फुरेत्स्वाहा ॥ श्रीराम उवाच ॥ हनुमान्पूर्वतः पातु दक्षिणे पवनात्मजः ॥ पातु प्रतीच्यां रक्षोघ्नः पातु सागरपारगः ॥१९॥
उदीच्यामूर्द्ध्वगः पातु केसरिप्रियनंदनः ॥ अधस्ताद्विष्णुभक्तस्तु पातु मध्यं च पावनिः ॥ २० ॥ अवान्तरदिशः पातु सीताशोक
विनाशनः ॥ लंकाविदाहकः पातु सर्वापद्भ्यो निरन्तरम् ॥ २१ ॥ सुग्रीवसचिवः पातु मस्तकं वायुनंदनः ॥ भालं
पातु महावीरो भ्रुवोर्मध्ये निरंतरम् ॥२२॥ नेत्रे छायापहारी च पातु नः प्लवगेश्वरः ॥ कपोलौ कर्णमूले च पातु श्रीरामकिंकरः ॥२३॥
नासाग्रमञ्जनीसूनुः पातु वक्त्रं हरीश्वरः ॥ वाचं रुद्रप्रियः पातु जिह्वां पिङ्गललोचनः ॥ २४ ॥ पातु दन्तान्फाल्गुनेष्टश्चिबुकं
दैत्यपादहा ॥ पातु कण्ठं च दैत्यारिःस्कन्धौ पातु सुरार्चितः ॥ २५ ॥ भुजौ पातु महातेजाः करौ तु चरणायुधः ॥ नखान्नखा
युधः पातु कुक्षिं पातु कपीश्वरः ॥२६॥ वक्षो मुद्रापहारी च पातु पार्श्वे भुजायुधः ॥ लङ्काविभञ्जनः पातु पृष्ठदेशे निरन्तरम् ॥२७॥
नाभिं च रामदूतस्तु कटिं पात्वनिलात्मजः ॥ गुह्यं पातु महाप्राज्ञो लिंगं पातु शिवप्रियः ॥ २८ ॥ ऊरू च जानुनी पातु लङ्का
प्रासादभञ्जनः ॥ जंघे पातु कपिश्रेष्ठो गुल्फौ पातु महाबलः ॥ २९ ॥ अचलोद्धारकः पातु पादौ भास्करसन्निभः ॥ अङ्गान्य
मितसत्त्वाढ्यः पातु पादांगुलीस्तथा ॥ ३० ॥ सर्वाङ्गानि महाशूरः पातु रोमाणि चात्मवान् ॥ हनुमत्कवचं यस्तु पठेद्विद्वान्

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

विचक्षणः ॥ स एव पुरुषश्रेष्ठो भुक्तिं मुक्तिं च विन्दति ॥ ३१ ॥ त्रिकालमेककालं वा पठेन्मासत्रयं सदा ॥ सर्वान् रिपून्क्षणा
ज्जित्वा स पुमान्न श्रियमाप्नुयात् ॥ ३२ ॥ मध्यरात्रे जले स्थित्वा सप्तवारं पठेद्यदि ॥ क्षयापस्मारकुष्ठादितापज्वरनिवारणम् ॥
॥३३॥ अश्वत्थमूलेऽर्कवारे स्थित्वा पठति यः पुमान् ॥ अचलां श्रियमाप्नोति संग्रामे विजयं तथा ॥ ३४ ॥ लिखित्वा पूजये
द्यस्तु सर्वत्र विजयी भवेत् ॥ यः करे धारयेन्नित्यं स पुमान्श्रियमाप्नुयात् ॥ ३५ ॥ विवादे द्यूतकाले च द्यूते राजकुले रणे ॥
दशवारं पठेद्रात्रौ मिताहारो जितेन्द्रियः ॥ ३६ ॥ विजयं लभते लोके मानुषेषु नराधिपः ॥ भूतप्रेतमहादुर्गे रणे सागरस
म्प्लवे ॥ ३७ ॥ सिंहव्याघ्रभये चोग्रे शरशस्त्रास्त्रपातने ॥ शृंखलाबन्धने चैव कारागृहनियंत्रणे ॥ ३८ ॥ कायस्तोभे वह्निचक्रे क्षेत्रे
घोरे सुदारुणे ॥ शोके महारणे चैव ब्रह्मग्रहविनाशनम् ॥ ३९ ॥ सर्वदा तु पठेन्नित्यं जयमाप्नोत्यसंशयम् ॥ भूर्जे वा वसने
रक्ते क्षौमे वा तालपत्रके ॥ ४० ॥ त्रिगन्धेनाथ मस्यैव विलिख्य धारयेन्नरः ॥ पञ्चसप्तत्रिलोहैर्वा गोपितं कवचं शुभम् ॥ ४१ ॥
गले कट्यां बाहुमूले कण्ठे शिरसि धारयेत् ॥ सर्वान्कामानवाप्नोति सत्यं श्रीरामभाषितम् ॥ ४२ ॥ " इति श्रीब्रह्माण्डपुराणे नार
दागस्त्यसंवादे श्रीरामप्रोक्तं हनुमत्कवचं सम्पूर्णम् ॥ अथ हनुमत्स्तोत्रम् ॥ "नमो हनुमते तुभ्यं नमो मारुतसूनवे ॥ नमःश्रीराम
भक्ताय श्यामलांगाय ते नमः ॥ १ ॥ नमो वानरवीराय सुग्रीवसख्यकारिणे ॥ सीताशोकविनाशाय राममुद्राधराय च ॥ २ ॥
रावणान्तकुलच्छेदकारिणे ते नमोनमः ॥ मेघनादमखध्वंसकारिणे ते नमोनमः ॥ ३ ॥ वायुपुत्राय वीराय आकाशोदरगामिने ॥
वनपालशिरश्छेदलङ्काप्रासादभंजिने ॥४॥ ज्वलत्कनकवर्णाय दीर्घलांगूलधारिणे ॥ सौमित्रिजयदात्रे च रामदूताय ते नमः ॥५॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अक्षयवधकर्त्रे च ब्रह्मपाशनिवारिणे ॥ लक्ष्मणांघ्रिमहाशक्तिघातक्षतविनाशिने ॥ ६ ॥ रक्षोघ्नाय रिपुघ्नाय भूतघ्नाय च ते नमः ॥ ऋक्षवानरवीरैकप्राणदाय नमोनमः ॥ ७ ॥ परसैन्यबलघ्नाय शस्त्रास्त्रघ्नाय ते नमः ॥ विषघ्नाय द्विषघ्नाय ज्वरघ्नाय च ते नमः ॥८ ॥ महाभयरिपुघ्नाय भक्तत्राणैककारिणे ॥ परप्रेरितमंत्राणां यंत्राणां स्तंभकारिणे ॥ ९ ॥ पयःपाषाणतरणकरणाय नमोनमः ॥ बालार्कमंडलत्राणकारिणे भवकारिणे ॥ १० ॥ नखायुधाय भीमाय दन्तायुधधराय च ॥ रिपुमायाविनाशाय रामाज्ञालोकरक्षिणे ॥११॥प्रतिग्रामस्थितायाथ रक्षोभूतवधार्थिने॥करान्तशैलशस्त्राय द्रुमशस्त्रायते नमः॥१२॥बालैकब्रह्मचर्य्याय रुद्रमूर्तिधराय च ॥ दक्षिणाशाभास्कराय शतचन्द्रोदयात्मने ॥ १३ ॥ कृतक्षतव्यथाघ्नाय सर्वक्लेशहराय च ॥ स्वाम्याज्ञाप्रार्थसंग्रामसंख्ये सञ्जयकारिणे ॥ १४ ॥ भक्तानां दिव्यवादेषु संग्रामे जयदायिने ॥ किं कृत्वा बुबुक्कोच्चारघोरशब्दकराय च ॥ १५ ॥ रावोग्रव्याधिसंस्तंभकारिणे वनधारिणे ॥ सदावनफलाहारे निरताय विशेषतः ॥ १६ ॥ महार्णवशिलाबंधे सेतुबंधाय ते नमः ॥ वादे विवादे संग्रामे भये घोरे च संस्तवेत् ॥ १७ ॥ सिंहतस्करव्याघ्रेषु पठंस्तत्र भयं नहि ॥ दिव्यभूतभये व्याघ्रे विषे स्थावरजंगमे ॥ १८ ॥ राजशस्त्रभये चोग्रे तथा ग्रहभयेषु च ॥ जले सर्पे महावृष्टौ दुर्भिक्षे प्राणसम्प्लवे ॥ १९ ॥ पठन्स्तोत्रं प्रमुच्येत भयेभ्यः सर्वतो नरः ॥ तस्य क्वापि भयं नास्ति हनुमत्स्तवपाठनात् ॥ २० ॥ सर्वदा वै त्रिकालं च पठनीयस्तवो ह्यसौ ॥ सर्वान्कामानवाप्नोति नात्र कार्या विचारणा ॥ २१ ॥ विभीषणकृतं स्तोत्रं तार्क्ष्येण समुदीरितम् ॥ ये पठिष्यंति भक्त्या च सिद्ध्यस्तत्करे स्थिताः ॥ २२ ॥" इति श्रीसुदर्शनसंहितोक्तं विभीषणप्रोक्तं श्रीहनुमत्स्तोत्रं सम्पूर्णम् ॥

॥ अथ विष्णोः प्रसं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

गाद्वेदादिपारायणविधानम् ॥ तत्रादौ वेदपारायणे कलशस्थापनप्रकारः (महार्णवे) " तीर्थे देवालये गेहे प्रशस्ते सुपरिस्कृते ॥ कलशं सुदृढं तत्र सुनिर्णिक्तं विभूषितम् ॥ १ ॥ पुष्पपल्लवमालाभिश्चंदनैः कुंकुमादिभिः ॥ मृत्तिकायवसंमिश्रा वेदीमध्ये न्यसेत्ततः ॥ २ ॥ पंचाशद्भिः कुशैः कार्यो ब्रह्मा पश्चान्मुखस्थितः ॥ स्नापितः स्थापितः कुंभे चतुर्बाहुश्चतुर्मुखः ॥ ३ ॥ वत्सजान्वाकृतिं देवमुत्तराग्रैः कुशैः कृतम् ॥ ब्रह्मोपधाने दत्त्वा तं ततः स्वस्त्ययनं पठेत् ॥ ४ ॥ प्रतिष्ठां कारयेत्पश्चात्पूजाद्रव्यमथोच्यते ॥ यज्ञोपवीतनैवेद्यवस्त्रचंदनकुंकुमैः ॥ ५ ॥ सधूपदीपतांबूलैरक्षतैश्च पितामहम् ॥ ब्रह्मयज्ञानमिति वा गायत्र्या वा प्रपूजयेत् ॥६॥ उपाध्यायं च संपूज्य यथापाठं पठेत्ततः ॥ इति कलशप्रतिष्ठापनम् ॥ अथानश्नत्पारायणविधानम् ॥ (महार्णवे) अथातोनश्नत्पारायणविधिं व्याख्यास्यामः। आसमाप्तेर्नाश्नीयात् यथाशक्ति वा पयः फलान्योदनं वा हविष्यमात्रमल्पं भुक्त्वा तदाशेषमधीयीत । ग्रामात्प्राचीमुदीचीं वा दिशमुपनिष्क्रम्याग्निमुपसमाधाय परिस्तीर्यैधमप्रदायाज्येनैताभ्यो देवताभ्यो जुहोति । अग्नये । सोमायेंद्राय । प्रजापतये । बृहस्पतये । विश्वेभ्यो देवेभ्यो ब्रह्मणे ऋषिभ्यः ऋग्भ्यो यजुर्भ्यः सामभ्यः श्रद्धायै मेधायै प्रज्ञायै सदसस्पतये अनुमतये द्रव्यै सावित्र्यै सवित्रे प्रजापतये कांडऋषये विश्वेभ्यो देवेभ्यः कांडऋषिभ्यः सांहिकीभ्यो देवताभ्य उपनिषद्भ्यो याज्ञिकेभ्यो देवताभ्यः उपनिषद्भ्यो वारुणीभ्यो देवताभ्यः उपनिषद्भ्यो हव्यवाहाय विश्वेभ्यो वरुणेभ्यः । अनुमत्यै स्विष्टकृते च पृथक् स्वाहाकारेण हुत्वा व्याहृतिभिश्च पुनः परिषिंचति समाप्ते चैताः । यजुषा तर्पयति । एवं ऋग्वेदिनां कांड ऋष्यादिवर्जमास्विष्टकृतस्तेषां स्थाने शतर्चिभ्यो माध्यमेभ्यो गृत्समदाय विश्वामित्राय वामदेवाय अत्रये भरद्वाजाय जामदग्न्याय

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

गौतमाय वसिष्ठाय प्रगाथेभ्यः पावमानीभ्यः क्षुद्रसूक्तेभ्यो महासूक्तेभ्यो महानाम्नीभ्य इति ॥ ततो वेदादिमारभ्य सततमधीयीत नास्यांतरानध्यायो नास्यांतरा जननमरणे अशुचीन्नान्तरा व्याहरेन्नान्तरा विरमेत् । यावदन्तमधीयीत यद्यन्तरा विरमेत् त्रीन् प्राणायामानायम्य प्रणवं वा प्रणिधाय यावत्कालमधीयीत । ततः सर्वं निशो निशांतरं संग्रामारण्यसलिलं प्रलोप्य परिदध्यात् । आदावन्ते च ब्राह्मणभोजनं दक्षिणादानं च कुर्यात् य एतेन विधिना वेदमधीयीत स ततःपूतो वेदो भवति मनःशुद्धिश्च भवति । द्वाभ्यां पारायणाभ्यां ऋग्मिश्राभोजन इहाधीते अनृतेभ्यः प्रमुच्यते त्रिभिर्बहुभ्यः पतनीयपातकेभ्यः शूद्रायां रेतः सिक्त्वा गंगासु मज्जंश्च भवति। चतुर्भ्यः शूद्रान्नभोजनात्तत्सेवनात्तत्स्त्रीसेवनाच्च पंचाभिरयाज्ययाजनात्पूतोभवति । अग्राह्यग्रहणाद्ब्राह्म्याग्रहणादभ्या सोपासनाच्च षड्भिर्ब्राह्मणस्य लोहितकरणात् स्त्रीलोहितकरणात् पशुहननात्सुवर्णस्तेयात्पतितसंप्रयोगाच्च सप्तभिः प्राजापत्यानां ही नाचरणात् यज्ञोपवीतवेधनाच्च अष्टभिश्चांद्रायणस्यान्तरानाचरणात् गुरुतल्पगमनाद्गुरुस्वलागमनाच्च नवभिःसुरापानाच्च दशाभिरश्रो त्रियायाजनात् । असोमपानात् अन्यायतश्च एकादशभिर्ब्राह्मणहननाद्भ्रूणहननाद्वा दशाभिः पूर्वजन्मेहजन्मकृतैः सर्वैः पापैः प्रमुच्य ते स्वर्गं लोकं गच्छति पितॄन् स्वर्गलोकं गमयति । अग्निष्टोमादीन् क्रतून् यजति तैः क्रतुभिरिष्टं भवति । वेदाध्यायी सदैवस्याद्यथा वै सत्यवाक्शुचिः । यंयं कामयते कामं तंतं वेदेन साधयेत् । असाध्यं नास्ति यत्किंचिद्ब्रह्मणो हि फलं महत् । ब्रह्मणो हि फलं महदिति स मात्तौ यजुषा तर्पयतीति॥समस्तवेदपारायणे समाप्ते एतादेवताः पूर्वोक्ता अग्निसोमाद्यायजुषा तर्पयति यजुर्वेदेन सह तर्पयति इति । न यजुर्वेदपारायणे तस्य वेदस्य प्राधान्यमुच्यते । अथवा भूरादिव्याहृतिचतुष्टयात्मकं यजुःशब्देन गृह्यते । तेनैव तदुक्तं भवति । भूर्दै

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वांस्तर्पयामीत्यनेन प्रकारेण तर्पयित्वा अग्निसोमादींस्तर्पयेदिति।नास्त्यांतरा जननमरणे अशुची।इत्यनश्रत्पारायणविधानं समाप्तम्॥

॥ अथ पुराणादिपारायणविधानम् पाद्मे ॥ (पातालखंडे)"शुक्लपक्षे दिने शुद्धे वारनक्षत्रयोगतः॥ करणेचापिलग्ने च ग्रहताराबलान्विते ॥ १ ॥ अमूढे न ग्रहे बाले न च वृद्धौ गुरौ स्थिते । न कृष्णपक्षे ग्रहणे न च नास्तिकसन्निधौ ॥२ ॥ शुद्धगेहेऽथ वा शुद्धवेदिकायां मठेथ वा ॥ नदीतीरे देवगेहे सभामंडप एव च ॥ ३ ॥ रथ्यामठेथवा रम्ये पुण्यशालासु राघव ॥ पूर्वोक्तलक्षणोपेतं पुराणं शृणुयादिति ॥ ४ ॥ स्वयं नमस्य विप्रेंद्रान्पुराणज्ञं विशेषतः ॥ आसनं कल्पितं कुर्यादूर्ध्वं सर्वविशेषितम् ॥ ५ ॥ एहि धर्म्मासनमिति वक्तव्यं स्यादनिष्ठुरम् ॥ पुराणप्रक्रमदिने यत्कार्यं तदुदीरयेत ॥ ६ ॥ व्याख्यातारं पुराणस्य वस्त्राद्यैः परिपूजयेत् ॥ शुभानि दत्त्वा वस्त्राणि सूक्ष्माणि च नवानि च ॥ ७ ॥ करकंठविभूषादि पात्रमासनमेव च ॥ गंधपुष्पाक्षतैः पूज्य तांबूलं विनिवेद्य च ॥ शुक्लांबरधरं विष्णुं शशिवर्णं चतुर्भुजम् ॥ प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशांतये ॥ ९ ॥ सभासदश्च संपूज्य गणेशं पूजयेत्ततः ॥ ॐ नमेत्यादिमंत्रेण पूजनं भारतीनुतिः ॥ १० ॥ प्रातःकाले पुराणस्य प्रक्रमं प्रारभेदिति ॥ उपक्रमदिने राम त्रिपंच दश वा पुनः ॥ ११ ॥ श्लोका द्वियीये दिवसे ततो द्विगुणिताः शुभाः ॥ तृतीये दिवसे राम ततश्चाधिकमिष्यते ॥ १२ ॥ दिनानामव्यवच्छेदाद्व्याख्यानं श्रवणं तथा ॥ व्यवस्थितिर्यदा जाता तदा पौराणिकं गुरुम् ॥ १३ ॥ तांबूलादि प्रदायाथ परेद्युः शृणुयादपि ॥ पुराणमेवं श्रोतव्यं दैनंदिनमिति श्रुतिः ॥ १४ ॥ व्रतरूपेण यः कश्चित्पुराणं शृणुयान्नरः ॥ यदैवं तत्पुराणं तु तत्र याति न संशयः ॥ १५ ॥ पुराणं श्रोतुकामेन श्लोकश्चैकोपि चेच्छ्रुतः ॥ तादिने तु कृतं पापं नाशयेत्तु न संशयः ॥ १६ ॥ एवं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पुराणं शृणुयाच्च यस्तु स ब्रह्महत्याकृतपापबंधात् ॥ सुरापीतिः स्वर्णहरश्च राम गुर्वंगनागश्च विमुक्तिमेति ॥१७॥भारतश्रवणे चापि
नियमा ये मयेरिताः ॥ आदिपर्वसमाप्तौ च सूक्ष्मवस्त्रत्रयं ददेत् ॥ १८ ॥ सुवर्णं च यथाशक्ति सभापर्वणि वाससी ॥ अनुशास
निकारण्यस्वर्गारोहेषु पर्वसु ॥ १९ ॥ आदिपर्वाणि पूजा या सा पूजा नृपपुंगव ॥ कर्णाश्वमेधवैराटशल्यद्रोणेषु पर्वसु ॥ २० ॥
सूक्ष्मवस्त्रत्रयं शुद्धं निष्कद्वयमथापि वा ॥ क्षुद्रपर्वस्वथान्येषु निष्कावथ समानयेत् ॥ २१ ॥ हरिवंशे सनिष्कं तु वस्त्रत्रितयमेव
च ॥ भारतस्याखिलस्यैव समाप्तौ क्षेत्रदो भवेत् ॥ २२ ॥ रामायणस्य श्रवणे कांडेकांडे प्रपूजयेत् ॥ क्षेत्रं पर्याप्तमथवा सुवर्णमपि
दापयेत् ॥ २३ ॥ अन्यान्यपि पुराणानि मुनिप्रोक्तानि तान्यपि ॥ श्रोतॄणां पापनाशाय वक्तुश्चापि विशेषतः ॥ २४ ॥ यश्च
सर्वपुराणानि षट्त्रिंशत्तु प्रकीर्त्तयेत् ॥ शृणोति वा न तस्यास्ति चित्तच्छेदः कदाचन ॥ २५ ॥ इति सामान्यतः सर्वपुराणेतिहा
सानां श्रवणविधानम् ॥ अथ श्रीमद्भागवतपारायणविधानम् (पाद्मे) "श्रीपार्वत्युवाच ॥ स्कंधैर्द्वादशभिः प्रोक्तं श्रीमद्भागवतं
प्रभो ॥ शुकस्तच्छ्रावयामास महाराजं परीक्षितम् ॥ १ ॥ सप्ताहेनेति भगवञ्छ्रूयते तत्रतत्र ह ॥ तस्यानुक्रममिच्छामि श्रोतुं
तत्फलमेव च ॥ २ ॥ सदाशिव उवाच ॥ साधु पृष्टं महाभागे लोके यत्प्रचरिष्यति ॥ पारायणमिति ख्यातं सद्यो मुक्तिप्रदं
नृणाम् ॥ ३ ॥ शुकस्योक्तिक्रमेणैव पठेद्भागवतं तु यः ॥ श्रावयेच्छृणुयाद्वापि तस्यानंतं फलं भवेत् ॥ ४ ॥ कृतनित्यक्रियः प्रातः
कुशहस्तः कृतासनः ॥ देवद्विजगुरून्नत्वा ध्यात्वा विष्णुं सनातनम् ॥ ५ ॥ द्वैपायनं नमस्कृत्य शुकदेवं च भक्तितः ॥ हिरण्याक्ष
वधं यावत्प्रथमेऽहनि कीर्त्तयेत् ॥ ६ ॥ चरितं भरतस्यापि द्वितीयेऽथ तृतीयके ॥ मथनं चामृतस्यापि यत्र कूर्मः स्वयं हरिः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

॥ ७ ॥ चतुर्थदिवसे चैव दशमे हरिजन्मच ॥ पंचमे तु पठेद्विद्वान् रुक्मिण्याहरणावधि ॥ ८ ॥ षष्ठे चोद्धवसंवादं सप्तमे तु समापयेत् ॥ अध्यायं प्राप्य विरमेन्न तु मध्ये कदाचन ॥ ९ ॥ कृते विरामे मध्ये तु अध्यायादिं पठेत्पुनः ॥ पठेदर्थं बुध्यमानः श्रावयेद्वैष्णवोत्तमे ॥ १० ॥ श्रोता तु प्राङ्मुखो भूत्वा शृणुयाद्भक्तितत्परः ॥ अध्याये स्वर्णमाषैकं तथा दद्याच्च दक्षिणाम् ॥ ११ ॥ समाप्तौ च ततो धेनुं स्वर्णशृंगीं निवेदयेत् ॥ कुर्य्याच्च वैष्णवं होमं सात्वतान्भोजयेत्ततः ॥ १२ ॥ एवं यः कुरुते देवि पाठं भागवतस्य तु॥श्रवणं श्रावणं वापि इष्टां गतिमवाप्नुयात् ॥ १३ ॥ एतत्पारायणं नाम सर्व्वकामफलप्रदम् ॥ पाठकाले च त्रिदशा मुनयश्च तपोधनाः ॥ १४ ॥ पार्श्वदाश्च तथा विष्णोः सान्निध्यं तत्र कुर्व्वते ॥ एतत्ते कथितं देवि पारायणविधानकम् ॥ १५ ॥ विष्णुप्रीतिकरं पुण्यं किं भूयः श्रोतुमिच्छसि ॥ इति श्रीमद्भागवतपारायणविधानम् ॥ अथ श्रीमद्भागवतसप्ताहविधानं सप्रयोगं (पाद्मे उत्तरखंडे) " अथ ते संप्रवक्ष्यामः सप्ताहश्रवणे विधिम् ॥ येन भागवतं सिद्धचेत्पुंसां कृष्णार्पितात्मनाम् ॥ १ ॥ दैवज्ञं शास्त्रकुशलं समाहूय धनांशुकैः ॥ समभ्यर्च्य मुहूर्त्तं तु प्राक्पृच्छेद्भक्तिमान्नरः ॥ २ ॥ स वदेद्यं मुहूर्त्तं तु तत्रारंभः प्रशस्यते ॥ नभोनभस्येषोर्जाश्च सहः शुचिसमन्विताः ॥ ३ ॥ मासा श्रेष्ठाः कथारंभे पूर्णा चापि तिथिः शुभा ॥ भौमार्किवर्जिता वाराभानि ध्रुवमृदूनि च ॥ ४ ॥ शुभे योगे शुभे लग्ने प्रारंभः शस्यते सदा ॥ तीर्थे वापि वने वापि ग्रामे वापि गृहेपि वा ॥ ५ ॥ संशोधितायां भूम्यां तु मंडपं परिकल्पयेत् ॥ कदलीस्तंभसंयुक्तं चतुर्दिक्षु ध्वजान्वितम् ॥ ६ ॥ उच्चमासनमप्युक्तं वक्तुस्तस्याग्रतो मुने ॥ अपार्श्वद्वयमुक्तानि श्रोतृणामासनानि च ॥ ७ ॥ उदङ्मुखो भवेद्वक्ता श्रोता वै प्राङ्मुखस्तदा ॥ प्राङ्मुखो वा भवेद्वक्ता

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

श्रोता चोदङ्मुखस्तदा ॥ ८ ॥ वेदशास्त्रार्थतत्त्वज्ञो वैष्णवो ब्राह्मणोत्तमः ॥ दृष्टांतकुशलो धीरो वक्ता कार्योतिनिस्पृहः ॥ ९ ॥
कथाविघ्नविघातार्थं गणेशं प्राक्प्रपूजयेत् ॥ ततो दुर्गां हरं विष्णुं ब्रह्माणं भास्करं द्विजान् ॥ १० ॥ संपूज्य विधिवद्भक्त्या
तर्पयेद्देवताः पितॄन् ॥ मुख्यः श्रोता ततः पश्चात्पूजयेत्पुस्तके हरिम् ॥ ११ ॥ ततः प्रदक्षिणीकृत्य द्रव्यवस्त्रफलानि च ॥ धृत्वां
जलौ पुस्तकस्थं हरिं संप्रार्थयेन्मुने ॥ १२ ॥" ॥ अथ प्रयोगः ॥ पूर्वदिने चांद्रायणधेनुदानादिद्वारा पूर्ववत्प्रायश्चित्तं संपाद्य
प्रारंभदिने प्रातर्नित्यकर्म कृत्वा । चंद्रतारादिबलान्विते पूर्वोक्ते सुमूहुर्ते गोमयादिना संशोधिते कथास्थाने स्वासने प्राङ्
मुख उपविश्य । पूर्वोक्तलक्षणयुक्तं पंडितं च शुद्धासने उदङ्मुखमुपवेश्य । आचम्य प्राणनायम्य । शांतिपाठे पठिते
देशकालौ संकीर्त्य । मम इह जन्मनि जन्मांतरे वा कृतसमस्तपापक्षयपूर्वकधर्मार्थकाममोक्षसिद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थं
ब्राह्मणद्वारा श्रीमद्भागवतसप्ताहयज्ञं करिष्ये ॥ तदंगत्वेन निर्विघ्नतासिद्धयर्थं गणपतिपूजनं पुण्याहवाचनं मातृकापूजनं
नांदीश्राद्धं च करिष्ये । इति संकल्प्य गणपतिपूजनादिनांदीश्राद्धांतं पूर्वोक्तपद्धतिकांडवत्सर्वं संपादयेत् । ततो वरणद्र
व्याणि गृहीत्वा । देशकालौ संकीर्त्य । मम सर्वविधपापक्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थं जन्मजन्मांतरे श्रीभगवद्भक्तिप्राप्त्यर्थं
च श्रीमद्भागवतसप्ताहकथाश्रवणार्थममुकगोत्रममुकवेदशाखाध्यायिनं ब्राह्मणं श्रावयितारमेभिर्द्रव्यैस्त्वामहं वृणे । ॐ वृतोस्मीति
प्रतिवचनानंतरं वस्त्रालंकारैः संपूज्य प्रार्थयेत् ॥ शुकरूप द्विजश्रेष्ठ सर्वशास्त्रविशारद ॥ श्रीभागवतव्याख्यानादज्ञानं मे विनाशय
॥ १ ॥ इति संप्रार्थ्य वक्तारं वरयेत्पंच वाडवान् ॥ द्वादशाक्षरमंत्रस्य जपार्थं मुनिसत्तम ॥ २ ॥ ततो देशकालौ संकीर्त्य मम

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सर्वविधपातकनिवृत्तिद्वारा श्रीपरमेश्वरप्रीत्यथ करिष्यमाणश्रीमद्भागवतसप्ताहयज्ञकर्मणः साङ्गतासिद्धये अमुकगोत्रममुकशर्माणं ब्राह्मणमेभिर्द्रव्यैर्विष्णोर्द्वादशाक्षारमंत्रजपकरणार्थं त्वामहं वृणे । इति वृत्वा वरणद्रव्यैः संपूज्य प्रार्थयेत् ॥ एवमेव गायत्रीजपार्थं विष्णुसहस्रनामजपार्थं च वृणुयात् ॥ ततः सर्वतोभद्रमंडले विष्णुप्रतिमां संस्थाप्य पुरुषसूक्तेन द्वादक्षाक्षरमंत्रेण वा षोडशोपचारैः संपूज्य प्रदक्षिणाचतुष्टयं कृत्वा साष्टांगं प्रणम्य प्रार्थयेत् । संसारसागरे मग्नं दीनं मां करुणानिधे ॥ कर्म्मग्राहगृहीताङ्गं मामुद्धर भवार्णवात् ॥ ततः श्रीमद्भागवतपूजां षोडशोपचारैः कृत्वा वस्त्राभरणपुष्पमालाफलनैवेद्यादि निवेद्य । प्रदक्षिणां कृत्वा प्रार्थयेत् । श्रीमद्भागवताख्यस्त्वं प्रत्यक्षः कृष्ण एव हि ॥ स्वीकृतोऽसि मया नाथ मुक्त्यर्थं भवसागरे ॥ १ ॥ मनोरथो मदीयोयं सफलः सर्वथा त्वया ॥ निर्विघ्नेनैव कर्त्तव्यो दासोहं तव केशव ॥ २ ॥ एवं दीनं वचः प्रोक्ता वक्तारं चापि पूजयेत् ॥ संभूष्य वस्त्रभूषाभिः पूजान्ते तं च संस्तवेत् ॥३॥ ब्राह्मणान्वैष्णवाश्चान्यांस्तथा कीर्त्तनकारिणः ॥ नत्वा संपूज्य दत्त्वार्घ्यं स्वयमासनमाविशेत्॥४॥ लोकचिंताधनागारपुत्रचिंताच्युतश्च यः ॥ कथाचिंताशुद्धमतिः स लभेत्फलमुत्तमम् ॥ ५ ॥ आसूर्योदयमारभ्य सार्द्धं त्रिप्रहरांतकम् ॥ वाचनीया कथा सम्यग्धीरकंठं सुधीमता॥६॥ कथाविरामः कर्त्तव्यो माध्याह्ने घटिकाद्वयम् ॥ कथावसाने कर्त्तव्यं कीर्त्तनं केशवस्य च ॥ ७ ॥ उपवासः प्रकर्त्तव्यः श्रोतृभिस्तत्फलेप्सुभिः ॥ तदशक्तौ हविष्यान्नं सकृत्स्वल्पं समाहरेत् ॥ ८ ॥ जलेनापि फलेनापि दुग्धेन च घृतेन वा ॥ केवलेनैव कर्त्तव्यं निर्विघ्नं धारणं तनोः ॥ ९ ॥ ब्रह्मचर्यमधःसुप्तिः पत्रावल्यां च भोजनम् ॥ कथासमाप्तौ भुक्तिं च कुर्य्यान्नित्यं कथाव्रती ॥१०॥ कामं क्रोधं मदं लोभं दंभं मात्सर्यमेव च ॥ मोहं द्वेषं तथा हिंसां निंदां चापि

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

विवर्जयेत् ॥ ११ ॥ सत्यं शौचं दयां मौनमार्जवं विनयं तथा ॥ मनःप्रसन्नतां चापि बुधः कुर्यात्कथाव्रती ॥ १२ ॥ श्रीकाम स्तनयार्थी च जयकामश्च मोक्षधीः ॥ शृणुयाद्व भागवतं निष्कामः श्रीहरिं लभेत् ॥ १३ ॥ दरिद्रश्च क्षयी रोगी निर्भाग्यः पाप कर्म्मवान् ॥ अनपत्यो मोक्षकामः शृणुयात्स कथामिमाम् ॥ १४ ॥ अपुष्पा काकवंध्या च वंध्या या च मृतार्भका ॥ स्रवद्गर्भा च या नारी तया श्राव्या प्रयत्नतः ॥ १५ ॥ सप्तमे दिवसे कुर्याज्जागरं तत्समाप्तिके ॥ वक्तुश्च पूजा कर्त्तव्या गोभूस्वर्णां बरादिभिः ॥१६॥ प्रसादं तुलसीं मालां श्रोतृभ्यः प्रतिपादयेत् ॥ उत्सवश्च तथा कार्यो गीतवाद्यविशारदैः ॥ १७ ॥ जयशब्दो नमःशब्दः शंखशब्दश्च गीयताम् ॥ विप्रेभ्यो याचकेभ्यश्च वित्तमन्नं प्रदीयताम् ॥ १८ ॥ विरक्तश्चेद्भवेच्छ्रोता गीता वाच्या परेऽह नि ॥ गृहस्थश्चेत्तदा होमः कर्त्तव्यः कर्म्मशांतये ॥ १९ ॥ प्रतिश्लोकं च जुहुयाद्विधिना दशमस्य च ॥ पायसं मधुसर्पिश्च तिल तंडुलकान् यवान् ॥ २० ॥ शर्करां च प्रियालं च द्राक्षां बादामखर्जुरौ ॥ अंभोजानि च कर्पूरं चंदनागुरुणी पुरम् ॥ २१ ॥ लवंगं बिल्वपत्राणि सहस्रं च पृथक् हुनेत् ॥ अथ वा हवनं कुर्याद्गायत्र्या सुसमाहितः ॥२२॥ तन्मयंत्वात्पुराणस्य परमस्यास्य तत्त्वतः ॥ होमाशक्तौ बुधो हौम्यं दद्यात्तत्फलसिद्धये ॥ २३ ॥ नानाछिद्रनिरोधार्थं न्यूनताधिक्यताख्ययोः ॥ दोषयोः प्रशमार्थं तु पठेन्नामसहस्रकम् ॥ २४ ॥ द्वादशाष्टादशावापि श्रद्धयाह्यधिकांस्तथा ॥ पायसेनाशयेद्विप्रान् स्वर्णं धेनुश्च दक्षिणा ॥ २५ ॥ शक्तौ पलत्रयमितं स्वर्णसिंहं विधाय च ॥ तत्रास्य पुस्तकं स्थाप्य लिखितं ललिताक्षरम् ॥ २६ ॥ संपूज्यावाहनाद्यैस्तदुपचारैः सदक्षिणम्॥ वस्त्रभूषणगंधाद्यैः पूजिताय यतात्मने ॥ २७ ॥ आचार्य्याय सुधीर्दत्त्वा मुक्तः स्याद्भवबंधनैः ॥ एवं कृते विधाने च

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सर्व्वपापनिवारणे ॥ २८ ॥ फलदं स्यात्पुराणं तु श्रीमद्भावतं शुभम् ॥ धर्म्मार्थकाममोक्षाणां साधनं नात्र संशयः ॥ २९ ॥
इति ते कथितं सर्व्वं किं भूयःश्रोतुमिच्छासि ॥श्रीमद्भागवतेनैव भुक्तिर्मुक्तिः प्रकाशिता ॥३० ॥ इति पाद्मे उत्तरखंडे श्रीमद्भागवत
पारायणसप्ताहविधानं सप्रयोगं समाप्तम् ॥ ॥ अथ महाभारतश्रवणविधानम् ॥ (महाभारते) " अतः परं प्रवक्ष्यामि
यानि देयानि भारते ॥ वाच्यमाने तु विप्रेभ्यो राजन्पर्वणिपर्वणि॥१॥स्वस्तिवाच्य द्विजानादौ ततः कार्यं प्रवर्तिते ॥ समाप्ते पर्वणि
ततः स्वशक्त्या पूजयेद्विजान् ॥ २ ॥ आदौ तु वाचकं चैव वस्त्रगंधसमन्वितम् ॥ विधिवद्भोजयेद्राजन्मधुपायससुत्तमम् ॥ ३ ॥
ततो मूलफलप्रायं पायसं मधुसर्पिषा ॥ आस्तिकं भोजयेद्राजन्दद्याच्चैव गुडौदनम् ॥ ४ ॥ अपूपैश्चैव पूपैश्च मोदकैश्च समन्वि
तम् ॥ सभापर्वणि राजेंद्र हविष्यं भोजयेद्विजान् ॥ ५ ॥ आरण्यके मूलफलैस्तर्पयेत्तु द्विजोत्तमान् ॥ अरणीपर्व चासाद्य जल
कुंभान्प्रदापयेत् ॥ ६ ॥ तर्पणानि च मुख्यानि वन्यमूलफलानि च ॥ सर्वकामगुणोपेतं विप्रेभ्योऽन्नं प्रदापयेत् ॥ ७ ॥
विराटपर्वणि तथा वासांसि विविधानि च ॥ उद्योगे भरतश्रेष्ठ सर्वकामगुणान्वितम् ॥ ८ ॥ भोजनं भोजयेद्विप्रान् गंधमाल्यैरलंकृ
तान् ॥ भीष्मपर्वणि राजेंद्र दत्त्वा यानमनुत्तमम् ॥ ९ ॥ ततः सर्वगुणेपेतमन्नं दद्यात्सुसंस्कृतम् ॥ द्रोणपर्वणि विप्रेभ्यो भोजनं पर
मार्चितम् ॥ १० ॥ शराश्च देया राजेंद्र चापान्यासिवरास्तथा ॥ कर्णपर्वण्यपि तथा भोजनं सर्वकामिकम् ॥११॥ विप्रेभ्यः संस्कृ
तं सम्यग्दद्यात्संयतमानसः ॥ शल्यपर्वणि राजेंद्र मोदकैः सगुडौदनैः ॥१२॥ अपूपैस्तर्पणैश्चैव सर्वमन्नं प्रदापयेत् ॥ गदापर्वण्यपि
तथा मुद्गमिश्रं प्रदापयेत् ॥ १३ ॥ स्त्रीपर्वणि तथा रत्नैस्तर्पयेत्तु द्विजोत्तमान् ॥ घृतौदनं पुरस्ताच्च ऐषीके दापयेत्पुनः ॥ १४ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ततः सर्वगुणोपेतमन्नं दद्यात्सुसंस्कृतम् ॥ शांतिपर्वणि च तथा हविष्यं भोजयेद्विजान् ॥ १५ ॥ आश्विनेऽधिकमासाद्य भोजनं सर्व
कामिकम् ॥ तथाश्रमनिवासे तु हविष्यं भोजयेद्विजान् ॥ १६ ॥ मौसले सार्वगुणितं गंधमाल्यानुलेपनम् ॥ महाप्रस्थानिके तद्व
त्सर्वकामगुणान्वितम् ॥१७॥ स्वर्गपर्वण्यपि तथा हविष्यं भोजयेद्विजान् ॥ हरिवंशसमाप्तौ तु सहस्रं भोजयेद्विजान् ॥१८॥ गामे
कां निष्कसंयुक्तां ब्राह्मणाय निवेदयेत् ॥ तदर्धेनापि दातव्या दरिद्रेणापि पार्थिव ॥१९॥ प्रतिपर्वसमाप्तौ तु पुस्तकं वै विचक्षणः
सुवर्णेन च संयुक्तं वाचकाय निवेदयेत् ॥२०॥ हरिवंशे पर्वणि च पायसं तत्र भोजयेत् ॥ पारणेपारणे राजन्यथावद्भरतर्षभ॥२१॥
समाप्य सर्वाः प्रयतः संहिताः शास्त्रकोविदः ॥ शुभे देशे निवेश्याथ क्षौमवस्त्राभिसंवृताः ॥२२ ॥ अर्चयेत यथान्यायं गंधमाल्यैः
पृथक्पृथक् ॥ हिरण्यं च सुवर्णं च दक्षिणामथ दापयेत् ॥ २३ ॥ सर्वथा तोषयेद्भक्त्या वाचकं गुरुमात्मनः ॥ वाचके परितुष्टे तु
शुभा प्रीतिरनुत्तमा ॥ २४ ॥ ब्राह्मणेषु तु तुष्टेषु प्रसन्नाः सर्वदेवताः ॥ अष्टादशपुराणानां श्रवणाद्यत्फलं भवेत् ॥ २५ ॥ तत्फलं सम
वाप्नोति वैष्णवो नात्र संशयः ॥ स्त्रियश्च पुरुषाश्चैव वैष्णवं पदमाप्नुयुः ॥ २६ ॥ स्त्रीभिश्च पुत्रकामाभिः श्रोतव्यं वैष्णवं यशः ॥
दक्षिणा चात्र देया वै निष्कपंचसुवर्णकम् ॥ २७ ॥ वाचकाय यथाशक्त्या यथोक्तं फलमिच्छता ॥ स्वर्णशृंगीं च कपिलां सवत्सां
वस्त्रसंवृताम् ॥ २८ ॥ वाचकाय च दद्याद्धि आत्मनः श्रेय इच्छता ॥ अलंकारं प्रदद्याच्च पाण्योर्वै भरतर्षभ ॥ कर्णस्याभरणं दद्या
द्धनं चैव विशेषतः ॥ भूमिदानं समादद्याद्वाचकाय नराधिप ॥ ३० ॥ शृणोति श्रावयेद्वापि सततं चैव यो नरः ॥ सर्वपापविनि
र्मुक्तो वैष्णवं पदमाप्नुयात् ॥ ३१ ॥ पितॄनुद्धरते सर्वानेकादशसमुद्भवान् ॥ आत्मानं ससुतचैव स्त्रियं च भरतर्षभ ॥ ३२ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

दशांशश्चैव होमोपिकर्त्तव्योत्र नराधिप ॥ इदं मया तवाग्रे च प्रोक्तं सर्वेनरर्षभ ॥ ३३ ॥" इति महाभारतश्रवणविधानं समाप्तम् ॥
अथ श्रीवाल्मीकिमुनिकृतस्यादिकाव्यस्य श्रीमद्रामायणाख्यस्य नवाहपाठविधानम् ॥ (रामसेवाग्रंथे ।) माघकार्तिकवैशाखे चैत्रे
वान्यतमेपि च ॥ यथावकाशः श्रद्धा च तथैव शृणुयान्नरः ॥ १ ॥ (श्रीरामायणमाहात्म्येपि । चैत्रे माघे कार्तिके च सिते पक्षे
च वाचयेत् ॥ नवाहे सुमहापुण्यं श्रोतव्यं च प्रयत्नतः ॥ २ ॥ पंचम्या दिनमारभ्य रामायणकथामृतम् ॥ नवाहश्रवणेनैव सर्व
पापैः प्रमुच्यते ॥ ३ ॥ (रामसेवायाम्) तिथिः सैव महापुण्या स कालः सर्वपुण्यदः ॥ यस्मिन्रामयणकथाश्रवणे जायते
मतिः ॥ ४ ॥ पुण्यक्षेत्रे पुण्यतीर्थे तुलसीविष्णुसन्निधौ ॥ स्वगृहे वा पठेद्यस्तु स देवैः परिपूज्यते ॥ ५ ॥ पूर्वोत्तरमुखो वक्ता
श्रोतारस्तत्पुरःस्थिताः ॥ एकाग्रतरचित्तेन पठेद्वा शृणुयान्नरः ॥ ६ ॥ व्यासासनं समास्तीर्य तदग्रे पुस्तकासनम् ॥ वितानपल्लवो
पेतं कदलीस्तंभमण्डितम् ॥ ७ ॥ श्रोतृणामासनं स्थाप्यं विशालं तत्पुरः पुनः ॥ श्रोतृभिश्च तथा वक्तुर्व्यासाद्ग्रंथस्य चोच्चता
॥ ८ ॥ पुराणं पूजयेन्नित्यं नित्यं व्यासस्य पूजनम् ॥ मध्याह्ने घटिकायुग्मं विश्रामं कारयेत्तथा ॥ ९ ॥ कथान्ते भगवन्नामस्म
रणं संप्रकीर्तितम् ॥ समाप्तौ वस्त्रभूषाद्यैर्द्रव्यैर्व्यासस्य तोषणम् ॥ १० ॥ अथ नवदिनपर्यंतं कथाविश्रामस्थलकथनम् ॥ प्रथमे
तु अयोध्यायाः षट्सर्गांते शुभा स्थितिः ॥ तस्यैवाऽशीतिसर्गान्ते द्वितीये दिवसे स्थितिः ॥ १ ॥ तथा विंशतिसर्गान्ते चार
ण्यस्य तृतीयके ॥ दिने चतुर्थे षट्चत्वारिंशत्सर्गे कथास्थितिः ॥ २ ॥ किष्किंधाख्यस्य कांडस्य पाठविद्भिरुदाहृता ॥ सुसप्त
चत्वारिंशत्के सर्गान्ते सुंदरे स्थितिः ॥ ३ ॥ पंचमे दिवसे कुर्य्यादथ षष्ठे तथोच्यते ॥ युद्धकाण्डस्य पंचाशत्सर्गान्ते विमला

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

स्थितिः ॥ ४ ॥ एकोनशतसंख्याके सर्गान्ते सप्तमे दिने ॥ युद्धस्यैव तु काण्डस्य विश्रामः संप्रकीर्तितः ॥ ५ ॥ तथा चोत्तरकाण्डस्य षट्त्रिंशत्सर्गपूरणे ॥ अष्टमे दिवसे कृत्वा स्थितिश्च नवमे दिने ॥ ६ ॥ शेषं समाप्य युद्धस्य चान्त्यं सर्गं पुनः पठेत् ॥ रामराज्यकथा यस्मिन्सर्ववांछितदायिनी ॥ ७ ॥ एवं पाठक्रमः पूर्वैराचार्यैश्च विनिर्मितः ॥ यः करोति नरश्रेष्ठः शृणुयाद्वा समाहितः ॥ ८ ॥ धर्म्मार्थकाममोक्षाणां फलं त्वविकलं लभेत् ॥ कथान्ते मण्डपं कृत्वा सर्वतोभद्रसंयुतम् ॥ ९ ॥ सस्थंडिलं सकुंडं वा पताकाकदलीयुतम् ॥ पूजयेद्गणराजं च ब्राह्मणैः स्वस्ति वाचयेत् ॥ १० ॥ मातृकापूजनं नांदीश्राद्धं भूसुरवर्णनम् ॥ मण्डले सर्वतोभद्रे हैमं रामं प्रपूजयेत् ॥ ११ ॥ जानकीसहितं वस्त्रभूषास्रक्चंदनादिभिः ॥ पार्श्वे भरतशत्रुघ्नौ हनुमंतं पुरः स्थितम् ॥ १२ ॥ पृष्ठे विभीषणं भक्तं सुग्रीवं तु समर्चयेत् ॥ लक्ष्मणं पादपीठस्य सन्निधौ विधिनार्चयेत् ॥ १३ ॥ चतुःशतोत्तरं चैव द्विसहस्रं तिलैस्तदा ॥ हवनं मंत्रतः कुर्याद्वादशाक्षरविद्यया ॥ १४ ॥ अष्टाक्षरेण वा रामषडक्षरत आचरेत् ॥ तर्पणं तद्दशांशेन मार्ज्जनं तद्दशांशतः ॥ १५ ॥ ब्राह्मणान्वैष्णवांश्चैव सदन्नेन तु भोजयेत् ॥ एकपारायणस्यैषा संख्या होमे प्रकीर्तिता ॥ १६ ॥ पाठवृद्ध्या तु होमस्य संख्यावृद्धिः प्रजायते ॥ गोप्रदानादिकं सर्वं दानं शक्त्या प्रदापयेत् ॥ १७ ॥ व्यासाय पुस्तकं दद्याद्धेमसिंहासने स्थितम् ॥ सांगतासिद्धये तस्य स्वर्णमुद्रां समर्पयेत् ॥ १८ ॥ भयसीं दक्षिणां दत्त्वा दीनानाथान्न समर्चयेत् ॥ एवं कृते मनुष्याणां दुर्लभोपि मनोरथः ॥ १९ ॥ श्रीरामस्य प्रसादेन सुलभः स्यान्न संशयः ॥ प्रतिमां कलशोपेतां मण्डलेन समन्विताम् ॥२०॥ विसर्जयित्वाऽऽचार्याय दद्यात्कर्म्मांगसिद्धये ॥ कृतकृत्यं भावयित्वा चात्मानं तु हरिं स्मरेत् ॥२१॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

इति श्रीवाल्मीकिरामायणनवाहपारायणविधानम् ॥ अथ वाल्मीकिरामायणपुस्तकदानविधानम् ॥"तत्रादौ पंचोपचारैः पुस्तक पूजनम् ॥ ॐ सदा श्रवणमात्रेण पापिनां सद्गतिप्रदे ॥ शुभे रामकथे तुभ्यं गंधमद्य समर्प्पये ॥ १ ॥ इति गंधम् ॥ बालादिसप्त काण्डेन सर्वलोकसुखप्रद ॥ रामायण महोदार पुष्पं तेद्य समर्प्पये ॥ २ ॥ इति पुष्पाणि । पुष्पमालां च ॥ यस्यैकश्लोकपाठस्य फलं सर्वफलाधिकम् ॥ तस्मै रामायणायाद्य दशांगं धूपमर्प्पये ॥ ३ ॥ इति धूपम् ॥ यस्य लोके प्रणेतारो वाल्मीक्यादिमहर्षयः ॥ तस्मै रामचरित्राय घृतदीपं समर्प्पये ॥ ४ ॥ इति दीपम् ॥ श्रूयते ब्रह्मणो लोके शतकोटिप्रविस्तरम् ॥ रूपं रामायणस्यास्य तस्मै नैवेद्यमर्प्पये ॥ ५ ॥ इति नैवेद्यम् ॥ एवं पंचोपचारपूजां कर्पूरेण नीराजनं च कृत्वा प्रदक्षिणाचतुष्टयं पुष्पांजलिं च दत्त्वा साष्टांगं प्रणम्य प्रार्थनां कुर्य्यात् ॥ वाल्मीकिगिरिसंभूता रामसागरगामिनी ॥ पुनाति भुवनं पुण्या रामायणमहानदी ॥ १ ॥ श्लोकसारसमाकीर्णं सर्गकल्लोलसंकुलम् ॥ काण्डग्राहमहामीनं वंदे रामायणार्णवम् ॥ २ ॥ अस्मिन्कलिमलाकीर्णे काले सर्वशुभ प्रदम् ॥ मनुजानां गतिर्नास्ति श्रीमद्रामकथां विना ॥ ३ ॥ वाल्मीकेर्मुनिसिंहस्य कवितावनचारिणः ॥ शृण्वन्राम कथानादं को न याति परां गतिम् ॥ ४ ॥ इति संप्रार्थ्य देवब्राह्मणं संपूज्य । पुस्तकस्य संकल्पं कृत्वा ब्राह्मणाय दद्यात् । ततो दानप्रतिष्ठासिद्धये सुवर्णदक्षिणां दत्त्वा प्रणिपत्य विसर्जयेत् ॥" इति पुस्तकदानम् ॥ ॥ अथ वाल्मीकिरामायणन्यासादिविधानम् ॥ पुत्रकामो बालकांडं पठेत् ॥ १ ॥ लक्ष्मीकामोऽयोध्याकांडम् ॥ २ ॥ नष्टराज्यप्राप्ति कामः किष्किन्धाकाण्डम् ॥३॥ सर्वकामः सुंदरकाण्डम् ॥४॥ शत्रुनाशकामः सर्वकामश्च लंकाकाण्डं च पठेत् । तत्र प्रयोगः ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ॐ अस्य श्रीवाल्मीकिरामायणमहामंत्रस्य वाल्मीकिभगवान् ऋषिः।प्रायेण अनुष्टुप् छंदः। श्रीरामः परमात्मा देवता। अभयं सर्व भूतेभ्य इति बीजम्। अङ्गुल्यग्रेण तान् हन्यामिति शक्तिः। एतदस्त्रबलं दिव्यमिति कीलकम्। भगवान्नारायणो देव इति तत्त्वम् धर्मात्मा सत्यसंधश्चेत्यस्त्रं पाठे विनियोगः। ॐ श्रीं रां आपदामपहर्तारमित्यंगुष्ठाभ्यां नमः ॥ १ ॥ ॐ ह्रीं रीं दातारं तर्जनीभ्यां नमः ॥ २ ॥ ॐ रों रूं सर्वसंपदामिति मध्यमाभ्यां नमः ॥ ३ ॥ ॐ श्रीं रैं लोकाभिराममित्यनामिकाभ्यां नमः ॥ ४ ॥ ॐ श्रीं रौं श्रीराममिति कनिष्ठिकाभ्यां नमः ॥ ५ ॥ ॐ रौं रः भूयोभूयो नमाम्यहमिति करतलकरपृष्ठाभ्यां नमः ॥ ६ ॥ इति कर न्यासः ॥ एवमेव हृदयादि पंचांगन्यासं कृत्वा। ॐ अहं सखा ते काकुत्स्थ इत्यस्त्राय फट् ॥ ६ ॥ इति षडंगं कृत्वा। ॐ ब्रह्मा स्वयंभूर्भगवानिति दिग्बंधं कुर्य्यात्। अथ ध्यानम् ॥"वामे भूमिसुता पुरस्तु हनुमान्पश्चात्सुमित्रासुतः शत्रुघ्नो भरतश्च पार्श्वदल योर्वाय्वादिकोणेषु च॥सुग्रीवश्च विभीषणश्च युवराट् तारासुतो जाम्बवान्मध्ये नीलसरोजकोमलरुचिं रामं भजे श्यामलम् ॥१॥" इति ध्यात्वा मानसोपाचारैः संपूज्य पठेत्॥ ॐ आपदामपहर्तारं दातारं सर्वसंपदाम् ॥ लोकाभिरामं श्रीरामं भूयोभूयो नमाम्यहम् ॥१ ॥ इति मंत्रेण सम्पुटितरामायणपाठात्सकलकार्य्यसिद्धिः ॥ अथ बालकांडस्य ऋषिन्यासादिप्रयोगः। ॐ अस्य श्रीबालकां डमहामंत्रस्य भगवान् ऋष्यशृंगऋषिः। अनुष्टुप्छंदः।दाशरथिः परमात्मा देवता। रां बीजम् ॥ नमः शक्तिः। रामायेति कीलकम् श्रीरामप्रीत्यर्थे बालकांडे जपे विनियोगः ॥ ॐ ऋष्यशृंगऋषये नमः शिरसि ॥ १ ॥ ॐ अनुष्टुप्छंदसे नमः मुखे ॥ २ ॥ ॐ दाशरथिपरमात्मदेवतायै नमः हृदये ॥ ३ ॥ ॐ रां बीजाय नमः गुह्ये ॥ ४ ॥ ॐ नमः शक्तये नमः पादयोः ॥ ५ ॥ ॐ

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

रामाय कीलकाय नमः सर्वाङ्गे ॥ ६॥ इति ऋष्यादिन्यासः ॥ ॐ सुप्रसन्नाय अंगुष्ठाभ्यां नमः ॥ १ ॥ ॐ शांतमनसे तर्जनीभ्यां नमः ॥ २ ॥ ॐ सत्यसंधाय मध्यमाभ्यां नमः ॥ ३ ॥ ॐ जितेंद्रियाय अनामिकाभ्यां नमः ॥ ४ ॥ ॐ धर्म्मिष्ठाय कनिष्ठिकाभ्यां नमः ॥ ५ ॥ ॐ राजदाशरथये जयिने करतलकरपृष्ठाभ्यां नमः ॥ ६ ॥ इति करन्यासः । एवमेव हृदयादिषडंगन्यासं कृत्वा ध्यायेत्॥ ध्यानम् ॥ श्रीराममाश्रितजनामरभूरुहेशमानंदशुद्धमखिलामरवंदितांघ्रिम् ॥ सीतांगनासुमिलितं सततं सुमित्रापुत्रान्वितं धृतधनुःशरमादिदेवम्॥१॥इति ध्यात्वा मानसोपचारैः संपूज्य पुत्रकामनया । 'ॐ रां रामाय नमः' इति मंत्रेण संपुटितं बालकांडं पठेत् । ॐ सुप्रसन्नः शांतमनाः सत्यसंधो जितेंद्रियः ॥ धर्मज्ञो नयसारज्ञः राजा दाशार्थिर्जयी॥१॥ इति मंत्रेण वा संपुटं दद्यात् । हनुमत्पूजापूर्वकं पारायणं कृत्वा कांडांते पूर्वोक्तं न्यासं कुर्यात्॥इति बालकांडपारायणम् ॥ ॐ अस्य श्रीअयोध्याकांडमहामंत्रस्य भगवान् वसिष्ठ ऋषिः । अनुष्टुप् छंदः । भरतो दाशरथिपरमात्मा देवता । भं बीजम् । नमः शक्तिः । भरतायेति कीलकम् । मम भरतप्रसादसिद्ध्यर्थे अयोध्याकांडजपे विनियोगः । ॐ वसिष्ठऋषये नमः शिरसि ॥ १ ॥ ॐ अनुष्टुप्छंदसे नमः मुखे ॥ २ ॥ ॐ दाशरथिभरतपरमात्मदेवतायै नमः हृदये ॥३॥ ॐ भंबीजाय नमः गुह्ये ॥४॥ ॐ नमः शक्तये नमः पादयोः ॥५॥ ॐ भरताय कीलकाय नमः सर्वाङ्गे ॥ ६ ॥ इति ऋष्यादिन्यासः ॥ ॐ भरताय नमस्तस्मै अंगुष्ठाभ्यां नमः ॥ १ ॥ ॐ रसज्ञाय तर्जनीभ्यां नमः ॥ २ ॥ ॐ महात्मने मध्यमाभ्यां नमः ॥ ३ ॥ ॐ तापसाय अनामिकाभ्यां नमः ॥ ४ ॥ ॐ अतिशांताय कनिष्ठिकाभ्यां नमः ॥ ५ ॥ ॐ शत्रुघ्नसहिताय करतलकरपृष्ठाभ्यां नमः ॥ ६ ॥ इति करन्यासः । एवमेव हृदया

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

दिषडंगन्यासं कृत्वा ध्यायेत् ॥ ध्यानम् ॥ श्रीरामपादद्वयपादुकांतस्संसक्तचित्तं कमलायताक्षम् ॥ श्यामं प्रसन्नवदनं कमलावदाभं शत्रुघ्नयुक्तमनिशं भरतं नमामि ॥ १ ॥ इति ध्यात्वा मानसोपचारैः संपूज्य । ॐ भं भरताय नमः ॥ भरताय नमस्तस्मै सार ज्ञाय महात्मने ॥ तापसायातिशांताय शत्रुघ्नसहिताय च ॥ १ ॥ इति मंत्रेण संपुटितमयोध्याकाण्डं लक्ष्मीकामनया पठेत् ॥ तत उत्तरन्यासं पूर्ववत्कृत्वा पारायणं समापयेत् । इत्ययोध्याकाण्डपारायणम् ॥ २ ॥ ॐ अस्य श्रीकिष्किंधाकांडमहामंत्रस्य भगवान् ऋषिः । अनुष्टुप् छंदः । सुग्रीवो देवता सुं बीजम् । नमः । शक्तिः । सुग्रीवेति कीलकम् । मम सुग्रीवप्रसादसिद्ध्यर्थं किष्किंधाकांडपारायणे जपे विनियोगः । ॐ भगवद्दषये नमः शिरसि ॥ १ ॥ ॐ अनुष्टुप्छंदसे नमः मुखे ॥ २ ॥ ॐ सुग्री वदेवतायै नमः हृदये ॥ ३ ॥ ॐ सुंबीजाय नमः गुह्ये ॥ ४ ॥ ॐ नमः शक्तये नमः पादयोः ॥ ५ ॥ ॐ सुग्रीवेति कीलकाय नमः सर्वांगे ॥ ६ ॥ इति ऋष्यादिन्यासः । ॐ सुग्रीवाय अंगुष्ठाभ्यां नमः ॥ १ ॥ ॐ सूर्यतनयाय तर्जनीभ्यां नमः ॥ २ ॥ ॐ सर्ववानरपुंगवाय मध्यमाभ्यां नमः ॥ ३ ॥ ॐ बलवते अनामिकाभ्यां नमः ॥ ४ ॥ ॐ राघवसखाकनिष्ठिकाभ्यां नमः ॥ ५ ॥ वशी रायं प्रयच्छतु इति करतलकरपृष्ठाभ्यां नमः ॥ ६ ॥ इति करन्यासः । एवमेव हृदयादिषडंगन्यासं कृत्वा ध्यायेत् (ध्यानम्) सुग्रीवमर्कतनयं कपिवर्यवंद्यमारोपिताच्युतपदांबुजमादरेण ॥ पाणिप्रहारकुशलं बलपौरुषाढ्यमाशास्पदांतानि पुणं हृदि भावयामि ॥ १ ॥ इति ध्यात्वा मानसोपचारैः संपूज्य । ॐ सुंसुग्रीवाय नमः ॥ सुग्रीवः सूर्यतनयः सर्ववानरपुंगवः ॥ बलवान्राघवसखा वशी रायं प्रयच्छतु ॥ १ ॥ इति मंत्रेण संपुटितं पठेत् । नष्टराज्यप्राप्तिः अन्यत्सर्वं पूर्ववत् । इति किष्किंधा

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कांडपारायणम् ॥ अस्य श्रीआरण्यकांडमहामंत्रस्य भगवान् ऋषिः । अनुष्टुप् छंदः । श्रीरामो दाशरथिः परमात्मा महेंद्रो देवता । ईं बीजम् । नमः शक्तिः । इंद्रायेति कीलकम् । इंद्रप्रसादसिद्ध्यर्थे आरण्यकांडपारायणे जपे विनियोगः ॥ ॐ भगवान्ऋषये नमः शिरसि ॥ १ ॥ ॐ अनुष्टुप्छंदसे नमः मुखे ॥ २ ॥ ॐ श्रीरामपरमात्मामहेंद्रदेवतायै नमः हृदये ॥ ३ ॥ ॐ ईं बीजाय नमः गुह्ये ॥ ४ ॥ ॐ नमः शक्तये नमः पादयोः ॥ ५ ॥ ॐ इंद्राय कीलकाय नमः सर्वांङ्गे ॥ ६ ॥ इति ऋष्यादि न्यासः ॥ ॐ सहस्रनयनाय अंगुष्ठाभ्यां नमः ॥ १ ॥ ॐ देवाय तर्जनीभ्यां नमः ॥ २ ॥ ॐ सर्वदेवनमस्कृताय मध्यमाभ्यां नमः ॥ ३ ॥ ॐ दिव्यवज्रायुधाय अनामिकाभ्यां नमः ॥ ४ ॥ ॐ महेंद्राय कनिष्ठिकाभ्यां नमः ॥ ५ ॥ ॐ शचीपतये करतल करपृष्ठाभ्यां नमः ॥ ६ ॥ इति करन्यासः । एवमेव हृदयादिषडंगन्यासं कृत्वा ध्यायेत् । (ध्यानम्) शचीपतिं सर्वसुरेशवंद्यं सर्वार्तिहर्तारमचिंत्यशक्तिम् ॥ श्रीरामसेवानिरतं महांतं वंदे महेंद्रं धृतवज्रमीड्यम् ॥ १ ॥ इति ध्यात्वा मानसोपचारैः संपूज्य । ॐ लं इंद्राय नमः ॥ १ ॥ सहस्रनयनं देवं सर्वदेवनमस्कृतम् ॥ दिव्यवज्रधरं देवं महेंद्रं च शचीपतिम् ॥ १ ॥ इति मंत्रेण संपुटितं पठेत् । अन्यत्पूर्ववदित्यारण्यकांडपारायणम् ॥ अस्य श्रीसुंदरकांडमहामंत्रस्य भगवान् हनुमान् ऋषिः । अनुष्टुप् छंदः । जगन्माता सीता देवता । श्रीं बीजम् । स्वाहा शक्तिः । सीतायै कीलकं सीताप्रसादसिद्ध्यर्थं सुंदरकांडपारायणे जपे विनियोगः । ॐ भगवद्धनुमदृषये नमः शिरसि ॥१॥ ॐ अनुष्टुप्छंदसे नमः मुखे ॥२॥ ॐ जगन्माता सीतादेवतायै नमः हृदये ॥ ३ ॥ ॐ श्रींबीजाय नमः गुह्ये ॥ ४ ॥ ॐ स्वाहाशक्तये नमः पादयोः ॥ ५ ॥ ॐ सीतायै कीलकाय नमः । सर्वांगे ॥ ६ ॥ इति

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ऋष्यादिन्यासः ॥ ॐ सीतायै अंगुष्ठाभ्यां नमः ॥ १ ॥ ॐ विदेहराजसुतायै तर्जनीभ्यां नमः ॥ २ ॥ ॐ रामसुंदर्यै मध्यमाभ्यां नमः ॥ ३ ॥ ॐ हनुमतासमाश्रितायै अनामिकाभ्यां नमः ॥ ४ ॥ ॐ भूमिसुतायै कनिष्ठिकाभ्यां नमः ॥ ५ ॥ ॐ शरणं भजे करतलकरपृष्ठाभ्यां नमः ॥ ६ ॥ इति करन्यासः ॥ एवमेव हृदयादिषडंगन्यासं कृत्वा ध्यायेत् ॥ ध्यानम् ॥ "सीतामुदारचरितां विधिसांबविष्णुवंद्यां त्रिलोकजननीं ततकल्पवल्लीम् ॥ हैमैरनेकमणिरंजितकोटिभागैर्भूषाचयैरनुदिनं सहितां नमामि ॥ १ ॥" इति ध्यात्वा मानसोपचारैः संपूज्य । 'ॐ श्रींसीतायै नमः ॥ १ ॥' इति मंत्रेण संपुटितं पठेत् । सर्वकार्य्यसिद्धिः । अन्यत्पूर्ववत् । इति सुंदरकांडपारायणम् ॥ ९ ॥ ॐ अस्य श्रीयुद्धकांडमहामंत्रस्य विभीषण ऋषिः । अनुष्टुप् छंदः । विधाता देवता । बंबीजम् । नमः शक्तिः । विधातेति कीलकम् । श्रीधातृप्रसादसिद्ध्यर्थं युद्धकांडपारायणे जपे विनियोगः । ॐ विभीषणऋषये नमः शिरसि ॥ १ ॥ ॐ अनुष्टुप्छंदसे नमः मुखे ॥ २ ॥ ॐ विधातृदेवताय नमः हृदये ॥ ३ ॥ ॐ बं बीजाय नमः गुह्ये ॥ ४ ॥ ॐ नमः शक्तये नमः पादयोः ॥ ५ ॥ ॐ विधातेति कीलकाय नमः सर्वाङ्गे ॥ ६ ॥ इति ऋष्यादिन्यासः । ॐ विधात्रे अंगुष्ठाभ्यां नमः ॥ १ ॥ ॐ महादेवाय तर्जनीभ्यां नमः ॥ २ ॥ ॐ भक्तानामभयप्रदाय मध्यमाभ्यां नमः ॥ ३ ॥ ॐ सर्वदेवप्रीतिकराय अनामिकाभ्यां नमः ॥ ४ ॥ ॐ भगवत्प्रियाय कनिष्ठिकाभ्यां नमः ॥ ५ ॥ ॐ ईश्वराय करतलकरपृष्ठाभ्यां नमः ॥ ६ ॥ इति करन्यासः ॥ एवमेव हृदयादिषडंगन्यासं कृत्वा ध्यायेत् ॥ अथ ध्यानम् ॥ "देवं विधातारमनंतवीर्यं भक्ताभयं श्रीपरमादिदेवम् ॥ सर्वामरप्रीतिकरं प्रशांतं वंदे सदा भूतपतिं सुभर्तुम् ॥ १ ॥" इति ध्यात्वा

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मानसोपचारैः संपूज्य । ॐ वं विधात्रे नमः ॥ १ ॥ विधातारं महादेवं भक्तानामभयप्रदम् ॥ सर्वदेवप्रीतिकरं भगवत्प्रियमीश्वरम् ॥ १ ॥ इति मंत्रेण संपुटितं पठेत् ॥ (शत्रोः पराभवो विजयश्च) अन्यत्सर्वं पूर्ववत् ॥ इति युद्धकाण्डपारायणम् ॥६॥ उत्तरकांडस्यापि ऋष्यादिन्यासं षडंगन्यासं चैतदेव ज्ञातव्यम् ॥ अथ पारायणदिनसंख्यां । पुनर्वसुनक्षत्रादारभ्य आर्द्रापर्यंतं सप्तकाण्डपाठः । इत्येकः पक्षः ॥ १ ॥ प्रतिपदमारभ्य नवरात्रं पठेत् । इति द्वितीयः ॥ २ ॥ चत्वारिंशद्दिनैः पाठः । इति तृतीयः ॥ ३ ॥ यथारुचि कार्यः ॥ सुंदरकांडे एकोत्तरावृत्त्या पाठः कर्त्तव्यः। यथा प्रथमदिने एकः द्वितीये द्वौ तृतीये त्रय इत्यादि एकादशदिनपर्यंतम् ॥ द्वादशदिने अवशिष्टं सर्गद्वयं पठित्वा पुनः प्रथमसर्गः पठनीयः । एवं त्रिरावृत्त्या सकलकार्यसिद्धिः । श्रीहनुमत्प्रतिमासमीपे सुंदरकांडपाठाच्छीघ्रकार्यसिद्धिः । पाठश्च तन्मनसैव कार्यः । इति श्रीवाल्मीकिरामायणपारायणविधानम् ॥ ॥ अथ अध्यात्मरामायणपाठविधानम् ॥ ॐ अस्य श्रीमदध्यात्मरामायणे अमुककांडमहामालामंत्रस्य श्रीभगवान् सदाशिव ऋषिः । अनुष्टुप् छंदः । श्रीरामः परमात्मा देवता । ॐ नमो नारायणायेति बीजम्॥ दाशरथिरिति शक्तिः । रावणघ्न इति कीलकम् । मम अमुककामनासिद्ध्यर्थममुकमंत्रस्य संपुटीकरणसहितामुककाण्डपाठं करिष्ये इति संकल्प्य पारायणादौ पूर्वोक्तभूतशुद्धिमातृकान्यासादि कर्म कुर्यात् । ॐ श्रीभगवत्सदाशिवऋषये नमः शिरसि ॥ १ ॥ ॐ अनुष्टुप्छंदसे नमः मुखे ॥ २ ॥ ॐ श्रीरामपरमात्मदेवतायै नमः हृदये ॥ ३ ॥ ॐ नमो नारायणायेति बीजाय नमः गुह्ये ॥ ४ ॥ ॐ दाशरथिशक्तये नमः पादयोः ॥ ५ ॥ ॐ रावणघ्नकीलकाय नमः सर्वाङ्गे ॥ ६ ॥ मम चतुर्विधपुरुषार्थसिद्ध्यर्थं जपे विनियोगः ॥ अथ षडंगन्यासः ॥ ॐ रां अङ्गु

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ष्ठाभ्यां नमः ॥ १ ॥ ॐ रीं तर्जनीभ्यां नमः ॥ २ ॥ ॐ रूं मध्यमाभ्यां नमः ॥ ३ ॥ ॐ रैं अनामिकाभ्यां नमः ॥ ४ ॥ ॐ रौं कनिष्ठिकाभ्यां नमः ॥ ५ ॥ ॐ रः करतलकरपृष्ठाभ्यां नमः ॥ ६ ॥ इति करन्यासः । एवमेव हृदयादिषडंगन्यासं कृत्वा ॐ रांरींरूंरैंरौंरः इति मंत्रेण दिग्बंधं कुर्यात् ॥ अथ ध्यानम् । "नीलेंदीवरतुल्यश्यामवदनं पीतांबरालंकृतं मुद्रां ज्ञानमयीं दधानमपरां विद्युन्निभां राघवम् ॥ पश्यंतीं मुकुटांगदादिविविधैः कल्पोज्वलांगं भजे श्रीमद्दाशरथिं नमामि सुतरामब्धौ प्लवं दुस्तरे ॥ १ ॥" इति ध्यात्वा मानसोपचारैः संपूज्य यथाकामनया मंत्रसंपुटितपाठं कुर्यात् । एतन्न्यासादिकर्म्म प्रतिकांडं कार्यम् । (संपुटीकरण मंत्राः) ॐ श्रीरामचंद्राय स्वाहा ॥ १ ॥ ॐ क्लींनमः श्रीरघुनाथाय ॥ २ ॥ ॐ जयजय रावणांतकाय ॥३॥ ॐ नमः सीता पतये नमः ॥ ४ ॥ ॐ लक्ष्मणाग्रजाय नमः ॥ ५ ॥ ॐ भरतशत्रुघ्नसेवितचरणाय नमः ॥६॥ ॐ रां रामाय नमः ॥ ७ ॥ एषा मन्यतमेन संपुटीकृत्य पाठं कुर्यात्सर्वकार्यसिद्धिः ॥ इत्यध्यात्मरामायणपारायणविधानम् ॥ ॥ अथ वेदव्यासमंत्रानुष्ठानप्रयोगः ॥ (मंत्रमहोदधौ) मंत्रो यथा—व्यां वेदव्यासाय नमः ॥ ८ ॥ इत्यष्टाक्षरो मंत्रः ॥ अस्य वेदव्यासमंत्रस्य ब्रह्मा ऋषिः । अनुष्टुप् छंदः । सत्यवतीसुतवेदव्यासो देवता व्यां बीजम् नमः शक्तिः । ममाभीष्टसिद्ध्यर्थं जपे विनियोगः ॥ ॐ ब्रह्म ऋषये नमः शिरसि ॥ १ ॥ ॐ अनुष्टुप्छंदसे नमः मुखे ॥ २ ॥ ॐ सत्यवतीसुतवेदव्यासदेवतायै नमः मुखे ॥ ३ ॥ ॐ व्यां बीजाय नमः गुह्ये ॥ ४ ॥ ॐ नमः शक्तये नमः पादयोः ॥ ५ ॥ इति ऋष्यादिन्यासः ॥ अथ षडङ्गन्यासः ॥ ॐ व्यां हृदयाय नमः ॥ १ ॥ ॐ व्यीं शिरसे स्वाहा ॥ २ ॥ ॐ व्यूं शिखायै वषट् ॥ ३ ॥ ॐ व्यैं कवचाय हुम् ॥४॥ ॐ व्यौं नेत्रत्रयाय

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वौषट् ॥ ५ ॥ ॐ व्यः अस्त्राय फट् ॥६॥ इत्यंगन्यासं कृत्वा ध्यायेत् ॥ अथ ध्यानम् ॥ "व्याख्यामुद्रिकया लसत्करतलं सद्यो गपीठस्थितं वामे जानुतले दधानमपरं हस्ते सुविद्यानिधिम् ॥ विप्रव्रातवृतं प्रसन्नमनसं पाथोरुहाङ्गद्युतिं पाराशर्य्यमतीव पुण्य चरितं व्यासं स्मरेत्सिद्धये ॥ १ ॥" इति ध्यात्वा मानसोपचारैः संपूज्य । पूर्वोक्ते धर्मादियुक्ते पीठे आवाहनादिपुष्पांतैरुपचारैर्मूलेन वेदव्यासं संपूज्य आवरणपूजनं कुर्यात् । तद्यथा–षट्कोणे आग्नेयादिकोणकेसरेषु मध्ये दिक्षु च । पूर्वोक्तानि हृदयादिषडंगानि संपूज्य तद्बहिरष्टदलेषु प्राचीक्रमेण । ॐ पैलाय नमः ॥ १ ॥ ॐ वैशंपायनाय नमः ॥ २ ॥ ॐ जैमिनये नमः ॥ ३ ॥ ॐ सुमंतवे नमः ॥ ४ ॥ (दिग्दलेषु) ॐ शुक्राय नमः ॥ ५ ॥ ॐ रोमहर्षणाय नमः ॥ ६ ॥ ॐ उग्रश्रवसे नमः ॥ ७ ॥ ॐ अन्येभ्यो मुनिभ्यो नमः॥८॥ इति पूजयेत् ॥ ततो बाह्ये चतुरस्रे भूपुरे पूर्वादिदशदिक्षु इंद्रादिदशदिक्पालान् तद्बहिर्वज्राद्यायुधानि च पूजयेत् ॥ ततो धूपादिनमस्कारान्तपूजां समाप्य जपं कुर्यात् । अस्य पुरश्चरणमष्टसहस्रजपः । जपान्ते दशांशेन पायस होमः । तदशांशेन तर्पणं तदशांशेन मार्जनं तद्दशांशतो ब्राह्मणभोजनं च कुर्य्यात् ॥ तथा च–जपेदष्टसहस्राणि पायसैर्होम माचरेत् । एवं सिद्धमनुर्मंत्री कवित्वं शोभनाः प्रजाः ॥ १ ॥ व्याख्यानशक्तिं कीर्तिं च लभते संपदां चयम् ॥ मृत्युंजयेन पुटितं यो व्यासस्य मनुं जपेत् ॥ २ ॥ सर्वोपद्रवसंत्यक्तो लभते वांछितं फलम् ॥ (मृत्युंजयसंपुटितो मंत्रः–ॐ जूँ सः व्यां वेदव्यासाय नमः सः जूँ ॐ) मृत्युंजयस्य मंत्रोयं त्रिवर्णो मृत्युनाशनः ॥ ३ ॥ जप्तोयं केवलो नृणामिष्टसिद्धिं प्रयच्छति ॥ किंपुनस्तेन पुटितो वेदव्यासमनूत्तमः ॥ ४ ॥ इति वेदव्यासमंत्रपुरश्चरणं समाप्तम् ॥ अथ नारायणाथर्वशीर्षम् ॥ अथ पुरुषोहवैनारा

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यणोऽकामयतप्रजाः सृजेयेति । नारायणात्प्राणो जायते । मनः सर्वेन्द्रियाणि च । खंवायुर्ज्योतिरापः पृथिवीविश्वस्यधारिणी । नारायणाद्ब्रह्माजायते । नारायणाद्विष्णुर्जायते । नारायणाद्रुद्रोजायते । नारायणादिंद्रोजायते । नारायणात्प्रजापतिः प्रजायते । नारायणाद्वादशादित्यारुद्रावसवः सर्वाणिच्छंदांसि नारायणादेवाःसमुत्पद्यन्ते । नारायणात्प्रवर्तन्ते—नारायणेप्रलीयन्ते । अथादित्योनारायणः । ब्रह्मानारायणः । शिवश्चनारायणः । शक्रश्चनारायणः । कालश्चनारायणः । दिशश्चनारायणः । ऊर्ध्वंचनारायणः अधश्चनारायणः । अन्तर्बहिश्चनारायणः । नारायणएवेद ठ्ँ० सर्वंयद्भूतंयच्चभाव्यम् । निष्कलोनिरञ्जनोनिर्विकल्पोनिराख्यातः शुद्धोदेवएकोनारायणोनद्वितीयोऽस्तिकश्चित् । यएवंवेद । सविष्णुरेवभवतिसाविष्णुरेवभवति । ॐ इत्यग्रेव्याहरेत् । नम इति पश्चात् । नारायणयेतिपंचाक्षराणि । एतद्वैनारायणस्याष्टाक्षरंपदम् । योहवैनारायणस्याष्टाक्षरंपदमध्येति । अनुपव्रतः सर्वमायुरेति । विन्दते प्रजांरायस्पोषं गोपत्यंततोऽमृतत्वमश्नुतेततोऽमृतत्वमश्नुतइति । प्रत्यगानन्दब्रह्मपुरुषं प्रणवस्वरूपम् ॥ अकार उकारोमकारइतितानेकधासंयोज्यतदेवतदोमिति । यमुक्त्वामुच्यतेयोगीजन्मसंसारबंधनात् ॥ ॐ नमोनारायणायेतिमंत्रोपासकः वैकुंठभुवनंगच्छति । तदिदंपरमंपुंडरीकंविज्ञानघनं तस्मात्तडिदाभमात्रम् । ब्रह्मण्योदेवकीपुत्रोब्रह्मण्योमधुसूदनः । सर्वभूतस्थमेकंवैनारायणम् । कारणरूपंपरब्रह्मकम् । एतदथर्वशीर्षयोऽधीते । सायमधीयानोदिवसकृतंपापंनाशयति । प्रातरधीयानोरात्रिकृतंपापंनाशयति । सायंप्रातः प्रयुञ्जानोअपापोभवति । मध्यंदिनमादित्याभिमुखोऽधीयानः सद्यः पंचमहापातकोपपातकेभ्योमुच्यते । सर्ववेदपारायणपुण्यंलभते श्रीनारायणसायुज्यमाप्नोति । यएवंवेद । इत्युपनिषत् । इति नारायणाथर्वशीर्षम् ॥ इति श्रीवीकानेरराज्यान्तर्गत

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

श्रीरत्नगढनगरनिवासिना श्रीवसिष्ठगोत्रोद्भवश्रीरामकृष्णपौत्रेण श्रीकस्तूरिचंद्रसूनुना गौडवंशावतंसश्रीमहादेवभक्तमाध्यंदिनवाज
सनेयिना वैद्यपंडितश्रीचतुर्थीलालशर्मणा विरचिते अनुष्ठानप्रकाशे महानिबंधे पुरश्चरणकाण्डे विष्णुमंत्रानुष्ठानप्रकरणं समाप्तम्॥४॥
अथ सूर्य्यादिमंत्रानुष्ठानप्रकरणम् ॥ हेमांभोजप्रवालप्रतिमनिजरुचिं चारुखड्गांगपद्मौ चक्रं शंखं सपाशं शृणिमतिरुचिरा
मक्षमालां कपालम् ॥ हस्तांभोजैर्दधानं त्रिनयनविलसद्देवक्त्राभिरामं मार्तंडं वल्लभाढ्यं मणिमयमुकुटं हारयुक्तं भजामि ॥ १ ॥
तत्र तावत्सर्वरोगदारिद्र्यनाशकाऽष्टाक्षरसूर्य्यमंत्रपुरश्चरणप्रयोगः ॥ सुमुहूर्ते प्रातर्नित्यावश्यकं समाप्य । जपस्थानमागत्य कूर्म्म
संशोधिते स्वासने प्राङ्मुख उपविश्य । मूलेनाचम्य प्राणानायम्य देशकालौ संकीर्त्य। मम सर्वरोगदारिद्र्यादि विनाशनार्थमायु
रारोग्यसुखश्रीसंपत्तिप्राप्त्यर्थं श्रीभगवत्सवितृसूर्य्यनारायणप्रीत्यर्थमष्टलक्ष संख्यात्मकमष्टाक्षरसूर्य्यमंत्रजपपुरश्चरणं करिष्ये
तदंगत्वेन भूतशुद्धिमंतर्मातृका बहिर्मातृकान्यासं केशवादिकलामातृकान्यासं च करिष्ये । इति संकल्प्य । पूर्वोक्तपद्धतिकाण्डा
नुसारेण भूतशुद्धिमंतर्मातृकाबहिर्मातृकान्यासं च कृत्वा । विष्णोरष्टाक्षरमंत्रोक्तं केशवादिकलामातृकान्यासं कुर्यात् ॥ अथ मूल
मंत्रप्रयोगः—मूलमंत्रो यथा ॥ "ॐ घृणिः सूर्यआदित्यः" इत्यष्टाक्षरो मंत्रः । अस्य मंत्रस्य देवभाग ऋषिः । गायत्री छंदः ।
आदित्यो देवता ममाभीष्टसाधने विनियोगः । ॐ देवभागऋषये नमः शिरसि ॥ १ ॥ ॐ गायत्री छंदसे नमः मुखे ॥ २ ॥
ॐ आदित्यदेवतायै नमः हृदये ॥ ३ ॥ इति ऋष्यादिन्यासः ॥ ॐ सत्यायतेजोज्वालामणे हुं फट् स्वाहा । अंगुष्ठाभ्यां नमः
॥ १ ॥ ॐ ब्रह्मणे तेजोज्वालामणे हुं फट् स्वाहा । तर्जनीभ्यां नमः ॥ २ ॥ ॐ विष्णवे तेजोज्वालामणे हुं फट् स्वाहा ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मध्यमाभ्यां नमः ॥ ३ ॥ ॐ रुद्राय तेजोज्वालामणे हुं फट् स्वाहा । अनामिकाभ्यां नमः ॥ ४ ॥ ॐ अग्नये तेजोज्वालामणे हुं फट् स्वाहा कनिष्ठिकाभ्यां नमः ॥ ५ ॥ ॐ सर्वायतेजोज्वालामणे हुं फट् स्वाहा ॥ करतलकरपृष्ठाभ्यां नमः ॥ ६ ॥ इति करन्यासः ॥ एवमेव हृदयादिषडंगन्यासं कुर्य्यात् ॥ ॐ ओं आदित्याय नमो मूर्ध्नि ॥१॥ ॐ एँ रवये नमो मुखे ॥ २ ॥ ॐ ॐ भानवे नमो हृदये ॥ ३ ॥ ॐ इँ भास्कराय नमो लिंगे ॥ ४ ॥ ॐ अँ सूर्य्याय नमः पादयोः ॥ ५ ॥ इति पंचमूर्तिन्यासः ॥ अथ मंत्रवर्णन्यासः ॥ ॐ नमो मूर्ध्नि ॥ १ ॥ ॐ घृं नमो मुखे ॥ २ ॥ ॐ णिं नमः कंठे ॥ ३ ॥ ॐ सूं नमः हृदये ॥ ४ ॥ ॐ यं नमः कुक्षौ ॥ ५ ॥ ॐ आं नमः नाभौ ॥ ६ ॥ ॐ दिं नमः लिंगे ॥ ७ ॥ ॐ त्यं नमः पादयोः ॥ ८ ॥ एवं न्यासं कृत्वा ध्यायेत् ॥ अथ ध्यानम् ॥ "रक्ताब्जयुग्माभयदानहस्तं केयूरहारांगदकुंडलाढ्यम् ॥ माणिक्यमौलिं दिननाथमीडे वंधूककां तिं विलसत्त्रिनेत्रम् ॥ १ ॥" इति ध्यात्वा मानसोपचारैः संपूज्य पीठपूजादि कुर्य्यात् ॥ तद्यथा—पूर्वादिदिक्षु मध्ये च । ॐ प्रभूताय नमः ॥ १ ॥ ॐ विमलाय नमः ॥ २ ॥ ॐ साराय नमः ॥ ३ ॥ ॐ समाराध्याय नमः ॥ ४ ॥ मध्ये ॐ परम सुखाय नमः ॥ ५ ॥ इति पूजयेत् ॥ तद्बहिः ॐ अं अनंताय नमः ॥ १ ॥ ॐ पृं पृथिव्यै नमः ॥ २ ॥ ॐ अं अमृतसागराय नमः ॥ ३ ॥ ॐ रं रत्नद्वीपाय नमः ॥ ४ ॥ ॐ हें हेमगिरये नमः ॥ ५ ॥ ॐ नं नंदनोद्यानाय नमः ॥ ६ ॥ ॐ कं कल्पवृक्षेभ्यो नमः ॥७॥ ॐ मं मणिभूषितभूतलाय नमः ॥८॥ इत्यष्टौ संपूज्य । ॐ सं सोममंडलाय नमः ॥ १ ॐ वं वह्निमंडलाय नमः॥ ॥ २ ॥ ॐ सं सूर्यमण्डलाय नमः ॥ ३ ॥ इति पीठदेवताः संपूज्य पीठशक्तीः पूर्वादिक्रमेण पूजयेत् ॥ ॐ रौं दीप्तायै नमः ॥ १ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ॐ रीं सूक्ष्मायै नमः ॥ २ ॥ ॐ रूं जयायै नमः ॥ ३ ॥ ॐ रें भद्रायै नमः ॥ ४ ॥ ॐ रैं विभूत्यै नमः ॥ ५ ॥ ॐ रा विमलायै नमः ॥६॥ ॐ रों अमोघायै नमः ॥७॥ ॐ रं विद्युतायै नमः ॥ ८ ॥ (मध्ये) ॐ रः सर्वतो मुख्यै नमः ॥९॥ इति पीठशक्तीः संपूज्य । ॐ ब्रह्मविष्णुशिवात्मकाय सौराय योगपीठात्मने नमः ॥ इति पुष्पांजलिनाऽऽसनं दद्यात् । तत्र ॐ खंखषोल्काय नमः इति मनसा मूर्तिं प्रकल्प्य (अथवा ताम्रकलशोपरि सुवर्णमयीं सूर्य्यप्रतिमां संस्थाप्य प्राणप्रतिष्ठां कृत्वा तस्यां सर्वलोकसाक्षिणं सूर्य्यमावाह्य पाद्यादिपुष्पांतैरुपचारैर्यथाविधि संपूज्य आवरणपूजां कुर्य्यात् ॥ तद्यथा—षट्कोणे आग्नेयादिकोणकेसरेषु मध्ये दिक्षु च । ॐ सत्याय तेजोज्वालामणे हुं फट् स्वाहा हृदयायनमः ॥१॥ ॐ ब्रह्मणे तेजोज्वालामणेहुं फट् स्वाहा शिरसे स्वाहा ॥ २ ॥ ॐ विष्णवे तेजोज्वालामणे हूं फट् स्वाहा शिखायै वषट् ॥ ३ ॥ ॐ रुद्राय तेजोज्वालामणे हुं फट् स्वाहा कवचाय हुम् ॥ ४ ॥ ॐ अग्नये तेजो ज्वालामणे हुं फट् स्वाहा नेत्रत्रयाय वौषट् ॥५॥ ॐ सर्वाय तेजोज्वालामणे हुं फट् स्वाहा इत्यस्त्राय फट् ॥६॥ इति षडंगानि पूजयेत् ॥ तद्बहिरष्टदलेषु पूर्वदले ॐ आदित्याय नमः ॥१॥ (दक्षिणदले) ॐ रवये नमः ॥२॥ (पश्चिमदले) ॐ भानवे नमः ॥३॥ (उत्तरदले)ॐ भास्कराय नमः ॥४॥ इति संपूज्य । आग्नेयादिकोणदलेषु । ॐ उं उषायै नमः॥१॥ उं प्रं प्रज्ञायै नमः ॥ २ ॥ ॐ प्रं प्रभायै नमः ॥ ३ ॥ ॐ सं संध्यायै नमः ॥ ४ ॥ इति शक्तीः पूजयेत् ॥ ततो दलाग्रेषु पूर्वादिक्रमेण । ॐ ब्रां ब्राह्म्यै नमः ॥ १ ॥ ॐ मां माहेश्वर्य्यै नमः ॥ २ ॥ ॐ कौं कौमार्य्यै नमः ॥३॥ ॐ वैं वैष्णव्यै नमः ॥ ४ ॥ वां वाराह्यै नमः ॥ ५ ॥ ॐ इं इंद्राण्यै नमः ॥ ६ ॥ ॐ चां चामुंडायै नमः ॥ ७ ॥ ॐ मं महालक्ष्म्यै नमः ॥८॥ इति मातृः पूजयेत् ॥ ततो देव

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

❀ पुरतः ॐ अरुणाय नमः इत्यरुणं पूजयेत् ॥१॥ तद्बाह्ये पूर्वादिषु । ॐ सों सोमाय नमः ॥ १ ॥ ॐ बुं बुधाय नमः॥२॥ ॐ गुं गुरवे नमः ॥३॥ ॐ शुं शुक्राय नमः॥४॥ इति दिक्षु । ततः कोणेषु । ॐ अं अंगारकाय नमः॥५॥ॐ शं शनैश्चराय नमः॥ ॥ ६ ॥ ॐ रां राहवे नमः ॥ ७ ॥ ॐ कें केतवे नमः ॥८॥ इति ग्रहान्पूजयेत् ॥ ततो भूपुरे पूर्वादिदिक्षु । ॐ इंद्राय नमः॥१॥ ॐ अग्नये नमः ॥ २ ॥ ॐ यमाय नमः ॥ ३ ॥ ॐ निर्ऋतये नमः ॥ ४ ॥ ॐ वरुणाय नमः ॥ ५ ॥ ॐ वा यवे नमः ॥ ६ ॥ ॐ कुबेराय नमः ॥ ७ ॥ ॐ ईशानाय नमः ॥ ८ ॥ (ऊर्ध्वम्) ॐ ब्रह्मणे नमः ॥९॥ (अधः) ॐ अनंताय नमः ॥ १० ॥ इति दश दिक्पालान् पूजयेत् ॥ (तद्बहिः) ॐ वज्राय नमः ॥१॥ ॐ शक्तये नमः ॥ २ ॥ ॐ दंडाय नमः ॥३॥ ॐ खड्गाय नमः ॥ ४ ॥ ॐ पाशाय नमः ॥ ५ ॥ ॐ अंकुशाय नमः ॥ ६ ॥ ॐ गदायै नमः ॥ ७ ॥ ॐ त्रिशूलाय नमः ॥८॥ ॐ पद्माय नमः ॥ ९ ॥ ॐ चक्राय नमः ॥ १० ॥ इत्यायुधानि पूजयेत् ॥ एवमावरणपूजां कृत्वा धूपदीपनैवेद्यतांबूलदक्षिणा नीराजनादिभिः सूर्य्यं संपूज्य स्तोत्रैः स्तुत्वा यथाविधि चित्तैकाग्रतया जपं कुर्य्यात् । (प्रत्यहं वक्ष्यमाणविधिना पूजांते अर्घ्यं दद्यात्) अस्य पुरश्चरणमष्टलक्षमंत्रः ॥ जपान्ते अष्टसहस्रसंख्याकहोमः । तद्दशांशेन तर्पणम् ॥ तद्दशांशेन मार्जनम् ॥ तद्दशांशेन ब्राह्मणभोजनं च ज्ञेयम् ॥ तथा च (शारदातिलके) वसुलक्षं जपेन्मंत्रं समिद्भिः क्षीरशाखिनाम् ॥ तत्सहस्रं प्रजुहुया त्क्षीराक्ताभिर्जितेंद्रियः ॥ १ ॥ एवं संपूज्य विधिवद्भास्करं भक्तवत्सलम् ॥ दद्यादर्घ्यं प्रतिदिनं वारे वा तस्य चोदिते ॥ २ ॥ प्रभा

* श्रीसूर्ययंत्रमिदम्—प्र. ३ चि. नि. अं. पृ. नं. ३०१.

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ते मंडलं कृत्वा पूर्ववत्पीठमर्चयेत् ॥ पात्रं ताम्रमयं प्रस्थतोयग्राहि मनाहरम् ॥ ३ ॥ विधाय तत्र मनुना पूरयेत्तच्छुभोदकैः ॥ कुंकुमं रोचनं राजीरक्तचंदनवैणवान् ॥ ४ ॥ करवीरजपालाशीकुशश्यामाकतंडुलान् ॥ निक्षिपेत्सालिले तस्मिन्नैक्यं संकल्प्य भानुना ॥ ५ ॥ सांगमभ्यर्चयेत्तस्मिन्भास्करं प्रोक्तलक्षणम् ॥ गंधपुष्पादिनैवद्यैर्यथाविधि विधानवित् ॥ ६ ॥ तद्विधाय जपेन्मंत्रं सम्यगष्टोत्तरं शतम् ॥ पुनः संपूज्य गंधाद्यैर्जानुभ्यामवनीं गतः ॥७॥ आमस्तकं तदुद्धृत्य व्योम्नि सावरणे रवौ ॥ दृष्टिं विधाय स्वैक्येन मूलमंत्रं धिया जपन् ॥ ८ ॥ (मूलमंत्रः–"ॐ ह्रीं घृणिः सूर्यआदित्यःश्रीं" इति) दद्यादर्घ्यं दिनेशाय प्रसन्नेनांतरात्मना ॥ कृत्वा पुष्पांजलिं भूयो जपेदष्टोत्तरं शतम् ॥ ९ ॥ यावदर्घामृतं भानुः समादत्ते निजैः करैः ॥ तेन तृप्तो दिनमणिर्दद्यात्तस्मै मनोरथान् ॥ १० ॥ अर्घ्यदानमिदं पुण्यं पुंसामारोग्यवर्द्धनम् ॥ धनधान्यपशुक्षेत्रपुत्रमित्रकलत्रदम् ॥ ११ ॥ तेजोवीर्ययशःकांतिविद्याविभवभाग्यदम् ॥ इत्यष्टाक्षरसूर्यमंत्रविधानं सार्घ्यं समाप्तम् ॥ ॥ अथ त्र्यक्षरसूर्यमंत्रविधानम् ॥ मंत्रो यथा– "ह्रांह्रींसः" इति त्र्यक्षरमंत्रः । अस्य श्रीसूर्यमंत्रस्य अज ऋषिः गायत्री छंदः । सूर्यो देवता । ह्रां बीजम् । ह्रीं शक्तिः । सः कीलकम् । सर्वेष्टसिद्धये जपे विनियोगः ॥ ॐ अजऋषये नमः शिरसि ॥ १ ॥ ॐ गायत्रीछंदसे नमः मुखे ॥ २ ॥ ॐ सूर्यदैवतायै नमः हृदि ॥ ३ ॥ ॐ ह्रां बीजाय नमः गुह्ये ॥ ४ ॥ ॐ ह्रींशक्तये नमः पादयोः ॥५॥ ॐ सः कीलकाय नमः सर्वांङ्गे । इति ऋष्यादिन्यासः ॥ ॐ ह्रां नमः आधारादिपदाग्रान्तं विन्यसेत् ॥ १ ॥ ॐ ह्रीं नमः कंठाद्याधारांतं विन्यसेत् ॥ ॐ सः नमः मूर्द्धादिकंठपर्यंतं विन्यसेत् ॥ अथांगन्यासः ॥ ॐ आं ह्रीं अंगुष्ठाभ्यां नमः॥१॥ॐ ईं ह्रीं तर्जनीभ्यां नमः॥२॥ ॐ ऊँ ह्रीं मध्य

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

माभ्यां नमः ॥ ३ ॥ ॐ ऐं ह्रीं अनामिकाभ्यां नमः ॥ ४ ॥ ॐ औं ह्रीं कनिष्ठिकाभ्यां नमः ॥ ५ ॥ ॐ अः ह्रीं करतलकरपृष्ठाभ्यां नमः ॥ ६ ॥ इति करन्यासः ॥ एवं हृदयादिषडंगन्यासं कुर्यात् ॥ एवं न्यासविधिं कृत्वा ध्यायेत् ॥"रक्तांबुजासनमशेषगुणैकसिंधुं भानुं समस्तजगतामधिपं भजामि ॥ पद्मद्वयाभयवरान्दधतं कराब्जैर्माणिक्यमौलिमरुणांगरुचिं त्रिनेत्रम् ॥११॥ एवं ध्यात्वा पूर्वोक्ते पीठे पाद्यादिपुष्पांतैरुपचारैः संपूज्य आवरणपूजां कुर्यात् । तद्यथा–षट्कोणे आग्नेयादिकोणेषु मध्ये दिक्षु च ॐ आं ह्रीं हृदयाय नमः ॥ १ ॥ ॐ ईं ह्रीं शिरसे स्वाहा ॥ २ ॥ ॐ ऊं ह्रीं शिखायै वषट् ॥ ३॥ ॐ ऐं ह्रीं कवचाय हुम् ॥ ४ ॥ ॐ औं ह्रीं नेत्रत्रयाय वौषट् ॥ ५ ॥ ॐ अः ह्रीं अस्त्राय फट् । इति षडंगानि पूजयेत् ॥ १ ॥ ततो द्वितीयावरणे अष्टदले चन्द्राद्यष्टग्रहान् संपूजयेत् ॥२॥ तृतीयावरणे भूपुरे पूर्वादिक्रमेण इन्द्रादीन्दशदिक्पालान् । तद्बाह्ये वज्राद्यायुधानि च संपूजयत् । इत्यावरणपूजां कृत्वा धूपादिनीराजनांतैरुपचारैः संपूज्य जपं कुर्यात् । अस्य पुरश्चरणं द्वादशलक्षजपः । तथा च–"भानुलक्षं जपेन्मंत्रमन्नाज्येन दशांशतः ॥ तिलैर्वा मधुरासिक्तैर्जुहुयाद्विजितेंद्रियः ॥ १ ॥ सोपि रत्नं धनं धान्यं पुत्रपौत्रान्यशः पशून् ॥ वस्त्राणि भूषणादीनि दद्यात्तस्मै न संशयः ॥ २ ॥ इति संपूज्य निर्माल्यं तेजश्चंडाय दीयताम् । अर्घ्यं प्रागीरितं दद्याद्भानवे संयतेंद्रियः ॥ २ ॥" इति त्र्यक्षरीसूर्यमंत्रप्रयोगः ॥ अथ चन्द्रमंत्रप्रयोगः (शारदायाम्) मंत्रो यथा ॥ स्त्रौं सोमाय नमः ॥ (मतांतरे सौं सोमाय नमः) इति षडक्षरो मंत्रः । अस्य सोममंत्रस्य भृगुर्ऋषिः । पंक्तिश्छंदः । सोमो देवता । स्त्रौं बीजम् । नमः शक्तिः । मम सर्वेष्टसिद्धये जपे विनियोगः । ॐ भृगुऋषये नमः शिरसि ॥ १ ॥ ॐ

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पंक्तिच्छंदसे नमः मुखे ॥ २ ॥ ॐ सोमदेवतायै नमो हृदि ॥ ३ ॥ ॐ स्वौं वीजाय नमः गुह्ये ॥ ४ ॥ ॐ नमः शक्तये नमः पादयोः ॥ ५ ॥ इति ऋष्यादिन्यासः ॥ ॐ सां अंगुष्ठाभ्यां नमः ॥ १ ॥ ॐ सीं तर्जनीभ्यां नमः ॥ २ ॥ ॐ सूं मध्यमाभ्यां नमः ॥ ३ ॥ ॐ सैं अनामिकाभ्यां नमः ॥ ४ ॥ ॐ सौं कनिष्ठिकाभ्यां नमः ॥ ५ ॥ ॐ सः करतलकरपृष्ठाभ्यां नमः ॥ इति करन्यासः ॥ एवं हृदयादिन्यासं कृत्वा ध्यायेत् ॥ "कर्पूरस्फटिकावदातमनिशं पूर्णेन्दुर्बिंबाननं मुक्तादाम विभूषितेन वपुषा निर्मूलयन्तं तमः ॥ हस्ताभ्यां कुमुदं वरं च दधतं नीलालकोद्भासितं स्त्रीयांकस्थमृगोदिताश्रयगुणं सोमं सुधाब्धिं भजे ॥" इति ध्यात्वा पीठे मंडूकादिसोमांतपीठदेवताः संपूज्य ततः पीठेमध्य सौं सोमाय नमः । इति मूलेन मूर्तिं प्रकल्प्य पाद्यादिपुष्पांतैरुपचारैः संपूज्य आवरणपूजां कुर्यात् । षट्कोणे केसरेषु पूज्यपूजकयोर्मध्ये दिक्षु च । ॐ सां हृदयाय नमः ॥ १ ॥ ॐ सीं शिरसे स्वाहा ॥ २ ॥ ॐ सूं शिखायै वषट् ॥ ३ ॥ ॐ सैं कवचायहुम् ॥ ४ ॥ सों नेत्रत्रयाय वौषट् ॥ ॥ ५ ॥ ॐ सः अस्त्राय फट् ॥ ६ ॥ इति षडंगानि पूजयेत् ॥ ततोऽष्टदले पूर्वादिक्रमेण । ॐ रोहिण्यै नमः ॥ १ ॥ ॐ कृत्तिकायै नमः ॥ २ ॥ ॐ रेवत्यै नमः ॥ ३ ॥ ॐ भरण्यै नमः ॥ ४ ॥ ॐ रात्र्यै नमः ॥ ५ ॥ ॐ आर्द्रायै नमः ॥ ६ ॥ ॐ ज्यो त्स्नायै नमः ॥७॥ ॐ कलायै नमः ॥८॥ इति पूजयेत् ॥ ततोऽष्टदलाग्रेषु पूर्वादिक्रमेण आं आदित्याय नमः ॥१॥ ॐ मं मंगलायै नमः॥२॥ ॐ बुं बुधाय नमः ॥३॥ ॐ शं शनैश्चराय नमः ॥४॥ ॐ बृं बृहस्पतये नमः ॥५॥ ॐ रां राहवे नमः ॥ ६ ॥ ॐ शुं शुक्राय नमः ॥ ७ ॥ ॐ कें केतवे नमः ॥ ८ ॥ इति पूजयेत् । ततो भूपुरे पूर्वादिक्रमेण इंद्रादिदशदिक्पालान् तद्बाह्ये वज्राद्या

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

युधानि च पूजयेत् । इत्यावरणपूजां कृत्वा धूपादिनमस्कारांतं संपूज्य जपं कुर्यात् । अस्य पुरश्चरणं षट्लक्षजपः ॥ तथा च-
रसलक्षं जपेन्मंत्रं साधको विजितेंद्रियः ॥ तत्सहस्रं प्रजुहुयात्पायसेन ससर्पिषा ॥ १ ॥ एवं सिद्धमनुर्मैत्री संपदां वसतिर्भवेत् ॥
हृत्पुंडरीकमध्यस्थं ताराहारविभूषणम् ॥ २ ॥ तारापतिं स्मरन्मंत्री त्रिसहस्रं मनुं जपेत् ॥ राज्यैश्वर्यं दरिद्रोपि प्राप्नुयाद्वत्सरांतरे ॥
॥ ३ ॥ पूर्वोक्तसंख्यं प्रजपेच्छशिनं मूर्ध्नि चिंतयेत् ॥ रोगापमृत्युदुःखानि जित्वा वर्षशतं वसेत् ॥ ४ ॥ ब्रह्मचर्यरतः शुद्धश्चतुर्लक्ष
मिदं जपन् ॥ निधानं भूगतं सद्यः प्राप्नुयाद्यत्नवर्जितम् ॥ ५ ॥ जितेन्द्रियो जपेन्मंत्रं पूर्णमास्यां विशेषतः ॥ भवेत्सौभाग्यनिलयः
संपदामपरो निधिः ॥ ६ ॥ घोराज्ज्वराज्ज्शिरोरोगानभिचारानुपद्रवान् ॥ विद्विषामपि संघातं नाशयेन्मनुनामुना ॥ ७ ॥ पौर्ण
मास्यां निराहारो दद्यादर्घं विधूदये ॥ प्राक्प्रत्यगायतं कुर्याद्भूतले मंडलत्रयम् ॥ ८ ॥ निषण्णः पश्चिमे मंत्री मंडले विहितासने ॥
मध्यस्थे स्थापयेत्पश्चात्पूजाद्रव्याण्यशेषतः ॥ ९ ॥ अन्यस्मिन्मंडले सोममर्चयित्वांबुजान्विते ॥ राजतं चषकं भद्रं स्थापयेत्पुरतः
सुधीः ॥ १० ॥ गोदुग्धेन समापूर्य्य स्पृष्ट्वा तं प्रजपेन्मनुम् ॥ अष्टोत्तरशतं पश्चाद्विद्यामंत्रेण देशिकः ॥ ११ ॥ दद्यादर्घ्यं शशां
काय सर्वकामार्थसिद्धये ॥ अनेन विधिना कुर्वन्प्रतिमासमतंद्रितः ॥ १२ ॥ षण्मासाभ्यंतरे सिद्धिं साधकेंद्रः समश्नुते ॥ श्रियम
त्यूर्जितान्पुत्रान्सौभाग्यमतुलं यशः ॥ १३ ॥ कन्यामिष्टामवाप्नोति कन्यापि वरमीप्सितम् ॥ बहुना किमिहोक्तेन सर्वं दद्यान्नि
शापतिः ॥ १४ ॥ विद्ये विद्यामालिनि स्याच्चंद्रिण्यंते ततो भवेत् ॥ पुनश्चन्द्रमुखि स्वाहा विद्यामंत्र उदाहृतः ॥ १५ ॥ " विद्ये
विद्यामालिनि चंद्रिणि चंद्रमुखिस्वाहा" इति विद्यामंत्रः ॥ इति सोममंत्रप्रयोगः समाप्तः॥ ॥ अथ तंत्रोक्तमंगलमंत्रप्रयोगः ॥ (मंत्र

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

महोदधौ) मंत्रो यथा–" ॐ हाँहँसः खंखः " ॥ इति षडक्षरो मंत्रः ॥ अस्य मंगलमंत्रस्य विरूपा ऋषिः । गायत्री छंदः । मंगलो देवता । सर्वेष्टसिद्ध्यर्थं जपे विनियोगः । ॐ विरूपाऋषये नमः शिरसि ॥ १ ॥ ॐ गायत्रीछंदसे नमो मुखे ॥ २ ॥ ॐ मंगल देवतायै नमो हृदये ॥ ३ ॥ इति ऋष्यादिन्यासः ॥ ॐ अंगुष्ठाभ्यां नमः ॥ १ ॥ ॐ हां तर्जनीभ्यां नमः ॥ २ ॥ ॐ हं मध्यमा भ्यां नमः ॥ ३ ॥ ॐ सः अनामिकाभ्यां नमः ॥ ४ ॥ ॐ खं कनिष्ठिकाभ्यां नमः ॥ ५ ॥ ॐ खः करतलकरपृष्ठाभ्यां नमः ॥ ६ ॥ इति करन्यासः ॥ एवमेव हृदयादिषडंगन्यासं कृत्वा ध्यायेत् ॥ अथ ध्यानम् । "जपाभं शिवस्त्वेदजं हस्तपद्मैर्गदाशूल शक्तीर्वरं धारयंतम् ॥ अवंतीसमुत्थं सुमेषासनस्थं धरानंदनं रक्तवस्त्रं समीडे ॥ १ ॥" इति ध्यात्वा पूर्वोक्ते शिवपीठे मूलेन मूर्तिं प्रकल्प्य । अथवा त्रिकोणं ताम्रयंत्रं प्रतिमां वा संस्थाप्य प्राणप्रतिष्ठां कृत्वा । आवाहनादिपाद्यांतैरुपचारैर्भौमं संपूज्य । आवरण पूजां कुर्य्यात् ॥ षट्कोणे आग्नेयादिकोणेषु मध्ये दिक्षु च । ॐ हृदयाय नमः ॥ १ ॥ ॐ हां शिरसे स्वाहा ॥ २ ॥ ॐ हं शिखायै वषट् ॥ ३ ॥ ॐ सः कवचाय हुम् ॥ ४ ॥ ॐ खं नेत्रत्रयाय वौषट् ॥ ५ ॥ ॐ खः अस्त्राय फट् ॥ ६ ॥ इत्यंगानि पूजयेत् ॥ तद्बाह्ये त्रिकोणे एकविंशतिकोष्ठेषु । ॐ मंगलाय नमः ॥ १ ॥ ॐ भूमिपुत्राय नमः ॥ २ ॥ ॐ ऋणहर्त्रे नमः ॥ ३ ॥ ॐ धन प्रदाय नमः ॥ ४ ॥ ॐ स्थिरासनाय नमः ॥ ५ ॥ ॐ महाकायाय नमः ॥ ६ ॥ ॐ सर्वकामावरोधकाय नमः ॥ ७ ॥ ॐ लोहि ताय नमः ॥ ८ ॥ ॐ लोहिताक्षाय नमः ॥ ९ ॥ ॐ सामगानां कृपाकराय नमः ॥ १० ॥ ॐ धरात्मजाय नमः ॥ ११ ॥ ॐ कुजाय नमः ॥ १२ ॥ ॐ भौमाय नमः ॥ १३ ॥ ॐ भूमिदाय नमः ॥ १४ ॥ ॐ भूमिनंदनाय नमः ॥ १५ ॥ ॐ अंगार

॥३०३॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

काय नमः ॥ १६ ॥ ॐ यमाय नमः ॥ १७ ॥ ॐ सर्वरोगापहारकाय नमः ॥ १८ ॥ ॐ वृष्टिकर्त्रे नमः ॥ १९ ॥ ॐ वृष्टिहर्त्रे नमः ॥ २० ॥ ॐ सर्वकामफलप्रदाय नमः ॥ २१ ॥ इत्येकविंशति भौमान्संपूजयेत् ॥ तद्बाह्ये चतुरस्रे भूपुरे पूर्वादिषु । ॐ इं इंद्राय नमः ॥ १ ॥ अं अग्नये नमः ॥ २ ॥ यं यमाय नमः ॥ ३ ॥ निं निर्ऋतये नमः ॥ ४ ॥ वं वरुणाय नमः ॥ ५ ॥ वां वायवे नमः ॥ ६ ॥ कुं कुबेराय नमः ॥ ७ ॥ ईं ईशानाय नमः ॥ ८ ॥ (ऊर्ध्वं) ब्रं ब्रह्मणे नमः ॥ ९ ॥ (अधः) अं अनंताय नमः ॥ १० ॥ इति दिक्पालान् पूजयेत् ॥ तद्बहिः । ॐ वज्राय नमः ॥ १ ॥ शक्तये नमः ॥ २ ॥ दंडाय नमः ॥ ॥ ३ ॥ खड्गाय नमः ॥ ४ ॥ पाशाय नमः ॥ ५ ॥ अंकुशाय नमः ॥ ६ ॥ गदायै नमः ॥ ७ ॥ त्रिशूलाय नमः ॥ ८ ॥ पद्माय नमः ॥ ९ ॥ चक्राय नमः ॥ १० ॥ इत्यायुधानि पूजयेत् ॥ इत्थमावरणपूजां कृत्वा । धूपदीपनैवेद्यतांबूलदक्षिणानीराजनैः संपूज्य । वक्ष्यमाणविधिना अर्घ्यं दत्त्वा साष्टांगं प्रणम्य यथाविधि जपेत् ॥ अस्य पुरश्चरणं षट्लक्षजपः ॥ अन्यत्सर्वं पूर्ववत् । तथा च–रसलक्षं जपो होमः समिद्भिः खदिरस्य च ॥ इत्थं जपादिभिः सिद्धं स्वेष्टसिद्धौ प्रयोजयेत् ॥ १ ॥ इति षट्वर्णात्मकभौममंत्रविधानम् ॥ ॥ अथ धनपुत्रादिप्रदमंगलव्रतविधानम् ॥ (स्कांदे मंत्रमहोदधौ च) मार्गशीर्षे वैशाखे वा शुक्लपक्षे चंद्रतारादिबलान्विते भौमवासरे व्रतं प्रगृह्य वक्ष्यमाणविधिना संवत्सरपर्यंतं कार्य्यम् ॥ तद्यथा ॥ मंगलवारे अरुणोदयवेलायामुत्थाय शौचविधिं विधाय । अपामार्गकाष्ठेन मौनपूर्वकं दंतधावनं कृत्वा नद्यादौ यथाविधि स्नात्वा संध्यादिनित्यक्रियां समाप्य शिवालये गृहे वा रक्तवाससी परिधाय रक्तगोमयलिप्तमंडले स्वासनेप्राङ्मुख उदङ्मुखो वा

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

उपविश्य । दक्षिणपार्श्वे रक्तचंदनपुष्पादीनि संपाद्य सपवित्रकरः आचम्य प्राणानायम्य । देशकालौ संकीर्त्य मम जन्मराशेः सकाशान्नामराशेः सकाशाज्जन्मलग्नाद्वर्षलग्नाद्गोचराद्वा चतुर्थाष्टमद्वादशाद्यनिष्टस्थानस्थितभौमसूचितसूचयिष्यमाणसर्वानिष्ट फलनिवृत्तिद्वारा तृतीयैकादशस्थानस्थितवदुत्तमफलप्राप्त्यर्थमायुरारोग्यसुखपुत्रधनप्राप्त्यर्थं श्रीभौमदेवताप्रीत्यर्थं भौमव्रतं करिष्ये । तदंगत्वेनन्यासध्यानपूजार्घ्यदानादि च करिष्ये । इति संकल्प्य (प्रारंभदिने गणपतिपूजनं पुण्याहवाचनं च कुर्य्यात्) ततः ॥ अथ देवेश ते भक्त्या करिष्ये व्रतमुत्तमम् ॥ ऋणव्याधिविनाशाय धनसंतानहेतवे ॥ १ ॥ इति प्रार्थ्य कर्ता स्वदेहे न्यासान्कुर्य्यात् ॥ ॐ मंगलाय नमः अंघ्र्योः ॥ १ ॥ ॐ भूमिपुत्राय नमः जानुनोः ॥ २ ॥ ॐ ऋणहर्त्रे नमः ऊर्वोः ॥ ३ ॥ ॐ धनप्रदाय नमः कट्योः ॥ ४ ॥ ॐ स्थिरासनाय नमः गुह्ये ॥ ५ ॥ ॐ महाकालाय नमः उरसि ॥ ६ ॥ ॐ सर्वकर्मावरोधकाय नमः वामबाहौ ॥ ७ ॥ ॐ लोहिताय नमः दक्षिणबाहौ ॥ ८ ॥ ॐ लोहिताक्षाय नमः गले ॥ ९ ॥ ॐ सामगानां कृपाकराय नमः मुखे ॥ १० ॥ ॐ धरात्मजाय नमः नासिकायाम् ॥ ११ ॥ ॐ कुजाय नमः अक्ष्णोः ॥ १२ ॥ ॐ भौमाय नमः ललाटे ॥ १३ ॥ ॐ भूतिदाय नमः भ्रुवोर्मध्ये ॥ १४ ॥ ॐ भूमिनंदनाय नमः शिरसि ॥ १५ ॥ ॐ अंगारकाय नमः शिखायाम् ॥ १६ ॥ ॐ यमाय नमः सर्वांगे ॥ १७ ॥ ॐ सर्वरोगापहारकाय नमः बाहुद्वये ॥ १८ ॥ ॐ वृष्टिकर्त्रे नमः मूर्द्धादिपादपर्यंतम् ॥ १९ ॥ ॐ वृष्टिहर्त्रे नमः चरणादिमस्तकांतम् ॥ २० ॥ ॐ सर्वकामफलप्रदाय नमः दिक्षु ॥ २१ ॥ ॐ आराय नमः नाभौ ॥ १ ॥ ॐ वक्राय नमः वक्षसि ॥ २ ॥ ॐ भूमिजाय नमः मूर्ध्नि ॥ ३ ॥ एवं न्यासं कृत्वा ध्यायेत् ॥ 'रक्तमाल्यांबर

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

धरः शक्तिशूलगदाधरः ॥ चतुर्भुजो मेषगमो वरदः स्याद्धरासुतः ॥ १ ॥ एवं ध्यात्वा अर्घ्यं संस्थाप्य पूजां कुर्यात् । तद्यथा— त्रिकोणे स्थंडिले यथाविधि ताम्रकलशं संस्थाप्य तत्र एकविंशतिकोष्ठाढ्यं त्रिकोणं ताम्रयंत्रमथवा रक्तचंदननिर्मितां शूलशक्तिगदाधरां मेषमारूढां भौमप्रतिमां संस्थाप्य पूर्ववत्प्राणप्रतिष्ठां कृत्वा आवाहनं कुर्यात् ॥ ॐ एह्येहि भगवन्ब्रह्मन्नंगारक महाप्रभो ॥ त्वयि सर्वं समायातं त्रैलोक्यं सचराचरम् ॥ १ ॥ भौममावाहयिष्यामि तेजोमूर्तिं दुरासदम् ॥ रुद्ररूपमनिर्देश्यं वक्रं च रुधिरप्रियम् ॥ २ ॥ ॐ अग्निर्मूर्द्धादिवःककुत्पतिः पृथिव्याअयंअपाꣳरेताꣳसिजिन्वति ॥ १ ॥ ॐ अंगारकाय विद्महे शक्तिहस्ताय धीमहि तन्नो भौमः प्रचोदयात् ॥१॥ इति भौममावाह्य पाद्यादिरक्तपुष्पांतैरुपचारैः संपूज्य आवरणपूजां कुर्यात् । षट्कोणे आग्नेयादिकोणकेसरेषु मध्ये दिक्षु च । ॐ ह्रां हृदयाय नमः ॥१॥ ॐ ह्रीं शिरसे स्वाहा॥२॥ ॐ ह्रूं शिखायै वषट् ॥३॥ ॐ ह्रैं ह्रैंह्रैंकवचाय हुम् ॥४॥ ॐ हंसः नेत्रत्रयाय वौषट् ॥५॥ ॐ खंखः अस्त्राय फट् इति पूजयेत् । ततः एकविंशतिकोष्ठेषु । ॐ मंगलाय नमः पादौ पूजयामि० ॥ १ ॥ ॐ भूमिपुत्राय नमः आनुनी पूजयामि ॥ २ ॥ ॐ ऋणहर्त्रे नमः ऊरू पू० ॥ ३ ॥ ॐ धनप्रदाय नमः कटी पू० ॥ ४ ॥ ॐ स्थिरासनाय नमः गुह्यं पू० ॥ ५ ॥ ॐ महाकायाय नमः उरः पूजयामि ॥ ६ ॥ ॐ सर्वकर्मावरोधकाय नमः वामबाहुं पू० ॥७॥ ॐ लोहिताय नमः दक्षिणबाहुं पू० ॥८॥ ॐ लोहिताक्षाय कंठं पू० ॥९॥ ॐ सामगानां कृपाकराय नमः मुखं पू० ॥ १०॥ ॐ धरात्मजाय नमः नासिकां पूजयामि ॥११॥ ॐ कुजाय नमः नेत्रद्वयं पू० ॥१२॥ ॐ भौमाय नमः ललाटं पू० ॥१३॥ ॐ भूतिदाय नमः भ्रुवोर्मध्यं पू०॥१४॥ ॐ भूमिनंदनाय नमः मस्तकं पूं० ॥१५॥ ॐ अंगारकाय नमः शिखां पूज

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

❀ यामि॥१६॥ॐ यमाय नमः सर्वांगं पू०॥१७॥ॐ सर्वरोगापहारकाय नमः बाहुद्वयं पू०॥१८॥ॐ वृष्टिकर्त्रे नमः मूर्धादिपादपर्यंतं पूज०॥१९॥ॐ वृष्ट्यपहर्त्रे नमः चरणादिमस्तकपर्यंतं पू०॥२०॥ ॐ सर्वकामफलप्रदाय नमः ॥ दिशः पूजयामि इति पूजयेत् ॥२१॥ ततः तद्बाह्यत्रिकोणेषु । ॐ वक्राय नमः ॥१॥ ॐ आराय नमः॥२॥ॐ भूमिजाय नमः ॥३॥ इति पूजयेत् । तद्बहिरष्टदले पूर्वादिक्रमेण । ॐ ब्राह्म्यै नमः ॥ १ ॥ ॐ माहेश्वर्यै नमः ॥ २ ॥ ॐ कौमार्यै नमः ॥ ३ ॥ ॐ वैष्णव्यै नमः ॥ ४ ॥ॐ वाराह्यै नमः ॥ ५ ॥ ॐ इन्द्राण्यै नमः ॥ ६ ॥ ॐ चामुंडायै नमः ॥ ७ ॥ ॐ महालक्ष्म्यै नमः ॥ ८ ॥ इति मातृकाः पूजयामि इति पूजयेत् । तद्बाह्ये भूपुरे पूर्वादिक्रमेण । ॐ इन्द्राय नमः ॥ १ ॥ ॐ अग्नये नमः ॥२॥ ॐ यमाय नमः ॥ ३ ॥ ॐ निर्ऋतये नमः ॥ ४ ॥ ॐ वरुणाय नमः ॥ ५ ॥ ॐ वायवे नमः ॥ ६ ॥ ॐ कुबेराय नमः ॥ ७ ॥ ॐ ईशानाय नमः ॥ ८ ॥ ईशानपूर्वयोर्मध्ये । ॐ ब्रह्मणे नमः ॥ ९ ॥ निर्ऋतिपश्चिमयोर्मध्ये । ॐ अनंताय नमः ॥ १०॥ इति दशदिक्पालान्पूजयेत् । तद्बाह्ये । ॐ वज्राय नमः ॥ १ ॥ ॐ शक्तये नमः ॥ २ ॥ ॐ दंडाय नमः ॥ ३ ॥ ॐ खड्गाय नमः ॥ ४ ॥ ॐ पाशाय नमः ॥ ५ ॥ ॐ अंकुशाय नमः ॥ ६ ॥ ॐ गदायै नमः ॥ ७ ॥ॐ त्रिशूलाय नमः ॥ ८ ॥ ॐ पद्माय नमः ॥ ९ ॥ ॐ चक्राय नमः ॥ १० ॥ इत्यस्त्राणि पूजयेत् ॥ एवमावरणपूजां कृत्वा धूपदीपगोधूमान्ननैवेद्यतांबूलदक्षिणानीराजनादिभिः संपूज्यार्घ्यं दद्यात् । तद्यथा—जलपूर्ण ताम्रपात्रे रक्तगंधरक्तपुष्पाक्षतफलानि निःक्षिप्य जानुभ्यामवनीं गत्वा । " ॐ भूमिपुत्र महातेजः स्वेदोद्भव पिनाकिनः ॥

* मंगलयंत्रमिदम्—प्र. ३ चि. पृ. नं. ३०५.

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

श्रेयोर्थी त्वां प्रपन्नोहं गृहाणार्घ्यं नमोस्तु ते ॥ १ ॥ प्रसीद देव देवेश विघ्नहारिन्धरात्मज ॥ गृहाणार्घ्यं मया दत्तं. मम शांतिप्रदो भव ॥ २ ॥ रक्तप्रवालसंकाश जपाकुसुमसन्निभ ॥ महीसुत महाबाहो गृहाणार्घ्यं नमोस्तु ते ॥ ३ ॥ इत्यर्घ्यं दत्त्वा पूर्वोक्तैर्नामभिः प्रणम्य एकविंशतिप्रदक्षिणाः कृत्वा साष्टाङ्गं प्रणमेत् ॥ ततः खदिरांगारकेन स्वपुरतः ऋणरेखात्रयं समं कृत्वा वामपादेन प्रमार्जयेत् । तत्र मंत्रौ–दुःखदौर्भाग्यनाशाय पुत्रसंतानहेतवे ॥ कृतरेखात्रयं वामपादेनैतत्प्रमार्ज्म्यहम् ॥ १ ॥ ऋणदुःखविनाशाय मनोभीष्टार्थसिद्धये ॥ मार्जयाम्यसिता रेखास्तिस्रो जन्मत्रयोद्भवाः ॥ २ ॥ ततः पुष्पांजलिं गृहीत्वा प्रार्थनां कुर्यात् ॥ धरणीगर्भसंभूतं विद्युत्तेजःसमप्रभम् ॥ कुमारं शक्तिहस्तं च मंगलं प्रणमाम्यहम् ॥ १ ॥ ऋणहर्त्रे नमस्तुभ्यं दुःखदारिद्र्यनाशिने ॥ नमामि द्योतमानाय सर्वकल्याणकारिणे ॥ २ ॥ देवदानवगंधर्वयक्षराक्षसपन्नगाः ॥ सुखं यांति यतस्तस्मै नमो धरणिसूनवे ॥ ३ ॥ यो वक्रगतिमापन्नो नृणां विघ्नं प्रयच्छति ॥ पूजितः सुखसौभाग्यं तस्मै क्ष्मासूनवे नमः ॥ ४ ॥ प्रसादं कुरु मे नाथ मंगलप्रद मंगल ॥ मेषवाहन रुद्रात्मन्पुत्रान्देहि धनं यशः ॥ ५ ॥ अंगारक महाभाग भगवन्भक्तवत्सल ॥ त्वां नमामि ममाशेषमृणमाशु विमोचय ॥ ६ ॥ ऋणरोगादिदारिद्र्यं ये चान्ये चापमृत्यवः ॥ भयक्लेशमनस्तापा नश्यंतु मम सर्वदा ॥ ७ ॥ अतिवक्र दुराराध्य भोगमुक्तजितात्मनः ॥ तुष्टो ददासि साम्राज्यं रुष्टो हरसि तत्क्षणात् ॥ ८ ॥ विरंचिशक्रविष्णूनां मनुष्याणां तु का कथा ॥ तेन त्वं सर्वसत्त्वेन ग्रहराजो महाबलः ॥ ९ ॥ पुत्रान्देहि धनं देहि त्वामस्मि शरणं गतः ॥ ऋणदारिद्र्यदुःखेन शत्रूणां च. भयात्ततः ॥ १० ॥ इति प्रार्थ्य पुष्पांजलिं दद्यात् । ततः ब्राह्मणान्संपूज्य गुरवे दक्षिणां दत्त्वा पूजायां निवेदितान्नेन एकभक्तव्रतं कुर्यात् ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

एवं प्रतिभौमादिनं संवत्सरावधि कृत्वा समाप्ते व्रते सर्वतोभद्रमंडलमध्ये यथाविधि ताम्रकलशं संस्थाप्य तत्र वरुणमावाह्य संपूज्य तदुपरि स्वर्णमयीं भौमप्रतिमां संस्थाप्य प्राणप्रतिष्ठां कृत्वा षोडशोपचारैः संपूजयेत् ॥ ततः ईशान्यां त्रिकोणे स्थंडिले अग्निं प्रतिष्ठाप्य कुशकंडिकां कृत्वा आघारावाज्यहोमं विधाय "ॐ अग्निर्मूर्धा०" इति मंत्रेण भौमगायत्र्या वा अष्टोत्तरशतं तिलहोमं कृत्वा पूर्णपात्रदानांतं होमशेषं समाप्य दिक्पालेभ्यो माषभक्तबलिं दत्त्वा कलशोदकेन सपत्नीकं यजमानं पूर्वोक्तमंगलनामभिः वेदमंत्रैश्च अभिषिच्य यजमानः स्वर्णमूर्त्यादिकमाचार्याय दत्त्वा पंचाशद्ब्राह्मणान् गोधूमान्नेन भोजयेत् ॥ एवमेव स्त्रीधनपुत्रसौ भाग्यकामनया कुर्यात्—तथा च । "एवं व्रतपरा नारी प्राप्नुयात्सुभगा सुतान् ॥ धनाप्त्यै ऋणनाशाय व्रतं कुर्यात्पुमानपि ॥ २ ॥ अग्निर्मूर्धेत्यपि मनुं वैदिकं ब्राह्मणो जपेत् ॥ तथांगारकगायत्रीं सर्वाभीष्टप्रसिद्धये ॥ ३ ॥ इति मंगलविधानं समाप्तम् ॥ ॥

॥ अथ तंत्रोक्तबृहस्पतिमंत्रपुरश्चरणम् (मंत्रमहोदधौ ।) मंत्रो यथा—"बृं बृहस्पतये नमः" इत्यष्टाक्षरो मंत्रः ॥ अस्य बृहस्पति मंत्रस्य ब्रह्मा ऋषिः । अनुष्टुप् छंदः । बृहस्पतिर्देवता । बृं बीजम् । नमः शक्तिः । सर्वेष्टसिद्ध्यर्थे जपे विनियोगः ॥ ॐ ब्रह्मऋषये नमः शिरसि ॥ १ ॥ ॐ अनुष्टुप्छंदसे नमः मुखे ॥ २ ॥ ॐ बृहस्पतिदेवतायै नमः हृदये ॥ ३ ॥ ॐ बृं बीजाय नमः गुह्ये ॥ ४ ॥ ॐ नमः शक्तये नमः पादयोः ॥ ५ ॥ इति ऋष्यादिन्यासः ॥ ॐ ब्रां अंगुष्ठाभ्यां नमः ॥ १ ॥ ॐ ब्रीं तर्जनीभ्यां नमः ॥ २ ॥ ॐ ब्रूं मध्यमाभ्यां नमः ॥ ३ ॥ ॐ ब्रैं अनामिकाभ्यां नमः ॥ ४ ॥ ॐ ब्रौं कनिष्ठिकाभ्यां नमः ॥ ५ ॥ ब्रः करतलकरपृष्ठाभ्यां नमः ॥ ६ ॥ इति करन्यासः ॥ एवं हृदयादिन्यासं कृत्वा ध्यायेत् ॥ अथ ध्यानम् ॥ "रत्नाष्टापदवस्त्रराशिममलं दक्षात्कि

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

रंतं करादासीनं विपणौ करं निदधतं रत्नादिराशौ परम् ॥ पीतालेपनपुष्पवस्त्रमखिलालंकारसंभूषितं विद्यासागरपारगं सुरगुरुं वंदे सुवर्णप्रभम् ॥ १ ॥ इति ध्यात्वा । पीठे ॐ धर्माय नमः ॥ १ ॥ ॐ ज्ञानाय नमः ॥ २ ॥ ॐ वैराग्याय नमः ॥ ३ ॥ ॐ ऐश्वर्याय नमः ॥ ४ ॥ ॐ अधर्माय नमः ॥ ५ ॥ ॐ अज्ञानाय नमः ॥ ६ ॥ ॐ अवैराग्याय नमः ॥ ७ ॥ ॐ अनैश्वर्य्याय नमः ॥ ८ ॥ इति पीठदेवताः संपूजयेत् (अत्र पीठशक्त्यभावः) ततो मूले मूर्तिं प्रकल्प्य (अथवा कलशोपरि सुवर्णमयीं प्रतिमां संस्थाप्य) आवाहनादिपीतगंधपुष्पांतैरुपचारैः संपूज्य । आवरणार्चनं कुर्य्यात् ॥ तद्यथा–षट्कोणे आग्नेयादिकोणेषु मध्ये दिक्षु च । ॐ ब्रां हृदयाय नमः ॥ १ ॥ ॐ ब्रीं शिरसे स्वाहा ॥ २ ॥ ॐ ब्रूं शिखायै वषट् ॥ ३ ॥ ॐ ब्रैं कवचाय हुं ॥ ४ ॥ ॐ ब्रौं नेत्रत्रयाय वौषट् ॥ ५ ॥ ॐ ब्रः अस्त्राय फट् ॥ ६ ॥ इति षडंगपूजनम् ॥ तद्बहिर्भूपुरे पूर्वादिदिक्षु इंद्रादिदश दिक्पालान् । तद्बाह्ये वज्राद्यायुधानि च संपूज्य । धूपादिनीराजनांतपूजां कृत्वा साष्टांगं प्रणम्य । जपं कुर्य्यात् ॥ अस्य पुरश्चरणमशीतिसहस्रजपः । तथा च–जपित्वाशीतिसाहस्रं हुत्वाब्जेन घृतेन वा ॥ सिद्धे मनौ प्रकुर्वीत प्रयोगानिष्टसिद्धये ॥ १ ॥ हरिद्राकुसुमैर्हुत्वा घृताक्तैर्दिवसत्रयम् ॥ स विंशतिशतं मंत्री वांसांसि लभते मणीन् ॥ २ ॥ शत्रुरोगादिपीडासु स्वजने कलहोद्भवे ॥ जुहुयात्पिप्पलोत्थाभिः समिद्भिस्तन्निवृत्तये ॥ ३ ॥ इति बृहस्पतिमंत्रविधानम् ॥ अथ तंत्रोक्तशुक्रमंत्रविधानम् । तत्रैव मंत्रो यथा–"ॐ वस्त्रं मे देहि शुक्राय स्वाहा" इत्येकादशवर्णो मंत्रः ॥ १ ॥ अस्य मंत्रस्य ब्रह्मा ऋषिः ॥ विराट् छंदः । शुक्रो देवता । ॐ बीजम् । स्वाहा शक्तिः ॥ सर्वेष्टसिद्धयर्थे जपे विनियोगः । ॐ ब्रह्म

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ऋषये नमः शिरसि ॥ १ ॥ ॐ विराट्छंदसे नमः मुखे ॥ २ ॥ ॐ शुक्रदेवतायै नमः हृदये ॥ ३ ॥ ॐ बीजाय नमः गुह्ये ॥ ४ ॥ ॐ स्वाहा शक्तये नमः पादयोः ॥ ५ ॥ ॥ इति ऋष्यादिन्यासः ॥ ॐ अंगुष्ठाभ्यां नमः ॥ १ ॥ ॐ वस्त्रं तर्ज नीभ्यां नमः ॥ २ ॥ ॐ मे मध्यमाभ्यां नमः ॥ ३ ॥ ॐ देहि अनामिकाभ्यां नमः ॥ ४ ॥ ॐ शुक्राय कनिष्ठिकाभ्यां नमः ॥ ५ ॥ ॐ स्वाहा करतलकरपृष्ठाभ्यां नमः ॥ ६ ॥ इति करन्यासः । एवं हृदयादिन्यासं कृत्वा ध्यायेत् ॥ "श्वेतांभोजनिष ण्णमापणतटे श्वेतांबरालेपनं नित्यं भक्तजनाय संप्रददतं वासोमणीन्हाटकम् ॥ वामेनैव करेण दक्षिणकरे व्याख्यानमुद्रांकितं शुक्रं दैत्यवरार्चितं स्मितमुखं वंदे सितांगप्रभम् ॥ १ ॥" इति ध्यात्वा पूर्वोक्ते धर्मादियुते पीठे श्वेतगंधाक्षतपुष्पांतैरुपचारैः शुक्रं संपूज्य । षट्कोणे कोणकेसरेषु । मध्ये दिक्षु च । ॐ हृदयाय नमः ॥ १ ॥ ॐ वस्त्रं शिरसे स्वाहा ॥ २ ॥ ॐ मे शिखायै वषट् ॥ ३ ॥ ॐ देहि कवचाय हुं ॥ ४ ॥ ॐ शुक्राय नेत्रत्रयाय वौषट् ॥ ५ ॥ ॐ स्वाहा अस्त्राय फट् ॥ ६ ॥ इत्यंगानि संपूज्य । ततो बाह्ये भूपुरे पूर्वादिषु इंद्रादिदिक्पालान् तद्बहिर्वज्राद्यायुधानि च पूजयेत् ॥ ततो धूपादिनीराजनांतपूजां कृत्वा जपं कुर्यात् ॥ अस्य पुरश्चरणमयुतजपः ॥ तथा—अयुतं प्रजपेन्मंत्रं दशांशं जुहुयाद्घृतैः ॥ सुगंधैः श्वेतकुसुमैर्जुहुयाच्छुक्रवासरे ॥ ॥ १ ॥ एकविंशतिवारं यो लभते सोंशुकं मणीन् ॥ इतिशुक्रमंत्रविधानं समाप्तम् ॥ ॥ अथ वेदोक्तसूर्यादिनवग्रहमंत्रप्रयोगः ॥ आचम्य । प्राणानायम्य । (संकल्पः) देशकालौ संकीर्त्य । श्रुतिस्मृतिपुराणोक्तफलप्राप्त्यर्थं मम (यजमानस्य वा) जन्मराशेः सकाशान्नामराशेः सकाशाद्वा जन्मलग्नाद्वर्षलग्नाद्वा चतुर्थाष्टमद्वादशाद्यनिष्टस्थानस्थितामुकग्रहपरिहारद्वारा तृतीयैकादशस्थान

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

स्थितवदुत्तमफलप्राप्त्यर्थमायुरारोग्यप्राप्त्यर्थं च अमुकग्रहस्य अमुकसंख्यया जपं करिष्ये इति संकल्प्य । न्यासं कुर्यात् । तत्रादौ
सूर्यमंत्रन्यासादिप्रयोगः । आकृष्णेनेत्यस्य हिरण्यस्तूप ऋषिः॥ अनुष्टुप्छंदः । सविता देवता । रजसेति बीजम् । वर्त्तमान इति
शक्तिः । सूर्यप्रीतये जपे विनियोगः ॥ ॐ. हिरण्यस्तूपऋषये नमः शिरसि ॥ १ ॥ ॐ त्रिष्टुप्छंदसे नमः मुखे ॥ २ ॥ ॐ सवि
तृदेवतायै नमः हृदये ॥ ३ ॥ ॐ रजसा बीजाय नमः गुह्ये ॥ ४ ॥ ॐ वर्त्तमानशक्तये नमः पादयोः ॥ ५ ॥ इति ऋष्यादि
न्यासः । ॐ आकृष्णेनेत्यंगुष्ठाभ्यां नमः ॥ १ ॥ ॐ रजसेति तर्ज्जनीभ्यां नमः ॥ २ ॥ ॐ वर्तमान इति मध्यमाभ्यां नमः ॥३॥
निवेशयन्नमृतम्मर्त्यं चेत्यनामिकाभ्यां नमः ॥४॥ ॐ हिरण्ययेन सविता रथेनेति कनिष्ठिकाभ्यां नमः ॥ ५ ॥ ॐ आदेवो भुवना
नि पश्यन्निति करतलकरपृष्ठाभ्यां नमः ॥ ६ ॥ इति करन्यासः ॥ ॐ आकृष्णेनेति हृदयाय नमः ॥ १ ॥ ॐ रजसेति शिरसे
स्वाहा ॥ २ ॥ ॐ वर्तमान इति शिखायै वषट् ॥ ३ ॥ ॐ निवेशयन्नमृतम्मर्त्यं चेति कवचायहुं ॥४॥ ॐ हिरण्ययेन सवि
ता रथेनेति नेत्रत्रयाय वौषट् ॥ ५ ॥ ॐ आदेवो भुवनानि पश्यन्नित्यस्त्राय फट् ॥ ६॥ इति हृदयादिन्यासः ॥ ॐ आकृष्णेनेति
शिरसि ॥ १ ॥ ॐ रजसेति ललाटे ॥ २ ॥ ॐ वर्तमान इति मुखे ॥३॥ ॐ निवेशयन्निति हृदये ॥ ४ ॥ ॐ अमृतं नाभौ ॥५॥
ॐ मर्त्यं चेति कट्याम् ॥ ६ ॥ ॐ हिरण्ययेनेत्यूर्वोः ॥ ७ ॥ ॐ सवितेति जानुनोः ॥ ८ ॥ ॐ रथेनेति जंघयोः ॥ ९ ॥ ॐ आदे
वो याति गुल्फयोः ॥ १० ॥ ॐ भुवनानीति पादयोः ॥ ११ ॥ ॐ पश्यन्निति सर्वाङ्गेषु न्यसेत् ॥ १२ ॥ इति मंत्रन्यासः ॥ एवं
न्यासं कृत्वा ध्यायेत् ॥ अथ ध्यानम् ॥ "ॐ पद्मासनः पद्मकरो द्विबाहुः पद्मद्युतिः सप्ततुरंगवाहः ॥ दिवाकरो लोकगुरुः किरीटी

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मायि प्रसादं विदधातु देवः ॥ १ ॥" एवं ध्यात्वा मानसोपचारैः संपूज्य जपं कुर्यात् । तत्र मंत्रः—ॐ आकृष्णेनरजसावर्त्तमानो निवेशयन्नमृतम्मर्त्यञ्च ॥ हिरण्ययेनसवितारथेनादेवोयातिभुवनानिपश्यन् ॥ १ ॥ इति सूर्यमंत्रः ॥ अस्य जपसंख्या सप्त सहस्राणि ७००० । जपान्ते अर्कसमित्तिलपायसघृतैर्दशांशहोमः ॥ तदशांशेन तर्पणं तदशांशेन मार्ज्जनं तदशांशेन ब्राह्मणभोजनं च कार्यम् अन्यत्सर्वं पूर्ववत् । अथ सूर्यदानद्रव्याणि । माणिक्यगोधूमसवत्सधेनुः कौसुंभवासो गुडहेमताम्रम् ॥ आरक्तकं चंदनमंबुजं च वदंति दानं रविनंदनाय ॥ १ ॥ इति सूर्यमंत्रपुरश्चरणम् ॥ १ ॥ ॥ अथ चंद्रमंत्रप्रयोगः ॥ ॐ इमं देवा इति मंत्रस्य गौतम ऋषिः।द्विपदाविराट् छंदः । सोमो देवता । असपत्नमिति बीजम् । सोमप्रीत्यर्थे जपे विनियोगः ॥ ॐ गौतमऋषये नमः शिरसि ॥ १ ॥ ॐ द्विपदाविराट्छंदसे नमः मुखे ॥ २ ॥ ॐ सोमदेवतायै नमः हृदि ॥ ३ ॥ ॐ असपत्नबीजाय नमः गुह्ये ॥ ४ ॥ ॐ सोमप्रीत्यर्थे जपे विनियोगाय नमः सर्वांगे इति ऋष्यादिन्यासः ॥ ५ ॥ ॐ इमं देवाऽअसपत्नꣳसुवध्वमित्यंगुष्ठाभ्यां नमः ॥ १ ॥ ॐ महतेक्षत्रायेति तर्जनीभ्यां नमः ॥ २ ॥ ॐ महतेज्यैष्ठ्यायेति मध्यमाभ्यां नमः ॥ ३ ॥ ॐ महते जानराज्यायेंद्रस्येंद्रियायेत्यनामिकाभ्यां नमः ॥ ४ ॥ ॐ इमममुष्यपुत्रममुष्यै कनिष्ठिकाभ्यां नमः ॥ ५ ॥ ॐ पुत्रमस्यै व्विशऽएषवोमीराजासोमोऽस्माकं ब्राह्मणाना ७ राजेति करतलकरपृष्ठाभ्यां नमः ॥ ६ ॥ इति करन्यासः ॥ ॐ इमंदेवाऽअसपत्नꣳसुवध्वमिति हृदयाय नमः ॥ १ ॥ ॐ महतेक्षत्रायेति शिरसे स्वाहा ॥ २ ॥ ॐ महतेज्यैष्ठ्यायेति

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

शिखायै वषट् ॥ ३ ॥ ॐ महतें जानराज्यायेंद्रस्येंद्रियायेति कवचायहुं ॥ ४ ॥ ॐ इममुममुष्यपुत्रममुष्यै नेत्रत्रया
य वौषट् ॥ ५ ॥ ॐ पुत्रमस्यै विशऽएषवोमीराजासोमोऽस्माकं ब्राह्मणानाꣳ राजा इत्यस्त्राय फट् ॥ ६॥ इति हृदयादिन्यासः ॥
ॐ इमं देवा इति शिरसि ॥१॥ॐ असपत्नमिति ललाटे ॥२॥ ॐ सुवध्वमिति नासिकायाम्॥३॥ ॐ महतेक्षत्राय मुखे ॥४॥ॐ
महतेज्यैष्ठचायेति कंठे ॥५॥ ॐ महतेजानराज्यायेंद्रस्येंद्रियायेति हृदये ॥६॥ ॐ इममुष्येतिनाभौ ॥७॥ ॐ पुत्रममुष्यैकट्याम्॥
॥ ८ ॥ ॐ पुत्रमस्यै जंघयोः ॥९॥ ॐ विशऽएषवोमीराजासोमोस्माकंब्राह्मणानाꣳराजेति पादयोः ॥१०॥ एवं न्यासविधिं कृत्वा
ध्यायेत ॥"ॐ श्वेतांबरः श्वेतविभूषणश्च श्वेतद्युतिर्दंडकरो द्विबाहुः॥चन्द्रोऽमृतात्मा वरदः किरीटी मयिं प्रसादं विदधातु देवः ११॥
इति ध्यात्वा मानसोपचारैः संपूज्य जपं कुर्यात् । तत्र मंत्रः । "ॐ इमंदेवाऽअंसपत्नꣳसुवध्वम्महतेक्षत्राय महतेज्यैष्ठचायमहते
जानराज्ज्यायेंद्रस्येंद्रियायइममुष्य पुत्रममुष्यै पुत्रमस्यैविशऽएषवोमीराजासोमोस्माकं ब्राह्मणानाꣳराजा ॥ १ ॥ अस्य जपसं
ख्या एकादशसहस्राणि ११००० जपांते पलाशसमिंत्तिलपायसघृतैर्दशांशहोमः॥अन्यत्सर्वं पूर्ववत्।अथ दानद्रव्याणि । सद्वंशपात्र
स्थिततण्डुलाश्च कर्पूरमुक्ताफलशुभ्रवस्त्रम् ॥ युगोपयुक्तं वृषभं च रौप्यं चन्द्राय दद्याद्धृतपूर्णकुंभम् ॥१॥ इति चंद्रमंत्रप्रयोगः ॥२॥
अथ भौममंत्रप्रयोगः । ॐ अग्निर्मूर्द्धेति मंत्रस्य विरूपाक्ष ऋषिः।गायत्री छंदः।भौमो देवता । ककुद्बीजम्। भौमप्रीतये जपे विनियो
गः ॥ ॐ विरूपाक्षऋषये नमः शिरसि ॥१॥ ॐ गायत्रीछंदसे नमः मुखे ॥ २ ॥ ॐ भौमदेवतायै नमः हृदि ॥३ ॥ॐ ककुद्बीजा

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यꣳनमः गुह्ये ॥ ४ ॥ ॐ भौमप्रीतये जपे विनियोगाय नमः सर्वांगे ॥ ५ ॥ इति ऋष्यादिन्यासः ॥ ॐ अग्निर्मूर्द्धेत्यंगुष्ठाभ्यां नमः ॥ १ ॥ ॐ दिवः ककुदिति तर्जनीभ्यां नमः ॥ २ ॥ ॐ पतिः पृथिव्याऽअयमिति मध्यमाभ्यां नमः ॥ ३ ॥ ॐ अपामित्य नामिकाभ्यां नमः ॥ ४ ॥ ॐ रेताꣳसीति कनिष्ठिकाभ्यां नमः ॥ ५ ॥ ॐ जिन्वतीति । करतलकरपृष्ठाभ्यां नमः ॥ ६ ॥ इति करन्यासः ॥ ॐ अग्निर्मूर्द्धेति हृदयाय नमः ॥ १ ॥ ॐ दिवः ककुदिति शिरसे स्वाहा ॥ २ ॥ ॐ पतिः पृथिव्याऽअयमिति शिखायै वषट् ॥३॥ ॐ अपां कवचाय हुं ॥४॥ ॐ रेताꣳसीति नेत्रत्रयाय वौषट् ॥५॥ ॐ जिन्वतीत्यस्त्राय फट् ॥६॥ इति हृदयादिन्यासः ॥ ॐ अग्निरिति शिरसि ॥ १ ॥ ॐ मूर्द्धा ललाटे ॥२॥ ॐ दिवो मुखे ॥३॥ ॐ ककुदितिहृदये ॥ ४ ॥ ॐ पतिर्नाभौ ॥ ५ ॥ ॐ पृथिव्याः कट्याम् ॥ ६ ॥ ॐ अयमूर्वोः ॥ ७ ॥ ॐ अपां जानुनोः ॥ ८ ॥ ॐ रेताꣳसि गुल्फयोः ॥ ९ ॥ ॐ जिन्वति पादयोः ॥ १० ॥ इति न्यासविधिं कृत्वा ध्यायेत् ॥"ॐ रक्तांबरो रक्तवपुः किरीटी चतुर्भुजो मेषगतो गदाभृत् ॥ धरासुतः शक्तिधरश्च शूली सदा मम स्याद्वरदः प्रशांतः॥१॥"इति ध्यात्वा मानसोपचारैः संपूज्य जपं कुर्यात्॥तत्र मंत्रः । ॐ अग्निर्म्मूर्द्धा दिवः ककुत्पतिꣳपृथिव्याऽअयम् ॥ अपाꣳरेताꣳसिजिन्वति ॥ इति मंत्रः॥ भौमे दशसहस्राणीति जपसंख्या १०००० ।जपांते खदिरसमित्तिलपायसघृतैर्दशांशहोमः ॥ अन्यत्सर्वं पूर्ववत् ॥ अथ दानद्रव्याणि॥प्रवालगोधूममसूरिकाश्च वृषोरुणश्चापि गुडः सुवर्णम् ॥ आरक्तवस्त्रं करवीरपुष्पं ताम्रं च भौमाय वदंति दानम् ॥ १ ॥ इति भौममंत्रप्रयोगः ॥ ॥ अथ बुधमंत्रप्रयोगः ॥ ॐ उद्बुध्यस्वेति मंत्रस्य परमेष्ठी ऋषिः। बृहतीछंदः । बुधो देवता । त्वमिष्टापूर्तेसमिति बीजम् ।बुधप्रीतये जपे विनियोगः ॥ ॐ परमे

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ष्टीऋषये नमः शिरसि॥१॥ ॐ बृहतीछंदसे नमः मुखे॥२॥ ॐ बुधदेवतायै नमः हृदये॥३॥ ॐ त्वमिष्टापूर्तैसमिति बीजाय नमः गुह्ये ॥४॥ ॐ बुधप्रीतये जपे विनियोगाय नमः सर्वांगे ॥५॥ इति ऋष्यादिन्यासः ॥ ॐ उद्बुध्यस्वाग्नेप्रतिजागृहि अंगुष्ठाभ्यां नमः ॥ १ ॥ ॐ त्वमिष्टापूर्तैसं तर्जनीभ्यां नमः ॥ २ ॥ ॐ सृजेथामयंच मध्यमाभ्यां नमः ॥३॥ ॐ अस्मिन्त्सधस्थेऽअध्युत्तरस्मिन् अनामिकाभ्यां नमः ॥४॥ ॐ विश्वेदेवा कनिष्ठिकाभ्यां नमः ॥५॥ ॐ यजमानश्चसीदत करतलकरपृष्ठाभ्यां नमः ॥६॥ इति कर न्यासः ॥ ॐ उद्बुध्यस्वाग्नेप्रतिजागृहि हृदयाय नमः ॥१॥ ॐ त्वमिष्टापूर्तैसं शिरसे स्वाहा ॥२॥ ॐ सृजेथामयं च शिखायै वषट् ॥ ३ ॥ ॐ अस्मिन्त्सधस्थेऽअध्युत्तरस्मिन्कवचाय हुं ॥४॥ ॐ विश्वेदेवा नेत्रत्रयाय वौषट् ॥ ५ ॥ ॐ यजमानश्चसीदत अस्त्राय फट् ॥६॥ इति हृदयादिन्यासः ॥ ॐ उद्बुध्यस्व शिरसि ॥१॥ ॐ अग्नेप्रति ललाटे ॥ २ ॥ ॐ जागृहित्वं मुखे ॥३॥ ॐ इष्टापू र्तैं सं हृदये ॥४॥ सृजेथामयं च नाभौ॥५॥ ॐ अस्मिन्त्सधस्थे कट्याम् ॥६॥ ॐ अध्युत्तरस्मिन्नूर्वोः॥७॥ॐ विश्वेदेवा जानुनोः ॥ ८ ॥ ॐ यजमानश्च पादयोः ॥ ९ ॥ ॐ सीदत सर्वांगे ॥ १० ॥ इति न्यासविधिं कृत्वा ध्यायेत् ॥ "पीतांबरः पीतवपुः किरीटी चतुर्भुजो दंडधरश्च हारी ॥ चर्मासिधृक् सोमसुतः सदा मे सिंहाधिरूढो वरदो बुधश्च ॥ १ ॥" इति ध्यात्वा मानसोपचारैः संपूज्य जपं कुर्यात् ॥ तत्र मंत्रः--ॐ उद्बुध्यस्वाग्नेप्प्रतिं जागृहित्वमिष्टापूर्तैसर्ठ्सृजेथामुयश्चं ॥ अस्मिन्त्सुधेस्थेऽअध्युत्तरस्मिुन्विश्वेदेुवायजमानश्चसदित ॥ १ ॥ इति मंत्रः (बुधेचाष्टसहस्रकमिति जपसंख्या ८०००) जपांते अपामार्गसमित्तिलपायसघृतैर्दशांशहोमः । अन्यत्सर्वं पूर्ववत् । अथ दानद्रव्याणि । चैलं च नीलं कलधौतकांस्यं मुद्गाज्यगारु

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

त्मकसर्वपुण्यम् ॥ दासी च दंतौ द्विरदस्य नूनं वदंति दानं विधुनंदनाय ॥ १ ॥ इति बुधमंत्रप्रयोगः ॥ ४ ॥ ॥
॥ अथ बृहस्पतिमंत्रप्रयोगः ॥ ॐ बृहस्पते इति मंत्रस्य गृत्समद ऋषिः । त्रिष्टुप् छंदः । बृहस्पतिर्देवता । बृहस्पतिप्रीत्यर्थे जपे
विनियोगः ॥ ॐ गृत्समदऋषये नमः शिरसि ॥ १ ॥ ॐ त्रिष्टुप्छंदसे नमः मुखे ॥ २ ॥ ॐ बृहस्पतिदेवतायै नमः हृदये ॥
॥ ३ ॥ इति ऋष्यादिन्यासः । ॐ बृहस्पतेऽअति यदर्य्यो इत्यंगुष्ठाभ्यां नमः ॥ १ ॥ ॐ अर्हाद्युमदिति तर्जनीभ्यां नमः ॥
॥ २ ॥ ॐ विभाति क्रतुमादिति मध्यमाभ्यां नमः ॥ ३ ॥ ॐ जनेषु अनामिकाभ्यां नमः ॥ ४ ॥ ॐ यद्दीदयच्छवसऽऋतप्र
जाततदस्मासु कनिष्ठिकाभ्यां नमः ॥ ५ ॥ ॐ द्रविणंधेहिचित्रामिति करतलकरपृष्ठाभ्यां नमः ॥ ५ ॥ इति करन्यासः ।
ॐ बृहस्पते ऽअतियदर्य्यो हृदयाय नमः ॥ १ ॥ ॐ अर्हाद्युमदिति शिरसे स्वाहा ॥ २ ॥ ॐ विभाति क्रतुमदिति शिखायै वषट्
॥ ३ ॥ ॐ जनेषु कवचाय हुं ॥ ४ ॥ ॐ यद्दीदयच्छवसऽऋतप्रजाततदस्मासु नेत्रत्रयाय वौषट् ॥ ५ ॥ द्रविणंधेहिचित्रमित्य
स्त्राय फट् ॥ ६ ॥ इति हृदयादिन्यासः ॥ ॐ बृहस्पते इति शिरसि ॥ १ ॥ ॐ अतियदर्यो ललाटे ॥ २ ॥ ॐ अर्हाद्युमन्मुखे
॥ ३ ॥ विभाति क्रतुमज्जनेषु नाभौ ॥ ४ ॥ ॐ यद्दीदयत्कट्याम् ॥ ५ ॥ ॐ शवसऽऋतप्रजा ऊर्वोः ॥ ६ ॥ ॐ ततदस्मासुद्र
विणं जानुनोः ॥ ७ ॥ ॐ धेहि चित्रं पादयोः ॥ ८ ॥ इति मंत्रन्यासः ॥ एवं न्यासं कृत्वा ध्यायेत् ॥ ॥ अथ ध्यानम् ॥
"पीताम्बरः पीतवपुः किरीटी चतुर्भुजो देववगुरुः प्रशांतः ॥ दधाति दंडं च कमण्डलुं च तथाक्षसूत्रं वरदोस्तु मह्यम् " ॥३१०॥
॥ १ ॥ इति ध्यात्वा मानसोपचारैः संपूज्य जपं कुर्यात् ॥ ॐ बृहस्पतेऽअतियदर्योऽअर्हाद्युमद्विभातिक्रतुमज्जनेषुयद्दीदयच्छवस

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ऽऋतुप्रजाततदुस्मासुद्रविंणंधेहिचित्रम् ॥ ५ ॥ इति बृहस्पतिमंत्रः ॥ " एकोनविंशतिर्जीवे सहस्राणि १९००० विदुर्बुधाः " इतिजपसंख्या । जपांते अश्वत्थसमित्तिलपायसघृतैर्दशांशहोमः । अन्यत्सर्वं पूर्ववत् ॥ अथ दानद्रव्याणि । शर्करा च रजनी तुरंगमः पीतधान्यमपि पीतमंबरम् ॥ पुष्पराजलवणे च कांचनं प्रीतये सुरगुरोः प्रदीयताम् ॥ १ ॥ इति गुरुमंत्रजपप्रयोगः ॥ ५ ॥ अथ शुक्रमंत्रजपप्रयोगः । ॐ अन्नात्परिस्रुत इति मंत्रस्य पराशर ऋषिः । शक्करी छंदः । शुक्रो देवता । रसं ब्रह्मणो इति बीजम् । शुक्रप्रीत्यर्थं जपे विनियोगः ॥ ॐ पराशरऋषये नमः शिरसि ॥ १ ॥ ॐ शक्करीछंदसे नमः मुखे ॥ २ ॥ ॐ शुक्रदेवतायै नमः हृदये ॥ ३ ॥ ॐ रसंब्रह्मण इति बीजाय नमः गुह्ये ॥ ४ ॥ इति ऋष्यादिन्यासः । ॐ अन्नात्परिस्रुत इत्यंगुष्ठाभ्यां नमः ॥ १ ॥ ॐ रसंब्रह्मण व्यपिबत् इति तर्जनीभ्यां नमः ॥ २ ॥ ॐ क्षत्रंपय इति मध्यमाभ्यां नमः ॥ ३ ॥ ॐ सोमं प्रजापतिरित्यनामिकाभ्यां नमः ॥ ४ ॥ ॐ ऋतेनसत्यमिंद्रियंव्विपानर्ठ्शुक्रमंधसः कनिष्ठिकाभ्यां नमः ॥ ५ ॥ ॐ इंद्रस्येंद्रियमिदंपयोमृतंमधु इति करतलकरपृष्ठाभ्यां नमः ॥ ६ ॥ इति करन्यासः ॥ ॐ अन्नात्परिस्रुतो हृदयाय नमः ॥ १ ॥ ॐ रसंब्रह्मणाव्यपिबत् शिरसे स्वाहा ॥ २ ॥ ॐ क्षत्रंपयः शिखायै वषट् ॥ ३ ॥ ॐ सोमंप्रजापतिरिति कवचाय हुं ॥ ४ ॥ ॐ ऋतेनसत्यमिंद्रियंव्विपानर्ठ्शुक्रमंधसो नेत्रत्रयाय वौषट् ॥ ५ ॥ ॐ इंद्रस्येंद्रियमिदंपयोमृतम्मधु इत्यस्त्राय फट् ॥ ६ ॥ इति हृदयादिन्यासः ॥ ॐ अन्नात्परिस्रुत इति शिरसि ॥ १ ॥ ॐ रसंब्रह्मणा ललाटे ॥ २ ॥ ॐ व्यपिवत्क्षत्रं मुखे ॥ ३ ॥ ॐ पयः सोमं हृदये ॥ ४ ॥ ॐ प्रजापतिर्नाभौ ॥ ५ ॥ ॐ ऋतेनसत्यं कट्याम् ॥ ६ ॥ ॐ इंद्रियंविपानम् गुदे

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

॥ ७ ॥ ॐ शुक्रं वृषणयोः ॥ ८ ॥ ॐ अंधस ऊर्वोः ॥ ९ ॥ ॐ इंद्रस्येंद्रियमिदंपयो जानुनोः ॥ १० ॥ ॐ अमृतं पादयोः ॥ ११ ॥ ॐ मधु सर्वशरीरे च ॥ १२ ॥ न्यसेत् ॥ इति मंत्रन्यासः । एवं न्यासं कृत्वा ध्यायेत् ॥ अथ ध्यानम् ॥ "श्वेतांबरः श्वेतवपुः किरीटीचतुर्भुजो दैत्यगुरुः प्रशांतः ॥ तथाक्षसूत्रं च कमंडलुं च दंडं च बिभ्रद्वरदोस्तु मह्यम् ॥ १ ॥" इति ध्यात्वा मान सोपचारैः संपूज्य जपं कुर्य्यात् ॥ तत्र मंत्रः—ॐ अन्नात्परिस्रुतोरसं ब्रह्मणाव्यपिबत् ॥ क्षत्रम्पयः सोमम्प्रजापतिंऋतेनसत्य मिंद्रियंव्विपानठ्ंशुक्रमन्धसऽइंद्रस्येंद्रियमिदम्पयोमृतम्मधु ॥ १ ॥ शुक्रे एकादशैव तु । इति जपसंख्या ११००० ॥ अथ दानद्रव्याणि । चित्रांबरं शुभ्रतुरंगमश्च धेनुश्च वज्रं रजतं सुवर्णम् ॥ सुतंडुलानुत्तमगंधयुक्तान् वदंति दानं भृगुनंदनाय ॥ ६ ॥ इति शुक्रमंत्रजपप्रयोगः ॥ अथ शनैश्चरमंत्रजपप्रयोगः । ॐ शन्नोदेवीरिति मंत्रस्य दध्यङ्ङाथर्वण ऋषिः गायत्री छंदः । शनिर्देवता । आपो बीजम् । वर्तमान इति शक्तिः । शनैश्चरप्रीत्यर्थे जपे विनियोगः ॥ ॐ दध्यङ्ङाथर्वणऋषये नमः शिरसि ॥ १ ॥ ॐ गायत्रीछंदसे नमः मुखे ॥ २ ॥ ॐ शनैश्चरदेवतायै नमः हृदये ॥ ३ ॥ ॐ आपोबीजाय नमः गुह्ये ॥ ४ ॥ ॐ वर्त्तमानशक्तये नमः पादयोः ॥ ५ ॥ इति ऋष्यादिन्यासः । ॐ शन्नोदेवीरित्यंगुष्ठाभ्यां नमः ॥ १ ॥ ॐ अभीष्टये तर्जनीभ्यां नमः ॥ २ ॥ ॐ आपोभवंतु मध्यमाभ्यां नमः ॥३॥ ॐ पीतये अनामिकाभ्यां नमः ॥४॥ ॐ शंय्योरिति कनिष्ठिकाभ्यां नमः ॥ ५ ॥ ॐ अभिस्रवंतुनः करतलकरपृष्ठाभ्यां नमः ॥ ६ ॥ इति करन्यासः ॥ ॐ शन्नोदेवीरिति हृदयाय नमः ॥ १ ॥ ॐ अभिष्टये शिरसे स्वाहा ॥ २ ॥ ॐ आपो भवंतु शिखायै वषट् ॥ ३ ॥ ॐ पीतये कवचाय हुं ॥ ४ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ॐ शंय्योरिति नेत्रत्रयाय वौषट् ॥ ५ ॥ अभिस्रवंतुनः अस्त्राय फट् ॥ ६ ॥ इति हृदयादिन्यासः । ॐ शन्न इति शिरसि ॥ १ ॥ ॐ देवीरिति ललाटे ॥ २ ॥ ॐ अभीष्टये मुखे ॥ ३ ॥ ॐ आपोहृदये ॥ ४ ॥ ॐ भवंतु नाभौ ॥ ५ ॥ ॐ पीतये कट्याम् ॥ ॥ ६ ॥ ॐ शंय्योरूर्वोः ॥ ७ ॥ ॐ अभिस्रवंतु जानुनोः ॥ ८ ॥ ॐ नः पादयोः ॥ ९ ॥ इति मंत्रन्यासः ॥ एवं न्यासं कृत्वा ध्यायेत् । अथ ध्यानम् ॥ "नीलद्युतिः शूलधरः किरीटी गजस्थितस्त्रासकरो धनुष्मान् ॥ चतुर्भुजः सूर्यसुतः प्रशांतः सदास्तु मह्यं वरदो महात्मा ॥ १ ॥ इति ध्यात्वा मानसोपचारैः संपूज्य जपं कुर्य्यात् । तत्र मंत्रः—ॐ शन्नो देवीरभिष्टयऽआपोभवंतु पीतये । शंय्योरभिस्रवंतुनः ॥ १ ॥ " त्रयोविंशतिर्मंदे चेति जपसंख्या २३००० ॥ जपांतेशमीसमित्तिलपायसघृतैर्दशांशहोमः । अन्यत्सर्वं पूर्ववत् । अथ दानद्रव्याणि । माषांश्च तैलं विमलेंद्रनीलं तिलाः कुलित्था महिषी च लोहम् ॥ कृष्णा च धेनुः प्रवदंति नूनं दुध्राय दानं रविनंदनाय ॥ १ ॥ इति शनैश्चरमंत्रप्रयोगः ॥ ७ ॥ ॥ अथ राहुमंत्रप्रयोगः ॥ ॐ कयान इति मंत्रस्य वामदेव ऋषिःगायत्रीछंदः । राहुर्देवता । कयान इति बीजम् । शचिरिति शक्तिः । राहुप्रीत्यर्थं जपे विनियोगः ॥ ॐ वामदेवऋषये नमः शिरसि ॥ १ ॥ ॐ गायत्रीछंदसे नमः मुखे ॥ २ ॥ ॐ राहुदेवतायै नमः हृदये ॥ ३ ॥ ॐ कयान इति बीजाय नमः गुह्ये ॥ ४ ॥ ॐ शचिरिति शक्तये नमः पादयोः ॥ ५ ॥ इति ऋष्यादिन्यासः । ॐ कयान इत्यंगुष्ठाभ्यां नमः ॥ १ ॥ ॐ चित्र इति तर्जनीभ्यां नमः ॥ २ ॥ ॐ आभुव इति मध्यमाभ्यां नमः ॥ ३ ॥ ॐ दूतीसदावृध इत्यनामिकाभ्यां नमः ॥ ४ ॥ ॐ सखाकया इति कनिष्ठिकाभ्यां नमः ॥ ५ ॥ ॐ शचिष्ठयावृता इति

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

करतलकरपृष्ठाभ्यां नमः ॥ ६ ॥ इति करन्यासः ॥ ॐ कयान इति हृदयाय नमः ॥ १ ॥ ॐ चित्र इति शिरसे स्वाहा ॥ २ ॥ ॐ आभुव इति शिखायै वषट् ॥ ३ ॥ ॐ दूतीसदावृध इति कवचाय हुं ॥ ४ ॥ ॐ सखाकया इति नेत्रत्रयाय वौषट् ॥ ५ ॥ ॐ शचिष्ठयावृता इत्यस्त्राय फट् ॥ ६ ॥ ॐ कया शिरसि ॥ १ ॥ ॐ न इति ललाटे ॥ २ ॥ ॐ चित्र मुखे ॥ ३ ॥ ॐ आभुव दूती नाभौ ॥ ४ ॥ ॐ सदावृधः कट्याम् ॥ ५ ॥ ॐ सख ऊर्वोः ॥ ६ ॥ ॐ कया जानुनोः ॥ ७ ॥ ॐ शचिष्ठया गुल्फयोः ॥ ८ ॥ ॐ वृता पादयोः ॥ ९ ॥ इतिमंत्रन्यासः । एवं न्यासं कृत्वा । ध्यायेत् । अथ ध्यानम् ॥ नीलांबरो नीलवपुः किरीटी करालवक्त्रः करवालशूली ॥ चतुर्भुजश्चर्मधरश्च राहुः सिंहासनस्थो वरदोस्तु मह्यम् ॥ १ ॥ इति ध्यात्वा मानसोपचारैः संपूज्य जपं कुर्य्यात् ॥ राहुमंत्रः ॐ कया नश्चित्रऽआभुवदूतीसदावृधत्सखाकयाशचिष्ठयावृता ॥ ८ ॥ राहोरष्टादशैव तु १८००० इति दूर्वासामित्तिलपायसघृतैर्दशांशहोमः ॥ अन्यत्सर्वं पूर्ववत् ॥ अथ दानद्रव्याणि ॥ गोमेदरत्नं च तुरंगमश्च सुनीलचैलामलकंबलं च ॥ तिलाश्च तैलं खलु लोहमिश्रं स्वर्भानवे दानमिदं वदंति ॥ १ ॥ इति राहुमंत्रजपप्रयोगः ॥ ८ ॥ ॥ अथ केतुमंत्रजप विधानम् ॥ केतुं कृण्वन्निति मंत्रस्य मधुऋषिः ॥ गायत्री छंदः । केतुर्देवता । अपेशसे इति बीजम् । मय्र्या शक्तिः । केतुप्रीत्यर्थे जपे विनियोगः ॥ ॐ मधु ऋषये नमः शिरसि ॥ १ ॥ ॐ गायत्रीछंदसे नमः मुखे ॥ २ ॥ ॐ केतुदेवतायै नमः हृदये ॥ ३ ॥ ॐ अपेशसे इति बीजाय नमः गुह्ये ॥ ४ ॥ ॐ मय्र्याशक्तये नमः पादयोः ॥ ५ ॥ इति ऋष्यादिन्यासः ॥ ॐ केतुंकृण्वन् इत्यंगुष्ठाभ्यां नमः ॥ १ ॥ ॐ अकेतवे इति तर्जनीभ्यां नमः ॥ २ ॥ ॐ पेशोमय्र्या इति मध्यमाभ्यां नमः ॥ ३ ॥ ॐ अपे

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

शसे अनामिकाभ्यां नमः ॥ ४ ॥ ॐ समुषद्भिः कानिष्ठिकाभ्यां नमः ॥ ५ ॥ ॐ अजायथाः करतलकरपृष्ठाभ्यां नमः ॥ ६ ॥
इति करन्यासः ॥ ॐ केतुंकृण्वन्निति हृदयाय नमः ॥ १ ॥ ॐ अकेतवे शिरसे स्वाहा ॥ २ ॥ ॐ पेशोमर्य्या शिखायै वषट् ॥
॥३॥ ॐ अपेशसे कवचाय हुं ॥४॥ ॐ समुषद्भिर्नेत्रत्रयाय वौषट् ॥५॥ ॐ अजायथा इत्यस्त्राय फट् ॥६॥ इति हृदयादिन्यासः ॥
ॐ केतुं शिरसि ॥ १ ॥ ॐ कृण्वन् ललाटे ॥ २ ॥ ॐ अकेतवे मुखे ॥ ३ ॥ ॐ पेशो हृदये ॥ ४ ॥ ॐ मर्य्या नाभौ ॥
॥ ५ ॥ ॐ अपेशसे कट्याम् ॥ ६ ॥ ॐ समूर्वोः ॥ ७ ॥ उषद्भिर्जानुनोः ॥ ८ ॥ ॐ अजायथाः पादयोः ॥ ९ ॥ इति
मंत्रन्यासः । एवं न्यासं कृत्वा ध्यायेत् ॥ अथ ध्यानम् ॥ "धूम्रो द्विबाहुर्वरदो गदाभृद्गृध्रासनस्थो विकृताननश्च ॥ किरीटकेयूर
विभूषितांबरः सदास्तु मे केतुगणः प्रशांतः ॥ १ ॥" इति ध्यात्वा मानसोपचारैः संपूज्य जपं कुर्यात् । तत्र मंत्रः ॥ ॐ केतुं
कृण्वन्नकेतवेपेशोमर्य्याऽअपेशसे ॥ समुषद्भिरजायथाः ॥१॥ केतोः सप्त सहस्राणि ७००० जपसंख्या प्रकीर्तिता ॥ ततो जपान्ते
कुशसमित्तिलपायसघृतैर्दशांशहोमः ॥ अन्यत्सर्वं पूर्ववत् ॥ अथ दानद्रव्याणि ॥ वैडूर्यरत्नं सतिलं च तैलं सुकंबलं चापि मदो मृग
स्य ॥ शस्त्रं च केतोः परितोषहेतोश्छागस्य दानं कथितं मुनीन्द्रैः ॥ १ ॥ इति केतुमंत्रजपविधानं समाप्तम् ॥ अथ सूर्यस्तोत्र
प्रारंभः ॥ सुमंतुरुवाच ॥ अस्तावीच्च ततः सांबः कृशो धमनिसंततः ॥ राजन्नामसहस्रेण सहस्रांशुं दिवाकरम् ॥ १ ॥ खिद्यमानं
ततो दृष्ट्वा सूर्यः कृष्णात्मजं तदा ॥ स्वप्नेस्य दर्शनं दृष्ट्वा पुनर्वचनमब्रवीत् ॥ २ ॥ श्रीसूर्य उवाच ॥ सांबसांबमहाबाहो शृणु जांब
वतीसुत ॥ अलं नाम सहस्रेण पठ चेमं शुभं स्तवम् ॥ ३ ॥ यानि गुह्यानि नामानि पवित्राणि शुभानि च ॥ तानि

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ते कीर्तयिष्यामि प्रयत्नादवधारय ॥ ४ ॥ वैकर्तनो विवस्वांश्च मार्तंडो भास्करो रविः ॥ लोकप्रकाशकः श्रीमाँल्लो
कचक्षुर्ग्रहेश्वरः ॥ ५ ॥ लोकसाक्षी त्रिलोकेशः कर्ता हर्ता तमिस्रहा ॥ तपनस्तापनश्चैव शुचिः सप्ताश्ववाहनः ॥
॥ ६ ॥ गभस्तिहस्तो ब्रह्मा च सर्वदेवनमस्कृतः ॥ एकविंशतिरित्येष स्तव इष्टस्सदा मम ॥ ७ ॥ शरीरारोग्यद
श्चैव धनवृद्धियशस्करः ॥ स्तवराज इति ख्यातस्त्रिषुलोकेषु विश्रुतः ॥ ८ ॥ य एतेन महाबाहो द्वे संध्येऽस्तमनोदये ॥ स्तौति मां
प्रणतो भूत्वा सर्वपापैः प्रमुच्यते॥९॥मानसं वाचिकं वापि कायिकं यच्च दुष्कृतम् ॥ एकजाप्येन तत्सर्वं प्रणश्यति ममाग्रतः॥१०॥
एष जप्यश्च होमश्च संध्योपासनमेव च ॥ बलिमंत्रोऽर्घमंत्रोथ धूपमंत्रस्तथैव च ॥११॥ अन्नप्रदाने स्नाने च प्रणिपाते प्रदक्षिणे ॥
पूजितोऽयं महामंत्रः सर्वपापहरः शुभः ॥ १२ ॥ एवमुक्त्वा सभगवान्भास्करो जगतांपतिः ॥ आमंत्र्य कृष्णतनयं तत्रैवांतरधी
यत ॥ १३ ॥ सांबोपि स्तवराजेन स्तुत्वा सप्ताश्ववाहनम् ॥ प्रीतात्मा नीरुजः श्रीमांस्तस्माद्रोगाद्विमुक्तवान् ॥ १४ ॥ इति
भविष्योत्तरपुराणे सूर्यस्तवराजः समाप्तः ॥ ॥ अथ आदित्यहृदयस्तोत्रप्रारंभः ॥ "ततो युद्धपरिश्रांतं समरे चिंतयास्थितम्॥
रावणं चाग्रतो दृष्ट्वा युद्धाय समुपस्थितम् ॥ १ ॥ दैवतैश्च समागम्य द्रष्टुमभ्यागतो रणम् ॥ उपगम्याब्रवीद्रामम्मगस्त्यो भगवांस्त
दा ॥ २ ॥ रामराम महाबाहो शृणु गुह्यं सनातनम् ॥ येन सर्वानरीन्वत्स समरे विजयिष्यते ॥३॥ आदित्यहृदयं पुण्यं सर्वशत्रुवि
नाशनम् ॥ जयावहं जपं नित्यमक्षयं परमं शिवम् ॥ ४ ॥ सर्वमंगलमांगल्यं सर्वपापप्रणाशनम् ॥ चिंताशोकप्रशमनमायुर्वर्धन
मुत्तमम् ॥ ५ ॥ रश्मिमन्तं समुद्यंतं देवासुरनमस्कृतम् ॥ पूजयस्व विवस्वंतं भास्करं भुवनेश्वरम् ॥ ६ ॥ सर्वदेवात्मको ह्येष

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तेजस्वी रश्मिभावनः ॥ एष देवासुरगणाँल्लोकान्याति गभस्तिभिः ॥ ७ ॥ एष ब्रह्मा च विष्णुश्च शिवः स्कंदः प्रजापतिः ॥ महेंद्रो धनदः कालो यमः सोमो ह्यपांपतिः ॥ ८ ॥ पितरो वसवः साध्या अश्विनौ मरुतो मनुः ॥ वायुर्वह्निः प्रजाः प्राण ऋतुकर्ता प्रभाकरः ॥ ९ ॥ आदित्यः सविता सूर्यः खगः पूषा गभस्तिमान् ॥ सुवर्णसदृशो भानुर्हिरण्यरेता दिवाकरः ॥ १० ॥ हरिदश्वः सहस्रार्चिः सप्तसप्तिर्मरीचिमान् ॥ तिमिरोन्मथनः शंभुस्त्वष्टा मार्तण्डकोंशुमान् ॥११॥ हिरण्यगर्भः शिशिरस्तपनोहस्करो रविः ॥ अग्निगर्भोदितेः पुत्रः शंखः शिशिरनाशनः ॥ १२ ॥ व्योमनाथस्तमोभेदी ऋग्यजुःसामपारगः ॥ धनवृष्टिरपांमित्रो विंध्यवीथी प्लवंगमः ॥ १३ ॥ आतपी मंडली मृत्युः पिंगलः सर्वतापनः ॥ कविर्विश्वो महातेजा रक्तः सर्वभवोद्भवः ॥१४॥ नक्षत्रग्रहतारा णामधिपो विश्वभावनः ॥ तेजसामपि तेजस्वी द्वादशात्मन्नमोस्तु ते ॥ १५ ॥ नमः पूर्वाय गिरये पश्चिमायाद्रये नमः ॥ ज्योतिर्गणानां पतये दिनाधिपतये नमः ॥ १६ ॥ जयाय जयभद्राय हर्य्यश्वाय नमोनमः ॥ नमोनमः सहस्रांशो आदित्याय नमोनमः ॥ ॥ १७ ॥ नम उग्राय वीराय सारंगाय नमोनमः ॥ नमः पद्मप्रबोधाय प्रचंडाय नमोस्तु ते ॥ १८ ॥ ब्रह्मेशानाच्युतेशाय सूरायादित्यवर्चसे ॥ भास्वते सर्वभक्षाय रौद्राय वपुषे नमः ॥ १९ ॥ तमोघ्नाय हिमघ्नाय शत्रुघ्नायामितात्मने ॥ कृतघ्नघ्नाय देवाय ज्योतिषां पतये नम ॥२०॥ तप्तचामीकराभाय हरये विश्वकर्मणे ॥ नमस्तमोभिनिघ्नाय रुचये लोकसाक्षिणेः॥२१॥ नाशयत्येष वै भूतं तमेव सृजति प्रभुः ॥ पायत्येष तपत्येष वर्षत्येष गभस्तिभिः ॥२२॥ एष सुप्तेषु जागर्ति भूतेषु परिनिष्ठितः ॥ एष चैवाग्निहोत्रं च फलं चैवाग्निहोत्रिणाम् ॥ २३ ॥ देवाश्च क्रतवश्चैव क्रतूनां फलमेव च ॥ यानि कृत्यानि लोकेषु सर्वेषु परमप्रभुः ॥ २४ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

एनमापत्सु कृच्छ्रेषु कांतारेषु भयेषु च ॥ कीर्तयन्पुरुषः काश्चिन्नावसीदति राघव ॥ २५ ॥ पूजयस्वैनमेकाग्रो देवदेवं जगत्पतिम् ॥ एतत्त्रिगुणितं जप्ता युद्धेषु विजयिष्यति ॥ २६ ॥ अस्मिन्क्षणे महाबाहो रावणं त्वं जहिष्यसि ॥ एवमुक्ता ततोगस्त्यो जगाम स यथागतम् ॥ २७ ॥ एतच्छ्रुत्वा महातेजा नष्टशोकोऽभवत्तदा ॥ धारयामास सुप्रीतो राघवः प्रयतात्मवान् ॥ २८ ॥ आदित्यं प्रेक्ष्य जप्त्वेदं परं हर्षमवाप्तवान् ॥ त्रिराचम्य शुचिर्भूत्वा धनुरादाय वीर्यवान् ॥ २९ ॥ रावणं प्रेक्ष्य हृष्टात्मा जयार्थं समुपागतम् ॥ सर्वयत्नेन महता वृतस्तस्य वधेऽभवत् ॥ ३० ॥ अथ रविरवदन्निरीक्ष्य रामं मुदितमनाः परमं प्रहृष्यमाणः ॥ निशिचरपतिसंक्षयं विदित्वा सुरगणमध्यगतो वचस्त्वरेति ॥ ३१ ॥" इति वाल्मीकीयरामायणे आदित्यहृदयस्तोत्रं सम्पूर्णम् ॥ अथ सूर्याथर्वशीर्षमुपनिषत् ॥ अथ सूर्याथर्वाङ्गिरसं व्याख्यास्यामः ॥ ब्रह्मा ऋषिः । आदित्यो देवता । गायत्री छंदः । हंसाद्यग्निनारायणयुक्तं बीजम् । हृल्लेखा शक्तिः । द्विपदादिसर्गसंयुक्तं कीलकम् । धर्मार्थकाममोक्षेषु जपे विनियोगः ॥ षट्स्वरारूढबीजेन षडंगं रक्ताम्बुजसंस्थं सप्ताश्वरथिनं हिरण्यवर्णं चतुर्भुजं पद्मद्वयाभयवहरस्तं कालचक्रप्रणेतारं च श्रीसूर्यनारायणं यऽएवं वेद स वै ब्राह्मणः ॐ भूः ॐ भुवः ॐ स्वः ॐ महः ॐ जनः ॐ तपः ॐ सत्यं तत्सवितु॰ परोरजसेसावदोम् ॐ आपोज्योतीरसोमृतं ब्रह्मभूर्भुवः स्वरोम् । सूर्यआत्माजगतस्तस्थुषश्च । सूर्याद्वैखल्विमानि भूतानि जायन्ते । सूर्याद्यज्ञाः पर्जन्योऽन्नमात्मा । नमस्तेआदित्याय त्वमेवकेवलं कर्त्तासि । त्वमेवप्रत्यक्षं विष्णुरसि । त्वमेवप्रत्यक्षं ब्रह्मासि । त्वमेवप्रत्यक्षंरुद्रोऽसि । त्वमेव प्रत्यक्षमृगसि । त्वमेवप्रत्यक्षं यजुरसि । त्वमेवप्रत्यक्षंसामासि । त्वमेवप्रत्यक्षमथर्वासि । त्वमेवसर्वं छंदोऽसि । आदित्याद्वायुर्जा

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यते आदित्याद्भूमिर्जायते । आदित्यादापोजायन्ते। आदित्याज्ज्योतिर्जायते । आदित्याद्व्योम दिशो जायंते । आदित्याद्वेदा जायंते । आदित्याद्देवा जायंते । आदि० त्योवाऽएषएतन्मंडलंतपति । असावादित्यो ब्रह्म । आदित्योऽन्तःकरणमनोबुद्धिचित्ताहंकाराः । आदित्यो वै व्यानसमानोदानापानप्राणाः । आदित्यो वै श्रोत्रत्वक्चक्षुरसनानासाः । आदित्योवैवाक्पाणिपादोपस्थपायूनि । आदित्यो वै शब्दस्पर्शरूपरसगंधाः । आदित्यो वै वचनादानगमनानंदविसर्गाः । आनंदमयो ज्ञानमयोविज्ञानमय आदित्यः । नमो मित्राय भानवे मृत्योर्मा पाहि भ्राजिष्णवे विश्वहेतवे नमः । सूर्यो नो दिवस्पातु वातोअन्तरिक्षात्। अग्निर्नः पार्थिवेभ्यः । सूर्याद्वै भूतानि सूर्येण पालितानि तु । सूर्ये लयं प्राप्नुवंति । यः सूर्यः सोहमेव च । चक्षुर्नो देवः सविता । चक्षुर्न उत पर्वतः । चक्षुर्धाता दधातु नः ादित्यायविद्महे सहस्रकरायधीमहि । तन्नः सूर्यःप्रचोदयात् । सवितापश्चात्तात् । सवितापुरस्तात् । सवितोत्तरात्तात् सविताधरात्तात् । सवितानः सुवतुसर्वतातिम्। सवितानोरासतां दीर्घमायुः ओमित्येकाक्षरं ब्रह्म घृणिरिति द्वेअक्षरे सूर्य इत्यक्षरद्वयम् । आदित्य इति । त्रीण्यक्षराणि एतद्वैसूर्यस्याष्टाक्षरमनुम् " ॐ घृणिः सूर्यआदित्य " इति मंत्रः । यः सदाहरहर्जपति । सोब्रह्मण्यो ब्राह्मणो भवति । सूर्याभिमुखं जप्त्वा महाव्याधिभयात्प्रमुच्यते । अलक्ष्मीर्नश्यति । अभक्ष्यभक्षणात् पूतो भवति । अपेयपानात्पूतोभवति । अगम्यागमात्पूतोभवति । व्रात्यसंभाषणात्पूतो भवति मध्याह्ने सूर्याभिमुखः पठेत् सद्यः पंचमहापापात्प्रमुच्यते । सैषासावित्रीविद्या न कस्यचित्प्रशंसेत् एतन्महाभागः प्रातः पठति सभाग्यवान् जायते । पशून् विंदति वेदार्थं लभते । त्रिकालं जप्त्वा क्रतुशतफलं प्राप्नोति। हस्तादित्ये जपति स महामृत्युं तरति । यएवंवेद । इत्युपनिषत् ॥इति

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सूर्याथर्वशीर्षम् ॥ इति श्रीबीकानेरराज्यान्तर्गतश्रीरत्नगढनिवासिना वसिष्ठगोत्रोद्भवश्रीरामकृष्णपौत्रेण श्रीकस्तूरीचंद्रसूनुना गौडवंशावतंसश्रीमहादेवभक्तमाध्यंदिनवाजसेनेयिना वैद्यपंडितश्रीचतुर्थीलालशर्म्मणा विरचिते "अनुष्ठानप्रकाशे" महानिबंधे पुरश्चरणकाण्डे सूर्यादिग्रहमंत्रानुष्ठानप्रकरणं समाप्तम् ॥ ९ ॥ ॥ ॥ ॥ ॥

अथ सूर्यप्रसंगात्सर्वरोगोपशमनविधानप्रकरणं लिख्यते ॥ तत्र तावत्सामान्यतः सर्वरोगप्रशमनम् (महार्णवे) "रोगाः कर्मोद्भवाः केचित्केचिद्दोषसमुद्भवाः ॥ कर्मदोषोद्भवाः केचिदेवं रोगास्त्रिधा स्मृताः ॥ १ ॥ ये रोगा नैव शाम्यंति कृते ह्यौषधकर्मणि ॥ धर्मेणैवोपशाम्यंति ते रोगाः कर्मजाः स्मृताः ॥ २ ॥ प्रायश्चित्तेपि विहिते न शाम्यन्ति विनौषधम् ॥ ये दृष्टहेतुसंभूतास्ते रोगा दोषजाः स्मृताः ॥ ३ ॥ येषां सर्वात्मना हानिर्भवेत्पुण्यैर्न केवलैः ॥ न केवलौषधैर्वापि रोगास्ते कर्मदोषजाः ॥ ४ ॥ पूर्वजन्म कृतं पापं नरकस्य परिक्षये ॥ बाधते व्याधिरूपेण तस्य कृच्छ्रादिभिः शमः ॥ ५ ॥ पूर्वजन्मकृतं पापं व्याधिरूपेण बाधते ॥ तच्छान्तिरोषधैर्दानैर्जपहोमार्चनादिभिः ॥ ६ ॥ रोगहेतौ स्थिते पापे व्याधिः शाम्यति नौषधैः ॥ असाध्यस्यापि रोगस्य प्राय श्चित्तं समाचरेत् ॥ ७ ॥ सर्वरोगविनाशाय जपः कार्यो विशेषतः ॥ मृत्युंजयस्य रुद्रस्य होमं कुर्याद्दशांशतः ॥ ८ ॥ आगमो क्तविधानेन रोगनाशो भवेद्ध्रुवम् ॥ सर्वरोगोपशांत्यर्थमभिषेकं समाचरेत् ॥ ९ ॥ सहस्रकलशैः स्नानं विष्णोर्वा शंकरस्य च ॥ देवमभ्यर्च्य विप्रेभ्यो दद्यान्मिष्टान्नभोजनम् ॥ १० ॥ तेभ्यश्च दक्षिणां दत्त्वा रोगेभ्यो मुच्यते ध्रुवम् ॥ कार्यः षडंगरुद्रस्य जपो वा रोगशांतये ॥ ११ ॥ महारुद्रविधानेनासाध्यो रोगोपि शाम्यति ॥ अपामार्जनसंज्ञेन मालामंत्रेण मार्जयेत् ॥ १२ ॥ मार्ज

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नाद्रोगिणः सर्वे रोगानश्यंत्यसंशयम् ॥ अच्युतानंतगोविंदेत्येवं नामत्रयं हरेः ॥ १३ ॥ सर्वरोगोपशांत्यथ सततं व्याधिमान् जपेत् ॥ सर्वेषु ज्ञातरोगेषु प्रदद्यात्सततं नरः ॥ १४ ॥ पानीयं पायसं मुद्गाः शर्करां घृतसंयुताम् ॥ प्रतिकूलग्रहाणां च जपं होमं च पूजनम् ॥ १५ ॥ तत्तद्दोषविनाशार्थं दानं कुर्य्याद्यथोदितम् ॥ प्रतिरोगं च यद्दानं जपहोमादि कीर्तितम् ॥ १६ ॥ प्रायश्चित्तं तु तत्कृत्वा चिकित्सामारभेत्ततः ॥ प्रदद्यात्सर्वरोगघ्नं छायापात्रं विधानतः ॥ १७ ॥ (छायापात्रविधानम्) चतुःषष्टि पलैः कांस्यभाजने निर्मिते शुभे ॥ घृतेनापूरिते तत्र स्वर्णं निष्कं विनिक्षिपेत् ॥ १८ ॥ तत्राज्ये स्वतनोश्छाया आपादतलमस्तकम् ॥ दृष्ट्वा रोगी ततोदद्याद्भाजनं तद्विजन्मने ॥ १९ ॥ पूजिताय विधानेन ततो दद्याच्च दक्षिणाम् ॥ पक्षोयमुत्तमः प्रोक्तः कांस्यपात्रसुवर्णयोः ॥ २० ॥ दद्याद्वित्तानुसारेण पात्रं स्वर्णं च बुद्धिमान् ॥ दानमंत्रः आयुर्बलं यशो वर्च्च आज्य स्वर्णं तथामृतम् ॥ आधारं तेजसा यस्मादतः शांतिं प्रयच्छ मे ॥ २१ ॥ मंत्रेणानेन विप्राय सर्वरोगोपशांतये ॥ पात्रं सुवर्णसहितं दद्यात्सं कल्पपूर्वकम् ॥ २२ ॥ "व्याधिप्रतिरूपदानविधानम्" दद्यात्सर्वामयव्याधिप्रतिरूपं निवृत्तये ॥ सुवर्णेन सरत्नेन रौप्येणापि स्वशक्तितः ॥ २३ ॥ निर्मितं च शतैकेन निष्काणां वा तदर्द्धतः ॥ त्रिंशता वा यथाशक्ति दद्यादुक्तविधानतः ॥ २४ ॥ तंडुलैः पूरिते व्याधिप्रतिरूपं सुभाजने ॥ निधायावेष्टय वस्त्रेण समलंकृत्य भूषणैः ॥ २५ ॥ समभ्यर्च्यार्थ विप्राय पूजिताय निवेदयेत् ॥ पठन्मंत्रमिमं व्याधिप्रतिरूपमथोत्सृजेत् ॥ २६ ॥ ये मां रोगाः प्रबाधन्ते देहस्थाः सततं मम ॥ गृह्णीष्व प्रतिरूपेण तान्रोगान्द्विजसत्तम ॥ २७ ॥ वाढमित्येव तद्रूपं गृह्णीयाद्ब्राह्मणस्तदा ॥ ततो रोगप्रदातासौ दीर्घमायुः प्रपद्यते ॥ २८ ॥ तंडुलानां तु

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यत्पात्रं मुख्यं तत्कांस्यसंभवम् ॥ दत्त्वा दानं तु तत्काले द्विजास्यं नावलोकयेत् ॥ २९ ॥" इति व्याधिप्रतिरूपंदानम् ॥ प्रायेण सूर्यः सर्वेषां रोगाणामधिदैवतम् ॥ आरोग्यं भास्करादिच्छेदितिप्रख्या श्रुतिः स्मृतिः ॥ इति सामान्यतः सर्वरोगशमनविधानम् ॥ अथ ज्वरशमनविधानम् (महार्णवे गार्ग्यः) " ये पुनः क्रूरकर्माणः पापाः पिशुनचेतसः । ते भवेयुः सदाशीतज्वरवंतश्च तत्पराः ॥ शांतयेऽयुतसंख्याकं कुर्य्यात्तु प्रयतो जपम् । जातवेदसमंत्रेण ब्राह्मणान्भोजयेत्ततः ॥ सुरामांसोपहाराद्यैर्बलिः सर्वत्र शस्यते । सहस्रकलशस्नानं शतभोजनमेव च ॥ " (माहेश्वरतंत्रेपि " उष्णज्वरे महेशस्य प्रकुर्यादभिषेचनम् । शीतज्वरे तथा कुर्यादभिषेकं हरेर्बुधः ॥ " (कर्मविपाकसंग्रहेपि) " मांगल्येषु च कार्येषु सततं कोपवान्नरः ॥ उष्णज्वराभिभूतः स्यात्तत्पापस्यापनुत्तये ॥ सहस्रकलशस्नानं रुद्रेणेशस्य कारयेत् । ब्राह्मणान्भोजयेच्छक्त्या जपेद्वै जातवेदसम् ॥ " (महार्णवे शातातपः) देवस्वग्रहणाच्चैव जायते विविधज्वरः । ज्वरोमहाज्वरश्चैव रौद्रो वैष्णव एव च ॥ ज्वरे रुद्रजपं कुर्य्यान्महारुद्रं महाज्वरे । महारुद्रं जपेद्यौ द्वे वैष्णवे तद्वयं जपेत् ॥ " इति ॥ रुद्रातिरुद्रमहारुद्राणि शिवानुष्ठानप्रकरणे दर्शितानि । (अथ जातवेदसमंत्रानुष्ठान प्रयोगः) पूर्वदिने पूर्वोक्तप्रायश्चित्तं कृत्वा प्रारंभदिने प्रातर्नित्यावश्यकं समाप्य सुमुहूर्त्ते शिवालयादिपवित्रस्थले स्वासने प्राङ्मुख उपविश्य । आचम्य प्राणानायम्य । देशकालौ संकीर्त्य । अमुकगोत्रोऽमुकशर्माहं मम (यजमानस्य वा) उत्पन्नज्वरस्य अमुकव्याधेर्वा जीवच्छरीराऽविरोधेन समूलनाशार्थं सद्य आरोग्यार्थं जातवेदस इति मंत्रस्यामुकसंख्यया जपं करिष्ये । इति संकल्प्य भूतशुद्धिं प्राणप्रतिष्ठामंतर्मातृकाबहिर्मातृकान्यासं च कृत्वा मूलमंत्रन्यासादिकर्म्म कुर्य्यात् । मूलमंत्रो

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यथा–" ॐ जातवेदसेसुनवामसोममरातीयतोनिदहातिवेदः॥सनःपर्षदतिदुर्गाणिविश्वानावेवसिंधुं दुरितात्यग्निः ॥ " इति चतुश्चत्वारिंशद्वर्णात्मको मंत्रः । ॐ जातवेदसः इति मंत्रस्य मारीचः काश्यप ऋषिः ।त्रिष्टुप् छंदः।जातवेदोग्निर्दुर्गादेवता। रोगशमने विनियोगः । ॐ मारीचकाश्यपऋषये नमः शिरसि । ॐ त्रिष्टुप्छन्दसे नमः मुखे । ॐ जातवेदोग्निदुर्गादेवताभ्यां नमः हृदये । इति ऋष्यादिन्यासः । ॐ जातवेदसेसुनवामु इत्यंगुष्ठाभ्यां नमः ॥ १ ॥ ॐ सोममरातीयतो इति तर्जनीभ्यां नमः ॥ २ ॥ ॐ निदहाति वेदः इति मध्यमाभ्यां नमः ॥३॥ ॐ सनः पर्षदति अनामिकाभ्यां नमः ॥४॥ ॐ दुर्गाणिविश्वानावेव इति कनिष्ठिकाभ्यां नमः ॥ ५ ॥ ॐ सिंधुं दुरितात्यग्निरिति करतलकरपृष्ठाभ्यां नमः ॥ ६ ॥ इति करन्यासः ॥ एवमेव हृदयादिषडंगन्यासं कुर्य्यात् ॥ अथ मंत्रवर्णन्यासः ॥ ॐ नमः दक्षिणपादांगुष्ठे ॥ १ ॥ ॐ जां नमः वामपादांगुष्ठे ॥ २ ॥ ॐ तं नमः दक्षगुल्फे ॥ ३ ॥ ॐ वें नमः वामगुल्फे ॥ ४ ॥ ॐ दं नमः दक्षिणजंघायाम् ॥ ५ ॥ ॐ सें नमः वामजंघायाम् ॥ ६ ॥ ॐ सुं नमः दक्षिणजानुनि ॥ ७ ॥ ॐ नं नमः वामजानुनि ॥ ८ ॥ ॐ वां नमः दक्षिणोरौ ॥ ९ ॥ ॐ मं नमः वामोरौ ॥ १० ॥ ॐ सों नमः दक्षकट्याम् ॥ ११ ॥ ॐ मं नमः वामकट्याम् ॥ १२ ॥ ॐ मं नमः लिंगे ॥ १३ ॥ ॐ रां नमः नाभौ ॥ १४ ॥ ॐ तीं नमः हृदये ॥ १५ ॥ ॐ यं नमः दक्षस्तने ॥ १६ ॥ ॐ तों नमः वामस्तने ॥ १७ ॥ ॐ निं नमः दक्षपार्श्वे ॥ १८ ॥ ॐ दं नमः वामपार्श्वे ॥ १९ ॥ ॐ हां नमः पृष्ठे ॥ २० ॥ ॐ तिं नमः दक्षस्कन्धे ॥ २१ ॥ ॐ वें नमः वामस्कंधे ॥ २२ ॥ ॐ दं नमः दक्षिणबाहुमूले ॥ २३ ॥ ॐ सं नमः दक्षबाहुमूलकूर्परयोर्मध्ये ॥ २४ ॥ ॐ नं नमः दक्षकूर्परे ॥ २५ ॥ ॐ

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पं नमः कूर्परमणिबंधयोर्मध्ये ॥ २६ ॥ ॐ सं नमः दक्षमणिबंधे ॥ २७ ॥ ॐ दं नमः अंगुष्ठमूलप्रदेशे ॥ २८ ॥ ॐ तिं नमः वामबाहुमूले ॥ २९ ॥ ॐ दुं नमः वामबाहुमूलकूर्परयोर्मध्ये ॥ ३० ॥ ॐ गीं नमः वामकूर्परे ॥ ३१ ॥ ॐ णिं नमः वामकूर्परमणिबंधयोर्मध्ये ॥ ३२ ॥ ॐ विं नमः वाममणिबंधे ॥ ३३ ॥ ॐ श्वां नमः अंगुष्ठमूलप्रदेशे ॥ ३४ ॥ ॐ नां नमः मुखे ॥ ३५ ॥ ॐ वें नमः दक्षनासायाम् ॥ ३६ ॥ ॐ वं नमः वामनासायाम् ॥ ३७ ॥ ॐ सिं नमः दक्षिणनेत्रे ॥ ॥ ३८ ॥ ॐ धुं नमः वामनेत्रे ॥ ३९ ॥ ॐ दुं नमः दक्षिणकर्णे ॥ ४० ॥ ॐ रिं नमः वामकर्णे ॥ ४१ ॥ ॐ तां नमः ललाटे ॥ ४२ ॥ ॐ त्यं नमः ललाटोपरिभागे ॥ ४३ ॥ ॐ ग्निं नमः मूर्ध्नि ॥ ४४ ॥ इति वर्णन्यासः ॥ अथ पदन्यासः ॥ ॐ जातवे दसे नमः शिखायाम् ॥ १ ॥ ॐ सुनवाम नमः ललाटे ॥ २ ॥ ॐ सोमं नमो नेत्रयोः ॥ ३ ॥ ॐ अरातीयतः नमः कर्णयोः ॥ ४ ॥ ॐ निदहाति नमः ओष्ठयोः ॥ ५ ॥ ॐ वेदः नमः जिह्वायाम् ॥ ६ ॥ ॐ सनः नमः कंठे ॥ ७ ॥ ॐ पर्षत् नमः बाह्वोः ॥ ८ ॥ ॐ अति नमः हृदये ॥ ९ ॥ ॐ दुर्गाणि नमः कुक्षौ ॥ १० ॥ ॐ विश्वा नमः कटौ ॥ ११ ॥ ॐ नावेव नमः गुह्ये ॥ १२ ॥ ॐ सिंधुं नमः ऊर्वोः ॥ १३ ॥ ॐ दुरिता नमः जानुनोः ॥ १४ ॥ ॐ अति नमः जंघयोः ॥ १५ ॥ ॐ अग्निं नमः पादयोः ॥ १६ ॥ एवं न्यासं कृत्वा ध्यायेत् । " विद्युदामसमप्रभां मृगपतिस्कंधस्थितां भीषणां कन्याभिः करवालखेटविलसद्धस्ताभिरासेविताम् ॥ हस्तैश्चक्रगदासिखेटविशिखांश्चापांकुशं तर्जनीं बिभ्राणामनलात्मिकां शशिधरां दुर्गां त्रिनेत्रां स्मरेत् ॥ ॥ १ ॥" एवं ध्यात्वा मानसोपचारैः संपूज्य पीठपूजां कुर्यात् ॥ तद्यथा–(मण्डले सर्वतोभद्रे षट्कोणांकित कर्णिके विधिना वक्ष्य

॥३१७॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

माणेन पीठं देव्याः प्रपूजयेत्) मंडूकादिपरत्तत्वांतपीठदेवताःपूर्ववत्संपूज्य। प्राचीक्रमणे। ॐ जयायै नमः॥१॥ ॐ विजयायै नमः२ ॐ भद्रायै नमः ॥ ३ ॥ ॐ भद्रकाल्यै नमः ॥ ४ ॥ ॐ सुमुख्यै नमः ॥ ५ ॥ ॐ दुर्मुख्यै नमः ॥ ६ ॥ ॐ व्याघ्रमुख्यै नमः ॥ ७ ॥ ॐ सिंहमुख्यै नमः ॥ ८ ॥ मध्ये। ॐ दुर्गायै नमः ॥ ९ ॥ इति नवपीठशक्तीः पूजयेत् ॥ ततः 'ॐ वज्रनखदंष्ट्रायुधाय महासिंहाय हुं फट् नमः' इति मंत्रेणासनं दत्त्वा तत्र मूलेन मूर्तिं प्रकल्प्य तस्यां देवतामावाह्य पाद्यादिपुष्पांतैरुपचारैः संपूज्य आवरणपूजां कुर्य्यात्। तद्यथा—षट्कोणे आग्नेयादिकोणकेसरेषु मध्ये दिक्षु च पूर्वोक्तहृदयादिषडंगानि पूजयेत् ॥ तद्बाह्येष्टदले प्राचीक्रमेण। ॐ जातवेदसे नमः ॥ १ ॥ ॐ सप्ताजिह्वाय नमः ॥ २ ॥ ॐ हव्यवाहनाय नमः ॥ ३ ॥ ॐ अश्वोदरजाय नमः ॥ ४ ॥ ॐ वैश्वानराय नमः ॥ ५ ॥ ॐ कौमारतेजसे नमः ॥ ६ ॥ ॐ विश्वमुखाय नमः ॥ ७ ॥ ॐ देवमुखाय नमः ॥८॥ इति पूजयेत् ॥ ततः पूर्वादिचतुर्दिक्षु ॥ ॐ पृथिव्यै नमः ॥ १ ॥ ॐ अद्भ्यो नमः ॥ २ ॥ ॐ वायवे नमः ॥ ३ ॥ ॐ आकाशाय नमः ॥४॥ इति संपूज्य कोणदलाग्रेषु। ॐ निवृत्त्यै नमः ॥५॥ ॐ प्रतिष्ठायै नमः ॥ ६ ॥ ॐ शांत्यै नमः ॥ ७ ॥ ॐ शान्त्यतितायै नमः ॥ ८ ॥ इति पूजयेत् ॥ ततः पूर्वादिचतुर्दिक्षु प्रदक्षिणक्रमेण एकादशैकादशशक्तयः पूज्यास्तद्यथा—पूर्वे। ॐ जाग्रतायै नमः ॥ १ ॥ ॐ तपन्यै नमः ॥ २ ॥ ॐ वेदगर्भायै नमः ॥ ३ ॥ ॐ दहनरूपिण्यै नमः ॥ ४ ॥ ॐ सेन्दुखण्डायै नमः ॥ ५ ॥ ॐ अशुभहंत्र्यै नमः ॥ ६ ॥ ॐ नभश्चारिण्यै नमः ॥ ७ ॥ ॐ वागीश्वर्य्यै नमः ॥ ८ ॥ ॐ मदद्रवायै नमः ॥ ९ ॥ ॐ सोमरूपायै नमः ॥ १० ॥ ॐ मनोजवायै नमः ॥ ११ ॥ इति पूजयेत्। ततो दक्षिणे। ॐ मरुद्वेगायै नमः ॥१॥ ॐ रात्रिसंज्ञायै नमः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

॥ २ ॥ ॐ तीव्रकोपायै नमः ॥ ३ ॥ ॐ यशोवत्यै नमः ॥ ४ ॥ ॐ तोयात्मिकायै नमः ॥ ५ ॥ ॐ नित्यायै नमः ॥ ६ ॥ ॐ दयावत्यै नमः ॥ ७ ॥ ॐ हारिण्यै नमः ॥ ८ ॥ ॐ तिरस्क्रियायै नमः ॥ ९ ॥ ॐ वेदमात्रे नमः ॥ १० ॥ ॐ तत्परायै नमः ॥ ११ ॥ इति पूजयेत् ॥ पश्चिमे । ॐ मदनप्रियायै नमः ॥ १ ॥ ॐ समाराध्यायै नमः ॥ २ ॥ ॐ नंदिन्यै नमः ॥ ३ ॥ ॐ रिपुमर्दिन्यै नमः ॥ ४ ॥ ॐ षष्ट्यै नमः ॥ ५ ॥ ॐ दंडिन्यै नमः ॥ ६ ॥ ॐ तिग्मायै नमः ॥ ७ ॥ ॐ दुर्गायै नमः ॥८॥ ॐ गायत्र्यै नमः ॥ ९ ॥ ॐ निरवद्यायै नमः ॥ १० ॥ ॐ विशालाक्ष्यै नमः ॥ ११ ॥ इति पूजयेत् । उत्तरे । ॐ श्वासोद्वाहायै नमः ॥ १ ॥ ॐ वनादिन्यै नमः ॥ २ ॥ ॐ वेदनायै नमः ॥ ३ ॥ ॐ वह्निगर्भायै नमः ॥ ४ ॥ ॐ सिंहवाहायै नमः ॥ ५ ॥ ॐ धुर्यायै नमः ॥ ६ ॥ ॐ दुर्विषहायै नमः ॥ ७ ॥ ॐ गिरंसायै नमः ॥ ८ ॥ ॐ तापहारिण्यै नमः ॥ ९ ॥ ॐ त्यक्तदोषायै नमः ॥ १० ॥ ॐ निस्सपत्नायै नमः इति पूजयेत् ॥ ततो भूपुरे पूर्वादिक्रमेण इन्द्रादीन् दशदिक्पालान् तद्बाह्ये वज्रद्यायुधानि च पूजयेत । एवमावरणपूजां कृत्वा धूपादिनमस्कारांतं संपूज्य यथाविधि जपं कुर्यात् । अस्य पुरश्चरणं चतुश्चत्वारिंशत्सहस्र ४४००० जपः । तथा च–(शारदायाम्) मंत्रवर्णसहस्राणि जपेन्मंत्रं विशालधीः ॥ तदंते तिलसिद्धार्थचित्रमूलैः समिद्वरैः॥१॥ क्षीरद्रुमाणामाज्येन हविषान्नैर्घृतान्वितैः ॥ चतुश्चत्वारिंशदाढ्यं चतुःशतसमन्वितम् ॥ २ ॥ चतुःसहस्रं जुहुयादर्चिते हव्यवाहने ॥ इत्थं जपादिभिः सिद्धे मंत्रेस्मिन्साधकोत्तमः ॥ ३ ॥ इति शारदातिलकोक्तं जातवेदोमंत्रपुरश्चरणं समाप्तम् ॥ शुभम् ॥ ॥

अथ ज्वरशमनमंत्रविधानम् ॥ मंत्रो यथा"त्रिपाद्वस्मप्रहरणस्त्रिशिराश्च त्रिलोचनः ॥ स मे प्रीतः सुखं दद्यात्सर्वामयपतिर्ज्वरः॥१॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अस्य श्रीज्वरमंत्रस्य कालाग्निरुद्र ऋषिः । महादेवो देवता । अनुष्टुप् छंदः । सकलज्वरशांत्यर्थे जपे विनियोगः ॥
ततः पूर्वोक्तऋष्यादिन्यासं ध्यानं च कृत्वा यथाविधि अयुतं सहस्रं वा जपेत् । जपांते होमतर्पणादि कुर्यात् । अथवा ज्वर
गायत्रीं जपेत् । तद्यथा—" ॐ भस्मायुधाय विद्महे ऐं क्रीं एकदंष्ट्राय धीमहि तन्नो ज्वरः प्रचोदयात् " इति ज्वरगायत्री ॥
अथ ज्वरहरणाऽपामार्जनस्तोत्रम् ॥ "महादेव उवाच । अथातः संप्रवक्ष्यामि अपामार्जनमुत्तमम् ॥ पुलस्त्येन यथोक्तं तु दाल
भ्याय महात्मने ॥ १ ॥ सर्वेषां रोगदोषाणां नाशनं मंगलप्रदम् ॥ तत्तेहं तु प्रवक्ष्यामि शृणु त्वं नगनंदिनि ॥ २ ॥ श्रीदालभ्य
उवाच ॥ भगवन्प्राणिनः सर्वे विषरोगाद्युपद्रवैः ॥ कुष्ठग्रहाभिभूताश्च सर्वकाले ह्युपद्रुताः ॥ ३ ॥ अभिचारिककृत्याद्या बहुरोगाश्च
दारुणाः ॥ न भवंति मुनिश्रेष्ठ तन्मे त्वं वक्तुमर्हसि ॥ ४ ॥ पुलस्त्य उवाच ॥ व्रतोपवासनियमैर्विष्णुर्वै तोषितस्तु यैः ॥ ते
नरा नैव रोगार्ता जायंते मुनिसत्तम ॥ ५ ॥ यैर्न कृतं व्रतं पुण्यं न दानं न तपस्तदा ॥ न तीर्थं देवपूजा च नान्नं दत्तं तु
भूरिशः ॥ ६ ॥ ते वै लोकास्तदा ज्ञेया रोगदोषैः प्रपीडिताः ॥ आरोग्यं परमामृद्धिं मनसा यद्यदिच्छति ॥ ७ ॥ तत्तदाप्नोत्य
संदिग्धं विष्णोः सेवी विशेषतः ॥ नार्धिं प्राप्नोति न व्याधिं न विषग्रहबंधनम् ॥ ८ ॥ कृत्यास्पर्शभयं नापि तोषिते मधुसूदने ॥
समस्तदोषनाशश्च सर्वदा च शुभा ग्रहाः ॥९॥ देवानामप्यधृष्योऽसौ तोषिते च जनार्दने ॥ यः सर्वेषु च भूतेषु यथात्मनि तथा
परे ॥१०॥ उपवासादिना तेन तोषितोमधुसूदनः ॥ तोषिते तत्र जायन्ते नराः पूर्णमनोरथाः ॥ ११ ॥ अरोगाः सुखिनो भोग
भोक्तारो मुनिसत्तम ॥ तेषां च शत्रवो नैव न च रोगाभिचारिकम् ॥ १२ ॥ ग्रहरोगादिकं चैव पापकार्यं न जायते ॥ अव्याहता

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नि कृष्णस्य चक्रादीन्यायुधानि वै ॥१३॥ रक्षंति सकलापद्भ्यो येन विष्णुरुपासितः ॥ श्रीदालभ्य उवाच ॥ अनाराधितगोविं
दा ये नरा दुःखभागिनः ॥ तेषां दुःखाभिभूतानां यत्कर्तव्यं दयालुभिः ॥ १४ ॥ पश्यद्भिः सर्वभूतस्थं वासुदेवं सनातनम् ॥
समदृष्टिभिरप्यत्र तन्मे ब्रूहि विशेषतः ॥ १५ ॥ श्रीपुलस्त्य उवाच ॥ तद्वक्ष्यामि मुनिश्रेष्ठ समाहितमनाः शृणु ॥ रोगदोषाशुभ
हरं विज्वरादिविनाशनम् ॥ १६ ॥ शिखायां श्रीधरं न्यस्य शिखाधः श्रीकरं तथा ॥ हृषीकेशं तु केशेषु मूर्ध्नि नारायणं परम् ॥
॥ १७ ॥ ऊर्ध्वश्रोत्रे न्यसेद्विष्णुं ललाटे जलशायिनम् ॥ विभुं वै भ्रूयुगे न्यस्य भ्रूमध्ये हरिमेवच ॥ १८ ॥ नरसिंहं नासिकाग्रे
कर्णयोरर्णवेशयम् ॥ चक्षुषोः पुंडरीकाक्षं तदधो भूधरं न्यसेत् ॥ १९ ॥ कपोलयोः कल्किनाथं वामनं कर्णमूलयोः ॥
शंखिनं शंखयोर्न्यस्य गोविंदं वदने तथा ॥ २० ॥ मुकुंदं दंतपंक्तौ तु जिह्वायां वाक्पतिं तथा ॥ रामं हनौ तु विन्यस्य कंठे
वैकुंठमेव च ॥ २१ ॥ बलघ्नं बाहुमूलाधश्चांसयोः कंसघातिनम् ॥ अजं भुजद्वये न्यस्य शार्ङ्गपाणिं करद्वये ॥ २२ ॥ संक
र्षणं करांगुष्ठे गोपमंगुलिपंक्तिषु ॥ वक्षस्यधोक्षजं न्यस्य श्रीवत्सं तस्य मध्यतः ॥ २३ ॥ स्तनयोस्त्वनिरुद्धं च
दामोदरमथोदरे ॥ पद्मनाभं तथा नाभौ नाभ्यधश्चापि केशवम् ॥ २४ ॥ मेढ्रे धराधरं देवं गुदे चैव गदाग्रजम् ॥
पीतांबरधरं कट्यामूरुयुग्मे मधोर्द्विषम् ॥ २५ ॥ मुरद्विषं पिंडिकयोर्जानुयुग्मे जनार्दनम् ॥ फणीशं गुल्फयोर्न्यस्य पादयोश्च
त्रिविक्रमम् ॥ २६ ॥ पादांगुष्ठे श्रीपतिं च पादाधो धरणीधरम् ॥ रोमकूपेषु सर्वेषु विष्वक्सेनं न्यसेद्बुधः ॥ २७ ॥ मत्स्यं
मांसे तु विन्यस्य कूर्मं मेदसि विन्यसेत् ॥ वाराहं तु वसामध्ये सर्वास्थिषु तथाच्युतम्॥२८॥द्विजप्रियं तु मज्जायां शुक्रे श्वेतपतिं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तथा ॥ सर्वांगे यज्ञपुरुषं परमात्मानमात्मनि ॥ २९ ॥ एवं न्यासविधिं कृत्वा साक्षान्नारायणो भवेत् ॥ यावन्न व्याहरेत्किंचित्तावद्विष्णुमयः स्थितः ॥ ३० ॥ गृहीत्वा तु समूलाग्रान्कुशाञ्शुद्धान्समाहितः ॥ मार्जयेत्सर्वगात्राणि कुशाग्रैरिह शांतिकृत् ॥ ३१॥ विष्णुभक्तो विशेषेण रोगग्रहविषार्दिते ॥ विषार्तानां रोगिणां च कुर्याच्छांतिमिमां शुभाम् ॥ ३२ ॥ जायते तेन भो विप्र सर्व रोगप्रणाशनम् ॥ नमः श्रीपरमार्थाय पुरुषाय महात्मने ॥ ३३ ॥ अरूपबहुरूपाय व्यापिने परमात्मने ॥ वाराहं नारसिंहं च वामनं च सुखप्रदम् ॥ ३४ ॥ ध्यात्वा कृत्वा नमो विष्णोर्नामान्यंगेषु विन्यसेत् ॥ निष्कल्मषाय शुद्धाय व्याधिपापहराय वै ॥ ३५ ॥ गोविंदपद्मनाभाय वासुदेवाय भूभृते ॥ नमस्कृत्वा प्रवक्ष्यामि यत्तत्सिध्यतु मे वचः ॥ ३६ ॥ त्रिविक्रमाय रामाय वैकुंठाय नराय च ॥ श्रीवाराहनृसिंहाय वामनाय महात्मने॥३७॥ हयग्रीवाय शुभ्राय हृषीकेशहराशुभम्॥परोपतापमहितं प्रमुक्तं चाभिचारिकम् ॥ ३८ ॥ गरस्पर्शमहारोगप्रयोगं जरया जर ॥ नमोस्तु वासुदेवाय नमः कृष्णाय खड्गिने ॥ ३९ ॥ नमः पुष्करनेत्राय केशवायादिचक्रिणे ॥ नमः किंजल्कवर्णाय्यपीतनिर्मलवाससे ॥ ४० ॥ महादेववपुष्कंधधृतचक्राय चक्रिणे ॥ दंष्ट्रोद्धृतक्षितितल त्रिमूर्तिपतये नमः ॥ ४१ ॥ महायज्ञवराहायं श्रीवल्लभ नमोस्तु ते ॥ तप्तहाटककेशांतज्वलत्पावकलोचनः ॥ ४२ ॥ वज्राधिक नखस्पर्शदिव्यसिंह नमोस्तु ते ॥ कश्यपायातिह्रस्वाय ऋग्यजुःसामलक्षण ॥ ४३ ॥ तुभ्यं वामनरूपाय क्रमते गां नमोनमः ॥ वाराहाशेषदुःखानि सर्वपापफलानि च ॥४४॥ मर्दमर्द महादंष्ट्र मर्दमर्द च तत्फलम्॥नृसिंह कुलिशस्पर्शदंतप्रांतनखोज्वल ॥४५॥ भंजभंज निनादेन दुःखान्यस्यार्त्तिनाशन ॥ ऋग्यजुः सामभिर्वाग्भिः कामरूपधराद्रिधृक् ॥४६॥ प्रशमं सर्वदुःखानि नयत्वस्य

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

जानार्दन ॥ ऐकाहिकं द्व्याहिकं च तथा त्रिदिवसज्वरम् ॥ ४७ ॥ चातुर्थिकं तथात्युग्रं तथा वै सततज्वरम् ॥ दोषोत्थं सन्निपातोत्थं
तथैवागंतुकज्वरम् ॥ ४८ ॥ शमं नयतु गोविंदो भित्त्वा छित्त्वास्य वेदनाम् ॥ नेत्रदुःखं शिरोदुःखं दुःखं तूदरसंभवम् ॥ ४९ ॥
अनुच्छ्वासं महाश्वासं परितापं सवेपथुम् ॥ गुदघ्राणांघ्रिरोगांश्च कुष्ठरोगं तथा क्षयम् ॥ ५० ॥ कामलादींस्तथा रोगान्प्रमेहादींश्च
दारुणान् ॥ ये वातप्रभवा रोगा लूताविस्फोटकादयः ॥ ५१ ॥ ते सर्वे विलयं यांतु वासुदेवापमार्जिताः ॥ विलयं यांति ते सर्वे
विष्णोरुच्चारणेन वा ॥ ५२ ॥ क्षयं गच्छंतु चाशेषास्ते चक्राभिहता हरेः ॥ अच्युतानंतगोविंदनामोच्चारणभेषजात् ॥ ५३ ॥
नश्यंति सकलारोगाः सत्यं सत्यं वदाम्यहम् ॥ स्थावरं जंगमं यच्च कृत्रिमं चापि यद्विषम् ॥ ५४ ॥ दंतोद्भवं नखोद्भूतमाकाशप्र
भवं च यत् ॥ भूतादिप्रभवं यच्च विषमत्यंतदुःसहम् ॥ ५५ ॥ शमं नयतु तत्सर्वं कीर्तितोस्य जनार्दनः ॥ ग्रहान्प्रेतग्रहांश्चैव
तथान्याञ्छाकिनीग्रहान् ॥ ५६ ॥ मुखमंडलिकान् क्रूरान् रेवतीं वृद्धिरेवतीम् ॥ वृद्धिकाख्यान्ग्रहांश्चोग्रांस्तथा मातृग्रहानपि ॥
॥ ५७ ॥ बालस्य विष्णोश्चरितं हंतुं बालग्रहानपि ॥ वृद्धानां ये ग्रहाः केचिद्बालानां चापि ये ग्रहाः ॥ ५८ ॥ नृसिंहदर्शनादेव
नश्यंते तत्क्षणादपि ॥ दंष्ट्राकरालवदनो नृसिंहो दैत्यभीषणः ॥ ५९ ॥ तं दृष्ट्वा ते ग्रहाः सर्वे दूरं यांति विशेषतः ॥ श्रीनृसिंह म
हासिंह ज्वालामालोज्ज्वलानन ॥ ६० ॥ ग्रहानशेषान्सर्वेश नुद स्वास्यविलोचन ॥ ये रोगा ये महोत्पाता ये द्विषो ये महा
ग्रहाः ॥ ६१ ॥ यानि च क्रूरभूतानि ग्रहपीडाश्च दारुणाः ॥ शस्त्रक्षतेषु ये रोगा ज्वालगर्दभिकादयः ॥ ६२ ॥ विस्फोटकादयो
ये च ग्रहा गात्रेषु संस्थिताः ॥ त्रैलोक्यरक्षाकर्त्तस्त्वं दुष्टदानववारण ॥ ६३ ॥ सुदर्शनमहातेजश्छिंधि छिंधि महाज्वरम् ॥ छिंधि

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वातं च लूतां च छिंधि घोरं महाविषम् ॥६४॥ उद्दंडामरशूलं च विषज्वालासगर्दभम् ॥ ॐ ह्रांह्रांह्रूंह्रूं प्रधारेण कुठारेण हन द्विषः॥ ॥ ६५ ॥ ॐ नमो भगवते सुदर्शनाय दुःखदारणविग्रह ॥ यानि चान्यानि दुष्टानि प्राणिपीडाकराणि वै ॥६६॥ तानि सर्वाणि सर्वात्मा परमात्मा जनार्दनः॥ किंचिद्रूपं समास्थाय वासुदेव नमोस्तु ते ॥६७॥ क्षिप्त्वा सुदर्शनं चक्रं ज्वालामालाविभीषणम् ॥ सर्वदुष्टोपशमनं कुरु देववराच्युत ॥ ६८ ॥ सुदर्शन महाचक्र गोविंदस्य वरायुध तीक्ष्णधार महावेग सूर्यकोटिसमद्युते ॥ ६९ ॥ सुदर्शन महाज्वाल छिंधि छिंधि महारव ॥ सर्वदुःखानि रक्षांसि पापानि च विभीषण ॥ ७० ॥ दुरितं हन चारोग्यं कुरु त्वं भो सुदर्शन ॥ प्राच्यां चैव प्रतीच्यां च दक्षिणोत्तरतस्तथा ॥ ७१ ॥ रक्षां करोतु विश्वात्मा नरसिंहः स्वगर्जितैः ॥ भूम्यंतरिक्षे च तथा पृष्ठतः पार्श्वतोग्रतः ॥ रक्षां करोतु भगवान् बहुरूपी जनार्दनः ॥ ७२ ॥ यथा विष्णुमयं सर्वं सदेवासुरमानुषम् ॥ तेन सत्येन सकलं दुःखमस्य प्रणश्यतु ॥ ७३ ॥ यथा योगेश्वरो विष्णुः सर्ववेदेषु गीयते ॥ तेन सत्येन सकलं दुःखमस्य प्रणश्यतु ॥ ॥ ७४ ॥ परमात्मा यथा विष्णुर्वेदांगेषु च गीयते ॥ तेन सत्येन विश्वात्मा सुखदोस्त्वस्य केशवः ॥ ७५ ॥ शांतिरस्तु शिवं चास्तु प्रणाशं यातु चासुखम् ॥ वासुदेवशरीरोत्थैः कुशैः संमार्जितं मया ॥ ७६ ॥ अपामार्जित गोविंद नमो नारायणस्तथा ॥ तथापि सर्वदुःखानां प्रशमो वचनाद्धरेः ॥ ७७ ॥ शांताः समस्तदोषास्ते ग्रहाः सर्वे विषाणि च ॥ भूतानि च प्रशाम्यंति संस्मृते मधुसूदने ॥ ७८ ॥ एते कुशा विष्णुशरीरसंभवा जनार्दनोहं स्वयमेव चाग्रतः ॥ हतं मया दुःखमशेषमस्य वै स्वस्थो भवत्वेष वचो यथा हरेः ॥ ७९ ॥ शांतिरस्तु शिवं चास्तु दुःखं च यत् प्रणश्यतु ॥ यदस्य दुरितं किंचित्क्षितं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तल्लवणांभसि ॥ ८० ॥ स्वास्थ्यमस्य सदैवास्तु हृषीकेशस्य कीर्त्तनात् ॥ यद्यतोत्रागतं पापं तत्तु तत्र प्रगच्छतु ॥ ८१ ॥ एतद्रोगेषु पीडासु जंतूनां हितमिच्छुभिः॥ विष्णुभक्तैश्च कर्तव्यमपामार्जनकं परम् ॥८२॥ अनेन सर्वदुःखानि विलयं यांत्यशेषतः॥ सर्वपापविशुद्ध्यर्थं विष्णोश्चैवापमार्जनम् ॥ ८३ ॥ आर्द्रं शुष्कं लघु स्थूलं ब्रह्महत्यादिकं तु यत् ॥ तत्सर्वं नश्यते तूर्णं तमोवद्र विदर्शनात् ॥ ८४ ॥ नश्यंति रोगदोषाश्च सिंहात्क्षुद्रमृगा यथा ॥ ग्रहभूतपिशाचादिः श्रवणादेव नश्यतु ॥८५॥ द्रव्यार्थं लोभपरमै र्न कर्तव्यं कदाचन ॥ कृतेपामार्जने किंचिन्न ग्राह्यं हितकाम्यया ॥ ८६ ॥ निरपेक्षैः प्रकर्तव्यमादिमध्यांतबोधकैः ॥ विष्णुभक्तैः सदाशांतैरन्यथा सिद्धिदं भवेत् ॥ ८७ ॥ अतुलेयं नृणां सिद्धिरियं रक्षा परा नृणाम् ॥ भेषजं परमं ह्येतद्विष्णोर्यदपमार्जनम् ॥ ॥ ८८ ॥ उक्तं हि ब्रह्मणा पूर्वं पुलस्त्याय सुताय वै ॥ एतत्पुलस्त्यो हि मुनिर्दालभ्यायोक्तवान्स्वयम् ॥ ८९ ॥ सर्वभूतहितार्थाय दालभ्येन प्रकाशितम् ॥ त्रैलोक्ये तादिदं विष्णोः समातं चापमार्जनम् ॥ ९० ॥ तवाग्रे कथितं देवि यतो भक्तासि मे सदा ॥ श्रुत्वा तु सर्वं भक्त्या च रोगान्दोषान्व्यपोहति ॥ ९१ ॥ महादेव उवाच ॥ अपामार्जनकं दिव्यं परमाद्भुतमेव च ॥ पठितव्यं वि शेषेण पुत्रकामार्थसिद्धये ॥ ९२ ॥ एतत्स्तोत्रं पठेत्प्राज्ञः सर्वकामार्थसिद्धये ॥ एककालं द्विकालं वा ये पठंति द्विजातयः ॥ ॥ ९३ ॥ आयुश्च श्रीर्बलं तस्य वर्द्धयंति दिने दिने ॥ ब्राह्मणो लभते विद्यां क्षत्रियो राज्यमेव वा ॥ ९४ ॥ वैश्यो धनसमृद्धिं च शूद्रो भक्तिं च विंदति ॥ अन्यैश्च लभ्यते भक्तिः पठनाच्छ्रवणाज्जपात् ॥ ९५ ॥ सामवेदफलं तस्य जायते नगनन्दिनि ॥ अखि लं पापसंघातं तत्क्षणादेव नश्यति ॥ ९६ ॥ इति ज्ञात्वा तु भो देवि पठितव्यं समाहितैः ॥ पुत्राश्चैव तथा लक्ष्मीः संपूर्णा भवति

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ध्रुवम् ॥ ९७ ॥ लिखित्वा भूर्जपत्रे तु यो धारयति वैष्णवः ॥ इहलोके सुखं भुक्त्वा याति विष्णोः परं पदम् ॥ ९८ ॥ पठित्वा श्लोकमेकं तु तुलसीं यः समर्पयेत् ॥ सर्वं तीर्थं कृतं तेन तुलस्या पूजने कृते ॥ ९९ ॥ एतत्स्तोत्रं तु परमं वैष्णवं मुक्तिदायकम् ॥ पृथ्वीदानसमं पाठाद्विष्णुलोकं तु गच्छति ॥ १०० ॥ जपेत्स्तोत्रं विशेषेण विष्णुलोकस्य वांछया ॥ बालानां जीवनार्थाय पठितव्यं समाहितैः ॥१०१॥ रोगग्रहाभिभूतानां बालानां शांतिकारकम् ॥ भूतग्रहविषं चैव पठनादेव नश्यति ॥१०२॥ कंठे तुलसिजां मालां धृत्वा विप्रो हि यः पठेत् ॥ स च वै वैष्णवो ज्ञेयो विष्णुलोकं स गच्छति ॥१०३॥ कंठे माला धृता येन शंखचक्रादिचिह्नितः॥ वैष्णवः प्रोच्यते विप्रः स्तोत्रं चैतत्पठन्सदा ॥ १०४ ॥ इमं लोकं परित्यज्य विष्णुलोकं स गच्छति ॥ मोहमायापरित्यक्तो दंभतृष्णाविवर्जितः ॥ १०५ ॥ एतत्स्तोत्रं पठेद्दिव्यं परं निर्वाणमाप्नुयात् ॥ ते धन्याः संति भूलोंके ये विप्रा वैष्णवाः स्मृताः ॥ ॥१०६॥ स्वात्मा वै तारितस्तैस्तु सकुलो नात्र संशयः ॥ ते वै धन्यतमा लोके नारायणपरायणाः ॥ तैर्भक्तिश्च सदा कार्या ते वै भागवता नराः ॥ १०७ ॥" इति श्रीपाद्मे महापुराणे उत्तरखण्डे शिवपार्वतीसंवादे अपामार्जनस्तोत्रं सम्पूर्णम् ॥ ॥ ॥

अथ सर्वरोगहरं श्रीमाहेश्वरकवचम् ॥ "राजोवाच" ॥ अङ्गन्यासो यदुक्तो भो महेशाक्षरसंयुतः ॥ विधानं कीदृशं तस्य कर्तव्यः केन हेतुना ॥ १ ॥ तद्वदस्व महाभाग विस्तरेण ममाग्रतः ॥ भृगुरुवाच ॥ कवचं माहेश्वरं राजन्देवैरपि सुदुर्लभम् ॥ यः करोति स्वगात्रेषु पूतात्मा स भवेन्नरः ॥२॥ कृत्वा न्यासमिमं यस्तु संग्रामं प्रविशेन्नरः ॥ न शरास्तोमरास्तस्य खड्गशक्तिपरश्वधाः ॥३॥ प्रभवंति रिपोः क्वापि भवेच्छिवपराक्रमः ॥ व्याधिग्रस्तस्तु यः कश्चित्कारयेच्चैव मार्जनम् ॥ ४ ॥ एकादशकुशैः साग्रैर्मुक्तो भवति

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नान्यथा ॥ न भूता न पिशाचाश्च कूष्माण्डा न विनायकाः ॥५॥ शिवस्मरणमात्रेण न विशन्ति कलेवरम् ॥ ॐ नमः पंचव
क्राय शाशिसोमार्कनेत्राय भयार्तानामभयाय मम सर्वगात्ररक्षार्थं विनियोगः ॥ ॐ हौं हां हं मंत्रेणानेन वृषगोमयभस्मनाम् ॥
आमंत्र्य ललाटे तिलकमादाय पठेत् ॥ त्राहि मां देव दुष्प्रेक्ष शत्रूणां भयवर्द्धन ॥(ॐ)स्वच्छन्दभैरवः प्राच्यामाग्नेय्यां शिखिलोचनः
॥ १ ॥ भूतेशो दक्षिणे भागे नैर्ऋत्यां भीमदर्शनः ॥ वारुण्यां वृषकेतुश्च वायौ रक्षतु शङ्करः ॥ २ ॥ दिग्वासाः सौम्यतो नित्यमै
शान्यां मदनांतकः ॥ वामदेवोर्ध्वतो रक्षेदधो रक्षेत्त्रिलोचनः ॥ ३ ॥ पुरारिः पुरतः पातु कपर्दी पातु पृष्ठतः ॥ विश्वेशो दक्षिणे
भागे वामे कालीपतिः सदा ॥ ४ ॥ महेश्वरः शिरोभागे भवो भाले सदैव तु ॥ भ्रुवोर्मध्ये महातेजास्त्रिनेत्रो नेत्रयोर्द्वयोः ॥
॥ ५ ॥ पिनाकी नासिकादेशे कर्णयोर्गिरिजापतिः ॥ उग्रः कपोलयो रक्षेन्मुखदेशे महाभुजः ॥ ६ ॥ जिह्वायामंधकध्वंसी दंता
न्रक्षतु मृत्युजित् ॥ नीलकंठः सदा कंठे पृष्ठे कामाङ्गनाशनः ॥ ७ ॥ त्रिपुरारिः स्कंधदेशे बाह्वोश्च चंद्रशेखरः ॥ हस्तिचर्मधरो
हस्ते नखाङ्गुलिषु शूलभृत् ॥ ८ ॥ भवानीशः पातु हृदि पातूदरकटी मृडः ॥ गुदे लिंगे च मेढ्रे च नाभौ च प्रमथाधिपः ॥ ९ ॥
जंघोरुचरणे भीमः सर्वांगे केशवप्रियः ॥ रोमकूपे विरूपाक्षः शब्दस्पर्शौ च योगवित् ॥ १० ॥ रक्तमज्जावसामांसशुक्रे वसुगणा
श्चिंतः ॥ प्राणापानसमानेषूदानव्यानेषु धूर्जटिः ॥ ११ ॥ रक्षाहीनं तु यत्स्थानं वर्जितं कवचेन यत् ॥ तत्सर्वं रक्ष मे देव व्याधि
दुर्गज्वरादितः ॥ १२ ॥ कार्य्यं कर्म्म त्विदं प्राज्ञैर्दीपं प्रज्वाल्य सर्पिषा ॥ निवेद्य शिखिनेत्राय वारयेत्तु ह्युदङ्मुखम् ॥ १३ ॥
ज्वरदाहपरिक्रांतं तथान्यव्याधिसंयुतम् ॥ कुशैः संमार्ज्यसंमार्ज्य क्षिपेद्दीपशिखां ज्वरम् ॥ १४ ॥ ऐकाहिकं द्व्याहिकं वा तृतीय

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कचतुर्थकम् ॥ वातपित्तकफोद्भूतं सन्निपातोग्रतेजसम् ॥ १५ ॥ अन्यं दुःखदुराधर्षकर्म्मजं चाभिचारिकम् ॥ धातुस्थं कफसं
मिश्रं विषमं कामसंभवम् ॥ १६ ॥ भूताभिषङ्गसंसर्गं भूतचेष्टादिसंस्थितम् ॥ शिवाज्ञां घोरमंद्रेण पूर्ववृत्तं स्वयं स्मर ॥ १७ ॥ त्यज
देहं मनुष्यस्य दीपं गच्छ महाज्वर ॥ कृतं तु कवचं दिव्यं सर्वव्याधिभयार्दनम् ॥ १८ ॥ न बाधंते व्याधयस्तं बालग्रहभया
नि च । लूताविस्फोटकं घोरं शिरोर्तिच्छर्दिविग्रहम् ॥ १९ ॥ कामलां क्षयकासं च गुल्माश्मरीभगंदराः ॥ शूलोन्मादं च हृद्रो
गयकृती पांडुविद्रधिम् ॥ २० ॥ अतिसारादिरोगांश्च डाकिनीपीडकग्रहान् ॥ पामाविचर्चिकादद्रुकुष्ठव्याधिविषार्दनम् ॥ २१ ॥
स्मरणान्नाशयत्याशु कवचं शूलपाणिनः ॥ यस्तु स्मरति नित्यं वै यस्तु धारयते नरः ॥ २२ ॥ स मुक्तः सर्व पापेभ्यो
वसेच्छिव पुरे चिरम् ॥ संख्याव्रतस्य दानस्य यज्ञस्यास्तीह शाश्वतः ॥ २३ ॥ न संख्या विद्यते शंभोः कवचस्मरणाद्यतः ॥
तस्मात्सम्यगिदं सर्वैः सर्वकामफलप्रदम् ॥ २४ ॥ श्रोतव्यं सततं भक्त्या कवचं सर्वकामिकम् ॥ लिखितं तिष्ठते यस्य
गृहे सम्यगनुत्तमम् ॥ २५ ॥ न तत्र कलहोद्वेगो नाकालमरणं भवेत् ॥ नाल्पप्रजाः स्त्रियस्तत्र न दौर्भाग्यं समाश्रिताः ॥
॥ २६ ॥ तस्मान्माहेश्वरं नाम कवचं देवगणार्चितम् ॥ श्रोतव्यं पठितव्यं च मंतव्यं भावुकप्रदम् ॥ २७ ॥ श्रीमाहेश्वर
कवचं सर्वव्याधिनिषूदनम् ॥ यः पठेत्तु नरो नित्यं स व्रजेच्छाङ्करं पुरम् ॥२८ ॥ इति सर्वव्याधिहरं श्रीमाहेश्वरकवचं संपूर्णम् ॥
अथ सद्यआरोग्यकरं सूर्य्यार्घ्यदानविधानम् ॥ सुदिने कृतनित्यक्रियः आचम्य प्राणानायम्य । देशकालौ संकीर्त्य मम अमु
कस्य वा अमुकज्वरादिव्याधिसमूलनिराशद्वारा सद्यआरोग्यार्थं श्रीसवितृसूर्यनारायणप्रीत्यर्थं हंसादिसप्ततिनामाभिः श्रीसूर्य्या

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

य सप्तत्यर्घ्यदानमहं करिष्ये । इति संकल्प्य । भूतशुद्ध्यादि कृत्वा समान्यार्घ्यं कल्पयेत् । "विगृह्य पाणियुग्मेन ताम्रपात्रं सुनिर्म्मलम् ॥ जानुभ्यामवनीं गत्वा परिपूर्य्य जलेन च ॥ १ ॥ करवीरादिकुसुमैः रक्तचंदनमिश्रितैः ॥ दूर्वाङ्कुरैरक्षतैश्च निक्षिप्तैः पात्रमध्यतः ॥२॥ दद्यादर्घ्यमनर्घाय सवित्रे ध्यानपूर्वकम् ॥ उपमौलिसमानीय तत्पात्रे नान्यदिङ्मनाः ॥ ३ ॥ प्रतिमंत्रं नमस्कुर्यादुदयास्तमिते रवौ ॥ अनया नामसप्तत्या महामंत्ररहस्यया ॥ ४ ॥" एवमर्घ्यं प्रकल्प्य पाद्यादिभिः संपूज्य प्रणम्य यथोक्तविधिना प्रत्येकनाम्ना वृहत्पात्रे घटे जले वा अर्घ्यं दद्यात् । तद्यथा—ॐ हंसाय नमः ॥ १ ॥ ॐ भानवे नमः ॥ २ ॥ ॐ सहस्रांशवे नमः ॥ ३ ॥ ॐ तपनाय नमः ॥ ४ ॥ ॐ तापनाय नमः ॥ ५ ॥ ॐ रवये नमः ॥ ६ ॥ ॐ विकर्त्तनाय नमः ॥ ७ ॥ ॐ विवस्वते नमः ॥ ८ ॥ ॐ विश्वकर्म्मणे नमः ॥ ९ ॥ ॐ विभावसवे नमः ॥ १० ॥ ॐ विश्वरूपाय नमः ॥ ११ ॥ ॐ विश्वकर्त्रे नमः ॥ १२ ॥ ॐ मार्तण्डायं नमः ॥ १३ ॥ ॐ मिहिराय नमः ॥ १४ ॥ ॐ अंशुमते नमः ॥ १५ ॥ ॐ आदित्याय नमः ॥ १६ ॥ ॐ उष्णगवे नमः ॥ १७ ॥ ॐ सूर्य्याय नमः ॥ १८ ॥ ॐ अर्य्यम्णे नमः ॥ १९ ॥ ॐ ब्रध्नाय नमः ॥ २० ॥ ॐ दिवाकराय नमः ॥ २१ ॥ ॐ द्वादशात्मने नमः ॥ २२ ॥ ॐ सप्तहयाय नमः ॥ २३ ॥ ॐ भास्कराय नमः ॥ २४ ॥ ॐ अहस्कराय नमः ॥ २५ ॥ ॥ ॐ खगाय नमः ॥ २६ ॥ ॐ सुराय नमः ॥ २७ ॥ ॐ प्रभाकराय नमः ॥ २८ ॥ ॐ श्रीमते नमः ॥ २९ ॥ ॐ लोकचक्षुषे नमः ॥ ३० ॥ ॐ ग्रहेश्वराय नमः ॥३१॥ ॐ लोकेशाय नमः ॥ ३२ ॥ ॐ लोकसाक्षिणे नमः ॥ ३३ ॥ ॐ तमोरये नमः ॥ ३४ ॥ ॐ शाश्वताय नमः ॥३५॥ ॐ शुचये

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नमः ॥३६॥ ॐ गभस्तिहस्ताय नमः ॥ ३७ ॥ ॐ तीव्रांशवे नमः ॥ ३८ ॥ ॐ तरणये नमः ॥ ३९ ॥ ॐ सुमहोरुणये नमः ॥४०॥ ॐ द्युमणये नमः ॥४१॥ ॐ हरिदश्वाय नमः ॥४२॥ ॐ अर्काय नमः॥४३॥ॐ भानुमते नमः ॥४४॥ ॐ भयनाशनाय नमः ॥ ४५ ॥ ॐ छंदोश्वाय नमः ॥ ४६ ॥ ॐ वेदवेद्याय नमः ॥ ४६ ॥ ॐ भास्वते नमः ॥ ४७ ॥ ॐ पूष्णे नमः ॥ ४८ ॥ ॐ वृषाकपये नमः ॥ ४९ ॥ ॐ एकचक्ररथाय नमः ॥ ५० ॥ ॐ मित्राय नमः ॥ ५१ ॥ ॐ मंदेहारये नमः ॥ ५२ ॥ ॐ तमिस्रहंत्रे नमः ॥ ५३ ॥ ॐ दैत्यहंत्रे नमः ॥ ५४ ॥ ॐ पापहत्रे नमः ॥ ५५ ॥ ॐ धर्म्माय नमः ॥ ५६ ॥ ॐ अधर्म्माय नमः ॥ ५७ ॥ ॐ प्रकाशकाय नमः ॥५८॥ ॐ हेलिकाय नमः ॥५९॥ ॐ चित्रभानवे नमः ॥६०॥ ॐ कलिघ्नाय नमः ॥ ६१ ॥ ॐ तार्क्ष्यवाहनाय नमः ॥६२॥ ॐ दिक्पतये नमः ॥६३॥ ॐ पद्मिनीनाथाय नमः ॥६४॥ ॐ कुशेशयकराय नमः ॥६५॥ ॐ हरये नमः ॥ ६६ ॥ ॐ घर्मरश्मये नमः ॥ ६७ ॥ ॐ दुर्निरीक्ष्याय नमः ॥ ६८ ॥ ॐ चंडांशवे नमः ॥ ६९ ॥ ॐ कश्यपात्मजाय नमः ॥ ७० ॥ एभिः सप्ततिसंख्याकैः पुण्यैः सूर्य्यस्य नामभिः ॥ प्रणवादिचतुर्थ्यंतैर्नमस्कारसमायुतैः ॥ १ ॥ प्रत्येकमुच्चरन्नाम दृष्ट्वादृष्ट्वा दिवाकरम् ॥ एवं कुर्वन्नरो याति न दारिद्र्यं न शोकभाक् ॥ २ ॥ व्याधिभिर्मुच्यते घोरैरपि जन्मांतरार्जितैः ॥ विनौषधैर्विना वैद्यैर्विना पथ्यपरिग्रहैः ॥ ३ ॥ कालेन निधनं प्राप्य सूर्य्यलोके महीयते ॥ इति सर्वव्याधिहरं श्रीसूर्य्यार्घ्यविधानम् ॥ ॥ अथ ज्वरस्तोत्रम् ॥ "विद्राविते भूतगणे ज्वरस्तु त्रिंशिरास्त्रिपात् ॥ अभ्यपद्यत दाशार्हं दहन्निव दिशो दश॥१॥ अथ नारायणो देवस्तं दृष्ट्वा व्यसृजज्ज्वरम् ॥ माहेश्वरो वैष्णवश्च युयुधाते ज्वरावुभौ ॥ २ ॥ माहेश्वरः समाक्रंदन्वैष्णवेन बलार्दि

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तः ॥ अलब्ध्वाभयमन्यत्र भीतो माहेश्वरो ज्वरः ॥ ३ ॥ शरणार्थी हृषीकेशं तुष्टाव प्रयतांजलिः ॥ ज्वर उवाच ॥ नमामि त्वाऽनंतशक्तिं परेशं सर्वात्मानं केवलं ज्ञप्तिमात्रम् ॥ विश्वोत्पत्तिस्थानसंरोधहेतुं यत्तद्ब्रह्म ब्रह्मलिंगं प्रशांतम् ॥ ४ ॥ कालो दैवं कर्म जीवः स्वभावो द्रव्यं क्षेत्रं प्राण आत्मा विकारः ॥ तत्संघातो बीजरोहप्रवाहस्त्वन्मायैषा तन्निषेधं प्रपद्ये ॥ ५ ॥ नानाभावै र्लीलयैवोपपन्नैर्देवान्साधूँल्लोकसेतून्बिभर्षि ॥ हंस्युन्मार्गान्हिंसया वर्तमानाञ्जन्मैतत्ते भारहाराय भूमेः ॥ ६ ॥ तप्तोहं ते तेजसा दुःसहेन शांतोग्रेणात्युल्बणेन ज्वरेण ॥ तावत्तापो देहिनां तेंघ्रिमूलं नो सेवेरन्यावदाशानुबद्धाः ॥ ७ ॥ श्रीभगवानुवाच ॥ त्रि शिरस्ते प्रसन्नोस्मि व्येतु ते मज्ज्वराद्भयम् ॥ यो नौ स्मरति संवादं तस्य त्वन्न भवेद्भयम् ॥ ८ ॥ इत्युक्तोऽच्युतमानम्य गतो माहेश्वरो ज्वरः ॥ बाणस्तु रथमारूढः प्रागाद्योत्स्यञ्जनार्दनम् ॥ ९ ॥" इति श्रीमद्भागवते दशमस्कंधे ज्वरकृतस्तोत्रम् ॥

अथ ज्वरतर्पणम् ॥ (महार्णवे) "योसौ सरस्वतीतीरे कुत्सगोत्रसमुद्भवः ॥ त्रिरात्रज्वरदाहेन मृतो गोविंदसंज्ञकः ॥ १ ॥ ज्वरा पनुत्तये तस्मै ददाम्येतत्तिलोदकम् ॥ तथा—गंगाया उत्तरे कूले अपुत्रस्तापसो मृतः ॥ रात्रौ ज्वरविनाशाय तस्मै दद्यात्तिलो दकम् ॥ २ ॥ इति मंत्रद्वयेन तिलरक्ताक्षतरक्तपुष्पादियुतजलेन ज्वरानुसारेणाष्टोत्तरशताद्ययुतं तर्पणं ज्वरमुद्दिश्य कर्त्तव्यम् ॥ ॥ इति ज्वरतर्पणम् ॥ अथ सर्वरोगहरमच्युतानंत गोविंदेति नामत्रयविधानम् ॥ ॐ अच्युतानंत गोविंदेति नामत्रयस्य वासि ष्ठकश्यपनारदा ऋषयः । उष्णिग्गायत्रीपुरुषप्रकृतीसुतलच्छंदांसि । महाविष्णुमहानृसिंहमहावराहा देवताः । अमुकरोगशांतये जपे वि नियोगः । अस्य मंत्रस्य रोगानुसारेण सहस्रमयुतं लक्षं वा जपं कृत्वा जपान्ते दशांशेन तिलपायसहोमं तद्दशांशेन तर्पणं तद्दशांशेन

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मार्ज्जनं तद्दशांशेन शक्त्या वा ब्राह्मणभोजनं च कुर्य्यात् ॥ तथा च-(वीरसिंहावलोकने शंकरगीतावाक्यम्) अच्युतानंत गोविंदेत्येतन्नामत्रयं द्विजः । अयुतत्रयसंख्याकं जपं कुर्य्याद्धि शांतये ॥ इति नामत्रयविधानम् ॥ अथ सर्वव्याधिहरं विष्णुसहस्र नामविधानम् ॥ तदुक्तम् (महाभारते) सहस्रनामस्तोत्रं च सर्वं वारत्रयं जपेत् ॥ मृत्युरोगप्रशांत्यर्थमात्मनश्च शुभातये ॥ १ ॥ तत्र प्रयोगः । सुमुहूर्त्ते शिवालयादिषु कृतनित्यक्रियः स्वासने प्राङ्मुख उपविश्य आचम्य प्राणानायम्य । देशकालौ संकीर्त्य । ममामुकव्याधेः समूलनाशद्वारा सद्य अरोग्यार्थं श्रीपरमेश्वरप्रीत्यर्थममुकसंख्यया विष्णुसहस्रनामजपं करिष्ये । इति संकल्प्य । गणेशस्मरणं कृत्वा स्वपुरतः । आधारे अन्यलिखितपुस्तकं संस्थाप्य गंधपुष्पादिभिः संपूज्य शापविमोचनं पठेत् । ॐ अस्य श्रीविष्णोः सहस्रनाम्नां रुद्रशापविमोचनमंत्रस्य महादेव ऋषिः । अनुष्टुप् छंदः । श्रीरुद्रानुग्रहशक्तिर्देवता । सुरेशः शरणं शर्मेति बीजम् । अनंतो हुतभुग्भोक्तेति शक्तिः । सुरेश्वरायेति कीलकम् । रुद्रशापविमोचने विनियोगः । ॐ क्रीं ह्रां अङ्गुष्ठाभ्यां नमः । ॐ ह्रीं तर्जनीभ्यां नमः । ॐ ह्रूं मध्यमाभ्यां नमः । ॐ ह्रैं अनामिकाभ्यां नमः । ॐ ह्रौं कनिष्ठिकाभ्यां नमः । ॐ ह्रः कर तलकरपृष्ठाभ्यां नमः । इति करन्यासः ॥ एवमेव हृदयादिन्यासं कृत्वा ध्यायेत् । अथ ध्यानम् ॥ "तमालश्यामलतनुं पीतकौ शेयवाससम् ॥ वर्णमूर्तिमयं देवं ध्यायेन्नारायणं विभुम् ॥ १ ॥" इति ध्यात्वा । मानसोपचारैः संपूज्य । ॐ क्रींह्रांह्रींह्रूंह्रैंह्रौंह्रः स्वाहा । इति मंत्रं शतवारं दशवारं वा जप्त्वा किंचिज्जलं क्षिप्त्वा प्रार्थयेत् ॥ ॐ श्रीविष्णोः सहस्रनामस्तवो रुद्रशापविमुक्तो भव इति प्रार्थ्य । सततं तदनंतरं सहस्रनामपठनं कुर्य्यात् । विष्णोः सहस्रनाम्नां यो ह्य कृत्वा शापमोचनम् ॥ पठेच्छुभानि सर्वाणि

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

स्युस्तस्य निष्फलानि तु ॥ १ ॥ इत्यगस्तिसंहितायां रुद्रशापविमोचनम् ॥ अथ सहस्रनामस्तोत्रस्य न्यासध्यानादिप्रकारः ॥
ॐ अस्य श्रीविष्णोर्दिव्यसहस्रनामस्तोत्रमालामंत्रस्य श्रीभगवान् वेदव्यास ऋषिः । अनुष्टुप् छंदः । श्रीकृष्णः परमात्मा देवता ।
आत्मयोनिः स्वयं जात इति बीजम् । देवकीनंदनः स्रष्टेति शक्तिः । उद्भवः क्षोभणो देव इति परमो मंत्रः । शंखभृन्नन्दकी चक्रीति
कीलकम् । त्रिसामासामगः सामेति कवचम् । शार्ङ्गधन्वा गदाधर इत्यस्त्रम् । ॐ विश्वं विष्णुर्वषट्कार इति ध्यानम् । श्रीकृष्णप्री
त्यर्थे अमुकरोगनिवारणार्थे नामसहस्रपाठे विनियोगः । ॐ वेदव्यासऋषये नमः शिरसि ॥१॥ ॐ अनुष्टुप् छंदसे नमो मुखे ॥२॥
ॐ श्रीकृष्णपरमात्मदेवतायै नमः हृदये ॥ ३ ॥ ॐ आत्मयोनिः स्वयं जात इति बीजाय नमो गुह्ये ॥ ४ ॥ ॐ देवकीनंदनः
स्रष्टेति शक्तये नमः पादयोः ॥ ५ ॥ ॐ शंखभृन्नंदकी चक्रीति कीलकाय नमः सर्वांगे ॥ ६ ॥ इति ऋष्यादिन्यासः ॥ अथ
करन्यासः ॥ ॐ विश्वं विष्णुर्वषट्कार इत्यंगुष्ठाभ्यां नमः ॥ १ ॥ ॐ अमृतांशूद्भवो भानुरिति तर्जनीभ्यां नमः ॥ २ ॥ ॐ
ब्रह्मण्यो ब्रह्मकृद्ब्रह्मेति मध्यमाभ्यां नमः ॥ ३ ॥ ॐ सुवर्णबिंदुरक्षोभ्य इत्यनामिकाभ्यां नमः ॥ ४ ॥ ॐ आदित्यो ज्योतिरादित्य
इति कनिष्ठिकाभ्यां नमः ॥ ५ ॥ ॐ शार्ङ्गधन्वा गदाधर इति करतलकरपृष्ठाभ्यां नमः ॥ ६ ॥ इति करन्यासः ॥ एवमेव
हृदयादिषडंगन्यासं कृत्वा ध्यायेत् ॥ अथ ध्यानम् ॥ "शांताकारं भुजगशयनं पद्मनाभं सुरेशं विश्वाधारं गगनसदृशं मेघवर्णं
शुभांगम् ॥ लक्ष्मीकांतं कमलनयनं योगिभिर्ध्यानगम्यं वंदे विष्णुं भवभयहरं सर्वलोकैकनाथम् ॥१॥" इति ध्यात्वा मानसोप
चारैः संपूज्य । ॐ नारायणाय नमः ॥१॥ ॐ नराय नमः ॥२॥ ॐ नरोत्तमाय नमः ॥ ३॥ ॐ देव्यै नमः ॥ ४ ॥ ॐ सरस्वत्यै

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नमः ॥ ५ ॥ ॐ व्यासाय नमः ॥ ६ ॥ इति नमस्कृत्य स्पष्टपदाक्षरं स्तोत्रं पठेत् । अस्य पुरश्चरणं रोगानुसारेण सहस्रमयुतं लक्षं वा जपदशांशतस्तिलपायसाज्यैर्होमः । होमस्तु सहस्रनामभिः स्वाहांतैः कार्य्यः । अन्यत्सर्वं यथाविधि कुर्य्यात् । सद्य अरोग्यतासिद्धये अच्युतानंत गोविंदेति नामत्रयेण संपुटितस्य सहस्रनामस्तवस्य जपः कार्य्यः ॥ अथवा ॥ ॐ कृष्णाय वासु देवाय हरये परमात्मने ॥ प्रणतक्लेशनाशाय गोविंदाय नमोनमः ॥ १ ॥ इत्यनेन । ॐ आपदामपहर्तारं दातारं सर्वसंपदाम् ॥ लोकाभिरामं श्रीरामं भूयोभूयो नमाम्यहम् ॥ २ ॥ इति मंत्रेण वा संपुटितस्य जपेन सर्वरोगनाशः ॥ इति ज्वरहराणि ॥ अथाति सारग्रहणीशमनविधानम्॥अग्न्युपशमी अतिसारी भवति तडागभेत्ता च इति।सोऽग्निरस्मीत्यृचं दशसहस्र१००००संख्यया जपेत् । तिलाज्यद्रव्येण जुहुयात् हिरण्यं च दद्यात् । इत्यतिसारशमनम् ॥ अथ संग्रहणीशमनम् ॥ यः पुनस्तुष्टां भार्यामनन्यगतिकां कारणमन्तरेण परित्यजति स जन्मांतरे संग्रहणीरोगवान्न भवति । तच्छांतये शिवसंकल्पसूक्तमष्टोत्तरसहस्रं जपेत् । मधु हिरण्यं च दद्यात् । तथा च-(शिवगीतायाम्) साध्वीं भार्यां च यो मर्त्यः परित्यज्यति कामतः ॥ ग्रहणीरोगसंयुक्तः सदा भवति मानवः ॥ शिवसंकल्पसूक्तेन जपेदष्टोत्तरं शतमिति संग्रहण्युपशमनम् ॥ ॥ अथार्शोरोगशमनम् ॥ वेतनमादाय योध्यापयत्यर्च्चयति जुहोति जपति सोऽर्शोरोगवान् भवति । स कृच्छ्रातिकृच्छ्रचांद्रायणानि कृत्वा पुरुषसू क्तम् । उद्यन्नमृचम् । आदित्यहृदयं वा । अग्निवर्णमित्यादिसूक्तं व्याधिगुरुलघुभावेन वापेक्षयासहस्रमयुतं वा जपेत् ॥ सघृतं हिरण्यं च दद्यात् ॥ इत्यर्शोघ्नप्रतीकारः ॥ अथाजीर्णमंदाग्निशमनम् ॥ (ऋग्विधाने) यस्य भुक्तं न जीर्येत न तिष्ठेद्वा कथंचन ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तस्यान्नस्यानुरोधत्वादग्निरस्मीत्यृचं जपेत् ॥ (वृद्धपराशरः) अग्निसूक्तं जपेन्नित्यं श्रीसूक्तं च विचक्षणः इति । जातवेदसे इति मंत्रजपं वा कुर्य्यात् ॥ अथवा मंदाग्निशांतये राजतं मेषं यथाविधि दद्यात् ॥ अथ विशूचिकोपशमनविधानम् ॥ (योगवासिष्ठे) उत्पत्तिप्रकरणे एकोनसप्ततितमेसर्गे ॥ " दुर्भोजना दुरारंभा मूर्खा दुःस्थितयश्च ये ॥ दुर्देशवासिनो दुष्टास्तेषां हिंसां करिष्यसि ॥ १ ॥ प्रविश्याहृदयं प्राणैः पद्मग्रीहादिबाधनात् ॥ वातलेखात्मिका व्याधिर्भविष्यसि विशूचिका ॥ २ ॥ सगुणं निर्गुणं चैव जनमासादयिष्यसि ॥ गुणान्वितचिकित्सार्थं मंत्रोयं तु मयोच्यते ॥ ३ ॥ ब्रह्मोवाच ॥ हिमाद्रेरुत्तरे पार्श्वे कर्कटी नाम राक्षसी ॥ विशूचिकाभिधाना सा ॥ नाम्नाप्यन्या यवाधिका ॥ ४ ॥ तस्या मंत्रो यथा-"ॐह्रीँह्रीँह्रीँरींराँ विष्णुशक्तये नमः। ॐ नमो भगवति विष्णुशक्तिमेनाम् ॐ हरहर नयनय पचपच मथमथ उत्सादय दूरे कुरु स्वाहा हिमवन्तं गच्छ जीव सः सः सः चंद्रमण्डलगतोसि स्वाहा ॥ ७२ ॥ इति मंत्री महामंत्रं न्यस्य वामकरोदरे ॥ मार्ज्जयेदातुराकारं तेन हस्तेन संयुतः ॥ ५ ॥ हिमशैलाभिमुख्येन विद्रुतां तां विचिन्तयेत् ॥ कर्कटीं कर्कशाक्रंदां मंत्रमुद्गरमर्दिताम् ॥ ६ ॥ आतुरं चिंतयेच्चैटे रसायनहृदि स्थितम् ॥ अजरामरणं युक्तं मुक्तं सर्वाधिविभ्रमैः ॥ ७ ॥ साधको हि शुचिर्भूत्वा स्वाचांतः सुसमाहितः ॥ क्रमेणानेन सकलां प्रोच्छिनन्ति विशूचिकाम् ॥ ८ ॥ इति विशूचिकाप्रतीकारः ॥ अथ पांडुरोगोपशमनविधानम् ॥ देवब्राह्मणद्रव्यापहारी पांडुरोगवान् भवति सकृच्छ्रातिकृच्छ्रचांद्रायणानि कुर्यात् कूष्मांडहोमं च कुर्यात् ॥ हिरण्यं वसुधां च दद्यात् ॥ अथवा पूर्वोक्तपृथिवीमंत्रानुष्ठानं कुर्यादिति पांडुरोगोपशमनम् ॥ अथ रक्तपित्तोपशमनम् ॥ यः पूर्वजन्मनि वैद्यशास्त्रमदाद्युक्तौषधमन्यथा कृत्वा प्रयोजयति स शोणि

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तपित्तव्याधिमान् भवति । स ॐ अग्निंदूतं वृणीमह इत्यादिना चरुघृताभ्यामष्टोत्तरायुतमग्नौ जुहुयात् । इति रक्तपित्तोपशमनम् ॥
अथ क्षयरोगोपशमनविधानम्॥(महार्णवे) यः पूर्वजन्मनि साक्षाद्ब्रह्महा क्षयरोगवान् भवति । 'ब्रह्महा क्षयरोगी स्यात्'। इति शातात
पोक्तेः । अस्य प्रायश्चित्तमसाध्यरोगोपसृष्टं षडब्दं व्रतमाचरेत् । रोगतारतम्याभावात्प्रायश्चित्तभावो द्रष्टव्यः (ऋग्विधाने)
"असाध्यव्याधिना ग्रस्त उग्रेण प्राणहारिणा ॥ आतेरौद्रेण सूक्तेन प्रत्यृचं वाग्यतः शुचिः ॥ पूर्वमाज्याहुतीर्हुत्वा उपस्थाय च शंक
रम् ॥ हविःशेषेण वर्तेत एकोत्तरशतं ततः ॥ पूर्णे मासे जयेन्मृत्युं रोगेभ्यश्च प्रमुच्यते । होमकर्मण्यशक्तानां जपस्तद्विगुणो भवेत् "
इति अथवा त्र्यंबकमंत्रपुरश्चरणं कुर्य्यात् ॥ इति क्षयोपशमनविधानम् ॥ अथ श्वासकासादिकफरोगोपशमनम् ॥ (उमामहेश्वरसं
वादे) "कृतघ्नो जायते मर्त्यः कफवाञ्श्वासकासवान् ॥ उष्णज्वरी च नित्यं हि पित्तरोगसमन्वितः ॥" इति । तच्छांतये पिपी
लिकामध्यानि यवमध्यानिं वा त्रीणि चांद्रायणानि कुर्यात् ॥ यथेप्सितं पंचाशद्ब्राह्मणान् भोजयेत् ॥ "तद्विष्णोरिति सूक्तेन जपं
कुर्याद्विजोत्तमः ॥ पूजयेद्भोजयेद्दद्यात्तन्मना नान्यमानसः ॥" इति । अथवा । पुरुषसूक्तम् । सहस्रनामस्तोत्रम् । उद्यन्नित्यृचं वा
प्रत्यष्टोत्तरायुतं जपं कृत्वा चरुघृताभ्यां हुत्वा पंचाशद्ब्राह्मणान् भोजयेत् । (महाभारते) "हिरण्यं रक्तवासांसि पंचाशद्विप्रभोज
नम् ॥ सहस्रकलशस्नानं कुर्याद्रोगस्य शांतये" इति ॥ अथवा अच्युतानंत गोविंदेति नामत्रयमष्टोत्तरायुतत्रयं जपेत् इति कफ
रोगोपशमनम् ॥ अथ वातव्याधिशमनविधानम् ॥ देवब्राह्मणस्वापहरणात् स्वामिद्रोहाद्वातरोगी भवति । अस्य प्रायश्चित्तं
कृच्छ्रातिकृच्छ्रचांद्रायणं कुर्यात् (वीरसिंहावलोकने) "वात आवातमंत्रोयं जप्यतेऽयुतसंख्यया ॥ अग्निरश्मीत्यृचं वापि जपेद्वा

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

जुहुयादपि ॥" इति । धनुर्वाते विशेषस्तत्रैव । यः पुनरक्षतयोनिमनिच्छंतीं परस्त्रियं बलादाक्रम्योपभुंक्ते स सर्वसंधिषु धनुर्वातरोगवान् वा त्रिषमज्वरी वा तीव्रपीडावान् भवति । (तच्छांतिर्ब्राह्मे) "अपमृत्यप्रशांत्यर्थं प्रतिरूपं द्विजोत्तमे । प्रदद्यान्महिषीं कृष्णां सवत्सां पूजयेत्ततः ॥ सहस्रनामस्तोत्रं वा सर्वं वारत्रयं जपेत् ॥ मृत्युरोगोपशांत्यर्थमात्मनश्च शुभाप्तये" (शंकरगीतायाम्) "अच्युतानन्त गोविंदेत्येतन्नामत्रयं द्विजः । अयुतत्रयसंख्याकं जपं कुर्याद्धि शांतये॥" इति । अथवा पुरुषसूक्तं जपेत् । पापक्षयाद्रोगमोक्षो भवत्येव । इति वातरोगोपशमनविधानम् ॥ अथ शूलरोगोपशमनविधानम् । याचितारमकिंचनं ब्राह्मणं श्रुताध्यापनसंपन्नातिशांतमाहूय यो न प्रयच्छति स जठरशूलरोगवान् भवति कदाचिदाध्मानी भवति सकृच्छ्रातिकृच्छ्राणि कृत्वा वस्त्राणि दद्यात् । दाननिबंधोक्तं त्रिशूलदानं च कार्य्यम्।(महार्णवे शातातपः)"शूली परोपतापेन जायते वपुषा तनुः ॥सोन्नदानं प्रकुर्वीत तथा रुद्रं जपेद्बुध इति रुद्रविधानम् (शिवप्रकरणे)द्रष्टव्यम्॥इति शूलोपशमनम् ॥अथ गुल्मरोगशमनम् ॥ गुरुप्रत्यर्थी वातगुल्मवान् भवति।तच्छान्तये मासमेकं पयोव्रतं कृत्वा । ॐ मुंचामीत्यनेन सूक्तेन प्रत्यृचं चरुघृताभ्यां जुहुयात् । ॐ वातआवातुभेषजमित्यस्य वातायन उल ऋषिः। वायुर्देवता। गायत्री छंदः। विहितार्थे जपे विनियोगः।ॐ वात आवातु भेषजठ्ँशंभूर्मयोभूर्नोहृदेप्रणआयूंषितारिषत् ॥ १ ॥ इति मंत्रेणायुतसंख्यया जपो होमश्च कार्य्यः ॥ इति गुल्मोपशमनम् ॥ अथोदररोगाणां शमनविधानम् ॥ (महार्णवे) "यो ब्रह्मविष्णुरुद्राणां भेदमुत्तमभावतः । कुर्यात्स उरव्याधियुक्तो भवति मानवः ॥ कुर्यात्कृच्छ्रं चातिकृच्छ्रं चांद्रायणमथापरम् । सहस्रकलशस्नानमीश्वरस्य तु कारयेत् ॥ जपेदयुतसंख्याकमुद्यन्नद्यत्यृचं तथा । आतेपितरतः सूक्तान् घृतेन चरुणा पृथक् ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अष्टोत्तरसहस्रं हि जुहुयाच्च ततः परम् । मधुनाज्येन संयुक्तं हिरण्यं शक्तितो दिशेदिति ।" सहस्रकलशस्नानं महेशस्य शतरु द्रेण तत्तु रुद्रप्रकरणे द्रष्टव्यम् ॥ उद्यन्नद्यत्यृचमपि पूर्वं प्रतिपादितमित्यर्थः । अथ जलोदरे विशेषस्तत्रैव । " सहस्रकलशस्नानं महादेवस्य कारयेत् । भोजयेच्च शतं विप्रान्मुच्यते किल्विषात्ततः ॥ प्लीहोदरे विशेषः । "भृतकाध्यापको यस्तु कन्यादूषणतत्परः । प्लीहवान् स भवेद्विप्रो जपेच्छ्रीसूक्तमत्र हि ॥ अयुतत्रयसंख्याकं प्लीहोदरविमुक्तये । प्रत्यृचं च भवेद्धोमश्चरुणा सर्पिषा पृथक् ॥" इति । श्रीसूक्तं देवीमंत्रप्रकरणे ज्ञेयम् । अथ प्लीहरोगनाशकहनुमन्मंत्रः (मंत्रमहोदधौ) मंत्रो यथा–"योयोहनूमंतफलफलित धगधगितआयुराषफ्फरुडाह" इति चतुर्विंशति२४वर्णो मंत्रः॥ "प्लीहयुक्तोदरे स्थाप्यं नागबल्लीदलं शुभम् । तदुपर्य्यष्टगुणितं वस्त्रमा च्छादयेत्ततः ॥ वंशजं शकलं तस्योपरि मुंचेत्कपिं स्मरन् । आरण्यप्रस्तरोत्पन्ने वह्नौ यष्टिं प्रतापयेत् ॥ वदरीतरुसंभूतां मंत्रेणा नेन सप्तशः । तया संताडयेद्वंशं शकलं जठरस्थितम् ॥ सप्तकृत्वः प्लीहरोगो नश्यत्येव नृणां क्षणात् । इत्युदररोगशमनप्रकारः । अथ मूत्रकृच्छ्रादिरोगहरप्रतीकारः (महार्णवे) "सहस्रनामस्तोत्रस्य सूक्तस्य पौरुषस्य च । गायत्र्याश्च जपः कार्य्यः शक्त्या पापापनुत्तये ॥ अथ प्रमेहरोगोपशमनविधानम् ॥ (महार्णवे)" मातृगामी स्वसृगामी मधुमेही भवेन्नरः ॥ भ्रातृभार्याभिगामी च जलमेही नराधिप । यो गच्छेद्भगिनीं नित्यमिक्षुमेहीति निश्चितम् ॥ चांडालीगमनात्सर्वप्रमेहव्याधिमान्भवेत् । क्षुत्पिपासातुर श्चैव जायते तस्य निष्कृतिः ॥ चांद्रायणत्रय कुर्याद्यवमध्यं तथापरम् ॥ तिर्यग्गामी स शूलेन प्रमेहेन युतो भवेत् ॥ कुर्य्यात्सांतप नादीनि प्रायश्चित्तं यथाविधि । पर्वव्यवायी मनुजः कन्यागामी तथैव च ॥ वातप्रमेहयुक्तः स्यात्कुर्याच्चांद्रायणत्रयम् ॥" इति अथ

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सर्वप्रमेहशमनप्रकारः । प्रोक्ताधिकं प्रायश्चित्तं प्रकल्प्य मात्रादीनामतिमात्रनिषिद्धत्वात् । यत्राशक्तः तत्र कृच्छ्रत्रयं प्रतिदिनं चत्वारिंशद्ब्राह्मणभोजनं कारयेत् ॥ पुरुषसूक्तं सहस्रनामस्तोत्रं गायत्रीं वा जपेत् ॥ आतेरौद्रसूक्तेनाज्यहोमं जपं वा अष्टोत्तरसहस्रं कारयेत् । स्वर्णधेनुं च दद्यात् ॥ अथ श्वयथुरोगोपशमनम् ॥ (महार्णवे) "पर्वताग्रं नदीतीरं छायामारुह्य वा नरः । मूत्रं पुरीषमथ वा यः प्रक्षिपति वा जले ॥ श्वयथुव्याधिमाप्नोति इत्याह भगवान्छिवः ॥ 'सॐइदंवोविश्वतःशरीर' इत्यादि अष्टोत्तरशतायुतत्रयं जपेत् । ॐ आपोहिष्ठामयोभुव इत्यनेन चरुघृताभ्यामष्टोत्तरायुतत्रयं होमं कुर्यात् ॥ अथ वृषणव्याधिशमनप्रकारः ॥ तत्र क्षुधागामी वातवृषणः । असकृदज्ञानाद्गत्वा चांद्रायणत्रयाच्छुध्येत् । ज्ञानात्सकृद्गमने कृच्छ्राद्वा शुद्धिः । बुद्धिपूर्वकं बहुदिनेषु गत्वा अग्निं प्रविश्य मृतः शुध्येत् ॥ स रुद्रसंहितामष्टोत्तरसहस्रं जपेत् । गां च दद्यात् । तथा च (महार्णवे–विष्णुः) । "जायते वृषणे यस्य व्याधिः परमदारुणः । जपित्वा दशसाहस्रं मुच्यते रुद्रसंहिताम् ॥" अथ गंडमालाशमनविधानम् ॥ "गुरुद्वेषी परचित्तदुःखकारी गुल्मी गंडमालाव्याधिमांश्च जायते । अस्य प्रायश्चित्तं चांद्रायणं कृत्वा गंडमालागलगंडोपशांतये पुरुषसूक्तं सहस्रमयुतं वा व्याध्यनुसारेण जपेत् ॥ अथ कुष्ठरोगोपशमनविधानम् ॥ तत्र जंतुघातकः कुष्ठरोगी वस्त्रहारी श्वेतकुष्ठी भवति स सांतपनं कुर्यात् ॥ तदुक्तम् (महार्णवे)"यो नरो हंति वै जंतून्कुष्ठरोगी भवेत्तु सः ॥ स च सांतपनं कुर्याद्भगवानाह शंकरः ॥ " इति॥अन्यायदंडकारी च मुखकृष्णो भवति । असौ कृच्छ्रातिकृच्छ्रचांद्रायणं कुर्य्यात् । क्षुद्रप्राणिहिंसको विवर्णमुखः स चांद्रायणमतिकृच्छ्रं च कृत्वा राजतवृषभदानं कुर्यात् ॥'ब्रह्महा नरकस्यांते पांडुकुष्ठी प्रजायते । प्रायश्चित्तं प्रकुर्वीत यथोक्तमृषिभ षितम्॥" (महाभारते–)

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

"हिरण्यं रक्तवासांसि पंचाशद्विप्रभोजनम् ॥ सहस्रकलशस्नानं तस्य रोगोपशांतये ॥ "इति अत्र सहस्रकलशस्नानं शालग्रामोपरि कार्यम् ॥ पुरुषसूक्तं सहस्रनामस्तोत्रम् । उद्यन्नद्येत्यृचो जपेत्प्रत्यष्टोत्तरायुतं चरुघृताभ्यां जुहुयात् । अथवा सूर्याराधनम् आदित्य हृदयजपं महाभारतश्रवणं च कुर्य्यात् ॥ अथ शिरोरोगशमनविधानम् ॥ गुरूपरोधी शिरोरोगी भवति । तच्छांतये पंचाशद्ब्राह्मण भोजनं कार्यम् ॥ उद्यन्नद्येत्यृचं जपेत् । कूष्मांडीभिश्च जुहुयात् । अथवा अक्षीभ्यामिति सूक्तमष्टोत्तरशतं जपेत् ॥ चरुघृताभ्यां दशांशेन जुहुयात् । अथवा वायुपुराणोक्तस्वर्णयज्ञोपवीतदानं कुर्य्यात् ॥ ॥ अथ नेत्ररोगशमनविधानम् ॥ (महार्णवे) " परदृष्टिविघातेन भिषग्मिथ्याचरेण च । कामात्परस्त्रियं दृष्ट्वा नेत्ररोगी भवेन्नरः ॥ चांद्रायणपराकं च पंचाशद्विप्रभोजनम् । कुर्याद्घृतःसुवर्णेति चरुणा सर्पिषा तथा ॥ अष्टोत्तरसहस्रं तु जुहुयाद्रोगशान्तये । वर्चोदाअसि मंत्रं तु जपेदाज्यं सकांचनम् ॥ दद्याद्विप्राय विधिवन्नेत्ररोगः प्रशाम्यति" इति ॥ (कर्मविपाकसंग्रहेपि) "नग्नां परस्त्रियं दृष्ट्वा सूर्यं वास्तमयोदये । नेत्रशूली भवेत्सोपि नेक्षितुं क्षमते दृशा ॥ वर्चोमेदेहि मंत्रेण होमः स्यादष्ट चायुतम् ॥ वयः सुपर्णा मंत्रेण नेत्रे सिंचेच्च वारिणा ॥ अक्षीभ्यांत इति जपे नेत्रशूलं प्रशाम्यति" इति ॥ "ॐ वर्चोदा आसि वर्चो मे देहि इति दशाक्षरोमंत्रः "होमकाले स्वाहांतः कर्त्तव्यः । अस्य मंत्र स्य प्राजापत्यपरमेष्ठीवामदेवा ऋषयः । अग्निर्देवता । अतिशक्करीछंदः । विहितार्थे विनियोगः ॥ ॐ वर्चोदाअसिवर्चोमे देहि ॥ १ ॥ ॐ वयःसुपर्णाउपसेदुरिंद्रंप्रियमेधाऋषयोनाधमानाः । अपध्वांतमूर्णुहिपूर्धिचक्षुर्मुमुग्ध्यस्मानिधयेवबध्वान् ॥ २ ॥ एवं यथाशक्ति यथारोगं च जपसंख्यां प्रकल्प्य यावद्रोगविमुक्तिस्तावन्नेत्रसेचनं कृत्वा यथाशक्ति ब्राह्मणान् भोजयेत् ॥ सूर्यप्रीत्यर्थं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सूर्यपूजा च कार्य्या । नेत्राधिदेवतात्वात्तस्येति ॥ ससुवर्णं साज्यं छायापात्रं दद्यात् ॥ नेत्रपूयहरमपि । तत्रैव- दंपतीभ्यां प्रवृत्तं तु मैथुनं यो निरीक्षते । स नेत्रपूययुक्तः स्यादक्षीभ्यामिति मंत्रतः ॥ जपहोमौ च कर्त्तव्यौ शक्त्या ब्राह्मणभोजनम् । सहस्रकलशस्नानं रवेः कुर्याद्द्विजोत्तमः ॥ इति अत्र सहस्रकलशस्नानं सूर्यप्रतिमायां मंडले वा ॐ विभ्राडित्यादिसौरसूक्तेन कार्यम् । अथवा सर्वनेत्ररोगोपशमनार्थमादित्यहृदयं नेत्रोपनिषदं वा सहस्रमयुतं वा पठेत् । अथ नेत्रोपनिषत् ॥ अथातश्चाक्षुषीं पठितसिद्धविद्यां चक्षूरोगहरां व्याख्यास्यामो यया चक्षूरोगाः सर्वतो नश्यन्ति चक्षुषो दीप्तिर्भवति । अस्याश्चाक्षुषविद्याया अहिर्बुध्न्य ऋषिः । गायत्री छन्दः । सविता देवता । चक्षूरोगनिवृत्तये जपे विनियोगः ॥ ॐ चक्षुश्चक्षुश्चक्षुस्तेजः । स्थिरो भव मां पाहि त्वरितं चक्षूरोगान् शमयशमय मम जातरूपं तेजो दर्शयदर्शय यथाहमंधो न स्यां तथा कृपया कल्याणं कुरुकुरु मम यानियानि पूर्वजन्मोपार्जितानि चक्षुःप्रतिरोधकदुष्कृतानि तानि सर्वाणि निर्मूलयनिर्मूलय । ॐ नमश्चक्षुस्तेजोदात्रे दिव्यभास्कराय ॐ नमः करुणाकराय अमृताय ॥ ॐ नमो भगवते सूर्याय । अक्षितेजसे नमः । खेचराय नमः । महते नमः । रजसे नमः । तमसे नमः । असतो मां सद्गमय । तमसो मां ज्योतिर्गमय । मृत्योर्मामृतं गमय । उष्णो भगवान् शुचिरूपः हंसो भगवान् शुचिरप्रतिरूपः । य इमां चाक्षुष्मतीं विद्यां ब्राह्मणो नित्यमधीते । न तस्याक्षिरोगो भवति न तस्य कुलेंधो भवति । अष्टौ ब्राह्मणान् ग्राहयित्वा विद्यासिद्धिर्भवति । ॐ विश्वरूपं घृणितंजातवेदसंहिरण्मयं ज्योतिरूपं ज्योतिरूपं तपंतं सहस्ररश्मिभिः शतधा वर्तमानः । पुरः प्रजातामुदयत्येषसूर्यः ॐ नमो भगवते आदित्याय अवाग्वादिने स्वाहा ॥ इति नेत्रोपनिषत्समाप्तिः ॥ अथ नेत्ररोगहरं तर्पणम् ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(महार्णवे) उद्यन्नद्येति त्र्यृचस्य कण्वः प्रस्कण्व ऋषिः । अनुष्टुप् छंदः । सूर्यो देवता । तर्पणे विनियोगः । ॐ उद्यन्नद्यमित्रमह ॥ ॐ सूर्यं तर्पयामि ॥ १ ॥ ॐ आरोहन्नुत्तरांदिवम् ॐ सूर्यं तर्पयामि ॥ २ ॥ ॐ हृद्रोगंममसूर्य ॐ सूर्यं तर्पयामि ॥ ३ ॥ ॐ हरि माणं चनाशय ॐ सूर्यं तर्पयामि । ॐ शुकेषुहरिमाणम् ॐ सूर्यं तर्पयामि॥ॐ रोपणाकांसुदध्मसि ॐ सूर्यं तर्पयामि ॥ ॐ अथोहा रिद्रुवेषुमे ॐसूर्यं तर्पयामि। ॐ हरिमाणंनिदध्मास ॐ सूर्यं तर्पयामि ॥ ॐ उदगादयमादित्यः ॐ सूर्यं तर्पयामि ॥ ॐ विश्वेनसह सासह ॐ सूर्यं तर्पयामि । ॐ द्विषंतंमह्यंरंधयन् ॐ सूर्यं तर्पयामि। ॐ मोअहंद्विषतेरंधम् ॐ सूर्यं तर्पयामि (अथार्धर्चः) ॐ उद्यन्नद्यमित्रमहआरोहन्नुत्तरांदिवम् ॐ सूर्यं तर्पयामि । ॐ हृद्रोगंममसूर्यहरिमाणंचनाशय ॐ सूर्यं तर्पयामि । ॐ शुकेषुमेहरिमाणं रोपणाकांसुदध्मसि ॐ सूर्यं तर्पयामि । ॐ अथोहारिद्रुवेषुमेहरिमाणंनिदध्मसि ॐ सूर्यं तर्पयामि ॥ ॐ उदगादयमादित्योविश्वेनु सहसासह ॐ सूर्यं तर्पयामि ॥ ॐ द्विषंतंमह्यंरन्धयन्मोअहंद्विषतेरंधम् ॐ सूर्यं तर्पयामि ॥ (अथ सर्वर्चः) ॐ उद्यन्नद्यमित्रमहआ रोहन्नुत्तरांदिवम् । हृद्रोगंममसूर्यहरिमाणंचनाशय ॐ सूर्यं तर्पयामि । ॐ शुकेषुमेहरिमाणंरोपणाकांसुदध्मसि ॥ अथोहारिद्रुवेषुमे हरिमाणंनिदध्मसि । ॐ सूर्यं तर्पयामि ॥ ॐ उदगादयमादित्योविश्वेनुसहसासह । द्विषन्तंमह्यंरन्धयन्मोअहंद्विषतेरंधम् ॐ सूर्यं तर्पयामि (अथ सार्द्धर्चेशः) ॐ उद्यन्नुद्यमित्रमहआरोहन्नुत्तरांदिवम् । हृद्रोगंममसूर्यहरिमाणंचनाशय १ शुकेषुमेहरिमाणंरोपणाकां

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सुदध्मसि ॐ सूर्यं तर्पयामि ॥ ॐ अथोहारिद्रुवेषुमेहारिमाणंनिदध्मसि २ ॐ उदगादयमादित्योविश्वेनसहसासह । द्विषन्तंमह्यं रन्धयन्मोअहंद्विषतेरधम् ३ ॐ सूर्यं तर्पयामि॥ (अथ ऋचेन त्रिः) ॐ उद्यन्नद्य० १ ॐ शुकेषु० २ ॐ उदगादय० ३ ॐ सूर्यं तर्पयामि १ एवं ऋचैन पुनरपि द्विः । अस्य सकलस्यापि तर्पणप्रयोगस्य व्याध्यनुसारेणाष्टाविंशतिरष्टोत्तरशतमित्याद्यावृत्तिः कल्पनीया ॥ अत्र तर्पणे रक्ताक्षतरक्तपुष्पाणि ग्राह्याणि अयं च तर्पणप्रकारो न केवलनेत्ररोगहरः । अपि तु ज्वरादिरोगहरोपि ज्ञेयः । तथा च–(सायनभाष्ये–शौनकः) उद्यन्नद्येति मंत्रोयं सौरः पापप्रणाशनः । रोगघ्नश्च विषघ्नश्च भुक्तिमुक्तिफलप्रदः ॥ इति नेत्रादिरोगहरतर्पणम् ॥ अथ कर्णरोगोपशमनम् ॥ (महार्णवे) "मातृपितृगुरूणां च देवब्राह्मणयोस्तथा । शृणोति निंदां बुद्धया यः कर्णाभ्यां तस्य शोणितम् ॥ पूयं च प्रस्रवत्यस्य शांतिः कृच्छ्रचतुष्टयात् । हिरण्यरक्तवस्त्राणां दानाद्ब्राह्मणभोजनात् ॥ जपाद्धोमाच्च भवति सौरमंत्रेण शक्तित इति । अत्र जपे होमश्च ।ॐ उद्यन्नद्येतिसौरमंत्रेणाष्टोत्तरशतादिः कार्यः । सौरमंत्रस्तु नेत्ररोगे पूर्वं कथितः ॥ अथ नासिकारोगहरविधानम्। (महार्णवे) "लवणस्यापहर्ता तु शीर्णघ्राणांघ्रिपाणिकः॥घर्घरस्वरवांश्चैव जायते तस्य निःकृतिः ॥ उद्यन्नद्यऋचं सम्यग् जपेदष्टोत्तरायुतम् । जुहुयाच्चरुसर्पिर्भ्यां रक्तवासांसि कांचनम् ॥ दद्यादेवं द्विजगवां कुर्य्यात्पूजां स्वशक्तितः ॥ अथ मुखरोगहराणि॥(महार्णवे)"कूटसाक्षी भवेद्वक्रोगी शोणितपित्तवान् । कृच्छ्रातिकृच्छ्रौ कुर्वीत चांद्रायण मथापरम् ॥ कुर्यात्कूष्मांडहोमं च गायत्रीमयुतं जपेत् । दद्याद्धिरण्यं व्रीहींश्च मुखरोगस्य शांतये ॥" इति मुखरोगोपशमनविधानं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

समाप्तम् ॥ अथापस्मार (मृगी) रोगोपशमनविधानम् (महार्णवे)"गुरौ स्वामिनि वा यस्तु प्रतिकूलं समाचरेत् । सोपस्मारी भवे
त्तत्र कुर्याच्चांद्रायणं व्रतम् ॥ सदसस्पतिमंत्रेण चर्वाज्यं जुहुयात्तथा । कयान इति सूक्तं तु जपेद्ब्राह्मणतर्पणम् ॥ कुर्याद्धिरण्यदानं
च शक्त्या रोगस्य शांतये ॥ सदसस्पतिमिति मंत्रस्य मेधातिथिर्ऋषिः । गायत्रीछंदः। सदसस्पतिर्देवता । होमे विनियोगः।ॐसदस
स्पतिमद्भुतंप्रियमिंद्रस्यकाम्यंसनिंमेधामयासिषम् ॥ १ ॥ कयान इति सूक्तं पंचदशर्चात्मकं ऋग्वेदीयं ज्ञातव्यम्" (शातातपः)
"धूर्त्तोपस्माररोगी स्यात्तत्तद्दोषोपशांतये ॥ ब्रह्मकूर्चत्रयं कृत्वा धेनुं दद्यात्सदक्षिणाम्॥"अथ वा 'दाननिबंधोक्तं' गणपतिप्रतिमादानं
कुर्यात् ॥ इत्यपस्मारशमनम् ॥ अथ भगंदररोगोपशमनम् ॥ (महार्णवे) "यो गृहीत्वा द्विजो मोहान्नियुक्तो धर्म्मनिश्चये ॥ भगंदरो
भवेत्तस्य ह्यधर्म्मं वदतो मुखात्" (पद्मपुराणे विशेषः) ' आचार्यभार्यागमने भगंदरयुतो भवेत् ' (शातातपोपि) "स्वगोत्रस्त्री
प्रसंगेन जायते च भगंदरी । तेनापि निष्कृतिः कार्या मेषदानेन यत्नतः ॥" अत्र मेषदानं दानग्रंथोक्तं रजतमयमेषदानं बोध्यम् ॥
इति भगंदरोपशमनम् ॥ अथ हृदयादिव्रणरोगोपशमनम् ॥ (शातातपस्मृतौ) "स्वजातिजायागमने जायते हृदयव्रणी ॥ तत्पा
तकविशुद्धचर्थं प्राजापत्यव्रतं चरेत् ॥ जात्युत्तमस्त्रीगमनाज्जायते मस्तकव्रणी । तत्पातकविशुद्धचर्थं प्राजापत्यव्रतं चरेत् ॥ श्रोत्रि
यस्त्रीप्रसंगेन जायते नासिकाव्रणी । आचरेत्सर्वशुद्धचर्थं प्राजापत्यचतुष्टयम् ॥ " (महार्णवे) "जलाग्न्युद्बंधनप्रायनिमित्तेन म्रियेत
यः । भवेदुरसि दुष्टं हि व्रणं तस्यापि निष्कृतिः ॥ स दद्याद्गोद्वयं सम्यक्पंचाशद्विप्रभोजनम् । दक्षिणां च यथाशक्ति मुक्तो भवति
रोगतः ॥ 'भगव्रणे विशेषः' ॥ मृते भर्तरि या नारी ब्रह्मचर्यविघातिनी । सा भवेद्व्रणदोषेण संभोक्तुं क्षमते न च ॥ संभोगानंतरं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तीव्रवेदना पुरुषस्य वा। स नीलवृषभान्दद्यान्मधुसर्प्पिस्तिलानपि ॥ 'स्तनस्फोटेपि विशेषः'। अवमन्य तु भर्तारं जारमालिंगते नवम् । सार्द्धं क्रीडति या नारी तमेवानुस्मरत्यपि ॥ तस्यास्तु स्तनयोः स्फोटा जायंते जननांतरे । भगाच्च रक्तं स्रवति तद्रोगस्य प्रशांतये ॥ दद्याद्वाः पंच लवणं हरिद्रां धान्यमेव च । उमामहेश्वरं चैव पूजयेच्च धने सति ॥ निष्कद्वादशकं दद्याज्जपेत्तामग्निसूक्त कमिति [तामग्निसूक्तं तामग्निवर्णां तपसा इत्यादि सप्तर्चसूक्तं ऋग्वेदे प्रसिद्धम्] इति व्रणशमनम् ॥ अथ वातरक्तशमनम् (वृद्धबौधायनः) "सवर्णागमने रक्तवातवाञ्जायते नरः। एतद्रोगनिवृत्यर्थं षडब्दं कृच्छ्रमाचरेत्॥" (शातातपोपि) " रक्तवस्त्रप्रवालानां हारी स्याद्रक्तवातवान् । सवस्त्रां महिषीं दद्यात्पद्मरागसमन्विताम् ॥ वस्त्रं रक्तमेव ॥ इति वातरक्तोपशमनम् ॥ अथ स्त्रीणां प्रदररोग स्योपायः ॥ (महार्णवे)'स्रवद्गर्भा भवेत्सा तु बालकं हंति या पुरा' ॥ एतद्दोषविनाशार्थं वायुपुराणोक्तं कांचनयज्ञोपवीतं यथाविधि दद्यात् ॥ 'गर्भस्रावभवाद्दोषादेवं कृत्वा विमुच्यते'। पूर्वजन्मनि या पित्रा मात्रा गुरुणा वा सार्द्धं स्पर्धते सा प्रदररोगिणी भवति । सा कृच्छ्रातिकृच्छ्रं कुर्य्याच्चांद्रायणानि च कुर्यात् । तद्विष्णोरिति मंत्रमयुतत्रयं जपेत् । आज्यसहितमधुमंडकान्नं दद्यात् । विप्र पादक्षालितोदकेन स्वांगं मार्जयेत् विप्रोच्छिष्टेनानुलिंपेत् । या इत्थमाचरति तस्या अवश्यं चिकित्सायां रोगो नश्यति । इति प्रदररोगहरो विधिः ॥ अथ गर्भिण्याः प्रतिमासं गर्भरक्षाप्रकारः ॥ (वीरसिंहावलोकने) प्रथमे मासे गर्भिण्या गर्भरक्षामुद्दिश्य ब्रह्मणे बलिं दद्यात् । पायसघृतश्वेतवस्त्रचंदनच्छत्रांगुलीयककवचरत्नगर्भगंधपुष्पधूपदीपहिरण्यसाहितपूर्णकुंभेन बलिं क्षिपेत् । बलिमंत्रः "एह्येहि भगवन् ब्रह्मन् प्रजाकर्त्तः प्रजापते ॥ प्रगृह्णीष्व बलिं चेमं सापत्यां रक्ष गर्भिणीम् ॥ १ ॥ इति मंत्रेण शुद्धा

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

त्मना वलिर्देयः । वलिदात्रे दक्षिणां च दद्यादिति प्रथममासवलिदानविधानम् ॥१॥ एवमेव सर्वत्र । द्वितीयमासे । पायसदध्यन्न लाजतिलपिण्याकवस्त्रहिरण्यजलपूर्णकुंभादिभिरलंकृत्य । ॐ अश्विनौ देवदेवेशौ प्रगृह्णीतं बलिं त्विमम् ॥ सापत्यां गर्भिणीं चेमां रक्षतं पूजयानया ॥ १ ॥ इति मंत्रेणाश्विभ्यां बलिं दद्यात् ॥ इति द्वितीयमासबलिः ॥ २ ॥ तृतीये मासि । क्षीरान्नलाजश्वे तध्वजहिरण्यवस्त्रगंधादिभिर्बलिं संपाद्य । ॐ रुद्राश्चैकादश प्रोक्ताः प्रगृह्णंतु बलिं त्विमम् ॥ युष्माकं प्रीतये वृत्तं नित्यं रक्षत गर्भिणीम् ॥ १० ॥ इति मंत्रेण जलाशये एकादशरुद्रेभ्यो बलिं दद्यात् ॥ इति तृतीयमासबलिः ॥ ३ ॥ चतुर्थे मासि । रक्तान्न ध्वजगंधपुष्पवस्त्रहिरण्यादिभिः पूर्ववद्बलिं संपाद्य । ॐ आदित्या द्वादश प्रोक्ताः प्रगृह्णीध्वं बलिं त्विमम् ॥ युष्माकं तेजसां वृद्ध्या नित्यं रक्षत गर्भिणीम् ॥ १ ॥ इति द्वादशादित्येभ्यो बलिं दद्यात् ॥ इति चतुर्थमासबलिः ॥ ४ ॥ पंचमे मासि । माध्वीपैष्टीसु राशर्करामधुमधुकेक्षुतिलापिष्टधूपलाजहिरण्यादिभिः सहकारमूले गर्भरक्षायै गोमयेन विनायकं कृत्वा । वस्त्रयुग्मेनावेष्टय संपूज्य । ॐ विनायक गणाध्यक्ष शिवपुत्र महाबल ॥ प्रगृह्णीष्व बलिं चेमं सापत्यां रक्ष गर्भिणीम् ॥ १॥ इति मंत्रेण विनायकाय बलिं दद्यात इति पंचममासबलिः ॥ ५ ॥ षष्ठे मासि । पायसघृतशर्करालाजहरिद्रान्नविशिष्टं बलिं प्रभातसमये नदीतीरे नद्यभावे तडागसमीपे ॐ स्कंद षण्मुख देवेश पुत्रप्रीतिविवर्धन । प्रगृह्णीष्व वलिं चेमं सापत्यां रक्ष गर्भिणीम् ॥ १ ॥ इति मंत्रेण स्कंदाय बलिं दद्यात् ॥ ॥ ६ ॥ सप्तमे मासि । पायसलाजशर्कराघृतसहितं हरिद्राध्वजसर्वालंकारभूषितं बलिं रक्तवस्त्रद्वयवेष्टितशरीरो नदीतीरे । ॐ प्रभा सः प्रभवः श्यामः प्रत्यूषो मारुतो नलः । ध्रुवो धराधरश्चैव वसवोष्टौ प्रकीर्तिताः॥ प्रगृह्णीध्वं बलिं चेमं नित्यं रक्षंतु गर्भिणीम्॥१॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

इति मंत्रेणाष्टवसुभ्यो बलिं दद्यात् ॥ ७ ॥ अष्टमे मासि । दध्यन्नमुद्गकृसरान्नसाज्यपक्वापक्वमत्स्यमांससुरेक्षुरसगंधकृष्णवस्त्रकुङ्कुट गन्धपुष्पधूपदीपहिरण्यसहितपूर्णकुंभेन नीलोत्पलसहितेन स्वयं रक्तवस्त्रेणालंकृत्य दक्षिणस्यां दिशि । ॐ पितृदेवि पितृज्येष्ठे बहुपुत्रि महाबले ॥ भूतश्रेष्ठे दिवावासे निर्वृते शौनकप्रिये ॥ प्रगृह्णीष्व बलिं चेमं सापत्यां रक्षगर्भिणीम् ॥ १ ॥ इति मंत्रेण दुर्गायै बलिं दद्यात् ॥ ८ ॥ नवमे मासि । दध्यन्नमुद्गकृसरान्नविशिष्टं पूर्ववत् प्रभातसमये । ॐ रक्षरक्ष महादेव भक्तानुग्रहकारक ॥ पक्षि वाहन गोविंद सापत्यां रक्ष गर्भिणीम् ॥१॥ इति मंत्रेण विष्णवे बलिं दद्यात् ॥९॥ दशमे मासि । पायसगुडापूपलाजपिष्टशक्तुभिः श्यामध्वजकृष्णगंधपुष्पधूपदीपहिरण्यसाहितपूर्णकुंभेन नीलोत्पलसहितेन पूर्ववत् बलिहर्ता अलंकृत्य वासुदेवालये अभ्यर्च्य वृक्ष मूले । ॐ त्रिविक्रम क्रमाक्रांतभूरिभूतजगत्त्रय ॥ गोवर्द्धनमहाशैलसमुद्धरणगर्वित ॥ १ ॥ हिरण्यकशिपोर्वक्षोविदारणनखांकुर ॥ विक्रमेण सुरज्येष्ठ रक्तांगेन महोज्वल ॥ २ ॥ बलदेवानुज ज्येष्ठ कंसचाणूरकंसन ॥ गरुडध्वज दैत्यारेऽनंताच्युत चतुर्भुज ॥३॥ विधुंतुदप्राणहर आदित्यकृतचक्रभृत् ॥ भीषणाकार भुजगशयानेंदीवरच्छवे ॥ ४ ॥ पांचजन्यप्रभाव्यक्तकौस्तुभोद्योतभास्कर ॥ वाराहवपुषा पूर्वं सम्यग्धृतवसुंधर ॥ ५ ॥ शार्ङ्गज्याघातरुचिमार्तिकणांकितमहाभुज । अनाद्यंतासुररिपो धीर पद्मालयालय ॥ ६ ॥ प्रगृह्णीष्व बलिं चेमं सापत्यां रक्ष गर्भिणीम् ॥ एभिर्मंत्रैर्बलिं दद्यात् । इति दशममासबलिदानप्रकारः॥१०॥इति गर्भरक्षाविधानम् ॥

अथ शीघ्रप्रसवोपायः (संस्कारभास्करे) "हिमवत्युत्तरे पार्श्वे शवरी नाम याक्षिणी ॥ तस्या नूपुरशब्देन विशल्या स्यात्तु गर्भिणी स्वाहा ॥ १ ॥ इति मंत्रेणैकविंशतिदूर्वांकुरैरेकपलं तिलतैलं प्रदक्षिणमावर्तयन्नष्टशतं मंत्रयित्वा तत्तैलं किंचित्पाययेच्छेषमुदरे

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

लेपयोदिति। (अथ यंत्रप्रकारः) गजाग्निवेदा उडुराट्शरांका रसर्षिपक्षा इति हि क्रमेण। लिखेत्प्रसूतेः समये गृहे वै सुखेन नार्यः सुव ते हि शीघ्रमिति ॥ अथ बालानां रोगशमनविधानम् ॥ (वीरसिंहावलोकने) वालानां सर्वरोगोपशांत्यर्थं व्याहृतिहोममन्नदानं च कुर्यात् (तत्रैव) ताडनतर्जनहासभयाद्वा निजजननीप्राकृतहितभावात् ॥ स्कंद मुखाः प्रमथा बलिहेतोः शिशुकममंगलमाशु विशंति ॥ १॥ स्तब्धविलोचनशोणितगंधः ॥ कुटिलमुखा ल्परवो लुलिताक्षः। स्तन्यपराङ्मुखगाढविमुष्टिश्चकितमनाः शिशुराकुलितस्तैः ॥२॥ वालानां प्रायेण स्कंदमातृकादिबालघातकदेवदोषैरेव रोगा भवंति तस्मात्तेषां बलिदानादिना शांतिं कुर्यात् । तच्छांति विधानं तु शांति सारादौ ज्ञेयं ग्रंथविस्तरभयादत्र न लिख्यते॥ इति सामान्यतो बालरोगशमनविधानम् ॥ अथ वालानां दुष्टदृष्टिदो षादौ रक्षाविधानम् (कपिलसंहितायाम् ।) शिशुसंरक्षणार्थायाऽशुभग्रहनिवारिणीम् ॥ रक्षां संध्यासु कुर्वीत निंबसर्षपगृंजनैः ॥१॥ फलीकरणसंमिश्रैः करंजैरवलोकने॥ वचोधरान्नदेशेषु बालग्रहविमुक्तये॥२॥ वासुदेवो जगन्नाथः पूतानातर्जनो हरिः ॥ रक्षतु त्वरितो बालं मुंचमुंच कुमारकम् ॥ ३ ॥ कृष्ण रक्ष शिशुं शंखमधुकैटभमर्दन ॥ प्रातः संगवमध्याह्नसायाह्नेषु च संध्ययोः ॥ ४ ॥ महा निशि सदा रक्ष कंसारिष्टनिषूदन ॥ यद्गोरजःपिशाचांश्च ग्रहान्मातृग्रहानपि ॥५॥ बालग्रहान् विशेषेण छिंधिछिंधि महाभयान् ॥ त्राहित्राहि हरे नित्यं त्वद्रक्षाभूषितं शिशुम् ॥ ६ ॥ इति भस्माभिमंत्र्यैव भूषयेत्तेन भस्मना ॥ शिरोललाटाद्यंगेषु रक्षां कुर्याद्यथा विधि ॥ ७ ॥ मंत्रसंरक्षणादेवं शिशुः संवर्धतेन्वहम् ॥ (हरिवंशे) "नंदोंकमेनमारोप्य भूरेणुं परिगृह्य च ॥ शिरः प्रदक्षिणं कुर्व

शीघ्रप्रसवकारकमिदम्।

८	१	६
३	५	७
४	९	२

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

न्मंत्रमेनं जजाप ह ॥ ३ ॥ विष्णुस्ते पूर्वतः पातु रुद्रो रक्षतु दक्षिणे ॥ ब्रह्मा च पश्चिमे पायाच्चंद्रो रक्षत्वथोत्तरम् ॥ २ ॥ उपरि ष्टात्तथा सूर्यः पायाच्चाधश्च वासुकिः ॥ पायादूर्द्धमधो वत्सं शिष्टाः काष्ठाः समीरणः ॥ ३ ॥ स्वस्ति करोतु भगवान् पिनाकी वृषभध्वजः ॥ गावो रक्षन्तु सर्वत्र भूमौ पातु सदाशिवा ॥ ४ ॥ एवमुच्चार्य नंदस्तु कृष्णं पस्पर्श सर्वतः ॥ एष मंत्रो हि बालानां रक्षायै परिकीर्तितः ॥५॥" इति स्खलनादौ बालरक्षाविधानम् ॥ ॥ अथ महामारीशमनविधानम् (ब्रह्मवैवर्ते) "राजा च कुरुते पापं ब्रह्महत्यादि दारुणम् ॥ वंशजान्हंति सहसा स्त्रीवधं कुरुते भृशम्॥१॥ तेन राज्ञां हि सा पृथ्वी सनरा क्षयमाप्नुयात् ॥ कालस्फो टादयो रोगा वैद्याऽविज्ञातलक्षणाः ॥२॥ प्रभवन्त्यौषधं नैव मंत्रतंत्राणि चैव हि ॥ आशु मृत्युकराश्चैव ज्वरदाहकरास्तथा ॥३॥" (हेमाद्रौ गर्गः) "रुद्रप्रकोपजो यस्माज्जनमारः प्रवर्तते ॥ तस्मात्प्रसादयेद्यत्नादेवदेवं महेश्वरम् ॥ १ ॥ गाणपत्येन विधिना अथ र्वशिरसा तथा ॥ यामलेन विधानेन कुर्यादेवप्रसाधनम् ॥ २ ॥ शिवसूक्तमुमासूक्तं जपेच्च शतरुद्रियम् ॥ बल्योपहारान् विविधां श्चत्वरेषु निवेदयेत् ॥ ३ ॥ आवाह्य च गणैस्सार्द्धं रुद्रं रात्रावहस्सु च ॥ ब्राह्मणान्भक्ष्यभोज्यैश्च दक्षिणाभिश्च तोषयेत् ॥ ४ ॥ प्रसादिते ततो रुद्रे जनमारो निवर्त्तते ॥ आत्मरक्षां स्वयं कृत्वा ततः शांतिं प्रयोजयेत् ॥५॥" आत्मरक्षा कवचादिना कर्त्तव्या । (नृसिंहपुराणे) "अनावृष्टिमहामारीज्वररोगभये तथा ॥ नरसिंहं समाराध्य ब्राह्मणैर्वेदपारगैः ॥१॥ कारयेल्लक्षहोमं तु ग्रामे यश्च नराधिपः" इति (नृसिंहमंत्रो विष्णुप्रकरणे द्रष्टव्यः) । (सुश्रुते) "स्थानत्यागाज्जपाद्धोमान्महामारी प्रशाम्यति ॥" इति । (जपान्महामृत्युंजयनृसिंहशतचंडीरुद्रविधानादिभिर्होमान्मृत्युंजयदुर्गाभैरवादिमंत्रैः पायसतिलाज्यमधुत्रयहोमादित्यर्थः)

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अथ अनावृष्टिशमनविधानम् । तत्र तावद्वरुणमंत्रपुरश्चरणम् (शारदातिलके) मंत्रो यथा–" ॐ ध्रुवासुत्वासक्षितिषुक्षियंतो व्यस्मत्याशंवरुणोसुमोचत् । अवोवन्वानाआदितेरुपस्थाद्यूयंपात स्वस्तिभिःसदानः ॥ द्विचत्वारिंशद्वर्णात्मक ऋग्वेदोक्तो मंत्रः । अस्य वरुणमंत्रस्य वसिष्ठ ऋषिः । त्रिष्टुप् छंदः । वरुणो देवता । अनावृष्टिशमनार्थे जपे विनियोगः । ॐ वसिष्ठऋषये नमः शिरसि ॥ १ ॥ ॐ त्रिष्टुप्छंदसे नमः मुखे ॥ २ ॥ ॐ वरुणदेवतायै नमः हृदये ॥ ३ ॥ इति ऋष्यादिन्यासः ॥ अथ षडंग न्यासः ॥ ॐ ध्रुवासुत्वासक्षितिषु हृदयाय नमः ॥ १ ॥ ॐ क्षियंतोव्यस्मत्पाशं शिरसे स्वाहा ॥ २ ॥ ॐ वरुणो सुमोचत् शिखायै वषट् ॥ ३ ॥ ॐ अवोवन्वाना अदिते कवचाय हुं ॥ ४ ॥ ॐ रुपस्थाद्यूयंपातनेत्रत्रयाय वौषट् ॥ ५ ॥ ॐ स्वस्तिभिः सदान इत्यस्त्राय फट् ॥ ६ ॥ इति हृदयादिन्यासः । अथ मंत्रवर्णन्यासः । ॐ ध्रुं नमः दक्षिणपादांगुल्यग्रे ॥ १ ॥ ॐ वां नमः दक्षिण पादांगुलिमूले ॥ २ ॥ ॐ सुं नमः दक्षिणगुल्फे ॥ ३ ॥ ॐ त्वां नमः दक्षिणजानुनि ॥ ४ ॥ ॐ सं नमः दक्षपादमूले ॥ ५ ॥ ॐ क्षिं नमः वामपादांगुल्यग्रे ॥ ६ ॥ ॐ तिं नमः वामपादांगुलिमूले ॥ ७ ॥ ॐ षुं नमः वामगुल्फे ॥ ८ ॥ ॐ क्षिं नमः वामजानुनि ॥ ९ ॥ ॐ यं नमः वामपादमूले ॥ १० ॥ ॐ तों नमः गुदे ॥ ११ ॥ ॐ व्यं नमः लिंगे ॥ १२ ॥ ॐ स्मं नमः नाभौ ॥ १३ ॥ ॐ त्यां नमः कुक्षौ ॥ १४ ॥ ॐ शं नमः पृष्ठे ॥ १५ ॥ ॐ वं नमः हृदये ॥ १६ ॥ ॐ रुं नमः दक्षिण स्तने ॥ १७ ॥ ॐ णों नमः वामस्तने ॥ १८ ॥ ॐ मुं नमः गले ॥ १९ ॥ ॐ मों नमः दक्षिणहस्तांगुल्यग्रे ॥ २० ॥ ॐ चं नमः दक्षिणहस्तांगुलिमूले ॥ २१ ॥ ॐ अं नमः दक्षिणमणिबंधे ॥ २२ ॥ ॐ वों नमः दक्षिणकूर्परे ॥ २३ ॥ ॐ वं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नमः दक्षिणबाहुमूले ॥ २४ ॥ ॐ न्वां नमः वामहस्तांगुल्यग्रे ॥ २५ ॥ ॐ नां नमः वामहस्तांगुलिमूले ॥ २६ ॥ ॐ अं नमः वाममणिबंधे ॥ २७ ॥ ॐ दिं नमः वामकूर्परे ॥ २८ ॥ ॐ तें नमः वामबाहुमूले ॥ २९ ॥ ॐ रुं नमः वक्रे ॥ ३० ॥ ॐ पं नमः दक्षकपोले ॥ ३१ ॥ ॐ स्थां नमः वामकपोले ॥ ३२ ॥ ॐ द्यूं नमः दक्षिणनासिकायाम् ॥ ३३ ॥ ॐ यं नमः वामनासिकायाम् ॥ ३४ ॥ ॐ पां नमः दक्षिणनेत्रे ॥ ३५ ॥ ॐ तं नमः वामनेत्रे ॥ ३६ ॥ ॐ स्वं नमः दक्षिणकर्णे ॥३७॥ ॐ स्तिं नमः वामकर्णे ॥ ३८ ॥ ॐ भिं नमः भ्रूमध्ये ॥ ३९ ॥ ॐ सं नमः मस्तके ॥ ४० ॥ ॐ दां नमः शिरसि ॥ ४१ ॥ ॐ नं नमः सर्वाङ्गे ॥४२ ॥ इति मंत्रवर्णन्यासः । एवं न्यासं कृत्वा ध्यायेत् ॥ अथ ध्यानम् ॥ "चंद्रप्रभं पंकजसन्निषण्णं पाशां कुशाभीतिवरं दधानम् ॥ मुक्ताविभूषांचितसर्वगात्रं ध्यायेत्प्रसन्नं वरुणं विभूत्यै ॥ १ ॥" इति ध्यात्वा मानसोपचारैः संपूज्य । धर्मादिपरतत्त्वांतपीठदेवताः पूर्ववत्संपूज्य । मध्ये । मूलेन मूर्त्तिं प्रकल्प्य । आवाहनादिपुष्पांतैरुपचारैर्भगवंतं वरुणं संपूज्य । आवरणपूजां कुर्यात् ॥ तद्यथा–(षट्कोणे) प्राचीक्रमेण आग्नेयादिकोणकेसरेषु मध्ये दिक्षु च । ॐ ध्रुवासुत्वासक्षितिषु हृदयाय नमः ॥ १ ॥ ॐ क्षियन्तोव्यस्मत्याशं शिरसे स्वाहा ॥ २ ॥ ॐ वरुणो मुमोचत् शिखायै वषट् ॥ ३ ॥ ॐ अवोवन्वानाअदिते कवचाय हुम् ॥ ४ ॥ ॐ रुपस्थाद्यूयंपात नेत्रत्रयाय वौषट् ॥ ५ ॥ ॐ स्वस्तिभिः सदान इत्यस्त्राय फट् ॥ ६ ॥ इति षडंगानि पूजयेत् ॥ १ ॥ ततोऽष्टदलेषु प्राचीक्रमेण । ॐ शेषाय नमः ॥ १ ॥ ॐ वासुकये नमः ॥ २ ॥ ॐ तक्षकाय नमः ॥ ३ ॥ ॐ कर्कोटकाय नमः ॥४॥ ॐ पद्माय नमः ॥ ५ ॥ ॐ महापद्माय नमः ॥६॥ ॐ शंखपालाय नमः ॥७॥ ॐ कुलिकाय नमः ॥८॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

इति पूजयेत् ॥ २ ॥ ततस्तद्बाह्ये चतुरस्रे भूपुरे पूर्वादिदशदिक्षु । ॐ लं इंद्राय नमः ॥ १ ॥ ॐ रं अग्नये नमः ॥ २ ॥ ॐ मं यमाय नमः ॥ ३ ॥ ॐ क्षं निर्ऋतये नमः ॥ ४ ॥ ॐ वं वरुणाय नमः ॥ ५ ॥ ॐ यं वायवे नमः ॥ ६ ॥ ॐ सं सोमाय नमः ॥ ७ ॥ ॐ हं ईशानाय नमः ॥ ८ ॥ ईशानपूर्वयोर्मध्ये । ॐ आं ब्रह्मणे नमः ॥ ९ ॥ निर्ऋतिपश्चिमयोर्मध्ये । ॐ अं अनंताय नमः ॥ १० ॥ इति पूजयेत् ॥ ३ ॥ तद्बहिस्तत्तत्समीपे । ॐ वज्राय नमः ॥ १ ॥ ॐ शक्तये नमः ॥ २ ॥ ॐ दंडाय नमः ॥ ३ ॥ ॐ खड्गाय नमः ॥ ४ ॥ ॐ पाशाय नमः ॥ ५ ॥ ॐ अंकुशाय नमः ॥ ६ ॥ ॐ गदायै नमः ॥ ७ ॥ ॐ त्रिशूलाय नमः ॥ ८ ॥ ॐ पद्माय नमः ॥ ९ ॥ ॐ चक्राय नमः ॥ १० ॥ इत्यायुधानि पूजयेत् ॥ ४ ॥ एवमावरणपूजां कृत्वा । धूपदीप नैवेद्यतांबूलदक्षिणानीराजनप्रदक्षिणानमस्कारैः पूजां समाप्य । यथाविधि वाग्यतो जपं कुर्य्यात् ॥ अस्य पुरश्चरणं लक्षजपः । जपान्ते वृष्टिकामनया वेतसोत्थाभिः क्षीराक्ताभिः समिद्भिः पायसान्नेन सर्पिःसिक्तेन च दशांशहोमं कृत्वा तद्दशांशेन तर्पणं तद्दशांशेन मार्ज्जनं तद्दशांशतः यथाशक्ति वा पायसान्नेन ब्राह्मणभोजनं च कार्यम् ॥ (शारदातिलके)"लक्षमेकं जपेन्मंत्रं पायसेन दशांशतः ॥ सर्पिःसिक्तेन जुहुयान्मंत्री मंत्रस्य सिद्धये ॥१॥ ऋणमुक्तयै जपेन्मंत्रं प्रत्यहं साष्टकं शतम् ॥ जपेनानेन लभते महतीमव्ययां श्रियम् ॥२॥ शितेक्षुशकलैर्मंत्री जुहुयाद्घृतसंप्लुतैः ॥ चतुर्दिनं दशशतमृणमुक्तयै महाश्रिये ॥३॥ समिद्भिर्वेतसोत्थाभिः क्षीराक्ताभिर्दिनत्रयम् ॥ जुहुयाद्दृष्टिसंसिद्धयै मंत्रविद्विजितेंद्रियः ॥ ४ ॥ अनेन विधिना मंत्री सूर्ये शतभिषं गते । चतुःशतं घृतयुतं पायसं जुहुयाद्वशी ॥५॥ ऋणनाशाय संपत्त्यै वश्यारोग्याभिवृद्धये ॥ भृगुवारे कृतो होमः पायसेन च सर्पिषा ॥६॥ महतीं संपदं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कुर्यान्नाशयेत्सकलापदः ॥ शालिभिर्घृतसंसिक्तैः सरिदंतरितः सुधीः ॥ ७ ॥ त्र्यहं चतुःशतं हुत्वा स्तंभयेत्परसैन्यकम् ॥ सायं प्रत्यङ्मुखो वह्निमाराध्य प्रजपेन्मनुम् ॥ ८ ॥ चतुःशतं विमुच्येत मंत्री सर्वैरुपद्रवैः ॥ मंत्री प्रत्यङ्मुखो भूत्वा तर्पयेद्विमलैर्जलैः ॥ ९ ॥ सर्वोपद्रवनाशाय समस्ताभ्युदयाप्तये ॥ बहुना किमिहोक्तेन मंत्रेणानेन साधकः ॥ १० ॥ साधयेत्सकलान्कामान्जपहोमादितत्परः ॥ "इति वृष्टिप्रदवारुणीऋग्विधानम्॥ अथ वृष्टिप्रदविधानं द्वितीयम् ॥ (बृहद्दग्विधाने-शौनकः)" अच्छावदेति सूक्तं तु वृष्टिकामः प्रयोजयेत् ॥ निराहारः क्लिन्नवासा अचिरेण प्रवर्षति ॥ १ ॥ हुत्वायुतं वैतसीनां क्षीराक्तानां हुताशने ॥ महद्धर्षमवाप्नोति सूक्तेनाच्छावदेन हि ॥२॥" अनेन सूक्तेन प्रत्यृचं वा दिश उपस्थेया'इति सायणभाष्ये'॥ अथ अच्छावदेति सूक्तं ऋ० अ० ४ अ० ४ वर्ग २७। ॐ अच्छावदतवसंगीर्भिराभिः स्तुहिपर्जन्यंनमसाविवास । कनिक्रदद्वृषभोजीरदानूरेतोदधात्योषधीषुगर्भम् ॥ १ ॥ विवृक्षान्हन्त्युतहन्तिरक्षसोविश्वविभायुभुवनंमहावधात् । उतानागाइषतेवृष्ण्यावतोयत्पर्जन्यःस्तनयन्हन्तिदुष्कृतः ॥ २ ॥ रथीवकशयाश्वांअभिक्षिपन्नाविर्दूतान्कृणुतेवर्ष्याँ ३ अह । दूरात्सिहस्यस्तनथाउदीरतेयत्पर्जन्यःकृणुतेवर्स्य १ नभः ॥ ३ ॥ प्रवातावान्तिपतयन्तिविद्युतउदोषधीर्जिहतेपिन्वतेस्वः । इराविश्वस्मैभुवनायजायतेयत्पर्जन्यः पृथिवींरेतसावति ॥ ४ ॥ यस्यव्रतेपृथिवीनन्नमीतियस्यव्रतेशफवज्जर्भुरीति । यस्यव्रतओषधीर्विश्वरूपाः सनः पर्जन्यमहिशर्मयच्छ ॥ ५ ॥ दिवोनोवृष्टिंमरुतोररीध्वंप्रपिन्वतवृष्णोअश्वस्यधाराःअर्वाङेतेनस्तनयित्नुनेह्यपोनिषिञ्चन्नसुरःपितानः ॥ ६ ॥ अभिक्रन्दस्तनयग

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भमाधाउदुन्वतापरिदीयारथेनदृतिंसुकर्षबिषितुन्यंश्चसुमाभवन्तूद्धतोनिपादाः ॥ ७ ॥ महान्तंकोशमुदचानिषिञ्चस्यन्दन्तांकुल्या विषिताःपुरस्तात् ॥ घृतेनद्यावांपृथिवीव्युन्धिसुप्रपाणंभवत्वघ्याभ्यः ॥ ८ ॥ यत्पर्जन्यकनिक्रदत्स्तनयन्हंसिदुष्कृतः । प्रतीदंविश्वं मोदतेयत्किंचपृथिव्यामधि ॥ ९ ॥ अबर्षीर्वर्षमुदुषूगृभायाकुर्धन्वान्यत्येतवाउ । अजीजनओषधीर्भोजनायकमुत्प्रजाभ्योविदोमनी षाम् ॥ १० ॥" इति दशर्चं सूक्तम् ॥ अनेन सूक्तेन प्रत्यृचं वा अयुतवेतसीनां क्षीराक्तानां होमाच्छीघ्रं वर्षति । होमान्ते । इदं पर्जन्याय इति त्यागं कुर्यादितिपर्जन्यविधानम् ॥ अथ तिस्रो वाच इत्यादिसूक्तद्वयविधानम्॥(ऋग्विधाने–शौनकः) "आस्यदघ्नं विगाह्यापः प्राङ्मुखः प्रयतः शुचिः । सूक्ताभ्यां तिस्र आदिभ्यामुपतिष्ठेत भास्करम् ॥१॥ अनश्नतैतज्जप्तव्यं वृष्टिकामेन यत्नतः पंचरात्रे प्यतिक्रांते महतीं वृष्टिमाप्नुयात् ॥२॥" इति ॐ तिस्रो वाच इत्यादिसूक्तस्य अग्निपुत्रः कुमार ऋषिः । वसिष्ठो वा । त्रिष्टु प्छंदः । पर्जन्यो देवता । वृष्टिप्राप्त्यर्थे विनियोगः ॥ "ॐ तिस्रो वाचः प्रवदज्योतिरग्राया एतद्दुह्रेमधुदोघमूधः ॥ सवत्सं कृण्वन् गर्भमोषधीनां सद्योजातो वृषभो रोरवीति ॥ १ ॥ योवर्धनओषधीनांयोअपांयोविश्वस्यजगतोदेवईशे ॥ सत्रिधातुशरणं शर्मयंसत्रिवर्तुज्योतिः स्वभिष्टय १ स्मे ॥ २ ॥ स्तरीरुत्वद्भवतिसूतउत्वद्यथावशंतन्वंचक्रएषः । पितुःपयः प्रतिगृभ्णातिमातातेन पितावर्धतेतेनपुत्रः ॥ ३ ॥ यस्मिन्विश्वानिभुवनानितस्थुस्तिस्रोद्यावस्त्रेधासस्रुरापः ॥ त्रयः कोशासउपसेचनासोमध्वश्चोतन्त्यभि तोविरप्शम् ॥ ४ ॥ इदं वचः पर्जन्यायस्वराजेहृदोअस्त्वन्तरंतज्जुजोषत् ॥ मयोभुवोवृष्टयः सन्त्वस्मेसुपिप्पलाओषधीर्देवगोपाः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

॥ ९ ॥ पुरेतोधावृषभःशश्वतीनांतस्मिन्नात्माजगतस्तस्थुषश्च । तन्मऋतं पातु शतशारदाययूयंपातस्वस्तिभिः सदानः ॥६॥" इति प्रथमसूक्तम् ॥ "ॐ पर्जन्यायेति सूक्तस्य अग्निपुत्रः कुमार ऋषिः वसिष्ठो वा । गायत्री छंदः । पर्जन्यो देवता । वृष्टिप्राप्त्यर्थं जपे विनियोगः । ॐ पर्जन्यायप्रगायतदिवस्पुत्रायमीढुषे । सनोयवसमिच्छतु ॥ १ ॥ योगर्भमोषधीनांगवांकृणोत्पर्वताम् ॥ पर्जन्यः पुरुषीणाम् ॥ २ ॥ तस्माइदास्येहविर्जुहोतामधुमत्तमम् ॥ इलांनः संयतं करत् ॥३॥" इति वृष्टिप्राप्तिकरविधानम् ॥ अथ सर्वरोग नाशकधर्मराजमंत्रविधानम् ॥ (मंत्रमहोदधौ) मंत्रो यथा । " ॐ क्रौंह्रींआंवैवैवस्वताय धर्मराजाय भक्तानुग्रहकृते नमः" इति चतुर्विंशतिवर्णो मंत्रः । नास्य ऋष्यादिपूजाविधानं सिद्धमंत्रत्वादिति । ॐ क्रौं ह्रीं हृदयाय नमः ॥१॥ ॐ आं वैं शिरसे स्वाहा ॥ २ ॥ ॐ वैवस्वताय वषट् ॥३॥ ॐ धर्मराजाय कवचाय हुं ॥४॥ ॐ भक्तानुग्रहकृते नेत्रत्रयाय वौषट् ॥५॥ ॐ नमः अस्त्राय फट् ॥६॥ इति षडंगन्यासं कृत्वा ध्यायेत् ॥ अथ ध्यानम् "पाथःसंयुतमेघसन्निभतनुः प्रद्योतनस्यात्मजो नृणां पुण्यकृतां शुभावहवपुः पापीयसां दुःखकृत् ॥ श्रीमद्दक्षिणदिक्पतिर्महिषगोभूषाभरालंकृतो ध्येयः संयमनीपतिः पितृगणस्वामी यमो दंडभृत् ॥ १ ॥" अभ्यस्तोयं सदा मंत्रः सकलापद्विनाशनः ॥ नरकप्रातिरोद्धा स्याद्रिपुभीतिनिवर्तकः ॥ २ ॥ इति धर्मराजमंत्रानुष्ठानम् ॥ अथ चित्रगुप्तमंत्रानुष्ठानम् । (तत्रैव) मंत्रो यथा–"ॐ नमोविचित्रायधर्मलेखकाययमवाहिकाधिकारिणेम्लव्यूंजन्मसंपत्प्रलयंकथय कथयस्वाहा" इत्यष्टत्रिंशदक्षरो मंत्रः ॥ (अस्य ऋष्यादिन्यासपूजाऽभावःसिद्धमंत्रत्वात्) ॐ नमो विचित्राय हृदयाय नमः ॥ १ ॥ ॐ धर्मलेखकाय शिरसे स्वाहा ॥ २ ॥ ॐ यमवाहिकाधिकारिणे शिखायै वषट् ॥ ३ ॥ ॐ म्लव्यूंजन्मसंपत्प्रलयंकव

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

चाय हुं ॥ ४ ॥ ॐ कथयकथय नेत्रत्रयाय वौषट् ॥ ५ ॥ ॐ स्वाहा इत्यस्त्राय फट् ॥ ६ ॥ इति षडंगन्यासं कृत्वा ध्यायेत् ।
किरीटोज्वलं वस्त्रभूषाभिरामं विचित्रासनासीनमिंदुप्रभास्यम् ॥ नृणां पापपुण्यानि पत्रे लिखंतं भजे चित्रगुप्तं सखायं यमस्य
॥ १ ॥ सिद्धमंत्रमिमं पुंसां जपतां चित्रगुप्तकः ॥ प्रसन्नो गणयेत्पुण्यं नैव पापं कदाचन ॥ २ ॥ इति चित्रगुप्तमंत्रविधानम् ॥
अथ ग्रंथालंकारः ॥ देशे मनोज्ञे हि गरौ बभूव वीकोजिनामा नृपतिः पुरा हि ॥ तस्यैव नाम्ना खलु राजधानी लोके विकानेर इति प्रथां
गता ॥ १ ॥ तदन्तरे शक्रपुरोपमे पुरे श्रीरत्नदुर्गे सुजनैः सुसविते ॥ आसीद्वसिष्ठान्वयगौडविप्रो माध्यंदिनीयो बुधजीवराजः ॥
॥ २ ॥ तस्यात्मजा बाणमितास्तु सद्गुणाः सुवेदविद्याऽध्ययने च नैपुणाः ॥ आयातयातद्विजशुद्धप्राङ्गणा वीर्येण संताडितवैरि
दुर्गणाः ॥ ३ ॥ एतेषु मध्ये खलु रामकृष्णो ज्ञानेन स्वल्पीकृतसर्वतृष्णः ॥ स्वबुद्धितः खण्डितवैरिप्रश्नः सुभक्तिसंतर्पितदेव
कृष्णः ॥ ४ ॥ तस्याऽभवन्नामामिताः सुपुत्राः स्वधर्म्मयायिस्वकलत्रामित्राः ॥ गृहेषु संलेखितरम्यचित्राः श्रीकान्तपूजानिरताः
पवित्राः ॥ ५ ॥ इमानि नामानि भवन्ति तेषां चतुर्भुजाख्यो विबुधोऽयमाद्यः ॥ कस्तूरिचंद्राभिधसज्जनोऽपरोऽपरोगुणैर्मंडि
तजेष्ठरामः ॥ ६ ॥ स जेष्ठरामः खलुपंडिताग्र्यः षट्शास्त्रवेत्ता द्विजकर्म्मतत्परः ॥ त्यागी मनस्वी द्विजदेवभक्तो हुतावशिष्टा
न्नसदानुरक्तः ॥ ७ ॥ तत्रापि मध्यो निजवंशपालकः कस्तूरिचंद्राख्यमहत्सुशीलः ॥ तस्मात्सुपुत्रावनवद्यवंद्यविद्यान्वितौ द्वौ
नितरामभूताम् ॥ ८ ॥ चतुर्थिलालाख्यगुरूमुखाख्यौ सुज्ञौ गुणाढ्यौ निजधर्मतत्परौ ॥ ज्येष्ठस्तयोर्वै खलु पण्डिताग्रणीः
षट्शास्त्रवेत्ता शिवपूजने रतः ॥ ९ ॥ षट्कर्माभिरतो नित्यं देवतातिथिपूजकः ॥ हुतशेषं तु भुंजानश्चतुर्थीलालपण्डितः ॥ १० ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मातामहो यस्य बभूव पात्रीतः श्रीरामनामा प्रथितः स्वदेशे ॥ दाता वदान्यो धनिभिश्च वंद्यो भिषक्सुवृत्त्या परिपूर्णकोशः॥ ११ ॥ पु.कां ३
एतादृशे शुद्धकुले विशाले चतुर्थिलालो हि बभूव चंद्रमाः ॥ परोपकारी निजवंशकेतुः शिष्टानुरागी च निबन्धकर्त्ता ॥ १२ ॥
यस्य माता हरीबाई पिता कस्तूरिचंद्रकः ॥ यथाऽनसूया साध्वी सा यथाऽत्रिस्स तथा खलु ॥ १३ ॥ सूत्रं कात्यायनं यस्य
शाखा माध्यंदिनीयिका ॥ श्रीवसिष्ठकुलं यस्य स चतुर्थ्याख्यपंडितः ॥ १४ ॥ तेनायं रचितो ग्रंथो गौडानां प्रीतिदः सदा ॥
अनेन प्रीयतां शंभुर्भवान्या सह सर्वदा ॥ १५ ॥ व्योमशास्त्राङ्कचंद्रेब्दे १९ ६० विक्रमादित्यसंज्ञके ॥ फाल्गुने शुक्लपंचम्यां
ग्रंथः पूर्णोऽभवच्छिवः ॥ १६ ॥ इति श्रीमन्महाराजाधिराजक्षत्रियकुलार्कमरुदेशाधिपतिराजेंद्रश्रीगंगासिंहवर्मणो बीकानेर
राज्यान्तर्गतश्रीरत्नगढनगरनिवासिना श्रीवसिष्ठगोत्रोद्भवगौडवंशावतंसपण्डितश्रीरामकृष्णामरचंद्रपौत्रेण श्रीकस्तूरिचंद्रात्म
जेन श्रीचतुर्भुजदत्तसूनुना श्रीमहादेवभक्तशुक्लयजुर्वेदीयमाध्यंदिनवाजसनेयिना पंडितश्रीचतुर्थीलालशर्मणा विरचिते अनुष्ठान
प्रकाशे अद्भुते महानिबंधे पुरश्चरणकाण्डे रोगशमनविधानप्रकरणं षष्ठम् ॥

(॥ समाप्तोयं महानिबंधः षष्ठः ॥)

इदं पुस्तकं मुम्बय्यां खेमराज श्रीकृष्णदासश्रेष्ठिना स्वकीये "श्रीवेङ्कटेश्वर" स्टीम्-यन्त्रागारे
ऽङ्कयित्वाप्रकाशितम् । आषाढ संवत् १९६३, शके १८२८.

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

॥ अनुष्ठानप्रकाशस्थविषयाणांशुद्धिपत्रम् ॥

पत्रा०	पृष्ठा०	पं०	अशुद्धं	शुद्धं
२	१	१३	कष्टी	कुष्ठी
७	१	२	समीरितः	समीरितः
७	१	११	पूर्वार्द्धे	पर्वार्द्धे
८	२	१	देवाश्च	देवांश्च
११	२	४	धपये	धूपये
१२	२	९	शैवेत	शैवेतु
,,	,,	१०	बाणलिंग	बाणलिंगे
१३	२	१	नैवेद्य	नैवेद्यं
१४	१	९	देहार्न्त	देहान्ते
८	८	८	स्वगोदिह	स्वर्गादिह
१९	१	११	सत्रयुग्मं	सूत्रयुग्मं
१९	२	१२	कर्या	कुर्या
१६	२	११	वाह्यमात्रा	बाहुमात्रा
१८	१	७	स्तग्र	स्तत्र
२०	१	१२	समुत्सग	समुत्सर्गे
,,	२	१	प्रहेन	प्रहेण
,,	,,	७	मन्राणां	मात्राणां
२१	२	१३	घृतोदनं	घृतौदनं
२७	२	१३	निजनता	विजानता
३२	१	९	स्रवं	स्रुवं
३८	१	४	दस्रमत्रण	दस्रमंत्रेण
,,	२	१०	कुंडोधृते	कण्डोद्धृते
,,	२	१३	ग्रंथियुत	ग्रंथियुतं
३९	१	९	देवान्निधानेन	देवाभिधानेन
४९	१	९	स्पत्वा	स्पृत्वा
५८	१	१	तैरुक्त	तैरुक्ते
६१	२	१२	होंआंक्षँ	होंॐक्षँ
६२	१	४	हल्म्योभ्यो	हल्भ्यो
६६	१	९	हव्याशं	हव्यांशं
६७	१	४	मलं	मूलं
६८	२	८	ॐभ०	ॐभू०
७०	२	८	मंत्रण	मंत्रेण
७१	१	१२	अशुचिस्थान	अशुचिस्थाने

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पत्रा०	पृष्ठा०	पं०	अशुद्धं	शुद्धं
७७	२	९	सर्यमावा	सूर्यमावा
७८	२	४	उमम्	उमाम्
८१	१	२	पत्रधूमं	पलधूम
,,	२	१	ॐभ०	ॐभू०
८२	१	४	सपितन्	सपितॄन्
८३	१	२	ॐभू०दुगइहा	ॐभू० दुर्गेइहा०
,,	१	९	॥ २८ ॥ ॐ	॥ २८ ॥
,,	१	७	॥ २९ ॥ ॐ	॥ २९ ॥
,,	२	१०	वायव्यम्	वायव्याम्
८९	१	१२	ॐभगवत्यै अष्टौऽभद्राणि	ॐभगवत्यैनमः
८९	२	३	ॐभृगकिरीटिने	ॐभृंगरीटिने
८९	१	६	ह ॐ इमं	ॐ इमं
,,	२	११	इतिशुक्राय	इदंशुक्राय

पत्रा०	पृष्ठा०	पं०	अशुद्धं	शुद्धं
,,	२	११	धर्मयस्वाहाघर्मः	घर्मायस्वाहाघर्मः
९०	२	९	तन्वश्चवन्ध	तन्वश्चबन्ध्य
,,	,,	१०	धर्मायस्वाहाधर्मः	घर्मायस्वाहाघर्मः
९१	१	४	स्तस्थुयस्पतिं	स्तस्थुषस्पतिं
,,	२	१	ॐ नहिस्पर्श	ॐ नहिस्पश
,,	,,	,,	ऽअमृत्यं	ऽअमर्त्यं
,,	,,	२	यन्दर्ढ०	षन्दर्ढ०
,,	,,	३	यस्त्वेमहे	यत्वेमहे
९२	१	६	स्तीश्चसत्य	स्तीपाश्चसत्य
,,	१	१०	समंताद्दिविदिक्षु	समंताद्दिक्षुविदिक्षु
,,	१	७	वायव्या	वायव्याम्
९३	१	४	नहिस्पर्शमविद नन्यमस्माद्वै	नहिस्पशमविद नन्यमस्माद्वै
९४	१	९	तदुपार	तदुपरि

पत्रा०	पृष्ठा०	पं०	अशुद्धं	शुद्धं
९४	१	१	अर्यत्त्यू	अर्षत्त्यू
,,	,,	३	रीयमाणाः	रीषमाणाः
,,	,,	४	व्वयोयाः	व्वयोषाः
,,	,,	६	अज्ञाज्ञाना	अज्ञज्ञाना
,,	,,	७	अयामनीके	अपामनीके
,,	,,	७	ऽआमृत	ऽआभृत
९५	१	६	सरिररस्यमध्ये	सरिरस्यमध्ये
,,	,,	७	अनुष्टधमा	अनुष्वधमा
९६	१	१	भगप्रानो	भगप्रनो
,,	१	४	यंतुर्य्यश्रिये	यंतुर्य्यत्रिये
,,	१	७	ब्राह्मणेभिषिञ्चति	ब्राह्मणोभिषिञ्चति
९६	१	८	यद्देवकल्पाअहति	यद्देवकल्पान् जुहोति
,,	२	१	आखंडलाग्निर्भग वान्यमौ	आखंडलाग्निर्भग वान्यमो

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पत्रा०	पृष्ठा०	पं०	अशुद्धं	शुद्धं
,,	,,	३	आदित्यश्चंन्द्रमा	आदित्यश्चन्द्रमा
९७	२	८	सर्वविधैःपरिपूर्ण मास्त्वितिभवन्तो ब्रुवन्तु । अस्तुप रिपूर्णम्	सर्वविधेःपरिपूर्ण मस्त्वितिभवन्तो ब्रुवन्तुअस्तुपरि पूर्णम्
,,	२	८	मार्जनदशांशन	मार्जनदशांशेन
,,	,,	,,	ॐह्रावार्गाश्यै	ॐह्रींवार्गीश्यै
१००	१	३	सत्रत्रयेण	सूत्रत्रयेण
,,	,,	५	कर्य्यादिति	कुर्य्यादिति
,,	,,	९	घतमुत्पवेत	घृतमुत्पवेत
,,	,,	११	मध्यसुषुम्णां	मध्येसुषुम्णां
,,	,,	,,	स्त्रवेण	स्रुवेण
,,	२	४	रकर्कं	रेकैकं
१०१	१	१	पौयः	पायैः
१०५	२	७	ततोहलग्रेषु	ततोदलाग्रेषु
१०९	१	२	ॐश्रगकवचा	ॐश्रैँगैँकवचा
,,	,,	१३	तुंडैकदष्ट्राय	तुंडैकदंष्ट्राय
,,	२	७	ॐ रौद्रनमः	ॐ रौद्रीनमः
,,	,,	१२	चतुर्लक्षंवारं	चतुर्लक्षवारं
११०	१	१	कमुदै	कुमुदैः
,,	२	३	रिपुस्तभं	रिपुस्तंभं
,,	,,	१०	स्नानशाचा	स्नानशौचा
११२	१	२	सर्वतस्तनं	सर्वतस्तनूम्
११३	१	२	रुपचारैः	रुपचारैः
,,	,,	३	श्वेतदूर्वाभि	श्वेतदूर्वाभि
,,	,,	८	प्रार्थिव	पार्थिव
,,	२	४	हैँहंस	हौँहंस
१२०	१	४	वाराह्यैनमः	वाराह्यैनमः
,,	,,	६	पजयेत्	पूजयेत्
,,	,,	१२	मृर्त्युजयो	मृत्युंजयो
,,	२	१	ॐजूंवजाय	ॐजूंबीजाय
२४	२	४	ॐह्रांशक्त्यैनमः	ॐह्रीँशक्त्यैनमः
,,	,,	१२	ॐह्राॐजूंसः	ॐह्रौंॐजूंसः
१२९	२	४	सवषुकण्ठ	सर्वेषुकण्ठ
१३४	२	४	भतानि	भूतानि
२३९	२	२	कामंद्रः	कमिन्द्रः
,,	२	४	शद्धर्घग्र	शद्धर्घुग्र
,,	,,	९	शद्धऽउग्रम्	शर्द्धऽउग्रम्
,,	,,	११	समतेषु	समृतेषु
१३६	२	३	यवानो	युवानो
,,	,,	,,	त्रिष्टमौ	त्रिष्टुभौ
१३७	१	७	पुरुषज्जगत्	पुरुषञ्जगत्

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पत्रा०	पृष्ठा०	पं०	अशुद्धं	शुद्धं
१३८	२	५	धरिणम्	धारिणम्
१४३	२	७	ॐनेत्रन्यासे	नेत्रन्यासे
१४४	१	४	ऊरुन्यासे	जानुन्यासे
,,	२	१३	इन्द्रदीन्	इन्द्रादीन्
१४९	१	३	व्यषामन्ने	व्येषामन्न
१५४	१	२	मत्रान्ते	मंत्रान्ते
,,	२	७	श्वपतिभ्यश्चवो नमः	श्वपतिभ्यश्चवो नमःस्वाहा
१६२	१	१	मस्तकाद्यपादांत	मस्तकाद्यापादांतं
,,	,,	४	ॐध्यँफट्	ॐध्रँफट्
,,	१	१०	ॐध्वंचंडेश्वराय	ॐध्रँचंडेश्वराय
१६२	१	१०	षडांनि	षडंगानि
१६३	१	१२	राष्ठकाम	राष्ट्रकाम
१६४	२	१२	विघ्नानुत्सारये	विघ्नानुत्सारयेत्
१६७	२	२	गणयतिमुखं	गणपतिमुखं
१६८	२	१	अनेशन्नस्यषा	अनेशन्नस्यया
,,	,,	१०	एंव	एवं
१६९	१	७	ॐनैर्ऋत्याम्	नैर्ऋत्याम्
१७१	१	१२	तत्सव	तत्सर्वं
,,	२	२	संटारमुद्रया	संहारमुद्रया
१७५	२	८	सेवोपायं	सैवोपायं
१७७	२	४	मलांते	मूलांते
,,	,,	११	संव्वभ्योनमस्ते	सर्व्वेभ्योनमस्ते
१७८	२	४	ॐह्रैंवैंकवचाय	ॐह्रैंवैंकवचाय
१७९	१	४	पर्वेशान	पूर्वेशान
,,	,,	६	पर्वादग्न्यं	पूर्वादग्न्यं
१८२	१	५	अयतं	अयुतं
,,	२	११	कवचंत्रूहि	कवचंत्रूहि
१८५	२	४	नलिजीमूत	नीलजीमूत
१९२	२	१	वामपार्श्व	वामपार्श्वे
१९४	१	५	क्लींध्यात्वा	क्लींध्यात्वा
१९६	२	१	ॐह्रींह्रुंदुर्गायै	ॐह्रींदुंदुर्गायै
,,	,,	३	ह्रांॐह्रुदुंदुर्गा	ह्रांॐह्रींदुंदुर्गा
,,	,,	१३	ह्रांॐह्रींदुर्गा	ह्रांॐह्रींदुंदुर्गा
१९७	१	४	गदायैनमः	ॐगदायैनमः
२०२	२	१	समुद्रयर्ठ०	समुद्रयसर्ठ०
२०७	२	६	त्रिरावृत्तौ	त्रिरावृत्तौ
२०९	२	४	कर्याच्चंडी	कुर्याच्चंडी
२१०	१	९	स्वाभीष्टमामानां	स्वाभीष्टमानां
२१४	१	११	धूम्रांगिहहा	धूम्रांगिइहा
२१८	२	६	ॐश्रींहृदयाय	ॐश्रींहृदयाय
२२०	१	३	ॐऐंह्रींश्रींक्लीं	ॐऐंह्रींश्रींक्लीं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

शुद्धं	पत्रा०	पृष्ठा०	पं०	अशुद्धं	शुद्धं
सद्योवैगुण्य	२४५	१	३	द्रव्ये	द्रव्यै
हिरण्यवर्णामित्या	२४८	२	३	कुंभारऽदर्शा	कुंभाऽदर्शा
धनंधान्यं	,,	२	६	इंश्रींह्रींक्लीं	इंक्लींश्रींह्रीं
नैः	२५३	२	३	ह्रींह्रीं	ॐह्राँह्रीं
	,,	,,	५	ॐप्रजाप्रति	ॐप्रजापति
		१	३	ॐश्रूँमध्यमा	ॐश्रूँमध्यमा
		'	४	एवंग्रदयादि	एवंह्रयादि
		२	५	ॐयंॐनमनमः लिंगे	ॐयंॐनमः लिंगे
	२६२	२	६	ॐक्रंशिखायें	ॐक्रूंशिखायै
	२६८	१	६	हरोपायमेपि	हरोपायमपि
	२७७	१	४	कुंभस्ताम्रमय	कुंभस्ताम्रमय
देव्या	२७८	१	१	द्रव्यैर्मंत्राभि	द्रव्यैर्मंत्राभि
धिमिति	२८०	१	१३	दक्षिणादेय	दक्षिणादेया
ह्रीं	२८१	२	७	ह्स्त्रानमःमुखे	ह्सौंनमःमखे
	,,	,,	९	ह्स्फनमःललाटे	ह्स्फेंनमःललाटे
	२८२	१	६	ह्स्त्रौंकवचा	ह्सौंकवचाय
	२८३	२	१३	शनोऽयतं	शनोऽयुतं
	२८६	१	२	ॐह्रः अनामिका	ॐह्रैंअनामिका
	२८६	१	१	ॐऐंश्रींह्रांह्रींह्रूंह्रौंह्रः	ॐऐंश्रींह्रांह्रींह्रूंह्रौंह्रः
	,,	१	६	ददीप्यमानं	देदीप्यमानं
	,,	,,	,,	ह्रूंह्रांह्रांस्वाहा	ह्रूंह्रींह्रांस्वाहा
	२८७	२	१३	कनकवंणाय	कनकवर्णाय
	२९१	१	५	सुमुह्रर्ते	सुमुहूर्ते
	,,	,,	१	प्रीत्यथं	प्रीत्यर्थं
	२९४	२	१०	देवब्राह्मणं	देयब्राह्मणम्
	२९७	१	८	विधातृदेवताय	विधातृदेवतायै
	३००	२	१	रांविमलायै	रौंविमलायै
	,,	,,	२	रौंअमोघायै	रौंअमोघायै
	,,	,,	१०	उँप्रंप्रज्ञायै	ॐप्रंप्रज्ञायै

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पत्रा०	पृष्ठा०	पं०	अशुद्धं	शुद्धं
३१३	२	१३	भवन्नेश्वरम्	भुवनेश्वरम्
३१४	२	२	जप्ता	जप्त्वा
३१५	१	११	सर्याभिमुखः	सूर्याभिमुखः
३१६	१	१	शांत्यर्थं	शांत्यर्थ
३१७	२	२	अपमृत्य	अपमृत्यु
"	"	१३	उरव्याधि	उदरव्याधि
३२८	२	१३	मृषिभांषितम्	मृषिभाषितम्
३३०	२	८	जपेहोमश्च	जपोहोमश्च

...ानप्रकाशस्थविषयाणांशुद्धिपत्रं समाप्तम् ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection